AMARAKOS'A

[I]

WITH THE UNPUBLISHED SOUTH INDIAN COMMENTARIES

AMARAPADAVIVṚTI OF LINGAYASŪRIN
AND THE
AMARAPADAPĀRIJĀTA OF MALLINATHA

Critically edited with Introduction by
PROFESSOR A. A. RAMANATHAN

SRI AUROBINDO LIBRARY
PONDICHERRY, INDIA

sai 474.1 Amara Koshah
Rama Ramanathan ed.
1.01

Fumigated SEP 1985

But thought nor word can seize eternal truth

THE ADYAR LIBRARY SERIES

VOLUME ONE HUNDRED AND ONE

अमरकोशः

दाक्षिणात्यव्याख्योपेतः

Sai 7/- 418

AMARAKOS'A

[I]

WITH THE UNPUBLISHED SOUTH INDIAN COMMENTARIES

AMARAPADAVIVṚTI OF LIṄGAYASŪRIN
AND THE
AMARAPADAPĀRIJĀTA OF MALLINĀTHA

Critically edited with Introduction by
PROFESSOR A. A. RAMANATHAN

THE ADYAR LIBRARY AND RESEARCH CENTRE

© 1971 The Adyar Library and Research Centre
Adyar, Madras 20, India

SBN 0-7229-7455-8
ISBN 0-8356-7455-X

PRINTED IN INDIA

At the Vasanta Press, The Theosophical Society,
Adyar, Madras 20

ABBREVIATIONS

Abhi. Cint.	*Abhidhānacintāmaṇi* by Hemacandra, CSS, 1964
Abhi. Saṃ.	*Abhidhānasaṃgraha*, NSP, 1889
Ak.	*Amarakośa*
ALB	*The Adyar Library Bulletin*
ALS	Adyar Library Series
Am.	*Amaramaṇḍana* by Kṛṣṇasūri, DCPRI, Poona, 1949
Bhānujī.	Bhānujī Dīkṣita
BSS	Bombay Sanskrit Series
Comm.	Commentary
CSS	Chowkhamba Sanskrit Series, Varanasi.
DCPRI	Deccan College Post-graduate and Research Institute, Poona.
GOS	Gaekwad Oriental Series, Baroda
IHQ	*Indian Historical Quarterly*, Calcutta
JOR	*Journal of Oriental Research*, Madras
Kir.	*Kirātārjunīyam*
Kk.	*Kalpadrukośa*, GOS 42, 1928
Kumāra.	*Kumārasaṃbhava*
Malli.	Mallinātha
Nām.	*Nāmaliṅgānuśāsana*
NCC	*New Catalogus Catalogorum*, University of Madras
NSP	Nirnaya Sagar Press, Bombay
OBA	Oriental Book Agency, Poona
Pt$_2$	*Amarakośa* with *Liṅgābhaṭṭīyam* and Telugu Comm., Vavilla Press, Madras, 1915
Ragh.	*Raghuvaṃśa*
Sūrin	Liṅgayasūrin
Svāmin	Kṣīrasvāmin
TSS	Trivandrum Sanskrit Series
Uttara.	*Uttararāmacarita*
Viśva.	*Viśvaprakāśa*, CSS, 1911
अ. द्र.	अभिधानद्रव्यावली (धन्वन्तरीयनिघण्टुः)

अने. स.	अनेकार्थसमुच्चयः (शाश्वतकोशः)
अ. मा.	अभिधानरत्नमाला (हलायुधः)
काद.	कादम्बरी
काम. नीति.	कामन्दकीयनीतिशास्त्रम्
किरा.	किरातार्जुनीयम्
कु. सं.	कुमारसंभवम्
टी. स.	टीकासर्वस्वम्
द्विसं.	द्विसंधानकाव्यम् (राघवपाण्डवीयम्)
ध. नि.	धन्वन्तरीयनिघण्टुः
नी. श.	नीतिशतकम्
भा. दी.	भानुजीदीक्षितीयम्
भो. प्र.	भोजप्रबन्धः
म. भार.	महाभारतम्
म. स्मृ.	मनुस्मृतिः
मेघ.	मेघदूतम्
रघु.	रघुवंशम्
रामा.	रामायणम्
विक्रम.	विक्रमोर्वशीयम्
वै. प.	वैराग्यपञ्चकम्
शिशु.	शिशुपालवधम्
सौ. ल.	सौन्दर्यलहरी
सं. म.	संगीतमकरन्दः

PREFACE

THE present critical edition of the *Amarakośa* with South Indian commentaries is based on the following MSS.:

MSS. COLLATED FOR THE *Amarapadavivṛti* OF LIṄGAYASŪRIN

1. A Adyar Library. Palm-leaf No. 73403. 33 fo. 47.5 × 3.7 cm. 9 lines in a page. 66 to 75 letters in a line. Grantha. Old. Slightly injured. Clear writing. First Kāṇḍa complete.
2. B_1 Adyar Library. Palm-leaf No. 68733. 89 fo. 37.5 × 3 cm. 8 lines in a page. 50 letters in a line. Grantha. Old. Injured. Good writing. First Kāṇḍa complete and Second Kāṇḍa incomplete.
3. B_2 Adyar Library. Palm-leaf No. 75424. 62 fo. 31 × 4 cm. 9 lines in a page. 50 letters in a line. Grantha. Old. Much injured. Good writing. First Kāṇḍa complete.
4. C Adyar Library. Palm-leaf No. 68734. 35 fo. 31.5 × 4 cm. 8 lines in a page. 42 letters in a line. Grantha. Old. Slightly injured. Good writing. Contains the first Kāṇḍa breaking off in the Digvarga.
5. D_1 Adyar Library. Palm-leaf No. 70545. 73 fo. 41.5 × 4 cm. 7 lines in a page. 56 letters in a line. Grantha. Old. Injured. Good writing. First Kāṇḍa complete. The scribe adds:

सर्वजिन्नामसंवत्सरे मकरमासे षोडशदिने भानुवासरे दक्षिणद्वारकायां दक्षिणविशिखायां श्रीनिवासाचार्येण लिखितम् ।

6. D_2 Adyar Library. Palm-leaf No. 73726. 117 fo. 39.4 × 2.3 cm. 9 lines in a page. 66 letters in a line. Telugu. Old. Slightly injured. Good writing. Breaks off in the Vaiśyavarga in the second Kāṇḍa. Date of copying: Wednesday, 12th day of the dark fortnight of the Phālguna month in the year Prabhava.

7. F_1 Adyar Library. Palm-leaf No. 68735. 12 fo. 37.5 × 3.6 cm. 10 lines in a page. 56 letters in a line. Grantha. Old. Good condition. Clear writing. Second Kāṇḍa incomplete ending in the middle of the Vanauṣadhivarga. The first leaf contains a few lines from the beginning of the first Kāṇḍa.

8. F_2 Tirupati. Palm-leaf No. 1958. 185 fo. 40.2 × 3.1 cm. 7 lines in a page. 67 letters in a line. Telugu. Old. Good writing. Second Kāṇḍa with Telugu comm.

9. G Adyar Library. Palm-leaf No. 68736. 8 fo. 38 × 4 cm. 10 lines in a page. 53 letters in a line. Grantha. Old. Slightly injured. Good writing. Contains a fragment of the second Kāṇḍa. Begins with *oṣadhyo jātimātre syuḥ*.

10. I Adyar Library. Palm-leaf No. 68731. 169 fo. 37 × 2.7 cm. 7 lines in a page. 66 letters in a line. Telugu. Old. Much injured. Clear writing. Contains fragments of the first and second Kāṇḍa-s. Begins with v. 7. Extra leaves found for pp. 4 and 5.

11. J_1 Adyar Library. Palm-leaf No. 71275. 60 fo. 37 × 3.4 cm. 8 to 9 lines in a page. 60 letters

Sai 71- 418

in a line. Telugu. Old. Injured. Good writing. Contains the third Kāṇḍa only.

12. J_2 Mysore. Palm-leaf No. 1770. 90 fo. 40 × 3 cm. 8 lines in a page. 77 letters in a line. Nandināgarī. Old. Much injured. Good writing. Contains the second and third Kāṇḍa-s.

13. K_1 Adyar Library. Palm-leaf No. 74223. 42 fo. 44 × 3.7 cm. 7 lines in a page. 70 letters in a line. Telugu. Old. Injured. Good writing. Contains the first Kāṇḍa incomplete as the last fo. is missing. The fly-leaf contains 7 stanzas of salutation to various gods.

14. K_2 Government Oriental MSS. Library, Madras. Paper No. D 1697. 414 pp. 24 lines in a page. Telugu. Injured. Complete.

15. K_3 Government Oriental MSS. Library, Madras. Palm-leaf No. R 1260. 252 fo. 43 × 3.2 cm. 8 lines in a page. Telugu. Slightly injured. Complete.

16. K_4 Adyar Library. Palm-leaf No. 68732. 119 fo. 42 × 3.6 cm. 6 lines in a page. 58 letters in a line. Telugu. Old. Injured. Good writing. Third Kāṇḍa complete. The scribe adds:

> यादृशं पुस्तकं दृष्टं तादृशं लिखितं मया । अबद्धं वा
> सुबद्धं वा मम दोषो न विद्यते ॥

17. K_5 Tanjavur. Palm-leaf No. 4960. 148 fo. 43 × 3.5 cm. 6 to 10 lines in a page. Grantha. Old. Slightly injured. Good writing. Complete.

18. K_6 Adyar Library. Palm-leaf No. 73922. 156 fo. 42 × 3.2 cm. 7 lines in a page. 58 letters in a line. Telugu. Old. Injured. Good writing. Contains the second and third Kāṇḍa-s complete. The scribe adds:

पार्थिवाब्दे नभोमाससितकामदिने ददौ । सीताराम-प्रभोर्लिङ्गाभट्टीयं केशवद्विजः ॥

19. O Adyar Library. Palm-leaf No. 74124. 100 fo. 42 × 3.5 cm. 6 lines in a page. 56 letters in a line. Telugu. Old. Injured. Good writing. Contains the second and third Kāṇḍa-s complete. Date of copying: Monday, 13th day of the bright fortnight of the month of Puṣya in the year Virodhikṛt.

20. T Adyar Library. Palm-leaf No. 73425. 42 fo. 42.5 × 3 cm. 8 lines in a page. 60 letters in a line. Grantha. Old. Slightly injured. Good writing. Contains the first Kāṇḍa complete.

21. U Mysore. Palm-leaf No. 586. 64 fo. 40.5 × 3 cm. 5 lines in a page. 60 to 62 letters in a line. Telugu. Slightly injured. First Kāṇḍa complete.

22. W_1 Trivandrum. Paper No. 5231. 50 fo. 30.6 × 15 cm. 11 lines in a page. 36 letters in a line. Devanāgarī. Good condition. First Kāṇḍa complete.

23. W_2 Trivandrum. Paper No. 1228. 393 pp. 28 × 22 cm. 20 lines in a page. 25 letters in a line. Devanāgarī. Good condition. Contains the first and second Kāṇḍa-s. Breaks off in the middle of Śūdravarga. Date of copying: 17.10.1102 (M.E.).

24. Y Tirupati. Palm-leaf No. 1907. 79 fo. 46 × 2.5 cm. 5 lines in a page. 74 letters in a line. Grantha. Old. Injured. Good writing. First Kāṇḍa complete.

25. Z_1 Tirupati. Palm-leaf No. 4231. 79 fo. 38.6 × 3.1 cm. 7 lines in a page. 61 letters in a line.

Telugu. Old. Fairly good condition. Third Kāṇḍa complete.

MSS. COLLATED FOR THE *Amarapadapārijāta* OF MALLINĀTHA

26. A_1 Adyar Library. Palm-leaf No. 68740. 46 × 3 cm. 7 lines in a page. 90 letters in a line. Telugu. Old. Injured. Good writing. Complete in three Kāṇḍa-s. Full of scribal errors.

27. B_3 Government Oriental MSS. Library, Madras. Palm-leaf No. D 1696. 333 fo. 7 lines in a page. Telugu. Good condition. Appearance new. Fo. 23 is numbered 61. The succeeding leaves are numbered in order thereafter. Complete.

28. B_4 Government Oriental MSS. Library, Madras. Palm-leaf. No. R 1930. 58 fo. 6 lines in a page. Telugu. Good condition. Fo. 1, 37 to 39 and 56 are left blank. Contains the first Kāṇḍa complete.

29. C_1 Tirupati. Palm-leaf No. 4176. 41 fo. 47 × 3.8 cm. 8 lines in a page. 82 letters in a line. Telugu. Worm-eaten. Third Kāṇḍa complete.

The learned commentary of Bommagaṇṭi Appayārya was available only for the third Kāṇḍa. It will be printed in a further volume and the MSS. collated for the third Kāṇḍa will be described in that volume.

We express our thanks to the Ministry of Education, Government of India, for their grant-in-aid towards the publication of this volume. We are also thankful to the authorities of the Government Oriental MSS. Library, Madras; the Tanjore Maharaja Serfoji's Sarasvati Mahal Library; The Oriental Research Institute, University of Mysore;

The Oriental Research Institute and MSS. Library, University of Kerala, Trivandrum; and Sri Venkateswara University Oriental Research Institute, Tirupati, for lending their MSS. Dr. V. Raghavan and Dr. K. Kunjunni Raja, Advisers to the Adyar Library and Research Centre, rendered help in the preparation of this work in various ways which we gratefully acknowledge. Sri K. T. Venkatarama Sarma helped in the collation of the first Kāṇḍa and the preparation of the index of authors and works and Pandit T. H. Visvanathan read the proofs and saw the work through the press along with the editor.

July 1971.

RADHA BURNIER
Director,
Adyar Library and Research Centre

CONTENTS

PAGE
ABBREVIATIONS .. v
PREFACE .. vii
INTRODUCTION .. xv

प्रथमकाण्डः .. १–१८४

१. स्वर्गवर्गः .. १–५०
२. व्योमवर्गः .. ५०–१
३. दिग्वर्गः .. ५१–७३
४. कालवर्गः .. ७३–९१
५. धीवर्गः .. ९१–१०२
६. वाग्वर्गः .. १०२–१७
७. शब्दादिवर्गः .. ११७–९
८. नाट्यवर्गः .. १२०–४५
९. पातालवर्गः .. १४६–८
१०. भोगिवर्गः .. १४८–५३
११. नरकवर्गः .. १५३–५
१२. वारिवर्गः .. १५६–८४

द्वितीयकाण्डः .. १८५–६४८

१. भूमिवर्गः .. १८५–९४
२. पुरवर्गः .. १९५–२०९
३. शैलवर्गः .. २०९–१४
४. वनौषधिवर्गः .. २१५–३२४
५. सिंहादिवर्गः .. ३२४–६१

PAGE

६. मनुष्यवर्गः .. ३६२–४५०
७. ब्रह्मवर्गः .. ४५०–८४
८. क्षत्रवर्गः .. ४८४–५५३
९. वैश्यवर्गः .. ५५३–६२०
१०. शूद्रवर्गः .. ६२१–४८

INTRODUCTION

THE *Nāmaliṅgānuśāsana*, or the *Amarakośa* as it is popularly called after the name of its author Amarasiṃha, is the most celebrated and authoritative ancient lexicon in the Sanskrit language. Intimate acquaintance with the *Amarakośa* was considered as an essential requisite for a Sanskrit scholar. It is the lexicon most profusely quoted by the commentators on Sanskrit literature. It is concise, comprehensive and indisputably the most memorized dictionary in the world.[1] Its position is similar to that of the *Concise Oxford Dictionary* in English, as most people refer to it and only some advanced scholars have the need to look into more elaborate lexicons. There is hardly any Sanskrit scholar worth the name who is not acquainted with some line or other of this *kośa*.

It is said that the work of Amara is *sanātana* (perpetual or most ancient): *amaro 'yaṃ sanātanaḥ*.[2] No greater tribute can be paid to his thorough mastery of the grammar of Pāṇini than the popular humorous saying that he robbed all the authoritative interpretations of Patañjali's *Mahābhāṣya*:

अमरसिंहो हि पापीयान् सर्वं भाष्यमचूचुरत् ।[3]

Malli. says in one of his concluding verses at the end of Kāṇḍa III that the immortality of Amara's *Nāmaliṅgānuśāsana* is assured as this faultless work will last as long as the moon and the stars shine in the sky:

कवेरमरसिंहस्य कृतिरेषा सुनिर्मला ।
आचन्द्रतारकं स्थेयान्नामलिङ्गानुशासनम् ॥

---

[1] *Ak.* is committed to memory at an early age by pupils.

[2] *Ak.*, BSS, 1886, Introd. p. 1.

[3] *Ak.*, NSP, Bombay 1905, p. 1.

In the beginning of the *Dharaṇikośa* (12th cent.), in verses 2 and 4 respectively, are to be found '*yasya jñānadayāsindhoḥ*', the very beginning of the *Ak.*, and '*samāhṛtyānyatantrāṇi*' (v. 2).[1]

Owing to this popularity, numerous commentaries have been written on it in Sanskrit as well as the regional languages of India.[2] It was translated into Chinese by Guṇarāta of Ujjayinī in the 6th cent. A.D.[3] In Italy, the text in Grantha script with an Italian translation was published in 1798.[4] An edition in French appeared in two volumes in Paris (1839, 1845).[5] The *kośa* was studied in Tibet also, for there is a Tibetan version of it published in 1912.[6] Thus the literature connected with the *Ak.* forms a literature by itself (See *New Catalogus Catalogorum*, vol. 1 (rev.), pp. 318-32).

The earliest beginnings of lexicographical literature in Sanskrit are the Nighaṇṭu-s. They are a collection of Vedic words, intended mainly for helping the interpretation of Vedic texts. The *Nirukta* of Yāska, who is considered older than Pāṇini (4th cent. B.C., Keith), is a commentary on the Nighaṇṭu-s and the most important work of this class. We find in it the derivation and explanation of many

---

[1] Ed. DCPRI, Poona 1968, p. 1.

[2] The principal eds. are
- (*a*) *Ak.* with comm. of Maheśvara, ed. V. Jhalakikar and Dr. R. G. Bhandarkar, BSS, 1886.
- (*b*) *Nām.*, ed. Anundoram Borooah (incomplete), Berhampore 1887.
- (*c*) *Nām.* with comm. of Kṣīrasvāmin, ed. V. G. Oka, Poona 1913.
- (*d*) *Nām.*, rev. ed., OBA, Poona 1941.
- (*e*) *Ak.* with comm. of Bhānujī Dīkṣita, NSP, Bombay 1905.
- (*f*) *Nām.* with comm. of Sarvānanda, *Ṭīkāsarvasva*, TSS 38, 43, 51, 52.

[3] Max Müller, *India: What can It Teach Us?*, p. 328.

[4] *NCC*, vol. I (rev.), ed. V. Raghavan, p. 324.

[5] ibid.

[6] Ed. S. C. Vidyābhūṣaṇa, Bibliotheca Indica, 1912.

Vedic words, and it may thus be considered as the ancestor of the later lexicographical works.[1] But whereas the Nighaṇṭu-s contained not only nominal forms but also verbal ones, the later *kośa-s* restricted themselves to the nominal forms and the indeclinables. Further, the Nighaṇṭu-s confined themselves to the Veda-s,[2] whereas the *kośa-s* dealt with words in classical literature. As in the case of other ancient and mediaeval technical works in India, the *kośa-s* were composed in verse so that they could be committed to memory with comparative ease.

Even within the classical period, Amara had a number of predecessors in the field. Kṣīrasvāmin (11th cent.) mentions that Amara was confused by Bhāguri's identification of a class of prickly nightshade, Nidigdhikā, with Bṛhatī whereas the two are clearly distinct plants.

बृहती तु निदिग्धिकेति भागुरिवाक्याद् ग्रन्थकृद् भ्रान्तः ; यतोऽनयोर्महान् भेदः ।[3]

In the Vaiśya-varga (p. 148) we meet with the remark of Kṣīrasvāmin that Mālākāra was led astray by mistaking *sara* for *śara* in Bhāguri's statement, *etac ca drapsam śaram* and that Amarasiṃha was in his turn misled by the latter. It is thus clear that in the opinion of Kṣīrasvāmin, Bhāguri and Mālākāra preceded Amarasiṃha.[4] Amara himself says in the beginning of his work that he had collected together a number of lexicons then available: *samāhṛtyānya-tantrāṇi* (p. 3).

There is an enumeration of twenty-six *kośa-s* and authors of lexicons, among whom Amara is called *sanātana*.[5] This enumeration is welcome, but the predecessors of Amara such as Vācaspati, Vyāḍi and Bhāguri are mixed up with authors later than Amara, and hence the list is of no chronological value. More to the purpose is the statement of Keśava (A.D. 1660) in his *Kalpadrukośa*:

---

[1] K. Kunjunni Raja, *Indian Theories of Meaning*, ALS 91, p. 33.

[2] Keith, *History* of *Skt. Literature*, p. 412.

[3] *Ak.*, Poona ed. 1941, p. 104.

[4] *Ak.*, K. G. Oka's ed., Introd. p. 5.

[5] *Ak.*, BSS, 1886, Introd. p. 1.

कात्यवाचस्पतिव्याडिभागुर्यमरमङ्गलाः ।
साहसाङ्कमहेशाद्या विजयन्ते जिनान्तिमाः ॥ [1]

Svāmin, the earliest available commentator on Amara, mentions the name of Kātya respectfully, citing him a number of times, e.g.

यत्कात्यः—आदाय मार्गशीर्षाच्च द्वौ द्वौ मासावृतुः स्मृतः । [2]
(Kālavarga, p. 81)

The name of his *kośa* seems to be *Nāmamālā*,[3] for a line quoted by Vāmana (8th cent. A.D.)[4] in his *Kāvyālaṃkārasūtravṛtti* (I. 3. 6) as *Nāmamālāpratīkam*, a portion of *Nāmamālā*, has been ascribed to Kātya by Svāmin:

यत्कात्यः—नीविराग्रन्थनं नार्या जघनस्थस्य वाससः । [5]

The second name in the list, Vācaspati, is mentioned in the same line with Bhāguri and Vyāḍi by lexicographers like Puruṣottamadeva,[6] Maheśvara [7] and Hemacandra [8] and from a verse in the *Hārāvalī* it appears that his work is *Śabdārṇava*.

शब्दार्णव उत्पलिनी संसारावर्त इत्यपि ।
कोशा वाचस्पतिव्याडिविक्रमादित्यनिर्मिताः ॥ (V. 275)

---

[1] *Kk.*, GOS ed., p. 1, v. 2.
[2] *Ak.*, Poona ed., p. 35.
[3] *Kk.*, GOS ed., Introd. p. xiii.
[4] A. Sankaran, *Rasa and Dhvani*, Univ. Madras 1929, p. 29.
[5] *Ak.*, Poona ed., p. 322.
[6] *Hārāvalī*, (*Abhi. Saṃ.*), NSP 1889, v. 275.
[7] *Viśva.*, CSS, 1911, v. 16.
[8] *Abhi. Cint.*, Introd. v. 3.

The work seems to be a collection of synonyms, often giving the correct sounds of words and other forms of the same word.[1] But according to an anonymous commentary on the *Ak.*, the lexicon of Vācaspati is named *Nirṇayadīpikā*.[2]

Vyāḍi is the third name; his work being lost, it cannot be said definitely whether he is the author of the *Saṃgraha* mentioned in the *Mahābhāṣya* or of the *Utpalinī* mentioned by Puruṣottama in the *Hārāvalī*. About the *Saṃgraha* Patañjali says in his *Mahābhāṣya*,

> संग्रहे एतत् प्राधान्येन परीक्षितम् (I. 1. 1)

on which Kaiyaṭa gives the gloss *granthaviśeṣe*, which is further amplified by Nāgojibhaṭṭa as a work consisting of one hundred thousand verses.[3] It is more probable that Vyāḍi's work is *Utpalinī* as mentioned in the *Hārāvalī*, for quotations from Vyāḍi's work are frequently given by Svāmin and later commentators on Amara such as Malli.

> 'अमृतं दिवि खे मोक्षे', 'यज्ञशेषेऽमृताशने' इत्युभयत्र व्याडिः (p. 3)
> 'किसलं स्यात् किसलयं पुंसि क्लीबे च पल्लवम्' इति व्याडिः (p. 224)

But according to Sarvānanda,[4] Vyāḍi's work, like that of Vararuci, deals with genders of words only.[5] But Amaracandra[6] says that the *Utpalinī* is a composition of Vyāḍi; for he cites twice in his *Kāvyakalpalatāparimala* from the *Utpalinī* with the words '*vyāḍikṛtotpalinīmadhyāt*'.[7]

---

[1] कृष्णः पाकः फलो . . . कृष्णपाकफलः, etc. Malli. (p. 255).

[2] *JOR*, Madras, VI, p. 272.

[3] संग्रहो व्याडिकृतो लक्षश्लोकसंख्यको ग्रन्थ इति प्रसिद्धिः (CSS ed., p. 20).

[4] *Ṭīkāsarvasva*, TSS 38, I, p. 2.

[5] यतस्त्रिकाण्डोत्पलिन्यादीनि नाममात्रतन्त्राणि, व्याडिवररुच्यादिप्रणीतानि तु लिङ्गमात्रतन्त्राणि (ibid., p. 3).

[6] *JOR*, Madras, VI, p. 272.

[7] *Kk.*, GOS., Introd. p. xi.

The next author is Bhāguri. There are nearly twenty quotations from his work in Svāmin's commentary; he is also often cited by Sarvānanda[1] and others, including Malli., who cites him a number of times.

'गन्धर्वपृषतश्चेति ज्ञेयाः सारङ्गजातयः' इति भागुरिः (p. 334)

'वाहित्थं वातकुम्भाधः' इति भागुरिः (p. 507)

His work was probably called *Trikāṇḍa*, different of course from Amara's work which also goes by that name: for this we have the authority of Puruṣottama, the author of the *Bhāṣāvṛtti*.[2]

According to tradition Amara is believed to have been one of the 'nine gems' in the court of the legendary king Vikramāditya, the founder of the Vikrama era, whose identity is a mystery, and who is generally believed to have flourished in the first century B.C. The basis for this tradition is the well-known verse from *Jyotirvidābharaṇa*, *Dhanvantarikṣapaṇakāmarasiṃha . . .*'[3] He is earlier than the 6th cent. A.D.; for the *Ak.* was translated into Chinese by Guṇarāta, evidently a Buddhist.[4] The earliest quotation from his work has been traced by Dr. R. G. Bhandarkar to the *Nyāsa* of Jinendrabuddhi, who has been shown to have flourished in the beginning of the 8th cent. A.D.[5] The line in question is '*tantraṃ pradhāne siddhānte*' (*Ak.*, III. 3. 186) which is found quoted in the *Kāśikāvivaraṇapañcikā*.[6] A reference to *Amarakośa* is also found in the *Amoghavṛtti*, commentary on his *Śabdānuśāsana* by Abhinavaśākaṭāyana, which was written between A.D. 814 and 867.[1] K. G. Oka also contends that Amara lived before Candragomin's Vyākaraṇa from which the grammarian Vasurāta (A.D. 480)[2] is said to have learnt his grammar. 'A justifiable inference from this (II. 4. 23) and many other *sūtra-s* is that Candra's grammar was not prior to Amarasiṃha when he wrote his work.'[3] As Keith remarks, the lower limit of his date is dubious,[4] but we have the upper limit in Guṇarāta's Chinese translation in the 6th cent. and we may not be wrong if we assign him to the 4th cent. A.D.

---

[1] तथा च भागुरिः—'कोषमाहुर्हिरण्यं च हेमरूपं कृताकृतम्', *Ṭīkāsarvasva*, III, p. 230. He quotes him 15 times.

[2] *JOR*, Madras, VI, p. 253.

[3] धन्वन्तरिक्षपणकामरसिंहशङ्कुवेतालभट्टघटकर्परकालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य ॥

[4] Max Müller, *India, What can It Teach Us?* (p. 328), quoted in K. G. Oka's ed. of *Ak.*, p. 9, and in *Kk.*, GOS ed., vol. I, p. xvii.

[5] S. K. Belvalkar, *Systems of Skt. Grammar*, p. 38.

[6] *Ak.*, Oka's ed., p. 9.

Amara has been considered a Buddhist and that may be the reason for the translation of the *Ak.* into Chinese by Guṇarāta. Svāmin is of the view that the first verse in the *Ak.*, '*yasya jñānadayāsindhoḥ . .*' has been set forth as the *maṅgalaśloka*, paying homage to Jina, for the purpose of fulfilling the desire to complete the work without impediments.[5] Sarvānanda states that though the salutation is not made to the Buddha expressly the epithet *jñānadayāsindhuḥ* is intended to denote the characteristics of Śākyamuni, i.e. the Buddha.[6] He further suggests that the name of the Buddha has not been mentioned as the author was apprehensive of neglect of his work by orthodox Hindus who disliked the Buddhist heretics.[7]

It is no doubt difficult to disregard the traditional view as propounded by these ancient commentators; but this view has been criticized by other ancient commentators who try to establish that Amara was an orthodox Hindu. They interpret the first verse as a glorification of Lord Viṣṇu and the sea. Neither Sūrin nor Malli. refers to any suggestion of the Buddha in the verse. The former explains

---

[1] V. Raghavan, ed. *NCC*, vol. I (rev.), p. 307.

[2] S. K. Belvalkar, *Systems of Skt. Grammar*, p. 58.

[3] *Ak.*, Oka's ed., p. 8.

[4] Keith, *History of Skt. Literature*, p. 413.

[5] इत्थं ग्रन्थारम्भेऽभीप्सितसिद्धिहेतुं जिनमनुस्मृत्याह। *AK.*, Poona 1941, p. 2.

[6] अत्र चानुक्तोऽपि शाक्यलक्षणार्थो ज्ञानदयादिभिः स्पष्टं प्रतीयते।
AK., TSS 38, I, p. 2.

[7] बौद्धदर्शनविद्वेषिण इह प्रवृत्तिर्न स्यादित्यतोऽत्र बुद्धपदोपादानं न कृतं कविना।
ibid., p. 3.

अस्य विष्णोः क्षयो निवासोऽक्षयः । (p. 1)

and the latter has

अनेन परब्रह्मशब्दब्रह्मणोरुपास्तिराचरिता । (p. 3)

Bhānujī on the other hand emphatically denies any reference to the Buddha or to Jina.

स्वामी तु—'जिनमनुस्मृत्य' इति स्मरणलक्षणं मङ्गलमाह । तन्न । जिनवाचकपदस्यात्रादर्शनात् . . . अमरकर्तुर्जैनत्वे प्रमाणाभावाच्च[1] ।

In the Brahmavarga of the second Kāṇḍa he says:

यूपाग्रं तर्म . . . प्रणीतः संस्कृतोऽनलः । समूह्यः परिचय्यापचय्यावग्नौ प्रयोगिणः । (pp. 461-2)

These details of the sacrifice could hardly be within the ken of a Buddhist. Minute details are furnished for the performance of the Śrāddha ceremony,

पर्येषणा परीष्टिश्च . . सनिस्त्वध्येषणा (p. 469)

and of Vedādhyayana,

पाठे ब्रह्माञ्जलिः . . . (p. 472)
स्वाध्यायः स्याज्जपः सुत्याभिषवः सवनं च सा ।
सर्वैनसामपध्वंसि जप्यं त्रिष्वघमर्षणम् । (p. 477)

There are again minute details such as

अङ्गुल्यग्रे तीर्थं दैवं स्वल्पाङ्गुल्योर्मूले कायम्[2] । (p. 478)

---

[1] *Ak.*, NSP ed., 1905, p. 2.

[2] Incidentally, when Amara is obliged to change the metre for

ध्रुवोपभृज्जुहूर्ना तु स्रुवो भेदाः स्रुचः स्त्रियः ।
उपाकृतः पशुरसौ योऽभिमन्त्र्य क्रतौ हतः ।
परंपराकं शसनं प्रोक्षणं च वधार्थकम् । (p. 465)

Considering the intimate knowledge he exhibits of the Vedic rites, it is possible that Amara was a Hindu who turned Buddhist in the latter part of his life when the *kośa* was written.

The words in the *Ak.* are classified and arranged according to topics as in the modern *Thesaurus of English Words and Phrases*. The *Amarakośa* (Eng. trans. by Colebrooke, Serampore 1808) must have influenced P.M. Roget in preparing his *Thesaurus*, for in his Introduction he refers to 'the Amera Cosha, or *Vocabulary of the Sanscrit Language*, by Amera Sinha' as the earliest attempt to construct a systematic arrangement of ideas with a view to their expression (p. xxvi, 1936 ed.).

Amara has managed to put in a little less than 1500 Anuṣṭubh verses a very large number of words, some of them most refractory,[1] giving all the necessary information regarding meaning and gender in the three Kāṇḍa-s of his work. The first Svarādikāṇḍa has twelve sections or Varga-s, according to Sūrin's commentary, on Svar (69½), Vyoman (1½), Diś (35), Kāla (31½), Dhī (17), Vāc (21½), Śabdādi (4), Nāṭya (38), Pātāla (3), Bhogin (8), Naraka (3½), and Vāri(45). The second Bhūmyādikāṇḍa has ten Varga-s: Pṛthvī (18), Pura (20), Śaila (8), Vanauṣadhi (169½), Siṃhādi (43), Manuṣya (139½), Brahman (57½), Kṣatra (119½), Vaiśya (111) and Śūdra (47). The third Sāmānyakāṇḍa has five Varga-s: Viśeṣyanighna

---

inclusion of certain refractory words in the same place, he chooses some of the most musical varieties such as Vidyunmālā here and Pramāṇikā in

प्रमापणं निबर्हणं निकारणं निशारणम् (p. 549),

which enliven to some extent such a dry subject as a string of synonyms.

[1] दाराः, बल्वजाः (pp. 365, 316).

($112\frac{1}{2}$), Saṃkīrṇa ($42\frac{1}{2}$), Nānārtha (257), Avyaya (23) and Liṅgādisaṃgraha (47).

The title *Nāmaliṅgānuśāsanam* is significant, for it is 'a work treating of names of objects, as well as their genders'. 'Among lexicons of earlier writers, some like *Utpalinī* give only the words, some like the work of Vararuci deal only with genders, but here both are together.'[1] It is well known that the determination of the gender of words in Sanskrit requires a special study and hence a guide like the *Ak.* is indispensable even at the early stages of instruction. Hence the mastery of this lexicon is ordained at a very early stage when a student commences his studies.

Amara lays down the rules of interpretation at the beginning of his work and the devices that are employed for securing brevity. They are firstly to bring together all the available lexicons of his day, such as those of Kātya, Vyāḍi and Bhāguri.[2] The second stage is the selection of words suitable to a concise dictionary (*saṃkṣiptaiḥ*). He had necessarily to use his discrimination and delete a large number of *aprasiddha* words. As he says at the end of the second Kāṇḍa, when certain words are given in the text in a gender that is well known, the forms in other genders can be easily made out, and it is unnecessary to increase the bulk of the volume by their separate inclusion.

उक्ता भूरिप्रयोगत्वादेकस्मिंन् येऽत्र यौगिकाः ।
ताद्धर्म्यादन्यतो वृत्तावूह्या लिङ्गान्तरेऽपि ते ॥ (p. 647)

The third stage consists in setting them in proper order, so that the non-essentials are left out and the arrangement is an improvement on the existing usage (*pratisaṃskṛtaiḥ*). In the fourth stage these selected words are classified according to subjects, Varga-s, such as those dealing with celestial objects, etc. And finally the words are listed along with genders as completely as possible (*saṃpūrṇam ucyate*).

---

[1] The *Amaramaṇḍana* of Kṛṣṇasūri, ed. V. Raghavan, Poona 1949, Introd. p. 17.

[2] अन्यतन्त्राणि व्याडिवररुचिप्रभृतीनां तन्त्राणि, समाहृत्य एकीकृत्य । अत एव संपूर्णमिदम्, यतस्त्रिकाण्डोत्पलिन्यादीनि नाममात्रतन्त्राणि, व्याडिवररुच्यादिप्रणीतानि तु लिङ्गमात्रतन्त्राणि । *Ak.*, TSS 38, I, p. 3.

Although Amara himself is quite definite in the division of the *kośa* into three Kāṇḍa-s and the various Varga-s, some scholars, notably in Germany, have further subdivided[1] the Varga-s into Kīṭaprakaraṇam (p. 337), Aśvaprakaraṇam (p.515), Pāśupālyam (p. 588), etc. In the third Kāṇḍa alone there is a difference of opinion; the commentator Svāmin considered the section on homonymous *avyaya-s* as part of the following Avyaya section, whereas other commentators have generally added this to the Nānārtha section. The commentator Bommagaṇṭi Appayārya has discussed this question at length in the beginning of the Nānārtha Avyaya words. Setting forth arguments on both sides he has come to the conclusion that the *avyaya-s* are separate words and both the sections of the *avyaya*, homonymous and synonymous, should go together and that the Nānārtha section promised at the beginning of the third Kāṇḍa by Amara begins with *kānta* words and ends with *hānta* words. 'The *nānārtha avyaya-s* are also arranged by their finals, although not shown as such in any MS. or edition. Puruṣottama expressly mentions this in his *varṇanirdeśanā* and it has been discussed by Ramānātha and others'.[2] But as the beginning of the homonymous *avyaya-s* is '*avyayāḥ pare*' (III. 3. 239) and as it forms the latter part of the line in the verse dealing with *nānārtha*, it is hardly likely that it forms a separate Varga.

In the first Kāṇḍa alone there is a serious difference of opinion. The commentator Rāyamukuṭa considers that the Svargavarga extends up to the Nāṭyavarga; the commentaries of Svāmin and others in Bengali script have the words '*iti svargavargaḥ*' at the end of the Nāṭyavarga.[1] This is peculiar to the Bengali MSS. and not found in MSS. in other scripts. Moreover this is opposed to the statement of Amara himself who, in the penultimate verse ending the first Kāṇḍa, has clearly stated,

---

[1] These sub-sections or Prakaraṇa-s are mentioned by Sūrin.

[2] *Ak.*, Borooah's ed., p. iv.

उक्तं स्वर्व्योमदिक्कालधीवाक्छब्दादिनाट्यकम् । (p. 183)

dividing the sections as Svar, Vyoman, etc. and further has the concluding line:

स्वरादिकाण्डः प्रथमः साङ्ग एव समर्थितः ।

Thus the names given by Amara to the three Kāṇḍa-s are Svarādi, Bhūmyādi and Sāmānya respectively.

'The text of Amara has been preserved with a fidelity which is not remarkable if we consider the rare attention it has received during the last ten centuries.'[2] But the MSS. show a very large number of variants and they are generally attributed to a deliberate transfer from the commentaries to the text or due to mistakes committed by scribes. This is possible as Svāmin, Malli. and other commentators add a good many lines supplementing the text and ignorant scribes may have transferred them to the text. There is also the possibility of confusion due to the similarity of certain sounds. A classical illustration of a variant in the text due to this cause is *yādavaṃ dhanam* which Subhūticandra has adopted as the text in his *Kāmadhenu* whereas *pādabandhanam* is the text adopted by Svāmin and the later commentators.

सुभूतिटीकायां तु यादवं धनमिति पठितम् (Malli., p. 589)

Sometimes transfer of whole verses has taken place from the commentaries. In the first Kāṇḍa there are thus a number of verses and hemistichs, e.g. on Viṣṇu, Lakṣmī, etc.

---

[1] ibid.

[2] *Ak.*, Borooah's ed., Introd. p. v.

गदाग्रजो मुञ्जकेशो दाशार्हो दशरूपधृत् । (p. 17)
इन्दिरा लोकमाता मा क्षीरोदतनया रमा । (p. 20)

In the second Kāṇḍa a whole verse, '*vipulā gahvarī* . . .' has been added to synonyms of the earth (p. 185). The spurious character of these additions can be determined by the treatment accorded to them by well-known commentators. If they commented on them they may be taken as a genuine part of the text. 'This has been forgotten by Bhānujī in some places, but the Bombay ed. generally marks them as spurious.'[1] But other commentators such as Mukuṭa, Sūrin, Malli. and Bommagaṇṭi are very clear in such cases. They have left them out as spurious additions but have taken care to note doubtful cases (Sūrin, pp. 17, 24).

Śrīharṣa, a late writer of the Telugu country, has written a short work called *Amarakhaṇḍana* [2] assailing Amara's lexicon 'as poor in the words, alternate forms and gender indications'.[3] Amara has failed to follow the principles laid down by himself at the beginning of his work. In the first place his synonyms are very meagre, a large number found in other lexicons having been omitted, e.g. he gives only Uccaiśravas, Mātali and Nandana for Indra's horse, charioteer and garden respectively whereas other lexicons give a number of other well-known names.

'हय उच्चैःश्रवाः नीला(?)शुभ्राङ्गः शक्रवाहनः . . .' इत्यादि पर्यायरत्नमालाविरचितमस्ति । किंच 'मातलिर्माकलिः शक्रसारथिस्तु हयंकषः' इति रभसः । (*JOR*, V, p. 17)

The answer given by *Amaramaṇḍana* against the charge is that Amara has taken, for his concise work, only words in greater currency.

---

[1] *loc. cit.*

[2] *JOR*, V, pp. 16-26, ed. T.R. Chintamani.

[3] *Amaramaṇḍana* of Kṛṣṇasūri, Poona 1959, ed. V. Raghavan, Introd. p. 17.

अस्मत्परिष्कृतसंक्षिप्तपदार्थेनैव तद्दोषपरिहारः सुकरः । (*Am.*, p. 23)

As for the criticism that a large number of words have been given to denote fish,

पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः (p. 166)

ignoring the principle of *saṃkṣepa*, the answer is that these words too are in greater currency and hence could not be omitted.

प्राचुर्यस्यैव विवक्षितत्वे बाधाभावाच्च (*Am.*, p. 23)

The *kośa* of Amara is no doubt admirable but perfection should not be attributed to him, for it will only injure the true greatness of the author, instead of furthering it. No doubt the last section, Liṅgādisaṃgrahavarga, illustrates the brilliance and range of his perceptiveness. But some of his omissions too are somewhat glaring. Among some of the well-known words that he omitted is *kakudmat* (a humped bull, *Ragh.*, IV. 22) which is as old as the *Ṛgveda*. But it must be said in justice to him that he was conscious of the omissions in his concise work and hence he said in the concluding portion of his work,

शेषं तु ज्ञेयं शिष्टप्रयोगतः ।

The text of Amara in this edition is based on the three South Indian commentaries, Liṅgayasūrin's *Amarapadavivṛti*, Mallinātha's *Amarapadapārijāta* and (in the third Kāṇḍa) on Bommagaṇṭi Appayārya's *Amarapadavivaraṇa*. There are a very large number of variants, which have been mentioned by the commentators themselves or are given in the footnotes.

LIṄGAYASŪRIN'S AMARAPADAVIVṚTI

Liṅgayasūrin, the author of the *Amarapadavivṛti*, the first comm. given in the present edition, is also known as Liṅga or Liṅgābhaṭṭa, and his work is popularly known as *Liṅga-(Liṅgā)bhaṭṭīyam.* From the Telugu meanings that he adds to the terms in the Vanauṣadhivarga of Kāṇḍa II and from the fact that most of the MSS. containing his comm. are in the Telugu script, he may be considered to have been a native of Āndhradeśa. His father's name was Vaṅgala Kāmaya Bhaṭṭa according to the colophons. In the introductory verses of his comm. Sūrin speaks respectfully of Kṣīrasvāmin and others whose works he carefully considered before writing his own.

पद्वाक्यप्रमाणज्ञैः क्षीरस्वाम्यादिसूरिभिः । कृतान् ग्रन्थान् समालोच्य (p. 1)

Svāmin's date is known to be the second half of the 11th cent. as he quotes Bhoja (11th cent.)[1] and is in turn cited by Vardhamāna (12th cent.)[2] in his *Gaṇaratnamahodadhi*.[3] Sūrin also quotes Bhojarāja's views when he explains the words to denote the Gandharva-s Hāhā Hūhū as they were considered indeclinables by him.

हाहा हूहू इत्यालापानुकारात् नामद्वयम् । एकनामेत्येके । अव्ययाविति भोजराजः ।
(p. 37)

Thus the lower limit of Sūrin's date may be considered as A.D. 1150.

Malli. whose period may be assigned approximately to the 14th cent.[4] is greatly influenced by Sūrin as can be inferred from a number of identical lines in the works of both and from his express mention of the *Liṅga(Liṅgā)bhaṭṭīyam* (p. 144). He quotes with approval some of Sūrin's explanations, though he does not mention the source by name. Describing *indrāyudha* (rainbow) he gives almost the same line as Sūrin.

---

[1] Keith, *History of Skt. Literature* p. 292.

[2] A.D. 1140, S. K. Belvalkar, *Systems of Skt. Grammar*, p. 53.

[3] *Ak.*, K. G. Oka's ed., Introd. p. 3.

[4] For a discussion on his date, see p. xlvii below.

मेघप्रतिफलितनानावर्णस्य धनुराकारेण दृश्यमानस्य सूर्यकिरणस्य नामेति केचित् । (p. 57)

Identical again is the meaning given by both for *saṃdhyā* (twilight):

दिनान्तादुपरि घटिकात्रयात्मकस्य सूर्योदयात् प्राक् पञ्चघटिकात्मकस्य च कालस्य नामनी । (p. 75, 11. 3-4 and 15-16)

and *prasevaka* (the belly of a lute below the neck):

दण्डावलम्बनायालाबूमूलनिक्षिप्तसंदंशाकारसारदारुनाम । (p. 125);

and *kūpaka* (hole dug in the sandy bed of a river):

शुष्कनद्यादौ जललाभाय क्रियमाणगर्तनाम (p. 161).

When dealing with the word *jṛmbha* (yawn), Malli. mentions the *Liṅgabhaṭṭīyam* by name and politely suggests that his interpretation of the word as 'yawning' is not in accordance with the explanation given in the *Vaijayantī*, the favourite[1] of Malli. In another place, while explaining the word *secana* (p. 164), he adversely criticizes Sūrin without mentioning his name. It is clear from a large number of such examples that Malli. has utilized Sūrin's commentary.

The work of Sūrin is a very valuable accession to the lexicographical literature in Sanskrit. Whereas commentators of lesser merit have sunk into oblivion, Sūrin's commentary has all along been well received, especially in the southern region. The astonishingly large number of variants in his comm. as testified by more than a score of MSS. collated may be considered as a sign of his popularity. He explains all the words of Amara, assigning a distinct origin to each word in the vocabulary. He combines conciseness of expression with fullness of treatment. His motto is similar to that of Mallinātha, the celebrated commentator on the Mahākāvya-s:

---

[1] Malli. quotes 213 times from the *Vaijayantī* in the first two Kāṇḍa-s.

नामूलं लिख्यते किंचित् नानपेक्षितमुच्यते ।

Simple but striking are some of the illustrations that Sūrin furnishes to bring out the different genders in which a word may be used when explaining Amara's text. For example,

त्रिष्वेवं भेद्यगामि यत्, is explained as कष्टा सेवा, कष्टो भृत्यभावः, कष्टं व्याकरणम् (p. 155).

Surely *kaṣṭaṃ vyākaraṇaṃ* which is given by Patañjali himself in his *Mahābhāṣya* will be better appreciated by students learning grammar, than *kaṣṭaṃ viṣabhakṣaṇam* given by Malli. There are some words such as *varga*, *saṃgha*, *kula* and *yūtha* which appear to have the same general meaning of a 'group', but which have to be used distinctly according to the objects to be indicated. Sūrin gives apt illustrations, the word *varga* being employed in such cases as *prāṇivargaḥ*, *kavargaḥ* (group of gutturals), *saṃgha* in *pakṣisaṃghaḥ* (flock of birds), *sārtha* as in *vaṇiksārthaḥ* (caravan of merchants), *kulam* as in *brāhmaṇakulam* (assembly or family of Brāhmaṇa-s) and *yūtham* as in *gajayūtham* (herd of elephants) (pp. 359-60).

Sūrin gives the derivations of words, and brings out their full significance unlike some of the principal commentators who lavish attention on the minute details of grammar, leaving the explanations to take care of themselves. Svāmin no doubt derives most of the words, but in many places the explanation is not full and in some places positively meagre. Worse is the position in Bhānuji's comm.; his derivations are full of grammatical lucubrations, but he explains fully only a very few words. The word *āyattaḥ* (a dependent) in Amara (III. 1. 16) is dealt with thus:

आयतते स्म । 'यती प्रयत्ने' । अकर्मकत्वात् क्तः । (p. 411)

whereas Sūrin explains the meaning as 'a person employed in a particular work':

आयत्यते एककर्मसु नियुज्यत इत्यायत्तः । 'यती प्रयत्ने' ।

In the same context the word *nighnaḥ* (dependent) is explained by Bhānujī as

'निहन्यते निगृह्यते । हन्तेः घञर्थे कः ।

whereas Sūrin says:

[निहन्यते] नियम्यते प्रभुणा तिरस्क्रियत इति निघ्नः ।

Svāmin has:

निहन्यते निघ्नः । घञर्थे कविधानम् (p. 239).

Sarvānanda's explanation too is meagre in most places, though the grammatical derivation is full. For *nighnaḥ* he has

निहन्यत इति निघ्नः । घञर्थे कः ।

and for *āyattaḥ* he has *yatī prayatne*, *ktaḥ* (IV, pp. 7-8).[1]

The word *ājiḥ* (battle) is explained by Svāmin as

आ-अज्यन्ते क्षिप्यन्तेऽत्राजिः (p. 197);

by Sarvānanda as

अज गतिक्षेपणयोः । 'अज्यतिभ्यां च' इति इण् । बाहुलकान्न वीभावः । आजिः (III, p. 139);

and by Bhānujī as '*ajanam.* "*aja gatau*"'. He then gives a number of grammatical rules to show the correctness of the form (p. 343). Sūrin here has

अजन्ति क्षिपन्ति शस्त्राण्यत्रेत्याजिः । 'अज गतिक्षेपणयोः' (p. 545).

Thus the clearness of Sūrin's commentary is self-evident.

The same fullness of explanation is seen in Sūrin's comm. for *tāmrakam* (copper). Svāmin has *tāmyati tāmram* (p. 222); Sarvānanda concerns himself with the derivation only: *āmravat tāmram* (III, p. 235); and Bhānujī has

ताम्यति तम्यते वा । 'तमु काङ्क्षायाम्' रक्, कन् (p. 384);

---

[1] References are to Sarvānanda's *Ṭīkāsarvasva*, TSS ed.

whereas Sūrin gives a plausible explanation of the meaning: It suffers pain when associated with fire or it requires the association of a sour ingredient like tamarind to shine in all its (golden) glory.

> ताम्यति व्यथतेऽग्निसंयोगादिति ताम्रम्। 'तमु ग्लानौ'। ताम्यति काङ्क्षति स्वनैर्मल्यार्थं (सुवर्णनैर्मल्यार्थम् W_2) आम्लरसमिति वा। 'तमु काङ्क्षायाम्'।
> (p. 611)

Again he explains that *piccaṭam* (tin) is so called because it is pounded (tinned) into vessels of other metals like copper either as a thin layer or to form brass, etc.

> पिच्च्यते कुट्टयते घटेष्वनेनेति पिच्चटम्। 'पिच्च कुट्टने' (p. 616)

This clearness of explanation is not found in the other principal commentaries.

Sūrin gives clear instructions to pupils where certain words are likely to confuse them. In the text, *godhūmaḥ sumanaḥ samau* he notes that the word *sumanaḥ* (wheat) is one ending in *a* (*akārānto 'yam*, p. 564). This is helpful as *sumanas* also means a god (p. 7), a flower (p. 225), a variety of jasmine (p. 258) all of which are words ending in *s* or *sakārānta* and Sūrin indicates them as such in their proper places, *sānto 'yam* (p. 258), *sāntaḥ striyām* (p. 226). Similarly in the text *sūtrāṇi nari tantavaḥ*, the word *nari* may sound somewhat puzzling to young students and hence he gives a clear explanation of the word,

> नरीति पुंसि वर्तते तन्तुशब्द इत्यर्थः (p. 637).

The word *spaśa* (spy) is likely to be confused with *sparśa* as it is a better-known word and especially due to the *Dhātusūtra* where *sparśa* occurs (*spaśa bādhanasparśanayoḥ*). Hence he gives the clarification:

> तालव्यान्तो रेफशून्यश्चायं शब्दः (p. 491).

A door is called *kapāṭa* because we get knocks on our heads at it; it is *kavāṭa* as it cuts off breeze:

> कं शिरः पाटयतीति कपाटम् । कं वातं वटति वेष्टयतीति कवाटं वा । (p. 205)

Where the text of Amara is ambiguous or seemingly incomplete Sūrin takes care to see that the student has a clear grasp of the situation. In

> विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः

the numerals 20 and above are treated as singular in number and used both with reference to *saṃkhyeya* (objects to be numbered) and *saṃkhyā* (number) as *viṃśatiḥ paṭāḥ* and *viṃśatiḥ paṭānām*. Sūrin draws our attention to the fact that this is true not merely for numbers 20 and above, but the number 19 too must be added to the list.

> अत्र विंशतिशब्देन एकोनविंशतिशब्दो विज्ञेयः ।
> एकोनविंशत्याद्याः नवतिशब्दपर्यन्ताः सर्वाः संख्याः . . . (p. 603)

This clarification is not found in the other principal commentaries though the OBA ed. of Svāmin's comm. adds this within square brackets (p. 219). Again the definition of *viśeṣyanighna* (word dependent for its gender, etc. on a substantive) given by Amara, *strīdārādyaiḥ. . .tasya bhedakāḥ* (III. 1. 2) is a hard nut to crack and few students will be able to grasp its significance. In such cases, Sūrin comes out with an independent explanation of the verse.

> तात्पर्यार्थस्तु—यस्य विशेष्यस्य यानि विशेषणानि तानि तल्लिङ्गान्येव भवन्तीत्यर्थः । (V. 2)

In cases of exceptionally peculiar derivation, attention is drawn to those abnormalities. In *druvayam* (measure) the change of *ma* to *va* is pointed out, *makārasya vakārādeśo bhavati* (p. 604) avoiding the technical detail that *vaya* is substituted after the word *dru* (wood) in the sense of a measure, *māne vayaḥ* (IV. 3. 162). A similar popular clarification, avoiding Pāṇini's aphorisms, is seen in the next word *pāyyam*, having the same meaning.

मीयतेऽनेनेति पाय्यम् । धात्वादेर्मकारस्य पकारादेशः । (p. 604)

although the grammatical explanation is that Pāṇini has used the word 'irregularly' in the *sūtra*: *pāyyasāṃnāyya*. . . (III. 1. 129).

The *avatārika-s* or brief introductions to new subjects, when a large number of topics are dealt with in a Varga by Amara, facilitate the location of a connected topic in a continuous text. Thus in the beginning of the Brahmavarga in Kāṇḍa II when Amara lists the words for the offsprings of the people of all classes Sūrin has the *avatārikā*:

इदानीं सर्ववर्णानां संकीर्णजातीनां सामान्यसंततेर्नामानि प्रथममाह—संततिरिति । (p. 451)

Similarly when Amara begins the topic of cowherds, etc. immediately after enumerating words like *paryāptam* and *yathepsitam*, Sūrin's brief introduction to the new topic of 'protection of cows' is quite necessary and welcome: *idānīṃ pāśupālyam āha* (p. 588). When Amara begins the Śūdravarga, Sūrin introduces it appropriately as the next subject in the series dealing with Brāhmaṇa, Kṣatriya and Vaiśya topics.

अथ क्रमप्राप्तां शूद्रवर्गविवृतिमुपक्रमते । (p. 620)

Although Amara gives only the names of Varga-s, the separate mention of the heads of subjects by Sūrin is extremely useful, e.g. *kīṭaprakaraṇaṃ samāptam* (p. 337), *aśvaprakaraṇaṃ samāptam* (p. 515).

The concluding verses of Amara at the end of the Kāṇḍa-s (*kāṇḍasamāpti*) are fully explained by Sūrin, giving such hints as

स्वर्गे देवतादि, दिशि दिग्गजादि, काले उपरागादि,

etc. for Amara's crisp mention of associated words (*eṣāṃ ca saṃgatam*), unlike Malli. and Bhānujī. Sūrin realizes that readers generally remember the main topics only and hence he reminds them of the associated words such as *naukā* (boat) in dealing with Vārivarga.

As variants in the text of Amara have crept in in large numbers in the course of centuries,[1] Sūrin has mentioned them even though he gives his own choice for adoption as the correct text. In explaining *pāripārśvaka-s* (attendants on the sun), Sūrin mentions the reading *pāripārśvaga-s* (*pāripārśvagāḥ iti vā pāṭhaḥ*), though the MS. K_5 notes another reading *pāripārśvika-s* (*pāripārśvikā iti vā pāṭhaḥ*, fn., p. 71).

Again in the section on plants Amara gives *kālā* and *sthālī* as names of two plants. Sūrin here notes a number of readings and explains them:

कृष्णवृन्तत्वात् काला। रसाधारकुम्भत्वात् स्थाली। काचस्थालीति पाठे काचवर्णा स्थाली वृन्तमस्या अस्तीति काचस्थाली। कालस्थालीति पाठे कालवर्णस्थालीत्वात् कालस्थाली। साचस्थालीति पाठे सा च स्थालीति पदच्छेदः। (p. 248)

An important reading mentioned by Sūrin is with reference to domestic animals discussed by Amara in *gomahiṣyādikaṃ pādabandhanam*. Sūrin says that there is a variant reading *yādavaṃ dhanam* in the place of *pādabandhanam*, and also explains the significance of that reading.

यादवं धनमिति पाठे गोमहिष्यादिकं धनम् (p. 588)

This reading is evidently based on the comm. *Kāmadhenu* of Subhūticandra, as mentioned by Malli.[1] (p. 589). The god Brahmā, the first in the Trinity, is called Viriñci as he proffers life to all: *viriṇaktīti viriñciḥ* (p. 14); or because he separates the different species of his creation: *vicir pṛthagbhāve*. Sūrin also gives an alternate reading *viriñcaḥ* which would mean the god who is borne by birds, namely swans:

---

[1] See infra p. xxvi.

विभिः हंसै रिच्यत उह्यते विरिञ्चः इति वा पाठः ।

The readings mentioned above are but a few specimens out of the hundreds which he has indicated and explained.

When a word has a meaning which is not directly connected with its derivation, it is called *rūḍha*.[1] The origin of such words has been forgotten. In such cases a commentator has to resort to imagination to establish the meaningfulness of the word. The word *pūpa* (flattened cake) in Amara's *pūpo 'pūpaḥ piṣṭakaḥ syāt* is so called, says Sūrin, because the ashes from the fire in which it has been cooked have been rubbed off!

पूयते पाकसमये लग्नं भस्म मृज्यतेऽस्येति पूपः । पूञ् पवने । (p. 583)

Amara gives *sūta* as one of the synonyms of mercury: *rasaḥ sūtaś ca pārade.* Sūrin's explanation of the word is based on the popular belief that gold can be produced out of mercury: *sūte hemādikam iti sūtaḥ* (p. 612). His explanation of *maireya* (a kind of intoxicating drink) is that it eclipses ordinary liquors.

इरां सामान्यसुरां स्वरुच्या मेति प्रतिषेधयतीति मेरा । सैव मैरेयम् । (p. 644).

A pupil is called *chātra* because he screens, out of a sense of respect and gratitude, the defects of his preceptor:

गुरोरसच्चरितं छादयतीति छात्रः । (p. 457)[2]

A subtle sense of humour is also seen in Sūrin's explanations: The word *nānā* given in the Avyaya section of Kāṇḍa III has the well-known meaning of 'in different ways' as well as 'without'. To illustrate the latter meaning Sūrin says,

---

[1] K. K. Raja, *Indian Theories of Meaning*, ALS 91, 2nd ed., p. 60.

[2] It is more likely that he is an umbrella bearer, when the preceptor goes out in the sun; for the greatest fun that a boy gets in student life is in the exposure of the mannerisms and weaknesses of the teacher. cf. *Mahābhāṣya* on Pāṇini, IV. 4. 62; see also *ALB* 29, p. 181 n.

नाना नारीं निष्फला लोकयात्रा ।

The line has a double significance, for it applies to the performance of *dharma* in participation with the life-partner as well as a life of pleasure in her company (III. 4. 3). The same kind of humorous suggestion is seen in the explanation of the word *riktham* (wealth), as that which (being hard earned by the father) is squandered by the sons:

रिच्यते पुत्रादिना निःसार्यत इति रिक्थम् । (p. 607)

Some words can convey a clear picture to the mind only if a full description of the object is given:[1] *navanītaṃ navoddhṛtam* does not convey a picture of the object in question, namely fresh butter. Here, Sūrin gives a full description:

नवं तत्कालदध्नो मन्थनानन्तरं नीतं नवनीतम् ;

and

मथनानन्तरं दध्नो विनिर्गतस्य सर्पिषः प्रकृतिभूतस्य सारांशस्य नामनी । (p. 585)

Similar is the case with *pṛthuka* which is parched and flattened rice.

सार्द्रान् व्रीहीन् भृष्टान् कृत्वा उलूखले मुसलेन कुट्टयित्वा भक्ष्यत्वेन कल्पितानां नामनी । (p. 582)

The somewhat heavy dependence on such an established authority as Svāmin sometimes lands him in questionable derivations. The word *vitunnakam* (coriander seed) is derived by Svāmin as:

---

[1] Hence Bhavabhūti's humorous description of a horse in *Uttara*. (IV.27) to ascetic boys who had not seen such an animal before (*paścāt pucchaṃ vahati . . .*).

वितुदति मन्दाग्नित्वं वितुन्नकम् (p. 208).

Sūrin, evidently following Svāmin says,

वितुदति रोगान्नाशयतीति वितुन्नकम् । 'तुद व्यथने' (p. 576).

Bhānujī points out the error in such a derivation (p. 363):

यत्तु वितुदति मन्दाग्निमिति स्वामी । तन्न । सकर्मकात् कर्तरि वर्तमाने क्तस्याभावात् ।

On occasions, Sūrin's explanation is not quite happy; e.g. *patadgrahaḥ* is said to be a vessel (p. 572) although it is more appropriate for a spittoon.

Popular interpretations constitute a feature of Sūrin's commentary: For example, Svāmin's interpretation of *yathepsitam* is

ईप्सितमनतिक्रम्य यथेप्सितम् (p. 212),

while Bhānujī says,

आप्तुमिष्टम् । सन् । क्तः । 'अव्ययं विभक्ति . . .' इत्यव्ययीभावः । (p. 371)

Sarvānanda's explanation is similar to the one of Svāmin:

ईप्सितस्यानतिक्रमो यथेप्सितम् । (III, p. 200)

Sūrin however has:

आप्तुमिच्छा ईप्सा । अस्या अधिकं यथेप्सितम् । यस्य कस्यापि वस्तुनः इच्छाधिक्योपेतस्य नाम । (p. 588)

Similarly *gosaṃkhyaḥ*, which is a synonym for *gopaḥ* (cowherd), is explained by Sūrin as a person tending cattle, who not only counts the number of cows after their return from pasture, but tells the owner that all of them have safely reached the cowpen:

गाः संचष्टे गोमिने तव गावः सुखेनागता इति गोसंख्यः । (p. 588)

This thoughtful interpretation is not found in the principal commentaries.

The brevity of Amara being sometimes reminiscent of Pāṇini's *sūtra-s*, Sūrin fulfils the role of the Bhāṣyakāra. The words *hālika* and *sairika* are defined by Amara as

खनति तेन तद्वोढास्येदं हालिकसैरिकौ । (p. 591)

Sūrin brings the above aphoristical statement within the realm of intelligibility by saying:

हलेन खनतीति हालिकः । हलं वहतीति हालिकः । हलस्य संबन्धी हालिकः । हलेन खनतः, हलं वहतः, हलसंबन्धिनो वा बलीवर्दस्य नामनी । (p. 592)

i.e. oxen utilized for ploughing or drawing carts. Similar is the explanation of the word *sairika.*

Some words in Amara's text are *deśya*, local words of popular origin; for even such a conservative and classical language as Sanskrit is not completely immune to the influence of the regional languages. Sūrin points out that some words, more especially names of plants in the Vanauṣadhivarga, are of Prakrit origin. The word *phaṇijjaka* (citron tree), Sūrin says, has been adopted from the vernacular, *phaṇijjakaśabdo deśyaḥ* (p. 262). The milk-hedge plant is variously named *sihuṇḍa*, *siṃhuṇḍa* and *sīhuṇḍa.* Dhanvantari and Svāmin recognize the Prakrit form *sīhuṇḍa;* but Sūrin gives *siṃhuṇḍa* only and explains that it is only irregularly formed with the loss of *ta* in *siṃhatuṇḍa* (resembling the mouth of a lion).

सिंहतुण्डाभशाखात्वात् सिंहुण्डः । तकारलोपः । (p. 277)

The word *indindira* (bee) is given by Sūrin as an additional variant of a doubtful character (p. 351); Svāmin considers it a *deśya* word, but Sūrin has no comment to offer.

While avoiding the intricacies of grammar, Sūrin quotes the *Dhātupāṭha* at every step, sometimes in a form slightly different from what is in modern editions, which may indicate the oral tradition prevalent in his day. Thus in MSS. K_2, K_6 and Pt_2, *kuṇa śabde* takes the place of the later *kuṇa śabdopakaraṇayoḥ*.[1] Again most of the MSS. give *srambhu viśvāse* (p. 497) instead of *srambhu pramāde viśvāse ca*.[2] The MSS. also indicate Sūrin's fondness for combining *dhātu-s* that have the same meaning. Thus in the place of *lāja bharjane bhartsane ca*[3] K_5, K_6 give *lāja lāji bharjane* (p. 582). Similarly *aghi laghi gatyākṣepe* (p. 593)[4] is the combined result of *aghi gatyākṣepe* and *laghi gatau*.[5] The *Dhātupāṭha* given in MSS. K_5, K_6 as *karva kharva garva darpe* (p. 610) is a combination of the three roots having the same meaning. Numerous are such combinations scattered throughout Sūrin's commentary. He has also the merit of explaining some difficult or unusual words found in the *Dhātusūtra-s*. In *añjū vyaktimrakṣaṇakāntigatiṣu* (p.585) regarding *mrakṣaṇa* he gives the additional information *mrakṣaṇaṃ secanam*. Similarly he mentions *cakyārthaḥ tṛptyarthaḥ* (p. 587) in the *Dhātusūtra*, *suha cakyārthe* in the context of deriving the word *sauhityam* (satisfaction).

There are some well-known words in Amara for which Sūrin gives a number of alternate derivations without straining the meaning, and showing the depth of his knowledge of grammar. *Surāḥ* (gods) is derived in six ways as those possessing power and prosperity:

सुरन्तीति सुराः । 'सुर ऐश्वर्ये';

those who are resplendent:

सुष्ठु राजन्तीति वा । 'राजृ दीप्तौ';

those who gracefully receive offerings made with devotion:

भक्त्या दत्तं सुष्ठु रान्तीति वा । 'रा आदाने';

---

[1] *Bṛhat-dhāturūpāvali*, ed. T. R. Krishnacharya, Kumbakonam, p. 400.
[2] ibid., p. 546. [3] ibid., p. 505. [4] ibid., p. 379. [5] ibid., p. 502.

those who give welfare:

शुभं रान्तीति वा । 'रा दाने';

those who possess the superior wine churned out of the milky ocean:

अब्धिजा सुरा येषामस्तीति वा;

those who fulfil the desires of devotees well:

सुष्ठु वाञ्छितफलं रान्तीति वा । 'रा दाने' (p. 8).

Similarly he derives Rudra (Śiva) in three ways (pp. 9-10), *asura* (demon) in five ways (p. 11) and Kumāra (Subrahmaṇya) in four ways (p. 29). When deriving *bhagavat* (venerable person) he quotes the verse which describes the characteristics such as power, valour, fame, prosperity, wisdom, etc.: *aiśvaryasya samagrasya*. . .' (p. 12).

Amara has set forth in the beginning of his work certain devices for indicating the genders of words, etc. whose significance is explained with suitable illustrations by Sūrin. The first device is that the distinction of gender is made by the form of the word such as the endings in *a*; *ā*, *ī* or *ū*; and *am* for mas., fem. and neuter gender respectively.

स्त्रीपुंनपुंसकं प्रायेण रूपभेदेन ज्ञेयम् । तद्यथा—बुद्धिर्मनीषा धिषणा ।

In some places, genders are clarified by the proximity of other words:

कुत्रचित् साहचर्यात् ज्ञेयम् । तद्यथा—तटित् सौदामिनी ।

In other places where genders have to be mixed up, special directions are given:

क्वचित् तेषां लिङ्गानां विशेषविधेः ज्ञेयम् । कथम्? भेरिः स्त्री दुन्दुभिः पुमान् । (p. 3)

Similarly, other devices employed by Amara such as the avoidance of Dvandva compounds in which words of different genders are mixed up, are all elucidated by Sūrin.

The Nānārtha-(homonymous)varga is the biggest section in *Ak.;* still the author says that only some homonymous words have been dealt with in this section, beginning with words that end in *ka* (*nāka*) and ending with those that end in *ha* (*paribharha*).

नानार्थाः केऽपि कान्तादिवर्गेष्वेवात्र कीर्तिताः ।

Sūrin says at the very outset of this Varga that he intends to include meanings left out by the author due to his fear of increasing the bulk of the work:

अनुक्ता ग्रन्थकारेण ग्रन्थगौरवभीरुणा । (v. 1)

The inclusion of additional meanings necessarily obliges him to recast the original verses of Amara, retaining, as far as possible, Amara's own words. These alterations and additions have been noted from time to time in various lexicons after Amara, such as the *Vaijayantī*, *Viśvaprakāśa* and *Abhidhānaratnamālā*. Sūrin says that he consulted such works as were available to him:

तन्त्रान्तरस्थो नानार्थपदस्यार्थो यथामति ।

His explanations are in prose in between the verses, e.g. for *ākāśe tridive nākaḥ*, Sūrin has the version

अम्बरे सुरलोके च नाकशब्दः प्रकीर्तितः ।

explained as

न विद्यतेऽकं दुःखमत्रेति नाकः ।

The word *kṣveḍā* (poison, etc.) is dismissed by Amara with *kṣveḍā vaṃśabalākāpi*, no doubt referring to his *kṣveḍā tu siṃhanādaḥ syāt* in the Kṣatriyavarga (p. 546). Sūrin elaborates it by giving more than ten meanings:

कर्णरोगे विषे ध्याने दुर्लभे कुटिले शणे ।

लोहिताक्षे फले चैव भटानां सिंहनिःस्वने ।
क्ष्वेडा वंशशलाकायां भटे दन्तोष्ठवाद्यके । (v. 92)

Another feature in the Nānārtha section, helpful to students, is the addition of the meanings of the words in fem. gender which have a large number of senses unconnected with the word in the mas. The word *hariṇī* is dealt with by the side of *hariṇah* bringing out the additional meanings possessed by the former (v. 107) such as the name of a goddess, a metre, a golden statue, etc.

हरिणी सुरयोषायां वृत्तभेदपिशङ्गयोः ।
कनकप्रतिमायां च मृगीहरितयोरपि ॥

Similarly *vanita* (begging, etc.) which is used in all the three genders has the distinctive meaning of a young (passionate) woman in the fem. (*vanitā*).

याचिते सेविते प्राप्ते वनितं स्यात् त्रिलिङ्गकम् ।
अत्यन्तजातानुरागयोषायां वनिता भवेत् ॥ (v. 158)

Quotations by Sūrin from well-known authors are few and far between unlike Malli. whose citations are very large in number and Bommagaṇṭi who is moderate in this regard. But in the Avyaya section, he quotes liberally. For *nūnam* (surely) he cites:

क्षुद्रेऽपि नूनं शरणं प्रपन्ने . . . (*Kumāra.*, I. 12) ;

for *vā* (or):

अरावणमरामं वा जगत् . . . (*Raghu.*, XII. 83);

for *nāma* (indeed):

अमृतं नाम यत्सन्तः . . . (*Śiśu.*, II. 107);

and for *khalu* (indeed):

प्रवृत्तिसाराः खलु मादृशां गिरः (*Kir.*, 1. 25).

Liṅgayasūrin was a scholar of profound learning. His thorough acquaintance with the *pañcamahākāvya-s* is seen from the quotations in the Avyaya section of the Nānārthavarga in Kāṇḍa III. That his net is a wide one is proved from such lines as

अथातो दर्शपूर्णमासौ व्याख्यास्यामः ।

from the *Śrautasūtra* of Āpastamba (I. 1). He also mentions the grammarian Bhojarāja (p. 37). His eclectic mind includes a considerable acquaintance with Buddhist philosophy. He mentions the various temptations that stand in the way of the spiritual aspirant:

बौद्धास्तु स्कन्धमारः क्लेशमारो मृत्युमारो देवपुत्रमारश्चेति चतुरो मारानाहुः(p. 12),

the six special characteristics possessed by the enlightened one, *divyaṃ cakṣuḥ divyaṃ śrotram* and the ten sources of his strength, *dāntikṣāntiśīla*. . . (p. 12). The citation from Kāmandaka reveals his close acquaintance with political science (p. 530).

Telugu equivalents are given by Sūrin in the Vanauṣadhivarga, but unlike Malli. who gives Telugu words for all and sundry, he does not approve of introducing other languages in explaining Skt. words. In fact, Sūrin's commentary is very popular in regions where Tamil is the main language spoken. It is only from verse 20 onwards in this section, and that too only when absolutely necessary that he gives Telugu meanings.

इह वृक्षलतौषधीनां नामान्यान्ध्रभाषयैव वक्ष्यामः । (p. 229)

The Telugu words found in the various MSS. are not uniform; *pratti*, *patti* and *putti* are given as Telugu equivalents of *kārpāsa* (cotton). It may be inferred that the names vary slightly according to the particular localities of the Telugu country. MS. J_2 gives *hatti*, which is evidently a Kannada word.

MALLINĀTHA'S AMARAPADAPĀRIJĀTA

Mallinātha, the author of the *Amarapadapārijāta*, the second comm. given in this edition is to be distinguished from his well-known namesake, the commentator on the *pañcamahākāvya-s*. This commentator on the *Ak.* too hails from the Andhra country as testified by his liberal use of Telugu equivalents in all the three Kāṇḍa-s. His father was Nṛsiṃhasūrin [1] of the Śrīvatsagotra. He also gives his family name as Bollāṭinmi:

बोल्लाटिन्मिनृसिंहसूरितनयः श्रीमल्लिनाथो . . . ।

He states in the introductory verse (p. 2) that he made a thorough study of the *ṭīkā* of Subhūti, as also the comms. *Amarabhāṣya* and *Amaravārttika*, etc:

टीकां सुभूतेः . . . अमरभाष्यवार्त्तिकमुखान् ग्रन्थान् बहूनादरात् ।

Malli. confines himself to bringing out the meaning when it differs from the interpretation of his predecessors. The great task he undertakes is to supply the omissions in *Ak.* This included collecting a list of words which were either rarely used or had fallen into disuse, which Amara did not mention.

---

[1] In one MS. (A_1) it is said in v. 7 that Nṛsiṃha, proficient in the three Veda-s, was his paternal grandfather (*nṛsiṃho yatpitāmahaḥ*) and Tripurāri his great grandfather. But in v. 2 (12th in A_1) it is stated that he was the son of Nṛsiṃhasūrin (*nṛsiṃhasūritanayaḥ śrīmallinātho mudā*). In v. 8 (A_1) it is said that his father was called Nāganāthasudhī (*śrī nāganāthasudhiyaṃ namāmi janakaṃ mama*). But as MS. A_1 in general, and the introductory verses in particular, are somewhat unreliable and as the colophon at the end of each Varga mentions Nṛsiṃha as his father (*srīvatsanṛsiṃhasūrisutamallināthasūri. . .*) we can take it that he was the son of Nṛsiṃha. Two or three colophons in A_1 mention the name of the author as Mallikārjuna. He might have been thus affectionately addressed by his friends or more probably it is a scribal error.

Malli. quotes frequently from the *Ṭīkāsarvasva* assigned to A.D. 1159,[1] mentioning Sarvānanda by name a number of times (11). He also quotes a verse (p. 438) from the *Vairāgyapañcaka* of Vedāntadeśika (b. A.D. 1268).[2] Hence the lower limit of his date may be placed in the beginning of the 14th cent. Malli. should have lived long before Bhānujī, for his quotations of Gopālita are identical with those attributed to Bopālita in the same context by Bhānujī.[3] Rāyamukuṭa, the author of the *Padacandrikā* (A.D. 1431,[4] 1470[5]) is never mentioned by Malli. The absence of any mention of the *Siddhāntakaumudī* suggests that Malli. wrote his comm. before the 17th cent.

The introductory (*paribhāṣā*) verses of Amara are explained clearly by Malli. with a large number of illustrations, pointing out the significance of words often missed by other commentators. Svāmin, Sūrin, Bhānujī and others take the meaning of *ca* only as 'and' in combining *rūpabheda* and *sāhacarya* in:

प्रायशो रूपभेदेन साहचर्याच्च कुत्रचित् (p. 3).

But it is indicatory (*upalakṣaṇa*); it is not *rūpabheda* and *sāhacarya* alone that give an indication of the gender of a word. Malli. observes that the gender is sometimes indicated by the affix (*pratyaya*), e.g. *ktin* to denote the fem. in words like *vibhūti* and *bhūti*:

---

[1] T. Ganapati Sastri, *Ak.*, TSS 38, Preface p. ii.

इदानीं चैकाशीतिवर्षाधिकसहस्रैकपर्यन्तेन (१०८१) शकाब्दकालेन . . .

[2] *The Philosophy of Viśiṣṭādvaita* by P. N. Srinivasachari, ALS 39, 2nd ed., p. 526.

[3] Malli: 'वलिकः (वलीकः B_3) पटलप्रान्त इत्यपि' इति पुंस्काण्डे गोपालितः (p. 204).
Bhānujī: 'वलीकः पटलप्रान्ते' इति पुंस्काण्डे बोपालितात् . . . (p. 138)
Malli: 'लोष्टुः शण्डेऽपि लोष्टः स्यात्' इति गो(बो)पालितः (p. 560).
Bhānujī: 'लोष्टुः शण्ढेऽपि लोष्टः स्यात्' इति बोपालितः (p. 351).

[4] R. G. Bhandarkar, Preface to *Mālatīmādhava*, p. xxi.

[5] *IHQ*, XVII, p. 467.

विभूतिर्भूतिरैश्वर्यम् । विभूतिभूतिशब्दौ क्तिन्नन्तत्वात् स्त्रीलिङ्गौ । (p. 27)

Sometimes the nature of the compound indicates the gender: *rāśiḥ*[1] is known to be mas. because of its association with *puñja* in the compound *puñjarāśī tūtkaraḥ kūṭam astriyām* and as Dvandva compounds are not employed by Amara when their components are of different genders. Malli. sees in the use of *ca*, such additions as *pratyaya* and *samāsa* indicatory of gender:

चशब्दः प्रत्ययाद्युपलक्षणार्थम् । विभूतिर्भूतिरैश्वर्यमित्यत्र प्रत्ययो लिङ्गस्य गमको भवति । पुञ्जराशी तूत्करः कूटमस्त्रियामित्यत्र समासो लिङ्गस्य गमको भवति । (p. 4)

The word *krama* again in '*kramādṛte*' (v. 4) is interpreted in a novel way. When referring to the prohibition of Dvandva compounds, *krama* means that all words with the same meaning but differing in gender should be given separately.

अत्र पार्थक्यमेव क्रमशब्दार्थः ।

In prohibiting *ekaśeṣa samāsa*, the word *krama* means the separate mention of all the words individually.

नाली नालं च । अत्र सर्वपदोक्तिरेव क्रमशब्दार्थः ।

In the prohibition of *saṃkara* ('mix up'), words of different genders must be separated as *stavaḥ* and *stotram* are separated from *stutiḥ* and *nutiḥ*,[2] the latter two ending in *ktin* being fem. in gender.

अत्र विभाग एव क्रमशब्दार्थः ।

Having said '*bhedākhyānāya na dvandvaḥ*' (p. 4), how does Amara use the compound *māsarācāmanisrāvāḥ* in giving the synonyms of 'scum of boiled rice'? But in this case there is a possibility of construing the ending as fem. also; hence

---

[1] This word is both mas. and fem. according to later commentators.

[2] स्तवः स्तोत्रं स्तुतिर्नुतिः । (p. 110).

Malli.'s observant eye detects that the mas. ending of *māsara* and *ācāma* should dispel all such misapprehension:

द्वन्द्वान्तश्रूयमाणपुंस्त्वानि (p. 584).

Great care is taken by Malli. where mispronunciation of sibilant sounds is generally observed.[1] Regarding Śunāsīra (Indra), Malli. says the initial sibilant is a palatal and not the dental sibilant *s*; he quotes as authority

शुनासीरेणेति हरिप्रबोधयमकात् ताल्व्यादिः (p. 32)

and points out that the word is spelt as *sunāsīraḥ* also, quoting *Āścaryamañjarī*:

शक्र इव नाकविख्यातसुनासीरः इत्याश्चर्यमञ्जरीश्लेषाद् दन्त्यः (p. 31).

Though Malli. does not as a rule give the derivation of words, he does so when a particular sound is irregular, doubtful or novel, e.g. in *aṅgaṇam* (courtyard) the cerebralization of *na* is irregular as pointed out by Subhūti:

अङ्गत्यस्मिन्निति अङ्गणम्। पृषोदरादित्वाण्णत्वमिति सुभूतिटीका। अङ्गनमिति च कतिचन कथयन्ति। (p. 203)

Similarly, in *kavāṭaḥ* (door), the middle sound can also be a labial as per the *Rabhasakośa*:

पवर्गमध्य इति रभसकोशकारेणाभ्यधायि; कपाटः कपाटीति (p. 206).

Amara gives *carmakaṣā* as a synonym for *saptalā* (soap tree); Malli. notes that the sibilant may be *sa*, as the *Subhūtiṭīkā* sanctions it:

. . . चर्मकसेति दन्त्योपधः सुभूतिटीकायां व्युत्पादितः। (p. 303)

In this context, he gives a whole verse describing its merits and the place where it is commonly found. Other examples are *dṛṣad* (stone) which may be *dṛśad* on the authority of Aruṇadatta and others:

---

[1] शशः षषो मा भूत् (*Mahābhāṣya*, I. 1. 1).

. . . दृषदः इत्यूष्मभेदपाठान्मूर्धन्यः । . . . दृशत्रिंशः . . . इत्यरुणदत्तलिङ्गानुशासनपाठात् तालव्यमध्यः (p. 211);

bṛsī (ascetic's seat made of holy *darbha* grass) which is *bṛsī* according to Candragomin and *bṛṣī* in the *Viśvaprakāśikā*:

. . . बृसिमांसीति दन्त्यान्तेषु चन्द्रगोमिः । . . . बृषीति मूर्धन्यान्तेषु विश्वप्रकाशिका (p. 477);

iṣīkā (an elephant's eyeball; 'the under-surface of the top of the eye-socket of an elephant'[1]) and not *īṣikā* as per some of the principal commentators such as Svāmin and Sūrin (p. 506). Numerous are such clarifications of pronunciation given by Malli., his statements being always supported by appropriate authorities.

As a text becomes more and more popular, variants grow like a snowball in its onward march. Malli. takes care to point out such variant readings in the text of Amara. Readings for the word *samākhyā* (fame) are given in the work of Halāyudha, in the *Vaijayantī* and in *Rabhasakośa* as *samākhyā*, *samajñā* and *samājñā* respectively.

समाख्या तुल्यलक्षणमिति हलायुधानुसारी पाठः । यशः कीर्तिः समज्ञा चेत्ययं वैजयन्त्यनुसारिपाठः । कीर्तिः ख्यातिः समाज्ञा चेति रभसकोशः । (p. 111)

In the case of *parivāda* (censure) he has the well-known reading *parīvādaḥ* as illustrated in *Ragh.*:

अत्र परीवादशब्दो दीर्घेकारो ह्रस्वेकारश्च भवति । यथा—मा भूत परीवादनवावतारः (p. 112).

Tamisra (darkness) in the text *tamisraṃ timiraṃ tamaḥ* can also be *tamisrā* as it is included in the Prajñādipāṭha and as Māgha has used it:

---

[1] Given by Edgerton, Apte's Dict., p. 394.

प्रज्ञादिपाठात् . . . तमिस्रापि भवति । ‘स्मररागमयी वपुस्तमिस्रा’ इति माघप्रयोगात् । (p. 147)

The word *hālāhala* (deadly poison) Malli. shows is *hālāhala* in common usage as in *hālāhalaṃ viṣam ivāpraguṇaṃ tad eva* but *hālahalam* also is in use as in *hṛdaye hālahalaṃ mahad viṣam* (p. 153).

As a general rule Malli. is not satisfied by merely furnishing the different readings but discusses the aptness of the variants. In discussing the word *alinda* (a terrace before a house door) he says that the word may begin with a short or long vowel and quotes an authority for each of them.

अलिन्द इति ह्रस्वादिः । आलिन्द इति दीर्घादिश्च भवति। ह्रस्वादेरुदाहरणम्—‘प्रघाणः . . .’ इति रत्नकोशः । दीर्घादेः—‘गृहैकदेशे . . .’ इत्यमरमाला । (pp. 202-3)

The most striking illustration of difference in reading is furnished under the word *kṛṣṇapāka* based on the lexicon *Śabdārṇava.* The three words *kṛṣṇa*, *pāka* and *phala* are combined in all possible ways so as to fill three verses:

कृष्णः पाकः . . . कृष्णफलो वशः । (p. 255)

For the plant named *tṛṇaśūlya* Malli. points out not only the difference in reading but also the consequent change of gender:

सुभूतिटीकायां तृणशूल्या तृणशून्या वेति रूपान्तरसत्ता स्त्रीलिङ्गता चोक्ता । (p. 257)

As in the case of Sūrin's comm. the variants furnished by him are in hundreds.

The use of *śleṣa* (paronomasia or *double entendre*) by well-established authors is utilized by Malli. for the clarification of doubtful sounds in some words. The word *śasya* is found commonly used[1] in the sense of corn or produce of plants and sasyam in the same sense is justified by the *śleṣa* found in *Nala-damayantī* (*kathā*?):

‘ग्राम्यकविकथाबन्ध इव नीरसस्य-मनोहरो देशः’ इति नलदमयन्तीश्लेषाद् द्विदन्त्यः । (p. 224)

A dress or embellishment may be denoted by *veśa* or *veṣa*, the latter word being found in the *śleṣa*[2] in *Kumāracarita*:

‘द्वेषरहितमपि सद्वेषम्’ इति कुमारचरिते वेषः । (p. 426)

and the former in the *Rabhasakośa*:

‘गृहमात्रे च नेपथ्ये वेशो . . .’ इति रभसकोशपाठाद् वेशः । (p. 426)

Malli. finds *anuprāsa* and *yamaka* too are useful in the clarification of sounds. The *t* ending of *tanūnapāt* (fire) is confirmed by an alliteration in the *Harṣacarita*:

‘तनूनपाति . . . पातयाम्यात्मानम्’ इति हर्षचरितानुप्रासात् तान्तः । (p. 39)

According to the *yamaka* in *Daṇḍyalaṃkāra* the synonym for the sun is *sūra* only, beginning with a dental sibilant.

‘वारुणी . . . सौरभा सौरभास्पदम्’ इति दण्ड्यलंकारयमकपाठात् सूरशब्दो दन्त्यादिः । (p. 70)

Fullness of treatment supplying a wealth of details, is a characteristic of Malli.'s comm. Amara mentions *kadalī* and five other kinds of deer as the source of deerskin (p. 331). Malli. gives details of these in five verses, describing their colour (*nīlāgrair lomabhir yuktā*), size (*triṃśadaṅgulā*), habitation (*kadalī tu bile śete*), varieties of the same species (*sitaḥ*, *kṛṣṇaḥ*, *citraromā*) and furnishes other information useful for their identification. With regard to the spotted deer (*kṛṣṇasāra*) and eleven others mentioned by Amara he gives a supplement of fifteen hemistichs describing their various features. On insects Amara briefly says '*nīlaṅgus tu krimiḥ. . . .*' The ant (*pipīlikā*) is mentioned in the section on fem. nouns in the Lingādisaṃgrahavarga (III. 5. 8). But Malli. gives in the proper place (Siṃhādivarga) a full account of known varieties such as *brāhmī* (big, reddish brown ant), *ulaṃgavaḥ* (big, black ant) and many other varieties.

---

[1] Apte's Dict., p. 1541.

[2] This is to confirm the ending in a cerebral sibilant.

महान् ब्राह्मी स पिङ्गलः । महान् कृष्ण उलंगवः । (p. 337)

The different kinds of movement of a horse are graphically described by Malli. in contrast to the tame treatment accorded to it by others. *Āskanditam* is a mad gallop when a horse is angered:

कोपात् सर्वपदैरुत्प्लुत्योत्प्लुत्य गमनमास्कन्दितम् ।

Dhauritakam is a movement similar to that of herons, peacocks, etc.:

कङ्कशिखिक्रोडनकुलगतैः सदृशं धौरितकम् । (p. 513)

The three myrobalans taken together (*triphalā*) is a well-known medicine in Āyurveda mentioned by Amara; but Malli. points out the three different combinations set forth in Āyurvedic works:

हरीतकी चामलकी विभीतकमिति त्रयम् । त्रिफला प्रथमा . . . द्वितीया तु त्रिफला . . . तृतीया त्रिफला . . . । (pp. 619-20)

When discussing varieties of food, Amara finds no place for *kṛsaram* (food made of sesamum, rice, etc.) and *saṃyāvaḥ* (similar to vermicelli) which are as old as the *Manusmṛti* (V. 7) and hence Malli. describes them, the latter graphically:

यन्त्रपातितो मृणालतन्त्वाकृतिरोदनः संयावः स्यात् । (p. 584)

It is strange that such a word as *tāmbūlam*, universal in all religious and social functions, should have been overlooked by

Amara, though he mentions *tāmbūlī* and *tāmbūlavallī* (betel vine) in the Vanauṣadhivarga (p. 286). The omission is rectified by Malli. in

ताम्बूलं स्याद् वीटिका स्त्री ताम्बूलं मुखभूषणम् । (p. 588)

Numerous are such additions that Malli. gives in their appropriate places.

Among words of Amara with doubtful derivations is *viśvasṛṭ*, one of the synonyms of Lord Brahmā. Malli. says that according to Subhūti it is *viśvasṛk* formed by *kvinpratyaya*; he also gives the opinion of Rabhasa and others who prefer *ṣatva* forming *viśvasṛṭ*, quoting the relevant *sūtra-s* of Pāṇini in both cases.

सुभूतिना विश्वसृग् विधिरिति प्रत्यपादि । क्विन्प्रत्ययस्य इति कुत्वमिति । ये तु क्विन्नन्तत्वं नेच्छन्ति तन्मते 'व्रश्चादिना' षत्वमिति रभसकोशकारेण तदपाठि विरिञ्चो विश्वसृट् . . . कमलासनः इति । (pp. 14-15)

Bhānujī has later confirmed this interpretation; for he points out that Patañjali has said '*rajjusṛḍbhyām*' under the *sūtra* '*mṛjer vṛddhiḥ*' (VII. 2. 114). The word *saṃkara* (dust sweepings) is *abanta* as per the *Vaijayantī* and *ghañanta*, i.e. *saṃkāraḥ*, according to *Viśva*.

संकरौ इति वैजयन्तीपाठात् संकरशब्दोऽबन्तः । 'संकारो . . .' इति विश्वप्रकाशिकापाठात् संकारो घञन्तः । (p. 207)

The word *kikīdiviḥ* (blue jay) in Amara, '*atha cāṣaḥ kikīdiviḥ*' (p. 339), is variously interpreted. Both Sūrin and Malli. take it also as two words *kikī* (based on its cry) and *diviḥ*. But Malli. adds that the word is also spelt as *kikidīviḥ* on the authority of *Ratnakośa*:

किकी नान्तः, दिविरिदन्तः, नामद्वयमिति केचित् । 'किकिदीविश्चाषः स्यात्' इति रत्नकोशपाठात् तृतीयवर्णदीर्घोऽपि । (p. 340)

Malli. hints that no unnecessary word is found in Amara's text and the seemingly redundant words have a significance. In '*mahājālī sa pītakaḥ*', *saḥ* appears redundant inasmuch as the gender of *mahājālī* and *pītaka* are clear enough by their very form (*rūpabheda*). Malli. points out that this word has been purposely inserted to avoid *sāṃkarya* (closeness), lest one mistake *mahājālī* to be a mas. *nakārānta* word due to its proximity with *pītakaḥ*.

स इति सर्वनामनिर्देशः सांकर्यनिरासार्थः । (p. 285)

As a rule Amara gives words in the singular number only. However, *godhe* and *tale* are in the dual as these gloves are always used in a pair.

हस्तद्वयापेक्षया द्विवचनप्रयोगः । (p. 534)

The words *madhu* and *mādhvika* (wine) are mentioned by Amara as neuter (*advayoḥ*), but as Durgasiṃha states they may be used both in the mas. and neuter due to their inclusion in the Ardharcādi-gaṇa. Malli. says that the word *advayoḥ* is reminiscent of its optional character.

अद्वयोरिति विशेषविधिर्मधुमाध्वीकशब्दयोरनित्यताज्ञापनार्थः[1] । (p. 644)

The word *saraka* is variously interpreted. Svāmin (p. 235), Sūrin and Bhānujī (p. 405) take it as 'serving wine' though the other meaning of 'a wine cup' is mentioned by them. Malli. interprets it as a cup and shows that the word *api* used by Amara in *sarako 'pi* is intended to connect it with *astrī* previously used; and quoting a number of authorities such as Patañjali, Bhāguri, Sarvadhara, Śeṣakāra and Rudra he winds up the discussion with a citation from the *Vaijayantī*:

अपिशब्देनास्त्रीति पदं सरकेणापि संबध्यते । अत एव 'अर्धर्चाः पुंसि च' इत्यत्र महाभाष्ये सरकः सरकमित्युभयमुदाहृतम् । . . . सरकश्च इति भागुरिः । (p. 646)

---

[1] *mādhvīkam* is the reading adopted by Malli.

Lucidity is another characteristic of the explanation of those words which Malli. deems worthy of his special notice. Amara distinguishes *koraka* from *kuḍmala*, taking the former to be a bud in general and the latter as a 'half-opened bud'. Malli. points out that Halāyudha is for non-distinction between the two:

केषांचित् कुड्मलकोरकावेकार्थौ । कोरक . . . कुड्मलमुकुलानि तुल्यानि इति हलायुधः । (p. 225)

Ahibhaya is the apprehension of treachery and the danger arising from one's own allies and is explained by Amara as '*svapakṣaprabhavaṃ bhayam*' (p. 501). Malli. elucidates that it is fear of one's own rebellious sons, kinsmen and others allied to him:

पुत्रदायादप्रभृतिस्वपक्षैः कृतं भयमहिभयं स्यात् । (p. 502)

The word *tita-u* (sieve) is as peculiar in formation as it is confusing in its declension. Hence Malli. quotes the relevant *Uṇādi-sūtra*, '*taroter ḍa uḥ sanvac ca*' in its derivation and shows the way for its declension as *tita-ū*, *titavaḥ*, etc. As some lexicons like the *Ratnakośa* take this word as neuter in gender he says:

'चालनं तितउ प्रोक्तम्' इति रत्नकोशमते तितउनी, तितऊनि । (p. 569)

Where misconceptions are likely to arise Malli. gives clear elucidations. Amara correctly gives the general direction '*puṃsi klībe ca*' to certain words denoting poisons such as *kākola* (p. 152). To avoid the possibility of interpreting this direction as applicable to all the poisons mentioned there,

पुंसि क्लीबे च काकोल . . . सौराष्ट्रिक . . . दारदो . . . विषभेदा अमी नव,

Malli. says that the option of being mas. and neuter is confined to the first three words *kākola*, *kālakūṭa* and *halāhala*:

समानसामर्थ्यात् पुंसि क्लीबे चेति विशेषविधिः काकोलादिषु त्रिष्वेव । (p. 152)

In Amara's line '*pratīraṃ ca taṭaṃ triṣu*', Malli. takes care to clarify that the three genders ordained apply to the word *taṭam* only, as *tīram* and *pratīram* can be in neuter alone (*triṣviti taṭamātraviśeṣaṇam*) and he quotes the *Vaijayantī* for this restriction (p. 160). The word *padmākaraḥ* (lake) may seem to apply only to a lake in which there are lotuses, as its derivation is *padmānām ākaraḥ*. Malli. points out that it being *rūḍha* 'popularly accepted and conventional' as well as *yaugika* 'possessing etymological sense', *padmākara* may be a lake with or without lotuses.

पद्माकरशब्दो रूढो यौगिकश्च । तेन पद्मशून्यमपि सरः पद्माकरः स्यात् ।
(p. 175)

As views on the gender of words differ Malli. sets them forth in appropriate places. The word *ghanarasaḥ* (water) is mas. according to Amara: *meghapuṣpaṃ ghanarasaḥ* (p. 157) and the *Vaijayantī*, *ghanarasaḥ pumān* (p. 158); but it is neuter as given in *Ratnakośa*, *ghanarasam ambhaḥkṣāram*'. Amara mentions as neuter *khātam* (a reservoir dug by men) and *akhātam* (natural reservoir). Malli. adds that the lexicographer Amaradatta has included them in the section on mas. words:

'अखातो देवखातके' इति पुंस्काण्डेऽमरदत्तः । (p. 174)

The word *nirastaḥ* (arrow discharged from a bow) is obviously mas. in form (*rūpa*). But Malli. clarifies that this is so only when it is a noun (*viśesya*); as an adjective (*viśeṣaṇa*) it takes all the three genders (*viśeṣyanighna*). Similar is the case in regard to the two other words *digdha* and *lipta* (poisoned) mentioned in the same line:

विशेषणत्वे त्रिलिङ्गाः । इषुर्निरस्ता इषुर्दिग्धा इषुर्लिप्तेत्यादि । विशेष्यत्वे पुंलिङ्ग एव । निरस्तो हन्त्येव । दिग्धो हन्त्येवेत्यादि । (p. 536)

In *iṣudhir dvayoḥ* Amara sanctions mas. and fem. to the word *iṣudhiḥ* (quiver). This, Malli. points out, is somewhat misleading, as it is but a half-truth. If the word *iṣudhi* is formed by using the verb *dhiyati*, it is *ubhayaliṅga*. But if the formation of the word is based on the verb *dadhāti*, it can only be mas.; for *karmaṇyadhikaraṇe ca* by which *kipratyaya* is ordained refers to *ghu* verbs only and it helps to form words in mas. such as *udadhiḥ*:

धियतिधातुसिद्धः इषुधिशब्दः उभयलिङ्गः। दधातिधातुसिद्धः पुंलिङ्ग एव। (p. 537).

The literary acumen of Malli. perceives many a significance missed by most commentators. The word *rathāṅgāhvayanāmakaḥ* in Amara (p. 346) meaning the *cakravāka* (ruddy goose) is literally interpreted by Sarvānanda, Sūrin and Bhānujī, who overlook its two distinct names *rathāṅgāhvayaḥ* and *rathāṅganāman*.

रथाङ्गाह्वयो रथाङ्गनामेति द्वे नामनी इत्यर्थः। (p. 346)

In this connection, Malli. also sets forth the views of various authorities as to the correctness of words like *rathāṅgasaṃjñikaḥ*, *rathāṅgākhyaḥ*, *cakrāhvaḥ*, etc. Subhūti says, in his *Kāmadhenu*, that only *āhvaya* and *nāman* should be affixed to *rathāṅga* (*cakra*); others hold that any word meaning *hūtiḥ* (name) can be added to *cakra*; here Malli. cites a line from Māgha where *hariheti-hūtiḥ* is used to denote a ruddy goose. In conclusion Malli. states that any word meaning *cakra* and *nāman* can be employed to denote the bird, which view is supported by Pratāpa and Yādava.

एतदुक्तं भवति। रथाङ्गाख्यः चक्राह्वः रथचरणनामा इत्यादि . . . तथा च प्रतापः . . . चक्रवाको रथः . . . इति वैजयन्ती। (p. 346)

In Amara's *klībaḥ paṇḍo napuṃsakam*, the word *klībaḥ* is said to be mas. and *napuṃsakam* neuter only. But time and usage have sanctioned *klībam* and *napuṃsakaḥ* to denote a hermaphrodite. Malli. reads this as already sanctioned by

Amara, as the purpose of the *saṃkara* (mixing up of words of different genders) here is a *jñāpaka* (significant usage).

संकरपाठात् क्लीबनपुंसकशब्दौ पुंलिङ्गावपि । अस्त्री नपुंसकं क्लीबं . . . इति रुद्रः । स नपुंसको भवेत् इत्यमरभाष्यकारः । (p. 385)

Aptness of illustration is another noteworthy feature of Malli's comm. The word *āhatam* means an assertion of impossibility for which Malli. gives as illustration the well-known line, 'There goes the son of a barren woman' (*eṣa vandhyāsuto yāti*, p. 116), found also in Apte's Dict. (p. 376). After explaining *makaranda* as honey and adding the form *maranda* given in the *Vaijayantī*, he mentions another word *madhūlikā* which is illustrated by:

अहो मे सौभाग्यं मम च भवभूतेश्च फणितं . . . गिरां देवी . . . मधूली-माधुर्यं क्षिपति . . .

a verse melting in its appeal but mythical in content, found in the *Bhojaprabandha* (p. 226). *Rajaḥ* (dust) is well known to be a *sakārānta* word and is taken as such by the principal commentators. Malli. notes its use as *akārānta* also as in the well-known verse:

अर्थाः पादरजोपमा गिरिनदीवेगोपमं यौवनम् ।

which he annotates as *iti purātanaprayogaḥ* (p. 542). On the topic of *apūpa* (Indian cake), Malli. waxes eloquent regarding the varieties, quoting a popular verse '*pūrikayā ghārikayā polikayā. . .*', hinting in unmistakable terms at his own favourite dish (p. 583). Amara has '*pustaṃ lepādikarmaṇi*', indicating thereby 'the art of plastering and making models'. Amplifying this statement with an apt illustration, Malli. adds that the word *pustakam* has the additional sense of a collection of palm leaves (so as to form a literary work).

. . . पुस्तं स्यात् । मृद्दारुचर्मवस्त्राद्यैः . . . पुस्तमुच्यते । . . . तालपत्रादिसंचये च पुस्तकशब्दप्रयोगः । (p. 637)

A person depending on the worship of the gods in a temple for his livelihood is called *devala*: *devājīvastu devalaḥ*. Malli. clarifies with a suitable illustration from a Smṛti work that a person who performs worship for his maintenance for a short period cannot be included in this category; a *devala* is one who remains in that calling for a minimum of three years:

देवार्चनपरो . . . वत्सरत्रयम् । जीवेद् देवलको नाम . . . । (p. 627)

Stating that *upamā* and *upamāna* are *āviṣṭaliṅga*, that which in every relationship preserves its own gender, Malli. gives two apt verses to illustrate them:

रात्रावेव मधावेव राकायामेव सुन्दरम् । मुखचन्द्रस्य ते चन्द्रं कथयेदुपमां कथम् ॥ न मञ्जुभाषणं पद्मं . . . नोपमानं मुखस्य ते ॥ (p. 642)

Ingenious are some of the explanations offered by Malli. to justify additional meanings that he sees in the text of Amara which others have either failed to notice or have left to be understood by the reader. The word *koraka* (bud) is specifically stated to be mas. by Amara in '*kalikā korakaḥ pumān*;' but a master of literature such as Māgha has used the word in the neuter, '*marudavani. . . korakāṇi*' (*Śiśupālavadha*, VII. 26). Malli. cleverly explains that when the gender of a word is easily recognized by its very appearance (*rūpa*) any mention by Amara that it belongs to that particular gender is intended to suggest the *anityatva* (impermanence) of that gender. This is a device well known in the interpretation of the *sūtra-s* of Pāṇini, '*vyarthaṃ sat jñāpayati*'. Hence the mas. of *koraka* is *anitya* and the neuter in *korakāṇi* is justified by Amara's own text:

रूपभेदसिद्धलिङ्गे विशेषविधिरनित्यज्ञापकः । (p. 225)

Drawing attention to the statement in the *Amaravārttika* that *antarikṣa* (sky or atmospheric region) has a long *ī* sound (*antarīkṣa*) he ingeniously explains it as that region which is 'seen' between the earth and the heavens.

अन्तरिक्षमित्यत्र विशेषः। अमरवार्त्तिककारेण वर्णनिर्देशनायां . . . इति प्रत्यपादि। अन्तरीक्ष्यते जगदत्रेत्यन्तरीक्षम्। द्यावापृथिव्योरन्तरीक्ष्यत इति वा।

As for the usage *antarikṣam* in the Veda-s, it is only *chāndasa*, he concludes (p. 51). The tame explanation of *siṃhanāda* by other commentators is that it is a war-cry of soldiers resembling the roar of a lion. Malli. says that the cry resembles the roar of a lion which frightens the war elephants that constituted the most formidable element in the Indian army:

कुञ्जरादिभयार्थकवीरारावनाम। (p. 546)

The word *ādi* in *kuñjarādi* evidently refers to the cavalry as well as to chariot horses.

Popular maxims (*laukikanyāya-s*) are occasionally made to bring home certain explanations that Malli. initiates. On the analogy of *śatamanyu* (performer of a hundred horse-sacrifices) the word *śatamakha* has found favour in popular usage, but parallel to *harihayaḥ*, the word *haryaśvaḥ* is not employed, since certain words have become *rūḍha* such as *harihayaḥ*, but *yaugika* words of the same significance are not allowed.

'प्रायो रूढिर्बलवती' इति न्यायेन . . . हर्यश्वादिशब्दाश्च प्रयोक्तव्या न भवन्ति। (p. 32)

The word *kārā* is explained as 'a prison house', but Malli. adds that according to the maxim of a lion's backward glance, the word is also intended to mean 'captivity'.

कारा सिंहावलोकनन्यायेन बन्धननामापि स्यात्

and he quotes the authority of Śāśvata for this interpretation (p. 552). For ornamental gold, Amara gives the word *śṛṅgīkanakam*, which usage, Malli. says, is similar to *aurvānala* (fire of the submarine fire), according to *gobalīvardanyāya*; for *śṛṅgī* by itself denotes ornamental gold according to *Ratnakośa*:

शृङ्गीकनकमित्यौर्वानलादिवत् प्रयोगः । स्त्री शृङ्गी मण्डनसुवर्णम् इति रत्नकोशे पृथङ्निर्देशः । (p. 611)

But at the same time he says, in all fairness, that the compound word is also insisted on by some authorities like the *Vaijayantī*:

केषांचित् शृङ्गीकनकमिति संघातोऽपि गृहीत एव । अलंकारसुवर्ण तु शृङ्गीकनकमाशु च इति वैजयन्ती ।

The use of popular conundrums (*prahelikā-s*) is another novel feature in Malli's comm. enlivening the otherwise dry as dust derivation of words. White ant (*vamrī*), not mentioned by Amara, has five synonyms and its habitation is given in the form of a popular riddle:

अनेकसुषिरोपेतं कान्तं स्त्रीसुखपङ्कजम् ।
सुसिद्धं त्र्यक्षरोपेतं चक्षुःश्रोत्रमनोहरम् ॥ (p. 337)

So also is the verse:

अष्टौ श्लोकान् कुरुष्वेति पुत्रः पित्रा नियन्त्रितः ।
सप्त श्लोकाः कृतास्तेन पितुराज्ञा न लङ्घिता ॥ (p. 107)

where the word *aṣṭau* is also the locative of *aṣṭi*, the name of a metre. Popular beliefs, interesting but incredible, are also utilized by Malli. in the course of his explanations. The wagtail (*khañjarīṭa*), he quotes from the *Rasaratnākara*, has some mysterious power. If caught and confined in a cage during the month of Phālguna (Feb.-Mar.), the cage becomes invisible when the month of Bhādrapada (Aug.-Sept.) arrives; then only its crest will be visible, *khañjarīṭaṃ sajīvaṃ tu . . .* (p. 340).

Declension of rare forms is another useful feature in Malli.'s comm. The rare form *svapnaj* is declined by him to the joy of students; the fem. forms of *sadhryañc* (accompanying), *viṣvadryañc* (all-pervading) and *tiryañc* (oblique) are also noted (III. 1. 33). The word *samam* in Amara's '*atha samaṃ* *sarvam* ' (III. 1. 64) is fully interpreted by Malli. showing that the word is *sarvanāman* (pronoun) only in the sense of ' all ' and that in the other remaining senses of ' equal ', etc. it should be declined as an ordinary noun. He gives examples such as *samaḥ samau same*, *samasmai*, *sameṣām* when it is a *sarvanāman* and

समाय समानायेत्यर्थः । समानां संवत्सराणामित्यर्थः । समे साधावित्यर्थः ।

for the other senses. The word *kāṣṭhatakṣ* (carpenter) is somewhat puzzling in its declension and hence he gives the forms as *kāṣṭhataṭ kāṣṭhatakṣau kāṣṭhatakṣaḥ* (p. 625). The declension of the word *tita-u* (sieve) has already been referred to (p. lvi). Malli. adds *sauḥ* as an epithet of the goddess Pārvatī and declines it as ' *sauḥ savau savaḥ*, *savam savau savaḥ* (p. 28). As Uśanas (planet Śukra) is *sānta*, *nānta* and *adanta* in its vocative he gives these forms quoting the relevant *sūtra-s*.

हे उशनः, हे उशनन्, हे उशन (p. 67).

Malli. seems to have a flair for unearthing odd sounding words from various authors and lexicons. This happens too often to be considered as fortuitous. When explaining the word *trisaṃdhyam* (the triad of junctures or twilights) he cannot resist the temptation of mentioning the alternate form *trisaṃdhyī*, just because some people say that such a form exists.

त्रिसंध्यी इति च कतिचित् कथयन्ति । (p. 76)

The term *hradaḥ* for a reservoir is well known but Malli. fishes out *drahaḥ* which sounds quaint, but derives authority from Trivikrama.

द्रहः संस्कृतेऽपि इति त्रैविक्रमवचनाद् द्रहोऽपि ह्रदनाम । (p. 173)

For the word *puṣpavāṭikā* (flower garden) he gives a strange sounding word *purpavāṭikā*.

पुर्पवाटिकेत्यत्र सस्य पाक्षिको रेफादेशः । (p. 216)

Some writers, Malli. says, prefer the word *turtūraḥ* for *dhuttūra* (white thorn-apple) (p. 261). The blue jay (*cāṣa*) can also be *cāsa* as the well-known *Rabhasakośa* sanctions it (p. 340). The word *yuvānaḥ* (young men) is *akārānta* as well, for Trivikrama alludes to it, there being such usages in literature.

युवानः संस्कृतेऽपि इति त्रिविक्रमवचनाद् अकारान्तो युवानशब्दोऽप्यस्ति। प्रयोगश्च—'... युवानैः' इति। (p. 386)

In *vrate rāmbhas tu vaiṇavaḥ* all well-known commentators take *vrate* as the loc. of *vrata* (vow). Malli. ingeniously takes it as *vrateḥ* and says that the *repha* in the *saṃdhi* is dropped by Pāṇini's rule '*ro ri*'. To emphasize the existence of the word *vrati* he gives illustrations such as '*vrateḥ palāśaḥ*' and '*vrater veṇudaṇḍaḥ*. . .' But in no well-known lexicon, ancient or modern, is that word found and even in Malli's 'bible', the *Vaijayantī*, this word is not traceable. The twang made by a bow in battle is *visphāraḥ*; Malli. says *viṣphāraḥ* is also correct as the *sūtra* '*sphurati* . . .' (VIII. 3. 76) sanctions it optionally (p. 547). The word *musala* (pestle) may also be *muṣala* (p. 569) and *heman* for gold is also *hema* (p. 610). *Panasa* (jack tree), Malli. notes is *phanasa* according to some and *paṇasa* in the opinion of others.

पवर्गद्वितीयादिरिति केचित्। पणस इति टवर्गमध्यम इति केचित्। (p. 251)

The sun is *bāḥkara* and *ahaḥkara* in addition to *bhāskara* and *ahaskara* (p. 70).

Malli. is not lacking in intellectual courage, for he does not hesitate to criticize when necessary the views of previous commentators. But he is not distinguished for moderation of language. Some have interpreted the word *hāhā* to be an imitation of the musical sounds ever present on the lips of Gandharva-s (semi-divine musicians) and declare that the word is not capable of derivation. Condemning such ignorance, Malli. says:

हाहाशब्दो धातुजो न भवतीति केचित् व्याचक्रिरे । तज्जल्पितमज्ञानविजृम्भितमेव । हेति निन्दितं ध्वनिं जहातीति हाहा इत्यमरभाष्यकाराः प्रतिजानते । (p. 37)

In a covert reference to Sūrin's interpretation of *grāha* as 'a horse-faced aquatic creature' and *kumbhīra* as 'a crocodile or shark capable of dragging elephants into the water', Malli. says:

घोटकमुखमीननामनी इति वदन्ति । तदसत् । उदकचरमण्डलिसर्पनामनी . . . गजाकर्षणमत्स्यनामनी इति केचित् । तदज्ञानविजृम्भितम् । (p. 170)

This censure pronounced on Sūrin is an unjust representation of his erudition, for *ajñāna* may not be the monopoly of his opponents; since some *kumbhīra* sharks are quite capable of dragging elephants into the waters (witness '*nakrākrānte karīndre*. . .' in the *Bhāgavata*). Some commentators explain the *rohitaka-vṛkṣa* as a variety of the thorny Palāśa tree. Malli. being perhaps familiar with this tree in the Magadha country castigates this 'play of ignorance'.

स च मगधविषयप्रसिद्धः । कण्टकपलाश इति केचित् । तदज्ञानविलसितमेव । (p. 245)

The *sūtra-s* of Pāṇini are not generally quoted by Malli. as he does not, as a rule, give the derivation of Amara's words. But occasionally, when he finds that certain words require derivation at his hand, he quotes the *sūtra-s*. *Vaiśravaṇa* (Kubera) has grammatical peculiarity:

विश्रवःशब्दात् 'तस्येदम्' (४. ३. १२०) इत्यणि कृते विश्रवसो विश्रवणरवणाविति प्राप्ते विश्रवणादेशे वृद्धौ वैश्रवण इति रूपं सिद्धम् । (p. 48)

The word *bharatāḥ* (actors) has a peculiar formation in the plural and hence he gives the relevant *sūtra-s* for its derivation. As the word *bharata* is included in the *utsādi* group, the affix *añ* is added to it resulting in *bhārataḥ*, but by '*yañañoś ca*' it loses its *gotra* affix *añ* in the plural. Hence *bharatāḥ* is the resultant form.

भरता इत्यत्र उत्सादित्वादञ् । भारतः, भारतौ । 'यञञोश्च' इति बहुत्वे लुकि भरताः । (p. 627)

Concerning the formation of the word *śūrpa* (winnowing basket), Malli. quotes the *Uṇādi sūtra* '*suśṝbhyāṃ nic ca*' and draws attention to its exceptional character:

इति श्रृणातेः पप्रत्यये उद्रपरत्वदीर्घत्वानि ।

He further notes that the word may also begin with a dental as *sūrpam* on the authority of Puruṣottama (p. 569).

Malli.'s humour is delightful, but occasionally pungent. When giving an illustration for the word *vāsūḥ* (a young woman connected with the theatre) he says,

वासुदेवालयं गत्वा सोमं शंकरमर्चय ।

(Worship Lord Śiva and the moon by going to the temple of Lord Viṣṇu: Girl, go to the temple and worship Śiva and Pārvatī); evidently he has a large number of such popular lines in his repertoire. Illustrating the use of the word *sasya* (vegetable), he quotes the line:

ग्राम्यकविकथाबन्ध इव नीरसस्य-मनोहरो देशः । (p. 224)

Noting Amara's omission of a word for a 'hairy person', Malli. gives '*romaśo lomaśaḥ samau*' and explains that a person with a profusion of hair all over the body resembles a bear:

भल्लूकवत् प्रवृद्धरोम्णो नामनी । (p. 388)

Badarā (cotton plant) is fem. according to Amara; it ends in *ṭāp* according to Subhūti but ends in *ṅīṣ* on the authority of *Viśva.* and is neuter if the fruit is meant; in order not to leave out the remaining gender, he says it is mas. as given in *Amaramālā*: *kārpāso badaraḥ proktaḥ* (p. 284). The word *guṇa* has also the meaning of a cook and to illustrate this he quips that the lady at home is 'the beloved wife, the cook and the maid of all work rolled into one',

कान्ता चेयं गुणा चेयं प्रेष्या चेयं मर्मैकिक्का । (p. 570)

Most of the commentators on Amara have systematically turned their backs on the question of supplementing his vocabulary. But Malli. evidently acted on the principle that the usefulness of a lexicon is less impaired by an abundance rather than a paucity of words. He gives 12 additional words for Indra to Amara's 35, 20 more for Lord Viṣṇu to Amara's 30, and 21 for a coconut against the 2 mentioned by Amara. He generally starts with the characteristic expression *anuktam* and then a string of words follows, especially at the conclusion of each sub-section in the homonymous section. These words with little scope for any explanation are exhaustive and in many cases exhausting to the reader. Thus at the conclusion of the *tānta* words (*vivasvat*), he adds more than ten verses and at the end of the *rephānta* words (*vāra*) he has more than sixteen additional verses.

But the supplementary words in all other places are informative, useful and interesting. He adds thousands of words to the original. Where the text gives *sukarā* for a docile cow *syād acaṇḍī tu sukarā*, Malli.'s supplement, *sukatā tadviparyaye*, mentions a vicious cow which is active with its hoofs and horns. When Amara gives *suvratā sukhasaṃdohyā*, Malli. mentions the opposite:

करटा तद्विपर्यये । प्रयासेन संदोह्या गौः करटा स्यात् । (p. 596)

Malli. dives into various sources of information such as the work of Dhanvantari; e.g. the herb *balā*, an important and well-known medicinal plant (Tamil: Tippili or Cittāmuṭṭi)[1] is mentioned by Amara, but the related names *atibalā* and *mahābalā* are supplied by Malli. (p. 278).

Malli. is no purist, who rejects outright current words of Prakrit origin. But he takes care to be in approved company in so risky a venture. *Aṅkura* (sprout) has an alternate form of Prakrit origin, *aṅkila*, that has gained currency and hence he accepts it:

---

[1] *Vaijayantī* II. p. 653.

अङ्किलः प्ररोहोऽप्यत्रेति सुभूतिटीकावचनात् प्राकृतरूपस्यापि ग्रहणम् ।
(p. 217)

He also approves of the Prakrit form *iṅgāra* for *aṅgāra* (charcoal), and also mentions *iṅgāla* used by Śrī Harṣa in the *Naiṣadha*:

'हरनयनेङ्गारितो मदनः' इति प्राकृतरूपस्यापि ग्रहणम् । 'इङ्गारो . . .' इति रभसकोशपाठात् प्रयोगार्ह एव । 'वितेनुरिङ्गालमिवायशः परे' इति नैषधः ।
(p. 572)

In accepting some other words like *siṃhiṇḍa*, Malli. is in the distinguished company of Dhanvantari and Yādava.

'प्रायो जनाः . . . प्राकृतमित्यदोषः' इति धन्वन्तरिवचनात् प्राकृतग्रहणम् । 'सिंहुण्डः . . .' इति वैजयन्त्यामपि प्राकृतग्रहणमेव कृतम् । (p. 277)

The words *indindira* and other synonyms of *madhukara* (bee) given by the author of *Śeṣa* are *deśya* words according to Svāmin, and Malli. accepts them as such:

इन्दिन्दिरचञ्चरीकरोलम्बभसलशब्दा देश्या इति स्वामी । (p. 352)

Malli. gives the Telugu meaning of Amara's words almost everywhere in his comm. Some of the Telugu equivalents may be archaic and sound strange to modern ears. Sūrin gives *vepa* for the Nimba tree while Malli. has *vempa* (p. 252). Khadira is *candraceṭṭu* to Sūrin and *caṇḍraceṭṭu* to Malli. Sūrin gives the word *devatāḍi* for which Malli. supplies *ḍāparaḍaṅgi*. Jasmine is *molla* to Sūrin and *mulla* to Malli. (p. 257). The medicinal plant *balā* is *ciṭṭāmudapuceṭṭu* in Sūrin's comm. whereas *muttuvapulagamu* is given in Malli.'s comm. (p. 278). *Kokila* (cuckoo) is *koyala* (*Koyila* B_1, K_6) in Sūrin's work but *kokila* in Malli.'s.

Malli.'s comm. has a very large number of quotations (975 in the two Kāṇḍa-s). He gives no less than 213 citations in the first two Kāṇḍa-s from the *Vaijayantī*. Some of the authors mentioned by him are not traceable in the *Catalogus Catalogorum* and it may be presumed that they were his contemporaries. We give below a list of authors and works cited by Malli., the number in brackets indicating the number of citations in the first two Kāṇḍa-s.

1. अजय	(1)	27. कामन्दक	(1)
2. अजयपाल	(2)	28. कामन्दकीयनीतिसार	(2)
3. अनर्घराघव	(1)	29. कालिदास	(10)
4. अनेकार्थसमुच्चय	(1)	30. काशिका	(2)
5. अभिधानद्रव्यावलि	(1)	31. किरातार्जुनीय	(1)
(धन्वन्तरीयनिघण्टु)		32. कुमारचरित	(1)
6. अभिधानरत्नमाला (हलायुध)	(58)	33. कुमारचरितालंकार	(1)
7. अमरदत्त	(1)	34. कुमारसंभव	(8)
8. अमरभाष्यकार	(2)	35. कैयट	(1)
9. अमरमाला	(7)	36. क्षीरस्वामिन्	(4)
10. अमरवार्त्तिककार	(1)	37. ,, टीका	(1)
11. अमरसिंह	(1)	38. क्षुर	(5)
12. अमरुक	(1)	39. गोपाल	(3)
13. अमरुशतक	(1)	40. गोपालित	(5)
14. अरुणदत्त	(5)	41. गोवर्धन	(1)
15. आयुर्वेदप्रकाश	(1)	42. गौड	(2)
16. आश्चर्यपदमञ्जरी	(1)	43. चन्द्रकाव्य	(3)
17. आश्चर्यमञ्जरी	(1)	44. चन्द्रगोमिन्	(2)
18. इन्दु	(3)	45. ,, लिङ्गानुशासन	(1)
19. उत्तररामचरित	(2)	46. चिन्तामणि	(1)
20. उत्पलमाला	(1)	47. जयकोश	(2)
21. उदारराघव	(1)	48. ज्ञानपत्र	(1)
22. ऋग्वेद	(1)	49. टीकासर्वस्व	(9)
23. कर्पिणाभ्युदय	(3)	50. ,, कार	(2)
24. कातन्त्रसूत्र	(1)	51. तारकाख्यान	(1)
25. कादम्बरी	(2)	52. तारपाल	(4)
26. कामधेनुकार	(1)	53. तैत्तिरीयसंहिता	(5)

54.	त्रिकाण्डशेष	(17)
55.	त्रिविक्रम	(1)
56.	त्रैविक्रम	(1)
57.	दण्ड्यलंकार	(1)
58.	दुर्गसिंह	(2)
59.	देवीशतक	(1)
60.	द्रव्यावली	(4)
61.	द्विसंधानकाव्य (राघवपाण्डवीय)	(4)
62.	धनंजय	(10)
63.	,, निघण्टु	(2)
64.	धनपाल	(2)
65.	धन्वन्तरि	(7)
66.	,, विघण्टु	(12)
67.	धरणि	(1)
68.	धर्मशर्माभ्युदय	(6)
69.	धातुप्रदीप	(2)
70.	ध्वनिमञ्जरी	(1)
71.	नलदमयन्ती(श्लेष)	(1)
72.	नलोदय	(1)
73.	नागभूपालीय	(1)
74.	नाट्यशास्त्र	(1)
75.	नानार्थशास्त्र	(1)
76.	नाममाला	(7)
77.	नामलिङ्गानुशासन	(1)
78.	नारद	(1)
79.	निघण्टुसर्वकष	(1)
80.	नीतिगजाङ्कुश	(1)
81.	नीतिशतक	(1)
82.	नैषध	(3)
83.	न्यास	(1)
84.	पाणिनीय	(1)
85.	पारिजात	(1)
86.	पुराण	(1)
87.	पुरुषोत्तम	(1)
88.	प्रताप	(7)
89.	प्रसन्नराघव	(1)
90.	प्राकृतसंजीविनी	(1)
91.	बाण	(1)
92.	बालभारत	(1)
93.	बृहस्पति	(1)
94.	भट्टि	(4)
95.	,, काव्य	(4)
96.	भर्तृहरि	(1)
97.	भागवृत्ति	(2)
98.	भागुरि	(4)
99.	भारवि	(1)
100.	भावप्रकाश	(1)
101.	भाषावृत्तिकार	(1)
102.	भाष्य (महाभाष्य)	(1)
103.	भोज	(1)
104.	भोजप्रबन्ध	(2)
105.	भोजराज	(1)
106.	मत्स्यपुराण	(1)
107.	मनु	(7)
108.	मनुस्मृति	(3)
109.	मयमत	(1)
110.	महाभारत	(2)
111.	महाभाष्य	(3)
112.	माघ	(18)
113.	,, काव्य	(1)
114.	माधव	(5)
115.	माधवीयपाठ	(1)
116.	मेघसंदेश	(3)
117.	यादव	(8)
118.	,, प्रकाश	(1)
119.	योगशतक	(1)
120.	रक्षित	(1)
121.	,, वचन	(1)

122. रघुवंश	(14)
123. रत्नकोश	(2)
124. „ नाममालिका	(1)
125. रत्नमाला	(2)
126. रभस	(3)
127. „ कोश	(28)
128. „ „ कार	(4)
129. रसरत्नाकर	(1)
130. राघवपाण्डवीय	(9)
131. रामायण	(1)
132. रुद्र	(15)
133. रुद्रटालंकार	(1)
134. रुद्राभिधानकोश	(3)
135. ललितासहस्रनाम	(1)
136. लिङ्गभट्टीय	(1)
137. लिङ्गसंग्रह	(1)
138. लिङ्गानुशासन	(1)
139. „ अरुणदत्त	(4)
140. „ चन्द्रगोमिन्	(1)
141. „ वामन	(2)
142. वसन्तराजीय	(1)
143. वाक्चन्द्रिका	(1)
144. वाग्भट	(1)
145. वाचस्पति	(1)
146. वाजसनेयिसंहिता	(1)
147. वामन	(5)
148. वामनसूत्र	(1)
149. वासवदत्ता	(3)
150. विक्रमोर्वशीय	(1)
151. विजयकोश	(1)
152. विदग्धकण्ठाभरण	(2)
153. विश्व	(2)
154. विश्वप्रकाशिका	(19)
155. विष्णु (पुराण)	(1)
156. विष्णुस्मृति	(1)
157. वेणीसंहार	(1)
158. वेदभाष्य	(4)
159. वैजयन्ती	(213)
160. वैद्यक	(18)
161. वैराग्यपञ्चक	(2)
162. वैराग्यशतक	(1)
163. व्याडि	(7)
164. शंकर	(1)
165. शंकराचार्य	(1)
166. शब्दार्णव	(1)
167. शाकटायन	(3)
168. „ मत	(3)
169. „ वृत्ति	(1)
170. „ व्याकरण	(1)
171. शातातपस्मृति	(1)
172. शाश्वत	(3)
173. „ कोश	(1)
174. शिशुपालवध	(24)
175. शृङ्गारप्रकाश	(2)
176. शेष	(56)
177. „ कार	(2)
178. श्रुति	(2)
179. संगीतमकरन्द	(1)
180. सज्जन	(1)
181. सरस्वतीकण्ठाभरण	(1)
182. सर्वधर	(1)
183. साहित्यकल्पवल्ली	(1)
184. सुबोधिनी (टीका)	(2)
185. सुभूति	(3)
186. „ टीका	(25)
187. सुरसिंह	(1)
188. सोमजात	(1)
189. सोमदेवनीति	(1)

190. सौन्दर्यलहरी	(1)
191. स्मृति	(3)
192. स्वामिन्	(3)
193. हनुमन्नाटक	(1)
194. हरिप्रबोध (यमक)	(2)
195. हर्षचरित	(1)
196. हर्षचरिताभ्युदय	(1)
197. हलायुध	(61)
198. हारावलि	(2)

Many of the quotations have been identified, though several printed editions have no index and the cited items are not the beginnings of verses. But many others remain to be traced, for the author does not mention the source in many cases.

Malli.'s style is easy and flowing. Its general nature cannot be judged on seeing his first sentence which is a series of very long compounds, reminiscent of Bāṇa's works. Simple but effective are his explanations in general; e.g. the kind of ox which can do only one kind of work is *ekadhurīṇa*. Malli. says:

हलं विना शकटं न वहति ; शकटं विना हलं न वहति ; इत्येतादृग्विधैकधुरावहो वृषः ; तस्मिन् एकधुरीणैकधुरशब्दौ स्याताम् । (p. 592)

His knowledge of grammar is specially deep, enabling him to point out certain subtle points missed by many commentators. Dealing with the topic of cows of different ages, the three year olds, four year olds, etc. he shows that words like *ekahāyanī* can have *ṅīp* by *vayasi prathame* only with reference to the ages of living beings; otherwise there can be *ṭāp* only, as in *dvihāyanā citragavī*. Further the *ṇatva* in *trihāyaṇī* (three year old) is permissible only when it refers to the age of living beings and not when the age of inanimate things is denoted:

णत्वमपि वयस्येव स्मर्यत इत्यनेनान्यत्र णत्वं न भवति । चतुर्हायना लेख्यगवी ।
(p. 594)

His grammatical knowledge is not confined to the *Aṣṭādhyāyī* of Pāṇini; he often refers to other systems of grammar such as that of Śākaṭāyana. The word *baṣkayaṇī* is interpreted by Svāmin, Sūrin and others as a cow whose calf is full grown, '*ciraprasūtagornāma*'. But Malli. following Śākaṭāyana says:

बष्कयेण नीता अनुगता बष्कयणीति शाकटायनव्युत्पत्त्या । बष्कयो नामैकवत्सरवत्सः । (p. 596)

Śākaṭāyana's views are again referred to supplement Amara's statement that *ardhanāvam* (half a boat) is neuter only; for the former mentions it as fem. also.

अर्धनावमर्धनावीति हि स्त्रीनपुंसकयोर्दृश्यत इति शाकटायनः । (p. 164)

Pāṇini ordains the substitution of *v* for the *ū* of *varṣābhū* (frog) when a case affix beginning with a vowel follows (*varṣābhvaś ca*). But Malli. adds that this holds good for the word *karabhū* (finger-nail) as well, as Śākaṭāyana sanctions it.

'दृन्पुनः . . .' इति शाकटायनशास्त्रे करभूशब्दस्यापि यणादेशः । (p. 172)

The Kātantra system of grammar too is not neglected, for he quotes a *sūtra* '*dyor govad vibhaktau*' to justify the peculiar declension of *sauḥ* (Gaurī) (p. 28).

The profundity of his scholarship may be guaged by his close acquaintance with such works as the *Saṃgītamakaranda* of Nārada, the grammatical comm. of *Kaiyaṭa*, the Jaina work *Dharmaśarmābhyudaya*, the Buddhist poem *Karpi*(*pphi*)*ṇābhyudaya* and a thorough mastery of the *pañca-mahākāvya-s*. Extensive also is Malli.'s knowledge of medical authorities. He often cites Vaidyaka with special reference to Dhanvantari whom he quotes over twenty times, as well as the *Yogaśataka*, etc. The plant *ikṣugandhā* has a synonym in *balvajāḥ* which Amara says is mas. in gender and pl. in number. But Malli. points out that the word has been used by Patañjali in the singular.

'एकश्च बल्वजो बन्धनेऽसमर्थः' इत्यर्थवत्सूत्रे महाभाष्यप्रयोगदर्शनादेकवचनान्तत्वमपि । (p. 317)

He also clarifies that this is a kind of grass similar to the *muñja*, used for making a bowstring or the girdle of an initiated student. His learning includes the science of omens (*śakuna*); he gives extensive details from the *Vasantarājīya*, e.g. that among sparrows (*caṭaka*) of various colours, the black variety plays a big role in the field of omens.

तदुक्तं वसन्तराजीयाख्ये शकुनग्रन्थे—'श्यामा वराही . . . ।' (p. 342)

His deep study of the Veda-s and the *Vedabhāṣya* is seen in discussing the etymology of some words. The word *śitpuṭa* as a synonym of *bhramara* quoted from the *Taittirīya Saṃhitābhāṣya* is ignored by other commentators:

'बृहस्पतये शित्पुटः पीतभ्रमरः' इति वेदभाष्यम् । (p. 352)

Also quoted are the *Vedabhāṣya* to add *plava* (watercock) to the list of birds, and the *śruti* (*Taittirīya Saṃhitā*) to show that *tittiri* (partridge) is a favourite bird of the Rudra-s, *rudrāṇāṃ tittiriḥ* (p. 355). His knowledge of political science is witnessed by citations from a large number of authorities such as Kāmandaka, Sajjana, Bṛhaspati, *Nītigajāṅkuśa*, *Somadevanīti* and *Dhvanimañjarī*. Dealing with the position of the feet of an archer, Amara says, *ityādi sthānapañcakam*; Malli. supplements the statement by quoting the relevant portion from *Dhanurveda*:

'. . . मण्डलमिति धनुर्वेदोक्तानि पञ्च धनुर्धरस्थानानि । (p. 534)

We have seen in the foregoing pages some of the salient features of two of the South Indian commentaries. The comm. of Bommagaṇṭi is even more learned as will be seen in the volume to follow.

अमरकोशः

दाक्षिणात्यव्याख्योपेतः

प्रथमकाण्डः

१. स्वर्गवर्गः

यस्य ज्ञानदयासिन्धोरगाधस्यानघा गुणाः ।
सेव्यतामक्षयो धीराः स श्रिये चामृताय च ॥ १ ॥

अमरपदविवृतिः लिङ्गयसूरिकृता

शिवं [1]हरिं विधातारं [2]तत्पत्नीस्तत्सुतान् गुरून्[3] ।
नत्वा समस्तप्रत्यूहशान्तये मङ्गलाय च ॥
पदवाक्यप्रमाणज्ञैः क्षीरस्वाम्यादिसूरिभिः ।
कृतान् ग्रन्थान् समालोच्य[4] बालानां सुखबुद्धये ॥
[5]यत् कृतं [6]सुरसिंहेन नामलिङ्गानुशासनम् ।
तत्रस्थायाः पदावल्या [7]विवृतिर्वक्ष्यते मया ॥

यस्येति—हे धीराः विद्वांसः यस्य [8]गुणाः अनघाः निर्मलाः स देवः श्रियै[9] च अमृताय च मोक्षाय[10] च सेव्यताम् आराध्यताम्,[11] [12]भुक्तिमुक्तिफलावाप्त्या[13] इत्यर्थः । किंविशिष्टस्य? ज्ञानं च दया च तयोः सिन्धुः तस्य [14]ज्ञानदयासिन्धोः । अगाधस्य [15]विषय[16]लिप्साविरहितस्य । किंविधः? अक्षयः क्षयरहितः । श्लोकोऽयं समुद्रपक्षेऽप्यूहनीयः । [17]अस्य विष्णोः क्षयो निवासः अक्षयः ॥ १ ॥

---

[1] A, T add गुरुं.
[2] तत्पत्नीं T.
[3] च वै W_1; इमान् B_2.
[4] °लोक्य A, B_1, C, D_1, K_1.
[5] तत्कृतं K_2, T; यत्कृतिं W_2.
[6] सूरि° W_1.
[7] विवृत्तिः W_1.
[8] Y adds देवस्य.
[9] D_1, K_2, W_1 add लक्ष्म्यै; gap in U; श्रिये W_2.
[10] W_1

omits. [11] U omits. [12] T omits मुक्ति. [13] °व्याप्ता T; प्रदामृत्वात् तस्येति भाव: B_2, C, D_1. [14] K_5, W_2 omit. [15] विप्रये W_1. [16] वीप्सा W_1; B_2, O, D_1 omit लिप्सा. [17] अकारवर्णवाच्यस्य C.

अमरपदपारिजातः मल्लिनाथसूरिकृतः

आकण्ठपौरुषमतो वारणतां विघ्नवारणेनैव ।
प्रथितां बिभ्रदशेषत्रिदशोपास्यं परं महः सेवे ॥
उक्तानुक्तनिरुक्तचिन्तनफलां टीकां सुभूतेः परा-
मालोच्यामरभाष्यवार्त्तिकमुखान् ग्रन्थान् बहूनादरात् ।
व्याचक्षेऽमरसिंहनामकमहं श्रीवत्सगोत्रोद्भवो
[1]बोल्लाटिन्मिनृसिंहसूरितनयः श्रीमल्लिनाथो मुदा ॥*

इह खलु निखिलफणिपतिविततमतकमलनिलयकबलनकलशतनयः कविवरकरटिनिकरसिंहामरसिंहः[2] [3]प्रक्रम्यमाणनिबन्धनरत्नपरिपन्थिनिरन्तरान्तरायतिमिरपटलनियुतमिहिरसमानामभिनवाधिकृतदेवतोपासनामनेन निबध्नाति यस्येति—तत्र देवतायाः परममहत्त्वख्यापनार्थं समुद्रत्वमारोपितम्। तत् कथम्। यस्यागाधस्य मन्दरगिरिमूल-[4]कर्षणेनाकलुषितस्य ज्ञानदयासिन्धोः। क्षीरस्य सिन्धुः क्षीरसिन्धुरिति यावत्। ज्ञानदययोः सिन्धुः ज्ञानदयासिन्धुरिति आधाराधेयभावसंबन्धेन। समस्त[5]विषयकानुभवस्य [6]सकलजगदुद्धारकदयायाश्चाधारभूतसिन्धोर्गुणा[7] अलङ्घ्यत्वादयः[8]। अनघाः तरुचरनिकरलङ्घितत्वादिदोषेणादूषिताः। अक्षयः कलशसुतकरतलाचुलुकितः। स शैवानां शिवः वैष्णवानां विष्णुः, जैनानां जिनः, बौद्धानां बुद्ध इति तत्तदधिदेवतापूर्वसिन्धुः। हे धीराः हे विद्वांसः। श्रियै चामृताय च नारायणनाकपालैकविषयसर्वजनयोगिविषयभूतश्र्यमृतयोः। भवद्भिः सेव्यताम्। त्रिवर्गसंपत्तेर्मोक्षस्य चाराध्यतामित्यर्थः। किं च। यस्यागाधस्य शेषवाचस्पतिप्रभृतिभिरपि वर्णितुमशक्यस्य। ज्ञानदया ज्ञानदानसंपत्त्या। ज्ञानस्य दाः दानम् ईः संपत्तिः। तया ज्ञानदयेत्युपलक्षणतृतीयया उपलक्षितस्येत्यर्थः। सिन्धोर्गुणाः प्रसादमाधुर्यादयः[9]। अनघाः पापरहिताः। अक्षयः सकलजनैरुम्भितोऽप्यक्षीणः। स विद्वज्जनाधिदेवतापूर्वसिन्धुः। धीराः श्रियै चामृताय च। सिन्धुर्लक्ष्मीसुधयोः सेव्यः। 'एकः शब्दः सम्यग् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुग् भवति' (cf. महाभाष्य, ६. १. ८४) इत्यागमात्। वाचस्तत्साध्यस्वर्गस्य च भवद्भिः सेव्यताम्।

लक्ष्मीसरस्वतीधात्रीत्रिवर्गसंपत्तिविभूतिशोभासु ।
उपकरणवेषरचनावसुधासु श्रीरिति प्रथिता ॥

---

* A_1 has nine additional introductory verses, some of them containing contradictory statements.

‘अमृतं दिवि खे मोक्षे’, ‘यज्ञशेषेऽमृताशने’ इत्युभयत्र व्याडिः। अनेन परब्रह्मशब्दब्रह्मणोरुपास्तिराचरिता[10] ॥ १ ॥

[1] बोल्लापित्रि B_2. [2] सिंहः सुरसिंहः B_3, B_4. [3] प्रकंस्यमान° B_3. [4] B_3, B_4 omit मूल. [5] A_1 adds वस्तु. [6] A_1 adds दुःखनिमग्न°. [7] °भूतस्य B_4. [8] °त्वादिगुणाः A_1. [9] °आदिगुणाः A_1. [10] A_1 adds उभयत्र देवता°.

समाहृत्यान्यतन्त्राणि संक्षिप्तैः प्रतिसंस्कृतैः।
संपूर्णमुच्यते वर्गैर्नामलिङ्गानुशासनम् ॥ २ ॥

(वि.) समाहृत्येति—अन्यतन्त्राणि निघण्ट्वन्तराणि[1] समाहृत्य एकीकृत्य संक्षिप्तैः संकुचितैः प्रतिसंस्कृतैः पर्यायपदैः वर्गैः [2]सजातीयसमूहैः साङ्गोपाङ्गशब्दसमूहैश्च नाम्नां[3] [4]वृक्षादिपर्यायाणां लिङ्गानां स्त्रीपुंनपुसकानाम् [5]अनुशासनं शिक्षा संपूर्णं [6]रूढपर्यायपरित्यागेनोच्यते ॥ २ ॥

[1] W_2 adds कुत्रचित्. [2] सजाति° D_1; सजातीयस्य K_2. [3] W_2 adds पदानां. [4] B_2, W_2 omit वृक्षादि. [5] D_1 omits. [6] रूढि° W_2.

(पा.) शास्त्रप्रारम्भे विशिष्य प्रयोजनं प्रथयति—समाहृत्येति—अन्यतन्त्राणि समाहृत्य कतिचिल्लिङ्गहीनानि[1] कतिचिदसंक्षिप्तानि कानिचिदप्रतिसंस्कृतानि कानिचिद्वर्गहीनानि। तस्मादन्यतन्त्राण्येकीकृत्य। संक्षिप्तैः स्तोकाद्भूयोऽभिधानं संक्षेप इति लक्षणस्याश्रयैः प्रतिसंस्कृतैः [2]असूक्तिपरिहारः प्रतिसंस्कार इति लक्षणस्य विषयैः वर्गैः सजातीयपदसमूहैः नामलिङ्गानुशासनमित्येतत्तन्त्रं संपूर्णं लिङ्गाद्यविकलं यथा तथोच्यते ॥ २ ॥

[1] °विहीनानि B_4. [2] अनुक्ति° B_4.

प्रायशो रूपभेदेन साहचर्याच्च कुत्रचित्।
स्त्रीपुंनपुसकं ज्ञेयं तद्विशेषविधेः क्वचित् ॥ ३ ॥

(वि.) प्रायश इति—स्त्रीपुंनपुसकं प्रायशः प्रायेण रूपभेदेन ज्ञेयम्[1]। तद्यथा—[2]‘बुद्धिर्मनीषा धिषणा’ इति (१. ५. १)। कुत्रचित् साहचर्यात् ज्ञेयम्। तद्यथा—‘तटित् [3]सौदामिनी’ इति (१. ९. ३)। क्वचित् तेषां [4]लिङ्गानां विशेषविधेः ज्ञेयम्। [5]कथम्? ‘भेरी स्त्री दुन्दुभिः पुमान्’ इति (१. ७. ६)। एवं लिङ्गत्रयेऽपि ऊहनीयम् ॥ ३ ॥

[1] ज्ञातव्यं K_2. [2] D_1, K_1, U, W_2 omit बुद्धिः. [3] सौदामनी D_2, K_1, K_3.
[4] K_1 adds भिन्न°. [5] तद्यथा B_2, D_2; यथा W_1.

(पा.) संक्षेपप्रकारं प्रदर्शयति प्रायश इति—प्रायशः प्रचुरं रूपभेदेन[1] नियतरूपेण, कुत्रचित् रूपभेदाप्रतीतस्थले साहचर्यात्, तद्विशेषविधेः क्वचित्, यत्र रूपभेदप्रतीतिर्नोदेति,[2] यत्र साहचर्यं च न निमित्तं, यत्र [3]साहचर्यलिङ्गापवादः, यत्रानेकलिङ्गत्वं, तत्र विशेषविधेः स्त्रीपुंनपुंसकं ज्ञेयम् । रूपभेदस्योदाहरणम्—

'हरीतकी हैमवती रेचकी श्रेयसी शिवा'। (२. ४. ५९)
'उन्मत्तः कितवो धूर्तो दुत्तूरः काञ्चनाह्वयः'। (२. ४. ७७)
'अभयं नलदं सेव्यममृणालं जलाशयम्'। (२. ४. १६४)

इत्यादि । साहचर्यस्योदाहरणम्—'स्याद्वितर्दिस्तु वेदिका' (२. २. १६) । 'पञ्चशाखः शयः पाणिः' (२. ६. ८१)। 'विष्टपं भुवनं जगत्' (२. १. ६)। चशब्दः प्रत्ययाद्युपलक्षणार्थम्। 'विभूतिर्भूतिरैश्वर्यम्' (१. १. ३९) इत्यत्र [4]प्रत्ययो लिङ्गस्य गमको भवति। 'पुञ्जराशी तूत्करः कूटमस्त्रियाम्' (२. ५. ४२) इत्यत्र समासो लिङ्गस्य गमको भवति। विशेषविधेरुदाहरणम्—'चञ्चुस्त्रोटिरुभे स्त्रियाम्' (२. ५. ३६)। 'स्त्रियः सुमनसः पुष्पम्' (२. ४. १७)। 'खनिः स्त्रियामाकरः स्यात्' (२. ४. ७)। 'किरीटं पुंनपुंसकम्' (२. ६. १०२)॥ ३॥

[1] प्रचुररूपभेदेन A_1. [2] न चेत् B_4. [3] साहचर्यं A_1. [4] B_4 adds क्तिन्.

भेदाख्यानाय न द्वन्द्वो नैकशेषो न संकरः ।
कृतोऽत्र भिन्नलिङ्गानामनुक्तानां क्रमादृते ॥ ४ ॥

(वि.) भेदाख्यानायेति—अत्र [1]ग्रन्थे भिन्नलिङ्गानां [2]पदानाम् अनुक्तानां क्रमात् ऋते [3]भेदाख्यानाय द्वन्द्वो न कृतः। [4]एकशेषः एकशेषसमासो न कृतः। संकरश्च[5] न कृतः। तद्यथा—'उखा कुण्डम्' इत्युक्तम् (२. ९. ३१)। न तु 'उखाकुण्डे' इति। एकशेषो [6]यथा—'नभः[7] खं श्रावणो नभाः' (३. ३. २३२) न तु 'खश्रावणौ नभः खम्' इति। संकरो यथा—'स्तवः स्तोत्रं स्तुतिर्नुतिः' इति (१. ६. ११)। न तु 'स्तुतिः स्तोत्रं स्तवो नुतिः' इति। संकरो नाम [8]साहचर्यम्। भिन्नलिङ्गानां नानालिङ्गानाम् अनुक्तानाम् अन्यत्रानुक्तानाम्। क्रमादृते। भिन्नवाक्यानां[9] क्रमेणैव अनुशासनं करोमि, क्रमं विना न करोमीत्यर्थः॥ ४॥

[1] K_3 omits. [2] U omits. [3] K_2, W_2 add लिङ्गान्तरज्ञापनार्थं.
[4] C, D_1, K_5, U, W_2, Y omit. [5] D_1, K_3 omit च. [6] Y adds न कृतः.

[7] नभाः श्रावणिकश्च सः इत्युक्तं न तु श्रावणो नभसौ इत्युक्तम् B_2, C; न नभसि श्रावणे नभाः K_3. [8] सांकर्यं W_2. [9] भिन्नलिङ्गानां C, D_2.

(पा.) प्रतिसंस्कारप्रकारं दर्शयति भेदाख्यानायेति—अत्र शास्त्रेऽनुक्तानां भिन्नलिङ्गानां पदानां क्रमादृते क्रमं विना भेदाख्यानाय भेदप्रतिपत्तिनिमित्तार्थं न द्वन्द्वः कृतः। नैकशेषः। एकशेषोऽपि[1] न कृतः। संकरश्च न कृतः। केवलं क्रम एव [2]कृत इत्यर्थः। द्वन्द्वप्रतिषेधस्य—'रेणुर्द्वयोः स्त्रियां धूलिः पांसुर्ना न द्वयो रजः' (२. ८. ९८)। अत्र पार्थक्यमेव क्रमशब्दार्थः। एकशेषप्रतिषेधस्य—'नाली नालं च काण्डोऽस्य' (२. ९. २२) इत्यादि। अत्र सर्वपदोक्तिरेव क्रमशब्दार्थः। संकरप्रतिषेधस्य—'स्तवः स्तोत्रं स्तुतिर्नुतिः' (१. ६. ११)। अत्र विभाग एव क्रमशब्दार्थः। भेदप्रतीतिस्थले संकरो न दोषाय[3]। 'अलंकारस्त्वाभरणं परिष्कारो विभूषणम्' (२. ६. १०१)। अत्र भिन्नलिङ्गानामित्यनेन अभिन्नलिङ्गानामुदाहरणान्युक्तान्येव। [4]द्वन्द्वस्य—'गृहं गेहोदवसितं वेश्म सद्म निकेतनम्' (२. २. ४)। 'निकाय्यनिलयालयाः' (२. २. ५)। एकशेषस्य—'नासत्यावश्विनौ दस्रावाश्विनेयौ च तावुभौ' (१. १. ५१)। अनुक्तानामित्यनेन उक्तानां भिन्नलिङ्गानां द्वन्द्वादयः कृता एव[5]। 'तमालपत्रतिलकचित्रकाणि विशेषकम्' (२. ६. १२३) इत्यत्र 'द्वितीयं च तुरीयं च न स्त्रियाम्' (२. ६. १२३) इति लिङ्गमुक्तम्। 'धर्माः पुण्ययमन्यायस्वभावाचारसोमपाः' (३. ३. १३९) इत्यत्र 'स्याद्धर्ममस्त्रियां पुण्यश्रेयसी' (१. ४. २४) इत्यत्र लिङ्गमुक्तम्। 'पद्माकरस्तटाकोऽस्त्री कासारः सरसी सरः' (१. १२. २८)। अत्र तटाकोऽस्त्रीति लिङ्गमुक्तम्॥ ४॥

[1] A_1 adds समासः. [2] क्रियते A_1. [3] A_1 adds तत् कथम्. [4] A_1, B_4 add अत्र. [5] एवम् B_4.

त्रिलिङ्ग्यां त्रिष्विति पदं मिथुने तु द्वयोरिति।
निषिद्धलिङ्गं शेषार्थं त्वन्ताथादि न पूर्वभाक्॥ ५॥

(वि.) त्रिलिङ्ग्यामिति—त्रिष्विति प्रयुक्ते लिङ्गत्रयं[1] ज्ञेयम्। यथा 'तटं त्रिषु' इति (१. ९. ७)। द्वयोरित्युक्ते स्त्रीपुंलिङ्गे[2] ज्ञेये। यथा—'रेणुर्द्वयोः' इति (२. ८. ९८)। एकलिङ्गनिषेधे[3] अवशिष्टलिङ्गं[4] ज्ञेयम्। यथा—'विमानोऽस्त्री' इति (१. १. ४९)। तु शब्दोऽन्ते यस्य तत् त्वन्तम्, अथशब्दः [5]आदिः यस्य[6] तत् अथादि, त्वन्तं च अथादि च[7] पदं पूर्वपदार्थं न [8]भवति शास्त्रेषु[9]॥ ५॥

[1] त्रये W_2. [2] पुंलिङ्गस्त्रीलिङ्गे K_3, K_5. [3] एकलिङ्गे निषिद्धे B_2, C. [4] परिशिष्टलिङ्गे ज्ञेये B_2, W_2; °लिङ्गद्वयं W_1; °लिङ्गपरिग्रह इत्यर्थः K_2. [5] आदौ B_2,

D_2, K_1. [6] W_2 adds वर्तते. [7] B_2 adds त्वन्ताथादि. [8] भजति B_2, K_1, Y. [9] D_2, K_1, K_2, K_3 omit.

(पा.) तरणिरहितपारावार इव परिभाषारहितं शास्त्रं दुस्तरमिति परिभाषां निरूपयति त्रिलिङ्ग्यामिति—त्रिष्विति प्रयुक्ते त्रिलिङ्गे[1] कृतविवक्षा ज्ञेया। 'सरन्ध्रे सुषिरं त्रिषु' (१. ९. २)। द्वयोरित्युक्ते स्त्रीपुंलिङ्गे ज्ञेये। यथा 'वह्नेर्द्वयोर्ज्वालकीलौ' (१. १. ५७)। यद्यपि द्विशब्दः संख्येयसामान्यवर्ती तथापि वक्तृविवक्षापूर्विका शब्दप्रवृत्तिरिति विवक्षावशात् प्रकृते संख्येयविशेषवर्ती। तस्माद् 'द्विहीनं प्रसवे सर्वम्' (२. ४. १८) इत्यादौ मिथुनार्थप्रतीतिकरो भवति। 'अर्धरात्रनिशीथौ द्वौ' (१. ४. ६) इत्यत्र संख्याविशेषस्य श्रूयमाणत्वादतिप्रसङ्गस्यावकाशो[2] नास्ति। निषिद्धलिङ्गं शेषार्थम्। निषिद्धलिङ्गं पदं पारिशेष्यानिषिद्धलिङ्गार्थं स्यात्। यथा 'अस्त्रियामाढकद्रोणौ' (२. ९. ८८)। अत्र शेषत्वं पुंनपुंसकयोरेव। आढकः, आढकम्। द्रोणः, द्रोणम्। त्वन्ताथादि न पूर्वभाक्। तुशब्दान्तम् अथशब्दादि पदं पूर्वभाङ्न भवति। त्वन्तस्य—'प्रत्यन्तो म्लेच्छदेशः स्यान्मध्यदेशस्तु मध्यमः' (२. १. ७)। 'प्रच्छर्दिका वमिश्च स्त्री पुमांस्तु वमथुः समाः' (२. ६. ५५)। एवं दण्डापूपन्यायादुदाहरणान्तराण्यपि[3] द्रष्टव्यानि। 'स्यात्तेमनं तु निष्ठानम्' (२. ९. ४४) इत्यादौ स्यादादिप्रयोगः। अथादेः—'अम्बा माताथ बाला स्याद्वासूः' (१. ८. १४), 'भार्या जायाथ पुंभूम्नि दाराः' (२. ६. ६)। अर्थग्रहणाद् 'अनुक्रोशोऽप्यथो हसः' (१. ८. १८) इत्यादौ अथोशब्दप्रयोगः। इतः परं स्वर्गादिक्रमेण शास्त्रमवतारयति। अत्र शेषपूरणं विशेषाभिधानं टीकाप्रयोजनम् ॥ ५ ॥

[1] त्रिलिङ्गी ज्ञेया B_3, B_4. [2] °प्रसङ्गः स्यादिति। अत्र A_1. [3] A_1 adds तेनैव.

स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालयाः।
सुरलोको द्योदिवौ द्वे स्त्रियां क्लीबे त्रिविष्टपम् ॥ ६ ॥

(वि.) स्वरिति—स्वर्यते स्वः,[1] 'स्वृ शब्दोपतापयोः'। स्वः सुखं गम्यते [2]इति स्वर्गः। [3]'गम्लृ गतौ'। सुष्ठु अर्ज्यते[4] इति वा। 'अर्ज सर्ज अर्जने'। न विद्यते अकम् असुखम्[5] अत्रेति नाक[6]ः। [7]तृतीयश्चासौ [8]दिवश्च त्रिदिवः[9]। त्रिदशानाम् आलयः त्रिदशालयः। सुराणां लोकः सुरलोकः। दीव्यन्त्यस्यामिति द्यौः, द्यौश्च[10]। 'दिवु क्रीडाविजिगीषाद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु'। इमावोकारान्तवकारान्तौ स्त्रीलिङ्गौ। तृतीयं च तद् विष्टपं च त्रिविष्टपम्[11]। एतानि स्वर्गनामानि ॥ ६ ॥

---

[1] एतदव्ययम् C, D_2. [2] B_1, B_2, C, D_1 add अत्र. [3] D_2, W_2 add सृप्लृ. [4] अर्जयति D_1, W_1, Y. [5] W_2 omits; दुःखं D_1. [6] C adds

'अक कौटिल्ये'.　[7] तृतीया B_3, C, D_1, W_2.　[8] द्यौश्च B_1, C, D_1, K_2, W_2. [9] C adds भूम्यन्तरिक्षदिव इति विवक्षया तस्य तृतीयत्वमिति भावः.　[10] दिवि च T; दिवश्च Y.　[11] एतत् नपुंसकलिङ्गं, भूम्यादिविवक्षयेति भावः C.

(पा.) स्वरव्ययं – त्रिविष्टपम्। एतानि स्वर्गनामानि। अत्र स्वःशब्दोऽव्ययः[1]। स्वः पुण्यलोकः। 'स्वर्जयति काशी'। स्वर्गशब्दसाहचर्यात् स्वःशब्दस्य पुंस्त्वे प्राप्तेऽव्ययवचनाद् अलिङ्गत्वम्। 'सदृशं त्रिषु लिङ्गेषु' इति विधीयते। तत्स्वरूपे शृङ्गारप्रकाशिका—'इयमयमिदमित्यर्थसंज्ञाव्यपदेशनिमित्तं शब्दसंस्कारहेतुः शब्दधर्मो लिङ्गं स्त्री पुमान् नपुंसकमिति' (cf. पृ. १८३)। टाबादिशब्दसंस्कारहेतुरियंव्यपदेशकारणं स्त्री। 'तस्माच्छसो नः पुंसि' (६. १. १०३) इत्यादिशब्दसंस्कारहेतुरयमित्यर्थव्यपदेशकारणं पुमान्। 'इकोऽचि विभक्तौ'[2] (७. १. ७३) इत्यादिशब्दसंस्कारहेतुरिदमित्यर्थव्यपदेशकारणं नपुंसकम्। तदेतल्लिङ्गं षोढा। शुद्धं मिश्रं संकीर्णम् उपसर्जनम् आविष्टम् अव्यक्तं चेति। तेष्वेकसंस्कारहेतुः शुद्धम्—[3]खट्वा वृक्षः कुण्डं स्त्री पुमान् नपुंसकमित्यादि। संस्कारद्वयोपग्राहि मिश्रम्। मरीचिः ऊर्मिः अर्चिः छर्दिः कषायं कवाटमित्यादि। संस्कारत्रयोपग्राहि संकीर्णम्। तटी तटः तटं, शृङ्खला शृङ्खलः शृङ्खलम्। विशेष्यशब्दसंस्कारग्राहि विशेषणरूपमुपसर्जनम्। शुक्ला शुक्लः शुक्लम्। विशेषणत्वेऽपि नियतसंस्कारमाविष्टम्। प्रीतिर्विषयः प्रधानं भार्या दाराः कलत्रम्। लिङ्गनिमित्तशब्दसंस्कारानर्हमव्यक्तम्। पञ्च षट् कति उच्चैः नीचैः यूयं वयमित्यादि। स्वर्गादयः पञ्च रूपभेदात् पुंलिङ्गाः। वैजयन्त्यां (पृ. ३, श्लो. २) तु त्रिदिवशब्दः पुंनपुंसक इति कथितः। 'अमर्त्यभवनं ना[4] च त्रिदिवं स्यात् स्वरव्ययम्' इति। द्योदिवौ शब्दौ स्त्रीरूपभेदाभा[5]वाल्लिङ्गप्रतीत्यविषयौ। अतः स्त्रियामिति विशेषविधिः। अकारान्तदिवशब्दोऽप्यस्ति।

'स्वर्लोकस्तूर्ध्वलोकः[6] स्यादवरोहः फलोदयः।
मन्दरः सैरिकः शक्रभवनं खं दिवं नभः॥'

इति त्रिकाण्डशेषः (पृ. १, श्लो. ४)। त्रिविष्टपशब्दो नपुंसकः। विष्टपशब्दापेक्षया प्राप्तपुंनपुंसकत्वप्रतिषेधार्थं क्लीबवचनम्। यदाह कैयटः—क्लीबग्रहणं नित्यज्ञापनार्थमिति॥ ६॥

[1] अव्ययम् B_4.　[2] सुपि A_1.　[3] A_1 adds कथम्.　[4] गौश्च त्रिदिवः इति मुद्रितग्रन्थे (पृ. ३, श्लो. २)　[5] A_1 omits अभावात्.　[6] देवलोकः B_3, B_4; मुद्रितग्रन्थे च (पृ. १, श्लो. ४)

अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः।
सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकसः॥ ७॥

(वि.) अमरा इति—[1]अमराः, न म्रियन्ते इत्यमराः। 'मृङ् प्राणत्यागे'। न विद्यते जरा येषां ते निर्जराः। 'जृष् [2]वयोहानौ'। दीव्यन्तीति देवाः। 'दिवु क्रीडादौ'। [3]त्रिदशपरिमाणं वयो येषामिति त्रिदशाः। विबुध्यन्ते इति विबुधाः। 'बुध अवगमने'। सुरन्तीति सुराः। 'सुर ऐश्वर्ये'। सुष्ठु राजन्ते वा[4]। 'राजृ दीप्तौ'। भक्त्या दत्तं सुष्ठु [5]रान्तीति वा। 'रा आदाने'। शुभं रान्तीति[6] वा। 'रा दाने'। अब्धिजा सुरा येषामस्तीति वा। सुष्ठु वाञ्छितफलं रान्तीति[7] वा। 'रा दाने'। सुष्ठु [8]पृणन्ति पालयन्तीति सुपर्वाणः। 'पॄ पालनपूरणयोः'। शोभनं पर्व आचरित[9]मेषामिति वा। सुष्ठु मन्यन्ते सुमनसः। 'मन ज्ञाने'। शोभनचित्तत्वाद्वा। त्रिदिवस्य ईशाः[10] त्रिदिवेशाः। द्यौः ओकः [11]स्थानमेषां ते दिवौकसः॥ ७॥

---

[1] Y omits.
[2] I, K_1, K_2, W_1 omit.
[3] तिस्रो दशाः परिणामः (परिमाणं K_2) येषां ते B_2, C, D_1.
[4] D_2, I, K_1, K_2 add सुराः.
[5] D_2, W_2 add आददते.
[6] रायन्ति 'रै शब्दे' B_2, C, D_2, K_2, K_3; अत्र एकपत्रं ग्रन्थपातः U, W_2.
[7] D_2, K_1, K_2, K_3 add ददति.
[8] पिपर्ति B_1, C.
[9] B_1, T add अस्ति.
[10] ईश्वराः W_1.
[11] निलयः B_2, C.

(पा.) अमरा—अमृतान्धसः। सर्वत्र स्वरपरत्वाद्धल्परत्वाच्च 'लोपः शाकल्यस्य' इति (८. ३. १९) 'हलि सर्वेषाम्' इति (८. ३. २२) द्वाभ्यां यलोपः॥ ७॥

आदितेया दिविषदो लेखा अदितिनन्दनाः।
आदित्या ऋभवोऽस्वप्ना अमर्त्या अमृतान्धसः॥ ८॥

(वि.) आदितेया इति—[1]अदितेः अपत्यानि [2]आदितेयाः। दिवि सीदन्तीति दिविषदः। 'षद्ऌ विशरणगत्यवसादनेषु'। लिख्यन्ते [3]पटादौ लेखाः। 'लिख लेखने'। प्राणिनां [4]शुभाशुभानि लिखन्तीति वा। 'लिख अक्षरविन्यासे'। अदितेः नन्दनाः[5] अदितिनन्दनाः। [6]अदितिं नन्दयन्तीति वा। [7]अदितेः पुत्राः आदित्याः। [8]ऋते सत्ये भवन्तीति ऋभवः। ऋ[9] स्वर्गे भवन्तीति वा ऋभवः। ऋशब्दो [10]नीतिवाची। तस्माद् भवन्तीति वा। न विद्यते स्वप्नो येषां ते अस्वप्नाः। मर्त्यादन्ये [11]अमर्त्याः। [12]न म्रियन्ते इति वा अमर्त्याः। अमृतम् अन्धो ऽन्नं[13] येषां ते अमृतान्धसः॥ ८॥

---

[1] अदित्या वा D_2, W_2.
[2] K_1, K_3 add पुमांसः; D_1, K_2, W_1 add आदित्याः.
[3] फलकादौ K_1, T; फलकायामिति D_2.
[4] शुभं D_2, K_1, K_3, W_1.
[5] पुत्राः B_2, D_2, K_2, W_1.
[6] W_1 omits; K_1, K_3 add 'टु नदि समृद्धौ'.
[7] अदित्याः अपत्यानि पुमांसः B_2, Y.
[8] ऋतेन सत्येन B_2, D_1, I, K_3, W_1.

[9] रौ D_2, I, K_1, K_2, W_2. [10] अदिति° D_2, I, W_1. [11] न मर्त्याः A, T; मर्त्येभ्यः D_1; मर्त्याः न भवन्तीति B_1, B_2. [12] B_1, B_2, C, W_1 omit न . . . [13] B_1, C, K_5, Y omit.

बर्हिर्मुखाः क्रतुभुजो गीर्वाणा दानवारयः ।
वृन्दारका दैवतानि पुंसि वा देवताः स्त्रियाम् ॥ ९ ॥

(वि.) बर्हिरिति—बर्हिः [1]अग्निः मुखं येषां ते बर्हिर्मुखाः । क्रतौ भुञ्जते[2] इति क्रतुभुजः । ‘ भुज पालनाभ्यवहारयोः ’ । गिरं[3] वणन्ति [4]व्याकुर्वन्तीति गीर्वाणाः । ‘ वण कण शब्दे ’ । गीः [5]वाणो येषामिति वा[6] । गिरं वनन्तीति वा । ‘ वन [7]संभक्तौ शब्दे च ’ । दानवानाम् अरयः दानवारयः । शोभनं [8]वृन्दं येषामस्तीति वृन्दारकाः । देवता[9] एव दैवतानि[10] । इति सामान्यतो [11]देवतानामानि ॥ ९ ॥

[1] बर्ही रश्मिः T, Y. [2] भुञ्जन्ति K_1. [3] गिरः B_2, C, K_2. [4] व्याकुर्वते D_2, K_3, W_1. [5] गीरेव वाणाः Y. [6] D_2, K_1, W_2, Y add गीर्वाणाः. [7] ‘ वन वण संभक्तौ ’ D_1, W_1. [8] वृन्दं D_1; अरं शोभनं C. [9] देवा एव D_2, K_1, K_5, W_1. [10] स्वार्थे देवताभ्योऽण् इत्यण् । देवतेति स्वार्थे तल्; तलि स्त्रीलिङ्गवचनं कर्तव्यम् इति स्त्रीत्वे सिद्धेऽपि यत् पुनः ‘ स्त्रियाम् ’ इति वचनं तद् बहुवचनान्तपुंलिङ्गशङ्कानिराकरणार्थम् D_1. [11] देव° D_2, K_3, K_5.

(पा.) बर्हिर्मुखाः—स्त्रियाम् । देवनामानि । ‘ निलिम्पाः स्वर्गिणः सेन्द्रा दिविजा द्विदशा बुधाः ’ इत्येतानि च । जातिशब्देन जात्याश्रिता व्यक्तिरभिधीयत इति तद्व्यक्तीनां बहुत्वाद् बहुवचननिर्देशः ॥ ९ ॥

आदित्यविश्ववसवस्तुषिताभास्वरानिलाः ।
महाराजिकसाध्याश्च रुद्राश्च गणदेवताः ॥ १० ॥

(वि.) आदित्येति—आदित्याः [1]आदित्यसंघेन वृत्ताः[2] गणदेवताः, ते द्वादश । श्राद्धादौ [3]अग्रे उपविशन्तीति विश्वे । ‘ विश प्रवेशने ’ । ते [4]त्रयोदश । आहूता वसन्तीति वसवः । ‘ वस निवासे ’ । ते [5]अष्टौ । तुष्यन्तीति तुषिताः । ‘ तुष तुष्टौ ’ । ते षट्त्रिंशत् । आभासन्ते[6] इति आभास्वराः । ‘ भासृ दीप्तौ ’ । ते चतुःषष्टिः । यैः अनन्ति [7]संचरन्ते प्राणिनः ते अनिलाः । ‘ अन प्राणने ’ । इलायां[8] न चरन्तीति वा । ते एकोनपञ्चाशत् । महाराजशब्दो येषामस्तीति महाराजिकाः । ते षट्त्रिंशद् द्वे शते । साध्यन्ते आराध्यन्ते इति साध्याः । ‘ राध साध संसिद्धौ ’ । ते द्वादश । रोदयन्ति [9]दुष्टान् इति रुद्राः ।

'रुदिर् अश्रुविमोचने'। [10]रुतं दुःखं द्रावयन्तीति वा रुद्राः। 'द्रा कुत्सायां गतौ'। रुतं वेदात्मकं शब्दं कल्पादौ [11]द्रावयन्तीति वा रुद्राः। ते एकादश[12]। एतानि [13]समूहदेवतानामानि ॥ १० ॥

---

[1] W_1 omits. [2] युक्ताः W_1. [3] B_2, W_2 omit. [4] B_2, C, D_1, W_2 omit त्रयो. [5] अष्ट K_3. [6] आ समन्तात् C; भास्वन्ति D_2. [7] W_1 omits सं . . . नः. [8] निलः यानं, न विद्यते निलः यस्मिन् कर्मणि यथा भवति तथा चरन्तीति अनिला वा B_2, C. [9] W_2, Y omit. [10] Y omits two lines. [11] द्रवन्ति D_1, D_2, W_1. [12] B_1, C, D_1, K_1, W_1 add एते गणदेवताः. [13] B_1, C, D_1, K_1 add गण°.

(पा.) आदित्य—गणदेवताः। आदित्यादयो देवताः[1]।

'तत्रादित्या द्वादश स्युर्विश्वेदेवास्त्रयोदश[2]।
वसवश्चाष्ट संख्याताः षट्त्रिंशत् तुषिताः स्मृताः।
आभास्वराश्चतुःषष्टिर्वाताः पञ्चाशदूनकाः॥
महाराजिकनामानो द्वे शते[3] विंशतिस्तथा।
साध्या द्वादश विख्याता रुद्रा [4]एकादश स्मृताः'॥

'तत्र द्वादश नम्नाख्या इति पाठान्तरम्' इति सुबोधिन्यामुक्तम्। एवं पुराणवचनैस्तत्संख्यानामानि ज्ञातव्यानि। विश्वे इति पाठसामर्थ्यात् सर्वनामकार्यमनिषिद्धम् ॥ १० ॥

---

[1] गणदेवताः B_4. [2] दश B_3, B_4. [3] षट् च विंशतिः A_1. [4] रुद्राश्चैकादश B_4.

विद्याधराप्सरोयक्षरक्षोगन्धर्वकिंनराः।
पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः ॥ ११ ॥

(वि.) विद्याधर इति—[1]गुलिकाञ्जनादिविद्यां [2]धारयन्तीति विद्याधराः। 'डुधाञ्[3] धारणपोषणयोः'। एते जीमूतवाहन[4]पुष्पदन्तप्रभृतयः[5]। अद्भ्यः सरसः निर्गताः अप्सरसः[6]। 'सृ गतौ'। अथवा आप्यन्ते पुण्यकृद्भिरिति। 'आप्लृ व्याप्तौ'। ताः उर्वशीमुखाः। यक्ष्यन्ते[7] इति यक्षाः। 'यक्ष पूजायाम्'। ते कुबेरादयः। यज्ञेभ्यो[8] रक्ष्यन्त इति रक्षांसि। 'रक्ष पालने'। तानि च रावणादीनि। गानं[9] धारयन्तीति गन्धर्वाः[10]। ते हाहाहूहूप्रभृतयः। किंचिन्नराः किंनराः। ते अश्वमुखादयः। पिशितं मांसमश्नन्तीति पिशाचाः। 'अश भोजने'। ते [11]कामचारिणः। निधिं[12] गूहन्तीति

गुह्यकाः । 'गुहू संवरणे'। ते मणिभद्रादयः । अणिमादिसिद्धिः एषामस्तीति सिद्धाः । सिध्यन्तीति वा। ते विश्वावसुप्रभृतयः। भवन्तीति भूताः। 'भू सत्तायाम्'। ते बालग्रहादयः। एतानि [13]देवोद्भवदेवतानामानि ॥ ११ ॥

[1] ग्रुटिका° K$_3$, W$_1$. [2] धरन्ति D$_1$. [3] 'धृ धारणे' D$_1$. [4] K$_1$, K$_3$ omit पुष्पदन्त. [5] आदयः D$_2$, K$_2$, Y. [6] अद्भयः सरन्ति निर्गच्छन्ति B$_2$. [7] D$_1$ adds पूज्यन्ते. [8] येभ्यो B$_1$, C, D$_2$; W$_2$ adds युद्धैः. [9] गानानि B$_1$, C, T. [10] D$_1$ adds 'डुधाञ् धारणपोषणयोः. [11] तमसि D$_1$, W$_1$; तामस° K$_1$, K$_2$; तामसीचराद्याः B$_2$, C, W$_2$; तमःसंचारिणः K$_3$. [12] निधीन् B$_2$. [13] देवतो° A, D$_1$; देवोद्भवनामानि B$_1$, B$_2$, C.

(पा.) विद्याधरो—देवयोनयः। विद्याधरादयो देवयोनिपदवाच्याः[1] । विद्याधरपिशाचगुह्यकसिद्धभूताः पञ्चानुक्ताः। तस्माद् व्यासविधिः। अप्सरोयक्षरक्षोगन्धर्वकिंनरशब्दाः पञ्च उक्ताः। तस्मात् समासविधिः। ईदृशः प्रत्ययः [2]सुभूतिटीकापरि[3]श्रमशालिनां सुगमः ॥ ११ ॥

[1] A$_1$ omits पद. [2] A$_1$ omits टीका. [3] क्रम° B$_4$.

असुरा दैत्यदैतेयदनुजेन्द्रारिदानवाः ।
शुक्रशिष्या दितिसुताः पूर्वदेवाः सुरद्विषः ॥ १२ ॥

(वि.) असुरा इति—यज्ञभागान् [1]निरस्यन्तीति [2]असुराः। असून् अस्यन्ति इति वा असुराः। 'असु क्षेपणे'। सुरेभ्योऽन्ये वा। असुना रात्रौ सृष्टा वा। असून् रान्तीति[3] वा। 'रा आदाने'। दितेः पुत्राः दैत्याः दैतेयाश्च। दनोर्जाता दनुजाः दानवाश्च[4]। इन्द्रस्य अरयः इन्द्रारयः। शुक्रस्य शिष्याः शुक्रशिष्याः। दितेः सुताः दितिसुताः। पूर्वान् इन्द्रादीन् दीव्यन्ति विजिगीषन्त इति पूर्वदेवाः। अथवा पूर्वे देवा वा। सुरान् द्विषन्तीति सुरद्विषः। 'द्विष [5]अप्रीतौ'। एतानि [6]असुरनामानि ॥ १२ ॥

[1] अस्यन्ति K$_5$, W$_2$. [2] न विद्यते सुरा एषां ते D$_1$; सुराः यज्ञभागाः एषां न सन्तीति B$_2$. [3] B$_2$ adds क्षपयन्ति. [4] D$_1$ adds 'जनी प्रादुर्भावे'. [5] अप्रीणने A, B$_1$, I, T. [6] असुषु प्राणेषु रमन्ते इति वा। 'रमु क्रीडायाम्'। रभसं शीघ्रं प्राणिवर्गं अस्यन्तीति वा। पूर्वनिपातसमासः। 'असु क्षेपणे'। रात्रौ सृष्टाः उत्पन्ना असवो येषां ते। परनिपातप्रधानबहुव्रीहिः B$_2$.

(पा.) असुरा—सुरद्विषः। असुरनामानि॥ दैत्यानां दानवानां च मातृभेदाद् भेदे सत्यपि असुराविशेषत्वादभेदः। 'हिरण्याख्यं दानवमिव दंष्ट्राविभिन्नवक्षः-

स्थलमिति' हिरण्याख्यदैत्ये दानवशब्दप्रयोगः। 'इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम्' (कु. सं. २. ५५) इति तारकाख्यदानवे दैत्यशब्दप्रयोगः[1] ॥ १२ ॥

---

[1] A_1 adds दृष्टः.

सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः ।
समन्तभद्रो भगवान् मारजिल्लोकजिज्जिनः ॥ १३ ॥

(वि.) सर्वज्ञ इति—सर्वं जानातीति सर्वज्ञः। 'ज्ञा अवबोधने'। [1]शोभनं गतं ज्ञानम् अस्येति [2]सुगतः। ये [3]गत्यर्थास्ते ज्ञानार्था इति। सर्वं क्षणिकमिति आच्छिनत्ति वा। बुध्यते इति बुद्धः। 'बुध [4]अवगमने'। धर्मस्य संसारोद्धरणादेः राजा धर्मराजः[5]। तथा सत्यं गतं भूतं ज्ञानमस्य तथागतः[6]। समन्ताद् भद्रं मङ्गलमस्येति समन्तभद्रः।

'ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः।
ज्ञानवैराग्ययोश्चैव षण्णां भग [7]इतीरणा ॥'

इति। [8]सोऽस्यास्तीति भगवान्। मारं [9]कामं जयतीति मारजित्। मारान् कामक्रोधादीन् जयतीति वा[10]। [11]स्कन्धमारक्लेशमारादीन् जयतीति वा। लोकान् जयतीति लोकजित्। भवं जयतीति जिनः। 'जि अभिभवे'। त्रयाणामपि 'जि जये' इति वा धातुः ॥ १३ ॥

---

[1] B_2 adds सु. [2] सुष्ठु अपुनरावृत्तिमोक्षं गतः D_1. [3] K_5, W_1 omit ये . . . र्थाः. [4] अवबोधने B_1, C. [5] B_2 adds 'राजृ दीप्तौ'. [6] सर्वे गम्लृ-अर्थाः ज्ञानार्थाः B_2. [7] ईरिताः K_3; स्मरणात् B_2, D_1, W_2. [8] भगः K_5, W_2; भगः ऐश्वर्यादिषट्कोऽस्यास्तीति भगवान्। तदुक्तम्—ऐ . . . इति स्मृत इति स्मरणात् C. [9] क्लेशं B_1, B_2, C. [10] D_1 adds 'जि जये'. [11] बौद्धास्तु स्कन्धमारः क्लेशमारो मृत्युमारो देवपुत्रमारश्चेति चतुरो मारानाहुः। तान् जयतीति वा D_1, K_2, K_3, W_1.

षडभिज्ञो दशबलोऽद्वयवादी विनायकः ।
मुनीन्द्रः श्रीघनः शास्ता मुनिः, शाक्यमुनिस्तु यः ॥१४॥

(वि.) षडभिज्ञ इति—[1]दिव्यं चक्षुः, दिव्यं श्रोत्रं, [2]पूर्वनिवासानुस्मृतिः, परचित्ततत्त्वज्ञानम्, [3]आश्रवक्षयः, ऋद्धिश्चेति[4] षड्[5] अभिज्ञा यस्य सः षडभिज्ञः। [6]दान्तिक्षान्तिशीलवीर्यध्यान[7]कान्ति[8]बलोपाय[9]प्रणिधिविज्ञानानि[10] दश बलानि यस्य

स दशबलः। अद्वयम् अभेदं विज्ञानाद्वैतं वदतीत्यद्वयवादी[11]। 'वद व्यक्तायां वाचि'। विनयति शिक्षयति इति विनायकः। 'णीञ् प्रापणे'। मुनीनामिन्द्रः मुनीन्द्रः। श्रिया [12]योगविभूत्या घनः निरन्तरः श्रीघनः। शास्तीति [13]शास्ता। 'शासु अनुशिष्टौ'। मनुते इति [14]मुनिः। 'मनु अवबोधने'। एतानि बुद्धनामानि॥ [15]शकदेशेषु जातो मुनिः शाक्यमुनिः॥ १४॥

---

[1] वीर्यं B₁, C. [2] निरास° K₂, K₃; पूर्णनिरास° B₁, C, D₂, K₁; 4 pp. gap ends here in U. [3] आश्रयप्रत्यक्षं ऋद्धिश्चेति W₁. [4] प्रशस्तानि तानि अभिजानातीति षडभिज्ञः C. [5] B₂ adds बुद्धशास्त्रप्रशस्तानि. [6] W₁ adds तपःक्लेशसहो. [7] °ज्ञान° A, B₁, C, T. [8] °शान्त° B₁, D₂, K₂, W₁. [9] °प्रमाणादि° B₁, C, K₅, W₂. [10] ज्ञान° B₂, C, K₁, K₅, W₁. [11] अद्वयमधीतं वदतीति W₂; नकारान्तः D₁. [12] B₁, C, W₂ omit योग. [13] D₁ adds शिक्षयति; ऋकारान्तः D₁. [14] D₁ adds सर्वधर्माणां मननात्. [15] शकेषु देशविशेषेषु B₂, C.

(पा.) सर्वज्ञः—जिनः। षडभिज्ञो—मुनिः। बुद्धनामानि॥

स शाक्यसिंहः सर्वार्थसिद्धः शौद्धोदनिश्च सः।
गौतमश्चार्कबन्धुश्च मायादेवीसुतश्च सः॥ १५॥

(वि.) स इति—शकेषु[1] श्रेष्ठः शाक्यसिंहः। सर्वार्थेषु सिद्धः सर्वार्थसिद्धः। शुद्धोदनस्य[2] अपत्यं पुमान् शौद्धोदनिः। स च गोतमस्यापत्यं पुमान् गौतमः[3]। गौतमगोत्राद्वा। अर्कवंशजत्वात् अर्कबन्धुः। मायादेव्याः सुतः मायादेवीसुतः। एतानि शकदेशबुद्धनामानि[4]॥ १५॥

---

[1] शाक्येषु B₂, D₂; A, K₁, K₃ add सिंहः. [2] शुद्धम् ओदनं यस्य सः शुद्धोदनः C. [3] गोत्रत्वाद्वा गौतमः K₁, K₅, U; परब्रह्मलोकगोत्रत्वाद्वा W₂; गोत्राद्वा B₁, B₂, C. [4] D₁, W₁ add सर्वज्ञो वीतरागोऽर्हन् केवली तीर्थकृज्जिनः.

(पा.) शाक्यमुनिस्तु यः—मायादेवीसुतश्च सः। शाक्यसिंह इत्यभिधानबुद्धनामानि। अनुक्तम्—'सर्वज्ञो वीतरागोऽर्हन् जिनः स्यात्कारभूषणः'॥ १५॥

ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामहः।
हिरण्यगर्भो लोकेशः स्वयंभूश्चतुराननः॥ १६॥

(वि.) ब्रह्मेति—बृहति[1] ब्रह्मा। [2]‘बृह बृहि वृद्धौ’। आत्मना भवतीति आत्मभूः। ‘भू सत्तायाम्’। सुरश्चासौ ज्येष्ठश्च सुरज्येष्ठः[3]। सुराणां ज्येष्ठो सुरज्येष्ठः। परमे [4]ब्रह्मलोकाख्ये स्थाने तिष्ठतीति परमेष्ठी। ‘ष्ठा गतिनिवृत्तौ’। [5]अग्निष्वात्तादिपितृणां पिता पितामहः। हिरण्यं [6]गर्भे यस्य सः हिरण्यगर्भः। लोकानाम् ईशः लोकेशः। स्वयं भवतीति स्वयंभूः। चत्वारि आननानि यस्य सः चतुराननः ॥ १६ ॥

[1] बृंहति B_1, W_2; बृंहयति B_2, C. [2] ‘बृंहि वृद्धौ’ B_1, W_2. [3] ज्येष्ठश्चासौ सुरश्च सुरज्येष्ठः; ज्येष्ठ इति पदस्य पूर्वनिपातत्वम् B_2, C, K_1. [4] ब्रह्मलोके D_2, K_1, K_2, K_5. [5] A, K_1, W_1 omit अ . . . दि. [6] गर्भो B_1.

धाताब्जयोनिर्द्रुहिणो विरिञ्चिः कमलासनः ।
स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृड् विधिः ॥ १७ ॥

(वि.) धातेति—धत्ते[1] धाता[2]। ‘डुधाञ् धारणपोषणयोः’। अब्जं[3] योनिः[4] यस्य सः अब्जयोनिः। द्रुह्यति असुरेभ्यो[5] द्रुहिणः। ‘द्रुह जिघांसायाम्’। विरिणक्तीति विरिञ्चि[6]ः। ‘रिचिर् विरेचने’। ‘विचिर् पृथग्भावे’[7]। विभिः हंसै रिच्यते उह्यते विरिञ्चः[8] इति वा पाठः। कमलम् आसनं यस्य सः कमलासनः। सृजतीति स्रष्टा। प्रजानां पतिः प्रजापतिः। विदधाति करोतीति[9] वेधाः[10]। विधत्त इति विधाता। विश्वं सृजतीति विश्वसृट्। ‘सृज [11]विसर्गे’। विधति[12] विधत्त इति विधिः। ‘विध विधाने’। एतानि ब्रह्मणो नामधेयानि[13] ॥ १७ ॥

[1] धत्त इति B_2, C. [2] B_1, D_2, K_2, K_3, W_1 add विधत्त इति विधाता. [3] C adds कमलं. [4] C adds स्थानं. [5] B_2, C add अयमिति. [6] विशेषेण रिङ्कं निर्गमयति यस्य यशः विरिञ्चिः B_2, C. [7] D_2 adds इति वा धातुः. [8] K_3 omits. [9] K_1, K_3, Y omit. [10] B_2, C, U add विधिश्च. [11] विसर्जने A, B_1, C, K_1, W_1. [12] विदधाति A, C, D_2, W_1. [13] W_1 adds शतानन्दः शतधृतिः.

(पा.) ब्रह्मात्मभूः—विधिः। ब्रह्मणो नामानि। अनुक्तम्—

‘शतानन्दः शतधृतिः प्रजासृट् सर्वतोमुखः।
विश्वात्मा विश्वरेताश्च विखना[1] नाभिजोऽब्जजः।
अब्जगर्भश्च वागीशः प्राणदो हंसवाहनः॥’

एतानि[2] च। सुभूतिना विश्वसृग् विधिरिति प्रत्यपादि। ‘क्विन्प्रत्ययस्य’ (८. २. ६२) इति कुत्वमिति। ये तु क्विन्नन्तत्वं नेच्छन्ति तन्मते ‘व्रश्चादिना’ (८. २. ३६)

षत्वमिति रभसकोशकारेण तदपाठि 'विरिञ्चो विश्वसृट् स्रष्टा विरिञ्चिः कमलासनः' इति ॥ १६-१७ ॥

---

[1] द्रुघणः A_1, B_4.

[2] A_1 adds १३.

विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः ।
दामोदरो हृषीकेशः केशवो माधवः स्वभूः ॥ १८ ॥

(वि.) विष्णुरिति—वेवेष्टीति विष्णुः । 'विष्लृ व्याप्तौ'। नरस्य धर्माख्यस्य ऋषेरपत्यं नारायणः[1] । नरस्येदं नारम् अयनम् वपुः अवतारेषु यस्येति वा नारायणः । नारं नरसमूहम् अयति [2]स्वकर्मणेति वा । 'अय पय[3] गतौ'। नाराः[4] आपः अयनं स्थानं यस्येति वा । राः शब्दाः आयान्ति निर्गच्छन्ति यस्मात् सः [5]रायणः । रायणादन्यः अरायणः, न अरायणः नारायणः । [6]अशब्दगम्य इत्यर्थः । करोतीति कृष्णः । 'डुकृञ् करणे'। दैत्यान् कर्षतीति वा । 'कृष विलेखने'। कृष्णवर्णत्वाद्वा[7] । विकुण्ठाया अपत्यं पुमान् वैकुण्ठः । विष्टराकारे[8] श्रोत्रे यस्य सः विष्टरश्रवाः । विष्टराकारो रोमावर्तो श्रवसि यस्येति वा । विष्टरं [9]व्यापनशीलं श्रवः कीर्तिर्यस्येति वा । दाम [10]उदरे यस्य स दामोदरः । हृषीकाणाम् इन्द्रियाणाम् ईशः हृषीकेशः । शोभनाः केशा यस्य सः केशवः[11] । कश्च अश्च ईशश्च केशाः ब्रह्मविष्णुरुद्राः,[12] ते अस्मिन् वसन्तीति[13] वा केशवः । मधोरपत्यं पुमान् माधवः[14] । मायाः लक्ष्म्याः धवो वा । मा धूयते शत्रुभिरिति वा । 'धूञ् कम्पने'। मधोरयं हन्ता वा । वध्यघातुकत्वं[15] संबन्धः । स्वतो[16] भवतीति स्वभूः । स्वेन हिरण्येन भवतीति वा स्वभूः ॥ १८ ॥

---

[1] नार इति कश्चित् ऋषिः, स एव अयनं स्थानं यस्य सः B_2, C; नरस्य ज्ञानं वपुः अवतारेषु अयति वा K_5.

[2] B_2 omits.

[3] 'अय गतौ' D_2, I.

[4] नारं नरकृत्यं कर्म अयतीति वा । 'अय पय गतौ' B_2.

[5] तस्य वेदजनकत्वादिति भावः C.

[6] शब्दगम्य D_1, W_1, Y.

[7] °वर्णात् Y.

[8] B_2, C, D_1, K_1, K_3, W_1 add श्रवसी.

[9] व्यापक° Y.

[10] अत्र उदरस्य परनिपातत्वं B_2, C.

[11] वान्ति गन्धयन्ति इति वाः गन्धवन्तः केशाः यस्येति केशवः । 'वा गतिगन्धनयोः' । परनिपातः B_2, C.

[12] °ईश्वराः K_3, K_5, W_2; °ईशाः D_2, I, K_1, W_1.

[13] 'वस निवासे' U.

[14] मा धूयतेऽयम् अंहोभिरिति वा B_1, C.

[15] घातक W_1; W_2 omits.

[16] स्वयं B_1, C, W_2, Y; स्वस्मिन् W_1; D_1, I add 'भू सत्तायाम्'.

दैत्यारिः पुण्डरीकाक्षो गोविन्दो गरुडध्वजः ।
पीताम्बरोऽच्युतः शार्ङ्गी विष्वक्सेनो जनार्दनः ॥ १९ ॥

(वि.) दैत्यारिरिति—दैत्यानाम् अरिः दैत्यारिः। पुण्डरीके[1] इव अक्षिणी यस्य सः पुण्डरीकाक्षः। पुण्डरीकं हृत्कमलम् अक्षतीति[2] वा। 'अक्षू व्याप्तौ'। गां [3]भुवं विन्दतीति गोविन्दः। गाः धेनूः विन्दतीति वा। 'विदिर् लाभे'। गरुडः [4]ध्वजे यस्य सः गरुडध्वजः। पीतम् अम्बरं[5] यस्य सः पीताम्बरः। न विद्यते च्युतिः यस्य सः अच्युतः[6]। 'च्युतिर् क्षरणे'। शृङ्गविकारः शार्ङ्गं धनुः[7] अस्यास्तीति शार्ङ्गी। विष्वक्[8] विषूची सर्वगता सेना यस्य सः विष्वक्सेनः। जनान् अर्दयति सुखयतीति[9] जनार्दनः। 'अर्द गतौ याचने पीडने[10] च'॥ १९॥

[1] °कवत् B_2, D_1, K_2, W_1, Y; °कमिव A, C, T.
[2] D_2, K_3 add व्याप्नोति; आक्षिपति C.
[3] W_1 omits.
[4] ध्वजो K_1.
[5] पीते अम्बरे D_1, I, K_1, K_2.
[6] न च्युतः अच्युतः D_1, K_3, K_5, W_1, Y.
[7] K_3 adds चापो.
[8] W_1, Y omit.
[9] W_1 omits.
[10] K_3, W_1, Y omit.

उपेन्द्र इन्द्रावरजश्चक्रपाणिश्चतुर्भुजः।
पद्मनाभो मधुरिपुर्वासुदेवस्त्रिविक्रमः॥ २०॥

(वि.) उपेन्द्र इति—इन्द्रम् अनु जातः उपगतः[1] उपेन्द्रः। इन्द्रस्य अवरजः इन्द्रावरजः। चक्रं पाणौ यस्य सः चक्रपाणिः। चत्वारो भुजा यस्य सः चतुर्भुजः। पद्मं नाभौ[2] यस्य सः पद्मनाभः। मधोः रिपुः[3] मधुरिपुः। वसुदेवस्य अपत्यं पुमान् वासुदेवः। त्रयो लोका विक्रमेषु पदेषु[4] यस्य सः त्रिविक्रमः। त्रीन् लोकान् विक्रमत[5] इति वा। 'क्रमु पादविक्षेपे'। त्रिषु[6] लोकेषु विना[7] गरुडेन क्रमते त्रिविक्रम इति वा[8]॥ २०॥

[1] K_2, W_1, Y omit; उपजायते C; उपजातः B_1, B_2, C, K_5; इन्द्रशब्दस्य परनिपातनं C.
[2] नाभ्यां K_1.
[3] K_1 adds दैत्यस्य असुरस्य C.
[4] पादेषु D_2; K_3 omits.
[5] पदेन क्रमते D_1.
[6] त्रिलोकेषु B_1.
[7] विना तृतीयान्तं [पक्षिणा] B_2, C.
[8] C, D_2, K_1, K_3 add 'क्रमु पदविक्षिपे'.

देवकीनन्दनः शौरिः श्रीपतिः पुरुषोत्तमः।
वनमाली बलिध्वंसी कंसारातिरधोक्षजः॥ २१॥

(वि.) देवकीति—देवक्या नन्दनः देवकीनन्दनः। शूरस्य वसुदेवस्य अपत्यं शौरिः। श्रियः पतिः श्रीपतिः। [1]पुरुषाणां पुरुषेषु वा उत्तमः पुरुषोत्तमः। वनमाला अस्यास्तीति वनमाली। बलिं [2]ध्वंसयतीति बलिध्वंसी। 'ध्वंसु [3]अवस्रंसने'।

कंसस्याराति: कंसाराति:। अक्षम्[4] इन्द्रियम् अधः कृतं[5] यैस्ते अधोक्षाः, [6]दशरथ-वसुदेवादयः। तेभ्यो जातः अधोक्षजः। अक्षजम् इन्द्रियजन्यज्ञानम्[7] अधः कृतं [8]येनेति वा ॥ २१ ॥

[1] W$_1$ omits; पुरुषाणां मध्ये K$_3$; पुरुषश्चासौ उत्तमश्च B$_2$, K$_1$, K$_3$, K$_5$, W$_1$.
[2] ध्वंसयितुं शीलम् अस्यास्तीति B$_2$, C.
[3] गतौ D$_1$.
[4] अक्षाणि इन्द्रियाणि B$_2$, C.
[5] अधः कृतानि B$_2$, C.
[6] B$_2$, W$_1$, Y omit दशरथ.
[7] ऐन्द्रियज्ञानं C, D$_2$, K$_2$, W$_1$; W$_2$ omits जन्य.
[8] यस्य K$_1$, K$_3$; अक्षजशब्दस्य परनिपातः C.

विश्वंभरः कैटभजिद् विधुः श्रीवत्सलाञ्छनः।
([1]गदाग्रजो मुञ्जकेशो दाशार्हो दशरूपभृत्[2]) ॥ २२ ॥

(वि.) विश्वंभर इति—विश्वं बिभर्तीति विश्वंभरः। 'भृञ् भरणे पोषणे[3] च'। कैटभं जयतीति कैटभजित्। 'जि [4]अभिभवे'। विदधातीति विधुः। '[5]डुधाञ् धारणपोषणयोः'। श्रीवत्साख्यो [6]रोमावर्तो लाञ्छनं यस्य सः श्रीवत्सलाञ्छनः। एतानि विष्णुनामानि (गदाग्रजो मुञ्जकेशो दाशार्हो दशरूपभृत् एतानि विष्णु-नामानि) ॥ २२ ॥

[1] B$_2$, U omit गदा . . . भृत्; W$_2$ adds पुराणपुरुषो यज्ञपुरुषो नरकान्तकः.
[2] °धृक् W$_2$.
[3] धारणपोषणयोः D$_1$; W$_1$ omits.
[4] 'जि जये' B$_2$, C, D$_1$, U, W$_2$.
[5] 'विध विधाने' C; विधति K$_1$, K$_3$.
[6] रोमावलिः K$_3$.

(पा.) विष्णुः—श्रीवत्सलाञ्छनः ॥ विष्णुनामानि। अनुक्तम्—

'अरिष्टनेमिर्दाशार्हः[1] कोलकण्ठो गदाधरः।
मुञ्जकेशो गिरिधरः श्रीधरो धरणीधरः ॥
मुकुन्दो यज्ञपुरुषो ब्रह्मनाभो गदाग्रजः।
जगन्नाथो मुररिपुस्त्रिककुन्नरकान्तकः।
श्रीवत्सोऽनन्तशयनो बभ्रुश्च[2] कमलोदरः ॥'

एतानि च[3]। ह्रस्वादिर्नरायणशब्दोऽप्यस्ति। [4]लुप्तोत्तरपदवासुःशब्दोऽप्यस्ति। 'वासुर्नरायणपुनर्वसुविश्वरूपाः' इति त्रिकाण्डशेषः (पृ. २, श्लो. ३०) ॥ १८-२२ ॥

[1] दासार्हः A$_1$.
[2] हठिरः A$_1$, B$_4$.
[3] A$_1$ adds २०.
[4] B$_3$, B$_4$ omit.

वसुदेवोऽस्य जनकः स एवानकदुन्दुभिः।
बलभद्रः प्रलम्बघ्नो बलदेवोऽच्युताग्रजः ॥ २३ ॥

(वि.) वसुदेव इति—वसुभिः दीव्यतीति वसुदेवः । [1]वसुषु अष्टसु दीव्यतीति वा। ‘दिवु क्रीडादौ’। अस्य गृहे विष्णोरुत्पत्तिसमये[2] आनकाश्च दुन्दुभयश्च वादिता[3] इत्यानकदुन्दुभिः । एतानि विष्णु[4]पितृनामानि ॥ बलेन भद्रः बलभद्रः । प्रलम्बनामानं [5]रक्षो हतवान्[6] इति प्रलम्बघ्नः। बलेन दीव्यतीति बलदेवः[7]। अच्युतस्याग्रजः अच्युताग्रजः ॥ २३ ॥

[1] अष्टवसुषु K_3, W_2. [2] °काले K_3; W_1 omits. [3] ताडिता देवैः C, D_1, W_2; आनकदुन्दुभयो नेदुरिति K_3. [4] °जनक° A, B_1. [5] राक्षसं D_1, I; °नामकं W_1. [6] हन्तीति B_2; C adds ‘हन हिंसागत्योः’. [7] C adds ‘दिवु क्रीडेत्यादि’.

(पा.) वसुदेवो—आनकदुन्दुभिः । विष्णुपितृनामनी । ‘वसुदेवोऽस्य जनको दुन्दुरानकदुन्दुभिः’ इति वैजयन्तीपाठाद् (पृ. ५, श्लो. २६) दुन्दुरप्यस्ति ।

रेवतीरमणो रामः कामपालो हलायुधः ।
नीलाम्बरो रौहिणेयस्तालाङ्को मुसली हली ॥ २४ ॥
संकर्षणः सीरपाणिः कालिन्दीभेदनो बलः ।

(वि.) रेवतीति—रमयतीति रमणः[1]। रेवत्या रमणो रेवतीरमणः । ‘रमु क्रीडायाम्’। कामं पालयतीति कामपालः। ‘पाल रक्षणे’। हलम् आयुधं यस्य सः हलायुधः । [2]नीलम् अम्बरं यस्य सः नीलाम्बरः । रोहिण्या अपत्यं पुमान् रौहिणेयः । तालोऽङ्को यस्य सः तालाङ्कः । मुसलम् अस्यास्तीति मुसली । [3]हलम् अस्यास्तीति हली । संकर्षतीति [4]संकर्षणः। ‘कृष विलेखने’। सीरः[5] पाणौ यस्य सः सीरपाणिः । कालिन्दीं भिनत्तीति कालिन्दीभेदनः । ‘भिदिर् [6]विदारणे’। बलमस्यास्तीति [7]बलः । एतानि बलभद्रनामानि ॥ २४ ॥

[1] B_1, D_1, I, K_1, K_2, W_1, Y add रमयतीति रामः(?) [2] नीले अम्बरे B_1, C, D_1, I, K_1, K_3, W_2. [3] हलः D_1. [4] B_1, K_2, W_2 add संहरतीति. [5] K_5 adds हलं. [6] K_2 adds व्यधिकरणे. [7] D_2, K_2 add बली वा; बलः, धर्मधर्मिणोर्लिङ्गभेदस्तु मतुप्सामर्थ्यात् B_2, C.

(पा.) बलभद्रः—बलः । बलभद्रनामानि । ‘स्यादेककुण्डलः शेषः सात्वतश्च सितासितः’। एतानि[1] च । ‘सौनन्दमस्य मुसलं तस्य संवर्तकं हलम्’ इति वैजयन्ती (पृ. ५, श्लो. २४-२) । तद्योगात् संवर्तकधरः सौनन्दपाणिश्च भवति ॥ २३–४ ॥

[1] A_1, B_4 add पञ्च.

मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः ॥ २५ ॥
कंदर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः ।
शम्बरारिर्मनसिजः कुसुमेषुरनन्यजः ॥ २६ ॥
पुष्पधन्वा रतिपतिर्मकरध्वज आत्मभूः ।

(वि.) मदनेति—मदयतीति मदनः । ‘मदी हर्षग्लेपनयोः’[1] । मनो[2] मथ्नातीति मन्मथः । ‘मन्थ[3] विलोडने’ । वियुक्ता[4] अनेन म्रियन्ते मारः । ‘मृङ् प्राणत्यागे’[5] । प्रकृष्टं द्युम्नं बलम् अस्यास्तीति प्रद्युम्नः । मीनः [6]केतने यस्य सः मीनकेतनः । मीनशब्दः [7]जलचरोपलक्षणम् । कं कुत्सितेऽव्ययम् । कं कुत्सितः दर्पः यस्य सः कंदर्पः । दर्पं बलं करोतीति दर्पकः[8] । न [9]विद्यते [10]अङ्गं यस्य सः अनङ्गः । कामयते अनेन कामः । ‘कमु [11]कान्तौ’ । पञ्च शरा यस्य सः पञ्चशरः । स्मरन्त्यनेनेति स्मरः[12] । ‘स्मृ आध्याने’ । [13]शम्बरासुरस्य अरिः[14] शम्बरारिः । मनसि [15]जायते इति मनसिजः । ‘जनी प्रादुर्भावे’ । कुसुमानि [16]इषवो यस्य सः कुसुमेषुः । मनसोऽन्यस्मात्[17] न जायते इत्यनन्यजः । पुष्पं धनुर्यस्य सः पुष्पधन्वा । रतेः पतिः रतिपतिः । मकरः [18]ध्वजे यस्य सः मकरध्वजः । [19]आत्मनो मनसो भवतीत्यात्मभूः । ‘भू सत्तायाम्’ । एतानि [20]मन्मथनामानि ॥ २५–६ ॥

[1] ग्लपनयोः A, B_2, K_2, Y. [2] मत् मानसं D_1, I, K_1, U, W_1. [3] मथि C, D_1, D_2; मथे A. [4] B_2, C add पुरुषा वा स्त्रियो वा. [5] °परित्यागे W_1. [6] C, K_5, W_2 add ध्वजे; केतनं ध्वजो° D_1, I, W_1. [7] जलचरनक्रोपलक्षणः B_2, C; मकरकेतन इत्यर्थः C, D_1, K_5, U, W_1. [8] कर्त्रर्थे कप्रत्ययः C; दर्पयतीति K_3, W_1; ‘दृप हर्षमोहनयोः’ W_1. [9] नास्ति B_1, K_3. [10] B_2, C add शरीरं. [11] C adds कान्तिरिच्छा. [12] स्मर्यते इति स्मरः B_1, B_2; ‘स्मृ स्मरणे’ B_2, C, K_5, W_2, Y. [13] शम्बरस्य K_1, K_3. [14] U adds अरातिः. [15] जनिः A, B_1, K_1, W_1; जातः U, W_2. [16] K_3 adds एव. [17] अन्यजो न भवतीति K_3. [18] ध्वजो A, K_2, K_5, T. [19] आत्मना मनसा B_1, C, D_1, W_2, Y. [20] काम° B_2, D_2, K_3, K_5, W_1.

(पा.) मदनो—आत्मभूः । कामनामानि ।

‘कं वदन्ति तपोभङ्गकारणं यतिनां जनाः ।
न स्वीकुर्वन्ति किं सन्तः सर्वधर्मपरायणाः[1] ॥’

इति विदग्धकण्ठाभरणप्रश्नोत्तराभ्यां ब्रह्मसूशब्दः कामपर्यायः ।

‘ इः कायजो जराभारुः कन्तुः सुरभिसायकः ।
संकल्पजन्मा श्रृङ्गारयोनिर्गूढाशयेशयः[2] ॥
पुष्पायुधः पुष्पकेतुर्भावजो विषमायुधः ।
पञ्चायुधो मधुसखः श्रीसूनुर्मधुसारथिः ॥
वीरधन्वा स्वादुधन्वा स्मृतिभूरिक्षुसायकः ॥’

एतानि[3] च ॥ २५–६ ॥

[1] विशारदाः A_1, B_4. [2] गूर॰ A_1. [3] A_1 adds २१.

ब्रह्मसूर्ऋश्यकेतुः स्यादनिरुद्ध उषापतिः ॥ २७ ॥

(वि.) ब्रह्मेति—ब्रह्म ज्ञानं [1]सूते ब्रह्मसूः । ‘षूञ् प्राणिप्रसवे’ । ऋश्यो मृगः केतौ यस्य सः ऋश्यकेतुः । न निरुध्यत इति अनिरुद्धः । ‘रुधिर् आवरणे’। उषायाः पतिः उषापतिः । एतानि [2]प्रद्युम्नपुत्रनामानि । [3](अरविन्दमिति अशोकमिति नवमल्लिकेति चूतमिति नीलोत्पलमिति ते पञ्चापि मन्मथस्य सायकनामानि ।

अरविन्दमशोकं च चूतं च नवमल्लिका ।
नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायकाः ॥
[4]हृच्छयः कामजश्चैत्रसखः श्रृङ्गारयोनिजः ।)

इति ॥ २७ ॥

[1] सूयते U. [2] अनिरुद्ध॰ B_2, C, W_1. [3] K_2 adds. [4] हृच्छयः चैत्रसखः श्रृङ्गारयोनिः U, W_1; K_2 adds श्रियः पुत्रः श्रीपुत्रः, शूर्पकस्य अरातिः.

(पा.) ब्रह्मसूर्विश्वकेतुः—उषापतिः । कामपुत्रनामानि । ‘क्लेदन्ती स्मरवल्लभा’ ‘ब्रह्मसूर्विश्वकेतुः स्यात्’ इति रभसकोशपाठाद् ब्रह्मसूशब्दः कामपुत्रपर्यायः ॥ २७ ॥

लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया ।
([1]इन्दिरा लोकमाता मा क्षीरोदतनया रमा) ॥ २८ ॥

(वि.) लक्ष्मीरिति—लक्ष्यत इति लक्ष्मीः[2] । ‘लक्ष दर्शनाङ्कनयोः’ । पद्मम् आलयं यस्याः सा पद्मालया । पद्यत इति पद्मा । ‘पद्लृ सेवायाम्’[3] । [4]पद्ममस्या अस्तीति वा । काम्यत[5] इति कमला । ‘कमु कान्तौ’ । श्रीयत इति श्रीः,[6] श्रयत इति वा । ‘श्रिञ् सेवायाम्’ । हरेः प्रिया हरिप्रिया । इन्दिं[7] रातीति इन्दिरा । ‘इदि परमैश्वर्ये’ । ‘रा दाने’ । लोकानां माता लोकमाता । मा च । क्षीराब्धेस्तनया क्षीराब्धितनया । रमयतीति रमा । ‘रमु क्रीडायाम्’ ।

([8]भार्गवी लोकजननी क्षीरसागरकन्यका)।

भार्गवीति—भृगोर्गोत्रापत्यं स्त्री भार्गवी। लोकानां जननी लोकजननी। क्षीरसागरस्य कन्यका क्षीरसागरकन्यका। एतानि लक्ष्मीनामानि॥ २८॥

[1] Found in D_2, K_1, K_2, K_3, K_5, W_2, Y. [2] लक्षं (लक्ष्यं B_2) कलङ्कं मुष्णातीति लक्ष्मीर्वा। 'मुष स्तेये' C; W_2 adds 'लक्षेर्मुट् च'. [3] B_2, C add गत्यर्थे वा. [4] B_2, C add पद्मं हस्तं धारयतीति वा. [5] कम्यते W_1, Y. [6] D_2, K_2 add श्रयन्त्येतामिति वा. [7] W_1 omits 6 lines. [8] K_1, K_3, K_5, U, Y omit.

(पा.) लक्ष्मीः—हरिप्रिया। लक्ष्मीनामानि। पद्मा कमलेत्यादिना पर्यायस्यापि ग्रहणम्। 'स्त्रीलिङ्गाश्चाम्बुजाह्वया' इति वैजयन्ती (पृ. ६, श्लो. ३६)। 'ईर्लोकमाताब्धिसुता मा रमा गोमिनीन्दिरा'। एतानि[1] च॥ २८॥

[1] A_1 adds सत.

शङ्खो लक्ष्मीपतेः पाञ्चजन्यश्चक्रं सुदर्शनम्।
कौमोदकी गदा खड्गो नन्दकः कौस्तुभो मणिः॥ २९॥

(वि.) शङ्ख इति—पञ्चजनाख्ये [1]असुरे भवः पाञ्चजन्यः इति [2]लक्ष्मीपतिशङ्खनाम। सुष्ठु दृश्यते सुदर्शनम्। पुंलिङ्गपक्षे सुष्ठु शत्रून् पश्यतीति सुदर्शनः। 'दृशिर्[3] प्रेक्षणे'। चकत इति चक्रम्। इति विष्णुचक्रनाम। कुं [4]पृथिवीं मोदयतीति कुमोदकः विष्णुः[5] तस्येयं कौमोदकी। 'मुदि हर्षे'। कौपोदकीति पाठे[6] कूपोदकात् जायत इति कौपोदकी। इति विष्णुगदानाम। नन्दयतीति नन्दकः। 'टुनदि समृद्धौ'। इति विष्णुखड्गनाम[7]। कौ भुवि स्तोभते व्याप्नोतीति कुस्तुभः[8]। तस्यायं कौस्तुभः। 'ष्टुभु [9]स्तम्भे'। इति विष्णुमणिनाम॥ २९॥

[1] रक्षसि B_1, C, D_1, K_1, U, W_1. [2] विष्णु° B_2, D_2, K_1, W_1. [3] दृशेः पश्यादेशः A, D_2, K_2. [4] भूमिं B_2, C, K_2; पृथ्वीं K_1, K_3. [5] स च विष्णुरित्यर्थः C. [6] तत् पक्षे इयं व्याख्या B_2, C. [7] विष्णुचन्द्रहासनाम K_2. [8] कुस्तुभः समुद्रः तत्र भवः B_2, C, D_1, K_1, K_2, U, W_1. [9] स्तोभे K_5, W_1.

(पा.) शङ्खो—मणिः। लक्ष्मीपतेः शङ्खः पाञ्चजन्यः स्यात्। तस्य चक्रं सुदर्शनम्। विधेयानुवाद्यपदानि सर्वाण्यत्र समानलिङ्गानि[1]। अतः सुदर्शनशब्दस्य नपुंसकत्वं सिद्धम्। 'बन्धुरेष जगतां सुदर्शनः' इति माघप्रयोगात् (शिशु. १४. १६) पुंस्त्वं[2] च

संभावितम्। अत एव 'परं विरोधे शेषं तु ज्ञेयं शिष्टप्रयोगतः' (३. ५. ४६) इति शास्त्रान्ते वक्ष्यति। तद्गदा कौमोदकी स्यात्। तत्खड्गो नन्दकः स्यात्। तन्मणिः कौस्तुभ इति शब्द्यते। 'चापं तु शार्ङ्गमुरसि वनमाला च मालिका' इति च। तद्योगात् शार्ङ्गी वनमालीति शब्दौ व्युत्पत्तिसिद्धौ ॥ २९ ॥

[1] A_1 adds स्युः. [2] पुंलिङ्गत्वं B_3, B_1.

([1]चापं शार्ङ्गं मुरारेस्तु श्रीवत्सो लाञ्छनं स्मृतम् ॥)

(वि.) चापमिति—शृङ्गस्य विकारः शार्ङ्गं, मुरारेः चापस्य नाम। तस्य लाञ्छनं श्रीवत्स इति मतम्। श्रीः वक्षसि यस्येति वा।

[1] Found in D_2, K_2.

गरुत्मान् गरुडस्तार्क्ष्यो वैनतेयः खगेश्वरः ।
नागान्तको विष्णुरथः सुपर्णः पन्नगाशनः ॥ ३० ॥

(वि.) गरुत्मानिति—गरुतोऽस्य सन्तीति गरुत्मान्। [1]सर्पान् गिरतीति गरुडः। 'गॄ निगरणे'। गरुद्भिः डीयते इति वा गरुडः। 'डीङ् विहायसा[2] गतौ'। [3]तृक्षस्यापत्यं पुमान् तार्क्ष्यः। विनताया अपत्यं पुमान् वैनतेयः[4]। खगानामीश्वरः खगेश्वरः। [5]नागानाम् अन्तको नागान्तकः। विष्णोः रथः[6] विष्णुरथः। शोभनानि पर्णानि पक्षाः यस्य सः सुपर्णः। पन्नगा[7] अशनं यस्य सः पन्नगाशनः। एतानि गरुडनामानि ॥ ३० ॥

[1] सर्वान् D_1, D_2, T. [2] °यसां K_1, O, U, Y. [3] तृक्ष्यापत्यं W_1. [4] B_2, C, K_5, W_2 add 'स्त्रीभ्यो ढक्'. [5] नागान् अन्तयति नाशयतीति B_2, C. [6] B_2, C add वाहनं. [7] पन्नगान् अश्नातीति। 'अश भक्षणे' B_2, C.

(पा.) गरुत्मान्—पन्नगाशनः। गरुडनामानि। गरुत्मसौपर्णशब्दावपि विद्येते। 'विदधद्विमुखान् भटानिवाहीन् स गरुत्मेव महेन्द्रमाप कोपात्' इति चन्द्रकाव्यम्। [1]'प्रौर्णवीदथ सौपर्णः कीर्णपर्णः फणाभृतः' इति राघवपाण्डवीयम् (द्विसं. १८. ५२) ॥३०॥

[1] 'जीर्णवीवधसौपर्णकीर्णपर्णफणाभृतः' MSS.

शंभुरीशः पशुपतिः शिवः शूली महेश्वरः ।
ईश्वरः शर्व ईशानः शंकरश्चन्द्रशेखरः ॥ ३१ ॥

भूतेशः खण्डपरशुर्गिरीशो गिरिशो मृडः ।
मृत्युंजयः कृत्तिवासाः पिनाकी प्रमथाधिपः ॥ ३२ ॥
उग्रः कपर्दी श्रीकण्ठः शितिकण्ठः कपालभृत् ।
वामदेवो महादेवो विरूपाक्षस्त्रिलोचनः ॥ ३३ ॥
कृशानुरेताः सर्वज्ञो धूर्जटिर्नीललोहितः ।
हरः स्मरहरो भर्गस्त्र्यम्बकस्त्रिपुरान्तकः ॥ ३४ ॥
गङ्गाधरोऽन्धकरिपुः क्रतुध्वंसी वृषध्वजः ।
व्योमकेशो भवो भीमः स्थाणू रुद्र उमापतिः ॥ ३५ ॥
(अहिर्बुध्न्योऽष्टमूर्तिश्च गजारिश्च महानटः ॥)

(वि.) शंभुरिति—शं सुखमस्माद् भवतीति शंभुः[1]। ईष्टे इति ईशः। 'ईश ऐश्वर्ये'। पशूनां पतिः पशुपतिः। शेरते [2]सज्जनमनांसि अस्मिन्निति शिवः। अन्तकाले जगती[3] अस्मिन् शेते इति वा शिवः। 'शीङ् स्वप्ने'। शिवंकरत्वाद्वा शिवः। शूलमस्यास्तीति शूली। महांश्चासौ ईश्वरश्च महेश्वरः। महतां देवानाम् ईश्वरो वा[4]। शं[5] करोतीति शंकरः। 'डुकृञ् करणे'। चन्द्रः शेखरः[6] यस्य सः चन्द्रशेखरः। भूतानामीशः भूतेशः। [7]भूताः प्राप्ताः शिवभक्ताः तेषां ईं मायां श्यतीति वा। 'शो तनूकरणे'। परशुना खण्डयतीति खण्डपरशुः। 'खडि खड भेदने'। खण्डः परशुः[8] अनेनेति वा। गिरीणामीशो गिरीशः[9]। गिरौ शेते इति गिरिशः[10]। मृडतीति [11]मृडः। 'मृड सुखने'। मृत्युं जयतीति मृत्युंजयः। 'जि जये'। कृत्तिश्चर्म वासो यस्य सः कृत्तिवासाः। पिनाकोऽस्यास्तीति पिनाकी। प्रमथानाम् अधिपः प्रमथाधिपः। उत् गृह्णातीति उग्रः। 'ग्रह उपादाने'। उग्रत्वाद्वा उग्रः। कपर्दोऽस्यास्तीति कपर्दी। श्रीः शोभा[12] कण्ठे यस्य सः श्रीकण्ठः। शितिः [13]मेचकः कण्ठे यस्य सः शितिकण्ठः। कपालं बिभर्तीति कपालभृत्। 'डुभृञ् धारणपोषणयोः'। वामः श्रेष्ठः, स चासौ देवश्च वामदेवः। वामया[14] दीव्यतीति वा वामे [15]सव्ये देवी यस्येति वा। वामया युक्तो वा। वामत्वात् वक्रत्वाद्वा[16]। महांश्चासौ देवश्च महादेवः। सर्वत्र 'दिवु क्रीडे'त्यादि धातुः। विरूपम् अक्षि यस्य सः विरूपाक्षः। त्रीणि लोचनानि यस्य सः त्रिलोचनः। कृशानू[17] रेतो यस्य सः कृशानुरेताः। सर्वं जानातीति सर्वज्ञः। 'ज्ञा अवबोधने'। धूः गङ्गा जटासु यस्य सः धूर्जटिः[18]। कण्ठे नीलः केशेषु लोहितः नीललोहितः। नीलश्चासौ लोहितश्च नीललोहितः[19]।

हरतीति हरः । 'हृञ् हरणे'। स्मरं हरतीति स्मरहरः । भृज्ज्यते[20] अनेनेति भर्गः[21] । 'भ्रस्ज पाके'। सकलं बिभर्तीति वा। त्रीणि अम्बकानि लोचनानि यस्य सः त्र्यम्बकः। द्यौर्भूमिरापः तिस्रोऽम्बा[22] यस्येति वा। त्रयाणां ब्रह्मविष्णुरुद्राणाम् अम्बको वा। 'अम्ब जनने'। त्रिपुराणाम् अन्तकः त्रिपुरान्तकः। गङ्गायाः धरः गङ्गाधरः। अन्धकस्य[23] रिपुः अन्धकरिपुः। क्रतुं[24] ध्वंसयतीति क्रतुध्वंसी। 'ध्वंसु अवस्रंसने'। वृषः ध्वजे यस्य सः वृषध्वजः। व्योमवद् [25]विकीर्णः केशो यस्य सः व्योमकेशः। व्योम आकाशः को वायुः तदादीनामीशो[26] वा। सर्वमस्माद् भवतीति भवः। सर्वमस्मिन् भवतीति वा[27]। बिभेत्यस्माद् भीमः। 'ञिभी भये'। [28]प्रलये तिष्ठतीति स्थाणुः। 'ष्ठा गतिनिवृत्तौ'। रोदयति शत्रूनिति रुद्रः। 'रुदिर् अश्रुविमोचने'। [29]ऋतं सत्यं रातीति[30] वा। 'रा आदाने'। रुतं[31] शब्दं रायतीति वा। 'रै शब्दे'। रुदं रोदनं द्रावयतीति वा। 'द्रु गतौ'। उमायाः पतिः उमापतिः। एतानि [32]ईश्वरनामानि ॥ ३१-५ ॥

[33](भस्माङ्गरागोऽस्थिधरः उग्राक्षो नागकङ्कणः।)

(भस्म अङ्गरागो यस्य भस्माङ्गरागः। अस्थीनि धरतीति अस्थिधरः। उग्राणि अक्षीणि यस्य उग्राक्षः। नाग एव कङ्कणं यस्य नागकङ्कणः। एतानि ईशपर्यायनामानि।)

---

[1] C, D_1, I add 'भू सत्तायाम्'. [2] सुजन° D_2; निजजन° B_2, C. [3] जगत् C, D_1, I, K_3, K_5. [4] ईष्टे ईश्वरः 'ईश ऐश्वर्ये' A, B_1, C, D_1, K_1, W_1; शृणातीति शर्वः, 'शॄ हिंसायाम्' K_1, W_1; B_2, K_1, K_2, K_5, U, W_2, Y add ईष्टे ईशानः. [5] C, D_2, I, K_2, K_5, Y add सुखं. [6] शेखरे A, W_2. [7] भूः प्राप्ताः भूताः K_3, W_2; C adds शिवभक्ताः. [8] परशुर्नामासुरः B_1, K_3, W_2. [9] गिरयोऽस्य सन्तीति वा K_1, K_3, U, W_1, Y. [10] गिरि वाचि शेते वसतीति वा, 'शीङ् स्वप्ने' B_2, C, D_1, K_2; C adds अङ्क् । तस्य उपनिषत्प्रतिपाद्यत्वात् इत्यर्थः. [11] Y adds सुखयतीति. [12] C, I, K_3 add विष°. [13] कालः W_2; कालकण्ठः A; नीलकण्ठः K_1. [14] B_2, C add स्त्रिया. [15] वामभागे B_2. [16] वामायाः पार्वत्याः देवो वा, वामत्वात् वक्रत्वाद्वा वामः, स चासौ देवश्च C. [17] कृशानौ B_2, D_2, K_3, W_1. [18] धूरूपा (B_2 omits भास्वरूपा) जटा यस्य B_2, C, D_1; धुर इव° W_2. [19] K_1, K_3 omit. [20] D_1 adds संसारो; संसारे B_1, C, K_2. [21] W_2 adds भञ्जयति वा. [22] एतासां तिसृणाम् अम्बयति पूरयतीति अम्बको वा। स्वार्थे कप्रत्ययः। 'अम्ब पूरणे' C; अम्बकः पिता वा K_3. [23] अन्धकासुरस्य C, D_1, K_3, U. [24] °दक्षयज्ञं ध्वंसितुं शीलमस्यास्तीति B_2, C. [25] विस्तीर्णः D_2, K_1, K_3, Y; °र्णाः केशाः K_2, W_1. [26] B_2 adds अग्न्यादीनां. [27] D_1, I add 'भू सत्तायाम्'. [28] K_1, W_1 add अपि; K_2 adds काले. [29] U omits 2 lines. [30] C adds गृह्णातीति. [31] ऋतं D_2, W_1; रुणद्धीति रुत् अज्ञानं तत् द्रावयतीति वा B_2, C. [32] ईशानस्य A, T; शम्भु° K_5.

अहिः सर्प एव बुध्न्यम् आभरणं यस्य अहिर्बुध्न्यः। अष्टसु दिक्षु मूर्तिः यस्य सः अष्टमूर्तिः। महान् कालः महाकालः। महान् नटः महानटः। महन्नटनं यस्येति वा। K_2. [33] Found in A, K_2, W_2.

(पा.) शंभुरीशः—त्र्यम्बकः। छान्दसानपि शब्दान् [1]संज्ञाशब्दत्वाद्भाषायामपि प्रयुञ्जत इति[2] त्रियम्बकशब्दः प्रयोगार्ह एव। 'त्रियम्बकं संयमिनं ददर्श' इति [3]कालिदासः। (कु. सं. ३. ४४) नो चेत् दिवस्पतिप्रभृतिशब्दा अप्यव्यवहर्तव्याः स्युः॥ त्रिपुरान्तकः—उमापतिः। [4]ईश्वरनामानि। अनुक्तम्—

'पञ्चाननोऽर्धमकुटः कण्ठेकालो दृगायुधः।
अष्टमूर्तिरयुग्माक्षो भालनेत्रोऽकुतश्चनः॥
शैलधन्वार्धरमणिर्ज्यापिङ्गः पांसुचन्दनः।
कालंजरो महाकालो रेरिहाणो[5] महानटः॥
हिरण्यबाहुर्हेहीरो [6]गुहाकेशोऽहिभूषणः।
कटीटङ्कः कंकटिकः कटप्रूः परमेश्वरः॥
अहिर्बुध्न्यो[7] जटाटीरो[8] जटाजूटोऽग्निलोचनः॥'

एतानि च॥ ३१–५॥

[1] B_3 omits. [2] तेन B_3, B_1. [3] B_1 adds कुमारसंभवे. [4] शिव° B_3.
[5] लेलिहानः A_1. [6] गुह्यकेशः A_1. [7] अहिर्बुध्नः B_3. [8] जटाचीरः B_1.

कपर्दोऽस्य जटाजूटः पिनाकोऽजकवं धनुः।

(वि.) कपर्द इति—कं शिरः [1]पिपर्ति पूरयतीति कपर्दः। 'पॄ पालनपूरणयोः'। शिवजटाजूटनाम। अकति[2] अपि नाकति न नमति इति पिनाकः। 'अक अग कुटिलायां गतौ'। पिनह्यत इति पिनाकः। 'णह बन्धने'। अजस्य[3] कम् अस्थि तद्विकारः अजकवम्। अजगवमिति वा पाठः। अजगवोऽस्थिविकारः। शिवस्य धनुर्नामनी॥

[1] पर्दयति B_1, C. [2] अकति कुटिलीभवति इत्यकः। अको न भवतीति नाकः। शिवादितरैः ज्यासंधानाय न नम्यते (नमति B_2) इत्यर्थः। पिकारोऽप्यर्थकः। पिकारेण सहित इति वा। शिवादन्यैरपि न नम्यत इति यावत्। B_2, C. [3] अजस्य इदम् अजकम् अजशृङ्गमित्यर्थः। तेन अजकेन अजशृङ्गेण वर्त्यते क्रियते यत् तत् अजकवम्। तन्निर्मितमित्यर्थः। संबन्धार्थे कप्रत्ययः। C; आजगवमिति वा पाठः। अजश्च गौश्च अजगावौ। तयोर्विकारः आजगवम्। B_2.

(पा.) कपर्दोऽस्य—धनुः। [1]शिवजटाजूटः कपर्दनामा। पिनाक इति अजगवं चेति तस्य धनुर्नामनी। अत्र अजगवशब्दस्य रूपान्तराण्यपि कथयन्ति।

'स्थाणोर्धनुश्चाजगवम्' इति नाममाला। 'अजगावमजीगावम्'[2] इति वैजयन्ती (पृ. ७, श्लो. ५०)।

[1] कपर्द इति ईश्वरजटाजूटनाम A₁. [2] आजगावं B₁; अजीगवमिति मुद्रितग्रन्थे (पृ. ७, श्लो. ५०).

प्रमथाः स्युः पारिषदा ब्राह्मीत्याद्यास्तु मातरः ॥ ३६ ॥

(वि.) प्रमथा इति—प्रमथ्नन्ति शत्रूनिति प्रमथाः। 'मन्थ विलोडने'। परिषदि साधवः पारिषदाः। ईश्वरस्य सभ्यनामानि। मान्ति वरिवस्यामिति मातरः। 'मा माने'। 'माङ् माने' इति वा धातुः। मानं वर्तनम्। शिवपरिचर्याकारिणीनां ब्राह्मयादीनां नामानि।

> 'ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा।
> वाराही चैव माहेन्द्री चामुण्डा सप्त मातरः॥'

ब्रह्मणः संवन्धिनी ब्राह्मी। महेश्वरस्य संबन्धिनी माहेश्वरी। कुमारस्य संबन्धिनी कौमारी। विष्णोरियं वैष्णवी। वराहस्य संवन्धिनी वाराही। महेन्द्रस्य संबन्धिनी माहेन्द्री। चामुण्डा इति सप्त [1]मातरः ॥ ३६ ॥

[1] ब्राह्मी माहेश्वरीन्द्राणी[2] वाराही वैष्णवी तथा।
कौमारी चर्ममुण्डा च [3]कालसंहारिणीति च॥ B₁, C, W₁, Y. [2] चैन्द्री D₂, I, K₅, W₁. [3] °संकर्षिणीति च D₂, I, K₂; derivations of ब्राह्मी, etc. omitted in D₂, K₁, W₁, Y.

(पा.) प्रमथाः—मातरः। प्रमथा इतीश्वरदासनाम। अनुक्तम्—'भूतलोकानि भूतानि'। भूतानां नामनी। 'कापिशेयाः पिशाचकाः'। गुरुनाथादितत्सहचरपिशाचनाम॥ अनुक्तम्—

> 'ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा।
> वाराही चैव माहेन्द्री चामुण्डा सप्त मातरः॥'

ब्राह्मीप्रभृतयः सप्त मातरः स्युः[1]। 'ब्रह्माण्यार्या स्मृताः सप्त मातरो देवता बुधैः' इत्यभिधानात् ब्राह्मी ब्रह्माणीति च नाम भवति। 'चण्डमुण्डा तु चामुण्डा चर्चा मार्जारकन्यका' इत्यभिधानात् चामुण्डा चण्डमुण्डा च भवति[2]॥ ३६ ॥

---

[1] B₂ adds 'सप्तमातृकलु'. [2] A₁ adds 'पोलकम्म'.

विभूतिर्भूतिरैश्वर्यमणिमादिकमष्टधा ।

(वि.) विभूतिरिति—विभवतीति [1]विभूतिः भूतिश्च । ईश्वरस्य भावः कर्म वा ऐश्वर्यम् । [2]अणिमा महिमा लघिमा गरिमा प्राप्तिः[3] प्राकाम्यम् ईशिता वशित्वं चेति ऐश्वर्याष्टकमुच्यते । इत्यणिमाद्यष्टैश्वर्यनामानि ।

[1] विशेषेण भवतीति विभूतिः, 'भू सत्तायाम्' C.

[2] अणिमा लघिमा प्राप्तिः गरिमा महिमेशिता ।
प्राकाम्यं वशिता चेति चैश्वर्याष्टकमुच्यते ॥ B_1, C, D_2.

[3] प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्टभूतयः K_2.

(पा.) विभूतिः—अष्टधा । विभूत्यादीनि ऐश्वर्यनामानि । विभूतिभूतिशब्दौ क्तिन्नन्तत्वात् स्त्रीलिङ्गौ । ऐश्वर्यशब्दः ष्यञन्तत्वान्नपुंसकः । अणिमादिभेदेन तदेवाष्टविधम् ।

'अणिमा महिमा चैव गरिमा लघिमा तथा ।
प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्टभूतयः ॥'

उमा कात्यायनी गौरी काली हैमवतीश्वरी ॥ ३७ ॥
शिवा भवानी रुद्राणी शर्वाणी सर्वमङ्गला ।
अपर्णा पार्वती दुर्गा मृडानी चण्डिकाम्बिका ॥ ३८ ॥
(आर्या दाक्षायणी चैव गिरिजा मेनकात्मजा ।
सती च कालरात्री च भैरवी गणनायिका ॥)

(वि.) उमेति—अवतीति उमा । 'अव रक्षणे' । [1]तपसः उ मेति मात्रा निषिद्धा वा उमा । कति अयनानि सन्तीति विचारयतीति कत्ययनः[2] तस्य गोत्रापत्यं स्त्री कात्यायनी । गौरवर्णत्वाद् गौरी । तपसे [3]गुरते इति गौरी । 'गुरी [4]उद्यमने' । कालवर्णत्वात् काली । हिमवतोऽपत्यं स्त्री हैमवती । ईश्वरस्य पत्नी ईश्वरी । ईष्टे इति वा ईश्वरा । अयमपि पाठः । शिवं मङ्गलमस्या अस्तीति [5]शिवा । शिवस्य पत्नी वा । तथा भवस्य [6]स्त्री भवानी । तथा रुद्राणीशर्वाणीशब्दौ । सर्वतो मङ्गलं [7]यस्याः सा सर्वमङ्गला । अपगतम् ऋणं पितुर्यस्याः सा अपर्णा । [8]तप.काले अपगतानि[9] पर्णानि यतः अपर्णा । तपसि [10]हरार्थं पर्णमपि नैच्छदित्यपर्णा । पर्वतस्य पुत्री पार्वती । दुःखेन गम्यते[11] इति दुर्गा । दुर्गे निवासोऽस्या अस्तीति वा । मृडस्य पत्नी मृडानी । चण्डत इति

चण्डिका[12]। ‘चडि कोपे’। चण्डासुरमर्दनाद्वा[13]। अम्बते [14]जनयति सर्वमिति अम्बिका। ‘अम्ब जनने’। एतानि पार्वतीनामानि ॥ ३७–८ ॥

[1] तपसः, उ अयि, मा मास्तु, इति मात्रा मेनकया निषिद्धा वा B_2, C. [2] ऋषिः कश्चित् C. [3] आगुरते K_1, T; अवगुरते W_1. [4] उद्यमे D_2, K_2, K_5, U, Y. [5] शिवंकरत्वाद्वा B_2, C. [6] पत्नी B_1, C, D_1, W_1. [7] यया सा K_3, U, W_1. [8] तपश्चरकाले D_2. [9] अपगतानि आगाभिसंचितप्रारब्धरूपाणि ऋणानि यस्याः सा अपर्णा B_2, C. [10] आहारार्थं D_1; K_1, W_1, Y omit तप . . . र्णा. [11] गम्या K_5; I adds ‘गम्लृ सृप्लृ गतौ’. [12] W_2 adds चण्डी. [13] मथनत्वाद्वा W_2. [14] °जनं सूते सर्वं Y.

(पा.) उमा—अम्बिका। ईश्वरीत्यत्र गौरादिपाठात् ङीष्। पक्षे टाप्। ‘कर्बुरी चेश्वरेश्वरी’ इति त्रिकाण्डशेषः (प्र. ३, श्लो. ५५)। पार्वतीनामानि। अनुक्तम्—

‘बर्हिर्ध्वजा महाकाली रक्तदन्त्येकपाटला।
दाक्षायणी महादेवी कौशिकी मेनकात्मजा ॥
कालरात्रिर्भगवती गिरिजा शारदा च सौः ॥’

एतानि च। सौः सवौ सवः। सवं सवौ सवः। ‘द्योर्गोवद्विभक्तौ’ इति कातन्त्रसूत्रनियमात् गोशब्दवत् णित्कार्यं न भवति ॥ ३७–८ ॥

विनायको विघ्नराजद्वैमातुरगणाधिपाः।
अप्येकदन्तहेरम्बलम्बोदरगजाननाः ॥ ३९ ॥

(वि.) विनायक इति—विगतो नायको [1]नियन्ता यस्य सः विनायकः। विनयति शिक्षयति दुष्टानिति वा। ‘णीञ् प्रापणे’। विघ्नानां राजा विघ्नराजः[2]। द्वयोर्मात्रोः उमागङ्गयोरपत्यं द्वैमातुरः। गणानाम् अधिपः गणाधिपः। एको दन्तो यस्य सः एकदन्तः। हिरते वर्धयति नेतॄन् हेरम्बः। ‘हिर वृद्धौ’। हे रम्बते शब्दायते वा हेरम्बः[3]। हेरम्बशब्दं करोतीति वा। लम्बम् उदरं यस्य सः लम्बोदरः। गजस्येव आननं [4]यस्य सः गजाननः। एतानि विघ्नेश्वरनामानि ॥ ३९ ॥

[1] प्रभुः K_1, K_3, K_5; नेता B_1, C, W_2, Y. [2] B_1, C, K_5, W_2 add ‘राजाहःसखिभ्यष्टच्’. [3] देशीपदप्रायं तु मन्महे W_2, Y; अथवा बालयोः विनायकगुहयोरन्योन्यं क्रीडासमये संभवति युद्धे विनायकोदरे प्रहरतो गुहस्य षट्छिरार्भकस्य एकतो मिलित्वा प्रकुप्य शिवमङ्कमवलम्ब्य निलीनं विनायकं प्रति रोदनवशात् आक्रोशन् गुहस्तातं प्रति हे तात विनायको

मां प्रहृत्य मञ्चे लम्बते इति निवेदयामास। तदाप्रभृति हेरम्भ इति सर्वेऽप्याचक्षत इति ब्रह्माण्डपुराणे प्रसिद्धम्। तस्मात् हेरम्बः C.　　[4] आननमिवाननं C, D₂.

(पा.) विनायको—गजाननाः। विनायकनामानि ॥ ३९ ॥

कार्त्तिकेयो महासेनः शरजन्मा षडाननः।
पार्वतीनन्दनः स्कन्दः सेनानीरग्निभूर्गुहः ॥ ४० ॥
बाहुलेयस्तारकजिद् विशाखः शिखिवाहनः।
षाण्मातुरः शक्तिधरः कुमारः क्रौञ्चदारणः ॥ ४१ ॥
(भृङ्गी भृङ्गिरिटस्तण्डुनन्दिनौ नन्दिकेश्वरे।
कर्णमोटी तु चामुण्डा चर्ममुण्डा तु चर्चिका ॥)

(वि.) कार्त्तिकेय इति—कृत्तिकानामपत्यं कार्त्तिकेयः। महती सेना यस्य सः महासेनः। शराख्यतृणे जन्म यस्य शरजन्मा[1]। षड् आननानि यस्य षडाननः। पार्वत्या नन्दनः पार्वतीनन्दनः। ईश्वरस्य [2]रेतसः स्कन्दतीति स्कन्दः। शत्रून् स्कन्दति शोषयतीति वा। 'स्कन्दिर् गतिशोषणयोः'। सेनां नयतीति सेनानीः[3]। 'णीञ् प्रापणे'। अग्नेर्भवतीति अग्निभूः। 'भू सत्तायाम्'। परायुधेभ्यः सेनां गूहतीति गुहः। 'गुहू संवरणे'। बहुलानां कृत्तिकानाम् अपत्यं पुमान् बाहुलेयः। तारकासुरं जयतीति तारकजित्। 'जि [4]जये'। विशाखासु[5] [6]भवतीति विशाखः। विना [पक्षिणा] मयूरेण शाखतीति[7] वा विशाखः। 'शाखृ व्याप्तौ'। शिखी वाहनं यस्य सः शिखिवाहनः। [8]षण्मातॄणामपत्यं षाण्मातुरः। शक्तेर्धरः, शक्तिं [9]धारयतीति वा शक्तिधरः। 'धृञ् धारणे'। [10]कुत्सितं मारयतीति कुमारः। कौ पृथिव्यां मां श्रियं रातीति वा। कुमारयति शिखिना वा। 'कुमार क्रीडायाम्'। सदा ब्रह्मचारित्वाद्वा कुमारः। क्रौञ्चगिरिं दारयतीति[11] क्रौञ्चदारणः। 'दॄ विदारणे'। एतानि [12]कुमारनामानि ॥ ४०-१ ॥

---

[1] शरे जले जन्म D₁, I.　[2] रेतसा W₁; रेतसि K₂.　[3] ईकारान्तः B₂, C.
[4] अभिभवे I, K₁, W₁.　[5] B₂, C add नक्षत्रेषु.　[6] भवः D₁, I, K₅, W₁; विशाखसंभवः K₁.　[7] B₂, C, D₁, I add व्याप्नोतीति.　[8] षण्णाम् K₁, K₅, W₂.
[9] धरति B₂, C.　[10] कुत्सितं भयंकरं यथा भवति तथा शत्रून् मारयति। 'मृङ् प्राणत्यागे' C.
[11] B₁, C add खण्डयति.　[12] कुमारस्वामि° D₂, I, K₁, K₃, W₁; °स्वामिनां A.

(पा.) कार्त्तिकेयो—क्रौञ्चदारणः। कार्त्तिकेयनामानि। अनुक्तम्—

सुब्रह्मण्यो ब्रह्मगर्भो नीलदंष्ट्रो हरात्मजः।
स्वामी शरेजः[1] शरजो गाङ्गेयः कुक्कुटध्वजः॥

एतानि च॥ ४०–१॥

[1] जलेजः A₁.

इन्द्रो मरुत्वान् मघवा बिडौजाः पाकशासनः।
वृद्धश्रवाः शुनासीरः पुरुहूतः पुरंदरः॥ ४२॥
जिष्णुर्लेखर्षभः शक्रः शतमन्युर्दिवस्पतिः।
सुत्रामा गोत्रभिद् वज्री वासवो वृत्रहा वृषा॥ ४३॥
वास्तोष्पतिः सुरपतिर्बलारातिः शचीपतिः।
जम्भभेदी हरिहयः स्वाराण्नमुचिसूदनः॥ ४४॥
संक्रन्दनो दुश्च्यवनस्तुराषाण्मेघवाहनः।
आखण्डलः सहस्राक्ष ऋभुक्षाः

(वि.) इन्द्र इति—इन्दतीति इन्द्रः[1]। 'इदि परमैश्वर्ये'। मरुतः अस्य सन्तीति मरुत्वान्। मह्यते मघवान्[2]। 'मह पूजायाम्'। मघः [3]सौख्यमस्यास्तीति मघवा। बेडति इति बिडम्। 'बिड आक्रोशे'। 'बिड भेदने'। बिडं शत्रुतापनम् आक्रोशनं वा [4]तेजोऽस्य बिडौजाः। पाको[5] नामासुरः तं शास्तीति पाकशासनः। 'शासु अनुशिष्टौ'। पाकं दितिगर्भं वा शास्तीति पाकशासनः। वृद्धेभ्यः श्रवः श्रवणं यस्य वृद्धश्रवाः। वृद्धं श्रवः कीतिर्यस्येति वा। वृद्ध इति श्रूयते वा। 'श्रु श्रवणे'। शुनन्तीति [6]शुनाः। 'शुन गतौ'। शुनाः सीराः लाङ्गलानि येन साधनेन शुनासीरः। शुनाः समृद्धाः सीरा येनेति वा। वायुसूर्यौ अस्य स्त इति वा। शु शोभनाः नासीरा अग्रेसरा यस्येति वा शुनासीरः। पुरु भूयिष्ठ हूयते यज्ञेषु पुरुहूतः। पुरं शत्रोः शरीरं [7]पुरं वा दारयतीति पुरंदरः। 'दॄ विदारणे'। जयतीति जिष्णुः[8]। लेखानां देवानाम् ऋषभः श्रेष्ठः लेखर्षभः। शक्नोति दुष्टजये इति शक्रः। 'शक्लृ शक्तौ'। शतं मन्यवः क्रतवो यस्य सः शतमन्युः। दिवः स्वर्गस्य पतिः दिवस्पतिः। सुष्ठु त्रायते इति सुत्रामा। 'त्रैङ् पालने'। शोभनं त्राम बलं यस्येति वा। गोत्रान् [9]गिरीन्

भिनत्तीति गोत्रभित्। 'भिदिर् विदारणे'[10]॥ [11]वज्रोऽस्यास्तीति वज्री। वसूनामयं स्वामी वासवः। वसून्यस्य सन्तीति वा। वृत्रं [12]हतवान् वृत्रहा। 'हन हिंसागत्योः'। वर्षतीति वृषा। नकारान्तः। 'वृष सेचने'। वास्तोः [13]गृहदेवतायाः पतिः वास्तोष्पतिः। सुराणां पतिः सुरपतिः। [14]बलस्यारातिः बलारातिः। शच्याः पतिः शचीपतिः। जम्भम् असुरं [15]भिनत्तीति जम्भभेदी। 'भिदिर् [16]विदारणे'। [17]हरयो हरितो हया यस्य हरिहयः। स्वः स्वर्गे राजतीति स्वाराट्। 'राजृ दीप्तौ'। [18]नमुचिं सूदयतीति नमुचिसूदनः। 'षूद क्षरणे'। संक्रन्दं नयति शत्रून् [19]संक्रन्दनः। 'क्रदि आह्वाने रोदने च'। दुःखेन च्योतितुं शक्यः दुश्च्यवनः। 'च्युतिर् [20]क्षरणे'। शत्रूणां तुरं [21]त्वरितं सहते तुराषाट्। 'षह मर्षणे'। मेघो वाहनं यस्य मेघवाहनः। आखण्डयति रिपून् इत्याखण्डलः। 'खडि [22]भेदने'। सहस्रम् अक्षीणि यस्य सः सहस्राक्षः। इयर्तीति ऋभुक्षाः[23]। 'ऋ गतौ'। ऋभून् देवान् क्षिपति कर्मसु इति वा ऋभुक्षाः। नकारान्तः। 'क्षिप प्रेरणे'[24]। एतानि इन्द्रनामानि॥ ४२-५॥

(पा.) इन्द्रो मरुत्वान्, मघवान्—मघवा इत्युभयथा पाठः। पूर्वस्योदाहरणम्—'स किल संयुगमूर्ध्नि सहायतां मघवतः प्रतिपद्य महारथः'। (रघु. ९. १९) अपरस्योदाहरणम्—'जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः[1]। (मेघ. १. ६) वृद्धश्रवाः शुनासीरः। 'शक्र इव नाकविख्यातसुनासीरः' इत्याश्चर्यमञ्जरी[1]श्लेषाद् दन्त्यः।

---

[1] यद्वा इदंकारास्पदघटादिवत् इम् इदं सर्वं द्राति साक्षात्करोतीति इन्द्रः। 'द्रु गतौ'। गतिशब्दस्तु ज्ञानात्मकः C.
[2] मघवा K_1, K_3, K_5, W_1; मह्यते पूज्यते इति महः। हकारस्य घश्च आदेशः। मघः अस्यास्तीति मघवान् B_2, C.
[3] सौम्यं A.
[4] ओजो B_1, D_1, W_1; बलं C; बिडं शत्रुसमुत्क्रोशनं ओजः W_2.
[5] दितिगर्भे पाकं शिशुं शास्ति भेदयतीति वा B_2, C, D_2; पाकं गजेन्द्रं वा W_2.
[6] 'शुन गतिसमृद्ध्योः'। अथवा शुनाः आसीराः येषां ते। ते च वायुसूर्यापः। तेऽस्य वशे तिष्ठन्तीति शुनासीरः B_2, C.
[7] पट्टणं वा B_1, C, D_1, W_1, Y.
[8] C, D_1, I add 'जि जये'.
[9] पर्वतान् C.
[10] 'द्वैधीकरणे' A, B_1, C, K_2, K_5, T.
[11] वज्रं B_1, C, W_2.
[12] हन्तीति B_1, C, K_3, U, W_2.
[13] वास्तुपुरुषस्य B_2, C.
[14] बलासुरस्य B_2, C.
[15] C adds हिनस्ति.
[16] 'द्वैधीकरणे' A, B_1, C, T, W_1.
[17] हरिवर्णाः A; श्यामाः C.
[18] ऋणं न मुञ्चतीति नमुचिः A, D_2, K_1, W_1.
[19] संक्रन्दयतीति D_2, K_1, K_5, W_1.
[20] स्रंसने C, K_2.
[21] तुदनं (तोदनं) आ समन्तात् सहते तुराषाट् C.
[22] 'खण्डने' D_2, K_2, Y.
[23] इयर्ति व्याप्नोतीति च भवतीति च क्षमते इति च धातुत्रयेण निष्पन्नः ऋभुक्षाः। 'ऋ गतौ, भू सत्तायाम्, क्षम सहने'। अथवा ऋभु अमोघं, क्षिप्यते इति क्षः, तत् किं, धनुरित्यर्थः। अमोघं धनुर्यस्येति ऋभुक्षाः C.
[24] K_2, K_5, W_2 add उग्रधन्वा च.

‘गुर्वीं वहन् सदानवलक्ष्यीकृत्वाङ्गदांशुनाशीरेण ।
अनुवनिताञ्जलिमुकुलं लक्ष्यीकृत्वाङ्गदां शुनासीरेण ॥’

इति हरिप्रबोधयमकात् तालव्यादिः ।

पुरुहूतः—हरिहयः । ‘प्रायो रूढिर्बलवती’ इति [2]न्यायेन शतमन्युशब्दसाम्यात् शतमखादिशब्दाः प्रयोक्तव्या [3]इति हरिहयशब्दसाम्याद् हर्यश्वादिशब्दाश्च प्रयोक्तव्या न भवन्ति । हरिवाहनशब्दः प्रयोक्तव्यो भवति । स्वाराट्—ऋभुक्षाः । ‘सहेः साडः सः’ (८. ३. ५६) इति साड्रूपे षत्वम् । तुरासाहौ तुरासाहः । [4]पृतनाषाट्-शब्दस्याप्ययमेव क्रमः । ‘हल्ङ्याब्भ्यो दीर्घात्’ इति (६. १. ६८) हलाश्रितत्वात् स्थान्यतिदेशो न । इन्द्रनामानि ॥ अनुक्तम्—

प्राचीनबर्हिर्मेषाण्डो महेन्द्रः सितकुञ्जरः ।
पूतक्रतुः पुलोमारिर्दाल्मिरप्सरसां पतिः ।
पुरदंस उग्रधन्वा हरिवान् वज्रदक्षिणः ॥

एतानि च ॥ ४२–५ ॥

[1] °मञ्जु° A_1. [2] न्यायो बलवान् A_1. [3] इव A_1. [4] एवं पृतनाशब्देऽपि B_3, B_4.

तस्य तु प्रिया ॥ ४५ ॥
पुलोमजा शचीन्द्राणी नगरी त्वमरावती ।
हय उच्चैश्रवाः सूतो मातलिर्नन्दनं वनम् ॥ ४६ ॥
स्यात् प्रासादो वैजयन्तो जयन्तः पाकशासनिः ।
ऐरावतोऽभ्रमातङ्गैरावणाभ्रमुवल्लभाः ॥ ४७ ॥
ह्रादिनी वज्रमस्त्री स्यात् कुलिशं भिदुरं पविः ।
शतकोटिः स्वरुः शम्बो दम्भोलिरशनिर्द्वयोः ॥ ४८ ॥

(वि.) पुलोमजेति—पुरूणि लोमानि यस्य सः पुलोमा । तस्मात् पुलोम्नः जायत[1] इति पुलोमजा । ‘जनी प्रादुर्भावे’ । शश्वते[2] हंसवत् गच्छतीति शची । ‘शश्व गतौ’ । इन्द्रस्य पत्नी इन्द्राणी । इन्द्रभार्यानामानि[3] ॥ [4]अमरा अत्र [5]वसन्तीति अमरावती । इन्द्रनगरीनाम ॥ उच्चैः श्रवः कीर्तिः यस्य सः

उच्चैःश्रवाः। [6]उच्चैः उन्नते श्रवसी[7] यस्येति वा। इन्द्रहयनाम[8]॥ मतानि सूतकर्मणि लाति गृह्णातीति मतलः। तस्यापत्यं [9]मातलिः। 'ला आदाने'। इन्द्रसारथिनाम॥ नन्दयतीति नन्दनम्। 'टुनदि समृद्धौ'। इन्द्रवननाम॥ विजयन्तस्य इन्द्रस्य अयं [10]वैजयन्तः। तत्प्रासादनाम॥ जयति शत्रूनिति जयन्तः। रूपेण[11] वा सर्वान् जयति अभिभवति जयन्तः[12]। पाकशासनस्यापत्यं पाकशासनिः। इन्द्रपुत्रनामानि[13]॥ इरा आपः यत्र वसन्ति स इरावान् सिन्धुः[14]। तत्र जातः ऐरावतः। अभ्रे मातङ्ग इव खेचरत्वात् अभ्रमातङ्गः[15]। इरा हाला तत्प्रधानं वनम् इरावणम् तत्र जातः ऐरावणः[16]। अभ्रमोः वल्लभः अभ्रमुवल्लभः। इन्द्रगजनामानि॥ ह्रादो [17]ध्वनिः अस्या अस्तीति ह्रादिनी। ह्रादुनीति वा पाठः। वजति शीघ्रं गच्छतीति वज्रम्। 'वज व्रज गतौ'। कुल्यते संतन्यते कीर्तिरनेनेति कुलिशम्। 'कुल संताने'। कुं पृथिवीं[18] लेशयतीति वा। 'लिश अल्पीभावे'। कुलिनः[19] पर्वतान् श्यतीति वा। 'शो तनूकरणे'। कुलिशवज्रशब्दौ अस्त्रियौ। भिनत्ति ताच्छील्येनेति भिदुरम्। पुनाति वैरमिति पविः। 'पूञ् पवने'। शतं कोटयो[20] यस्य शतकोटिः। स्वरतीति परान् स्वरुः। 'स्वृ उपतापे'। शमयति शत्रूनिति [21]शम्बः। 'शमु उपशमने'। शत्रुं दभ्नोतीति दम्भोलिः। 'दम्भु हिंसायाम्'। अश्नाति शत्रुजीवितम्[22] अश्नुते[23] वा अशनिः। 'अश भोजने'। 'अशू व्याप्तौ'। अशनीति वा पाठः स्त्रीलिङ्गपक्षे। एतानि वज्रनामानि[24]॥ ४६–८॥

(पा.) तस्य तु प्रिया—इन्द्राणी। [1]तत्प्रियानामानि। 'मघोनी जयवाहिनी'। एते च। [2]महेन्द्राणीति पाठान्तरम्॥ नगरी त्वमरावती। पुरनाम। अमरा इत्यप्यस्ति। 'दूर्वामरावतीस्थूणागुडूचीष्वमरा [3]मता' इति विश्वप्रकाशिका (पृ. १३३,

---

[1] जात B₂, C, D₂, K₂, W₁. [2] शचते C, D₂, K₅, W₁, Y; शं सुखं चिनोतीति शची C. [3] °पत्नी° A, K₂, T. [4] B₁, U add इन्द्रस्य. [5] सन्ति D₁. [6] B₁, C, T omit. [7] A, B₂, C add श्रोत्रे. [8] °वाहन° A, Y. [9] °लाति ताडयति अश्वान्। 'ला ताडने' 'अत इञ्' B₁, C. [10] विजयतः इन्द्रस्यायं वैजयन्तः B₁, C. [11] रोषेण W₂. [12] 'जि जये' C; D₁ adds 'जि अभिभवे'. [13] नामनी B₂, C. [14] समुद्रः C. [15] आतमेव आतङ्कः। भ्रमश्च आतं च भ्रमाते। ते गच्छतीति भ्रमातङ्गः। स न भवतीति अभ्रमातङ्गः। 'गम्लृ गतौ' C; भ्रमातङ्गात् अन्यः अभ्रमातङ्गः B₂; श्वेताभ्रवद्वा K₂. [16] आ समन्ताद्विद्यमानं वनम् आवनम्, ऐरं च तत् आवनं च ऐरावणं क्षीरसमुद्रः, तत्र जातः ऐरावणः B₂, C. [17] अहंकारः B₂, C. [18] पृथ्वीं K₁, W₁. [19] कुः भूमिः तत्र लीयन्त इति कुल्यः। ईकारान्तः। पर्वता इत्यर्थः। तान् श्यतीति C. [20] C adds अग्राणि. [21] शत्रुं शमयित्वा स्वपक्षं वहतीति शंवः। वबयोरभेदः। 'शम उपरमे', 'वह प्रापणे' C, K₁, I, U. [22] °जनं B₂, K₁, K₃. [23] C adds व्याप्नोति. [24] वज्रायुध° B₂, D₂.

श्लो. ९४)। हय उच्चैःश्रवाः। [4]तदश्वनाम॥ सूतो मातलिः। [5]इन्द्रसारथिनाम। 'सारथिस्तु हयंकषः' इति रभसकोशपाठात् हयंकषोऽपि स्यात्॥ नन्दनं वनम्। तत्क्रीडावनं[6] नन्दनम्॥ स्यात् प्रासादो वैजयन्तः। तत्प्रासादनाम। तच्च सप्तभूमिकाभवनम्। तस्य ध्वजोऽपि वैजयन्तः स्यात्। 'प्रासादो वैजयन्तोऽस्य वैजयन्तो ध्वजोऽपि च' इति वैजयन्ती (पृ. ९, श्लो. ९)। जयन्तः पाकशासनिः। तत्तनयनामनी॥ ऐरावतो—अभ्रमुवल्लभाः। तदारोहणगजनामानि। 'राथन्तरिश्चतुर्दन्तः'। एते च॥ ह्रादिनी—द्वयोः। [7]वज्रायुधनामानि। वज्रमस्त्री स्यात् कुलिशमिति संदष्टविशेषविधिः। पविः शतकोटिः स्वरुः शम्बो दम्भोलिरिति [8]परापरसाहचर्यम्। उभयत्र वैजयन्ती—(पृ. १०, श्लो. १३)

'अस्त्रियौ वज्रकुलिशौ भिदुरं शतधारकम्।
[9]व्याधामः पुंसि दम्भोलिः शतकोटिः पविर्भिदुः'॥

अशनिर्द्वयोरित्यसंघातपक्षे विशेषविधिः। संघातपक्षे पुंलिङ्ग एव। 'वज्राशनिर्भिदुर्वज्रम्[10]' इति त्रिकाण्डशेषः (पृ. ४, श्लो. ६५)। 'वज्राशनिर्गिरिकटः पविर्दम्भोलिरक्षजम्' इति रभसकोशः। अत्र स्वरुशब्दं विना सर्वे शब्दास्तालव्याः। शम्बशब्दस्तालव्यो दन्त्यश्च भवति।

'तालव्या अपि दन्त्याः स्युः शम्बशूकरपांशवः[11]।
कलशः शम्बलं चैव जिह्वायां रसना च या'॥

इत्यूष्मभेदपाठात्॥ ४६-८॥

---

[1] पत्नी B_3.
[2] A_1 adds अमरकोशे.
[3] स्मृता B'_3, B_4.
[4] तदारोहणहय° A_1.
[5] B_3 omits इन्द्र.
[6] तद्वननाम B_3.
[7] A_1 adds तद्गृहीत.
[8] B_3 omits परापर.
[9] व्याधावः B_3.
[10] भिद्र इति मुद्रितग्रन्थे.
[11] °सूकरपांसवः A_1.

व्योमयानं विमानोऽस्त्री नारदाद्याः सुरर्षयः।
स्यात् सुधर्मा देवसभा पीयूषममृतं सुधा॥ ४९॥

(वि.) व्योमेति—व्योम्नि [1]यानं व्योमयानम्। विमान्ति वर्तन्ते देवा अत्र विमानम्[2]। 'माङ् माने वर्तने च'। विमाननाम॥ [3]सुराणाम् ऋषयः सुरर्षयः। नारं नरसमूहं [4]द्यतीति नारदः। नारदादिदेवर्षिनाम[5]॥ शोभनो धर्मोऽत्र सुधर्मा[6]। नकारान्तोऽप्यस्ति। देवसभानाम॥ पीयते इति पीयूषम्। 'पीङ् पाने'। न मृता

भवन्त्यनेनेत्यमृतम् । सुष्ठु [7]धयन्त्येनां सुधा । 'धेट् पाने' (समुद्रनवनीतं देश्याम्) अमृतनामानि ॥ ४९ ॥

---

[1] C adds विद्यमानं.　[2] विमातीति B$_2$, C.　[3] B$_1$ omits 3 words.
[4] दाति भेदयतीति 'दा अवखण्डने' C, I.　[5] °सुर° W$_1$.　[6] आकारान्तः स्त्रियां Y.
[7] B$_2$, C add पिबन्ति; सुखेन धीयते सुधा D$_2$.

(पा.) व्योमयानं विमानोऽस्त्री । [1]विमाननामनी ॥ नारदाद्याः—देवसभा । देवसभा सुधर्मा स्यात् । 'सुधर्मामिव स्वच्छन्दकौशिकां विन्ध्याटवीं विवेश' इति वासवदत्ता । संज्ञाशब्दत्वाद् 'धर्मादनिच् केवलात्' इति (५. ४. १२४) अनिच् न भवति ॥ पीयूषममृतं सुधा । अमृतनामानि ॥ ४९ ॥

---

[1] याननामनी B$_3$.

मन्दाकिनी वियद्गङ्गा स्वर्णदी सुरदीर्घिका ।
मेरुः सुमेरुर्हेमाद्री रत्नसानुः सुरालयः ॥ ५० ॥
पञ्चैते देवतरवो मन्दारः पारिजातकः ।
संतानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम् ॥ ५१ ॥

(वि.) मन्दाकिनीति—मन्दम् अकति मन्दाकिनी । 'अक अग कुटिलायां गतौ' । वियति [1]गङ्गा वियद्गङ्गा । [2]स्वः स्वर्गे नदी स्वर्णदी । सुराणां दीर्घिका सुरदीर्घिका । [3]मन्दाकिनीनामानि ॥ मिनोति शिखरैः ज्योतींषीति मेरुः[4] । 'डुमिञ् प्रक्षेपणे' । सुष्ठु मिनोतीति सुमेरुः । हय्यते हेम । 'हय्य गतिकान्त्योः' । हेम्नोऽद्रिः हेमाद्रिः । रत्नानि सानुषु यस्य [5]रत्नसानुः । सुराणाम् आलयः सुरालयः । [6]मेरुनामानि ॥ मन्द्यते स्तूयते मन्दारः । 'मदि स्तुतिमोदमदस्वप्रकान्तिगतिषु' । मन्दा आरा अस्येति वा मन्दारः । पारम् उदकमस्यास्तीति पारी समुद्रः । तस्मात् जातः पारिजातः[7] । संतनोति वाञ्छितं संतानः । 'तनु विस्तारे' । कल्पयति वाञ्छितं कल्पः, स चासौ वृक्षश्च कल्पवृक्षः । 'क्लृपि [8]सामर्थ्ये' । हरेरिन्द्रस्य चन्दनं हरिचन्दनम्[9] । एतानि पञ्च [10]देवतरुनामानि ॥ ५०–१ ॥

---

[1] B$_2$, C add विद्यमाना.　[2] A, K$_1$, T, U omit.　[3] आकाशगङ्गा° D$_1$.
[4] मीनाति हिनस्ति असुरानिति मेरुः । 'मीञ् हिंसायाम्' D$_1$.　[5] रत्नमयाः सानवः D$_1$.
[6] मेरुगिरि° B$_1$, C, D$_1$, K$_1$, K$_5$, W$_1$, Y.　[7] पारिणः पारावतः(?) समुद्रात् जातः D$_1$;

B_2, C add 'जनी प्रादुर्भावे'. [8] 'क्लृप्तौ' A, K_1, W_1. [9] हरिम् इन्द्रं चन्दयति ह्लादयतीति । 'चदि आह्लादने' D_1. [10] देवतावृक्ष° D_1.

(पा.) मन्दाकिनी—हरिचन्दनम् । [1]आकाशगङ्गानामानि । गिरिनद्यादित्वात् [2]स्वर्णदीत्यपि स्यात् । सिद्धनदीशब्दः प्रयोगे दृष्टः । 'भेजे भीतः पादुकसिद्धसिन्धोरभूतपूर्वां श्रियमम्बुराशिः'[3] । इति विदग्धकण्ठाभरणम् ।। हेमाद्रिरित्यादिमेरुगिरिनामानि[4] । मन्दारादयः पञ्च [5]सुरतरुनामानि ।। ५०–१ ।।

[1] स्वर्गङ्गा° B_3, B_1. [2] स्वर्नदीति पाठान्तरम् B_3. [3] अम्बुराशेः B_3. [4] B_3 omits गिरि. [5] देवतरवः A_1.

सनत्कुमारो वैधात्रः स्वर्वैद्यावश्विनीसुतौ ।
नासत्यावश्विनौ दस्रावाश्विनेयौ च तावुभौ ॥ ५२ ॥

(वि.) सनदिति—[1]सनत् नित्यं कुमारः सनत्कुमारः । विधातुरपत्यं वैधात्रः । [2]वैद्यसंहिताकर्तृविधातृपुत्रस्य नामनी ।। [3]अश्विन्याः सुतौ अश्विनीसुतौ[4] । न असत्यौ नासत्यौ[5] । अश्वावनयोः स्त इत्यश्विनौ । सदा अश्वारूढत्वाद्वा । दस्यतः क्षपयतः रोगानिति दस्रौ । 'दसु उपक्षये' । अश्विन्या [6]अपत्ये पुमांसौ आश्विनेयौ[7] । एतानि स्वर्गवैद्यनामानि ।। ५२ ।।

[1] सनत् ब्रह्मा तस्य कुमारः D_1. [2] सनत्कुमारनामानि D_1. [3] K_1, K_3, W_1 add स्वः स्वर्गे वैद्यौ स्वर्वैद्यौ. [4] सूर्यस्य पत्न्याः संज्ञायाः अश्वरूपधारिण्याः सुतौ D_1. [5] न विद्यते असत्यं ययोस्तौ D_1; सत्यौ न भवतः इत्यसत्यौ B_2, C. [6] पुत्रौ B_1, C, K_5, Y; D_1 adds तावुभौ सहचरावित्यर्थः. [7] अश्विन्याः अश्वरूपधरासंज्ञायाः जातौ; अश्विनीनक्षत्रजातौ वा D_1.

(पा.) सनत्कुमारो वैधात्रः । वैद्यशास्त्रकर्तृदेवर्षिनामनी ।। स्वर्वैद्यौ—तावुभौ । देववैद्ययोर्नामानि । नासत्य इति दस्र इति च तयोः पृथङ्नामनी । 'नासत्यदस्रौ नासत्यावश्विनौ [1]वरवाहनौ' इति वैजयन्ती (पृ. १५, श्लो. ५) । विरूपैकशेषादत्र नासत्यौ दस्रावित्युक्तं मूलकारेण ।। ५२ ।।

[1] नरवाहनौ A_1, B_1.

स्त्रियां बहुष्वप्सरसः स्वर्वेश्या ऊर्वशीमुखाः ।
(घृताची मेनका रम्भा ऊर्वशी च तिलोत्तमा ।

सुकेशी मञ्जुघोषाद्याः कथ्यन्तेऽप्सरसो बुधैः ॥)
हाहा हूहूश्चैवमाद्या गन्धर्वास्त्रिदिवौकसाम् ॥ ५३ ॥

(वि.) स्त्रियामिति—आप्यन्ते पुण्यकृद्भिरिति अप्सरसः[1] । ऊरू अश्नुते, नारायणस्य ऊर्वोर्भवत्वात् [2]ऊर्वशी । ऊर्वशीमुखस्वर्वेश्यानाम । अप्सरा इत्येकवचनान्तमपि विद्यते ॥ गानं धारयन्तीति गानपराः [3]गन्धर्वाः । हाहा हूहू इत्यालापानुकारात् नामद्वयम् । एकनामेत्येके । अव्ययाविति भोजराजः । हाहाहूहूप्रभृतिदेवगायकनामनी ॥ ५३ ॥

---

[1] अप्सु सरन्तीति । 'सृ गतौ' U; स्रवन्तीति I; अद्भ्यः सृताः अप्सरसः, अपसारयन्ति स्मारयन्तीति, सकारान्तः D_1; अद्भ्यः निःसृताः निर्गताः Y. [2] उर्वशीति वा पाठः Y. [3] गानं धर्मः येषां ते गन्धर्वाः D_1; गानं धारयन्ति, शिष्यान् पाठयन्ति, स्वयं वहन्ति च ये ते गन्धर्वाः । 'धृञ् धारणे' 'वह प्रापणे' C.

(पा.) स्त्रियां—ऊर्वशीमुखाः । ऊर्वशीरम्भामेनकादिस्वर्गगणिका अप्सरस इत्युच्यन्ते । बहुष्विति बहुवचनप्रकृतिरन्ते लिङ्गसंग्रहे समीरिता । एकवचना विंशत्यादयः । द्विवचना दम्पत्यादयः । बहुवचना अप्सरःप्रभृतयः । त्रिवचना वृक्षादयः । अवचनान्यव्ययानि । केषांचिद् बहुत्वमनभिमतमेव । 'एकाप्सरःप्रार्थितयोर्विवादः'[1] इत्यत्र बहुत्वं प्रायिकाभिप्रायमुक्तम् । [2]अबहुवचनस्योदाहरणम्—

'सान्द्रकाण्डपटसंवृतमूर्तेर्दन्तिदन्तशयनीयशयस्य ।
मानिनः कुलवधूरिव रागादप्सरा व्यधित पार्श्वमशून्यम्' ॥

इति ॥ हाहा हूहू—त्रिदिवौकसाम् । हाहाशब्दो धातुजो न भवतीति केचिद् व्याचक्रिरे । तज्जल्पितमज्ञानविजृम्भितमेव । 'हेति निन्दितं ध्वनिं जहातीति हाहा' इत्यमरभाष्यकाराः प्रतिजानते । गन्धर्वन्ति हाहसोरित्यभिधानान्तरपक्षः । हाहाहूहूप्रभृतयो देवगन्धर्वाः । गान्धर्वा अपि भवन्ति । 'अपि गन्धर्वगान्धर्वदिव्यगायनगातवः' इति रभसकोशः[3] ॥ ५३ ॥

---

[1] A_1 omits विवादः. [2] एकवचनस्य B_3, B_4; कप्फिणाभ्युदये (१७. ३२) इति टीकासर्वस्वे (पृ. ३९). [3] °कोशकारः A_1.

अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनंजयः ।
कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात् ॥ ५४ ॥

बर्हिः शुष्मा कृष्णवर्त्मा शोचिष्केश उषर्बुधः ।
आश्रयाशो बृहद्भानुः कृशानुः पावकोऽनलः ॥ ५५ ॥
रोहिताश्वो वायुसखः शिखावानाशुशुक्षणिः ।
हिरण्यरेता हुतभुग् दहनो हव्यवाहनः ॥ ५६ ॥
सप्तार्चिर्दमुनाः शुक्रश्चित्रभानुर्विभावसुः ।
शुचिरप्पित्तम्

(वि.) अग्निरिति—[1]अङ्गति [2]ऊर्ध्वं गच्छतीत्यग्निः । 'अगि ऊर्ध्वगमने'। विश्वानरस्य ऋषेरपत्यं वैश्वानरः । हव्यं [3]वहतीति वह्निः । 'वह प्रापणे'। होत्रस्य[4] हविषो वीतिः अश्व इव वहनात् वीतिहोत्रः । अथवा वीतयोऽश्वा होत्रं हव्यमस्येति वीतिहोत्रः । वीतिः [5]आर्याणामशनं होत्रं होमसाधनं तदस्यास्तीति वा वीतिहोत्रः । धनं [6]जयतीति धनंजयः । 'जि जये'। कृपीटस्याम्भसो[7] योनिः कृपीटयोनिः । कृपीटं योनिरस्येति वा । ज्वलतीति ज्वलनः । 'ज्वल दीप्तौ'। जातं विद्यते इति जातवेदाः[8] । 'विद सत्तायाम्'। जातं शुभाशुभं वेत्तीति वा । 'विद ज्ञाने'। वेदो हिरण्यम् अस्मात् [9]जातमिति वा । तनूं न पातयति [10]तनूनपात् । 'पत्लृ गतौ'। बृंहति वर्धते आज्येनेति बर्हिः[11] । 'बृहि वृद्धौ'। शोषयतीति शुष्मा[12] । बर्हाः दर्भाः शुष्म स्थानमस्येति बर्हिःशुष्मा[13] । दर्भस्थानपक्षे एकनाम । कृष्णं वर्त्म मार्गोऽस्य कृष्णवर्त्मा । शोचींषि[14] केशाः यस्य सः शोचिष्केशः । [15]उषसि बुध्यते प्रकाशते उषर्बुधः । 'बुध अवगमने'। [16]आश्रयम् अश्नातीति आश्रयाशः । 'अश भोजने'। आश्रयाशी इति वा पाठः । बृहन्तः भानवो यस्य बृहद्भानुः । कृशयति तनूः स्वमान्द्यात् कृशानुः[17] । 'कृश तनूकरणे'। कृशेन मन्थकाष्ठेन उत्पन्न इति वा । पुनातीति पावकः । 'पूञ् पवने'। अनिति वर्धतेऽनेन अनलः । 'अन प्राणने'। काष्ठादिभिः अलं पर्याप्तिः नास्ति अस्येति वा । लोहिताख्यो[18] मृगः [19]अश्वोऽस्येति लोहिताश्वः । वायोः सखा वायुसखः[20] । वायुः सखा अस्येति वा । शिखा अस्यास्तीति शिखावान् । आशु शोषयितुमिच्छतीति आशुशुक्षणिः । हिरण्यं रेतोऽस्य हिरण्यरेताः । हुतं [21]भुङ्क्ते हुतभुक् । 'भुज पालनाभ्यवहारयोः'। दहतीति दहनः । 'दह भस्मीकरणे'। हव्ये हव्यविषये वाहते यतते इति हव्यवाहनः । 'वाहृ प्रयत्ने'। हव्यं वहतीति वा । 'वह प्रापणे'। सप्त अर्चींषि यस्य सः [22]सप्तार्चिः । दाम्यति ग्लापयति शमयति [23]दमुनाः । सकारान्तः । 'दमु उपशमने'। शोचयति शत्रूनिति [24]शुक्रः । 'शुच शोके'। शुचं रातीति वा । 'रा आदाने'। शुक्रं [25]रुद्ररेतोऽत्रास्तीति वा । चित्रा भानवो यस्य चित्रभानुः । विभैव[26] वसु धनमस्य विभावसुः ।

[27]शोचयतीति शुचिः। 'शुच शोके'। शुद्धत्वाद्वा। अपां पित्तम् [28]अप्पित्तम्। एतानि अग्नेर्नामानि ॥ ५४–६ ॥

---

[1] अगति B₁, C, D₁, I, K₃, W₂.

[2] कुटिलम् ऊर्ध्वं वा D₁.

[3] D₁ adds प्रापयति देवान्.

[4] हूयते इति होत्रं हविर्द्रव्यम्। वीतिः वहनं, तदश्व इव वहनात्, परनिपातः, 'हु दानादानयोः' C; होत्रं हविः वीतिरशनं यस्य वीतिहोत्रः D₁.

[5] अमराणां C.

[6] C adds संपादयति.

[7] उदकस्य K₃, W₁.

[8] B₂, C add जातश्चासौ वेदाश्च, 'जनी प्रादुर्भावे'; A, D₂ add जाते जाते.

[9] जायते W₂.

[10] इन्धनं विना तनूं न पाति। 'पा रक्षणे' D₁, U.

[11] K₁, K₃ add सान्तः.

[12] D₁ adds 'शुष शोषणे'.

[13] नकारान्तः C, W₁.

[14] D₁ adds ज्वालाः.

[15] प्रातःकाले B₂, C; प्रभाते D₁.

[16] K₅ omits 3 lines.

[17] कृशोऽपि अनिति वर्धते 'अन प्राणने' D₁.

[18] °वर्णः D₁.

[19] रोहितः कृष्णमृगः अश्वो वाहनः B₂, C.

[20] 'राजाहःसखिभ्यष्टच्' B₂, C.

[21] भुनक्ति K₃.

[22] काली कराली मनोजवा सुलोहिता सुधूम्रवर्णा स्फुलिङ्गिनी विश्वदासाख्याः जिह्वारूपज्वालाः यस्य सप्तार्चिः D₁.

[23] दमनाः B₁, C; उपशाम्यति धनं (?इन्धनं) विना D₁.

[24] शोषयति दार्वादीन् B₂, C, D₁.

[25] तेजः D₁.

[26] विभा प्रभा B₂, C, D₁, K₃.

[27] D₁ adds दुःखयति.

[28] अपः पिबतीति अप्पित्, 'पा पाने', तनोतीति तं, अप्पिच्च तत्तं च अप्पित्तम् C.

(पा.) अग्निर्वैश्वानरो—तनूनपात्। 'तनूनपाति पीतसर्पिषि पतङ्ग इव पातयाम्यात्मानम्' इति हर्षचरितानुप्रासात् तान्तः। बर्हिः शुष्मा—शोचिष्केश[1] उषर्बुधः। शोचिष्केश इत्यत्र कस्कादित्वात् षत्वमिति कतिचिद्वदन्ति[2]। आश्रयाशो—अप्पित्तम्। अग्निनामानि। बर्हिःशुष्मेति संघातोऽप्यग्निनाम। अपां पित्तमिति वाक्यं सदप्यग्निनाम। शुचिर इति वा पाठः।

'स्रुग्जिह्वो [3]मन्त्रजिह्वश्च त्रिधामा[4] वातसारथिः।
स्वाहाप्रियः कृष्णगतिर्हव्यवाड्ढव्यसूदनः।
धूमध्वजो हुतवहः पाञ्चजन्यो वृषाकपिः ॥'

एतानि च ॥ ५४–६ ॥

---

[1] रोचिष्केश A₁, B₄.

[2] B₃ omits.

[3] मित्र° A₁.

[4] दावा A₁.

और्वस्तु बाडवो बडवानलः ॥ ५७ ॥

वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखा स्त्रियाम्।

(वि.) और्व इति—ऊर्वतीत्यूर्वः। 'उर्वी तुर्वी धुर्वी हिंसायाम्'। तस्यापत्यं और्वः। बडवायां भवः बाडवः। बडवायाम् अनलः बडवानलः। बडवाग्निनामानि॥ ज्वलतीति ज्वालः। 'ज्वल दीप्तौ'। कीलति पक्ष्यादिगतिं कीलः। 'कील बन्धने'। एतौ शब्दौ द्वयोः स्त्रीपुंसयोः। अर्च्यते अर्चिः। सान्तः। 'अर्च पूजायाम्'। स्त्रीपुंनपुंसकेषु अर्चिःशब्दः। प्रायेण अर्चिःशब्दः स्त्रीत्येके। हन्यते अनया हेतिः। 'हन हिंसागत्योः'। हिनोति वर्धते वा। 'हि गतौ वृद्धौ च'। हेतिशब्दः सूर्यवह्निदीप्तिपर्याये स्त्रीलिङ्गः। आयुधपर्याये द्वयोः। शाखति वह्नौ शिखा। 'शाखृ व्याप्तौ'। अग्निज्वालानामानि॥ ५७॥

(पा.) और्वस्तु बाडवो बडबानलः। समुद्राग्निनामानि। अनुक्तम्—'सहरक्षा द्रुमाशनः'। अरण्याग्निनामनी॥ वह्नेर्द्वयोः—स्त्रियाम्। [1]अग्निज्वालानामानि। स्त्रियामिति अर्चिरादिविशेषविधिः। अर्चिषः पश्य, हेतीः पश्य, शिखाः पश्य॥ ५७॥

[1] वह्नि° B_3.

त्रिषु स्फुलिङ्गोऽग्निकणः संतापः संज्वरः समौ॥ ५८॥
([1]उल्का स्यान्निर्गता ज्वाला भूतिर्भसितभस्मनी।
क्षारो रक्षा च दावस्तु दवो वनहुताशनः॥)

(वि.) त्रिष्विति—स्फुलतीति स्फुलिङ्गः[2]। 'स्फुल संचलने'। अग्नेः कणः अग्निकणः। अग्निकणनाम। [3]संतापयतीति संतापः। 'तप संतापे'। संज्वरतीति संज्वरः। 'ज्वर रोगे'। अग्निदाहनामनी। निर्गता ज्वाला अस्य उल्का। अपगतज्वालाग्निनाम। भूतिः भसितभस्मनी क्षारः रक्षा। एतानि भूतिनामानि। दावः दवः वनहुताशनः। दवाग्निनामानि॥ ५८॥

[1] Found in A, B_1. [2] स्फुकारेण लिङ्गतीति D_1; स्फुरतीति W_2, Y. [3] सम्यक् तापयति B_2, C; व्याप्नोति B_2.

(पा.) त्रिषु स्फुलिङ्गोऽग्निकणः। वह्निकणनामानि। आबन्तताप्रसिद्ध्यर्थं त्रिषु स्फुलिङ्गेति केचित् पठन्ति। 'त्रयी[1] [2]स्फुलिङ्गाऽपुञ्जो ना खड्गाङ्गश्चाथ संज्वरः' इति वैजयन्त्यामपि (पृ. ११, श्लो. ३१) तथैव पठिता। संतापः संज्वरः समौ। दाहनामनी। अनुक्तम्—'रेटिः स्त्री रटितं वह्नेः'। अग्निरटितं रेटिरित्युच्यते। तद्ध्वनिनाम। 'धूमः स्यान्नमतस्तरिः'। धूमनाम। 'उल्का स्यान्निर्गता ज्वाला'। निर्गतज्वाला उल्का स्यात्।

विच्छिन्नज्वालनाम। 'भूतिर्भसितभस्मनी। क्षारो रक्षा[3] च'। भस्मनामानि॥ 'दावस्तु दवो वनहुताशने।' वनवह्निनामनी॥ ५८

---

[1] त्रिषु B_3, B_4. [2] 'स्फुलिङ्गो' इत्येव मुद्रितपुस्तके दृश्यते. [3] रूक्षा B_3.

धर्मराजः पितृपतिः समवर्ती परेतराट्।
कृतान्तो यमुनाभ्राता शमनो यमराड् यमः॥ ५९॥
कालो दण्डधरः श्राद्धदेवो वैवस्वतोऽन्तकः।

(वि.) धर्मराज इति—[1]धर्मस्य राजा धर्मराजः। पितॄणां[2] पतिः पितृपतिः। [3]समं वर्तितुं शीलमस्येति समवर्ती। 'वृतु वर्तने'। परेतेषु[4] राजते परेतराट्। 'राजृ दीप्तौ'। कृतः अन्तो[5] येन कृतान्तः। यमुनाया[6] भ्राता यमुनाभ्राता। शमयतीति[7] शमनः। 'शमु उपशमे'। यमेन[8] राजते यमराट्। यमयति नियतिं [9]यच्छतीति [10]यमः। 'यम उपरमे'। [11]कलयतीति कालः। 'कल किल क्षेपे'। दण्डं धरति धारयतीति दण्डधरः[12]। श्राद्धस्य देवः श्राद्धदेवः। विवस्वतोऽपत्यं वैवस्वतः। अन्तं करोतीति अन्तकः। [13]एतानि यमनामानि॥ ५९॥

---

[1] यथापराधदण्डदानेन D_1. [2] D_1 adds कव्यवाहनादीनां. [3] समं वर्तते A, B_1; सम्यग् वर्तते U. [4] W_1 adds प्रेतेषु; श्मशानेषु C; परेता मृतास्तेषां राजा D_1. [5] D_1 adds नाशः. [6] नद्याः D_1. [7] प्राणिनः D_1. [8] नियमादिना C; 'राजृ दीप्तौ' I. [9] नियच्छति A, I. [10] प्रजासंयमनात् यमः, मृत्युप्रज्वरप्रभृतयोऽस्य किंकराः, तेषु राजेति यमराट् D_1; यमुनया सह यमलत्वे जातत्वाद्वा यमः D_1. [11] कालयति D_2, I, K_1, K_2, K_5, U; धर्माधर्माणां आयुषां च संख्यानं करोतीति कालः। 'कल शब्दसंख्यानयोः' D_1; वेलास्वरूप इत्यर्थः C. [12] कालदण्डाख्यस्य धरः D_1; 'धृ धारणे' I. [13] 'डुकृञ् करणे' I; एतानि धर्मराजनामानि A, I.

(पा.) धर्मराजः—अन्तकः। यमनामानि। 'शामित्रेयः कालकण्ठो दण्डी महिषवाहनः'। एतानि च॥ ५९॥

राक्षसः कौणपः क्रव्यात् क्रव्यादोऽस्रप आशरः[1]॥ ६०॥
रात्रिंचरो रात्रिचरः कर्बुरो निकषात्मजः।
यातुधानः पुण्यजनो नैर्ऋतो यातुरक्षसी॥ ६१॥

(वि.) राक्षस इति—रक्ष एव राक्षसः। कुणपं [2]शवमत्तीति कौणपः। कोणं पातीति वा। क्रव्यं मांसमत्तीति क्रव्यात्। क्रव्यादश्च। 'अद भक्षणे'। अस्रं [3]रक्तं पिबतीति अस्रपः। 'पा पाने'। अश्रप इति पाठे भक्ष्यमांसं न श्रपयति न पचतीत्यश्रपः। 'श्रा पाके'। असुर एव आसुरः। असून् प्राणान् रातीति वा। 'रा आदाने'। आश्रृणातीति आशरो[4] वा। 'शॄ हिंसायाम्'। रात्रौ चरतीति रात्रिंचरः। रात्रिचरश्च। 'चर गतिभक्षणयोः'। [5]कर्बुरवर्णत्वात् कर्बुरः। कृणाति[6] हिनस्तीति वा कर्बुरः। 'कॄ हिंसायाम्'। निकषाया[7] आत्मजः निकषात्मजः। निकषानाम रक्षोमाता। यातूनि यातनाः तीव्रवेदना धीयन्त अस्मिन्निति यातुधानः[8]। यातुना धीयतेऽत्रेति वा। विरुद्धलक्षणेन पुण्यवान् जनः पुण्यजनः[9]। [10]निर्ऋतेरपत्यं नैर्ऋतः। याति रक्षांसि यातु[11]। यातुशब्दः उकारान्तः। 'या प्रापणे'। रक्ष्यतेऽस्मात् जगदिति रक्षः[12]। 'रक्ष पालने'। नैर्ऋतनामानि[13] ॥ ६०–१ ॥

---

[1] आसुरः इति पाठान्तरम्. [2] °तद्भक्षणात् कौणपः D_1, W_1. [3] रुधिरं D_2, I, K_1, U, W_1, Y. [4] अशितमेव आशम्, अस्मै तदर्थं राति गृह्णाति हिंसतीत्यर्थः। तस्मादाशरः, 'रा हिंसायाम्' C. [5] °दशनत्वात् Y. [6] कृणोति Y. [7] निकषति हिनस्तीति निकषा राक्षसमाता D_1. [8] यात्विति नाम धीयते अत्रेति वा W_1; यातून् यातनाः प्राणिषु धत्ते सृजतीति ! 'डुधाञ्°' C. [9] विपरीतलक्षणया पापजन इत्यर्थः D_1. [10] दिक्पालस्य D_1; निर्ऋत्यां दिशि वर्तमानो वा नैर्ऋतः D_1. [11] यातयति व्यथयति D_1. [12] रक्षत्यात्मानमिति रक्षः D_1; सकारान्तं नपुंसकम् B_2, D_1, I. [13] निर्ऋतिनामानि D_2, K_1, K_2, Y.

(पा.) राक्षसः—निकषात्मजः। कीकसात्मज इति पाठान्तरम्। यातुधानः—यातुरक्षसी। नैर्ऋतनामानि। अनुक्तम्—'पलंकषो रात्रिमटो रात्र्यटो जललोहितः'। एतानि च ॥ ६०–१ ॥

प्रचेता वरुणः पाशी यादसांपतिरप्पतिः।

(वि.) प्रचेता इति—प्रकृष्टं [1]चेतोऽस्य प्रचेताः। वृणोति पाशैरिति [2]वरुणः। 'वृञ् वरणे'। पाशोऽस्यास्तीति [3]पाशी। [4]यादसां पतिः। अपां पतिः अप्पतिः। उभयत्र षष्ठ्या अलुग्विकल्पः। वरुणनामानि ॥

---

[1] हृदयम् C. [2] वृण्वन्ति वरादीनमुमिति D_1. [3] पाशयोगात् पाशी D_1. [4] जलचराणां C; जलग्राहाणां Y; जलजन्तूनां D_1.

(पा.) प्रचेताः—अप्पतिः। वरुणनामानि। 'अम्बुकान्तारोऽम्बुभूषणः स्यान्मकरवाहनः'। एतानि च॥

श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः॥ ६२॥
पृषदश्वो गन्धवहो गन्धवाहानिलाशुगाः।
समीरमारुतमरुज्जगत्प्राणसमीरणाः॥ ६३॥
नभस्वद्वातपवनपवमानप्रभञ्जनाः।
(प्रकम्पनो महावातो झञ्झावातः सवृष्टिकः॥)

(वि.) श्वसन इति—श्वसन्ति अनेन प्राणिनः श्वसनः। 'श्वस [1]प्राणने'। स्पृशतीति स्पर्शनः। 'स्पृश संस्पर्शने'। वातीति वायुः। 'वा गतिगन्धनयोः'। मातरि आकाशे श्वयति[2] मातरिश्वा[3]। 'टुओश्वि गतिवृद्ध्योः'। सदा गतिः यस्य सदागतिः। [4]पृषदाख्यो मृगोऽश्वो यस्य पृषदश्वः। पृषतां बिन्दूनाम् अश्व इति वा। गन्धस्य वहः गन्धवहः। [5]गन्धं [6]वहतीति वा। 'वह प्रापणे'। अनित्यनेन अनिलः[7]। 'अन प्राणने'। आशु गच्छतीत्याशुगः[8]। समीरतीति[9] समीरः। 'ईर गतौ'। अनेन कुपितेन[10] म्रियते[11] इति मारुतः[12]। मरुच्चैवम्। जगतां प्राणः जगत्प्राणः[13]। सम्यग् ईरयति समीरणः[14]। 'ईर प्रेरणे'। नभोऽस्यास्तीति नभस्वान्[15]। वातीति वातः। 'वा गतिगन्धनयोः'। पवत इति पवनः। 'पूङ् पवने'। पुनीते वा। पवमानश्च। 'पूञ् पवने'। प्रभञ्जयति[16] शाखादिकं प्रभञ्जनः। 'भञ्जो आमर्दने'। प्रकम्पनो महाबलः झञ्झामारुतः सवृष्टिकः[17]। एतानि [18]वायुनामानि॥ ६२–३॥

(पा.) श्वसनः—प्रभञ्जनाः। वायुनामानि। जगदिति तस्यैव नामान्तरं स्यात्। 'जगत् स्याद् विष्टपे क्लीबं वायौ ना जङ्गमे त्रिषु' इति रुद्रः। प्राण इत्यपि नामान्तरं स्यात्। 'हृदि स्थितानिले जीवे बले प्राणः प्रकीर्तितः' इति रुद्रः।

---

[1] निश्वासे B_2, C, W_2. [2] D_1 adds संचरते. [3] नान्तः D_1. [4] पृषत् मृगोऽश्वो वाहनं यस्य C; पृषन्ति जलकणाः अश्वाः यस्य D_1. [5] गन्धयत इति गन्धम् D_1. [6] वाहयति A, K_2, W_2. [7] न विद्यते निलः निलयं स्थानं यस्य C. [8] 'गम्लृ गतौ' D_1, W_1. [9] समीर्ते B_1, W_1. [10] कुपिते K_2, C, W_2. [11] म्रियन्ते D_2, K_1, K_3; D_1 adds लोकः. [12] अनेन जीववर्गा मा रुदन्ति न म्रियन्ते इति C; D_1, I add 'मृङ् प्राणत्यागे'. [13] जगदिति प्राण इति पदच्छेदपक्षे गच्छतीति जगत्, प्राणन्ति अनेन प्राणः D_1. [14] ईरितुं गन्तुं शीलम् अस्य D_1. [15] तत्स्वामित्वाद्वा D_1. [16] प्रभनक्ति U, W_2; B_1, C add मर्दयति. [17] वृष्ट्याकुलश्च W_2, Y. [18] मारुत° B_1, K_5, W_2.

'महाबलः सततगः शरण्युर्मृगवाहनः।
ध्वजप्रहरणो धूलिध्वजः पूश्च प्रकम्पनः॥'

एतानि च॥ ६२-३॥

प्राणोऽपानः समानश्चोदानव्यानौ च वायवः॥ ६४॥
[1]हृदि प्राणो गुदेऽपानः समानो नाभिमण्डले।
उदानः कण्ठदेशे स्याद् व्यानः सर्वशरीरगः॥ ६५॥
शरीरस्था इमे

(वि.) प्राण इति—प्रकर्षेण [2]बहिरानयतीति प्राणः। [3]अधो नयतीति अपानः। सर्वत्र[4] आनयतीति समानः। उद् ऊर्ध्वम् आनयतीति उदानः। [5]विनयतीति व्यानः। 'णीञ् प्रापणे'। प्राणयति अपानयति समानयति उदानयति व्यानयतीति वा यथाक्रमं वक्तव्यः। [6]एते पञ्च क्रमेण हृद्गुदनाभिकण्ठसर्वदेहस्थवायुनामानि॥ ६४–५॥

[1] Verse included in most MSS. [2] बहिरायाति W_2; अनन्ति अनेन D_1; U adds 'णीञ् प्रापणे'. [3] अपानयति B_2, K_3, W_2. [4] मातीति K_3; समम् आनयति B_2, C. [5] विविधेषु जीवात्मानं प्रज्ञामानयतीति C; विशेषेण नयति D_1. [6] एतानि देहस्थितवायुनामानि D_1.

(पा.) प्राणो—शरीरस्था इमे। प्राणादयः पञ्च शरीरवायवः। अनुक्तम्—'झञ्झावातः सवृष्टिः स्यात्'। वृष्टिसहितवायुनाम[1]॥ 'वात्या [वातस्तु मण्डली'। मण्डलाकारवातनाम। आन्ध्रभाषायां 'सुडिघाली'। 'गोगन्धनः पुरोवातः'। पुरोवायुनाम। 'यदुरुगाली'। 'परुषः स्यादिरिङ्गणः'। चण्डवातनाम[2]। 'छिंदुनवटिगालि[3]'। '[4]मूर्ध्नि वातः किंचुलुकः'। उपरिवातनाम। '[5]ईन्दिगालि किंचुलुकमु'। 'मध्यमः स्वेदचूषकः'। [6]समवातः स्वेदचूषकः स्यात्। 'समगालि'॥ ६४—५॥

[1] वातः झंझावातः स्यात् A_1. [2] वातः इरिङ्गणः स्यात् A_1. [3] 'विसरोटि' A_1. [4] मृदुवातः A_1. [5] 'हींदि' B_3. [6] समवायुनाम B_3, B_4.

रंहस्तरसी तु रयः स्यदः।
जवोऽथ शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतम्॥ ६६॥
सत्वरं चपलं तूर्णमविलम्बितमाशु च।

(वि.) रंह इति—रंहति सततं रंहः। 'रहि गतौ'। तरत्यनेन तरः। 'तॄ प्लवनतरणयोः'। उभौ [1]सान्तौ। रयते अनेनेति रयः। 'रय गतौ'। स्यन्दते अनेनेति स्यदः[2]। 'स्यन्दू प्रस्रवणे'। जवते अनेन जवः। 'जुङ् गतौ'। एतानि [3]सवेगगतिनामानि॥ शिङ्घति येन धर्मेण[4] शीघ्रम्। 'शिघि व्याप्तौ'। त्वरते अनेन त्वरितम्[5]। 'ञित्वरा संभ्रमे'। त्वरया सह वर्तत इति सत्वरम्। लङ्घ्यते अनेन लघु। 'लघि [6]गत्याक्षेपे'। क्षिपत्यनेन [7]क्षिप्रम्। 'क्षिप प्रेरणे'। [8]अरम् इत्यव्ययम्। [9]द्रवतीति द्रुतम्। 'द्रु गतौ'। चोपत्यनेनेति चपलम्। 'चुप मन्दायां गतौ'। तुरते इति तूर्णम्[10]। 'तुर त्वरणे'। न विलम्बते ऽस्मात्[11] अविलम्बितम्। 'लबि [12]आलम्बने'। अश्नुते आशु। 'अशू व्याप्तौ'[13]॥ ६६॥

---

[1] एतौ सकारान्तौ नपुंसकलिङ्गौ च D_1; रंहश्च तरश्च रंहस्तरसीति सान्तं पदद्वयम् C. [2] 'स्यदो जवे' (६. ४. २८) इति साधुः B_1, C. [3] °गुणि° D_2. [4] धर्मिणः तत् D_3, W_1. [5] त्वरया सह वर्तते U; त्वरयतीति A. [6] गतौ K_5; C, K_5, Y add भोजननिवृत्तौ च. [7] क्षिप्यते अनेन K_5, W_1; इति क्षिपं, क्षिपमेव क्षिप्रम् C. [8] ऋच्छति अनेन अरम्, 'ऋ गतौ' D_1. [9] U adds अस्मात्. [10] त्वरयति अनेन B_1, C. [11] अस्मिन् C. [12] अवस्रंसने B_1, C, U, W_2; अवि° K_2. [13] वेगमात्रनामानि B_2, D_2; शीघ्र° A.

(पा.) रंहस्तरसी—आशु च। आद्यन्तयोः क्रियावयवयोः सामीप्यनामानि[1]॥ ६६॥

---

[1] B_3 adds जवः—वेगनामानि.

सततानारताश्रान्तसंततविरतानिशम्॥ ६७॥
नित्यानवरताजस्रमप्यथातिशयो भरः।

(वि.) सततमिति—संतन्यते [1]सततम्। संततं च। न विद्यते आरतं विरामो[2] ऽत्रेति अनारतम् अविरतम् अनवरतं च। न श्राम्यन्त्यत्रेति अश्रान्तम्। 'श्रमु तपसि खेदे च'। नास्ति निशा[3] अत्रेति अनिशम्। नियतं भवं[4] नित्यम्। न [5]जस्यतीति अजस्रम्। 'जसु [6]उपक्षये'। [7]अविच्छित्तिनामानि॥ अतिशेते जयत्यनेनेति अतिशयः[8]। भरतीति भरः। 'भृञ् [9]भरणे'॥ ६७॥

---

[1] B_1 adds 'समो वा हिततयोः' (वा. ६. १. १४४); 'तनु विस्तारे' B_2, C. [2] विरतं K_3; अरतं, रज्यते अनेन इति रतम् आसक्तिरित्यर्थः, रतं न भवतीत्यरतं विराम इत्यर्थः C; आ समन्तात् अरतम् आरतम्। आ समन्ताद् विराम इत्यर्थः, विरामो ऽवसानम् C.

[3] B_2, D_2, I, T add विरतिः; विच्छेदकालो° D_1. [4] भवतीति A, C. [5] K_5, W_2 add शिथिलीभवतीति; न विच्छिद्यते D_1. [6] मोक्षणे A, C, K_2. [7] निरन्तर-क्रियानामानि D_1. [8] 'शीङ् स्वप्ने' C, D_2, I. [9] 'भृ भर्त्सने' D_1.

(पा.) सततानारत—अजस्रमपि। क्रियायाः क्रियान्तरेणाऽव्यवधानस्य नामानि ॥ ६७ ॥

अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरम् ॥ ६८ ॥
तीव्रैकान्तनितान्तानि गाढबाढदृढानि च।
क्लीबे शीघ्राद्यसत्त्वे स्यात् त्रिष्वेषां सत्त्वगामि यत् ॥६९॥

(वि.) अतिवेलमिति—[1]वेलामतिक्रान्तम् अतिवेलम्। बिभर्तीति भृशम्। 'भृञ् भरणे'। [2]अर्थमतिक्रान्तम् अत्यर्थम्। [3]मात्रामतिक्रान्तम् अतिमात्रम्। उद्गाहते प्रादुर्भवतीति उद्गाढम्। 'गाहू विलोडने'। निःशेषः सर्वो भरो ऽत्रेति निर्भरम्[4]। तीवतीति तीव्रम्। 'तीव स्थौल्ये'। एकोऽन्तो [5]निश्चितोऽत्र एकान्तम्। नितरां ताम्यतीति नितान्तम्। 'तमु ग्लानौ'। गाहते गाढम्। 'गाहू [6]विलोडने'। बाहते बाढम्। 'बाह प्रयत्ने'। दृंहतीति दृढम्। 'दृहि वृद्धौ'। बृढेति वा पाठः, बृहतीति बृढम्। 'बृह वृद्धौ'। अतिशयनामानि ॥ क्लीबे शीघ्राद्यसत्त्वे स्यात्। [7]शीघ्रादिदृढपर्यन्तशब्दाः [8]असत्त्वे क्रियाविशेषणत्वे गुणवृत्तित्वेऽपि नपुंसकलिङ्गाः। क्रियाविशेषणत्वे यथा—शीघ्रं [9]पचति, सततं गच्छति, क्षिप्रं करोतीत्यादि। गुणवृत्तित्वे यथा—अश्वस्य शीघ्रम्। तूलस्य लघु इत्यादि। अत्रातिशयभरशब्दौ गुणवृत्तित्वे पुंलिङ्गौ। यथा—गन्धस्यातिशयः[10]। पुष्पाणां भर इत्यादि। क्रियाविशेषणत्वे तु शीघ्रादिवन्नपुंसकलिङ्गावेव। यथा—अतिशयं भुङ्क्ते। भरं तिष्ठति इत्यादि। त्रिष्वेषां सत्त्वगामि यत्। एषां शीघ्रादिपदानां मध्ये यत् सत्त्वगामि विशेष्यगामि, तत् त्रिषु लिङ्गेषु भवति। यथा—शीघ्रोऽश्वः[11]। क्षिप्रा जरा[12]। सततं सुखम्। लघुस्तुष इत्यादि ॥ ६८-९ ॥

---

[1] D_1, U add मर्यादां. [2] D_1 adds विषयं; अतिक्रामति C. [3] मात्रं स्तोकं D_1, W_1; मात्रं कात्स्न्यं तदतिक्रामति C. [4] निःशेषेण भरो यस्मिन् तत् D_1; U omits 6 lines. [5] नियतः C; निश्चलः W_2; C adds अवसानं. [6] प्रयत्ने A, C, K_1, K_2. [7] शीघ्रादयो दृढान्ताः A, D_2, K_1, W_1; शीघ्रशब्दादारभ्य दृढशब्दपर्यन्तं ये शब्दा वर्तन्ते ते क्रियाविशेषणानि वा गुणवाचका वा नपुंसकलिङ्गा एव भवन्ति D_1. [8] अव्यये स्युः C; द्रव्यत्वे गुणपरत्वेऽपि पुंलिङ्गम् C. [9] K_1, K_3, K_5, W_1, Y add शीघ्रं भुङ्क्ते [10] Y omits 3 words. [11] W_2 adds शीघ्रा बडवा. [12] स्त्रियः W_1.

(पा.) अथातिशयो—दृढानि च । क्रियावयवसाकल्यनामानि । क्लीबे—सत्त्वगामि यत् । उक्तानामेषां रंहःप्रभृतिशब्दानां मध्ये[1] भावकरणप्रत्ययान्तवर्जितो यः शब्दोऽस्ति स शब्दोऽसत्त्वेऽद्रव्ये वर्तमानो[2] नपुंसकलिङ्गो भवति । यथा—शीघ्रं गच्छति । [3]सततं शेते । अतिमात्रं भुङ्क्ते । सत्त्वगामिद्रव्ये वर्ती सन् त्रिलिङ्गो भवति । यथा—शीघ्रो बाणः । [4]संततो रागः । अतिमात्रो भारः । भावकरणप्रत्ययान्ताः शब्दा उक्तलिङ्गाः । अश्वस्य जवः । हयस्यातिशयः इत्यादि ॥ ६८–९ ॥

[1] A$_1$ adds शीघ्रादिग्रहणेन.　[2] वर्ती स A$_1$.　[3] संततं A$_1$.　[4] सततो B$_3$.

कुबेरस्त्र्यम्बकसखो यक्षराड् गुह्यकेश्वरः ।
मनुष्यधर्मा धनदो राजराजो धनाधिपः ॥ ७० ॥
किंनरेशो वैश्रवणः पौलस्त्यो नरवाहनः ।
यक्षैकपिङ्गैलविलश्रीदपुण्यजनेश्वराः ॥ ७१ ॥

(वि.) कुबेर इति—कुत्सितं[1] बेरं शरीरमस्येति कुबेरः । त्र्यम्बकस्य[2] सखा त्र्यम्बकसखः । यक्षेषु राजत इति यक्षराट् । 'राजृ दीप्तौ' । गुह्यकानाम् ईश्वरः[3] गुह्यकेश्वरः । मनुष्यस्येव [4]धर्मोऽस्येति मनुष्यधर्मा । नान्तः । धनं दयते[5] धनदः । 'देङ् रक्षणे' । धनं ददातीति वा धनदः । 'डुदाञ् दाने' । [6]राज्ञां यक्षाणां राजा राजराजः । धनानाम्[7] अधिपः धनाधिपः । किंनराणाम् ईशः किंनरेशः । [8]विश्रवसोऽपत्यं वैश्रवणः । पुलस्तेरपत्यं पौलस्त्यः । पुलस्त्यस्यापत्यं वा । नरो वाहनमस्य नरवाहनः । यक्षजाति-[9]राजत्वाद् [10]यक्षः । एकं नेत्रं [11]पिङ्गमस्य एकपिङ्गः । इलबिलाया[12] अपत्यम् ऐलबिलः । इडविडा मातास्येति ऐडविडो वा । [13]लडयोरेकत्वस्मरणात् । श्रियं ददातीति श्रीदः । 'डुदाञ् दाने' । [14]पुण्यजनानाम् ईश्वरः पुण्यजनेश्वरः । एतानि कुबेरनामानि ॥ ७०-१ ॥

[1] तस्य देवादिशरीरापेक्षया कुत्सितत्वादिति भावः, कुत्सितं वेरं यस्मात् अन्यस्य सः, अतिसुन्दरशरीरवानित्यर्थः C.　[2] शिवस्य D$_1$.　[3] ईशः A, T.　[4] श्मश्रुलत्वादिः W$_1$; आचारः D$_1$.　[5] रक्षति B$_2$, C; धनेन नन्दयति A, K$_2$, T.　[6] राजन्त इति राजानः यक्षाः B$_2$, C.　[7] धनस्य K$_3$, W$_2$.　[8] विशेषेण शृणोतीति विश्रवाः D$_1$.　[9] K$_5$, W$_2$, Y omit राज.　[10] यक्ष्यते पूज्यते इति, 'यक्ष पूजायाम्' D$_1$.　[11] पिङ्गलवर्णं A, D$_2$, K$_1$, K$_2$, U, W$_2$.　[12] शिवपरिचर्याकारिणी A.　[13] डल(लड I) योरभेदः C.　[14] रक्षसां यक्षाणां वा D$_1$.

(पा.) कुबेरः—वैश्रवणः। विश्रवःशब्दात् 'तस्येदम्' (४. ३. १२०) इत्यणि कृते विश्रवसो विश्रवणरवणाविति प्राप्ते विश्रवणादेशे[1] वृद्धौ वैश्रवण इति रूपं सिद्धम्। पौलस्त्यो—पुण्यजनेश्वराः। कुबेरनामानि। अनुक्तम्—

'कैलासनाथो हर्यक्षो रत्नगर्भः सितोदरः।
इच्छावसुर्निधिपतिस्तथा स्यादेककुण्डलः॥'

एतानि च॥ ७०–१॥

[1] णित्वात् वृद्धौ सत्यां A_1.

अस्योद्यानं चैत्ररथं पुत्रस्तु नलकूबरः।
कैलासः स्थानमलका पूर्विमानं तु पुष्पकम्॥ ७२॥

(वि.) अस्येति—चित्ररथेन [1]गन्धर्वेण निर्मितं [2]चैत्ररथम्। [3]कुबेरोद्याननाम॥ नल इव कूबरः चारुः नलकूबरः। [4]नलस्येव [5]कूबरो रथावयवोऽस्येति वा। कुबेरपुत्रनाम॥ के शिरसि शिवयोः लासो नृत्यं, तदस्यास्तीति कैलासः। केलीनां समूहः कैलं, तेन आस्यते स्थीयत इति कैलासः[6]। 'आस उपवेशने'। केलयोः जलभूम्योः आसनं स्थितिर्यस्य केलसः स्फटिकम्। तस्यायं कैलासः[7]। कुबेरस्थाननाम॥ अलति स्वस्थानं भूषयतीति अलका। 'अल भूषणपर्याप्तिवारणेषु'[8]। कुबेरनगरीनाम॥ पुष्पमिव[9] पुष्पकम्[10]। कुबेरविमाननाम[11]॥ ७२॥

[1] °नामगन्धर्व° U. [2] A, K_2 add वनं. [3] °वन° D_1. [4] C adds महाराजस्य. [5] C adds युगंधरः; नले कमले कूयते कीर्त्यते नलकूः लक्ष्मीः, तया व्रीयते अभिलक्ष्यते नलकूबरः, 'व्रीङ् वरणे', वबयोरभेदः D_1. [6] के शिरसि इलायां लासोऽत्यन्तमस्यास्तीति 'सरूपाणामेकशेष एकविभक्तौ' W_2. [7] W_1 omits 2 lines. [8] °शक्तिवारणवाचकम्। 'अल भूषणे वा' W_2, Y; इति वा धातुः U. [9] एव, स्वार्थे कप्रत्ययः, पुष्पसदृशमित्यर्थः C. [10] पुष्प्यति श्रियमिति U. [11] °पुष्पक° A, B_1, K_2, T.

(पा.) अस्योद्यानं चैत्ररथम्। [1]कुबेरोद्यानवननाम॥ पुत्रस्तु नलकूबरः। तत्पुत्रनाम॥ कैलासः स्थानम्। कुबेरस्थाननाम॥ 'अष्टापदो हराद्रिः स्यात् कैलासो रजताचलः' इत्ययमपि[2]। अलका पूः। तन्नगरनाम॥ विमानं तु पुष्पकम्। तद्विमानं तु पुष्पकं स्यात्॥ ७२॥

[1] उद्यानं चैत्ररथं स्यात् A_1. [2] A_1 adds तत्प्रपञ्च एव.

स्यात् किंनरः किंपुरुषस्तुरंगवदनो मयुः ।
निधिर्ना शेवधिर्भेदाः पद्मशङ्खादयो निधेः ॥ ७३ ॥
महापद्मश्च पद्मश्च शङ्खो मकरकच्छपौ ।
मुकुन्दकुन्दनीलाश्च चर्चाश्च निधयो नव ॥ ७४ ॥

इति श्रीमदमरसिंहकृते नामलिङ्गानुशासने स्वर्गवर्गः

(वि.) स्यादिति—किंचिन्नरः किंनरः । किंचित् पुरुषः किंपुरुषः । कुत्सितो नरो वा । तुरंगस्येव [1]वदनमस्य तुरंगवदनः । मयते विनिमयते[2] मयुः । 'मय गतौ' । एतानि किंनरनामानि ॥ निधीयते[3] अत्रेति निधिः । 'डुधाञ् धारणपोषणयोः' । शेवं स्थाप्यं धनं [4]धीयतेऽत्र शेवधिः[5] । निधिनाम ॥ महांश्चासौ पद्मश्च महापद्मः । पद्यते पद्मः । 'पद्लृ सेवायाम्' । शमयति दुःखं शङ्खः । 'शमु उपशमे[6]' । मकरवद् ग्रहीतुमशक्यत्वात् मकरः । कूर्मवत् स्थितत्वात् कच्छपः । कमनीयत्वात् [7]मुकुन्दः । कुन्दश्च । नितराम् ईड्यते[8] नीलः । 'ईड स्तुतौ' । चर्च्यन्ते चर्चाः । 'चर्च अध्ययने' । एतानि निधिभेदनामानि[9] ॥ ७३–४ ॥

इति श्रीलिङ्गयसूरिविरचितायाममरकोशपदविवृतौ स्वर्गवर्गनामलिङ्गविवेचनम्

(पा.) स्यात् किंनरः—मयुः । किंनरनामानि । 'किमनेन गृहीतेन वागृहीतेन वा किंनरयुगलेन प्रयोजनम्' (काद. पृ. २२८) 'इदमुपश्रुतमश्वमुखद्वयम्' (पृ. २२७) इति कादम्बर्यामभेदः कथितः ।

'बिम्बोष्ठं बहु मनुते तुरंगवक्त्रश्चुम्बन्तं मुखमिह किंनरं प्रियायाः ।
श्लिष्यन्तं मुहुरितरोऽपि तं निजस्त्रीमुत्तुङ्गस्तनभरभङ्गभीरुमध्याम् ॥'

इति माघकाव्ये (४. ३८) भेदः कथितः । अनुक्तम्—'गुह्यकः स्यान्माणिचरः' । गुह्यकनाम ॥ 'यक्षः पुण्यजनः समौ' । यक्षनाम ॥ निधिर्ना शेवधिः । निधिनामानि ॥ 'निधानगर्भामिव सागराम्बराम्' इति रघुवंशे (३. ९) ल्युडन्तनिधानशब्दोऽप्यस्ति । 'मानसेवधिमानसे' इति सेव्यप्रकृतिकसेवधिशब्दोऽप्यस्ति । भेदाः—निधेः । निधिभेदाः ।

---

[1] वदनमिव वदनं B_2, C. [2] नियमयति K_3. [3] नितरां धीयते पुष्यत इति; ना पुंलिङ्ग इत्यर्थः, एतत् काकाक्षिन्यायेन D_1. [4] तन्निधीयते D_2. [5] सेवधिरिति सकारादिरप्यस्ति D_1. [6] उपरमे B_2, D_2, K_2, W_1; उपशमने A. [7] अत्र वर्णव्यतिहारः C. [8] पूज्यते C; डलयोरभेदः C. [9] नवनिधि° D_2, K_1, K_2, K_3, I.

'पद्मोऽस्त्रियां महापद्मः शङ्खो मकरकच्छपौ ।
मुकुन्दकुन्दनीलाश्च [1]खर्वश्च 'निधयो नव ॥'

इति [2]तल्लिङ्गे तत्संख्यायां च [3]हारावलिः ॥ ७३–४ ॥

इति [4]श्रीवत्सनृसिंहसूरिसुतमल्लिनाथसूरिविरचितेऽमरपदपारिजाते स्वर्गवर्गः

[1] वरश्च A_1. [2] B_3 adds तन्नामसु. [3] हारावली B_3, B_4. [4] °नरसिंह° A_1.

---

२. व्योमवर्गः

द्योदिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरम् ।
नभोऽन्तरिक्षं गगनमनन्तं सुरवर्त्म खम् ॥ १ ॥
वियद् विष्णुपदं वा तु पुंस्याकाशविहायसी ।

इति व्योमवर्गः

(वि.) द्योदिवाविति—दीव्यतीति द्यौः । दिवि[1] च । द्वे स्त्रियाम् । न [2]भ्राजते अभ्रम् । 'भ्राजृ दीप्तौ'। विशेषेण अवति अवकाशदानेन व्योम[3] । 'अव रक्षणे'। पुष्णातीति पुष्करम् । 'पुष पुष्टौ'। पुष्कमुदकं रातीति वा पुष्करम् । 'रा दाने'। अम्बते शब्दायते इत्यम्बरम् । 'अबि शब्दे'। मेघैर्न भातीति नभः । 'भा दीप्तौ'। अन्तः ऋक्षाणि यत्र अन्तरिक्षम् । द्यावापृथिव्योरन्तरीक्ष्यत[4] इति वा । 'ईक्ष दर्शने'। गच्छन्त्यत्र खगा इति गगनम्[5] । 'गम्लृ गतौ'। न विद्यतेऽन्तो यस्य तदनन्तम् । सुराणां वर्त्म मार्गः सुरवर्त्म । खन्यते खम्[6] । 'खनु अवदारणे'। वियच्छति न विरमतीति वियत्[7] । 'यम उपरमे'। विष्णोः पदं विष्णुपदम् । आ समन्तात् काशन्ते सूर्यादयोऽत्र आकाशम् । न काशते वा । 'काशृ दीप्तौ'। विजहाति सर्वं विहायः । विहायाश्च । 'ओहाक् त्यागे'। 'ओहाङ् गतौ'[8] ॥ १ ॥

[1] द्यौश्च K_1; द्यौश्च द्यौश्च द्योदिवौ, द्वन्द्वसमासः, ओकारान्तवकारान्तस्त्रीलिङ्गौ B_2, C; इमावोकारान्तवकारान्तौ I; दिवु क्रीडेत्यादि धातुः W_1. [2] अमूर्तत्वात् D_1. [3] विशेषेण एन विष्णुना उ ऊर्ध्वं मीयते आक्रम्यत इति व्योम, 'माङ् माने' C. [4] °ईक्षणं यस्येति A, I, W_1. [5] आद्यन्ताक्षरग्रहणाद् एवं गगमिति भवति । गच्छन्तः खगाः अस्मिन् नीयन्त इति गगनम् । 'गम्लृ गतौ' 'णीञ् प्रापणे' B_2, C. [6] खन्यते ज्ञानं नीरूपत्वात् D_1.

[7] विशब्दः पक्षिवचनः, तेऽस्मिन् यान्तीति वा, 'या प्रापणे' C. [8] इत्याकाशनामानि D_2, I, K_1, W_2; U, Y add—

विहायसोऽपि नाकोऽपि द्युरपि स्यात्तदव्ययम् ।
तारापथोऽन्तरिक्षं[9] च मेघाध्वा च महाबिलम् ॥

[9] शब्दगुणः Y.

इति व्योमवर्गः

(पा.) द्योदिवौ—सुरवर्त्म खम् । अन्तरिक्षमित्यत्र विशेषः । अमरवार्त्तिककारेण वर्णनिर्देशनायां दीर्घेकारान्तरिक्षशब्द इति प्रत्यपादि । अन्तरीक्ष्यते जगदत्रेत्यन्तरीक्षम् । द्यावापृथिव्योरन्तरीक्ष्यत इति वा । वेदे तु ह्रस्वेकारो दृश्यते । तत्रापि छान्दसमेव ह्रस्वत्वमिति । वियद् विष्णुपदं—विहायसी । वैजयन्त्यामदन्तविहायसशब्दः कथितः । 'वायुवर्त्म विहायसम्' इति (पृ. १७, श्लो. १) । आकाशनामानि ॥

'विहायसोऽपि नाकोऽपि द्युरपि स्यात् तदव्ययम् ।
तारापथोऽन्तरीक्षं च मेघद्वारं महाबिलम् ॥'

एतानि च ॥ १ ॥

इति व्योमवर्गः

---

३. दिग्वर्गः

दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः ।
प्राच्यवाचीप्रतीच्यस्ताः पूर्वदक्षिणपश्चिमाः ॥ १ ॥
उत्तरा दिगुदीची स्याद् दिश्यं तु त्रिषु दिग्भवे ।

(वि.) दिश इति—प्राचीयं दक्षिणेयमिति दिश्यते [1]दिक् । दिशत्यवकाशमिति वा । 'दिश अतिसर्जने' । कमुदकं [2]स्कुभ्नातीति ककुप् । 'स्कुभु विस्तारे' । कं वायुं स्कुभ्नातीति वा । काशते काष्ठा । 'काशृ दीप्तौ' । अश्नुते आशा । 'अशू व्याप्तौ संघाते च' । हरन्त्यनया अप्रतीतमिति हरित् । 'हृञ् हरणे' । दिङ्नामानि ॥ प्रागञ्चति सूर्यः प्राची । अवागञ्चति दक्षिणायनेन सूर्य इति अवाची । अपाचीति वा पाठः । प्रति पश्चादञ्चति सूर्यः अस्तमय इति प्रतीची । [3]उत्तरमञ्चति सूर्यः उत्तरायणेनेति उदीची ।

[4]‘अञ्चु गतिपूजनयोः’। एतानि यथाक्रमं पूर्वदक्षिणपश्चिमोत्तरनामानि। इतरदिग्भ्यश्च आद्या[5] पूर्वा। दक्षते वर्धते इति दक्षिणा। ‘दक्ष वृद्धौ शीघ्रार्थे च’। पश्चाद् भवा पश्चिमा। [6]उत्तरति मेर्वादिभूभृत इत्युत्तरा। ‘तॄ प्लवनतरणयोः’॥ दिशि भवं[7] दिश्यम्। एतद् दिग्भवस्य इन्द्रायुधादेर्नाम ॥ १ ॥

[1] शकारान्तस्त्रीलिङ्गः Y. [2] B_2, C add विस्तारयति. [3] उत्तरत्र B_2; उदञ्चति K_5. [4] C adds सर्वत्र. [5] भवतीति K_5; भवन्ती B_1, C. [6] उत्तरति मेर्वादिभूम्य: (भूः U) B_1, C, W_2, Y; भूभृद्भ्यः K_5. [7] अवाग्भवम् अवाचीनम्, उदीच्यां दिशि उत्पन्नम् उदीचीनम्, प्रतीच्यां दिशि उत्पन्नं प्रतीचीनं, प्राच्यां दिशि उत्पन्नं प्राग्भवं, एतानि वाच्यलिङ्गानि C, Y; B_1, C, Y add:

अवाग्भवमवाचीनमुदीचीनमुदग्भवम्।
प्रत्यग्भवं प्रतीचीनं प्राचीनं प्राग्भवं त्रिषु ॥

(पा.) दिशस्तु—त्रिषु दिग्भवे। ता इति लिङ्गानुशासनम्। दिशां नामानि। ‘दिग्दिशाशा ककुब्दीर्णी’ इति वैजयन्ती (पृ. १७, श्लो. २)। हलन्तत्वाद्वैकल्पिकष्टाप्। प्राच्यवाची—पश्चिमाः। एतानि पूर्वदक्षिणपश्चिमदिशामेव नामानि। [1]प्राचीत्युक्ते पूर्वैव। अवाचीत्युक्ते दक्षिणैव। केचिदमुमेव [2]पवर्गमध्यमं पठन्ति ! प्रतीचीति पश्चिमैव। उत्तरा—स्यात्। उदीचीति उत्तरैव। दिश्यं—दिग्भवे। दिग्भवार्थे दिश्यम्। [3]भवार्थे यत्प्रत्ययः ॥ १ ॥

[1] पूर्वेत्युक्ते प्राच्येव A_1. [2] अन्तःस्थमध्यमं B_3. [3] ‘दिगादिभ्यो यत्’ B_1.

इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत् ॥ २ ॥
कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात्।

(वि.) इन्द्र इति—[1]इन्द्रः, वह्निः, पितृपतिः, नैर्ऋतः, वरुणः, मरुत्, कुबेरः, ईश इति क्रमात् पूर्वादीनां दिशां पतयः ॥ २ ॥

[1] Y adds इन्दतीति इन्द्रः, हव्यं वहतीति वह्निः, पितृणां पतिः पितृपतिः, निर्ऋतेः अपत्यं नैर्ऋतः, वृणोतीति पाशैः वरुणः, अनेन कुपितेन म्रियते मरुत्, कुत्सितं बेरं शरीरं यस्य कुबेरः, ईष्टे ईशः इति पूर्वादीनां दिशां क्रमात् पतिनामानि।

(पा.) इन्द्रो वह्निः—दिशां क्रमात्। इन्द्रादयः [1]पूर्वादीनां दिशां विदिशां च क्रमात् पतयः ॥ २ ॥

[1] पूर्वाद्यष्टदिक्पतयः B_3.

ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः ॥ ३ ॥
पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः ।

(वि.) ऐरावत इति—[1]इरा आपः अस्मिन् सन्तीति इरावान् समुद्रः, तस्मिन् जातः ऐरावतः । पुण्डरीकवर्णत्वात् पुण्डरीकः । पुणति शोभत इति वा । ‘पुण कर्मणि शुभे’ । वायुमात्मानं मन्यते [2]वामनः । ‘मन ज्ञाने’ । वामं वल्गु शरीरमस्यास्तीति वा । वामनत्वाद्वा । कुमुदवर्णत्वात् कुमुदः । कुं [3]पृथिवीं मोदयतीति वा । ‘मुद हर्षे’ । अञ्जनाभत्वात्[4] अञ्जनः । अनक्ति गच्छतीति वा । ‘अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु’ । [5]पुष्प्यतीति पुष्पम् । ‘पुष्प विकसने’ । पुष्पवद् दन्तोऽस्यास्तीति पुष्पदन्तः । सर्वभूम्यां विदितः सार्वभौमः । शोभनाः प्रतीकाः अवयवाः यस्य सः सुप्रतीकः । एतानि यथाक्रममष्टदिग्गजनामानि[6] ॥ ३ ॥

[1] इरावति समुद्रे जातः° B₁, K₂, K₅, U, W₁, Y. [2] वाय्वात्मना संमन्यत इति B₂, C. [3] पृथ्वीं K₁, K₅. [4] °वर्णत्वात् B₂, C. [5] C adds विकसतीति [6] °गजानां D₂.

(पा.) ऐरावतः—दिग्गजाः । [1]ऐरावतादयः पूर्वादिक्रमेण दिग्गजाः ॥ ३ ॥

[1] दिग्गजनामानि B₃, B₄.

करिण्योऽभ्रमुकपिलापिङ्गलानुपमाः क्रमात् ॥ ४ ॥
[1]ताम्रपर्णी शुभ्रदन्ती चाङ्गना चाञ्जनावती ।

(वि.) करिण्य इति—अभ्रेषु[2] माति वर्तते अभ्रमुः । ‘मा माने’[3] । न भ्राम्यति [4]स्ववल्लभं हित्वा क्वचित् न भ्रमतीति अभ्रमुः । ‘भ्रमु [5]अनवस्थाने’ । काम्यत[6] इति कपिला । ‘कमु कान्तौ’ । कपिलवर्णत्वाद्वा । पिङ्गलवर्णोऽस्या अस्तीति पिङ्गला । न विद्यते उपमा यस्याः सा अनुपमा । [7]ताम्रपर्णाख्यौषधिसाहचर्यात् ताम्रपर्णी । [8]शोभनौ दन्तौ यस्याः सा शुभ्रदन्ती । शोभनान्यङ्गानि यस्याः सा अङ्गना । [9]अञ्जनाकारो वर्णो यस्याः सा अञ्जनावती । एतानि[10] दिग्गजभार्यानामानि[11] ॥ ४ ॥

[1] ताम्रकर्णीति वा पाठः. [2] अभ्रे स्वर्गे माति च वर्तते च C. [3] K₂, U, Y add वर्तने च. [4] स्वावलम्बं W₂. [5] चलने D₁, K₁, K₃, W₁, Y. [6] कम्यते Y. [7] °वर्ण° U. [8] शोभना दन्ताः A, B₁, T; सुदन्ती D₁, K₁, W₁. [9] अञ्जनमिव C, Y. [10] I, U, W₁, Y add ऐरावतादि°. [11] °पत्नी° B₁, K₅, Y.

(पा.) [1]करिण्यो—चाञ्जनावती। क्रमादैरावतादिदिग्गजाङ्गनानामानि ॥ ४ ॥

[1] ताम्रकर्णीति पाठान्तरम् A_1.

क्लीबाव्ययं त्वपदिशं दिशोर्मध्ये विदिक् स्त्रियाम् ॥ ५ ॥
अभ्यन्तरं त्वन्तरालं चक्रवालं तु मण्डलम् ।

(वि.) क्लीबेति—दिशोरिदम्[1] अपदिशम्। विशिष्टा दिक् विदिक्। दिङ्मध्यनामानि ॥ अन्तरमवकाशम् अभिगतम् अभ्यन्तरम्। अभ्यन्तर्यन्ते बध्यन्ते अश्वादयः अत्रेति अभ्यन्तरम्। अन्तरम् आलाति अन्तरालम्। 'ला आदाने'। अष्टदिगादेरभ्यन्तरनामानि ॥ चक्राकारेण [2]वालते वर्तते चक्रवालम्। 'वाडृ आप्लाव्ये'। डलयोरेकत्वस्मरणात्। मण्डयति भूषयतीति मण्डलम्। 'मडि भूषायां हर्षे च'। दिङ्मण्डलनाम ॥ ५ ॥

[1] अन्तरं B_2; C.   [2] वलते K_3, W_1, Y.

(पा.). क्लीबाव्ययं—विदिक् स्त्रियाम्। दिग्वलयमध्यनामानि। आग्नेय्यादिक्रमेण विदिशां [1]नामान्यपि सन्ति।

'आग्नेयी तु चराशा[2] स्यात् नैर्ऋती तु दिगन्धकी[3]।
मारुत्यनन्ता शार्वी तु शालाक्षाप्यपराजिता ॥'

इति वैजयन्ती (पृ. १७, श्लो. ४–५)। अभ्यन्तरं त्वन्तरालम्। सकलदिङ्मध्यनाम। चक्रवालं तु मण्डलम्। दिक्समूहनाम। अनुक्तम्—'दिग्युग्मं मण्डपीठिः स्यात्'। दिग्युग्मं[4] मण्डपीठिरित्युच्यते। 'दिगन्तः [5]करिशालुकम्'। दिगन्तः करिशालुकमित्युच्यते ॥ ५ ॥

[1] ईशादिनामानि A_1.   [2] ईशान्या A_1; चतुराशा B_3.   [3] दिगान्धकी A_1, B_4.
[4] दिग्युग्मनाम B_3.   [5] करिलोलुकम् B_3.

अभ्रं मेघो वारिवाहः स्तनयित्नुर्बलाहकः ॥ ६ ॥
धाराधरो जलधरस्तडित्वान् वारिदोऽम्बुभृत् ।
घनजीमूतमुदिरजलमुग्धूमयोनयः ॥ ७ ॥

(वि.) अभ्रमिति—अभ्रति गच्छतीत्यभ्रम्। 'अभ्र गतौ'। अपो रातीत्यभ्रम्। 'रा दाने'। न भ्रश्यन्त्यापोऽस्मादिति वा। 'भ्रंशु [1]अवस्रंसने'। मेहतीति मेघः। 'मिह सेचने'। वारि वहतीति वारिवाहः। 'वह प्रापणे'। स्तनयतीति स्तनयित्नुः। 'स्तन [2]देवशब्दे'। बलं न जहातीति बलाहम् उदकम्, तदस्यास्तीति [3]बलाहकः। धाराणां धरो धाराधरः। जलस्य[4] धरो जलधरः। तटितोऽत्र सन्तीति तटित्वान्। वारि ददातीति वारिदः। 'डुदाञ् दाने'। अम्बु बिभर्तीति अम्बुभृत्। 'डुभृञ्[5] धारणपोषणयोः'। वायुना हन्यत इति घनः। 'हन हिंसागत्योः'। जीवनम् उदकं मूयतेऽत्र जीमूतः। 'मूङ् बन्धने'। मोदन्ते येन कृषीवलाः [6]मुदिरः। 'मुद हर्षे'। जलं मुञ्चतीति जलमुक्। 'मुच्लृ मोक्षणे'। धूमो योनिर्यस्य सः धूमयोनिः। एतानि मेघनामानि ॥ ६–७ ॥

---

[1] अधःपतने W_2.

[2] °ध्वन° B_2, U, W_1.

[3] जहातीति हं, हं न भवतीत्यहं, बलस्याहं बलाहं बलवर्धनमित्यर्थः। बलाहं कम् उदकं यस्य सः बलाहकः B_2, C.

[4] जलं धरतीति C.

[5] 'भृञ् भरणे' K_2, K_5, Y.

[6] कृषीवलान् मोदयतीति मुदिरः C.

(पा.) अभ्रं—धूमयोनयः। मेघनामानि। 'नभ्राट् तटित्पतिर्देवो [1]नदनुर्जलपोट्टणः[2]'। एतानि च ॥ ६–७ ॥

---

[1] नदन्युः A_1.

[2] °पोट्टलः इति पाठश्चेत् साधीयान्.

कादम्बिनी मेघमाला त्रिषु मेघभवेऽभ्रियम्।
स्तनितं गर्जितं मेघनिर्घोषो रसितादि च ॥ ८ ॥

(वि.) कादम्बिनीति—कमुदकम् आददत इति कादम्बाः[1] मेघाः, तेऽस्यां सन्तीति कादम्बिनी। कादम्बाः[2] कलहंसाः अस्यां सन्तीति वा। कदम्बाः[3] पुष्प्यन्त्यत्रेति वा। मेघमालानाम ॥ अभ्रे भवम् अभ्रियम्। मेघभवस्योदकादेर्नाम ॥ [4]स्तनयतीति स्तनितम्। 'स्तन गदी देवशब्दे[5]'। गर्जतीति गर्जितम्। 'गर्ज शब्दे'। रसति [6]शब्दायते रसितम्। 'रस शब्दे'। मेघनिर्घोषनामानि ॥ ८ ॥

---

[1] कम् आदत्त इति कादं, जलस्वीकरणमित्यर्थः, तद्वहन्तीति कादम्बाः, वबयोरभेदः B_1, C.

[2] तेषां, नयतीति नं गमनमित्यर्थः, कादम्बनमस्याः अस्तीति कादम्बिनी, 'णीञ् प्रापणे' C.

[3] वृक्षविशेषाः C.

[4] स्तनति A, B_1, K_1, W_1.

[5] °ध्वन° C, I, K_5, W_1, Y.

[6] शब्दयति A.

(पा.) कादम्बिनी मेघमाला। मेघमालानाम। अनुक्तम्—'ऐरावतो राजमेघः' राजमेघनाम ॥ 'मोयिलुयेक्किवञ्चिमेयलु'। अभ्रे[1] भवार्थः अभ्रियं स्यात्[2]। स्तनितं—

रसितादि च। मेघनिर्घोषनामानि। रसितादि चेति चशब्दो व्यभिचारप्रदर्शनार्थः। खरस्य रसितं, पावकस्य ह्रसितम् इत्यादि ॥ ८ ॥

[1] A_1 adds घने. [2] B_4 adds 'समुद्राभ्राद्धः'.

शम्पा शतह्रदाह्रादिन्यैरावत्यः क्षणप्रभा ।
तडित् सौदामिनीविद्युच्चञ्चलाचपला अपि ॥ ९ ॥

(वि.) शम्पेति—कृषीवलानां दुःखं शमयतीति शम्पा। 'शमु [1]उपशमने'। कर्षकाणां शं सुखं [2]पातीति वा। 'पा रक्षणे'। सम्पेति वा [3]पाठः। समन्तात् पातीति सम्पा। सम्यक् पिबति चाक्षुषं तेज इति वा। 'पा पाने'। शतं ह्रादते शतह्रदा[4]। 'ह्राद अव्यक्ते शब्दे'। [5]शतं ह्रदा विद्यन्ते अस्यामिति वा। बडवाज्योतिष्मत्या ह्रादत इति ह्रादिनी। ह्रादुनीति वा पाठः। [6]इरावति मेघे भवा ऐरावती। ऐरावतोऽभ्रनागः, तस्य[7] स्त्री वा। क्षणं प्रभा यस्याः सा क्षणप्रभा। प्रभया नयनानि ताडयतीति तडित्। 'तड आघाते'। [8]सुदामाद्रिणा सह वर्तत इति [9]सौदामिनी। सुदाम्ना अद्रिणा दीव्यतीति सौदामिनी। 'तेनैकदिक्' इति (४. ३. ११२) सादृश्यं व्यज्यते। सुदामवत् दीर्घाकारोऽस्या अस्तीति वा। सौदामनीति वा पाठः। विद्योतत इति विद्युत्। 'द्युत दीप्तौ'। चञ्चतीति चञ्चला। 'चञ्चु गतौ'। चोपतीति चपला। 'चुप मन्दायां गतौ'। चम्पयतीति वा चपला। 'चपि गतौ'। एतानि विद्युन्नामानि ॥ ९ ॥

[1] उपरमे K_1; °शमे U. [2] B_1, C, K_1, U add रक्षति. [3] पाठे I. [4] शतह्रदः समुद्रः विद्यतेऽस्यामिति वा I, K_1, K_2. [5] अपरिमितं C. [6] इरा आपः तद्वन्तः इरावन्तः मेघा इत्यर्थः, तेषु भवतीति B_1, C, D_2, K_3. [7] स तस्यामास्त इति B_2, D_2, K_5. [8] A, T, W_1 add °आख्येन. [9] सौधामिनीति वा पाठः, सुधामवत् कैलासवत् दीर्घाकारोऽस्य B_2, C; एतेन शैलसादृश्यं व्यज्यते B_2.

(पा.) शम्पा—सौदामिनी। 'सौदाम्नी त्वशनिर्विद्युत्' इति त्रिकाण्डशेषः (पृ. ५, श्लो. ८७)। विद्युच्चञ्चलाचपला अपि। विद्युन्नामानि। 'आकालिकी स्याज्जलदा क्षणिकाप्यचिरद्युतिः'। एतानि च ॥ ९ ॥

स्फूर्जथुर्वज्रनिर्घोषो मेघज्योतिरिरंमदः ।
इन्द्रायुधं शक्रधनुस्तदेव ऋजु रोहितम् ॥ १० ॥

(वि.) स्फूर्जथुरिति—स्फूर्जतीति स्फूर्जथुः। 'टुओस्फूर्ज वज्रनिर्घोषे'। वज्रस्य [1]निर्घोषो वज्रनिर्घोषः। वज्रनिर्घात इति वा पाठः। वज्रनिष्पेष इति च[2]। प्रहरद्विद्युच्छब्दनामानि॥ इरया अम्भसा माद्यतीति इरंमदः। 'मदी हर्षग्लपनयोः'। मेघज्योतिर्नाम॥ इन्द्रस्यायुधम् इन्द्रायुधम्। शक्रस्य धनुः[3] शक्रधनुः। [4]मेघप्रतिफलितनानावर्णस्य धनुराकारेण दृश्यमानस्य सूर्यरश्मेर्नामनी॥ रोहतीति रोहितम्। 'रुह बीजजन्मनि प्रादुर्भावे च'। एतस्यैवाजिह्मस्य[5] धनुषो नाम॥ १०॥

---

[1] K_1 adds निर्घुष्यत इति निर्घोषः. [2] 'घुषिर् विशब्दने', 'हन हिंसागत्योः' 'पिष्ऌ संचूर्णने' इति क्रमेण पदत्रयस्यापि धातुत्रयम्। एतानि अशनि(पात Y)नामानि B_2, C. [3] K_1, U, W_1 add इव; एव K_3. [4] प्रतीत° B_2. [5] अदीर्घस्य W_1.

(पा.) स्फूर्जथुर्वज्रनिर्घोषः। प्रहारकविद्युद्ध्वनिनाम। 'श्रुत्वा तु [1]स्फूर्जथुप्रख्यं निनादं परिदेविनी' इति भट्टिः (५. ५३)। मेघज्योतिरिरंमदः। प्रहारकविद्युदग्निनाम॥ अनुक्तम्—'निर्घातः षडिको वज्रः'। प्रहारकविद्युन्नामानि॥ भाषया 'पिडुगु'[2]। इन्द्रायुधं शक्रधनुः। मेघप्रतिफलितनानावर्णस्य धनुराकारेण दृश्यमानस्य सूर्यकिरणस्य नामेति केचित्। कामधनुरिति केचित्[3]। मणिधनुरित्यन्ये[4]। तदेव ऋजु रोहितम्। तदेवावक्रं चेद्रोहितमित्युच्यते। एतस्यैवावक्रस्य धनुषो नाम॥ भाषया 'कोरडु'। 'वक्रमिन्द्रधनुर्ज्ञेयं ऋजु रोहितमिष्यते' इत्युत्पलमाला। अथवा तदेव ऋजुरोहितमित्युच्यते। 'ऋजुरोहितमिच्छन्ति बुधाः शक्रशरासनम्' इति हलायुधः (अ. मा. १. ५७)॥ १०॥

---

[1] विस्फूर्जथु° इति मुद्रितग्रन्थे (प्र. १०२). [2] A_1 adds 'प्रेल्लु'. [3] A_1 adds व्यवहरन्ति. [4] केचित् B_3, B_4.

वृष्टिर्वर्षं तद्विघातेऽवग्राहावग्रहौ समौ।
धारासंपात आसारः शीकरोऽम्बुकणाः स्मृताः॥ ११॥
वर्षोपलस्तु करका मेघच्छन्नेऽह्नि दुर्दिनम्।

(वि.) वृष्टिरिति—वर्षतीति [1]वृष्टिः। वर्षं च। वर्षशब्दः अस्त्री। 'वृषु सेचने'। [2]वर्षनामनी॥ अवगृह्णातीत्यवग्रहः। अवग्राहश्च। 'ग्रह उपादाने'। वर्षप्रतिबन्धकनामानि[3]॥ आ समन्तात् सरतीति आसारः। 'सृ गतौ'। धाराणां संपातः [4]धारासंपातः। धारासंतानस्य[5] नामानि॥ शीकते सिञ्चतीति शीकरः। 'शीकृ सेचने'।

शीतं करोतीति वा शीकरः। 'डुकृञ् करणे'। सीकर इति वा पाठः। अम्बुकणनाम ।। कृणाति[6] सस्यमिति [7]करका। 'कृ हिंसायाम्'। कीर्यते वायुना भुवीति वा। 'कॄ विक्षेपे'। वर्षशिलानाम ।। [8]दुष्टं दिनं दुर्दिनम्। मेघच्छन्नाहोरात्रनाम ।। ११ ।।

[1] वृष्टिशब्दः स्त्रीलिङ्गः D_2, K_3, Y.

[2] वृष्टि° A, T, W_1.

[3] °बन्ध° K_1, W_1.

[4] धरतीति धारा, 'डुधाञ् धारणपोषणयोः'; सम्यक् पततीति संपातः, 'पत्लृ गतौ', धाराणां संपात इति एकं पदं क्वचित् पठन्ति, प्रगल्भवृष्टिनाम B_2, C.

[5] °संपात° K_5, W_2, Y; सन्ततपतनस्य K_3.

[6] हिंसति सर्परक्तपुच्छादिजन्तूनिति B_2, C.

[7] करकशब्दः स्त्रीलिङ्गः पुंलिङ्गश्च Y.

[8] दुरितं A.

(पा.) वृष्टिर्वर्षं। वृष्टिनामनी ।। तद्विघातेऽ—समौ। [1]वर्षप्रतिबन्धनामानि ।। वग्रहावग्रहाविति पाठान्तरम्। धारासंपात आसारः। धारावर्षनाम ।। शीकरोऽम्बुकणाः स्मृताः। वायुवशाद्विशीर्णाम्बुकणाः[2] शीकरः स्यात्। वर्षोपलस्तु करकः। वर्षशिलानाम। [3]घनोपल इति पाठान्तरम्। 'घनोपलस्तु करकः पुञ्जिका [4]मटचीति च' इति वैजयन्ती (पृ. २५, श्लो. ७)। आबन्तकरकाशब्दोऽप्यस्ति। 'वर्षोपले तु करका करकोऽपि च दृश्यते' इति रुद्रः। मेघच्छन्नेऽह्नि दुर्दिनम्। [5]मेघच्छन्नदिननाम। 'दुर्दिनं जलदध्वान्तम्' इति रत्नकोशादयः ।। ११ ।।

[1] A_1 adds 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोरि'त्यनेनाल्लुपो वैकल्पिकः।

[2] °कणनाम B_3.

[3] A_1 adds तस्यैव.

[4] मटती B_3, B_4.

[5] मेघाच्छादितदिवा दुर्दिनं स्यात् A_1.

अन्तर्धा व्यवधा पुंसि त्वन्तर्धिरपवारणम् ।। १२ ।।
अपिधानतिरोधानपिधानाच्छादनानि च।

(वि.) अन्तर्धेति—अन्तर्धीयतेऽनयेति अन्तर्धा। व्यवधीयतेऽनया व्यवधा। अन्तर्धानम् [1]अन्तर्धिः। 'डुधाञ् धारणपोषणयोः'। अपवार्यत इत्यपवारणम्। 'वृञ् [2]वरणे'। अपिदधातीत्यपिधानम्[3]। तिरोदधातीति तिरोधानम्[4]। छादयतीति छादनम्। 'छद अपवारणे'। [5]मेघाद्यैश्चन्द्रादेरन्तर्धाननामानि ।। १२ ।।

[1] अन्तर्धीयतेऽनेनेति° पुंलिङ्गः B_2, C; D_1 omits 2 lines.

[2] संवरणे K_5.

[3] पिदधातीति पिधानम् A, K_1.

[4] W_1 adds 'डुधाञ् धारणपोषणयोः'.

[5] A, B_1, K_3 add °आच्छादित°.

(पा.) अन्तर्धा—छादनानि च। मेघाद्यैश्चन्द्रादे[1]रन्तर्धाननामानि ॥ १२ ॥

[1] सूर्यादेः B_3, B_4.

हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः ॥ १३ ॥
विधुः सुधांशुः शुभ्रांशुरोषधीशो निशापतिः ।
अब्जो जैवातृकः सोमो ग्लौर्मृगाङ्कः कलानिधिः ॥ १४ ॥
द्विजराजः शशधरो नक्षत्रेशः क्षपाकरः ।

(वि.) हिमांशुरिति—हिमा अंशवो यस्य हिमांशुः। चन्द्रेण कर्पूरेण मीयते उपमीयते[1] चन्द्रमाः[2]। 'माङ् माने'। चन्दतीति चन्द्रः 'चदि आह्लादने दीप्तौ च'। मिमीते[3] कालमस्येति परिमाणं करोतीति माः, चन्द्रश्चासौ माश्च चन्द्रमाः। तुषारकिरणैः उनत्ति क्लेदयतीति इन्दुः। 'उन्दी क्लेदने'। कुमुदानां बान्धवः कुमुदबान्धवः। देवा एनं विशेषेण धयन्तीति विधुः। 'धेट् पाने'। सुधारूपा अंशवो यस्य सुधांशुः। शुभ्रा अंशवो यस्य शुभ्रांशुः। ओषधीनाम् ईशः ओषधीशः[4]। निशायाः पतिः [5]निशापतिः। अप्सु जातः [6]अब्जः। ओषधीः जीवयतीति जैवातृकः। 'जीव [7]प्राणधारणे'। [8]सौति अमृतं सोमः। 'षु प्रसवैश्वर्ययोः'। [9]ग्लायतीति ग्लौः। 'ग्लै हर्षक्षये'। मृगः अङ्को यस्य सः मृगाङ्कः। कलानां निधिः कलानिधिः। द्विजानां राजा द्विजराजः। शशस्य धरः [10]शशधरः। नक्षत्राणाम् ईशः नक्षत्रेशः। क्षपां करोतीति क्षपाकरः[11]। [12](रोहिणीशः सुधामूर्तिरात्रेयोऽमृतनिर्गमः। समुद्रनवनीतं[13] च)। एतानि चन्द्रनामानि ॥ १३-१४ ॥

[1] अनुमीयते A, B_1, C, T. [2] सान्तः C. [3] मीयते कालोऽस्येति वा B_1, C, K_5. [4] ओषधीभिः ईष्टे ओषधीशः। 'ईश ऐश्वर्ये'। D_1, I, Y. [5] निशायां स्पष्टीक्रियते इति निशाकर इति च पाठः, 'डुकृञ् करणे' C. [6] जायत इति U; 'जनी प्रादुर्भावे' C. [7] A, K_2, T add प्रीणने च. [8] सूयते B_2, K_5, Y. [9] D_2, I, K_1, Y add श्राम्यति; शाम्यति K_3. [10] शशं धरतीति C, K_3, U. [11] D_1, I add 'डुकृञ् करणे'. [12] D_2, K_2, K_3 add. [13] D_2, K_2, K_3, W_1 add.

(पा.) हिमांशुः—क्षपाकरः। चन्द्रनामानि। अनुक्तम—

'शुचिरोचिः सुधासूतिरात्रेयोऽमृतनिर्गमः।
पुनर्युवा निशाकेतुः प्राचीनस्तिलकः शशी ॥
शशाङ्को रोहिणीकान्तो जलात्मा यज्वनां पतिः।

नक्षत्रनेमिरब्जारिश्चन्दिरः श्रीसहोदरः ।
यथासुखः स्मरसखः समुद्रनवनीतकम् ॥'

एतानि च ॥ १३–१४ ॥

कला तु षोडशो भागो बिम्बोऽस्त्री मण्डलं त्रिषु ॥ १५ ॥
भित्तं शकलखण्डे वा पुंस्यर्धोऽर्धं समेंऽशके ।

(वि.) कलेति—कलयति संख्यातीति कला । 'कल गतौ संख्याने च'। षडधिका दश षोडश, षोडशानां पूरणः षोडशो [1]भागः । चन्द्रस्य षोडशांशस्य[2] नाम ॥ विम्बति विस्तारं प्राप्नोतीति बिम्बः । 'बिम्ब आभोगे'। मण्डति व्याप्नोतीति मण्डलम् । 'मडि भूषायां व्याप्तौ च'। [3]चन्द्रमण्डलनामानि ॥ भिद्यत इति भित्तम् । 'भिदिर् विदारणे'। शक्यते [4]भेत्तुमिति शकलम् । 'शक्लृ शक्तौ'। खण्ड्यत इति खण्डम् । [5]'खडि भेदने'। अर्धति भेदं गच्छतीत्यर्धः । अर्धं च[6] । 'अर्ध गतौ'। शकलनामानि ॥ १५ ॥

---

[1] षोडशांशः U. [2] °भागस्य C. [3] चन्द्रसूर्यादि° B_2, D_2, K_5, U.
[4] भङ्क्तुं K_3. [5] खण्डने भेदने च D_2, W_2. [6] अर्धं समांशकनाम I, K_5, U.

(पा.) कला तु षोडशो भागो । चन्द्रस्य षोडशांशनाम[1] ॥ बिम्बोऽस्त्री मण्डलं त्रिषु । चन्द्रस्य [2]समग्रशरीरनामनी ॥ ते द्वे आदित्यादिनामन्यपि[3] भवतः । 'जलनिधिजलप्रतिबिम्बितरविबिम्बराजताम्बरान्तावलम्बागृहीतार्द्रमांसभारेव बभासे वासरावसानवेला वैताली'। किं च—

'आदित्यवर्मणा[4] साम्यमादित्यः कथमश्नुते ।
विभिन्नमण्डलो [5]वीरैर्भिन्दता रविमण्डलम्[6] ॥' इति ।

भित्तं—पुंस्यर्धः । असमभागनामानि[7] । शकलखण्डे वा पुंसि । शकलं, शकलः । खण्डं, खण्डः । 'वा पुंसीति' अर्धेऽप्यन्वेति । तेन त्रिलिङ्गः । अर्धः कम्बलः, अर्धा शाटी, अर्धं वस्त्रम् । खण्डार्धशब्दौ गुणवचनौ । छेदभङ्गदलादयोऽप्यसमभागार्थकाः । 'बिसकिसलयच्छेदपाथेयवन्तः' (मेघ. १. ११), 'पुष्पोच्चयः पल्लवभङ्गभिन्नः' (कु. सं. ३. ६१) इत्यादि । अर्धं समेंऽशके । [8]नपुंसकलिङ्गाभिधायी अर्धशब्दः समभागार्थः ।

'मातापितृत्वं जगतामाविष्कर्तुमिवेच्छतः ।
अर्धं नारी पुमानर्धं यस्य तस्य पदे पदे[9] ॥' इति ॥ १५ ॥

[1] °अंशः कला स्यात् A_1. [2] सर्व° A_1. [3] A_1 adds °शरीर°. [4] °वर्मणी A_1. [5] °भिण्ड° A_1. [6] °रथि° B_3. [7] A_1 adds तस्योदाहरणम्—‘खण्डे तु कृतशेखर’ इति। अत्र खण्डशब्दो गुणवचनः। न्यासोदाहरणमपि गुणवचनविषयमेव. [8] समभागेऽर्धं नपुंसकमेव B_3. [9] परे वरेति A_1.

चन्द्रिका कौमुदी ज्योत्स्ना प्रसादस्तु प्रसन्नता ॥ १६ ॥
कलङ्काङ्कौ लाञ्छनं च चिह्नं लक्ष्म च लक्षणम् ।

(वि.) चन्द्रिकेति—[1]चन्द्रो नियुक्तोऽत्रास्तीति चन्द्रिका। कुमुदानामियं[2] कौमुदी। ज्योतिरस्या[3] अस्तीति ज्योत्स्ना। चन्द्रप्रकाशनामानि ॥ प्रसीदतीति प्रसादः। ‘षद्लृ विशरणगत्यवसादनेषु’। [4]प्रसन्नस्य भावः प्रसन्नता। नैर्मल्यनामानि ॥ कल्यते ज्ञायतेऽनेनेति कलङ्कः। ‘कल संख्याने’। अङ्क्यते इत्यङ्कः। ‘अकि लक्षणे’। लाञ्छ्यते लक्ष्यतेऽनेनेति लाञ्छनम्। ‘लाच्छि लक्षणे’। चह्यते कल्यत इति चिह्नम्। ‘चह कलने’। लक्ष्यते[5] लक्ष्म। लक्षणं च। ‘लक्ष दर्शनाङ्कनयोः’[6]। चिह्ननामानि ॥ १६ ॥

[1] चन्द्रे नियुक्ता B_2, C; °नित्ययुक्ता D_2, K_1, K_2, K_5; चन्द्रातपेन W_2; चन्द्रादनपेता B_1, C. [2] C adds अब्जविशेषाणाम्. [3] अस्यां B_2, C, I, K_3. [4] तस्य भावः तत्ता W_2. [5] अनेनेति K_5. [6] लक्ष्मेति नान्तः C.

(पा.) चन्द्रिका कौमुदी ज्योत्स्ना। कौमुदीनामानि ॥ ‘चान्द्री चन्द्रातपोऽपि च’। एते च ॥ प्रसादस्तु प्रसन्नता। प्रसादगुणनामनी ॥

‘क्षीरक्षालितचन्द्रेव नीलधौताम्बरेव च।
टङ्कोल्लिखितसूर्येव वसन्तश्रीरदृश्यत’॥ इति।

लाञ्छनं—लक्ष्मणम्। क्षकारमध्यः[1] क्ष्मकारमध्यश्च[1] भवति।

‘लक्षणं नाम्नि चिह्ने च सौमित्रौ[2] चापि लक्षणः[3]।
लक्ष्मणं लाञ्छने नाम्नि रामभ्रातरि लक्ष्मणः ॥’

इति विश्वप्रकाशिका (पृ. ५०, श्लो. ४२)। चिह्ननामानि ॥ १६ ॥

[1] °मध्यं च B_3. [2] सौमित्रे B_3, B_4. [3] लक्ष्मणः A_1.

सुषमा परमा शोभा शोभा कान्तिर्द्युतिश्छविः ॥ १७ ॥
अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम् ।
प्रालेयं मिहिका चाथ हिमानी हिमसंहतिः ॥ १८ ॥

(वि.) सुषमेति—सुष्ठु समा सुषमा । उत्कृष्टशोभानाम । शोभत इति शोभा । 'शुभ शोभने'। 'शुभ शुम्भ शोभार्थे' इति वा धातुः । काम्यते यया कान्तिः । 'कमु कान्तौ'। द्योतत इति द्युतिः । 'द्युत दीप्तौ'। छ्यति नाशयति [1]अन्धकारमिति [2]छविः । 'छो छेदने'। छ्यति अशोभामिति वा । कान्तिमात्रनामानि ॥ अवश्यायतेऽवपततीत्यवश्यायः । 'श्यैङ् गतौ'। [3]नितरां ह्रियतेऽग्निना[4] नीहारः । 'हृञ् हरणे'। तप्तं तोषयतीति [5]तुषारः । 'तुष तुष्टौ'। तोहति[6] पद्ममिति तुहिनम् । 'तुहिर् अर्दने'। हिनोति वर्धत इति हिमम् । 'हि गतौ वृद्धौ च'। तापं हन्तीति वा हिमम् । 'हन हिंसागत्योः'। प्रलयात्[7] शरदन्तादागतं प्रालेयम् । मेहति [8]भुवमिति मिहिका । 'मिह सेचने'। हिमिकेति वा पाठः । हिनोति वर्धते हिमिका । 'हि गतौ वृद्धौ च'। हिमनामानि ॥ [9]हिममहत्त्वं हिमानी, हिमस्य संहतिः । हिमसमूहनाम ॥ १७-१८ ॥

[1] असारं B_1, K_3, W_2, Y. [2] छवयति आशां जनयति असाविति छविः । 'छवि कान्तौ' C; छवति D_2, I, K_5. [3] नितान्तं I, Y. [4] B_2, C add आदिना. [5] तुष्यन्त्यनेन (ओषधिविशेषा इति C) B_1, C, D_1, I, U, W_1, Y. [6] W_2 adds अर्दयति. [7] प्रलये शरदन्ते भवतीति C, U. [8] भुवि B_1, C, D_1, U, Y. [9] महत् हिमं D_1.

(पा.) सुषमा परमा शोभा । [1]अधिकशोभा सुषमा स्यात् । 'राधा शोभा विभूषा स्यादभिख्या सुषमा तथा' इति केषांचिच्छोभामात्रमेवाभिमतम् ॥ शोभा—छविः । शोभानामानि ॥ अवश्यायस्तु—मिहिका च । हिमनामानि ॥ अथ हिमानी हिमसंहतिः । हिमसमूहनाम[2] ॥ १७–१८ ॥

[1] परम° B_3. [2] A_1 adds हिमानीत्यत्र 'इन्द्रवरुण—' इत्यादिनानुगागमः.

शीतं गुणे तद्वदर्थाः सुषिमः शिशिरो जडः ।
तुषारः शीतलः शीतो हिमः सप्तान्यलिङ्गकाः ॥ १९ ॥

(त्रि.) शीतमिति—[1]गुणे जाड्ये शीतं क्लीबे बोध्यम् । श्यायत इति शीतम् । 'श्यैङ् गतौ'। शैत्यगुणनाम ॥ तद्वदर्थाः [2]शीतपर्यायार्थाः अभिधेयवल्लिङ्गाः सप्त । सुष्ठु सिनोति बध्नाति व्यापारमिति सुषिमः । 'षिञ् बन्धने'। सुष्ठु श्यायते [3]सुशीम इति

वा पाठः । 'श्यैङ् गतौ' । शिनोति पद्मशोभाः शिशिर[4]: । 'शिञ् निशातने' । जडतीति जड[5]: । 'जल शून्ये' । डलयोरेकत्वस्मरणात् । तुष्यत्यनेनेति तुषार[6]: । शीतं लातीति शीतलः । 'ला आदाने' । श्यायत इति शीतः । हिनोति वर्धते हिमः । 'हि गतौ वृद्धौ च' । एते अभिधेयलिङ्गाः । [7]शीतवद्द्रव्यनामानि ॥ १९ ॥

[1] शीतं शैत्ये जाड्ये क्लीबे B_2, C. [2] °तद्वन्तः पर्यायाः अर्थाः B_2. [3] सुशिम° A, D_2, K_1; B_1 omits 2 lines. [4] शिनोत्यर्थं श्यायते वा A, W_1. [5] जलति जघन्यं करोति, 'जल जघन्ये' B_2, C, W_2, Y; 'जड मान्द्ये' A. [6] C, D_1 add 'तुष तुष्टौ'. [7] K_5, W_1, Y omit °वद्°.

(पा.) शीतं गुणे । गुण इति स्पर्शविशेषे शीतं नपुंसकम्[1] । देवदत्तस्य शीतं वर्तते । तद्वदर्थाः—सप्तान्यलिङ्गकाः । सुषिमादयः शीतगुणविशिष्टार्थे विशेष्यलिङ्गका भवन्ति । सुषिमशब्दो ह्रस्वेकारः मूर्धन्यमध्यः । दीर्घेकारस्तालव्यमध्य इति केचन पठन्ति । 'शीफरो मेलकः स्थिरः[2]' । एतानि च ॥ १९ ॥

[1] नपुंसकाभिधायी शीतशब्दोऽप्यस्ति A_1. [2] स्थितः A_1.

ध्रुव औत्तानपादिः स्यादगस्त्यः कुम्भसंभवः ।
मैत्रावरुणिरस्यैव लोपामुद्रा सधर्मिणी ॥ २० ॥

(वि.) ध्रुव इति—ध्रुवति स्थिरीभवतीति ध्रुवः । 'ध्रुव गतिस्थैर्ययोः' । उत्तानपादस्यापत्यम् औत्तानपादिः । ध्रुवनामनी ॥ अगं विन्ध्यं गिरिं स्त्यायति स्तम्भयतीति अगस्त्यः । अगस्तिरिति वा पाठः । 'स्त्यै शब्दसंघातयोः' । [1]कुम्भः संभवो यस्य कुम्भसंभवः । मित्रावरुणयोरपत्यं मैत्रावरुणिः । [2]अगस्त्यमुनिनामानि ॥ विरहे [3]सति शुश्रूषालोपेऽमुद्रा[4] न मुदं [5]रातीति लोपामुद्रा[6] । 'रा दाने' । समानो धर्मोऽस्त्यस्याः सधर्मिणी । अगस्त्यभार्यानाम ॥ २० ॥

[1] कुम्भे D_2, K_2, K_3, U, Y. [2] B_2 omits °मुनि°; °ऋषि° W_2. [3] पतिशुश्रूषा° B_1, C, I, K_5, Y. [4] लोपेन A, T. [5] D_1, K_1, K_5, U, W_1 add ददाति. [6] °लोपेन मुन्न भवतीति अमुत्, अमुदम् असन्तोषं (सन्तोषाभावं B_2) रातीति अमुद्रा C.

(पा.) ध्रुवः—स्यात् । ध्रुवनामनी ॥ अगस्त्यः—मैत्रावरुणिः । अगस्त्यनामानि ॥ अगस्तिरित्यप्यस्ति । 'अगस्तिनाध्यासितविन्ध्यशृङ्गम्' इति भट्टिकाव्ये (१२. ७१) । 'और्वशेयः कुम्भयोनिरगस्तिर्विन्ध्यकूटनः[1]' इति वैजयन्ती (पृ. ९५, श्लो. १५१) । अस्यैव—सधर्मिणी । तस्य भार्या लोपामुद्रा स्यात् ॥ २० ॥

[1] °कुट्टनः B_3; °कूटक इति मुद्रितपुस्तके ।

नक्षत्रमृक्षं भं तारा तारकाप्युडु वा स्त्रियाम् ।
दाक्षायण्योऽश्विनीत्यादितारा अश्वयुगश्विनी ॥ २१ ॥

(वि.) नक्षत्रमिति—न [1]क्षरति [2]नक्षत्रम् । ‘क्षर संचलने’। न क्षीयत इति वा। ‘क्षि क्षये’। न क्षदत इति वा नक्षत्रम् । ‘क्षद गतिहिंसनयोः’। नक्षतीति वा। ‘णक्ष गतौ’। ऋक्षति तमो नाशयतीति ऋक्षम्[3] । ‘ऋक्ष हिंसायाम्’। ऋषतीति वा ऋक्षम् । ‘ऋषी गतौ’। भा अस्यास्तीति [4]भम् । तरत्यनयेति तारा । तारैव तारका। ‘तॄ प्लवनतरणयोः’। अवतीत्युडु[5] । ‘अव रक्षणेत्यादि’। नक्षत्रनामानि ॥ दक्षस्यापत्यानि स्त्रियः दाक्षायण्यः । अश्विन्यादिरेवत्यन्तनक्षत्रसाधारणनाम । अश्वा युज्यन्तेऽस्यामिति अश्वयुक्। ‘युजिर् योगे’। अश्ववत्त्वादश्विनी । अश्विनीनक्षत्रनामनी॥२१॥

[1] क्षरति गच्छतीति क्षः नाश इत्यर्थः, क्षो न भवतीति नक्षः, नित्यत्वमित्यर्थः, तत् त्रायते इति नक्षत्रम् । ‘क्षर गतौ’ C. [2] न क्षरति न गच्छति B_1, I, Y. [3] अथवा तमोनाशं कृत्वा रक्षतीति ऋक्षम् । ‘रक्ष पालने’। रेफऋकारयोरभेदः B_2, C. [4] C adds ‘भा दीप्तौ’. [5] उद् डयते गच्छतीति उडु । उडुशब्दः स्त्रीलिङ्गो वा । ‘डीङ् विहायसा गतौ’ C; उडति गच्छतीत्युडु, ‘उड गतौ’ B_2, C, I.

(पा.) नक्षत्रं—स्त्रियाम् । नक्षत्रनामानि ॥ अपिशब्दात् तारकाशब्दः नपुंसकश्च स्यात् । ‘भं नक्षत्रं तारकं तारका च’ इति हलायुधः (अ. मा. १. ५१), ‘तारा भं रात्रिजं धिष्ण्यं सन्नक्षत्रमुडुर्न ना’ इति वैजयन्ती (पृ. २०, श्लो. ३८)। दाक्षायण्यो—ताराः। अश्विन्यादितारा[1] दाक्षायण्य इत्युच्यन्ते। सुभूतिटीकायां तत्क्रमोद्देशः कृतः। अश्विनी, भरणी, कृत्तिकाः षड् बहुषु, रोहिणी, मृगशिरा स्त्रीक्लीबयोः, आर्द्रा, पुनर्वसू द्वौ, पुष्यः, आश्लेषमघाः स्त्रियां बहुत्वे च, पूर्वोत्तरफल्गुन्यौ, हस्तः, चित्रा, स्वातिः स्त्रीपुंसयोः, विशाखे द्वे, अनूराधा, ज्येष्ठा, मूलं नपुंसकम् , पूर्वाषाढा, उत्तराषाढा, श्रवणः पुमान्, धनिष्ठा, शतभिषक् स्त्री, पूर्वभाद्रपदे द्वे, उत्तरभाद्रपदे द्वे, रेवती इति॥ अश्वयुगश्विनी । अश्विनीनक्षत्रनामनी ॥ २१ ॥

[1] °नक्षत्रनाम B_3.

राधा विशाखा पुष्ये तु सिध्यतिष्यौ श्रविष्ठया ।
समा धनिष्ठा स्युः प्रोष्ठपदा भाद्रपदाः स्त्रियः ॥ २२ ॥

(वि.) राधेति—राध्यते पूज्यते राधा। 'राध साध संसिद्धौ'। [1]विशाखति कान्त्येति विशाखा। 'शाखृ व्याप्तौ'। विशाखानक्षत्रनामनी ॥ [2]पुष्णात्यभिलषितमिति पुष्यः। 'पुष पुष्टौ'। सिध्यन्त्यर्था [3]अस्मिन्निति सिध्यः। 'षिधु संराद्धौ'। साध्नोत्यस्मिन्नर्थानिति सिद्धः। 'साध संसिद्धौ'। तुष्यन्त्यस्मिन् तिष्यः। त्वेषते प्रभया वा तिष्यः। 'त्विष दीप्तौ'। पुष्यनक्षत्रनामानि ॥ शुभकर्मणि श्रूयते श्रविष्ठा। 'श्रु श्रवणे'। [4]दधन्ति धनं करोति धनिष्ठा। 'धन धान्ये'। धनिष्ठानामनी ॥ प्रोष्ठे सारे पदे यासां ताः प्रोष्ठपदाः[5]। प्रोष्ठस्येव गोरिव पदे[6] यासां ताः इति वा प्रोष्ठपदाः। [7]भाद्रे सारे पदे यासां ताः भाद्रपदाः। [8]प्रोष्ठपदानामनी ॥ २२ ॥

[1] विशेषेण शाखति व्याप्नोति कान्त्येति B_2, C. [2] W_2 adds अवलम्बिनम्. [3] अनेन B_2, C. [4] दधाति Y; ददाति धनिकं करोति B_2, C, K_5, U, W_2. [5] अथवा प्रोष्ठस्य मत्स्यविशेषस्य पदमिव पदं यस्याः B_2, C. [6] मञ्चस्येव पदानि A. [7] भद्रं मङ्गलमनयोरस्तीति भाद्रे C. [8] C adds भद्राकार°.

(पा.) राधा विशाखा। विशाखयोर्नामनी ॥ 'विशाखयोश्च' इति (१. २. ६२) पाक्षिकैकवचनम्। पुष्ये—तिष्यौ। पुष्यनक्षत्रनामानि ॥ श्रविष्ठया समा धनिष्ठा। धनिष्ठानामनी ॥ स्युः—[1]स्त्रियाम्। भाद्रपदानामनी ॥ समुदायसंख्यापेक्षया बहुवचनम् ॥ २२ ॥

[1] स्त्रियः B_3

मृगशीर्षं मृगशिरस्तस्मिन्नेवाग्रहायणी।
इल्वलास्तच्छिरोदेशे तारका निवसन्ति याः ॥ २३ ॥

(वि.) मृगशीर्षमिति—मृगस्येव शीर्षमस्य मृगशीर्षम्। एवं मृगशिरः। अग्रे हायना नवव्रीहयोऽस्याः सन्तीति आग्रहायणी। हायनस्य[1] वत्सरस्य अग्रमादिः अस्या अस्तीति वा। [2]मृगशिरोनक्षत्रनामानि ॥ शिवबाणेन इल्यन्ते प्रेर्यन्त [3]इति इल्वलाः। 'इल स्वप्नप्रेरणयोः'। इन्वका इति वा पाठः। [4]इल्वका इति वा। 'इल प्रेरणे'। [5]मृगशिरःसमीपस्थतारकानाम[6] ॥ २३ ॥

[1] अग्रे हायनो वत्सरोऽस्या अस्तीति B_1, C, Y. [2] °शिर° K_1. [3] °इति इलः, वलन्ते चलन्तीति वलाः, एवं धातुद्वयेन पदार्थनिर्वाहः। 'वल संचलने' C. [4] तत्पक्षे इलन्ति शिवबाणवत् प्रापयन्तीति इलानि, तानि वहन्तीति वाः, धातुद्वयेन इल्वा इति भवति। इल्वा एव इल्वकाः, क प्रत्ययः, धातुद्वयं च 'इल प्रापणे', 'वह प्रापणे' B_2, C. [5] शीर्ष° B_2, I, K_5, U, W_2. [6] °स्थित° A, K_1, I.

(पा.) मृगशीर्षं—आग्रहायणी। मृगशिरोनक्षत्रनामानि ॥ इल्वलाः—याः। तदिति तच्छब्देन प्रत्यासन्नमृगशिर एव परामृश्यते। तच्छिरोभागे याः स्वल्पतारकाः सन्ति ता इल्वला इत्युच्यन्ते। इन्वका इति पाठोऽप्यस्ति। 'इन्वकास्तच्छिरोदेशे तारका इल्वला [1]अपि' इति वैजयन्ती (पृ. २०, श्लो. ३९)। अनुक्तम्[2]। 'ज्येष्ठा ज्येष्ठघ्नी'। ज्येष्ठानक्षत्रनामनी ॥ 'अथो निष्ट्या स्वातिः'। स्वातीनक्षत्रनामनी ॥ 'आर्द्रा नक्षत्रशाखिनी'। आर्द्रानाम ॥ २३ ॥

[1] मताः B₃, B₄; मुद्रितग्रन्थे च. [2] अनुक्तः पाठः A₁.

बृहस्पतिः सुराचार्यो गीष्पतिर्धिषणो गुरुः।
जीव आङ्गिरसो वाचस्पतिश्चित्रशिखण्डिजः ॥ २४ ॥

(वि.) बृहस्पतिरिति—बृहतां वेदमन्त्राणां[1] पतिः बृहस्पतिः[2]। सुराणामाचार्यः सुराचार्यः। गिरां पतिः गीष्पतिः। गीर्पतिर्वा। धिषणा बुद्धिरस्यास्तीति धिषणः। [3]गृणाति [4]पुरुषार्थान् [5]गुरुः। 'गॄ शब्दे'। जीव्यते मृतोऽनेनेति जीवः। 'जीव प्राणधारणे'। अङ्गिरसोऽपत्यं पुमानाङ्गिरसः। वाचां पतिः वाचस्पतिः। चित्रशिखण्डिनोऽङ्गिरसो [6]जातः चित्रशिखण्डिजः। बृहस्पतिनामानि ॥ २४ ॥

[1] देवमन्त्रिणां W₂. [2] 'बृहि वृद्धौ' C. [3] गृह्णाति B₁, C, W₂; 'ग्रह उपादाने' C, W₂, Y. [4] तत्त्वार्थान् Y. [5] अथवा ग्राहयति शब्दयति गुरुः, गुरुत्वात् सर्वाधिक्यात् गुरुः B₂, C. [6] जायत इति I, K₃, U.

(पा.) बृहस्पतिः—गीष्पतिः। 'अहरादीनां पत्यादिषु [1]वा रेफः' (वा. ८. २. ७०) इति पाक्षिकरेफादेशात् गीर्पतिरपि[2]; धिषणो—चित्रशिखण्डिजः। बृहस्पतेर्नामानि ॥२४॥

[1] उपसंख्यानं कर्तव्यम् B₃. [2] A₁ omits अपि.

शुक्रो दैत्यगुरुः काव्य उशना भार्गवः कविः।
अङ्गारकः कुजो भौमो लोहिताङ्गो महीसुतः ॥ २५ ॥

(वि.) शुक्र इति—[1]शुक्लवर्णत्वात् [2]शुक्रः। [3]शुक्रात् रुद्रद्वारा आगत इति वा। रुद्रस्य स्वशुक्लद्वारेण निर्यातत्वाद्वा। शुचं दुःखं देवेभ्यो [4]रातीति वा शुक्रः। 'रा दाने'। दैत्यानां गुरुः दैत्यगुरुः। कवेरपत्यं पुमान् काव्यः। दैत्येभ्यः [5]पुष्टिं वष्टि[6] कामयते उशना। 'वश कान्तौ[7]'। अयं शब्दः [8]सान्तः। भृगोरपत्यं भार्गवः। कवयति चातुर्येण

वर्णयतीति कविः। ‘[9]कवृ वर्णने’। शुक्रनामानि ॥ [10]अङ्गारवर्णत्वात् अङ्गारकः। अङ्गानि आरयति पीडयतीति वा। ‘आर पीडने’। कोः भूमेर्जातः [11]कुजः। भूमेरपत्यं पुमान् भौमः। [12]लोहितम् अङ्गं यस्य सः लोहिताङ्गः। मह्याः सुतो महीसुतः। [13]मङ्गलनामानि ॥ २५ ॥

---

[1] शुक्र° B_1, C, D_1, W_1.　[2] रलयोरभेदः C.　[3] शुक्लात् रुद्राद्वा D_2.
[4] B_2, C, D_1 add ददाति; ‘रा दाने’ C, I.　[5] श्रेयः D_2, K_2, K_5; हितं U.
[6] B_2, Y omit.　[7] कान्तिरिच्छेत्यर्थः C.　[8] सकारान्तः D_2, K_3.　[9] ‘कुङ् शब्दे’ A, B_1, T.　[10] अङ्गारक° I, Y.　[11] C adds ‘जनी प्रादुर्भावे’.　[12] लोहितान्यङ्गानि C.　[13] °ग्रह° B_2, C, D_1, I, W_2; अङ्गारक° K_3, Y.

(पा.) शुक्रो—कविः। शुक्रनामानि। उशनेत्यत्र ऋदुशनेत्यादिना (७. १. ९४) [1]सौ परे चानङ् स्यादसंबुद्धौ। संबोधने[2] तु उशनसस्त्रिरूपम्। सान्तं, तथा नान्तं, तथाप्यदन्तम्। हे उशनः, हे उशनन्, हे उशन ॥ अङ्गारकः—महीसुतः। अङ्गारकनामानि। ‘वक्रो मङ्गल आरश्च’। एतानि च ॥ २५ ॥

---

[1] सावनङ्ङादशो A_1.　[2] संबुद्धौ B_3, B_4.

रौहिणेयो बुधः सौम्यः समौ सौरिशनैश्चरौ।
तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुंतुदः ॥ २६ ॥

(वि.) रौहिणेय इति—रोहिण्या अपत्यं पुमान् रौहिणेयः। बुध्यत इति बुधः। ‘बुध अवगमने’। सोमस्यापत्यं पुमान् [1]सौम्यः। बुधनामानि ॥ [2]सूर्यस्यापत्यं सौरिः। सौरो वा। शनैः[3] चरतीति शनैश्चरः[4]। ‘चर गतिभक्षणयोः’। [5]शनिनामनी ॥ तम आयुधं यस्य तमः। सान्तनपुंसकलिङ्गम्[6]। सूर्याचन्द्रमसौ [7]तमयतीति वा। ‘तमु ग्लानौ’। रहयति रिक्तीकरोति सूर्याचन्द्रमसौ राहुः। रहयति त्यजति भुक्त्वा चन्द्रार्काविति वा। ‘रह त्यागे’। स्वः [8]अन्तरिक्षे भाति स्वर्भानुः। ‘भा दीप्तौ’। सिंहिकाया अपत्यं सैंहिकेयः। विधुमिन्दुं [9]तुदतीति विधुंतुदः। ‘तुद व्यथने’। ([10]ग्रहकल्लोलः अभ्रपिशाचकश्च)। एतानि [11]राहुनामानि ॥ २६ ॥

---

[1] सुष्ठु मयति जानातीति वा सौम्यः C.　[2] सूरस्य I, W_2.　[3] C adds मन्दं
[4] शनिश्च C; D_2, U add ‘पङ्गुः, क्रोधश्छायासुतः शनिः.　[5] शनैश्चर° A, B_1, K_3; C adds पङ्गुः, खञ्जः, कलयति क्लेशं करोतीति कालः, कलिः कामधेनुः, छायादेव्याः पुत्रः छायापुत्रः, कृष्णवर्णत्वात् असितः.　[6] तमः अकारान्तः पुंलिङ्गश्च D_2, K_1, K_2, W_1.　[7] C adds

ग्लपयति. [8] स्वर्गे B_2, C. [9] K_5, W_1 add व्यथयति. [10] B_1, D_2, K_2, K_5 add the two words. [11] एते शब्दाः केतोरपि वाचकाः C; केतुः शिखीति वाच्यम् K_5.

(पा.) रौहिणेयो—सौम्यः। बुधनामानि ॥ समौ—शनैश्चरौ । ‘[1]शनिमन्दखोडकोणच्छायापुत्रासितक्रोडाः’। एतानि च ॥ तमस्तु—विधुंतुदः । राहोर्नामानि । ‘स एव ग्रहकल्लोलः स एवाभ्रपिशाचकः’। एते च ॥ २६ ॥

[1] शनिमन्दौ पङ्गुकालौ B_3.

सप्तर्षयो मरीच्यत्रिमुखाश्चित्रशिखण्डिनः ।
राशीनामुदयो लग्नं ते तु मेषवृषादयः ॥ २७ ॥

(वि.) सप्तर्षय इति—मरीच्यत्रिमुखाः सप्तर्षयः चित्रशिखण्डिनः स्युः । चित्राः शिखण्डा जटा येषां ते चित्रशिखण्डिनः । के ते ।

> [1]‘मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः ।
> वसिष्ठश्चेति सप्तर्षीनाहुश्चित्रशिखण्डिनः ॥’

इति सप्तर्षिनामानि ॥ [2]राति ददाति [3]कल्यादिफलमिति राशिः । तेषामुदयो लग्नमित्युच्यते । लगति ग्रहैः संबध्नाति लग्नम् । ‘लगि सङ्गे’। राशयः मेषवृषादयः ॥ २७ ॥

[1] मरीचिरङ्गिरा अत्रिः °ज्ञेयाश्चित्रशिखण्डिनः B_2, W_2, Y. [2] रान्ति ददति इति राः कालविशेषाः, तान् शमयन्तीति राशयः । ‘रा दाने’ ‘शम उपशमे’ B_2, C. [3] कल्याणादिसकलं K_3; कालादि° B_1, D_1, K_5, W_2, Y.

(पा.) सप्तर्षयो—चित्रशिखण्डिनः । मरीच्यत्रिप्रमुखाः[1] समुदायोक्त्या चित्रशिखण्डिनः । राशीनामुदयो लग्नम् । राशीनामुदयनाम[2] ॥ ते तु मेषवृषादयः । ते त्विति राशयो मेषवृषभमिथुनकर्कटकसिंहकन्यातुलावृश्चिकधनुर्मकरकुम्भमीना इति द्वादश । एते सर्वे तत्तत्पर्यायनामलिङ्गभाजः ॥ २७ ॥

[1] A_1 adds पुलस्त्य°. [2] लग्नमित्युच्यते A_1.

सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः ।
भास्कराहस्करब्रध्नप्रभाकरविभाकराः ॥ २८ ॥
भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः ।

विकर्तनार्कमार्तण्डमिहिरारुणपूषणः ॥ २९ ॥
द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचनः ।
विभावसुर्ग्रहपतिस्त्विषांपतिरहर्पतिः ॥ ३० ॥
भानुर्हंसः सहस्रांशुस्तपनः सविता रविः ।
*(पद्माक्षस्तेजसांराशिश्छायानाथस्तमिस्रहा ।
कर्मसाक्षी जगच्चक्षुर्लोकबन्धुस्त्रयीतनुः ॥
प्रद्योतनो दिनमणिः खद्योतो लोकबान्धवः ।
इनो भगो धामनिधिश्चांशुमाल्यब्जिनीपतिः ॥)

(वि.) सूरेति—सुवति कर्मणि सूरः । सूर्यश्च । 'षू प्रेरणे' । इयर्ति ऋच्छति[1] इति अर्यमा । 'ऋ गतौ' । अदितेरपत्यं पुमानादित्यः । द्वादश आत्मानो यस्य द्वादशात्मा । दिवा अहनि प्राणिनः चेष्टावतः करोतीति दिवाकरः[2] । भासं करोतीति भास्करः । अहः करोतीति अहस्करः[3] । अन्यतेजो बध्नाति प्रतिबध्नाति ब्रध्नः[4] । 'बन्ध बन्धने' । प्रभां करोतीति प्रभाकरः । विभां करोतीति विभाकरः । भासः सन्त्यस्य भास्वान् । विवस्ते प्रभया छादयतीति [5]विवस्वान् । 'वस आच्छादने' । विवः [6]तेजोऽस्यास्तीति वा विवस्वान् । सप्त अश्वा यस्य सः सप्ताश्वः । हरितः[7] अश्वा यस्य सः हरिदश्वः । उष्णा रश्मयो यस्य उष्णरश्मिः । तमः विकृन्ततीति विकर्तनः । 'कृती छेदने' । अर्क्यते[8] वालखिल्यादिभिरिति अर्कः । 'अर्क स्तवने' । अर्च्यते वा अर्कः । 'अर्च पूजायाम्' । अर्च्यते सेव्यते [9]वा । 'अर्च सेवायाम्' । मृतण्डस्यापत्यं मार्तण्डः । मृतमण्डं ब्रह्माण्डं जीवयतीति वा मार्ताण्डः । मेहति वर्षति मिहिरः । 'मिह सेचने' । इयर्तीति अरुणः । 'ऋ गतौ' । पुष्णातीति पूषा[10] । 'पुष पुष्टौ' । [11]दिवि मणिः द्युमणिः । तरति[12] नभः तरणिः । 'तॄ प्लवनतरणयोः' । मेद्यति स्निह्यतीति मित्रः । 'ञिमिदा स्नेहने' । सर्वस्य मित्रत्वाद्वा । चित्रा भानवो यस्य चित्रभानुः । विरोचते विरोचनः । 'रुच दीप्तावभिप्रीतौ च' । विभैव [13]वसु यस्य सः विभावसुः । ग्रहाणां पतिः ग्रहपतिः । त्विषां पतिः त्विषांपतिः । अह्नः पतिः अहर्पतिः, अहःपतिः । भातीति भानुः । 'भा दीप्तौ' । तमो हन्तीति हंसः । 'हन हिंसागत्योः' । सहस्रम् अंशवो यस्य सः सहस्रांशुः । तपतीति तपनः । 'तप संतापे' । सुवति सुप्तं सविता । 'षू प्रेरणे' । रूयते [14]श्रूयते रविः । 'रु शब्दे' । एतानि सूर्यनामानि ॥ २८–३० ॥

* Found in I, K_2, K_5: कर्मणः साक्षी कर्मसाक्षी । जगतां चक्षुः जगच्चक्षुः । अंशूनां माला अस्यास्तीति अंशुमाली । प्रद्योतयतीति प्रद्योतनः । 'द्युत दीप्तौ' । दिनस्य मणिः दिनमणिः ।

खे द्योतत इति खद्योतः। लोकानां बान्धवो लोकबान्धवः। सुरेषु उत्तमः। धाम्नां निधिः धामनिधिः। पद्मिनीनां वल्लभः पद्मिनीवल्लभः। तमो हरतीति हरिः। 'हृञ् हरणे' I.

---

[1] C, K_5, U, W_2 add गच्छति. [2] 'डुकृञ् करणे' C. [3] अह्नि प्राणिनः चेष्टावतः करोतीति अहस्करः, धातुः पूर्ववत् C. [4] अस्य तेजोभिः मृत्काष्ठादिकं बध्नाति दृढीकरोतीति C. [5] विवस्ते (प्रभया B_2) आच्छादयतीति विवाः, सान्तः, तत् किम्, कान्तिः। सा अस्यास्तीति B_2, C. [6] भाः D_2, K_3. [7] B_2, C add श्यामाः. [8] स्तूयते B_2, C. [9] Y adds वालखिल्यादिभिः. [10] नान्तः C. [11] दिवः C, W_2. [12] C adds विस्तारयति. [13] वसुः K_1; B_2, C add धनं. [14] स्तूयते U, Y.

(पा.) सूर—विभाकराः। भास्कराहस्करेत्यत्र 'कस्कादिषु' (८. ३. ४८) इति पाक्षिकसादेशात् भाःकराहःकरौ इत्यपि भवतः। भास्वत्—रविः। [1]आदित्यनामानि॥ 'वारुणीवारुणीभूतसौरभा सौरभास्पदम्' इति दण्ड्यलंकारयमकपाठात् (३. १८) सूरशब्दो दन्त्यादिः। 'मार्ताण्डः सविता भानुरिनः[2] पूषा दिनप्रणीः' इति वैजयन्तीपाठात् (पृ. १७, श्लो. १०) मार्ताण्डशब्दो दीर्घमध्यमः। 'तर्पुमार्तण्डमुण्डीर[3]पाथिपेरु[4]गभस्तयः' इति वैजयन्तीपाठात् (पृ. १८, श्लो. १३) मार्तण्डशब्दो ह्रस्वमध्य इति केचित्। 'कुमुदाकारा इवासोढशूरभासः स्थिता राजपुत्राः' इति वासवदत्ताश्लेषात् शूरशब्दस्तालव्यादिः।

'कर्मसाक्षी जगच्चक्षुरंशुमाली त्रयीतनुः।
प्रद्योतनो दिनमणिः खद्योतो लोकबान्धवः॥
सुरोत्तमो धामनिधिः पद्मिनीवल्लभश्च सः।
पद्मबन्धुरशीतांशुर्मार्तण्डो जलतस्करः॥
रश्मिमाली दृगध्यक्षः॥' एतानि च॥ २८-३०॥

---

[1] सूर्य° B_3. [2] भानुरिति मुद्रितग्रन्थे [3] °पाथः B_4. [4] °फेरु° A_4.

माठरः पिङ्गलो दण्डश्चण्डांशोः पारिपार्श्वकाः॥ ३१॥
सूरसूतोऽरुणोऽनूरुः काश्यपिर्गरुडाग्रजः।
परिवेषस्तु परिधिरुपसूर्यकमण्डले॥ ३२॥

(वि.) माठर इति—चण्डांशोः सूर्यस्य[1] परिवर्तमानाः यमाग्नीन्द्राः क्रमेण माठरः पिङ्गलः दण्ड इत्युच्यन्ते[2]। मठरस्यापत्यं पुमान् माठरः। मन्यते वा। 'मन ज्ञाने'। पिङ्गलवर्णत्वात् पिङ्गलः। दण्डोऽस्यास्तीति दण्डः। पारिपार्श्वगा इति वा पाठः। परितः पार्श्वे वर्तन्त इति पारिपार्श्वकाः[3]। सूरस्य[4] सूतः सूरसूतः। [5]अरुणवर्णोऽस्यास्तीति

अरुणः। न विद्येते ऊरू यस्य सः अनूरुः। कश्यपस्यापत्यं पुमान् काश्यपिः। काश्यप इति वा पाठः। गरुडस्याग्रजो गरुडाग्रजः। सूर्यसारथिनामानि॥ परितो विष्यतेऽनेन परिवेषः[6]। ‘विष्लृ व्याप्तौ’। परितो धीयतेऽनेन परिधिः। ‘धि[7] धारणे’। परिवेषनामनी॥ समीपे सूर्यस्य [8]प्रतिकृतिः उपसूर्यकम्। मण्ड्यतेऽनेन मण्डलम्। ‘मडि भूषायां व्याप्तौ च’। प्रतिसूर्यनामानि। चत्वार्यपि [9]नामानि परिवेषस्यैवेति केचित्॥ ३१–२॥

[1] B_1, D_1, K_5, U, W_2, Y add पार्श्वे. [2] एते शब्दाः व्याख्यायन्ते B_2, D_2. [3] पारिपार्श्विका इति वा पाठः K_5. [4] सूर्यस्य D_1, K_1, W_2. [5] अरुणवर्णत्वात् W_2. [6] C ends here. [7] ‘डुधाञ् धारणपोषणयोः’ W_1. [8] प्रतिकृतिरूपं °सूर्यमण्डलम् B_2, U, K_5. [9] B_2, K_1 omit नामानि.

(पा.) माठरः—पारिपार्श्विकाः। रथरक्षणार्थमादित्यस्य [1]पार्श्वे स्थितदेवतानामानि॥ सूरसूतो—गरुडाग्रजः। काश्यप[2] इति पाठान्तरम्। अनूरुनामानि॥ परिवेषस्तु—मण्डले। परिवेषनामानि॥ अत्र चतुर्णां मध्ये प्रथमे द्वे परिवेषनामनी, उत्तरे द्वे प्रतिसूर्यनामनी इति केचित्। परिवेषशब्दो मूर्धन्यस्तालव्यश्च[3]।

‘[4]परिवेशं विजानीयादुपसूर्यकमण्डले।
परिवेष्टनमप्याहुः परिवेषं मनीषिणः॥’

इति शाश्वतः (पृ. ११, श्लो. ११८)॥ ३१–२॥

[1] परिपार्श्वे A_1. [2] B adds गरुडाग्रजः. [3] A_1 adds भवति. [4] परिवेषमिति मुद्रितग्रन्थे.

किरणोस्रमयूखांशुगभस्तिघृणिपृश्नयः।
भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियाम्॥ ३३॥

(वि.) किरणेति—तमः कृणातीति किरणः। ‘कॄ हिंसायाम्’। आपो वसन्त्यत्र उस्रः। ‘वस निवासे’। [1]मिनोति [2]अवक्षिपति तम इति मयूखः। ‘डुमिञ् प्रक्षेपणे’। अश्नुते अंशुः। ‘अशू व्याप्तौ’। गां [3]दिशं बभस्ति दीपयति गभस्तिः। ‘भस भर्त्सनदीप्त्योः’। जिघर्ति [4]हरति जलमिति घृणिः। ‘घृ क्षरणदीप्त्योः’। दीप्यत इति वा। स्पृशतीति[5] पृश्निः। वृष्टिरिति पाठपक्षे वर्षतीति वृष्टिः। वृष्णिरिति पाठपक्षे वर्षति क्ष्मामिति वृष्णिः। ‘वृष सेचने’। घृष्यत इति [6]घृष्णिः। ‘घृष [7]संघर्षे’। इति बहवः पाठाः [8]अवधारणीयाः। भातीति भानुः। ‘भा दीप्तौ’। तमः कृणातीति करः। ‘कॄ हिंसायाम्’। भुवि कीर्यते वा। ‘कॄ विक्षेपे’। तमो म्रियतेऽनेन [9]मरीचिः। स्त्रीपुंसयोः। [10]दीधीते दीप्यते दीधितिः। ‘दीधीङ् दीप्तिदेवनयोः’। रश्मिनामानि॥ ३३॥

[1] D_1 adds दीप्त्या. [2] अधः क्षिपति K_3. [3] भुवं B_2, D_1, I, K_5, W_2. [4] दीपयति B_2, K_5, Y. [5] B_1, K_5 add क्ष्माम्. [6] घृष्टिः A, B_1, K_5, W_1. [7] संघर्षणे U. [8] आदरणीयाः D_2, I, K_3, W_1. [9] मरीची B_1; D_1, I, U add 'मृङ् प्राणत्यागे'. [10] दीधीयते दीप्यतेऽनेन K_5, U.

(पा.) किरणोस्र—स्त्रियाम् । किरणनामानि ॥ ३३ ॥

स्युः प्रभारुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तयः ।
रोचिः शोचिरुभे क्लीबे प्रकाशो द्योत आतपः ॥ ३४ ॥

(वि.) स्युरिति—प्रभातीति प्रभा[1]। रोचते रुक् । रुचिश्च । 'रुच दीप्तौ'। त्वेषते[2] त्विट् । 'त्विष दीप्तौ'। भाति भा[3]। 'भा दीप्तौ'। भासते भाः[4]। सकारान्तः। 'भासृ दीप्तौ'। [5]छविरुक्ता। द्युतिश्च। दीप्यत इति दीप्तिः। 'दीपी दीप्तौ'। रोचत इति रोचिः। रुचिश्च[6]। शुच्यते शोचिः। 'शुचिर् पूतीभावे'। उभे क्लीबे। दीप्तिनामानि ॥ [7]प्रकाशते प्रकाशः। 'काशृ दीप्तौ'। द्योतते द्योतः। 'द्युत दीप्तौ'। आ समन्तात् तपति इत्यातपः। 'तप संतापे'। आतपनामानि ॥ किरणादीनि आतपान्तानि नामानि [8]रश्मीनामेवेति केचित् ॥ ३४ ॥

[1] D_1, I add 'भा दीप्तौ'. [2] यया A, B_1, I, K_2. [3] आकारान्तस्त्रीलिङ्गः B_2. [4] स्त्रीलिङ्गः Y. [5] छ्यति नाशयत्यसारं छविः, 'छो छेदने'; द्योतत इति द्युतिः, 'द्युत दीप्तौ' Y. [6] 'रुच दीप्तौ' B_2, D_1, K_3, W_1, Y. [7] प्रकर्षेण काशते B_2. [8] रश्मिनामानीति B_2, I, K_5, W_1, Y.

(पा.) स्युः प्रभा—दीप्तयः ।

'जृम्भारम्भप्रविततदलोपान्तजालप्रविष्टै-
र्भाभिर्भानोर्नृपतय इव स्पृश्यमाना विबुद्धाः[1]।'

इति वेणीसंहारे (२. ७) भाःशब्दस्य पुंस्त्वं दृष्टम् । रोचिः—आतपः। प्रकाशनामानि। 'भल्यातिपालिकाकलिकलशिवेशित्विषि[2] वासेः' (?) इत्यरुणदत्तलिङ्गानुशासने त्विषिशब्दो दृष्टः। 'इन्दुं विनान्यस्य न [3]विद्यते द्युत्' इति धर्मशर्माभ्युदये (१. १६) द्युत्शब्दो दृष्टः ॥ ३४ ॥

[1] विबुद्धैः B_3. [2] °कलशीवेशी° B_3. [3] दृश्यते इति मुद्रितग्रन्थे.

कोष्णं कवोष्णं मन्दोष्णं कदुष्णं त्रिषु तद्वति ।
तिग्मं तीक्ष्णं खरं तद्वन्मृगतृष्णा मरीचिका ॥ ३५ ॥

इति दिग्वर्गः

(वि.) कोष्णमिति—किंचिद् उष्णं कोष्णम् । ईषदुष्णं कवोष्णम् । मन्दं च तदुष्णं च मन्दोष्णम् । [1]किंचिदुष्णं कदुष्णम् । ईषदुष्णनामानि ॥ एषां धर्ममात्रे क्लीबत्वम् । [2]धर्मिवृत्तित्वे अभिधेयलिङ्गत्वम् । तेजयतीति तिग्मम् । 'तिज निशातने'[3] । तीक्ष्णं च । खनतीति खरम् । 'खनु अवदारणे' । खुरमिति वा पाठः । खुरतीति खुरम् । 'खुर [4]छेदने' । अत्युष्णनामानि[5] ॥ मृगाणां तृष्णास्ति[6] अस्यामिति मृगतृष्णिका । म्रियन्ते मृगा अनयेति मरीचिका । 'मृङ् प्राणत्यागे' । जलवत्प्रतीयमानसूर्यरश्मिनामनी ॥ ३५ ॥

इति श्रीलिङ्गयसूरिविरचितायाममरकोशपदविवृतौ दिग्वर्गविवृतिः

[1] मनागुष्णम् B_1, K_5, Y. [2] धर्मिणि त्रिलिङ्गत्वम् B_2, K_5, U, Y. [3] D_1 adds क्षमायां च. [4] भेदने A, B_1, T, K_1. [5] तद्वदिति धर्मे क्लीबत्वं, धर्मिणि त्रिलिङ्गत्वम् I, U, W_2. [6] B_2, D_2, I, K_1, K_2, K_5 omit अस्त्यस्यामिति.

(पा.) कोष्णं—तद्वति । [1]कोष्णादयोऽल्पोष्णवाचकाः, ते गुणे [2]नपुंसकलिङ्गाः गुणिनि तु [3]त्रिलिङ्गा भवन्ति । तिग्मं—तद्वत् । तिग्मादयोऽत्युष्णवाचकाः तद्वदिति कोष्णादय इव गुणे नपुंसकलिङ्गाः गुणिनि त्रिलिङ्गा भवन्ति ॥ मृगतृष्णा मरीचिका । सलिलवत्प्रतीयमानरविकिरणनामनी । आन्ध्रभाषायां 'यंडमावुलु' ॥ ३५ ॥

इति श्रीवत्सनृसिंहसूरिसुतमल्लिनाथ[4]विरचितेऽमरपदपारिजाते दिग्वर्गः

[1] एतान्यल्पोष्णनामानि B_3, B_4. [2] नपुंसकानि B_3. [3] त्रिलिङ्गानि B_3. [4] मल्लिकार्जुन A_1.

---

४. कालवर्गः

कालो दिष्टोऽप्यनेहापि समयोऽप्यथ पक्षतिः ।
प्रतिपद् द्वे इमे स्त्रीत्वे तदाद्यास्तिथयो द्वयोः ॥ १ ॥

(वि.) काल इति—[1]कल्यते संख्यायते कालः । 'कल संख्याने[2]' । [3]कलयति प्रेरयति वा कालः । 'कल किल क्षेपे' । दिश्यते दिष्टः । 'दिश अतिसर्जने' । न ईहत इति अनेहा[4] । 'ईह चेष्टायाम्' । न हन्यते वा । सान्तः [5]पुमान् । [6]कर्मणि समेति समयः । 'इण् गतौ' । कालनामानि ॥ पक्षस्य मूलं प्रारम्भदिनं पक्षतिः । प्रतिपद्यते उपक्रम्यतेऽनया प्रतिपत् । '[7]पद गतौ' । पक्षप्रथमदिवसनामनी ॥ तन्यते [8]षष्टिघटिकादिभिरिति तिथिः । 'तनु विस्तारे' । प्रतिपत्प्रभृति पञ्चदशीपर्यन्ततिथिनामानि[9] ॥ १ ॥

[1] काल्यते B$_2$, U. [2] A, B$_1$, T add शिल्पिसंज्ञयोः [3] कालयति K$_1$. [4] ईहत इति ईहा, ईहा न भवतीति नेहा, नेहा न भवतीति अनेहा; ईषदपि हन्यते ईहा, ईहा न भवतीति अनेहा, द्वयोर्नञोः प्रकृतार्थप्रतिपादकत्वेन हन्यमान इत्यर्थः B$_2$. [5] पुंलिङ्गः U. [6] कर्मणा I, U. [7] पद्ऌ A, Y. [8] °घटिकाभिः K$_1$, W$_2$, Y. [9] °पर्यन्तं दिवसनामानि B$_2$, K$_5$, W$_2$.

(पा.) कालो—समयोऽपि । कालनामानि । [1]अनेहेत्यादन्तं पदम् । अन्यत्र अनेहसौ अनेहसः । हे अनेहः इत्यादि ॥ अथ पक्षतिः—स्त्रीत्वे । प्रतिपन्नामनी ॥ तदाद्यास्तिथयो द्वयोः । आद्यशब्देन पक्षत्यादीनामेव ग्रहणम् । ताश्च[2] पञ्चदशतिथिशब्दवाच्याः । स तिथिशब्दोऽपि स्त्रीपुंसलिङ्गः ॥ १ ॥

[1] A$_1$ adds अनेहेत्यत्र 'ऋदुशन—' (७. १. ९४) इत्यादिनानङादेशोऽसंबुद्धौ.
[2] A$_1$ adds पक्षत्यादयः.

घस्रो दिनाहनी वा तु क्लीबे दिवसवासरौ ।
प्रत्यूषोऽहर्मुखं कल्यमुषःप्रत्युषसी अपि ॥ २ ॥
व्युष्टं विभातं द्वे क्लीबे पुंसि गोसर्ग इष्यते ।
प्रभातं च दिनान्ते तु सायः संध्या पितृप्रसूः ॥ ३ ॥

(वि.) घस्र इति—तमो घसतीति[1] घस्रः । 'घस्ऌ अदने' । तमो द्यतीति दिनम् । 'दो अवखण्डने' । सूर्येण न हीयते अहः । 'ओहाक् त्यागे' । दीव्यन्ति देवा[2] अस्मिन्निति दिवसः । 'दिवु क्रीडादौ' । वसन्ति व्यवहर्तारः अस्मिन्निति वासरः । 'वस निवासे' । [3]दिवसनामानि ॥ प्रत्यूषति निशामिति प्रत्यूषः । 'ऊष रुजायाम्' । अह्नो मुखम् अहर्मुखम् । कलयति मङ्गलं कल्यम् । 'कल संख्याने' । काले[4] साधु काल्यम् इति वा पाठः । ओषत्यन्धकारमिति[5] उषः । प्रत्युषश्च । 'उष प्लुष दाहे' । [6]भातुं प्रवृत्तं प्रभातम् । 'भा दीप्तौ' । सूर्योदयात् प्राक् घटिकाचतुष्टयात्मकस्य कालस्य नामानि ॥

दिनं स्यतीति [7] सायः। 'षोऽन्तकर्मणि'। दिनस्य पश्चाद्भागे मुहूर्तत्रयात्मककालनाम ॥ सम्यग् ध्यायन्त्यत्रेति[8] संध्या। 'ध्यै चिन्तायाम्'। अहोरात्रसंधौ भवा वा। पितॄणां प्रसूः माता पितृप्रसूः। दिनान्तादुपरि घटिकात्रयात्मकस्य[9] सूर्योदयात् प्राक् पञ्चघटिकात्मकस्य च कालस्य नामानि ॥ २–३ ॥

---

[1] B$_2$ adds व्यथयति. [2] देहाः D$_2$. [3] दिन° K$_3$. [4] कालेन साम्यं W$_2$. [5] B$_1$, K$_5$, W$_2$, Y add उपरमयति. [6] प्रभातुं W$_1$. [7] B$_1$ adds समापयति; दिनम् अन्तयति समापयतीति दिनान्तः B$_2$. [8] °अस्यां विप्रैरिति वा संध्या, अर्कोदयास्तमयकालः Y.. [9] घटिकात्मकस्य A, W$_2$; सूर्यास्तमयात् प्राक् D$_2$.

(पा.) घस्रो—वासरौ। दिवसनामानि ॥ प्रत्यूषो—प्रभातं च। सूर्योदयात् प्राग् घटिकाचतुष्टयात्मककालनामानि। [1]वैजयन्त्यां प्रत्यूषशब्दो नपुंसकलिङ्ग इति प्रतिज्ञातम्! 'व्युष्टं विभातं प्रत्यूषं सांयात्रिकमहर्मुखम्' इति (पृ. २२, श्लो. ६८)। शाश्वतकोशे [2]काल्यशब्दो ह्रस्वादिः। 'कल्यं प्रभातमध्ये[3] च कल्यो नीरोगदक्षयोः' इति (पृ. ३, श्लो. २४)। 'गोपीथो गोसर्गस्त्रिघोषः कथ्यते निशान्तश्च' एतानि च ॥ दिनान्ते तु सायम्। दिवसावसाननाम। सायमिति नपुंसकत्वेन निर्दिष्टम्। 'सायमण्डनमभित्वरयन्त्यः' इति। संध्या पितृप्रसूः। दिनान्तादुपरि घटिकात्रयात्मकस्य सूर्योदयात् प्राक् पञ्चघटिकात्मकस्य च कालस्य नामनी। संधाशब्दोऽप्यस्ति। 'संधा संध्या पितृप्रसूः' इति वैजयन्ती (पृ. २२, श्लो. ६९) ॥ २–३ ॥

---

[1] वैजयन्तीकारेण A$_1$. [2] कल्य° B$_3$. [3] प्रभातं सज्जितं B$_4$; मुद्रितग्रन्थे च.

प्राह्णापराह्णमध्याह्नास्त्रिसंध्यमथ शर्वरी।
निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा ॥ ४ ॥
विभावरीतमस्विन्यौ रजनी यामिनी तमी।

(वि.) प्राह्ण इति—अह्नः प्रान्ते[1] भवः प्राह्णः। अह्नः अपरो भागः अपराह्णः। अह्नो मध्यो भागः मध्याह्नः। एते त्रयः समाहृताः त्रिसंध्यं भवति। तिसृणां संध्यानां समाहारः त्रिसंध्यम् ॥ शृणाति [2]लोकचक्षूंषीति शर्वरी। 'शॄ हिंसायाम्'। नितरां श्यतीति सर्वचेष्टाः [3]निशा। निशीथोऽस्त्यस्यामिति[4] निशीथिनी। राति ददाति सुखमिति रात्रिः। 'रा दाने'। त्रयो यामा [5]यस्याः सा त्रियामा। विश्रमाय क्षणमवसरं[6] ददातीति क्षणदा। 'दा दाने'। क्षपयति आयुरिति क्षपा। 'क्षि क्षये'। तमसावृतत्वात् [7]विभावरी। तमोऽस्यामस्तीति तमस्विनी। तमसा [8]रज्यत इति रजनी। 'रञ्ज रागे'।

यामा अस्याः सन्तीति यामिनी । तमयति चक्रवाकान् तमी । ‘तमु ग्लानौ’ । तमा इति वा पाठः । रात्रिनामानि ॥ ४ ॥

[1] प्रारम्भः B₁, D₁, I, K₅, W₂. [2] सर्वचेष्टाः W₂. [3] नितरामस्यां शेरत इति निशा । ‘शीङ् स्वप्ने’ । नितरामस्यति निरस्यति सर्वचेष्टा इति वा निशा । ‘अस निरसने’ B₂; D₁, W₁ add ‘शो तनूकरणे’. [4] अस्याः W₁. [5] यस्यां D₁. [6] अवकाशं A, B₁, T, U. [7] भाभिः व्रियत इति भावरी, भावरी न भवतीति विभावरी, ‘वृञ् वरणे’; भा कान्तिः, न विद्यते भा यस्य तत् विभं तमः, तेन विभेन आ समन्तात् व्रियत इति विभावरी वा B₂. [8] रञ्जयति B₁, D₁, I, K₅, W₂.

(पा.) प्राह्ण—त्रिसंध्यम् । प्राह्ण इति पूर्वाह्णः[1] । अपराह्ण इति सायाह्नः[1] । मध्याह्न इति [2]मध्यंदिनपर्यायः । एतेषां त्रयाणां[3] समाहारस्त्रिसंध्यम् । त्रिसंध्यी इति च कतिचित् [4]कथयन्ति । समाहारस्यैकत्वाद् [5]एकवचनम् ॥ अथ शर्वरी—तमी । ‘तमासिता विरात्रः स्याद् वासुरा यामिनी तमी’ इति रभसकोशपाठात् तमा इत्यपि भवति । रात्रिनामानि ॥ ४ ॥

[1] A₁ adds पर्यायः. [2] दिनमध्य° B₃. [3] B₃ adds संध्यानां. [4] B₃, B₄ omit. [5] A₁ adds पक्षद्वयेऽपि.

तमिस्रा तामसी रात्रिर्ज्यौत्स्नी चन्द्रिकयान्विता ॥ ५ ॥
आगामिवर्तमानाहर्युक्तायां निशि पक्षिणी ।

(वि.) तमिस्रेति—तमोऽस्त्यस्यामिति[1] तमिस्रा । तमोबहुला [2]तामसी । तमोयुक्तरात्रिनामनी ॥ ज्योत्स्ना अस्त्यस्यामिति [3]ज्यौत्स्नी । ज्योत्स्ना ज्योत्स्नीति वा पाठः । चन्द्रिकायुक्तरात्रिनाम ॥ उभयाह्नी पक्षाविव यस्याः सा पक्षिणी । [4]उभयतः अहोयुक्तरात्रिनाम ॥ ५ ॥

[1] अस्याः A, B₁, T. [2] तमसां समूहः तामसम्, तदस्यास्तीति तामसी B₂. [3] ज्योत्स्नी, आकारान्तोऽप्यस्ति B₁, I, K₅, W₂; K₅ omits 4 lines. [4] उभयाहो° D₁, I, W₂; उभयत्राहोयुक्तनिशानाम W₁.

(पा.) तमिस्रा—रात्रिः । तमोयुक्तरात्रिस्तमिस्रा स्यात् । ज्योत्स्नी चन्द्रिकयान्विता । चन्द्रिकायुक्तरात्रिर्ज्योत्स्नी स्यात् । ‘पूर्णेन्दुस्तु दिनंमन्या’ । पूर्णचन्द्रयुक्तरात्रिर्दिनंमन्या स्यात् । आगामि—पक्षिणी । पक्षद्वयवदुभयतोवर्त्यहःसंयुक्ता रात्रिः पक्षिणी स्यात् ॥ ५ ॥

गणरात्रं निशा बह्वचः प्रदोषो रजनीमुखम् ॥ ६ ॥
अर्धरात्रनिशीथौ द्वौ द्वौ यामप्रहरौ समौ ।

(वि.) गणरात्रमिति—रात्रीणां गणो[1] गणरात्रम् । [2]गणरात्रो वा । समाहारे नपुंसकम् । रात्रिसमूहनाम ॥ प्रकृष्टो दोषः [3]प्रारब्धा दोषा वा अत्रेति प्रदोषः । [4]रजनीमुखनाम ॥ रात्रेरर्धम् अर्धरात्रः । नियतं शेरतेऽत्र[5] निशीथः । 'शीङ् स्वप्ने' । [6]मध्यरात्रनामनी ॥ यातीति यामः । 'या प्रापणे' । प्रह्रियत इति प्रहरः[7] । 'हृञ् हरणे' । दिनस्य रात्रेर्वा चतुर्भागनामानि ॥ ६ ॥

[1] B_1, W_2 add समूहः. [2] W_2 omits. [3] प्रारब्धः B_1. [4] B_2 adds रजन्याः मुखं रजनीमुखम् ; एतत् प्रदोषकालनाम B_2, K_5, W_2. [5] A adds प्राणिनः. [6] मध्यरात्रि° A, B_1, D_2, W_1. [7] प्रकर्षेण ह्रियते° A.

(पा.) गणरात्रं निशा बह्वयः । रात्रिसमूहः गणरात्रं स्यात् । अथवा बह्वयः [1]रात्रयो गणरात्रमित्युच्यते । चिररात्रमपि [2]तन्नाम । 'बह्वयस्तु गणरात्रं च चिररात्रं च रात्रयः' इति वैजयन्ती (पृ. २१, श्लो. ५९) । प्रदोषो रजनीमुखम् । [3]रात्रिमुखनाम ॥ अर्धरात्रनिशीथौ द्वौ । रात्रिमध्यनामनी । 'मध्यरात्रो [4]महारात्रिः' । एते च । द्वौ—समौ । दिनस्य रात्रेर्वा तुरीयांशनामनी ॥ ६ ॥

[1] निशाः A_1. [2] B_3 omits. [3] रात्रेर्मुखं प्रदोषः स्यात् A_1. [4] महारात्रौ A_1.

स पर्वसंधिः प्रतिपत्पञ्चदश्योर्यदन्तरम् ॥ ७ ॥
पक्षान्तौ पञ्चदश्यौ द्वे पौर्णमासी तु पूर्णिमा ।
कलाहीने सानुमतिः पूर्णे राका निशाकरे ॥ ८ ॥

(वि.) स इति—प्रतिपत्पञ्चदश्योर्यदन्तरं स संधिः, पर्व वा भवति । संधीयते[1] संधिः । पृणाति पालयति [2]अभिलषितमिति [3]पर्व । 'पॄ पालनपूरणयोः' । पर्वसंधिरिति एकं पदं वा । [4]शुक्लकृष्णपक्षान्तौ द्वे पञ्चदश्यौ भवतः । पञ्चदशसंख्यायाः पूरणी पञ्चदशी । पूर्णश्चासौ माश्च [5]पूर्णमाः, पूर्णमसः चन्द्रस्येयं पौर्णमासी । पूर्णो मासोऽस्यामिति वा । [6]पूर्णं मिमीते पूर्णिमा । 'माङ् माने' । पूर्यते मासः अनयेति वा । 'पूरी आप्यायने' । [7]शुक्लपञ्चदशीनामानि ॥ अनुमन्यते [8]अनुमतिः । 'मन ज्ञाने' । [9]चतुर्दशीमिश्रितपूर्णिमानाम ॥ यज्वभिः रायते राका । 'रै शब्दे' । राति ददाति [10]अभिलषितमिति वा । 'रा दाने' । [11]संपूर्णचन्द्रवत्पूर्णिमानाम ॥ ७–८ ॥

[1] ‘डुधाञ् धारणपोषणयोः’ D₁. [2] अभिलक्षितं W_2; अभिमतम् A. [3] पृणाति ददाति देवेभ्यो हविरिति वा B_1, K_5, W_2, Y. [4] शुक्लपक्ष° A. [5] B_2, D_1 add चन्द्रः; तस्येयं तिथिरिति पौर्णमासी I. [6] पूरणं पूर्ण W_1. [7] T adds पक्ष. [8] कलाहीने चन्द्रे कलामात्रहीने सति चन्द्रे या पूर्णिमा सा अनुमतिरित्यर्थः B_2, K_5, W_2, Y. [9] कलाहीनचन्द्रयुक्तपूर्णिमानाम B_2, I. [10] शुभम् Y; सुखम् W_2. [11] °चन्द्रमिश्रित° A, B_1, T.

(पा.) स पर्व—यदन्तरम्। प्रतिपत्पञ्चदश्योरन्तरालकालः पर्वसंधिरित्युच्यते। पक्षान्तौ—द्वे। [1]पौर्णमास्यमावास्ययोर्नामनी॥ ‘पर्वणी पञ्चदश्यौ द्वे पक्षान्तौ नन्दिवर्धनौ’ इति वैजयन्ती (पृ. २३, श्लो. ७३)। पौर्णमासी तु पूर्णिमा। [2]शुक्लपञ्चदशीनामनी॥ पूर्णमासी च भवति। ‘पूर्णा च पूर्णमासी च पौर्णमासी च पूर्णिमा[3]’ इति वैजयन्ती (पृ. २३, श्लो. ७३)। कलाहीने—निशाकरे। यस्यां चन्द्रः कलाहीनः [4]स्यात् सा पूर्णिमा अनुमतिः स्यात्। यस्यां पूर्णश्चन्द्रः[5] सा राकेत्युच्यते। अनुक्तम्—‘चैत्री तु मदनध्वजा’। पौषीमाघीप्रभृतयस्तत्तन्मासपूर्णिमासु॥ ७–८॥

[1] वक्ष्यमाणपञ्चदश्यौ द्वे पक्षान्तौ स्याताम् A_1. [2] पूर्णिमा° A_1. [3] पूर्णिका इति मुद्रितपुस्तके. [4] चेत् A_1. [5] पूर्णचन्द्रः A_1.

अमावास्या त्वमावस्या दर्शः सूर्येन्दुसंगमः।
सा दृष्टेन्दुः सिनीवाली सा नष्टेन्दुकला कुहूः॥ ९॥

(वि.) अमावास्येति—चन्द्रार्कौ [1]अमा सह वसतः अत्रेति अमावास्या[2] अमावस्या च। दृश्येते सूर्याचन्द्रमसावत्रेति दर्शः। ‘दृशिर् प्रेक्षणे’। सूर्येन्दू संगच्छेते अत्रेति सूर्येन्दुसंगमः। ‘गम्लृ सृप्लृ गतौ’। कृष्णपञ्चदशीनाम॥ वालते चलतीति [3]वालः। ‘वाडृ आप्लाव्ये’। वालेन चन्द्रेण सिनी सिता सिनीवाली। दृष्टचन्द्रदर्शनाम॥ कुहयते विस्मापयति तमसा कुहूः। ‘कुह विस्मापने’। तमसा कुं भुवं हन्तीति वा[4]। नष्टचन्द्रदर्शनाम॥ ९॥

[1] अमा इत्यव्ययं, सहार्थकं च। वा विकल्पे। वा अमा स्यात्, अमेति वा स्यादित्यर्थः B_2.
[2] D_1, I, W_1 add ‘वस निवासे’. [3] चन्द्र इत्यर्थः B_2. [4] B_2, D_1, Y add ‘हन हिंसागत्योः’.

(पा.) अमावास्या—संगमः। कृष्णपञ्चदशीनामानि॥ अमावासी, अमावसी इत्यपि स्यात्। ‘दर्शोऽमावास्यमावसी’ इति वैजयन्ती (पृ. २२, श्लो. ७०)। अमावसे-

त्यप्यस्ति । 'अमावास्या त्वमावसा[1]' इति वैजयन्ती (पृ. २२, श्लो. ७१) । सा दृष्टेन्दुः सिनीवाली । [2]सा अमावसा दृष्टचन्द्रा चेत् सिनीवालीत्युच्यते[3] । सा लक्ष्मीरस्यामस्तीति सिनी चन्द्रकला । सा बाला अस्यामिति सिनीवालीति व्युत्पत्त्या दन्त्यादिः । सा नष्टेन्दुकला कुहूः । सा[4] अमावसी नष्टेन्दुकला चेत् कुहूरित्युच्यते ॥ ९ ॥

---

[1] अमवसा B_3.　[2] दृष्टेन्दुदर्शनाम B_3, B_4.　[3] शब्द्यते A_1.　[4] नष्टेन्दुदर्शनाम B_3.

उपरागो ग्रहो राहुग्रस्ते त्विन्दौ च पूष्णि च ।
सोपप्लवोपरक्तौ द्वावग्न्युत्पात उपाहितः ॥ १० ॥
एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ ।

(वि.) उपराग इति—उपरज्येते सूर्याचन्द्रमसावनेनेति उपरागः । 'रञ्ज रागे' । गृह्येते सूर्याचन्द्रमसावनेन ग्रहः । 'ग्रह उपादाने' । ग्रहणनामनी ॥ उपप्लवेन सहितः सोपप्लवः । उपरज्यते उपरक्तः । राहुग्रस्ते इन्दौ पूष्णि च द्वौ शब्दौ वर्तेते । [1]अग्नेरुत्पातः अग्न्युत्पातः । उप समीपे [2]आहितमत्र उपाहितः । [3]धूमकेतुनाम ॥ [4]पुष्पं विकासः तद्वन्तौ पुष्पवन्तौ । सूर्याचन्द्रमसोरपृथङ्नाम ॥ १० ॥

---

[1] अग्निना कृतः उत्पातः B_1, K_5, W_2.　[2] अहितम् B_1, D_1.　[3] धूमकेत्वादि° B_2.
[4] पुष्पवद् विकासः K_1.

(पा.) उपरागो ग्रहः । ग्रहणनामनी ॥ राहुग्रस्ते—द्वौ । राहुग्रस्तचन्द्रसूर्यनामनी ॥ अग्न्युत्पात उपाहितः । धूमकेतुनाम ॥ एकयोक्त्या—निशाकरौ । एकयोक्त्या [1]सूर्याचन्द्रमसौ [2]पुष्पवन्ताविति कथ्येते ।

'जातौ स्वकिरणसंचयपटावृतौ वियति पुष्पवन्तौ सन्तौ ।
बाणासनौ च घनरवपटावृतौ वियति पुष्पवन्तौ सन्तौ ॥'

इति हरिप्रबोधयमके ॥ पुष्पदन्तावपि भवतः । 'प्राक्प्रत्यग्धरणीधरशिखरस्थितपुष्पदन्ताभ्याम्' इति धर्मशर्माभ्युदये ॥ १० ॥

---

[1] सूर्यचन्द्रौ B_3.　[2] पुष्पवत्पदवाच्यौ भवतः B_3, B_4.

अष्टादश निमेषास्तु काष्ठा त्रिंशत्तु ताः कला ॥ ११ ॥
तास्तु त्रिंशत् क्षणस्ते तु मुहूर्तो द्वादशास्त्रियाम् ।

(वि). अष्टादशेति—निमिषतीति निमेषः[1]। ते अष्टादश काष्ठा भवति। काशत इति काष्ठा[2]। ताः काष्ठाः त्रिंशत् कला भवति। कालं कलयतीति कला[3]। ताः कलाः त्रिंशत् [4]क्षणो भवति। क्षिणोति हिनस्तीति क्षणः। 'क्षिणु हिंसायाम्'। ते क्षणाः द्वादश मुहूर्तो[5] भवति। [6]मुहुर्मुहुरियर्तीति [7]मुहूर्तः। 'ऋ गतौ'॥ ११॥

[1] निमिषः A, B₁, T; U adds 'मिष उन्मीलने'. [2] D₂, I, K₁, W₁ add 'काशृ दीप्तौ'. [3] 'कल किल क्षेपे' D₁. [4] क्षणं I. [5] मुहूर्तं K₁. [6] W₂ omits one मुहुः. [7] मुह्यतीति मुहु, इयर्ति गच्छतीत्यर्थः। आहत्य उभयधात्वर्थमेलनात् मुहूर्तो भवति। 'मुह वैचित्ये', 'ऋ गतौ' B₂.

(पा.) अष्टादश—काष्ठा। मनुष्याक्षिपक्ष्मपरिक्षेपकालो निमेषो निमिषश्च भवति। 'निमेषनिमिषौ कालप्रभेदेऽक्षिनिमीलने' इति विश्वप्रकाशिका (पृ. १७२, श्लो. १५)। निमेषा अष्टादश स्युश्चेत् काष्ठा॥ त्रिंशत्तु ताः कला। काष्ठात्रिंशच्चेत् कला। तास्तु त्रिंशत् क्षणः। त्रिंशत्कलाः क्षणः। ते तु—अस्त्रियाम्। क्षणाः द्वादश स्युश्चेत् मुहूर्तः[1]॥ ११॥

[1] B₃ adds स चास्त्रियाम्.

ते तु त्रिंशदहोरात्रः पक्षस्ते दश पञ्च च॥ १२॥
पक्षौ पूर्वापरौ शुक्लकृष्णौ मासस्तु तावुभौ।

(वि.) ते त्विति—ते तु मुहूर्ताः त्रिंशत् अहोरात्रो[1] भवति। अह्ना सहिता[2] रात्रिः अहोरात्रः। तेऽहोरात्राः पञ्चदश पक्षो भवति। [3]पचति [4]भूतानि पक्षः। 'डुपचष् पाके'। [5]पक्ष्यते वा पक्षः। 'पक्ष परिग्रहे'। पूर्वापरौ पक्षौ क्रमेण शुक्लकृष्णनामकौ[6] भवतः। उभौ तौ मासो भवति॥ १२॥

[1] अहोरात्रं K₂. [2] समेता B₁; अहःसमेता B₂. [3] परिणामयतीत्यर्थः B₂. [4] B₂ adds शरीरादीनि. [5] पक्षति गृह्णातीति वा B₂. [6] °नामानौ D₂, K₂, K₅, W₁.

(पा.) ते तु त्रिंशदहोरात्रः। मुहूर्तत्रिंशत् अहोरात्रः। अत्रापि अस्त्रियाम् इति लिङ्गमन्वेति। अहोरात्रं, द्विरात्रं, त्रिरात्रमिति वामनलिङ्गानुशासने (पृ. १३, श्लो. १६) तथैवोदाहृतत्वात्॥ पक्षस्ते दश पञ्च च। अहोरात्राणि[1] पञ्चदश चेत् पक्षः॥ पक्षौ—कृष्णौ। अत्र पूर्वपक्षः शुक्लपक्षः स्यात्। अपरपक्षः कृष्णपक्षोऽपि भवति॥

मासस्तु तावुभौ। पक्षौ द्वौ चेन्मासः। [2]माःशब्दोऽपि स्यात्। ‘मासौ मासनिशाकरौ’ इति वैजयन्ती (पृ. २७०, श्लो. ६१)। माः सान्तः ॥ १२ ॥

[1] अहोरात्राः B_3. [2] मासि इत्यपि A_1.

द्वौ द्वौ मार्गादिमासौ स्यादृतुस्तैरयनं त्रिभिः ॥ १३ ॥
अयने द्वे गतिरुदग्दक्षिणार्कस्य वत्सरः।

(वि). द्वाविति—[1]मस्यति परिणमतीति मासः। ‘मसी [2]परिणामे’। मासः[3] चन्द्रस्यायं मास इति वा। इयर्तीति ऋतुः। ‘ऋ गतौ’। तौ [4]मार्गादिमासौ द्वौ द्वौ ऋतुः भवति। तैः त्रिभिः ऋतुभिः अयनम्। अयते यात्यनेन सूर्यः दक्षिणामुत्तरां चेति अयनम्। ‘अय पय गतौ’। ते द्वे अयने अर्कस्य उदग्दक्षिणागतिश्च[5] वत्सरो भवति। वसन्त्यस्मिन् ऋतवः वत्सरः। ‘वस निवासे’॥ १३ ॥

[1] मस्यते परिमीयतेऽनेन K_3, W_2. [2] ‘मसी परिमाणे’ A, I, T. [3] माश्चन्द्रः तस्यायं B_1, D_1, I, W_2. [4] माघादि° B_2. [5] °गती च W_2.

(पा.) द्वौ द्वौ—ऋतुः। मार्गशीर्षादिमासद्वयम् ऋतुः स्यात्। तैरयन त्रिभिः। ऋतवस्त्रयश्चेद् अयनम्। अयने—वत्सरः। [1]अर्कस्य उदक् उदीच्याम्[2] अयनं गतिरुत्तरायणम्। दक्षिणा दक्षिणस्यामयनं[2] गतिर्दक्षिणायनम्। ते त्वयने वत्सरः॥ १३ ॥

[1] A_1 adds उदगिति अस्तातिप्रत्ययान्तस्योदीचीशब्दस्य सप्तमी, दक्षिणा इति आच्प्रत्ययान्तदक्षिणाशब्दस्य सप्तमी. [2] A_1 adds जाता गतिः.

समरात्रिंदिवे काले विषुवद् विषुवं च तत् ॥ १४ ॥
(पुष्ययुक्ता[1] पौर्णमासी पौषी मासे तु यत्र सा।
नाम्ना स पौषो माघाद्याश्चैवमेकादशापरे ॥)
मार्गशीर्षे सहा मार्ग आग्रहायणिकश्च सः।

(वि.) समेति—रात्रिश्च दिवा च रात्रिंदिवम्। [2]समं रात्रिंदिवं यस्मिन् काले स समरात्रिंदिवः। अस्मिन् काले[3] विषुवत् विषुवं च भवतः। अहोरात्रयोः विषु[4] साम्यमत्रास्तीति विषुवत्। विषुवं च। पुष्यनक्षत्रयुक्ता पौर्णमासी पौषी, सा यत्रास्ति मासे स नाम्ना पौषः[5]। अपरे एकादश[6] माघाद्या एवमूह्याः[7]। कथम्? [8]मघानक्षत्रयुक्ता

पौर्णमासी माघी। सा यत्रास्ति स माघः। [9]मृगशीर्षनक्षत्रयुक्ता [10]मार्गशीर्षी, सा यस्मिन्नस्ति स मार्गशीर्षः। शीतोष्णे सह्येतेऽत्र सहाः[11]। सान्तः। 'षह मर्षणे'। [12]मृगशिरोनक्षत्रयुक्ता पौर्णमासी मार्गी, सा यत्रास्ति स मार्गः। आग्रहायणी यत्रास्ति स आग्रहायणिकः। [13]मार्गशीर्षनामानि ॥ १४ ॥

[1] Verse included in most of the MSS. [2] B_2 adds समानं. [3] °विषुर्भवति विषुवत् विषुवं च B_2. [4] विषु इति साम्येऽव्ययम् D_1, K_5. [5] A, T add मासः. [6] K_3, K_5 add मासाः. [7] कथनीयं K_1. [8] मघनक्षत्र° A, B_1, T, K_1. [9] °शिरो° A, B_1, T. [10] W_1 adds पौर्णमासी. [11] सहतेऽत्र सहाः A, T. [12] °शीर्ष° B_1; K_1, K_3, W_1 omit °शिरः°. [13] D_2, W_2 add °मास°.

(पा.) समरात्रिंदिवे—तत्। [1]समं रात्रिंदिवं यस्मिन् तस्मिन्[2] काले विषुवत् विषुवं च शब्दौ भवतः। समकालनामनी ॥ [3]पुष्ययुक्ता—अपरे। पुष्ययुक्ता पौर्णमासी पौषी। पुष्ययुक्तपूर्णिमानाम ॥ पौषस्तन्मासनाम ॥ अपरे एकादश चैवं माघाद्याः माघादिपदवाच्याः ॥ मार्गशीर्षे—च सः। मार्गशीर्षमासनामानि ॥ १४ ॥

[1] A_1 adds रात्रिश्च दिवा च रात्रिंदिवम्. [2] अस्मिन् A_1. [3] A_1 omits the verse पुष्ययुक्ता . . .

पौषे तैषसहस्यौ द्वौ तपा माघेऽथ फाल्गुने ॥ १५ ॥
स्यात् तपस्यः फाल्गुनिकः स्याच्चैत्रे चैत्रिको मधुः।

(वि.) पौष इति—पौषी यत्रास्ति पौषः, तैषी यत्रास्ति तैषः। सहोऽस्यास्तीति [1]सहस्यः। [2]पौषमासनामनी ॥ स्नानादिना पापं तपत्यत्रेति [3]तपाः। सान्तः। 'तप संतापे'। मा न [4]विद्यमानम् अघमस्मिन्निति माघः। माघी अत्रास्तीति वा। माघमासनामनी ॥ [5]फाल्गुनी अत्रास्तीति फाल्गुनः। फाल्गुनिकश्च। तपसि साधुः तपस्यः। फाल्गुनमासनामानि ॥ [6]चैत्री अत्रास्तीति चैत्रः। चैत्रिकश्च[7]। मधुना पुष्परसेन योगान्मधुः। [8]मधुर्वसन्तोऽत्रास्तीति वा मधुः। चैत्रमासनामानि ॥ १५ ॥

[1] सहसि साधुः U. [2] पुष्यमास° B_1, D_1, K_5, W_2. [3] तपः अस्त्यस्मिन्निति D_1, K_5; तपति अस्मिन् B_2. [4] अविद्यमानम् B_1, U, W_2. [5] फल्गुनीयुक्ता पूर्णिमा B_2. [6] चित्रानक्षत्रयुक्ता पूर्णिमा B_2. [7] चैत्रकश्च A. [8] B_1 omits one line.

(पा.) पौषे—द्वौ। पौषमासनामनी ॥ तपा माघे। माघमासनामनी ॥ अथ—फाल्गुनिकः। फाल्गुनमासनामनी ॥ स्यात्—मधुः। चैत्रमासनामानि ॥ १५ ॥

वैशाखे माधवो राधो ज्येष्ठे शुक्रः शुचिस्त्वयम् ॥ १६ ॥
आषाढे श्रावणे तु स्यान्नभाः श्रावणिकश्च सः ।

(वि.) वैशाख इति—वैशाखी अत्रास्तीति वैशाखः । मधौ साधुः माधवः । राधी अत्रास्तीति राधः । [1]वैशाखनामानि ॥ [2]ज्येष्ठी अत्रास्तीति ज्येष्ठः[3] । शोचयति तापेन[4] प्राणिन इति शुक्रः । 'शुच शोके'। ज्येष्ठमासनामनी ॥ जनान् तापेन शोचयतीति शुचिः । आषाढाभियुक्ता पौर्णमासी आषाढी । सा अत्रास्तीति आषाढः । आषाढमासनामनी ॥ श्रावणी अत्रास्तीति श्रावणः । श्रावणिकश्च । न बभस्ति न भाति मेघैः नभाः । 'भस भर्त्सनदीप्त्योः'। न भासते मेघैरिति वा । 'भासृ दीप्तौ'। तपोऽत्र [5]नभ्यते नश्यतीति वा नभाः[6] । सान्तः । नभोऽत्राभिभवतीति वा । 'णभ हिंसायाम्'। [7]श्रावणनामानि ॥ १६ ॥

---

[1] A, B_2, D_1, I, W_2 add °मास°. [2] ज्येष्ठायुक्ता पूर्णिमा ज्येष्ठी B_2. [3] ज्यैष्ठः K_3, W_1. [4] तापयति B_2. [5] नभते A, B_1, T. [6] भातीति भाः, स न भवतीति नभाः B_2. [7] D_2, K_3, U, W_2 add °मास°.

(पा.) वैशाखे—राधः । वैशाखमासनामानि ॥ ज्येष्ठे शुक्रः । ज्येष्ठमासनामनी ॥ शुचिस्त्वयम् आषाढे । आषाढमासनामनी ॥ श्रावणे—सः । श्रावणमासनामानि ॥ १६ ॥

स्युर्नभस्यप्रौष्ठपदभाद्रभाद्रपदाः समाः ॥ १७ ॥
स्यादाश्विन इषोऽप्याश्वयुजोऽपि स्यात्तु कार्त्तिके ।
बाहुलोर्जौ कार्त्तिकिको हेमन्तः शिशिरोऽस्त्रियाम् ॥ १८ ॥

(वि.) स्युरिति—नभसि साधुः नभस्यः । [1]प्रोष्ठपदी अत्रास्तीति [2]प्रोष्ठपदः । [3]भद्राभ्यां युक्ता [4]पौर्णमासी भाद्री । सा अत्रास्तीति भाद्रः । [5]भाद्रपदी अत्रास्तीति भाद्रपदः । [6]भाद्रपदनामानि ॥ अश्विनीनक्षत्रयुक्ता पौर्णमासी आश्विनी । सा अत्रास्तीति आश्विनः । [7]दीक्षितैरिष्यत इति इषः । 'इषु इच्छायाम्'। [8]आश्वयुजी अत्रास्तीति आश्वयुजः । आश्वयुजमासनामानि ॥ कार्त्तिकी अत्रास्तीति कार्त्तिकः । कार्त्तिकिकश्च । [9]बाहुली अत्रास्तीति बाहुलः । [10]ऊर्जमन्नमत्रास्तीति ऊर्जः । कार्त्तिकमासनामानि ॥ हिमेन हन्तीति हेमन्तः[11] । हेमन्तऋतुनाम ॥ शीतेन गात्राणि शिनोति तनूकरोतीति शिशिरः । 'शिञ् निशातने'। शिशिरऋतुनाम ॥ १७–१८ ॥

---

[1] प्रोष्ठपदायुक्ता पूर्णिमा प्रोष्ठपदी A. [2] प्रौष्ठपदः W_1. [3] भद्रया युक्ता K_5, U, W_2. [4] पूर्णिमा B_2, D_2. [5] भाद्रपदायुक्ता(पौर्णमासी U) भाद्रपदी B_2, K_5.

[6] D_2, K_1, K_3, K_5, U, W_1 add °मास°. [7] B_2, W_2 omit दीक्षितैः. [8] अश्वयुग्युक्ता आश्वयुजी D_1. [9] बहुलायुक्ता पौर्णमासी बाहुली B_1, D_1, I, K_5. [10] ऊर्क् बलमत्रेति ऊर्जः B_2. [11] 'हन हिंसागत्योः' B_2, D_1.

(पा.) स्युः—समाः। भाद्रपदमासनामानि ॥ स्यादाश्विन—अपि। आश्वयुजमासनामानि ॥ स्यात्तु—कार्त्तिकिकः। कार्त्तिकमासनामानि ॥ हेमन्तः। हेमन्तर्तुनाम। शरदत्ययहिमागमादिशब्दाः कविप्रयुक्ताः। 'पतितमेव हिमागममङ्गिनां वपुषि कान्तिहरं शरदत्यये'। 'तपेन वर्षाः शरदा हिमागमो वसन्तलक्ष्म्या शिशिरः समेत्य च'। (शिशु. १. ६६) इत्यादि ॥ शिशिरोऽस्त्रियाम्। शिशिरर्तुनाम ॥ १७–१८ ॥

वसन्ते पुष्पसमयः सुरभिर्ग्रीष्म ऊष्मकः।
निदाघ उष्णोपगम उष्ण ऊष्मागमस्तपः ॥ १९ ॥

(वि.) वसन्त इति—[1]वसन्त्यस्मिन् [2]सुखं वसन्तः। 'वस निवासे'। पुष्पाणां समयः पुष्पसमयः। सुष्ठु [3]रभते आह्लादनं कर्तुमारभतेऽत्र सुरभिः। 'रभ राभस्ये'। वसन्तर्तुनामानि ॥ जलं गिरतीति ग्रीष्मः। 'गॄ निगरणे'। ऊष्माणं करोतीति ऊष्मकः[4]। [5]निदह्यते जनोऽत्र निदाघः। 'दह भस्मीकरणे'। उष्णस्योपगमः उष्णोपगमः। ओषति तापेनेति उष्णः। 'उष प्लुष दाहे'। ऊष्मणः आगमः ऊष्मागमः। तपतीति तपः। 'तप संतापे'। अकारान्तोऽयम्[6]। ग्रीष्मर्तुनामानि ॥ १९ ॥

[1] वसति D_2. [2] सुखेन W_1; I adds यथा तथा. [3] सुष्ठु रम्भितम् आह्लादकं कर्तुं शीलमस्यास्तीति B_2. [4] D_1 adds 'डुकृञ् करणे'. [5] निदहति जनान् B_1. [6] सकारान्तश्च D_1.

(पा.) वसन्ते—सुरभिः। वसन्तर्तुनामानि ॥ ग्रीष्म—तपः। अकारान्तोऽयं तपः। ग्रीष्मर्तुनामानि ॥ १९ ॥

स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षा अथ शरत् स्त्रियाम्।
षडमी ऋतवः पुंसि मार्गादीनां युगैः क्रमात् ॥ २० ॥

(वि.) स्त्रियामिति—[1]प्रवर्षतीति प्रावृट्। 'वृष सेचने'। [2]अनुवर्षमस्तीति वर्षाः। बहुवचनमेव [3]स्त्रियां वर्तते। वर्षर्तुनामनी ॥ शृणाति [4]पङ्कं जलं च शरत्। 'शॄ हिंसायाम्'। शरदृतुनाम ॥ अमी षट् मार्गादीनां मासानां युगैः युग्मैः मासैः क्रमात् [5]हेमन्तादिऋतवो भवन्ति ॥ २० ॥

[1] प्रकर्षेण वर्षतीति B_2. [2] आसु D_1; वृष्यन्ते आसु B_2. [3] स्त्रीलिङ्गं च B_2. [4] पङ्कजलानि B_2. [5] हेमन्तादयः D_1, I.

(पा.) स्त्रियां—वर्षाः। वर्षर्तुनामानि। प्रावृषाशब्दोऽप्यस्ति। 'प्रावृषा तु जलार्णवः' इति त्रिकाण्डशेषः (पृ. ६, श्लो. ११५)॥ अथ शरत् स्त्रियाम्। शरदृतुनाम। शरदाशब्दोऽप्यस्ति। '[1]कालप्रभातं शरदा' इति त्रिकाण्डशेषः (पृ. ६, श्लो. ११५)॥ षडमी—क्रमात्। हेमन्तादयः षडपि मार्गशीर्षादियुग्मक्रमेण ऋतुशब्दवाच्याः पुंलिङ्गाः। यद्वा ऋतुशब्दः पुंलिङ्गः। [2]कार्तिकादियुग्मक्रमात् व्यवस्था[3] मा भूदिति मार्गग्रहणम्॥२०॥

[1] कल्यं विभातं शरदा A_1, B_1. [2] A_1 adds पूर्व. [3] A_1 adds वैषम्यं.

संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत् समाः।
मासेन स्यादहोरात्रः पैत्रो वर्षेण दैवतः॥ २१॥

(वि.) संवत्सर इति—[1]संवसन्ति ऋतवोऽत्र संवत्सरः। वत्सरश्च। 'वस निवासे'। आप्यते [2]अधिकमासेनेत्यब्दः। 'आप्लृ व्याप्तौ'। अपो ददातीति वा। 'डुदाञ् दाने'। जहाति क्रमेण ऋतूनिति हायनः। 'ओहाक् त्यागे'। शीर्यते [3]जगदत्रेति शरत्। 'शॄ हिंसायाम्'। समयन्तीति [4]जनान् समाः। 'षम वैक्लव्ये'। अयं शब्दः स्त्रीलिङ्गो बहुवचनान्तः। एकवचनान्तो वा। संवत्सरनामानि॥ मानुषेण मासेन पैत्रः अहोरात्रः स्यात्। पितॄणामयं पैत्रः। मानुषेण वर्षेण दैवतः अहोरात्रः स्यात्। देवतानामयं दैवतः॥ २१॥

[1] वसन्तादिऋतवोऽत्र सम्यक् वसन्तीति B_2. [2] अखिल° K_1, Y. [3] अङ्गमत्रेति B_2. [4] जीवान् B_1, K_5, W_2.

(पा.) संवत्सरो—समाः। संवत्सरनामानि। अस्त्रीशब्दो हायनशब्दविशेषणम्। शरच्छब्दस्य, [1]समाशब्दसाहचर्यात् स्त्रीलिङ्गत्वैव। 'वर्षोऽस्त्री स्त्री शरत्समाः' इति वैजयन्ती (पृ. २४, श्लो. ९१)। समाशब्दोऽस्मिन् शास्त्रे बहुप्रकृतिकः। वामनलिङ्गानुशासनेऽप्येवमेवोक्तम्। 'बहवश्च समाः सिकता वर्षा आपः सुमनसो जलौकसोऽप्सरस' इति (पृ. १६, श्लो. २३)॥ मासेन—पैत्रः। मानुषेण मासेन पितॄणामहोरात्रः। अत्र पक्षाभ्यां दिवारात्रिविभागः॥ वर्षेण दैवतः। मानुषेण वर्षेण देवतानामहोरात्रः स्यात्। अत्रायनाभ्यां दिवारात्रिविभागः॥ २१॥

[1] A_1 adds अस्त्रीशब्दसाहचर्यात् पुंनपुंसकलिङ्गतायां प्राप्तायां.

दैवे युगसहस्रे द्वे ब्राह्मः कल्पौ तु तौ नृणाम् ।
मन्वन्तरं तु दिव्यानां युगानामेकसप्ततिः ॥ २२ ॥

(वि.) दैवे इति—दैवे[1] द्वे युगसहस्रे [2]ब्राह्मः अहोरात्रः स्यात् । ब्रह्मणोऽयं ब्राह्मः । तौ नृणां स्थितिक्षयात्मकौ कल्पौ भवतः । कल्पयति नृणां [3]नाशं करोतीति कल्पः । 'कृपू [4]सामर्थ्ये' । दिव्यानां युगानामेकसप्ततिः मन्वन्तरं भवति । मनोरन्तरं मन्वन्तरम् ॥ २२ ॥

[1] दैवयुगसहस्रं A, B_2. [2] ब्रह्मणः U. [3] काशं A, B_1, W_2; अवकाशं B_2.
[4] 'क्लृप क्लृप्तौ' A, D_2, K_5.

(पा.) दैवे—ब्राह्मः । [1]दैवयुगमित्युक्ते मनुष्यचतुर्युगम् । ते युगे द्वे सहस्रे चेत् ब्रह्मणः अहोरात्रो भवति । अत्र कल्पाभ्यां [2]दिवारात्रिविभागः ॥ कल्पौ—नृणाम् । स्थितिक्षयात्मकौ कल्पौ भवतः । तावित्यनेन बुद्धिस्थदिवारात्र्योः परामर्शः ॥ मन्वन्तरं—एकसप्ततिः । चतुर्दशदलनस्य कल्पस्य एकैको [3]भागो मन्वन्तरं भवति । मानुषचतुर्युगं दिव्यं युगम् । तेषामेकाधिका सप्ततिः ॥ २२ ॥

[1] दिव्य° A_1. [2] अहोरात्र° B_3, B_4. [3] विभागो A_1.

संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि ।
अस्त्री पङ्कं पुमान् पाप्मा पापं किल्बिषकल्मषम् ॥ २३ ॥
कलुषं वृजिनैनोऽघमंहो दुरितदुष्कृतम् ।
स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः ॥ २४ ॥

(वि.) संवर्त इति—संवर्तते क्षीयते जगदत्रेति संवर्तः । 'वृतु वर्तने' । [1]प्रलीयते जगदत्रेति प्रलयः । 'लीङ् श्लेषणे' । जगन्नाशः कल्प्यतेऽत्रेति कल्पः । 'कृपू[2] सामर्थ्ये' । क्षीयते जगदत्र क्षयः । 'क्षि क्षये' । कल्पस्यान्तः कल्पान्तः । संहारकालनामानि ॥ कम्पते [3]अस्मात् पङ्कः । [4]अक्षरविपर्ययः । 'कपि चलने' । सभामध्ये [5]पच्यते वा । 'पचि विस्तारे' । पच्यते व्यक्तीक्रियते वा पङ्कः । 'पचि व्यक्तीकरणे' । पतति येन नरके पाप्मा । 'पत्लृ गतौ' । पान्त्यस्मादिति वा पाप्मा । पापं च । 'पा रक्षणे' । कल्यते चित्रगुप्तेन गण्यते किल्बिषम् । कल्मषं कलुषं च । 'कल संख्याने' । कलयति नरके वा कलुषम् । 'कल किल क्षेपे' । [6]वर्ज्यते वृजिनम् । 'वृजी वर्जने' ।

नरकमेत्यनेनेति एनः। ‘इण् गतौ’। कर्त्तारमङ्घत[7] इत्यघम्। ‘अघि गत्याक्षेपे’[8]। अंहते नरमनेनेति अंहः। ‘अहि गतौ’। दुष्टमेतीति दुरितम्[9]। [10]दुष्क्रियत इति दुष्कृतम्। ‘डुकृञ् करणे’। पापनामानि॥ ध्रियत इति [11]धर्मः। पुणति शुभं करोतीति पुण्यम्। ‘पुण कर्मणि शुभे’। शुभेन [12]श्रीयते श्रेयः। ‘श्रिञ् सेवायाम्’। [13]सुष्ठु क्रियते स्म सुकृतम्। अभिलषितं वर्षतीति वृषः। ‘वृष सेचने’। पुण्यनामानि॥ २३-४॥

---

[1] प्रलयते, ‘ली द्रवीकरणे’ B_1. [2] ‘क्लृप क्लृप्तौ’ A, B_1, T, W_1. [3] अस्मिन् W_2. [4] °विपर्याय: A, W_2. [5] A adds विस्तार्यते. [6] वृज्यते A. [7] अधो गमयति B_2. [8] ‘अघि लघि गतौ’ U. [9] D_1 adds ‘इण् गतौ’. [10] दुष्क्रियत्वात् W_1. [11] D_1, I, W_1 add ‘धृ धारणे’. [12] श्रयते K_1. [13] सु K_1.

(पा.) संवर्तः प्रलयः। मन्वन्तरान्ते जातावान्तरप्रलयनामनी॥ कल्पः—इत्यपि। महाप्रलयनामानि॥ ‘महाप्रलयकल्पान्तौ युगान्तो भूतसंप्लवः’ इति वैजयन्ती (पृ. २४, श्लो. ९४)॥ अस्त्री—दुष्कृतम्। पापनामानि॥ स्याद् धर्मं—वृषः। पुण्यनामानि॥२३-४॥

मुत् प्रीतिः प्रमदो हर्षः प्रमोदामोदसंमदाः।
स्यादानन्दथुरानन्दः शर्मसातसुखानि च॥ २५॥

(वि.) मुदिति—[1]मोदयतीति मुत्। [2]प्रमोदश्च। आमोदश्च। ‘मुद हर्षे’। प्रीणातीति प्रीतिः। ‘प्रीञ् [3]तर्पणे कान्तौ च’। [4]प्रमदयति हर्षयतीति प्रमदः। ‘मदी[5] हर्षे’। हृष्यतेऽनेनेति हर्षः। ‘हृष तुष्टौ’। आनन्दयतीति आनन्दथुः। आनन्दश्च। ‘टुनदि समृद्धौ’। शृणाति दुःखमिति शर्म। ‘शॄ हिंसायाम्’। स्यति दुःखं सातम्। ‘षोऽन्तकर्मणि’। श्यति दुःखं शातमिति वा पाठः। ‘शो तनूकरणे’। शातिर्वा। [6]शाम्यति दुःखमनेनेति शान्तम्। ‘शमु [7]उपशमे’। अयमपि पाठः। शोभनानि खानि इन्द्रियाणि [8]अस्मिन्निति सुखम्। संतोषनामानि॥ २५॥

---

[1] K_3 omits 3 lines. [2] मोदश्च B_1, K_5, W_2, Y. [3] प्रीणने I, K_1. [4] प्रकर्षेण मदयति D_1. [5] ‘मदी हर्षग्लपनयो:’ K_5. [6] शान्तमिति पाठे I. [7] उपरमे W_2, Y; उपशमने K_5, W_1. [8] अनेन T.

(पा.) मुत् प्रीतिः—सुखानि च। शर्मसाहचर्यात् शातम्। ‘शितं[1] शातं च निशिते कृशे शान्तं च शर्मणि’ इति विश्वप्रकाशिका (पृ. ५७, श्लो. ९)। सुखसाहचर्यात् [2]सातम्। ‘सूतिः साततता[3] तु सा’ इति देवीशतकम्। एतानि सुखनामानि॥ २५॥

---

[1] निशिते शितं कृशे शातं A_1. [2] B_3 adds च. [3] सूतिस्ततो (श्लो॰ ९३).

श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम् ।
भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियाम् ॥ २६ ॥
शस्तं चाथ त्रिषु द्रव्ये पापं पुण्यं सुखादि च ।

(वि.) श्वःश्रेयसमिति—श्वः आगामि श्रेयोऽत्र श्वःश्रेयसम् । [1]अरिष्टं शिनोति तनूकरोतीति शिवम् । 'शिञ् [2]निशाने'। भन्दते [3]भद्रम् । 'भदि कल्याणे'। कल्यं नीरुजत्वमणति कल्याणम् । 'अण [4]शब्दे'। [5]मङ्गति सुखं लातीति मङ्गलम् । 'मगि गतौ'। 'ला दाने'। शोभते शुभम् । [6]'शुभ दीप्तौ'। भवतीति भावुकम्[7] । प्रशस्तो भवोऽत्र भविकम् । भवनार्हं [8]भव्यम् । कुत्सितं श्यतीति कुशलम् । कुशान् लातीति[9] वा । 'शो तनूकरणे'। क्षिणोति [10]क्लेशमिति क्षेमम् । 'क्षिणु हिंसायाम्'। शस्यते स्मेति[11] शस्तम् । 'शंसु स्तुतौ'। शुभनामानि ॥ पापपुण्यसुखादिशब्दाः द्रव्ये गुणिनि त्रिषु वर्तन्ते ॥ २६ ॥

[1] अनिष्टं A. [2] निशातने A, B₁, T, W₁. [3] भं बन्धं दत्ते B₁. [4] गतौ A, B₁, T. [5] मङ्गं A, B₁, T; मङ्गतीति मङ्गं D₁. [6] 'शुभ शुम्भ शोभने' I, U, W₁. [7] D₁ adds 'भू सत्तायाम्'. [8] भवितुं योग्यम् B₂. [9] 'ला आदाने' D₁. [10] अशुभं W₁. [11] अस्मिन् K₁.

(पा.) श्वःश्रेयसं—भव्यम् । शुभनामानि ॥ कुशलं—शस्तं च । क्षेमनामानि ॥ अथ—सुखादि च । पापपुण्यशब्दाः सुखादिशब्दाश्च द्रव्ये त्रिलिङ्गा भवन्ति । 'पापा ऋतुमती कन्या पापो राजाप्यरक्षकः'। पापग्रहणमर्थपरमिति[1] कतिचित् कथयन्ति । दुष्कृतोऽयं व्यापारः । कल्मषोऽयममेध्याहारः[2] । पुण्यं तीर्थमिदम् । पुण्या नदी । पुण्योऽयमाश्रमः । 'सुखं कामिकुलं द्रव्यात् सुखो वासः सहाम्बया'। सुखादयः स्वार्थप्रधानाश्चेन्निजलिङ्गा एव । दारिद्र्येऽपि धनित्वेऽपि वशः परिजनः सुखम् ॥ २६ ॥

[1] °प्रधानं A₁. [2] °आहरः A₁.

मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ ॥ २७ ॥
प्रशस्तवाचकान्यमून्ययः शुभावहो विधिः ।
दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः ॥ २८ ॥

(वि.) मतल्लिकेति—मतल्लिका, मचर्चिका, प्रकाण्डम् अस्त्री, उद्धः, तल्लजः, अमूनि प्रशस्तवाचकानि[1] । अश्वमतल्लिका प्रशस्ताश्च इत्यर्थः[2] । प्रशस्तः पुरुषः पुरुष-

तल्लजः । शुभमेत्यनेन [3]अयः । शुभावहविधिनाम ॥ देवस्येदं दैवम् । शुभाशुभं दिशतीति दिष्टम् । 'दिश अतिसर्जने'। [4]भगस्य ऐश्वर्यस्येदं भागम् । भागमेव भागधेयम् । भजनीयं [5]भाग्यम् । 'भज सेवायाम्'। नियम्यतेऽनया पुरुष इति नियतिः । [6]'यम उपरमे'। विधीयते प्रेर्यतेऽनेन विधिः[7]। अयं पुमान् । [8]शुभाशुभफलनिमित्तदैवनामानि[9] ॥ २७–८ ॥

---

[1] निरस्तावयवान्येतानि W_1. [2] ब्राह्मणमचर्चिका प्रशस्तो ब्राह्मणः । गोप्रकाण्डं प्रशस्ता गौः B_1, K_5, W_2, Y; गजोद्धः प्रशस्तो गज इत्यर्थः । पुरुषतल्लज इति नित्यसमासः W_1; कुमारीतल्लजः प्रशस्ता कुमारीत्यादि W_2. [3] I, W_1 add 'इण् गतौ'. [4] भजति ऐश्वर्यमनेन भगं B_1, K_5, Y. [5] भागोऽत्रास्तीति वा B_1, K_5, U, Y. [6] 'यम उपशमने D_1. [7] D_1, I add 'डुधाञ् धारणपोषणयोः' [8] °फलप्रद° B_2. [9] °देवनिमित्तानां W_2.

(पा.) मतल्लिका—अमूनि । मतल्लिकादीनि पदानि प्रशस्तवाचकानि[1] भवन्ति । यस्य कस्यचिद्विशेषणानि सन्त्यपि आविष्टलिङ्गान्येव । अश्वो मतल्लिका अश्वमतल्लिका । प्रशस्ताश्व इत्यर्थः । गोप्रकाण्डम् । पुरुषतल्लजः । प्रशस्तपुरुष इत्यर्थः । पुरुषमतल्लिका इत्यादि । प्रकाण्डमस्त्री । 'प्रकाण्डोऽस्त्री पुमानुद्धः' इति [2]त्रिकाण्डशेषः ॥ अयः—विधिः । शुभावहदैवम् अय इत्युच्यते[3] ॥ दैवं—विधिः । दैवनामानि ॥ 'भविष्यं भवितव्यं च'। एते च । भागधेयशब्दव्युत्पत्त्या भागशब्दसिद्धिः ॥ २७–८ ॥

---

[1] °नामानि B_3. [2] मुद्रितग्रन्थे न दृश्यते. [3] A_1 adds तद्विपरीतः अनयः । तदुभयात्मकोऽयं नयः.

हेतुर्ना कारणं बीजं निदानं त्वादिकारणम् ।
क्षेत्रज्ञ आत्मा पुरुषः प्रधानं प्रकृतिः स्त्रियाम् ॥ २९ ॥

(वि.) हेतुरिति—हिनोति वर्धते[1] हेतुः[2] । 'हि गतौ वृद्धौ च'। कार्यतेऽनेन कारणम्[3] । बीज्यतेऽनेन[4] बीजम् । 'बीज रोहणे'। निमित्तनामानि ॥ [5]निदीयते निदानम् । 'दाण् दाने'। [6]मूलनिमित्तनाम ॥ क्षीयत इति क्षेत्रम् । 'क्षि निवासगत्योः' 'क्षि क्षये' वा धातुः । क्षेत्रं शरीरं जानातीति क्षेत्रज्ञः । 'ज्ञा अवबोधने'। अत्ति स्वकृतं शुभाशुभम्[7] आत्मा । 'अद भक्षणे'। अतति शरीरेषु [8]संवसतीति वा । 'अत सातत्यगमने'। पुरि देहे सीदति[9] तिष्ठतीति पुरुषः । 'षद्लृ विशरणगत्यवसादनेषु'। देहादिकं पिपर्तीति वा । 'पॄ पालनपूरणयोः'। अहंप्रत्ययस्य विषयिणो जीवात्मनो[10] नामानि ॥ प्रधत्ते [11]सर्वं प्रधानम्[12] । पृथक् क्रियते [13]आत्मन इति वा । प्रारम्भः[14] क्रियतेऽनया प्रकृतिः । प्रकृतिनाम ॥ २९ ॥

[1] B_2 adds अनेनेति. [2] अयं पुंलिङ्गः D_1, I. [3] D_1 adds 'डुकृञ् करणे'. [4] B_1, K_5 add साध्यं प्राप्यते ; विज्यते D_1. [5] नितरां दीयते B_2. [6] एतत्तु मूलकारणनाम D_2, I; आदिकारण° D_1. [7] A adds कर्म. [8] संभवति K_5. [9] शेते वसतीति वा W_1, Y; शरीरे for देहे in B_1. [10] क्षेत्रज्ञस्य D_2. [11] सत्यं A, B_1, T. [12] 'डुधाञ् धारणपोषणयोः' A. [13] आत्मा I, W_1. [14] प्रारम्भाः क्रियन्ते A, B_1, T; B_2, Y add 'डुकृञ् करणे'.

(पा.) हेतुर्ना—बीजम् । कारणनामानि ।। निदानं त्वादिकारणम् । आदिकारणं निदानं स्यात् ।। क्षेत्रज्ञः—पुरुषः । आत्मतत्त्वनामानि ।। प्रधानं—स्त्रियाम् । प्रकृतितत्त्वनामानि ।। २९ ।।

विशेषः कालिकोऽवस्था गुणाः सत्त्वं रजस्तमः ।
जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः ।। ३० ।।

(वि.) विशेष इति—[1]अविकृतौ तिष्ठतीत्यवस्था । 'ष्ठा गतिनिवृत्तौ' । कालकृतयौवनादिविशेषनाम ।। सतो भावः सत्त्वम् । प्रकाशज्ञानहेतुः । [2]रागात्मनि दुःखहेतुत्वात् रजः । ताम्यत्यनेन तमः । 'तमु ग्लानौ' । गुणाभिधानप्रकृतिधर्मनामानि ।। जन्यतेऽनेन जनुः । सान्तोऽयम्[3] । जननं च । जन्म च । जनिश्च[4] । 'जनी प्रादुर्भावे' ।। [5]उत्पत्स्यते इत्युत्पत्तिः । 'पद्लृ गतौ' । उद्भवतीत्युद्भवः । 'भू सत्तायाम्' । जन्मनामानि ।। ३० ।।

[1] अवधिकृतौ Y. [2] रागात्मापि B_2. [3] सान्तमिदं पदम् B_2. [4] जनिशब्दः स्त्रीलिङ्गे B_2. [5] उत्पद्यते K_2.

(पा.) विशेषः कालिकोऽवस्था । कालकृतविशेषोऽवस्था स्यात् । बाल्यजरादि ।। गुणाः—तमः । सत्त्वरजस्तमांसि प्रकृतिगुणा इत्युच्यन्ते ।। जनुः—उद्भवः । जन्मनामानि ।। जनिशब्दोऽर्धर्चादिपाठादुत्पत्तिलिङ्गभागुद्भवलिङ्गभाक् च भवति । उभयत्रोदाहरणम्—

'कर्त्रादिना जनिरियं च न युक्तरूपा' ।
'तस्या वा जनिरस्तु मातरवमा जीवस्य मा जीवतो
भूयाद्वा जननिः किमम्ब जनिना जन्तोर्वृथा जन्मनः' ।

इति । अनुक्तम्—'संसारस्त्वाजवं जवः (?)' । संसारनामानि ।। ३० ।।

प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः ।
जातिर्जातं च सामान्यं व्यक्तिस्तु पृथगात्मता ॥ ३१ ॥
चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः ॥

इति कालवर्गः

(वि.) प्राणीति—प्राणोऽस्यास्तीति प्राणी। चेततीति चेतनः। 'चिती संज्ञाने'। जन्मास्यास्तीति जन्मी। जायते जन्तुः। जन्युश्च। 'जनी प्रादुर्भावे'। शरीरमस्यास्तीति शरीरी। प्राणिनामानि॥ जायते जातिः। जातं च। 'जनी प्रादुर्भावे'। समानस्य भावः सामान्यम्। जातिनामानि॥ व्यज्यत इति व्यक्तिः। पृथगात्मनो भावः पृथगात्मता। व्यक्तिनामनी॥ चेतयतेऽनेन चित्तम्। चेतश्च। 'चिती संज्ञाने'। 'चिचिन्तायाम्'। [1]विषयैः ह्रियते हृदयम्। [2]हृच्च। 'हृञ् हरणे'। [3]शोभनोऽन्तो यस्य स्वान्तम्। स्वनतीति वा स्वान्तम्। 'स्वन शब्दे'। मन एव मानसम्। [4]मन्यतेऽनेन मनः। 'मन ज्ञाने'। मनोनामानि॥ ३१॥

इति श्रीलिङ्गयसूरिविरचितायाममरकोशपदविवृतौ कालवर्गः

[1] विषयेषु K_2.　　[2] विषयैः ह्रियते हृत् Y.　　[3] शोभनमन्तं K_1, K_2, K_3, W_1.
[4] मन्यते मनः A, B_1, T.

(पा.) प्राणी—शरीरिणः। प्राणिनामानि॥ जातिः—सामान्यम्। जातिनामानि॥ व्यक्तिस्तु पृथगात्मता। व्यक्तिनामनी॥ चित्तं—मनः। अन्तःकरणनामानि॥ 'स्वान्तमास्वनितं चित्तं चेतोऽन्तःकरणं मनः' इति धनंजयः॥ ३१॥

इति श्रीवत्स[1]नृसिंहसूरिसुतमल्लिनाथसूरिविरचितेऽमरपदपारिजाते कालवर्गः

[1] नरसिंह° A_1.

---

५. धीवर्गः

बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः ।
प्रेक्षोपलब्धिश्चित् संवित् प्रतिपज्ज्ञप्तिचेतनाः ॥ १ ॥

धीर्धारणावती मेधा संकल्पः कर्म मानसम् ।
(अवधानं समाधानं प्रणिधानं तथैव च ।)

(वि.) बुद्धिरिति—बुध्यतेऽनया बुद्धिः । 'बुध अवगमने'। मन्यते मनीषा। 'मन ज्ञाने'। [1]मनस ईषावत् लाङ्गलदण्डवत् संबन्धाद्वा। धृष्णोतीति धिषणा। 'ञिधृषा प्रागल्भ्ये'। ध्यायतेऽनया धीः। 'ध्यै चिन्तायाम्'। प्रज्ञायतेऽनया प्रज्ञा। 'ज्ञा अवबोधने'। शेयं मोहं मुष्णातीति शेमुषी। 'मुष स्तेये'। मन्यतेऽनयेति[2] मतिः। 'मन ज्ञाने'। [3]प्रेक्षते यया प्रेक्षा। 'ईक्ष दर्शने'। उपलभ्यतेऽनयेति[4] उपलब्धिः। 'डुलभष् प्राप्तौ'। चेतन्त्यनयेति [5]चित्। 'चिती संज्ञाने'। अनया सम्यग्वेत्तीति संवित्। 'विद ज्ञाने'। प्रतिपद्यतेऽनया प्रतिपत्। 'पद्ऌ गतौ'। ज्ञायतेऽनया ज्ञप्तिः। 'ज्ञा अवबोधने'। चेतयतेऽनया चेतना। बुद्धिनामानि ॥ मेधते सर्वमनुभूतमस्यामिति मेधा। 'मेधृ संगमे'। [6]स्मृतिमद्बुद्धिनाम ॥ सम्यक् [7]क्लृप्यतेऽनेनेति [8]संकल्पः। '[9]कृपू सामर्थ्ये'। मानसव्यापारनाम ॥ १ ॥

(पा.) बुद्धिर्मनीषा—शेमुषी। ताळव्यादिः। मतिः—चेतनाः। बुद्धिनामानि। 'प्रतिभोपलभा पण्डा'। एतानि च ॥ धीः—मेधा। धारणगुणयुक्ता धीर्मेधा स्यात्।

'षोढा धीस्तत्त्वधीः पण्डा मेधा धीर्धारणक्षमा ।
ऊहापोहक्षमा चार्वी गृहीतिर्ग्रहणक्षमा ॥
शुश्रूषा बहुला श्रौती श्रवणज्ञा तु चत्वरी ॥'

इति षड्विधबुद्धीनां मध्ये एका ॥ संकल्पः कर्म मानसम्। मानसव्यापारः संकल्पः ॥ १ ॥

चित्ताभोगो मनस्कारश्चर्चा संख्या विचारणा ॥ २ ॥
(विमर्शो भावना चैव वासना च निगद्यते ।)
अध्याहारस्तर्क ऊहो विचिकित्सा तु संशयः ।
संदेहद्वापरौ चाथ समौ निर्णयनिश्चयौ ॥ ३ ॥

---

[1] मनसः ईषा D_2, K_1, K_2. [2] A, B_1, T omit अनया. [3] प्रेक्ष्यते B_1, W_2. [4] यया B_2, D_2, I, K_1, K_2, W_1. [5] चेतयते यया B_2, D_2, K_1, Y. [6] अतिबुद्धिनाम B_1, W_2. [7] कल्प्यते D_1, D_2, W_2; कल्पते A, B_1, T. [8] इदमहं कुर्यामिति मनसो व्यापारः संकल्पः D_1. [9] 'क्लृप क्लृप्तौ' A, T, W_1.

(वि.) चित्ताभोग इति—चित्तस्य आभोगः [1]परिपूर्णता चित्ताभोगः। मनसि करोतीति मनस्कारः। मनःपरिपूर्णतानाम ॥ चर्च्यतेऽनया चर्चा। 'चर्च अध्ययने'। [2]संख्यायतेऽनयेति संख्या। 'ख्या प्रकथने'। विचार्यतेऽनया विचारणा[3]। परामर्शनामानि ॥ अध्याहरतीति अध्याहारः। 'हृञ् हरणे'। [4]तरन्त्यनेन संशयविपर्ययाविति तर्कः। 'तॄ प्लवनतरणयोः'। ऊह्यते अनेनेति ऊहः। 'ऊह वितर्के'। युक्तिप्रज्ञानामानि ॥ विचिकित्सतीति[5] विचिकित्सा। 'कित निवासे रोगापनयने च'। [6]उभयकोटौ संशेते इति संशयः। 'शीङ् स्वप्ने'। संदेग्धि[7] सम्यक् बध्नातीति संदेहः। 'दिह उपचये'। स्थाणुर्वा पुरुषो वेति द्वौ पक्षौ परौ [8]प्रधानभूतावस्मिन्निति द्वापरः। संदेहनामानि ॥ पुरुषसंदेहाभावं[9] नितरां [10]नयतीति निर्णयः। 'णीञ् प्रापणे'। निश्चिनोतीति निश्चयः। 'चिञ् चयने'। [11]इदमित्थमिति बुद्धिनामनी ॥ २–३ ॥

---

[1] °पूरणता K_2. [2] सम्यक् ख्यायते B_2. [3] Y adds 'विचिर् पृथग्भावे'. [4] तरति K_1, K_2, W_1. [5] विविधं स्थापयितुमिच्छति B_2. [6] उभयोः रूपयोः B_1. [7] संदिग्धे W_2. [8] प्रसक्तौ B_2. [9] °संदेहभावं K_1. [10] निर्णयति A. [11] निश्चितबुद्धिनामानि B_1.

(पा.) चित्ताभोगो मनस्कारः। चित्ताभोगश्चित्तयत्नः। 'आभोगो यत्नपूर्णता' इति वैजयन्ती (पृ. २३९, श्लो. ७)। स मनस्कारः स्यात्। तं मनस्कारं मनसि कारमित्युभयथा [1]कथयन्ति ॥ चर्चा—विचारणा। मीमांसानामानि ॥ 'मीमांसा स्याद् विचारणा' इति हलायुधः (अ. मा. १. १०) ॥ अध्याहारः—ऊहः। [2]तर्कनामानि ॥ विचिकित्सा—द्वापरौ च। संशयनामानि। 'वितर्को विशयः शङ्का'। एतानि च ॥ अथ—निश्चयौ। निश्चयनामनी ॥ 'निर्धारणा परिच्छित्तिः'। एते च ॥ २–३ ॥

---

[1] वदन्ति B_3. [2] तर्कस्य A_1.

मिथ्यादृष्टिर्नास्तिकता व्यापादो द्रोहचिन्तनम्।
समौ सिद्धान्तराद्धान्तौ भ्रान्तिर्मिथ्यामतिर्भ्रमः ॥ ४ ॥

(वि.) मिथ्येति—मिथ्या चासौ दृष्टिश्च मिथ्यादृष्टिः। नास्ति परलोक इति मतिर्यस्य सः नास्तिकः। तस्य भावो नास्तिकता। परलोकाभावबुद्धिनामनी ॥ व्यापाद्यतेऽनेनेति [1]व्यापादः। 'पद गतौ'। द्रोहस्य चिन्तनं द्रोहचिन्तनम्। जिघांसाचिन्तानामनी ॥ सिद्धः अन्तो निश्चयोऽत्र सिद्धान्तः। राद्धः[2] अन्तो [3]यस्य राद्धान्त.[4]। निर्णयविशेषनामनी ॥ भ्राम्यतेऽनयेति भ्रान्तिः। भ्रमश्च। 'भ्रमु चलने'। 'भ्रमु अनवस्थाने' इति वा धातुः। मिथ्या चासौ मतिश्च मिथ्यामतिः। [5]अतस्मिन् तद्बुद्धिनामानि ॥ ४ ॥

[1] विशेषेण आपद् क्रियतेऽस्मिन्निति B_2. [2] W_1 adds सिद्धः. [3] K_3 adds निश्चयः. [4] B_2 adds 'राध संसिद्धौ'. [5] भ्रमनामानि B_2; °तदिति बुद्धि° W_2.

(पा.) मिथ्यादृष्टिर्नास्तिकता। नास्तिक्यनामनी ॥ व्यापादो द्रोहचिन्तनम्। [1]द्रोहचिन्तानाम ॥ समौ—राद्धान्तौ। स्थिरपक्षनामनी ॥ भ्रान्तिः—भ्रमः। [2]अयथार्थज्ञाननामानि ॥ 'संकेतस्तु समयः'। देवदत्तडित्थादिव्यवहारनामनी। 'अथाप्रतिपत्तिर्विहस्तता'। इतिकर्तव्यतावैकल्यनामनी।

'स्नाता तिष्ठति मण्डलाधिपसुता वारोऽङ्गराजस्वसु-
र्द्यूते रात्रिरियं जिता कमलया देवी प्रसाद्याद्य[3] च।
इत्यन्तःपुरसुन्दरीपरिजनैर्विज्ञाय विज्ञापिते
देवेनाप्रतिपत्तिमूढमनसा द्वित्राः स्थिता नाडिकाः ॥' *

इति ॥ ४ ॥

---

[1] व्यापाद इत्युच्यते A_1. [2] रज्जौ सर्पग्रहः, सर्पे रज्जुबुद्धिः इत्यादिनाम A_1. [3] अधुना B_3.

* Quoted in *alamkāra* works with कुन्तलेश्वर for मण्डलाधिप.

संविदागूः प्रतिज्ञानं नियमाश्रवसंश्रवाः।
अङ्गीकाराभ्युपगमप्रतिश्रवसमाधयः ॥ ५ ॥

(वि.) संविदिति—संविद्यतेऽनया संवित्। 'विद ज्ञाने'। [1]आगमनं संवेदनम् आगूः। ऊकारान्तः। आगुरते वा आगूः। 'गुरी उद्यमने'। रेफान्तः स्त्रीलिङ्गः। प्रतिज्ञायतेऽनेन [2]प्रतिज्ञानम्। नियम्यते [3]नियमः। 'यम उपरमे'। [4]आश्रृणोतीत्याश्रवः। [5]संश्रवश्च। प्रतिश्रवश्च। 'श्रु श्रवणे'। [6]अङ्गीकरणमङ्गीकारः। अभ्युपगमनम् [7]अभ्युपगमः। समाधीयते [8]समाधिः। 'डुधाञ् धारणपोषणयोः'। संप्रतिपत्तिनामानि[9] ॥ ५ ॥

---

[1] आगमं A, B_1, T; आगतं D_1; प्रतिज्ञानिर्वर्तनपर्यन्तं या क्रिया B_2. [2] यस्मिन् प्रतिजानाति तत् B_2; W_1 adds 'ज्ञा अवबोधने'. [3] यस्मिन् नितरां यम्यतेऽनेन इतरव्यापार इति B_2. [4] B_2 adds समन्तात्. [5] संश्रृणोतीति Y. [6] अङ्गीकरोति यस्मिन् विषये, 'डुकृञ् करणे' B_2. [7] यस्मिन् विषयेऽभ्युपगम्यते सः, 'गम्लृ गतौ', प्रतिश्रृणोतीति प्रतिश्रवः, धातुः पूर्ववत् B_2. [8] यस्मिन् तत्रत्यधर्मः B_2. [9] संमति° B_2.

(पा.) संविदागूः। आगूरिति [1]पक्षे रेफान्तस्त्रीलिङ्गः, ऊकारान्तो वा॥ प्रतिज्ञानम्। पुनर्ज्ञाननामानि॥ नियम—समाधयः। अङ्गीकारनामानि॥ ५॥

[1] A_1 adds अत्र संवित् आगूः संविदागूरिति विकल्पयन्ति.

मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः।
मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम्॥ ६॥
मोक्षेऽपवर्गोऽथाज्ञानमविद्याहंमतिः स्त्रियाम्।

(वि.) मोक्ष इति—ज्ञायतेऽनेन ज्ञानम्। 'ज्ञा अवबोधने'। मोक्षबुद्धिनाम॥ [1]विरूपं ज्ञानं विज्ञानम्। [2]शिल्पशास्त्रादिबुद्धिनाम॥ आत्मनः पाशाभ्यां [3]मुक्तत्वं मुक्तिः। आत्मानं [4]पाशेभ्यो मोचयतीति वा। 'मुच्ॢ मोक्षणे'। केवलावस्था[5] कैवल्यम्। निर्वाति [6]निष्प्रपञ्चं गच्छत्यस्मिन्निति निर्वाणम्। निर्वान्ति सर्वाणि कर्माणि अत्रेति वा। 'वा गतिगन्धनयोः'। अतिशयेन प्रशस्यं [7]श्रेयः। निश्चितं श्रेयोऽत्र निश्रेयसम्। नास्ति मृतं मरणमस्मिन्निति अमृतम्। आत्मानं पाशेभ्यो मोचयतीति मोक्षः। [8]मोक्षते वा अस्मान् मोक्षः। 'मोक्ष निरसने'। पाशेभ्योऽपवर्जनम्[9] अपवर्गः। 'वृजी वर्जने'। मोक्षनामानि॥ विरुद्धं ज्ञानम्[10] अज्ञानम्। विरुद्धा[11] विद्या अविद्या। अहमित्यव्ययम्। अहमिति मतिः अहंमतिः। अनात्मनि देहादावहंबुद्धिनामानि[12]॥ ६॥

[1] विज्ञायतेऽनेन D_2, I, K_1, W_1; विशेषेण ज्ञायते B_2, Y. [2] शिल्पि° A, D_1: [3] मोचनं W_1. [4] पापेभ्यो D_1, I. [5] केवलावस्थायाः यो भावः B_2. [6] निःस्पृहो यो गच्छति W_2. [7] प्रशस्यतेतरां W_2, Y. [8] मोक्ष्यतेऽस्मिन् B_1, K_5. [9] अपवर्ज्यते B_2, I, K_5; °वर्जितः A, B_1, D_1. [10] W_2 adds अस्मिन्निति. [11] विरुध्यतेऽनया B_1. [12] अहमिति Y.

(पा.) मोक्षे धीर्ज्ञानम्। मोक्षविषया धीः बुद्धिर्ज्ञानं स्यात्॥ अन्यत्र—शास्त्रयोः। तदतिरिक्तकलाशास्त्रविषया[1] बुद्धिर्विज्ञानं स्यात्॥ मुक्तिः—अपवर्गः। मोक्षनामानि॥ अथाज्ञानम्—स्त्रियाम्। विषयेन्द्रियादौ आत्मबुद्धिनामानि॥ ६॥

[1] °कलाविषया A_1.

रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी॥ ७॥
गोचरा इन्द्रियार्थाश्च हृषीकं विषयीन्द्रियम्।
कर्मेन्द्रियं तु पाय्वादि मनोनेत्रादि धीन्द्रियम्॥ ८॥

(वि.) रूपमिति—रूप्यते चक्षुषा निरूप्यते रूपम्। 'रूप [1]रूपक्रियायाम्'। [2]शपं ददातीति शब्दः। 'शप आक्रोशे'। गं गमनं धयतीति गन्धः। 'धेट् पाने'। गन्ध्यतेऽनेनेति वा। 'गन्ध अर्दने'। [3]रस्यतेऽनेनेति रसः। 'रस आस्वादने'। स्पृश्यते स्पर्शः। 'स्पृश संस्पर्शने'। अमी पञ्च विषयगोचरेन्द्रियार्थनामानो भवन्ति॥ [4]विसिन्वन्ति बध्नन्ति स्वानुभवाय पुरुषं विषयाः। 'षिञ् बन्धने'। गावः इन्द्रियाणि चरन्त्यत्र गोचराः। 'चर गतिभक्षणयोः'। [5]इन्द्रियैरर्थ्यन्त इति इन्द्रियार्थाः। 'अर्थ उपयाच्ञायाम्'। हृष्यतीति हृषीकम्। 'हृष तुष्टौ'। विषयोऽस्यास्तीति विषयि। [6]इन्द्रस्य आत्मनो लिङ्गम् इन्द्रियम्। इन्द्रियनामानि॥ कर्मणः साधनम् इन्द्रियं कर्मेन्द्रियम्। पायुवाक्पाणिपादोपस्थनामानि॥ धियः साधनमिन्द्रियं धीन्द्रियम्[7]। [8]नेत्रघ्राणरसनत्वक्श्रोत्रपञ्चकस्य नामानि॥ मनस्तूभयात्मकम्॥ ७–८॥

[1] निरूपणे K_2, Y.
[2] शं सुखं पातीति शप्, तं A; शपं सुखकारणं श्रवणादिकं ददातीति शब्दः B_2; D_1, I add 'दा दाने'.
[3] °रसोऽनेन D_2, I.
[4] विषिण्वन्ति D_2, I, T, W_2.
[5] K_2 adds यन्ति.
[6] W_1 adds तनोः.
[7] मनोनेत्रादि W_2.
[8] °रसना° Y.

(पा.) रूपं—इन्द्रियार्थाश्च। [1]रूपादीनां पञ्चानां नामानि॥ हृषीकं—इन्द्रियम्। इन्द्रियसामान्यनामानि। पूर्वापरसाहचर्याद् विषयिशब्दो नपुंसकः।

'विषयी राज्ञि कन्दर्पे विषयस्थजने च[2] ना।
अर्थवद्विषयोपेत इन्द्रिये तु नपुंसकम्॥'

इति वैजयन्ती (पृ. २६३, श्लो. ७५-६)॥ कर्मेन्द्रियं—धीन्द्रियम्। पायूपस्थपाणिपादवाचः[3] पञ्च कर्मेन्द्रियाणि। [4]नेत्रश्रोत्रजिह्वाघ्राणत्वचः पञ्च बुद्धीन्द्रियाणि। काकाक्षिन्यायान्मनः कर्मेन्द्रिय बुद्धीन्द्रियं च भवति॥ ७–८॥

[1] रूपादयः पञ्च विषयशब्दवाच्याः A_1.
[2] अपि वा A_1, B_4.
[3] वाचाः A_1.
[4] चक्षुः° B_3.

तुवरस्तु कषायोऽस्त्री मधुरो लवणः कटुः।
तिक्तोऽम्लश्च रसाः पुंसि तद्वत्सु षडमी त्रिषु॥ ९॥

(वि.) तुवर इति—[1]तौति [2]हृदयमिति तुवरः। 'तु गतिवृद्धिहिंसासु[3]'। कषति पित्तमिति कषायः। 'कष हिंसायाम्'। खदिरादिरसनामनी[4]॥ मधु माधुर्यम् अस्यास्तीति [5]मधुरः। इक्ष्वादिरसनाम॥ लुनाति [6]वातं लवणः। 'लूञ् छेदने'। सैन्धवादिरसनाम॥

कटति क्रिमिविषादि गच्छत्यनेन कटुः। 'कटी गतौ'। शुण्ठ्यादिरसनाम ॥ [7]श्लेष्माणं तेजयतीति तिक्तः। 'तिज [8]निशाने'। निम्बादिरसनाम ॥ वातममति रुजतीत्यम्ब्लः। अम्ल इति वा पाठः। 'अम रोगे'। अम्बते [9]मुखशब्दहेतुर्भवतीति अम्ब्लः। 'अबि शब्दे'। जम्बीरादिरसनाम ॥ अमी षड् गुणेषु पुंसि, तद्वत्सु[10] विशेष्येषु त्रिषु वर्तन्ते ॥ ९ ॥

[1] तवीति A. [2] रसनेन्द्रियं U. [3] 'तु वृद्धिहिंसयोः' A, B_1, T. [4] U, W_2 add °जन्य°. [5] मश्नाति वातं A, B_1. [6] पातुं B_1. [7] श्लेष्मादि B_1. [8] निशातने 1, K_1, Y. [9] तद्भक्षणेन वाताधिक्यवशात् आक्रोशादिशब्दं करोतीति बाहटशास्त्रप्रसिद्धिः B_2. [10] W_2 adds गुणिषु.

(पा.) तुवरस्तु—रसाः। अत्राद्ये द्वे अपक्वदाडिमादिरसनामनी। 'वोगरुपेरु'॥ मधुर इक्ष्वादिरसनाम। 'तीपिपेरु'॥ लवणः सैन्धवादिरसनाम। 'उप्पुपेरु'॥ कटुः शुण्ठ्यादिरसनाम। 'कारमुपेरु'॥ तिक्तो निम्बादिरसनाम। 'चेंदुपेरु'॥ आम्लः। अम्ब्ल इति वा पाठः। [1]जम्बीरादिरसनाम। 'पुलुसु'॥ एते रसशब्दवाच्याः पुंसि ॥ तद्वत्सु षडमी त्रिषु। षडमी इत्यनेन कषायशब्दं विना रसवत्सु त्रिलिङ्गाः। तुवरा हरीतकी। मधुरं क्षीरम्। इत्यादि ॥ ९ ॥

[1] चिञ्चादि° B_3, B_4.

विमर्दोत्थे परिमलो गन्धे जनमनोहरे।
आमोदः सोऽतिनिर्हारी वाच्यलिङ्गत्वमा गुणात् ॥ १० ॥

(वि.) विमर्दोत्थ इति—सुरभिमाल्यगन्धादिसंमर्दादुत्पन्ने[1] जनमनोहरे गन्धे परिमलः स्यात्। [2]परिमलत इति परिमलः। 'मल मल्ल धारणे'। आ समन्तात् [3]मोदयतीत्यामोदः। 'मुद हर्षे'। दूरव्यापि[4]मनोहारिपरिमलनाम ॥ वाच्यलिङ्गत्वमा गुणात्। गुणवाचिशुक्लशब्दपर्यन्तं वाच्यलिङ्गता [5]भवति ॥ १० ॥

[1] °उल्बणे W_2. [2] परितः मलत इति B_2. [3] मोदतेऽनेन A, B_1, T. [4] °मनोहर° D_1, W_2. [5] स्यात् D_2.

(पा.) विमर्दोत्थे—जनमनोहरे। माल्यसंमर्दोत्पन्नमनोज्ञगन्धनाम[1] ॥ आमोदः सोऽतिनिर्हारी। [2]दूरव्यापिपरिमलनाम ॥ 'आमोदो वापि पद्मस्य'॥ वाच्यलिङ्गत्वमा गुणात्। गुणवचनशुक्लशब्दावधि इतः परं वक्ष्यमाणाः शब्दा वाच्यलिङ्गा भवन्ति ॥ १० ॥

[1] गन्धे च परिमलशब्दो वर्तते। परिमलो मलयजस्य A_1. [2] A_1 adds अतिनिर्हारी गन्ध आमोदः स्यात्.

समाकर्षी तु निर्हारी सुरभिर्घ्राणतर्पणः।
इष्टगन्धः सुगन्धिः स्यादामोदी मुखवासनः॥ ११॥
पूतिगन्धिस्तु दुर्गन्धो विस्रं स्यादामगन्धि यत्।

(वि.) समाकर्षीति—[1]समाकर्षति चित्तमाकर्षतीति समाकर्षी। 'कृष विलेखने'। निर्हरति आकर्षत्यवश्यं चित्तमिति निर्हारी[2]। सम्यगाकर्षणशीलकर्पूरादिगन्धद्रव्यनाम॥ [3]तर्पयितुं सुष्ठु रभते आरभते सुरभिः। 'रभ राभस्ये'। [4]घ्राणतर्पणगन्धद्रव्यनाम॥ शोभनो गन्धो यस्य सुगन्धिः। अपेक्षितगन्धवद्वस्तुनाम॥ आमोदोऽत्रास्तीति आमोदी। मुखं वासयतीति मुखवासनः। मुखवासनयोग्ययक्षकर्दमादेर्नाम[5]॥ दुर्गन्धोऽस्यास्तीति दुर्गन्धिः। [6]पूतिगन्धोऽस्यास्तीति पूतिगन्धिः। दुर्गन्ध इति वा पाठः। दुष्टगन्धिनामानि॥ विस्यति[7] विस्रम्। 'विस उत्सर्गे'। आमगन्धिनो नाम॥ ११॥

---

[1] समाकर्षुं शीलमस्य B_2. [2] 'हृञ् हरणे' D_1. [3] कर्षयितुं K_1, W_2. [4] घ्राणं घ्राणेन्द्रियं तर्पयतीति घ्राणतर्पणः। इष्टो गन्धो यस्य सः इष्टगन्धः B_2. [5] °कर्पूरादिद्रव्यजनितगुलिकादिनाम B_2. [6] पूतिः गन्धः U. [7] उत्सृजति B_1.

(पा.) समाकर्षी—तर्पणः। [1]गन्धद्रव्यनामानि॥ सुरभ्यादयो गन्धविशेषवाचकाश्च भवन्ति। यथा—

'नो जिघ्रासति चम्पकेषु सुरभिं नो चन्दने चन्द्रिकां
नोशीरे मुखवासनं हिमरुचौ नो वासनं पङ्कजे।
नो वा गन्धिकमुत्पले विचकिले नो लिप्सते मङ्गलं
दायं दायमपावृणोति हि शकृद्विस्रार्थिनी मक्षिका॥'

इति॥ इष्टगन्धः—मुखवासनः। अभिलषितगन्धवन्नामानि। 'गन्धस्येदुत्पूतिसुसुरभिभ्यः' (५. ४. १२५) इत्येकवचनग्रहणात् शोभना गन्धा अस्य सुगन्धो वायुरिति भवति॥ पूतिगन्धस्तु दुर्गन्धः। यद्दुष्टगन्धवत् तन्नामनी। दुर्गन्धि इति तु लघुवाच्यधर्मः। [2]तथा च शृङ्गारप्रकाशिका (पृ. ३१०-११) 'द्विविधो वाच्यधर्मः। लघुर्गुरुश्चेति। तत्र बहुव्रीहिणा लघुः। कर्मधारयान्मत्वर्थीयेन गुरुः। तयोरादिमो[3] यथा—

यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
[4]स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु॥

इति (मेघ. १. १)। अन्तिमो यथा—

आ कैलासाद् विसकिसलयच्छेदपाथेयवन्तः
[4]संपत्स्यन्ते नभसि भवतो राजहंसाः सहायाः ॥

इति (मेघ. १. ११)। विस्रं स्यादामगन्धि यत्। यन्मत्स्यादिगन्धवत्तन्नाम[5] ॥ ११ ॥

[1] यो गन्धो घ्राणतर्पणं करोति तन्नामानि A_1.   [2] अस्मिन्नर्थे A_1.   [3] आद्यो B_3.
[4] Pāda omitted in B_3.   [5] A_1 adds °सदृशगन्ध°.

शुक्लशुभ्रशुचिश्वेतविशदश्येतपाण्डराः ॥ १२ ॥
अवदातः सितो गौरो वलक्षो धवलोऽर्जुनः।
हरिणः पाण्डुरः पाण्डुरीषत्पाण्डुस्तु धूसरः ॥ १३ ॥

(वि.) शुक्लेति—शोकति गच्छति मनोऽस्मिन्निति शुक्लः। 'शुक गतौ'। शुक्रेति वा पाठः। शोभत इति शुभ्रः। 'शुभ[1] दीप्तौ'। शोचति [2]शुच्यतीति वा शुचिः। 'शुच शोके'। धातूनामनेकार्थत्वात्[3]। श्वेतते श्वेतः। 'श्विता वर्णे'। श्वयति मनोऽस्मिन्निति वा। 'टुओश्वि गतिवृद्ध्योः'। चित्तं [4]विशतीति विशदः। 'विश प्रवेशने'। श्यायते जनमनांसि गच्छतीति श्येतः। 'श्यैङ् गतौ'। पण्यते स्तूयते पाण्डरः। 'पण व्यवहारे स्तुतौ च'। पण्डते मनोऽस्मिन्निति वा। 'पडि गतौ'। पाण्डुः। पाण्डुरश्च। अवदायते अवदातः। 'दैप् शोधने'। सिनोतीति मनः सितः। 'षिञ् बन्धने'। गुरते मनोऽस्मिन् [5]उद्युङ्क्ते गौरः। 'गुरी उद्यमने'। अवलक्ष्यत इति [6]वलक्षः। 'लक्ष दर्शनाङ्कनयोः'। बलति प्राणित्यनेन[7] बलम्। 'बल प्राणने'। बले रक्षो वा [8]वलक्षः। रेफलोपः। धूयते मलोऽत्रेति धवलः। 'धूञ् कम्पने'। अर्ज्यते सर्वैरित्यर्जुनः। 'अर्ज सर्ज अर्जने'। मनो हरतीति हरिणः। 'हृञ् हरणे'। एतानि क्षीरशङ्खादिसवर्णनामानि ॥ धुनोति कुरूपतया चित्तं [9]धूसरः। 'धूञ् कम्पने'। अव्यक्तधवलनाम ॥ १२–१३ ॥

---

[1] 'शुभ शोभने' I, Y.   [2] शुध्यति B_1, D_2.   [3] B_2 adds एवं व्याख्यातं.
[4] विशदयति W_2; वीनां पक्षिणां शं सुखं ददातीति वा, 'दाण् दाने', विशन्तं प्रवेष्टुकामं दाति खण्डयतीति वा विशदः, 'दोऽवखण्डने', धातूनामनेकार्थत्वात् खण्डनार्थपदस्य क्लेशपरत्वम् B_2.
[5] उद्यमयतीति B_2.   [6] वं वरुणं जलं वा लक्षयति द्रव्यत्वेन करोतीति वलक्षः। तस्य गुणत्वात्। गुणाश्रयं द्रव्यमिति हि द्रव्यलक्षणम् B_2.   [7] सत्त्वगुणेन, तद्बलं रक्षतीति वा B_2.
[8] वबयोरभेदः A, K_2.   [9] यो धूयते च सृज्यते च स धूसरः, ईषत् स्वल्पं पाण्डुः ईषत्पाण्डुः, ईषद्धवलनामानि B_2.

(पा.) शुक्लशुभ्र—पाण्डुः। बलक्ष इति वा। धवलनामानि॥ ईषत्पाण्डुस्तु धूसरः। [1]किंचिद्धवलनाम॥ १२–१३॥

---

[1] अल्प° A_1.

कृष्णे नीलासितश्यामकालश्यामलमेचकाः।
पीतो गौरो हरिद्राभः पालाशो हरितो हरित्॥ १४॥

(वि.) कृष्ण इति—[1]कृषति चित्तमाकर्षतीति कृष्णः। 'कृष विलेखने'। नीलवर्णत्वान्नीलः। 'नील वर्णे'। सितादन्योऽसितः। श्यायते श्यामः। 'श्यैङ् गतौ वृद्धौ च'। [2]कलयति प्रेरयतीति कालः। 'कल किल क्षेपे'। [3]श्यामद्रव्यमत्रास्तीति श्यामलः। [4]मचति वर्णान्तरेण मिश्रीभवितुमर्हतीति मेचकः। 'मच [5]मुचि कल्कने'। मयूरकण्ठादिवर्णनाम॥ पिबति चित्तं पीतः। 'पा पाने'। गुरतीति गौरः। 'गुरी [6]उद्यमे'। [7]हरिद्राया इव आभा यस्य सः हरिद्राभः। हरिद्रादिवर्णनामानि। पलाशवर्णस्यायं [8]पालाशः। हरति मनोऽत्रेति हरितः। हरिच्च। पलाशादिवर्णनामानि॥ १४॥

---

[1] कर्षति B_2, D_1, K_5, U, W_2.
[2] कालयति I, K_5, W_2, Y.
[3] श्यामं Y.
[4] मेचयति . . मिश्रीभवति B_2, D_1, W_2, Y.
[5] 'मच कल शिल्पिसंज्ञयोः' B_2, I, W_2; मच मुचि° Y.
[6] उद्यमने I.
[7] हरिद्राभा इव आभा B_2, K_5.
[8] पलाशस्य वर्णः इव वर्णः पालाशः B_2, U.

(पा.) कृष्णे—मेचकाः। कृष्णवर्णनामानि। 'कल्माषश्च सितेतरः'। एते द्वे च॥ पीतो—हरिद्राभः। हरिद्रावर्णनामानि॥ पालाशो—हरित्। पलाशपत्रसदृशवर्णनामानि॥ १४॥

लोहितो रोहितो रक्तः शोणः कोकनदच्छविः।
अव्यक्तरागस्त्वरुणः श्वेतरक्तस्तु पाटलः॥ १५॥
श्यावः स्यात् कपिशो धूम्रधूमलौ कृष्णलोहिते।

(वि.) लोहित इति—[1]रोहति प्रादुर्भवति संध्यादौ रोहितः। लोहितश्च। 'रुह बीजजन्मनि प्रादुर्भावे च'। [2]रज्यते रक्तः। 'रञ्ज रागे'। शोणतीति शोणः। 'शोणृ वर्णगत्योः'। कोकनदस्य रक्तोत्पलस्येव [3]छविर्यस्य सः कोकनदच्छविः। [4]रक्तोत्पलवर्णनामानि॥ आसां द्रव्यादियर्तिं शीघ्रं गच्छतीत्यरुणः[5]। 'ऋ गतौ'। अव्यक्त-

रागवर्णनाम। [6]पाटलपुष्पवर्णत्वात् पाटलः। श्वेतमिश्ररक्तवर्णनाम॥ श्यायते आगच्छतीति श्यावः। शावो वा। श्यामश्च[7]। कपिवर्णयोगात् कपिशः[8]। वानरवर्णनाम॥ धूमवर्णं रातीति धूम्रः। 'रा दाने'। [9]धूमलः। 'ला दाने'। [10]कृष्णमिश्रितलोहितवर्णनाम॥ १५॥

[1] रोहयति प्रादुर्भावयति B_1, W_2. [2] B_2 adds रूष्यत इति. [3] छविरिव छविः B_2, D_2; U adds वर्णो. [4] रक्तोत्पलादि° U. [5] अर्णोति शीघ्रं गच्छति, 'ऋणु गतौ B_3. [6] पाटलि° D_2. [7] 'श्यैङ् गतौ' I. [8] कपौ शेते वा। 'शीङ् स्वप्ने' इति धातुः B_2. [9] धूमवर्णं लातीति धूमलः B_2, W_2, Y. [10] °मिश्र° W_1, Y.

(पा.) लोहितो—रक्तः। रक्तवर्णनामानि। 'ताम्रो निरक्तो माञ्जिष्ठः'। एतानि च। शोणः कोकनदच्छविः। रक्तोत्पलच्छवी[1] रक्तवर्णः शोण इत्युच्यते॥ अव्यक्तरागस्त्वरुणः। अव्यक्तरागः[2] रक्तवर्णोऽरुणः स्यात्॥ श्वेतरक्तस्तु पाटलः। श्वेतमिश्ररक्तवर्णः पाटलः स्यात्[3]॥ श्यावः स्यात् कपिशः। हरिद्रावर्णाधिकरक्तवर्णनामनी। [4]वानरवर्णनामनी वा॥ अनुक्तम्—'पीतरक्तस्तु पिञ्जरः'। रक्तवर्णाधिकहरिद्रावर्णः पिञ्जरः इत्युच्यते[5]॥ धूम्र—लोहिते। कृष्णवर्णाधिकरक्तवर्णनामानि॥ अनुक्तम्—'रक्तकृष्णस्तु जोनलः'। रक्तवर्णाधिककृष्णवर्णः जोनल इत्युच्यते॥ १५॥

[1] °द्युतिः B_3. [2] B_3 omits रागः. [3] इत्युच्यते B_3. [4] कपि° B_3. [5] स्यात् B_3.

कडारः कपिलः पिङ्गपिशङ्गौ कद्रुपिङ्गलौ॥ १६॥
चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे।
गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति॥ १७॥

इति धीवर्गः

(वि.) कडार इति—कडति [1]प्रकर्षेण लक्ष्यत इति कडारः। 'कड [2]लक्षणे'। कपिवर्णं लातीति कपिलः। [3]पिङ्क्ते पिङ्गः। 'पिजि वर्णे'। पिंशतीति पिशङ्गः। 'पिश [4]अवयवे'। कुत्सितं द्रावयतीति कद्रुः। 'द्रा[5] कुत्सायां गतौ'। [6]पिङ्गवर्णं लातीति पिङ्गलः[7]। गोरोचनादिवर्णनाम। चीयन्ते वर्णा अत्रेति चित्रम्[8]। 'चिञ् चयने'। नानावर्णाः कीर्यन्तेऽत्रेति किर्मीरः। 'कॄ विक्षेपे'। कलयति [9]काङ्क्षतीति कल्माषः। [10]कलतिरनेकार्थः। शवति नानावर्णान् शबलः। 'शव गतौ'। एति नानावर्णत्वम् एतः।

Sai ~~474~~·71-418

'इण् गतौ'। कीर्यन्ते नानावर्णा अत्रेति कर्बुरः। नानावर्णद्रव्यनामानि[11] ॥ गुणे[12] शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति। त्रिषु इत्यर्थः ॥ १६–१७ ॥

इति श्रीलिङ्गयसूरिविरचितायाममरकोशपदविवृतौ धीवर्गविवृतिः

[1] कडति प्रतिक्षणं भिन्नवर्णमिव लक्ष्यते B_2.
[2] 'कड बन्धने मदे च' A.
[3] पिञ्जयति मिलति W_1, Y; पिङ्गति B_1, D_1, U; 'पिङ्ग मिलने' K_5, U.
[4] गतौ W_2, Y.
[5] 'द्रु गतौ' Y.
[6] पिङ्गं लाति W_1.
[7] 'ला दाने' D_1.
[8] चीयन्त इति चिताः नानावर्णाः तेऽस्मिन्निति B_2.
[9] B_2, K_5, U, Y add अनेकवर्णान्; °वर्णेन K_1, K_2.
[10] कलिः कामधेनुः B_2.
[11] W_2, Y omit द्रव्य.
[12] शुक्लादयः शब्दाः गुणमात्रे वर्तमानाः पुंसि, पटस्य शुक्लः; गुणवद्वर्तमानाः अभिधेयलिङ्गाः, शुक्लः पटः, शुक्ला शाटी, शुक्लं वस्त्रम् W_1.

(पा.) कडारः—पिङ्गलौ। कपिलवर्णनामानि ॥ चित्रं—कर्बुरे। तिलतण्डुलन्यायेन दृश्यमानमिश्रवर्णनामानि ॥ गुणे—तद्वति। शुक्लादिशब्दा गुणे पुंलिङ्गा भवन्ति। गुणिनि तु त्रिलिङ्गा भवन्ति। अत्र रोहितादिशब्दानां स्त्रीत्वे रूपभेदोऽस्ति।

'रोहिणी रोहिता रक्ता लोहिनी लोहिता च सा।
लोहितिका लोहिनिका रागात् कोपादिनापि वा ॥
शोणी शोणा च पिङ्गा स्यात् पिशङ्गी हरिणी तु या।
हरितैनी तथैता च श्येनी श्येता सिता च सा ॥
नीलैव वस्त्रे वा नाम्नि नीली प्राणिनि चौषधौ।
शबली चैव कल्माषी कल्माषेत्यर्शआद्यचि ॥' १६–१७ ॥

इति [1]श्रीवत्सनृसिंहसूरिसुतमल्लिनाथसूरिविरचितेऽमरपदपारिजाते धीवर्गः

[1] नरसिंह° A_1.

---

६. वाग्वर्गः

ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती।
व्याहार उक्तिर्लपितं भाषितं वचनं वचः ॥ १ ॥

(वि.) ब्राह्मीति—ब्रह्मण इयं ब्राह्मी। [1]विश्वानि [2]भूतानि भ्रियन्तेऽनया भारती। 'भृञ् भरणे'। भरतस्य ब्रह्मण इयं वा। भरतस्य आदित्यस्य [3]प्रभा वा। [4]भाष्यते भाषा। 'भाष व्यक्तायां वाचि'। गृणाति अस्खलितम् उच्चारयति गीः। 'गॄ शब्दे'। गीयते स्तूयते वा। 'गै शब्दे'। उच्यत इति वाक्। 'वच परिभाषणे'। वण्यते स्तूयते वाणी। 'वण शब्दे'। सरः प्रसरणं सर्वत्रास्तीति सरस्वती। सरस्वतीनामानि॥ [5]व्याह्रियते उच्यते व्याहारः। 'हृञ् हरणे'। उच्यते उक्तिः। 'वच परिभाषणे'। लप्यते लपितम्। 'लप व्यक्तायां वाचि'। भाष्यते भाषितम्। 'भाष व्यक्तायां वाचि'। उच्यत इति वचनम्। वचश्च[6]। एतानि वचननामानि॥ १॥

---

[1] B_1, K_5, Y omit. [2] भुवनानि W_2. [3] प्रभा कान्तिर्वा भारती; वाक् तेजोमयीति श्रुतिनिर्णीतत्वात् B_2. [4] स्तूयते A, T; श्रूयते K_5, Y. [5] व्याहरति B_1, W_2, Y. [6] B_2, W_1 add 'वच परिभाषणे'.

(पा.) ब्राह्मी—सरस्वती। [1]सरस्वतीदेवीनामानि॥ इकारान्तवाणिशब्दः आकारान्तवाचाशब्दोऽप्यस्ति[2]। तत्र प्रथमो यथा—'एका [3]वाणिरलंकरोति पुरुषम्' (नी. श. १५) इति। अन्तिमो यथा—'कुठारदण्डः कुलमृत्युरेषा वाचा समीचीनसुवीरधन्वा' इति। व्याहारः—वचः। वचननामानि। सरस्वतीपर्यायं च [4]पठन्ति।

'[5]कवेरपार्था-मधुरा न भारती कथेव कर्णान्तमुपैति भारती।'

इति राघवपाण्डवीये (द्विसं. १. ५)।

'सन्तः क्षतानि जनयन्तु यथेष्टमस्यामाभाति तैरधिकमेव सरस्वती मे।
दन्तक्षतं प्रियतमैरनुभूतिकाले किं मण्डनाय न भवेद् वरसुन्दरीणाम्॥'

इत्यादि॥ १॥

---

[1] वाग्देवता° B_3. [2] शब्दश्च B_3, B_4. [3] वाण्येका, वागेका इति मुद्रितग्रन्थे. [4] भवति A_1. [5] कले: A_1, B_4.

अपभ्रंशोऽपशब्दः स्याच्छास्त्रे शब्दस्तु वाचकः।
तिङ्सुबन्तचयो वाक्यं क्रिया वा कारकान्विता॥ २॥

(वि.) अपभ्रंश इति—वाचम् अपभ्रंशयतीति अपभ्रंशः[1]। 'भ्रंशु अधः[2] पतने' शब्दादपभ्रष्टोऽपशब्दः। [3]शब्दशास्त्राकथितशब्दनामानि॥ शब्दयत्यवगमयत्यर्थमिति शब्दः। 'शब्द आविष्कारे'। [4]वचोयोग्यो वाचकः। शब्दशास्त्रोक्तशब्दनाम॥ तिङां चयः सुपां चयः कारकान्विता क्रिया वा वाक्यं भवति। अर्थबोधाय वक्तव्यं वाक्यम्।

तिङन्तानां चयो यथा—पचति[5] भवतीत्यादि । सुबन्तचयो यथा—[6]ज्ञानेन मौनमित्यादि । क्रिया [7]यथा—गां [8]जलं फलमानयेत्यादि ॥ २ ॥

---

[1] संस्कृतात् अपभ्रंशयति वा B₁, D₁, I, K₅, W₂; अपभ्रश्यते W₁. [2] हिंसायां I, K₅. [3] °शास्त्रात् पतितशब्द° B₂; शपयति अवगमयति अर्थं शब्दः, 'शप गतौ' I, Pt₁, Pt₂. [4] वचसो योग्यः B₂; वाचो° K₅; वक्तुं° W₂. [5] भवति एधते पचतीत्यादि K₅, Y; भाति भवति K₁. [6] ज्ञानं Y. [7] B₂, W₁ add कारकान्विता. [8] गामानय, जलमानयेत्यादि B₂, D₁, K₅, U, Y.

(पा.) अपभ्रंशो—वाचकः । शास्त्रे गालिगोणीत्याद्यपशब्दोऽपभ्रंशः स्यात् । गौरित्यादिर्वाचकः शब्दो भवति । तिङ्—वाक्यम् । [1]एकार्थोपरि तिङन्तसुबन्तसमुदायो वाक्यम् । यथा—

'कतिचन जृम्भन्ते दिशि कतिचन विकसन्ति काननाभोगे ।
कतिचन नृत्यन्ति गिरौ तथापि भवितव्यमेव भवितव्यम् ॥'
'भ्रेमुर्ववल्गुर्ननृतुर्जजक्षुर्जगुः समुत्पुप्लुविरे निषेदुः ।
आस्फोटयांचक्रुरभिप्रणेदू रेजुर्ननन्दुर्वियुः समीयुः[2] ॥' (भट्टि. १३. २८)
'[3]कियत्प्रमाणमुदकं जानुदघ्नं नराधिप ।
तथापीयमवस्था ते न हि सर्वे भवादृशः ॥' (भो. प्र. पृ. ४०, श्लो. १८५)

इत्यादि ॥ क्रिया वा कारकान्विता । कारकसंबद्धक्रियापि वाक्यं भवति । यथा—

'ततः कुमुदनाथेन कामिनीगण्डपाण्डुना ।
नेत्रानन्देन चन्द्रेण माहेन्द्री दिगलंकृता ॥' (म. भार. ७. १५९. ४२)
'मा भवन्तमनलः पवनो वा वारणो मदकलः परशुर्वा ।
वाहिनी जलधरः कुलिशो वा स्वस्ति तेऽस्तु लतया सह वृक्ष ॥'

अत्र बाधिष्ट इति क्रियाध्याहर्तव्या ।

'छायासंतपिताध्वन्यः फलैः पोषितनीडजः ।
हन्त वृक्षो महानेष समिदर्थे विभिद्यते ॥'

अत्र जाल्मेनेति कारकमध्याहार्यम् ॥ २ ॥

---

[1] एकार्थपदः B₃. [2] B₄ adds इति भट्टिकाव्ये. [3] कियन्मानं जलं विप्र इति मुद्रितग्रन्थे.

श्रुतिः स्त्री वेद आम्नायस्त्रयी धर्मस्तु तद्विधिः ।
स्त्रियामृक् सामयजुषी इति वेदास्त्रयस्त्रयी ॥ ३ ॥
शिक्षेत्यादि श्रुतेरङ्गमोंकारप्रणवौ समौ ।

(वि.) श्रुतिरिति—श्रूयेते धर्माधर्मावनयेति श्रुतिः । 'श्रु श्रवणे' । [1]धर्माधर्मौ वेदयतीति वेदः[2] । 'विद ज्ञाने' । आम्नायते[3] पारंपर्येण आम्नायः । 'म्ना अभ्यासे' । ऋग्यजुःसामाख्याः त्रयोऽवयवा[4] यस्याः त्रयी । वेदनामानि[5] ॥ धारयति जगन्तीति धर्मः[6] । वेदोक्तविधिनाम ॥ ऋच्यते स्तूयते ऋक् । 'ऋच स्तुतौ' । पापं[7] स्यतीति साम । 'षोऽन्तकर्मणि' । इज्यतेऽनेन यजुः । 'यज देवपूजासंगतिकरणयजनदानेषु' । इति त्रयो वेदाः । तेषां[8] समाहारः त्रयी । [9]वेदत्रयसमूहनाम ॥ [10]शिक्ष्यतेऽनया [11]वर्णादि शिक्षा । 'शिक्ष विद्योपादाने' । आदिशब्देन [12]अङ्गान्युच्यन्ते ।

> 'शिक्षा व्याकरणं कल्पो निरुक्तं ज्योतिषां [13]गतिः ।
> [14]छन्दोविचितिरित्येतैः षडङ्गो वेद उच्यते ॥'

इति श्रुत्यङ्गनामानि ॥ ओमित्यक्षरम् ओंकारः । [15]प्रणूयते स्तूयतेऽनेनेति प्रणवः । 'णु स्तुतौ' । [16]वेदप्रणवनाम ॥ ३ ॥

---

[1] धर्मादि D_1. [2] श्रुतित्रयं वेदः D_1; विदन्ति धर्मादिकमनेन A. [3] उपदिश्यतेऽनेन धर्मादिः D_1; अभ्यस्यते B_2. [4] तेषां समाहारः त्रयी B_2. [5] वेदत्रयनाम K_3. [6] 'धृञ् धारणे' D_1. [7] पापानि I. [8] इति त्रयाणां A, B_1, T. [9] W_2, Y omit °त्रय°. [10] शिक्षते B_2. [11] आदिवर्णादि A, B_1, T, W_1. [12] अङ्ग्यते (अङ्गति K_5) ज्ञायतेऽनेन अङ्गं B_1, D_1, Y; 'अगि गतौ' I. [13] ज्योतिषं तथा A, B_1, T. [14] छन्दसां लक्षणं चैव B_1, I, K_5, W_2, Y. [15] प्रकर्षेण नूयते B_2. [16] वेदनिष्ठ° B_2; °प्रणववचन° D_1.

(पा.) श्रुतिः—त्रयी । वेदनामानि ॥ धर्मस्तु तद्विधिः । वेदोक्तविधिर्धर्मः स्यात् । स्त्रियाम्—त्रयी । त्रयाणां वेदानां [1]समाहारस्त्रयी । अत्र त्रयीति सामान्याकारेणोक्तम् । शिक्षे—अङ्गम् । शिक्षादीनि वेदाङ्गानि ।

> 'शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषं तथा[2] ।
> छन्दसां विचितिश्चेति षडङ्गो वेद उच्यते' ॥

ओंकारप्रणवौ[3] समौ । प्रणवनामनी[4] ॥ ३ ॥

[1] समुदाय: B_3, B_4. [2] श्रुति: A_1. [3] A_1 adds प्रणमौ इति वा. [4] शिक्षादिपाठस्य प्रणवपूर्वकत्वात् शिक्षाद्यनन्तरकथनम् A_1.

इतिहासः पुरावृत्तमुदात्ताद्यास्त्रयः स्वराः ॥ ४ ॥
आन्वीक्षिकी दण्डनीतिस्तर्कविद्यार्थशास्त्रयोः ।

(वि.) इतिहास इति—[1]इतिह इति पारंपर्योपदेशः आस्तेऽस्मिन्निति इतिहासः। 'आस [2]उपवेशने'। [3]पुरावृत्तनृ[4]पादिचरित्र[5]ग्रन्थसंदर्भनाम ॥ उत् ऊर्ध्वमुन्नीयते[6] उदात्तः[7]। तद्विपरीतः अनुदात्तः। उदात्तानुदात्तयोः समाहारं[8] प्राप्तः स्वरितः। एते त्रयः स्वरा भवन्ति ॥ प्रत्यक्षागमाभ्याम् अवगन्तव्यस्य[9] वस्तुनोऽनु पश्चात् ईक्षणम् अन्वीक्षा,[10] सा प्रयोजनं यस्याः सा आन्वीक्षिकी। अक्षपादादिप्रणीततर्कशास्त्रनाम[11] ॥ [12]दण्डोऽनया नीयते दण्डनीतिः। 'णीञ् प्रापणे'। चाणक्यादिप्रणीतार्थशास्त्रनाम ॥ ४ ॥

[1] इतिहा A, B_1, T; इति हसति B_2; इतिह आसीत् D_1, D_2, I, K_1, W_1. [2] 'अस भुवि क्षेपे' D_2, I, K_1, K_2, K_5, Y. [3] पुरा पूर्वम् उत्पन्नं वृत्तं पुरावृत्तम् B_2. [4] °पृथ्वादिनृप° K_5. [5] °चरित° W_2. [6] आदीयते D_1, K_1, U, W_1, Y. [7] उदात्त: उच्चैर्गीत: आद्य: प्रथमो येषां ते उदात्ताद्या: B_2. [8] समाहार: D_2, K_1, W_1. [9] ईक्षितस्य D_2, K_1, U, W_2. [10] अन्वीक्षणं तत् A, B_2. [11] तर्कशास्त्रादिविद्या° W_2; °तर्कविद्या° D_1, I, K_1, K_5, Y. [12] दण्ड्यतेऽनेन ऊन इति W_2.

(पा.) इतिहासः पुरावृत्तम्। इतिहासनाम ॥ उदात्ताद्यास्त्रयः स्वराः। उदात्तनिहतस्वरिताः[1] स्वराः। आन्वीक्षिकी—शास्त्रयोः। तर्कविद्या वैशेषिकादिः, अर्थशास्त्रं कामन्दकादि। तयोर्यथाक्रमं आन्वीक्षिकीदण्डनीतिशब्दौ वर्तेते। अनुक्तम्—'नामशास्त्रं[2] निघण्टुर्ना'। नामशास्त्रं निघण्टुरित्युच्यते[3] ॥ ४ ॥

[1] °विहत° B_4. [2] A_1 adds कामशास्त्रं. [3] नामशास्त्रनाम B_3.

आख्यायिकोपलब्धार्था पुराणं पञ्चलक्षणम् ॥ ५ ॥
प्रबन्धकल्पना कथा प्रवह्लिका प्रहेलिका ।

(वि.) आख्यायिकेति—आख्यायते वर्तमाननृपादिचरित[1]मित्याख्यायिका[2]। 'ख्या प्रकथने'। [3]हर्षचरितादिग्रन्थसंदर्भनाम ॥ पुरा भवं पुराणम्। पञ्चलक्षणयुक्तं ब्राह्मवैष्णवादिपुराणनाम ॥

‘[4]सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं [5]चेति [6]पुराणं पञ्चलक्षणम् ॥’

[7]अनया कथ्यत इति कथा । ‘कथ वाक्यप्रबन्धे’। रामायणादेर्नाम ॥ प्रवल्हते [8]प्राधान्यं भजते प्रवल्हिका । ‘वल्ह प्राधान्ये’। प्रहेलयति हावयति सूचयति [9]भावार्थमिति प्रहेलिका । ‘हिल [10]भावकरणे’। विरुद्धार्थवचोनामनी ॥ ५ ॥

[1] °चरित्रं B₂, W₂. [2] P₂ adds उपलब्धो ज्ञातोऽर्थो यस्याः सा उपलब्धार्था. [3] प्राचीनचरित्र° B₂; श्रीहर्ष° K₅; वर्तमाननृपचरित्र° A, T. [4] पञ्चलक्षणान्युच्यन्ते B₂; K₅ omits. [5] चैव B₁, W₂. [6] लक्षणानां च पञ्चकम् B₂. [7] B₂ adds प्रबन्धस्य कल्पना रचना. [8] प्रधानं U; अप्राधान्यं Y. [9] नानार्थमिति D₁; ‘वल्ह परिभाषणहिंसाप्रदानेषु प्राधान्ये च’ B₂. [10] हावकरणे A, B₁, T.

(पा.) आख्यायिकोपलब्धार्था। नायकाख्यातनायकोपलब्धार्थवती आख्यायिका । हर्षचरितादि ॥ पुराणं पञ्चलक्षणम् । सर्गप्रतिसर्गादिपञ्चलक्षणोपेतं पुराणम् ।

‘सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तरं तथा ।
वंशानुचरितं चेति पुराणं पञ्चलक्षणम् ॥’

स्कन्दादि ॥ प्रबन्धकल्पना कथा । स्तोकसत्यबह्वसत्ययुक्ता प्रबन्धकल्पना कथा स्यात् । कादम्बर्यादि ॥ प्रवह्लिका प्रहेलिका । गूढनिक्षिप्तार्थस्य कुतुकहेतोः कार्यविशेषस्य नामानि ।

‘[1] अष्टौ श्लोकान् कुरुष्वेति पुत्रः पित्रा नियन्त्रितः ।
सप्त श्लोकाः कृतास्तेन पितुराज्ञा न लङ्घिता’ ॥ ५ ॥

[1] अष्टिरिति वृत्तनाम.

स्मृतिस्तु धर्मसंहिता समाहृतिस्तु संग्रहः ॥ ६ ॥
समस्या तु समासार्था किंवदन्ती जनश्रुतिः ।

(वि.) स्मृतिरिति—स्मर्यतेऽनया स्मृतिः । ‘स्मृ आध्याने’। मन्वादिप्रणीतधर्मसंहितानाम[1] ॥ समाह्रियतेऽनयेति समाहृतिः । संगृह्यते संक्षिप्यते[2] संग्रहः । [3]संक्षिप्तग्रन्थसन्दर्भनाम ॥ समस्यते संक्षिप्यते समस्या । ‘असु [4]क्षेपणे’। [5]कविपरीक्षार्थं दीयमानश्लोकांशनाम ॥ [6]किं परस्परं वदन्त्यत्रेति किंवदन्ती । ‘वद व्यक्तायां वाचि’ । [7]जनैः श्रूयते जनश्रुतिः । ‘श्रु श्रवणे’। लोकप्रवादनामनी ॥ ६ ॥

[1] B_2 adds धर्मेण संहिता. [2] अनेनेति B_2; 'ग्रह उपादाने' B_2, D_1. [3] D_1 omits संदर्भ; संक्षेपग्रन्थनाम B_1, K_5, W_2, Y. [4] क्षेपे W_1. [5] कविता° K_5; श्लोकान्त° W_1; श्लोकान्तपाद° Y. [6] किमिति W_1, Y. [7] W_1 omits 3 lines.

(पा.) स्मृतिस्तु धर्मसंहिता। स्मृतिनाम ॥ समाहृतिस्तु संग्रहः। संग्रहग्रन्थनाम ॥ समस्या तु समस्यार्था। समस्यारूपार्थं प्रहेलिका निक्षिप्तार्थकौतुकवती समस्या। अथवा समस्या तु समासार्था समासशब्दवती समस्या। 'समस्या तु [1]समासः स्यात्' इति वैजयन्ती (पृ. ३४, श्लो. ४०)।

'श्रीभोजेन जितोऽस्मीति चिन्तां चिन्तामणे त्यज।'
'जिता देवद्रुमाः पञ्च न दुःखं पञ्चभिः सह ॥'

किंवदन्ती जनश्रुतिः। जनवादनामनी ॥ ६ ॥

---

[1] समासा A_1, B_3.

वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यादथाह्वयः ॥ ७ ॥
आख्याह्वे अभिधानं च नामधेयं च नाम च।

(वि.) वार्तेति—नृपादिवृत्तिरत्रास्तीति[1] वार्ता। प्रवर्ततेऽत्रेति प्रवृत्तिः। 'वृतु वर्तने'। वृत्तोऽनुवर्तनीयोऽन्तः समाप्तिरस्येति वृत्तान्तः। वृत्तस्यान्तो वा। उद्यते निगद्यते राजादिचरित्रमत्रेत्युदन्तः। 'वद व्यक्तायां वाचि'। वार्तानामानि ॥ अनेन आह्वयन्तीत्याह्वयः। 'ह्वेञ् स्पर्धायां शब्दे च'। आहूयतेऽनेनेति [2]वा। 'हु दानादानयोः'। अनया आख्यायते आख्या। 'ख्या प्रकथने'। आहूयतेऽनया आह्वा। अनेनाभिधीयतेऽभिधानम्[3]। नामैव नामधेयम्। अनेन नमति नाम। 'णम प्रह्वत्वे शब्दे च'। संज्ञानामानि[4] ॥ ७ ॥

---

[1] अस्याः D_2, K_1, K_2. [2] आहूतिश्च A. [3] 'डुधाञ् धारणपोषणयोः' B_2.
[4] Y omits 3 lines.

(पा.) वार्ता—उदन्तः स्यात्। वार्तानामानि। अनुक्तम्—'रथ्यावादस्तु कोहलः'[1]। एते द्वे च। वीथीवार्तानामनी ॥ अथाह्वयः—नाम च। [2]संकेतितशब्दनामानि ॥ ७ ॥

---

[1] काहलः A_1. [2] A_1 adds देवदत्तादौ.

हूतिराकारणाह्वानं संहूतिर्बहुभिः कृता ॥ ८ ॥
विवादो व्यवहारः स्यादुपन्यासस्तु वाङ्मुखम् ।

(वि.) हूतिरिति—अनया हूयते हूतिः । 'हु दानादानयोः' । अनया आकारयन्तीति आकारणा[1] । अनेनाह्वयन्तीत्याह्वानम् । 'ह्वेञ् स्पर्धायां शब्दे च' । अथवा हूतिः आकारणं च आह्वानं च । आकारणाह्वाने इति द्वन्द्वम् । एहीति [2]वचसो नामानि ॥ सम्यक् हूयते संहूतिः । बहुभिः कृतस्य एहीति वचसो नाम ॥ विविधो वादो विवादः[3] । व्यवहरत्यनेन व्यवहारः । 'हृञ् हरणे' । इदं मदीयमिदं मदीयमिति परस्परवादनाम[4] ॥ उपन्यस्यते उपन्यासः । 'असु क्षेपणे' । वाचो मुखं वाङ्मुखम् । वाक्यारम्भनाम ॥ ८ ॥

[1] 'डुकृञ् करणे' B_2.
[2] वचन° D_1.
[3] 'वद व्यक्तायां वाचि' A.
[4] वचन° A; °विवाद° B_1, D_1.

(पा.) हूतिः—आह्वानम् । इत एहीति वचसो नामानि ॥ समासाङ्गीकारपक्षे आकारणशब्दो नपुंसकः । 'आकारणमाह्वानम्' इति हलायुधः (अ. मा. १. १५४) । व्यासाङ्गीकारपक्षे आकारणाशब्दः स्त्रीलिङ्गः । 'हूतिराकारणा हावो[1] । [2]हक्कारामन्त्रणाह्वानम्' इति वैजयन्ती (पृ. ३३, श्लो. ३०) । संहूतिर्बहुभिः कृता । बहुभिः कृतस्य एहीति वचसो नाम । 'बहुभिर्मुहुःकृता हक्का संहूतिरिति भण्यते' इति वा ॥ विवादो व्यवहारः स्यात् । विवादनाम ॥ उपन्यासस्तु वाङ्मुखम् । [3]'यरो ञमि ञम्वेति' ककारस्य विभाषा ङकारः । उपन्यासनाम ॥ ८ ॥

[1] हवः B_3.
[2] आमन्त्रणं ह्वानम् A_1.
[3] 'यरोऽनुनासिके—' (८. ५. ४५).

उपोद्घात उदाहारः शपनं शपथः पुमान् ॥ ९ ॥
प्रश्नोऽनुयोगः पृच्छा च प्रतिवाक्योत्तरे समे ।

(वि.) उपोद्घात इति—उपोद्धन्यते [1]उपोद्घातः । 'हन हिंसागत्योः' । उदाह्रियतेऽनेन उदाहारः[2] । प्रकृतार्थचिन्ताग्रन्थस्य नामनी ॥ उदाहरणनामनी इति केचित् । विचारविषयवाक्यस्येत्यन्ये ॥ शपति आक्रोशतीति शपनम् । 'शप [3]आक्रोशे' । शपति लम्भयति[4] विश्वसित्यनेनेति [5]शपथः । 'शप [6]लम्भने' । सत्यवचननामनी ॥ देवतापितृपादादिस्पर्शस्य वा ॥ [7]पृच्छतीति प्रश्नः । पृच्छा च । 'प्रच्छ ज्ञीप्सायाम्' । अनुयुज्यतेऽनुयोगः । 'युजिर् योगे' । कोऽसौ कुत[8] इत्येवंविधस्य वाक्यस्य नामानि ॥

[9]प्रतिविधानार्थं वाक्यं प्रतिवाक्यम्। उत्तरति चोद्यमनेनेति उत्तरम्। 'तॄ प्लवनतरणयोः'। असावत्रेत्यादिप्रत्युत्तरनामानि[10] ॥ ९ ॥

[1] उप समीपे उद्धन्यते B_1, D_1, I, K_5, Y.
[2] 'हृञ् हरणे' B_2, D_1, I.
[3] आक्रोशने D_2.
[4] उपालम्भते W_1.
[5] शपथशब्दः नपुंसकेऽपि A, B_1, T.
[6] उपालम्भने B_2, W_2, Y.
[7] पृच्छ्यते K_5, W_2.
[8] I adds आगतः.
[9] प्रतिदानं वाक्यं W_2.
[10] प्रश्नवाक्यस्योत्तरनामानि B_2; °अत्रागत° K_3; उत्तर° K_2, K_5.

(पा.) उपोद्घात उदाहारः। प्रतिपाद्यमर्थं बुद्धौ संगृह्य तदर्थमर्थान्तरवर्णनम् उपोद्घातः ॥ शपनं शपथः पुमान्। सत्यवचननामनी। प्रश्नो—पृच्छा च। प्रश्ननामानि ॥ प्रतिवाक्योत्तरे समे। उत्तरनामनी ॥ ९ ॥

मिथ्याभियोगोऽभ्याख्यानमथ मिथ्याभिशंसनम् ॥ १० ॥
अभिशापः प्रणादस्तु शब्दः स्यादनुरागजः।

(वि.) मिथ्येति—अभि असत्यमारोप्याख्यानम् अभ्याख्यानम्[1]। अध्याख्यानमिति वा पाठः। अन्धो बधिर [2]इत्यादि [3]मिथ्याभियोगनाम ॥ मिथ्या असत्यमभिशस्यते मिथ्याभिशंसनम्[4]। 'शसि [5]इच्छायाम्'। अभि आरोप्य शप्यते अभिशापः। 'शप आक्रोशे'। अविद्यमानपापारोपनामनी ॥ प्रणद्यतेऽनुरागेण प्रणादः। 'णद अव्यक्ते शब्दे'। अनुरागोत्पन्नमणितादिशब्दनाम ॥ १० ॥

[1] अभितः आख्यानं B_2.
[2] इत्येवंप्रकारं I, K_5.
[3] असत्याभियोग° B_2.
[4] मिथ्यां अभिशंसति K_5, W_2; B_2 adds अस्मिन्निति.
[5] 'शंसु स्तुतौ' I, Y.

(पा.) मिथ्याभियोगोऽभ्याख्यानम्। अध्याख्यानमिति वा। मृषा झकटकनामनी(?)। अथ—अभिशापः। मृषाभूतनिर्भर्त्सननामनी ॥ प्रणादस्तु—अनुरागजः। अनुरागाज्जातध्वनिविशेषः प्रणादः स्यात् ॥ १० ॥

यशः कीर्तिः समाख्या च स्तवः स्तोत्रं स्तुतिर्नुतिः ॥ ११ ॥
आम्रेडितं द्विस्त्रिरुक्तमुच्चैर्घुष्टं तु घोषणा।

(वि.) यश इति—अश्नुते व्याप्नोति देशान्तरेषु यशः। सान्तः। 'अशू व्याप्तौ'। देशान्तरं यातीति वा। 'या प्रापणे'। कीर्त्यते [1]शब्द्यते [2]कीर्तिः। 'कॄत संशब्दने'। समन्तात् आख्यायते समाख्या। 'ख्या प्रकथने'। यशोनामानि ॥ [3]समाज्ञेति

वा पाठः ॥ स्तूयतेऽनेन स्तवः । स्तोत्रं । स्तुतिश्च । 'ष्टुञ् स्तुतौ' । नूयतेऽनेन नुतिः । 'णु स्तुतौ' । प्रशंसानामानि ॥ आम्रेड्यतेऽसकृदुच्यते आम्रेडितम् । 'म्रेडृ उन्मादे' । असकृद्भाषितनाम ॥ घुष्यत इति घोषणा । 'घुषिर् शब्दे[4]' । आज्ञापयितुं सर्वजनबोधनार्थं [5]पटहादावुच्चैःकृतशब्दनाम ॥ ११ ॥

---

[1] शब्दायते A, B_1, T. [2] इयर्तीति वा कीर्तिः, 'ऋ गतौ' B_1, D_1, K_5, W_2, Y. [3] समज्ञेति वा पाठः, समन्तात् ज्ञायते, 'ज्ञा अवबोधने' B_2, D_2, Y. [4] विशब्दने A, D_1, K_1, K_2. [5] A omits आदौ.

(पा.) यशः—समाख्या च । समाख्या तुल्यलक्षणमिति हलायुधानुसारी पाठः । 'यशोऽभिख्यासमाख्यास्तुल्यलक्षणाः' इति हलायुधः (अ. मा. १. १५३) । यशः कीर्तिः समाज्ञा[1] चेत्ययं वैजयन्त्यनुसारिपाठः[2] । 'समाज्ञा च यशः कीर्तिः' इति वैजयन्ती (पृ. ३४, श्लो. ३६) । 'कीर्तिः ख्यातिः समाज्ञा च' इति रभसकोशः । कीर्तिनामानि ॥ स्तवः—नुतिः । स्तोत्रनामानि ॥ 'ईडा श्लाघा प्रशंसा च वर्णनं च विकत्थनम्' । एतानि च ॥ आम्रेडितं द्विस्त्रिरुक्तम् । द्विस्त्रिरुदीरणमाम्रेडितं भवति । '[3]एतदेव यथावाचमाम्रेडयति वासवः' (म. भार. ३. १२४. १३) ॥ उच्चैः—घोषणा । उच्चैःशब्दः घोषणा स्यात् ॥ ११ ॥

---

[1] समज्ञा इति मुद्रितग्रन्थे. [2] °पाठेन समाज्ञा च B_3. [3] 'एतदेव यदा वाक्यमाम्रेडयति देवराट्' Apte's Dict. p. 347.

काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः ॥ १२ ॥
अवर्णाक्षेपनिर्वादपरिवादापवादवत् ।
उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे ॥ १३ ॥

(वि.) काकुरिति—कायतीति काकुः । 'कै[1] शब्दे' । शोकभीत्यादिकृतध्वनिविकारनाम ॥ वर्ण्यते वर्णः । विरुद्धो वर्णः अवर्णः । 'वर्ण वर्णक्रियाविस्तारगुणवचनेषु' । 'वर्ण स्तुतौ' इति वा धातुः । आक्षिप्यते आक्षेपः । 'क्षिप प्रेरणे' । निकृष्टो वादः [2]निर्वादः । [3]परिवादः । [4]अपवादः । 'वद व्यक्तायां वाचि' । [5]उपक्रोशतीत्युपक्रोशः । 'क्रुश आह्वाने रोदने च' । [6]जुगुप्सते जुगुप्सा । 'गुप गोपने[7]' । कुत्सयते कुत्सा । 'कुत्स [8]निन्दने' । निन्दतीति [9]निन्दा । 'णिदि कुत्सायाम्' । [10]गर्हतीति गर्हणम् । गर्हा च । 'गर्ह कुत्सायाम्' । निन्दानामानि ॥ १२–१३ ॥

1 'कै गै र शब्दे' A, B₁, T, Y. 2 निष्क्रान्तो वादात् D₁, I. 3 परीवादः K₅, U; परिवदनं D₁, I, K₅, W₂; परिवादनं B₁; परिवदतीति B₂. 4 अपवदनं D₁, I. 5 उपक्रोशनं B₂, D₁, K₅, W₂. 6 जुगुप्सनं I, K₅, W₂. 7 निन्दायां A, B₁, T. 8 निन्दायां I, W₂. 9 निन्द्यतेऽनया B₂. 10 गर्ह्यतेऽनेनेति B₂.

(पा.) काकुः—ध्वनेः। [1]शोकभयादिकृतध्वनिविकारः काकुः स्यात्। अवर्णा—अपवादवत्। [2]अत्र परिवादशब्दो दीर्घेकारो ह्रस्वेकारश्च भवति। यथा—'मा भूत् परीवादनवावतारः' (रघु. ५. २४) इति[3]। अन्यत्तु स्फुटम्। उपक्रोशो—गर्हणे[4]। निन्दानामानि ॥ १२–१३ ॥

[1] °आदिभिः A₁. [2] अत्र परीवादोऽपि B₃, B₄. [3] B₄ adds रघुवंशे. [4] गर्हणा B₃; गर्हणं A₁.

पारुष्यमतिवादः स्याद्भर्त्सनं त्वपकारगीः ।
यः सनिन्द उपालम्भस्तत्र स्यात् परिभाषणम् ॥ १४ ॥

(वि.) पारुष्यमिति—स्पष्टम्। उपालभ्यते उपालम्भः। 'डुलभष् प्राप्तौ'। इदं [1]निन्दापरिभाषणनाम। यः स निन्दतीति वा पाठः। अत्र परिभाषणशब्दो भवति। परितः सनिन्दं [2]भाष्यते परिभाषणम्। 'भाष व्यक्तायां वाचि'। [3]निन्दासहितपरिभाषणनाम ॥ १४ ॥

[1] मन्द मैवं वादीरिति सनिन्दपदवाक्य(परिहास U) नाम B₂, K₅. [2] भाषते U. [3] निन्दादिना W₁; निन्दाद्यैः B₂.

(पा.) पारुष्यं—परिभाषणम्। परिहासोक्त्या मर्मस्पृग्भाषणमुपालम्भः। 'उत्प्रासः[1] स्यादुपालम्भः परिवाग्भाषणीति[2] च' इति वैजयन्ती (पृ. ३३, श्लो. ३५)। निन्दासहितो यः [3]परिहासस्तत्र परिभाषणशब्दो वर्तते। निन्दासहितपरिहासनाम ॥ १४ ॥

[1] उत्त्रासः A₁. [2] °भाषिणीति B₃, B₄. [3] उपालम्भः B₃.

तत्र त्वाक्षारणा यः स्यादाक्रोशो मैथुनं प्रति ।
स्यादाभाषणमालापः प्रलापोऽनर्थकं वचः ॥ १५ ॥
अनुलापो मुहुर्भाषा विलापः परिदेवनम् ।

(वि.) तत्रेति—आ क्षरति परितो [1]व्याप्नोतीति आक्षारणा। 'क्षर संचलने'। मैथुनमुद्दिश्याक्रोशनाम[2]॥ आभाष्यते [3]सम्यग् भाष्यते आभाषणम्। आलपतीत्यालापः। 'लप व्यक्तायां वाचि'। सुखेन[4] स्थितमिति प्रियवचननाम॥ प्रलपतीति प्रलापः। निष्प्रयोजनवचननाम॥ अनुलपतीत्यनुलापः। [5]मुहुर्वचननाम॥ विलपतीति विलापः। [6]परिदेवते परिदेवनम्। 'देवृ देवने'॥ अनुशोचननामानि॥ १५॥

[1] प्राप्नोति W₂.　[2] क्रोश° K₅, W₁.　[3] अनेनेति B₂; D₁, I add 'भाष व्यक्तायां वाचि'.　[4] सुजनस्थितिमतो A, B₁, T.　[5] B₂ adds मुहुर्भाष्यत इति मुहुर्भाषा; बहुवचननाम U.　[6] परितः दीव्यति B₂, T, W₂.

(पा.) तत्र—प्रति। आक्रोश इति भर्त्सनानि। 'शाप[1] आक्रोश आक्षेपः क्षारणा स्याद् विरूक्षणम्' इति हलायुधः (अ. मा. १. १४९)। मैथुनमुद्दिश्य यद्भर्त्सनं तव भार्यां तव मातरमित्यादि, तत्र आक्षारणाशब्दो [2]वर्तते। स्यात्—आलापः। संभाषणनामनी॥ '[3]संभाषणमाभाषणमालापः कुरुकुञ्चिका' इति वैजयन्ती (पृ. ३२, श्लो. २३)। प्रलापोऽनर्थकं वचः। अर्थशून्योन्मत्तादिवचनं प्रलापः स्यात्॥ अनुलापो मुहुर्भाषा। [4]असकृदेकार्थवचनमनुलापः स्यात्॥ विलापः परिदेवनम्। दुःखेन वचनं विलापः स्यात्॥ १५॥

[1] शापाधिक्षेपः B₃.　[2] स्यात् B₃.　[3] संभाषणं त्वाभाषणं B₄.　[4] निद्रादिमध्येऽसकृदुक्तवचनं यत् तन्नाम A₁.

विप्रलापो विरोधोक्तिः संलापो भाषणं मिथः॥ १६॥
सुप्रलापः सुवचनमपलापस्तु निह्नवः।
(चोद्यमाक्षेपाभियोगौ शापाक्रोशौ दुरेषणा।
अस्त्री चाटु चटु श्लाघा प्रेम्णा मिथ्याविकत्थनम्॥)

(वि.) विप्रलाप इति—[1]विप्रलपतीति विप्रलापः। [2]पुरुषाणां मिथोविरोधवचननाम॥ [3]संलपतीति संलापः। [4]मिथोऽविरोधोक्तिनाम॥ [5]सुप्रलपतीति सुप्रलापः सुवचननाम॥ अपलपतीत्यपलापः। 'लप व्यक्तायां वाचि'। निह्नुते निह्नवः। 'ह्नुङ् अपनयने'। [6]निह्नववचननामनी॥ १६॥

[1] विशेषेण° B₂.　[2] परुषाणां K₂, K₃.　[3] सम्यक् B₂; सत् सम्यक् W₁.　[4] मिथोभाषण° B₂, K₅, W₂.　[5] सुष्ठु B₂.　[6] निह्नुति° K₅.

(पा.) विप्रलापो विरोधोक्तिः। परस्परविरोधोक्तिर्विप्रलापः स्यात्॥ संलापो भाषणं मिथः। परस्परभाषणं संलापः स्यात्। द्वयोरन्यतरस्यालापः, द्वयोरपि संलाप इति [1]विशेषः॥ सुप्रलापः सुवचनम्। सुवचननाम॥ अपलापस्तु निह्नवः। निह्नववचननाम॥ अनुक्तम्—'काका वर्णनमुल्लापः'। काका [2]कथितवचनमुल्लापः स्यात्॥ 'प्रियवाक् चाटुरस्त्रियाम्'। प्रियवचनं चाटु स्यात्॥ १६॥

[1] भेदः A_1. [2] वर्णित° B_3.

संदेशवाग् वाचिकं स्याद् वाग्भेदास्तु त्रिषूत्तरे॥ १७॥
रुशती वागकल्याणी स्यात् कल्या तु शुभात्मिका।

(वि.) संदेशवागिति—वाचोऽस्मिन् सन्तीति वाचिकम्। संदेशवचननाम॥ उत्तरे वाग्भेदास्त्रिषु[1] वर्तन्ते। [2]रुशति कल्याणमिति रुशती। 'रुश हिंसायाम्'। उषतीति पाठे[3] 'उष प्लुष दाहे'। अमङ्गलोक्तिनाम॥ [4]कलयितुमर्हतीति कल्या। 'कल गतौ संख्याने च'। कलासु [5]क्रियासु साधुरिति वा। शुभवचननाम॥ १७॥

[1] B_2 adds लिङ्गेषु. [2] रोषति जिघांसति कल्याणमिति रुषती। 'रुष हिंसायां' B_2. [3] तत्पक्षे उषति कल्याणं B_2. [4] कलयति संख्यातुमर्हति K_5, U. [5] क्रीडासु W_2.

(पा.) संदेशवाग्वाचिकं स्यात्। संदेशवचननाम॥ वाग्भेदास्तु त्रिषूत्तरे। [1]उपरि वक्ष्यमाणा वाग्भेदा वागादिशब्दप्रयोगे त्रिषु वर्तन्ते। [2]विशेष्यानुक्तौ तूक्तलिङ्गाः[3]। रुशती वागकल्याणी। अकल्याणी वाग् रुशती स्यात्। रुशती वाक्। रुशन् व्याहारः। रुशद् भाषितम्। रुशतीं न ब्रूयात् कल्यामेव वदेत्। उषती वागकल्याणीति पाठादुषत्यपि भवति॥ स्यात् कल्या तु शुभात्मिका। शोभना[4] वाक् कल्या [5]भवति॥ १७॥

[1] B_3 omits. [2] °गम्यत्वे A_1. [3] B_4 adds एव. [4] शोभनात्मिका A_1. [5] स्यात् B_3.

अत्यर्थमधुरं सान्त्वं संगतं हृदयंगमम्॥ १८॥
निष्ठुरं परुषं ग्राम्यमश्लीलं सूनृतं प्रिये।

(वि.) अत्यर्थमधुरमिति—सान्त्व्यते [1]प्रयत्नेन सान्त्वम्। 'षान्त्व सामप्रयोगे'। अतिमधुरवचननाम॥ हृदयं गम्यतेऽनेन हृदयंगमम्। 'गम्लृ[2] गतौ'। [3]संबन्धार्थ-

वचननाम ॥ [4]दुष्टहेतुत्वान्निशितमिव [5]तिष्ठतीति निष्ठुरम् । 'ष्ठा गतिनिवृत्तौ'। परुषवचननाम ॥ [6]न विद्यते श्रीरत्र [7]अश्लीलम् । [8]असभ्यवचननाम ॥ शोभमानम् ऋतमत्रास्तीति [9]सूनृतम् । प्रियसत्यवचननाम ॥ १८ ॥

[1] प्रयतनेन I, K_2, K_3; प्रयत्यतेऽनेन U. [2] 'गम्लृ सृप्लृ°' D_1, I, K_1, U. [3] संगतवचन° K_5. [4] दुःख° D_2, K_1. [5] अवतिष्ठते A, B_1, T. [6] D_1, I, K_3 add ग्रामे भवं ग्राम्यम् ; अत्र गीर्यते ग्राम्यवार्ता मैथुनादिवार्ता, 'गॄ निगरणे' B_2. [7] अश्रीलं W_1, Y; रलयोरैक्यं W_1; अश्रीरं K_5, U. [8] ग्राम्य° D_1, I, Y; असत्य° W_2. [9] सुष्ठु ऊन्यते सूनं, 'ऊन परिहाणे', सूनं च तत् ऋतं च K_5, W_2, Y; प्रीयते प्रियम् W_2.

(पा.) अत्यर्थमधुरं सान्त्वम् । [1]अतिमधुरवचनं सान्त्वमित्युच्यते ॥ संगतं हृदयंगमम् । ग्राह्यवचननाम ॥ निष्ठुरं परुषम् । कर्कशवचननामनी ॥ ग्राम्यमश्लीलम् । असभ्यवचननामनी ॥ 'कुतस्त्यं फल्गु काहलम्'। एतानि च[2]। 'अश्लीलं काहलं फल्गु' इति धनंजयः ॥ सूनृतं प्रिये सत्ये । प्रियसत्यवचनं सूनृतं स्यात् ॥ १८ ॥

[1] मधुरं B_3. [2] A_1 adds असभ्यवचनपर्याय एव.

सत्येऽथ संकुलक्लिष्टे परस्परपराहते ॥ १९ ॥
लुप्तवर्णपदं ग्रस्तं निरस्तं त्वरितोदितम् ।

(वि.) सत्य इति—[1]संकुल्यते संकुलम् । 'कुल संस्त्याने बन्धुषु च'। क्लिश्यते क्लिष्टम्[2]। 'क्लिशू विबाधने'। अन्धः पश्यति अकरः करोतीत्येवमादिवचननामनी[3] ॥ ग्रस्यते ग्रस्तम् । 'ग्रसु ग्लसु अदने'। [4]लुप्ताक्षरस्य लुप्तपदस्य वा नाम ॥ निरस्यते निरस्तम् । 'असु क्षेपणे'। त्वरितोदितनाम ॥ १९ ॥

[1] सुष्ठु° D_2. [2] म्लिष्टमिति वा पाठः, म्लेच्छतीति म्लिष्टं, 'म्लेच्छ अव्यक्ते शब्दे' D_2. [3] °परस्पराहतवचो° Y. [4] K_5 omits 5 lines.

(पा.) अथ—पराहते । वृद्धोऽहं मे[1] पिता बाल इत्यादिव्याहतवचने संकुलक्लिष्टशब्दौ वर्तेते ॥ लुप्तवर्णपदं ग्रस्तम् । लुप्तवर्णं पदं लुप्तपदं वाक्यं च ग्रस्तं स्यात् ॥ निरस्तं त्वरितोदितम् । द्रुतोच्चारितवचनं निरस्तं भवति ॥ १९ ॥

[1] मत्पिता B_3.

अम्बूकृतं सनिष्ठीवमबद्धं स्यादनर्थकम् ॥ २० ॥
अनक्षरमवाच्यं स्यादाहतं तु मृषार्थकम् ।

(वि.) अम्बूकृतमिति—[1]निष्ठीवसंपर्कात् अम्बूक्रियते अम्बूकृतम्। निष्ठीवसहितवचननाम[2]। 'ष्ठिवु निरसने' ॥ यत्रार्थसंबन्धो नास्ति तदबद्धम्[3]। '[4]बन्ध बन्धने'। संबन्धशून्यवचननाम ॥ न सन्त्यक्षराणि यत्र अनक्षरम्। [5]अवाच्यवचननाम ॥ आहन्यत इत्याहतम्[6]। मिथ्यार्थवचननाम ॥ २० ॥

[1] °संपर्कवशात् A; निष्ठीवनात् हेतोरुत्पन्नमम्बु लाला, तेन सह कृतम् अम्बूकृतं, समानकालोत्पन्नमित्यर्थः B_2. [2] B_2 adds निष्ठीवेन सहितं सनिष्ठीवम्. [3] K_5 adds बध्यत इति बद्धं, बद्धं न भवतीत्यबद्धं. [4] 'बन्ध संयमने' I, K_1, Y. [5] अनक्षरवचननाम K_5. [6] A adds 'हन हिंसागत्योः'.

(पा.) अम्बूकृतं सनिष्ठीवम्। लालासहितं निष्ठीवनिर्यद्बिन्दुसहितं च वचनमम्बूकृतमित्युच्यते ॥ अबद्धं स्यादनर्थकम्। समुदायार्थशून्यं दशदाडिमादिवाक्यमबद्धं स्यात् ॥ अनक्षरमवाच्यं स्यात्। हस्तनेत्रादिव्यञ्जितवचनमनक्षरमित्युच्यते[1] ॥ आहतं तु मृषार्थकम्। एष [2]वन्ध्यासुतो याति—इत्यादिवचनमाहतं स्यात् ॥ २० ॥

[1] स्यात् B_3. [2] वन्ध्यासुतः पश्यति B_3.

(सोल्लुण्ठनं तु सोत्प्रासं मणितं रतिकूजितम् ।
श्राव्यं हृद्यं मनोहारि विस्पष्टं प्रकटोदितम् ॥)
अथ म्लिष्टमविस्पष्टं वितथं त्वनृतं वचः ॥ २१ ॥
सत्यं तथ्यमृतं सम्यगमूनि त्रिषु तद्वति ।

इति वाग्वर्गः

(वि.) अथेति—म्लेच्छतीति म्लिष्टम्। 'म्लेच्छ अव्यक्ते शब्दे'। क्लिष्टमिति पाठे क्लिश्यत इति क्लिष्टम्। 'क्लिशू विबाधने'। [1]अस्पष्टवचननाम ॥ विगता[2] तथा सत्यमत्रेति वितथम्। अनृतवचननाम ॥ सति धर्मे साधु सत्यम्। तथा सत्यमत्रास्तीति तथ्यम्। सद्भिरर्यते[3] ऋतम्। 'ऋ [4]गतौ'। समञ्चतीति सम्यक्। 'अञ्चु गतौ याचने च'। सत्यवचननामानि ॥ अमूनि तद्वति गुणिनि त्रिषु वर्तन्ते ॥ २१ ॥

इति श्रीलिङ्गयसूरिविरचितायाममरकोशपदविवृतौ वाग्वर्गः

[1] अविस्पष्ट° I, K_3.　[2] विरता K_2, K_5.　[3] रूयते, 'रु शब्दे' K_1, K_2.
[4] 'ऋ शब्दे', अर्यते उपदिश्यते B_1, U; आद्रियते D_1.

(पा.) अथ म्लिष्टमविस्पष्टम् । अस्पष्टबालकिरातादिवचनं म्लिष्टं स्यात् ॥ अनुक्तम्—'गद्गदं गलमूलस्थम्'। गलमूलस्थवचनं गद्गदं भवति ॥ 'तुम्बकं स्पृष्टनासिकम्'। नासिकां स्पृष्ट्वोद्गच्छद्वचनं [1]तुम्बकमित्युच्यते । वितथं—वचः । असत्यवचननामनी ॥ आहतमसद्भूतार्थकथनम्[2] । असत्यं [3]सद्भूतापलापः ॥ सोल्लुण्ठनं तु सोत्प्रासम् । उत्क्रोशवचननामनी ॥ मणितं रतिकूजितम् । रतिकालगलरवनामनी ॥ सत्यं—सम्यक् । सत्यवचननामानि ॥ अमूनि त्रिषु तद्वति । [4]सत्यादिशब्दाः सत्यवत्यर्थे त्रिलिङ्गा भवन्ति । सत्यो देवदत्तः । सत्या यज्ञदत्ता । सत्यं कलत्रमित्यादि ॥ २१ ॥

इति [5]श्रीवत्सनृसिंहसूरिसुतमल्लिनाथसूरिविरचितेऽमरपदपारिजाते वाग्वर्गः

[1] तुम्बुकं A_1.　[2] B_3 omits कथनं.　[3] आलापः A_1.　[4] °आदीनि B_3.
[5] नरसिंह° A_1.

---

७. शब्दादिवर्गः

शब्दे निनादनिनदध्वनिध्वानरवस्वनाः ।
स्वाननिर्घोषनिर्ह्रादनादनिस्वाननिस्वनाः ॥ १ ॥
आरवारावसंरावविरावा अथ मर्मरः ।
स्वनिते वस्त्रपर्णानां भूषणानां तु शिञ्जितम् ॥ २ ॥

(वि.) शब्द इति—शब्द्यते इति [1]शब्दः । 'शब्द शब्दक्रियायाम्'। निनदतीति निनादः । निनदश्च । 'णद अव्यक्ते शब्दे'। [2]ध्वनतीति ध्वनिः । [3]ध्वानश्च । 'ध्वन शब्दे'। [4]रूयते रवः । आरवः । आरावः । संरावः । विरावश्च । 'रु शब्दे'। स्वनतीति स्वनः । स्वानश्च । 'स्वन शब्दे'। निर्घुष्यते[5] निर्घोषः । 'घुषिर् विशब्दने'। नितरां ह्रादते निर्ह्रादः । 'ह्राद अव्यक्ते शब्दे'। नदतीति नादः । 'णद अव्यक्ते शब्दे'। निस्वाननिस्वनशब्दौ स्वानशब्दवदुन्नेयौ[6] । समुद्रघोषादिशब्दनामानि ॥ [7]मर्मरध्वनिर-

त्रास्तीति मर्मरः। वस्त्रपर्णस्वननाम ॥ [8]शिञ्क्ते शिञ्जितम्। 'शिजि अव्यक्ते शब्दे'। भूषणध्वनिनाम ॥ १–२ ॥

[1] शब्दयति D_1; शब्द उक्तः Pt_1, Pt_2. [2] ध्वन्यते K_3; ध्वननं Pt_1, Pt_2. [3] ध्वनश्च W_1. [4] रौति Pt_1, Pt_2. [5] निर्घोषति Pt_1, Pt_2. [6] ज्ञेयौ W_2; विज्ञेयौ B_2; नितरां स्वनतीति Pt_1, Pt_2. [7] वस्त्रादिध्वनिः मर्मरध्वनिः अत्रास्तीति B_2. [8] शिञ्जतीति Pt_1, Pt_2.

(पा.) शब्दे—विरावाः। [1]रावशब्दोऽपि साधितः। पृथु भाषार्थ(?) इति चुरादिपाठाद् रौतेर्भाषार्थत्वात् णिच्[2]। प्रयोगश्च[3]। 'समाविशद्भीषणरावगह्वरम्' इति। अव्यक्तशब्दनामानि ॥ अथ मर्मरः—पर्णानाम्। वस्त्रपर्णानां रावः मर्मरः स्यात् ॥ भूषणानां च शिञ्जितम्। भूषणध्वनिः शिञ्जितं स्यात्। 'शिञ्जापरशुशिशिरपिशुनशिखाश्रेणयः'[4] इत्यूष्मभेदपाठात् तालव्यादिः। शिञ्जैव[5] शिञ्जानम्। 'शिञ्जानमञ्जुमञ्जीरविरञ्जितपदाम्बुजाम्' इति प्रयोगश्च ॥ १–२ ॥

[1] A_1 adds लक्ष्यलक्षणदुर्घट°. [2] A_1 adds अत एव राव इति. [3] A_1 adds सप्तकुमारिकापादनकार°. [4] A_1 adds श्येनः. [5] B_3 omits the three words.

निक्वाणो निक्वणः क्वाणः क्वणः क्वणनमित्यपि।
वीणायाः क्वणिते प्रादेः प्रक्वाणप्रक्वणादयः ॥ ३ ॥

(वि.) निक्वाण इति—[1]निक्वणतीति निक्वाणः। निक्वणः। क्वाणः। क्वणः। क्वणनम्। एतानि [2]वीणादिवाद्यस्वननामानि ॥ वीणायाः क्वणिते [3]प्रादेः [4]प्रक्वाणः, प्रक्वणादयः। प्राद्युपसर्गे क्वणतिधातुजाः प्रक्वाणप्रक्वणादयः वीणायाः क्वणिते[5] वर्तन्ते। निक्वाणादयस्तु वीणादिसर्ववाद्यध्वनौ वर्तन्त इत्यर्थः। 'वण क्वण शब्दे' ॥ ३ ॥

[1] नितरां क्वणति Pt_1, Pt_2. [2] °सर्ववाद्य° I, K_1, K_3, U. [3] प्राद्युपसर्गे D_2, K_3, W_1. [4] प्रकर्षेण क्वणति Pt_1, Pt_2. [5] एव U.

(पा.) निक्वाणो—क्वणनमित्यपि। वीणादिध्वनिनामानि ॥ वीणायाः—प्रक्वणादयः। वीणामात्रध्वनिनामानि[1] ॥ अनुक्तम्—'मार्जना मुरजध्वानः'। [2]मुरजध्वनिर्मार्जना स्यात् ॥ 'गुण्डिलो मर्दलध्वानः'। मर्दलध्वनिर्गुण्डिलः स्यात् ॥ ३ ॥

[1] A_1 adds कल्याणनिक्वणवीणाकलक्वाणः। वेणुं . . . [2] °जन्य° A_1.

कोलाहलः कलकलस्तिरश्चां वाशितं रुतम् ।
स्त्री प्रतिश्रुत् प्रतिध्वाने गीतं गानमिमे समे ॥ ४ ॥

इति शब्दादिवर्गः

(वि.) कोलाहल इति—कोलान् वराहानाहलतीति[1] कोलाहलः । 'हल विलेखने'। कल्यते [2]शब्द्यते कलकलः[3] । 'कल शब्दसंख्यानयोः'। 'कल किल क्षेपे' इति वा धातुः । अव्यक्तनानावचनमहाध्वनिचयनामनी[4] ॥ वाश्यते इति वाशितम् । 'वाश्टृ शब्दे'। मृगपक्षिरवनाम ॥ प्रतिश्रूयते प्रतिश्रुत् । 'श्रु श्रवणे'। [5]प्रतिध्वाननाम ॥ गीयते गीतम् । गानं च । 'कै [6]गै रै शब्दे'। गीतध्वनिनामानि ॥ ४ ॥

इत्यमरकोशपदविवृतौ शब्दादिवर्गः

---

[1] आहरति Y.
[2] Pt_1, Pt_2 add अव्यक्तं.
[3] वीप्सायां(अभीक्ष्णे° W_2, Y) द्विर्भावः B_2, K_5.
[4] °निचय° B_1, D_1.
[5] प्रतिध्वनतीति, 'ध्वन शब्दे' B_2; प्रतिध्वननं Pt_1, Pt_2.
[6] B_2 adds 'गै गाने'.

(पा.) कोलाहलः कलकलः । बहुध्वनिनामनी ॥ तिरश्चां वाशितं रुतम् । मृगपक्षिणां ध्वनिर्वाशितं[1] स्यात् । 'शिवं वा शशवाशितम्' इति कर्पिणाभ्युदयप्रयोगात् (१८. ९२) तालव्यमध्यः । 'वासितं भावितं रुते' इति रुद्राभिधानाद् दन्त्यमध्यश्च भवति ॥ अनुक्तम्—'गवां तु रम्भितं हुम्फा'। गवां ध्वनिनामनी ॥ 'बुक्कनं भषितं शुनः'। शुनकध्वनिनामनी ॥ स्त्री—प्रतिध्वाने । गुहादिप्रतिबिम्बितध्वनिनामनी ॥ गीतं—समे । गीतनामनी । इमे समे इत्यनेन रागगीत्यादिकं गीतं प्रावेशिक्यादिध्रुवारूपं [2]मन्द्रकादिरूपं गानमिति विशेषपक्षं विहाय 'गीतं गानं च गेयं च [3]गीतिर्गान्धर्वमित्यपि' इति सामान्यपक्षमवलम्ब्योक्तम् ॥ ४ ॥

इति [4]श्रीवत्सनृसिंहसूरिसुतमल्लिनाथविरचितेऽमरपदपारिजाते शब्दादिवर्गः

---

[1] A_1 adds रुतं च.
[2] मद्रक° A_1.
[3] रीतिः A_1.
[4] °नरसिंह° A_1.

८. नाट्यवर्गः

निषादर्षभगान्धारषड्जमध्यमधैवताः ।
पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः ॥ १ ॥

(वि.) निषाद इति—निषीदन्त्यत्र स्वरा इति निषादः । 'षद्लृ विशरणगत्यवसादनेषु'। [1]ऋषभस्वरसंवादित्वात् ऋषभः । गां वाचं धारयतीति गान्धारः। गन्धं गृह्णातीति गान्धं घ्राणेन्द्रियम्। तस्मिन् इयर्तीति वा गान्धारः । 'ऋ गतौ'। षट्सु [2]नासाकण्ठोरस्तालुजिह्वादन्तस्थानेषु जायत इति षड्जः । 'जनी प्रादुर्भावे'। [3]मध्यं मातीति मध्यमः । 'मा माने वर्तने[4] च'। मोक्षं धावतीति धैवतः । 'धावु गतिशुद्ध्योः'। धीर्हृत् तद्वत्सु नाभ्यादिस्थानेषु भवो वा धैवतः[5]। पिकैः पञ्च्यते पञ्चमः । 'पचि विस्तारवचने'। पञ्चसु[6] स्थानेषु मातीति वा । 'मा माने वर्तने च'। एतानि सप्त [7]तन्त्रीकण्ठोत्थितस्वरनामानि ॥ स्वयं राजते स्वरः । 'राजृ दीप्तौ'। श्रुतिस्थाने [8]स्वहृदयं रञ्जयतीति वा । 'रञ्ज रागे' ॥

'*षड्जं मयूरा ब्रुवते [9]गावस्त्वृषभभाषिणः ।
अजाविकं तु गान्धारं पिकः[10] कूजति पञ्चमम् ।
धैवतं ह्रेषते[11] वाजी निषादं बृंहते[12] गजः ॥'

इति ॥ १ ॥

[1] वृषभ° D_2. [2] उदर° K_1. [3] मध्ये B_2, D_1. [4] वर्तमाने च W_1.
[5] दैवत इति वा पाठः, तत्पक्षे दिवि सुखप्राप्तिस्थाने भवः B_2. [6] पञ्चस्थानेषु B_1.
[7] °कण्ठोक्त° A, B_1, T. [8] सहृदयं D_2; स्वं हृदयं W_1. [9] गावो ऋषभ° D_2.
[10] क्रौञ्चः क्वणति मध्यमं B_2, D_1, , W_1, Y; पुष्पसाधारणे काले पिकः कूजति पञ्चमम् D_2, I, K_1, U. [11] भाषते B_1, W_2. [12] ब्रुवते गजाः B_1, W_2.

* षड्जं रौति मयूरस्तु—Nārada. Apte's Dict., p. 1583.

(पा.) निषाद—स्वराः । तन्त्रीकण्ठयोरुभयोर्जायमाना निषादादयः सप्त स्वरशब्दवाच्याः । तत्स्वरूपे नारदः—

'षड्जं मयूरो वदति गावो [1]रम्भन्ति चर्षभम् ।
अजाविकौ तु गान्धारं क्रौञ्चो नदति मध्यमम् ॥

पुष्पसाधारणे काले कोकिलो रौति पञ्चमम् ।
अश्वस्तु धैवतं रौति निषादं रौति कुञ्जरः ॥' (सं. म. १. १. १३-१४)

इति ॥ १ ॥

[1] नर्दन्ति B_4; रम्भत्वथ° A_1; चातको ऋषभं तथा, अजो विरौति इति मुद्रितग्रन्थे.

काकली तु कले सूक्ष्मे ध्वनौ तु मधुरास्फुटे ।
कलो मन्द्रस्तु गम्भीरे तारोऽत्युच्चैस्त्रयस्त्रिषु ॥ २ ॥
(नृणामुरसि मध्यस्थो द्वाविंशतिविधो ध्वनिः ।
स मन्द्रः कण्ठमध्यस्थस्तारः शिरसि गीयते ॥)

(वि.) काकलीति—कुः[1] सूक्ष्मः स चासौ कलश्च[2] काकली । सूक्ष्मकलनाम ॥ कं सुखं लातीति कलः । 'ला दाने' । कलयतीति वा । 'कल शब्दे' । अव्यक्तमधुरध्वनिनाम ॥ [3]मन्दते शनैः [4]निःसरतीति मन्द्रः । 'मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु' । गम्भीरध्वनिनाम ॥ तारयति संदेहं[5] तारः । 'तॄ प्लवनतरणयोः' । अत्युच्चध्वनिनाम ॥ त्रयस्त्रिषु । [6]कलमन्द्रताराः त्रिषु वर्तन्ते, विशेष्यनिघ्ना इत्यर्थः ॥ २ ॥

[1] कुत्सितश्चासौ कलश्च काकलः सोऽत्रास्तीति B_2; काकलिः A, T, U.
[2] कलिः K_1.
[3] मन्द्यते D_2, I, U, W_2.
[4] निरस्यति D_1.
[5] संदेहे W_1; संदेहान् A; स्थानेभ्यः स्वरमिति Pt_2.
[6] I adds त्रयः.

(पा.) काकली—सूक्ष्मे । [1]कलसूक्ष्मध्वनिः काकली स्यात् । ध्वनौ—कलः । मधुरास्फुटध्वनिः कलः स्यात् । मन्द्रस्तु गम्भीरे । गम्भीरध्वनिः मन्द्रः स्यात् । तारोऽत्युच्चैः । अत्युच्चध्वनिः तारः स्यात् ॥ त्रयस्त्रिषु । एते त्रयः त्रिष्विति वाच्यलिङ्गाः । [2]कला रुतिः, मन्द्रा रुतिः इत्यादि ॥ २ ॥

[1] सूक्ष्मकण्ठध्वनिः B_3.
[2] कला मन्द्रा तारा रुतिरित्यादि B_3.

समन्वितलयस्त्वेकतालो वीणा तु वल्लकी ।
विपञ्ची सा तु तन्त्रीभिः सप्तभिः परिवादिनी ॥ ३ ॥

(वि.) समेति—[1]समन्वितोऽनुगतो लयः श्रुतादिर्यत्र समन्वितलयः । एकः समः तालो मानमस्य एकतालः । एकतान इति वा पाठः । तालाद्यन्वितलयनाम ॥ वेति

प्रजायते स्वरोऽस्यामिति वीणा । 'वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु' । वण्यत इति वा वीणा । 'वण शब्दे' । वल्लन्ते स्वरा अस्यामिति [2]वल्लरी । 'वल्ल संचलने' । विविधं [3]पञ्च्यते स्वरा अत्रेति विपञ्ची । 'पचि व्यक्तीकरणे' । वीणानामानि ॥ परितो [4]वदति स्वरानिति परिवादिनी । 'वद व्यक्तायां वाचि' । सप्ततन्त्रीयुक्तवीणानाम ॥ ३ ॥

[1] सम्यगन्वित: Pt_2;

> नृणामुरसि मन्द्रस्तु द्वाविंशतिविधो ध्वनि: ।
> स एककण्ठे मध्य: स्यात् तार: शिरसि गीयते ॥ B_1, D_1.

[2] वल्लक: सौत्र: सोऽस्या अस्तीति वल्लकी इति वा । अयमेव ह्यर्थ: B_2, D_1, K_2; वलि: सौत्रो धातु:, ह्यर्थ: Y. [3] पञ्चते A, T, W_1. [4] वादयत्यवश्यं सप्तस्वरान् B_1, D_1, I.

(पा.) समन्वितलयस्त्वेकताल: । अनुगतद्रुतादिमानगीतादिवस्तु एकताल: स्यात् । [1]एकतान इति कतिचित्[2] । वीणा तु वल्लकी विपञ्ची । वीणानामानि ॥ सा तु—परिवादिनी । सप्तभिः [3]तन्त्रीभिः प्रोता वीणा परिवादिनीत्युच्यते ।

> 'तन्त्र्यश्चेत् सप्त सप्तास्या चतुर्दश चतुर्दशी ।
> एकादशैकादशी [4]भिदैवं वीणा त्रयोदशी ॥' इति ।

परिवादिनी बहुविधा । [5]सप्ततन्त्री परिवादिनीति कथिता ॥ ३ ॥

[1] एकतानमिति A_1. [2] A_1 adds कथयन्ति. [3] तन्त्रिभि: B_3. [4] चेष्टेव A_1. [5] B_3 adds तत्र.

ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् ।
वंशादिकं तु सुषिरं कांस्यतालादिकं घनम् ॥ ४ ॥

(वि.) ततमिति—तन्यते ततम्[1] । [2]तन्त्रीजननात्ततम् । वीणादिवाद्यनाम ॥ चर्मणा आनह्यत इत्यानद्धम् । 'णह [3]बन्धने' । मुरजादिवाद्यनाम ॥ सुषिः रन्ध्रमस्यास्तीति सुषिरम् । [4]शुषिरं वा । [5]वंशादिवाद्यनाम ॥ हन्यत इति घनम् । 'हन हिंसागत्योः' । [6]तालादिकांस्यवाद्यनाम ॥ ४ ॥

[1] B_1, D_1, K_5 add 'तनु विस्तारे'. [2] °जनितं B_2. [3] आबन्धने W_2. [4] तालव्याद्येव इति प्राच्या: B_2, D_1; तालव्यमिति B_1, K_5; W_2 adds आहु:. [5] °रन्ध्रवाद्य° B_2. [6] तालाख्यादि° W_2.

(पा.) ततं—वाद्यम् । वीणादिवाद्यं ततं स्यात् ॥ आनद्धं मुरजादिकम् । मुरजादिवाद्यमानद्धं स्यात् ॥ वंशादिकं तु सुषिरम् । वंशादिवाद्यं सुषिरं स्यात् ॥ कांस्यं—घनम् । [1]कांस्यं तालादिकं वाद्यं घनं स्यात् ॥ [2]केचन मुरजादिवाद्यमपि घनमिति वदन्ति । कांस्यं तालादिवाद्यं ततमिति च[3] कथयन्ति ॥ ४ ॥

[1] B$_3$ adds कांस्यविकारः. [2] केचित् B$_3$, B$_4$. [3] B$_3$ adds केचित्.

चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकम् ।
मृदङ्गा मुरजा भेदास्त्वङ्क्यालिङ्ग्योर्ध्वकास्त्रयः ॥ ५ ॥

(वि.) चतुर्विधमिति—वाद्यत इति [1]वाद्यम् । वादित्रं च[2] । आ समन्तात् [3]तोद्यत इत्यातोद्यम् । 'तुद व्यथने' । [4]ततादिचतुर्विधवाद्यनामानि ॥ मृद्यत इति मृदङ्गः । मृत् मृत्स्ना अङ्गे यस्येति वा । 'मृद मर्दने' । मुरतीति मुरः । 'मुर संवेष्टने' । मुरः चर्मपट्टिकासंवेष्टनम् । तस्माज्जातो मुरजः । मृदङ्गनामनी ॥ अङ्के भवः अङ्क्यः । [5]अङ्कोपरि निधाय वाद्यते वा । हरीतक्याकृतिमृदङ्गनाम ॥ आलिङ्ग्यते आलिङ्ग्य वाद्यत इत्यालिङ्ग्यः । गोमुखाकृतिमृदङ्गनाम ॥ अङ्की आलिङ्गी इति वा पदच्छेदः । तदा तदाख्या ततो भवतीति विग्रहः । [6]ऊर्ध्वीकृत्य वाद्यत इत्यूर्ध्वकः । यवमध्याकृतिमृदङ्गनाम ॥ ५ ॥

[1] वादयन्ति एनमिति Pt$_2$. [2] 'वद व्यक्तायां वाचि' D$_1$, I. [3] आतुद्यत इति B$_1$, D$_2$, Pt$_2$. [4] तन्त्र्यादि A, B$_1$, T, W$_1$; यदाह भरतः—

> 'ततं चैवावनद्धं च घनं सुषिरमेव च ।
> चतुर्विधं तु विज्ञेयमातोद्यं लक्षणान्वितम् ॥' इति (ना. शा. २८. १) B$_2$, D$_2$, I.

[5] अङ्के उपनिधाय D$_1$. [6] ऊर्ध्वस्थः सन् कायति Pt$_2$.

(पा.) चतुर्विधमिदं—नामकम् । इदं चतुर्विधं वाद्यम् । वादित्रमातोद्यमिति च नामद्वयवद् भवति । वादित्रशब्दो वाद्यध्वनावपि वर्तते । 'तूर्योऽस्त्री वाद्यनिर्घोषे[1] वादित्रं वादनं च तत्' इति वैजयन्ती (पृ. १४७, श्लो. १३६) । मृदङ्गा मुरजाः । मुरजनामनी ॥ वक्ष्यमाणभेदापेक्षया बहुवचनम् । भेदाः—त्रयः । अङ्क्यः, आलिङ्ग्यः, ऊर्ध्वक इत्येते त्रयो मुरजभेदाः । 'पूर्वः पूर्वो महानेषामेतत्[2] पुष्करमण्डले' इति वैजयन्त्यां (पृ. १४६, श्लो. १३०) परिमाणभेदोऽभ्यधायि ।

'हरीतक्याकृतिस्त्वङ्क्यो यवमध्यस्तथोर्ध्वकः ।
आलिङ्ग्यश्चैव गोपुच्छ[3] आकृत्या संप्रकीर्तितः ॥'

इति [4]सुभूतिटीकायामाकृतिभेदः[5] कथितः ॥ ५ ॥

---

[1] °निर्घोषो A_1, B_3. [2] वादने मूर्च्छनानने A_1, B_1. [3] पुच्छस्य B_3.
[4] सुबोधिनी° A_1. [5] °भेदात् भेदः A_1.

स्याद्यशःपटहो ढक्का भेरी स्त्री दुन्दुभिः पुमान् ।
आनकः पटहोऽस्त्री स्यात् कोणो वीणादिवादनम् ॥ ६ ॥

(वि.) स्यादिति—[1]यशोनिमित्तं पटहः यशःपटहः । ढगिति [2]व्यक्तं कायतीति ढक्का । 'कै शब्दे' । यात्रादौ [3]वाद्यमानयशःपटहनाम ॥ बिभेति अस्याः[4] परसैन्यमिति[5] भेरी । 'ञिभी भये' । दुन्दु इति शब्दं भाषते दुन्दुभिः । शत्रुहृदयं [6]भिद्यत इति वा । भेरीनामानि ॥ आ समन्तात् नदतीत्यानकः । 'णद अव्यक्ते शब्दे' । अनेन स्वपक्षः आ समन्तात् अनिति[7] वा । 'अन प्राणने' । पटवत् हन्यते पटहः । पणव इति पाठे पण्यते स्तूयते पणवः । 'पण व्यवहारे स्तुतौ च' । परसेनाभीत्यर्थवाद्यनामानि ॥ अनेन कुणति वीणादिवाद्यमिति कोणः । 'कुणं शब्दोपकरणयोः' । वीणादिवादनदण्डनाम ॥ ६ ॥

---

[1] यशसे D_1, W_1; यशसि A, B_1, T; यशोऽर्थं Pt_2; पटु यथा तथा हन्यते, 'हन हिंसागत्योः' B_2, U. [2] अव्यक्तं D_1, I, K_1, W_1; वादयति K_2. [3] हन्यमान° B_1, D_1, K_1, W_1. [4] रवात् B_2, D_2; रवेण K_5, W_2. [5] °सेना B_2, K_5, U, W_1. [6] द्यतीति वा, 'दोऽवखण्डने' B_2, D_1. [7] B_2 adds प्राणिति.

(पा.) स्यात्—ढक्का । सामन्तढक्कानामनी । भेरी—पुमान् । भेरीनामनी । आनकः—स्यात् । अस्त्रीशब्द उभयविशेषणम् । 'पटहस्त्वानकोऽस्त्रियाम्[1]' इति वैजयन्ती (पृ. १४६, श्लो. १३४) । पटहनामनी ॥ अनुक्तम्—'वंशस्तु वेणुर्मुरली' । [2]मुरलीनामानि ॥ 'श्रृङ्गं खुरमुखं समे' । श्रृङ्गनामनी । आन्ध्रभाषया 'बूरगोम्मु' ॥ 'काहली तु कुहाला स्यात्' । काहलीनामनी ॥ 'ढेङ्गुरा जयघण्टिका' । आन्ध्रभाषया 'जांयंट[3] पेरु' । 'ताली द्वयोः कांस्यतालः पुमान् स्त्री तालपत्रिका' । तालनामानि ॥ कोणो वीणादिवादनम् । वीणादिवादनसाधननाम ॥ ६ ॥

---

[1] अस्त्रियौ इति मुद्रितग्रन्थे. [2] वेणु° A_1. [3] 'जाघटपेर्लु' A_1.

वीणादण्डः प्रवालः स्यात् ककुभस्तु प्रसेवकः ।
कोलम्बकस्तु कायोऽस्या उपनाहो निबन्धनम् ॥ ७ ॥

(वि.) वीणादण्ड इति—प्रवलन्ते सर्वे [1]स्वरा अत्रेति प्रवालः । 'वल संवरणे [2]संचरणे च' । [3]प्रचाल इति वा पाठः । 'चल कम्पने' । वीणादण्डनाम ॥ स्वालम्बनाय दण्डं [4]कङ्कते आकाङ्क्षतीति ककुभः । 'ककि लौल्ये' । प्रकर्षेण सेव्यते प्रसेवकः । 'षेवृ सेवने' । दण्डा[5]लम्बनायालाबूमूलनिक्षिप्तसंदंशाकार[6]सारदारुनाम[7] ॥ [8]कुल्यते सम्यक् स्त्यायतेऽनेन शब्दः कोलम्बकः । 'कुल संस्त्याने बन्धुषु च' । के शिरसि तन्त्रीरवलम्बते इति वा कोलम्बकः । 'लवि शब्देऽवस्रंसने च' । वीणायाः दण्डादिसर्वपरिकरनिष्पन्न[9]मूर्तिनाम ॥ उपनह्यन्ते तन्त्र्योऽनेन उपनाहः । 'णह बन्धने' । निबध्यन्ते[10] तन्त्र्योऽनेन निबन्धनम् । 'बन्ध बन्धने' । तन्त्रीबन्धस्थाननामनी ॥ ७ ॥

(पा.) वीणादण्डः प्रवालः स्यात् । वीणादण्डनाम ॥ ककुभस्तु प्रसेवकः । दण्डावलम्बनायालाबूमूलनिक्षिप्तसंदंशाकारसारदारुनामनी । भाषया 'बैसण' ॥ कोलम्बकस्तु कायोऽस्याः । वीणाया दण्डादिसर्वपरिकरनिष्पन्नमूर्तिः कोलम्बकः स्यात् । उपनाहो निबन्धनम् । तन्त्रीनिबन्धनस्थाननामनी । भाषया 'करिभे' ॥ अनुक्तम्—'वीणागुणे स्त्रियां तन्त्रीः' । वीणागुणनाम । 'अवितॄस्तॄतन्त्रिभ्य ईः' (उ. ३. १५८) इति ईःप्रत्ययान्तत्वात् सुलोपो नास्ति । तन्त्रीः तन्त्र्यौ तन्त्र्यः । हे तन्त्रीः इत्यादि । अत्र विशेषः । लक्ष्मीप्रभृतीनाम् 'अम्बार्थनद्योर्ह्रस्वः' (७. ३. १०७) इति ह्रस्वत्वं केचन नेच्छन्ति । प्रयोगास्तु बहवो दृश्यन्ते ।

> 'हे लक्ष्मि स्यादलिन्द्राणामपि संस्पृश मे वपुः ।
> तन्त्रीः कर्णामृतं कूज तन्द्रीः संश्रय चक्षुषी ॥
> वातप्रमीर्वसाटव्यां तरीस्तर्पय चातकम् ।
> . . . . . धत्स्व स्तनांशुकम् ॥'

इत्यादि ॥ ७ ॥

वाद्यप्रभेदा डमरुमड्डुडिण्डिमझर्झराः ।
मर्दलः पणवोऽन्ये च नर्तकीलासिके समे ॥ ८ ॥

---

[1] स्वनाः B_1, D_1, W_2. [2] संचलने D_2, K_5, T. [3] प्रवार U. [4] ककते K_5, U, W_1. [5] °अवलम्बनाय K_5, U. [6] °स्वर° U. [7] °साधनविशेषपर्वनाम B_2, W_2. [8] कोलति W_2. [9] °शरीर° W_1. [10] संबध्यन्ते B_2.

(वि.) वाद्यप्रभेदा इति—डमिति [1]शब्दमियर्ति डमरुः । 'ऋ गतौ' । मड्डु इति [2]उच्चारणात् मड्डुः । डिंडिमिति शब्दं करोतीति डिण्डिमः[3] । झर्झशब्दं करोतीति [4]झर्झरः । मृद्यत इति [5]मर्दलः । 'मृद क्षोदे' । [6]पणाज्जायते पणवः । पण्यते स्तूयतेऽनेनेति वा । 'पण व्यवहारे स्तुतौ च' । एते च अन्ये च वाद्यप्रभेदाः ॥ नृत्यतीति नर्तकी । 'नृती गात्रविक्षेपे' । [7]लसति क्रीडति रङ्गभूमाविति लासिका । 'लस श्लेषणक्रीडनयोः' ॥ [8]नृत्तकारिणीनामनी ॥ ८ ॥

---

[1] K$_5$ adds अव्यक्तं.
[2] उच्चारणत्वात् B$_1$.
[3] मिनोति प्रक्षिपतीति Pt$_2$.
[4] झर्झते भाषते, झर्झेति शब्दं रातीति Pt$_2$.
[5] मद्दलः W$_1$.
[6] पणायते U, W$_2$.
[7] लस्यति D$_1$.
[8] नृत्य° K$_5$, W$_1$; नर्तनकरीणां A, B$_1$, T.

(पा.) वाद्यप्रभेदाः—अन्ये च । डमर्वादयश्चान्ये[1] घण्टानिःसाणादयश्च[2] वाद्यभेदाः । नर्तकी—समे । नृत्तकारिणीनामनी ॥ अनुक्तम्—'रङ्गः स्यान्नर्तनस्थानम्' । नर्तनस्थलं[3] रङ्गः स्यात् ॥ 'सूत्रधारस्तु सूचकः' । सूत्रधारनाम ॥ ८ ॥

---

[1] A$_1$ adds अन्यशब्दगृहीत°.
[2] नि.सानः B$_1$.
[3] °स्थानं B$_3$.

विलम्बितं द्रुतं मध्यं तत्त्वमोघो घनं क्रमात् ।
तालः कालक्रियामानं लयः साम्यमथास्त्रियाम् ॥ ९ ॥
ताण्डवं नटनं नाट्यं लास्यं नृत्यं च नर्तने ।

(वि.) विलम्बितमिति—[1]विलम्बितं द्रुतं मध्यम् इति लयविशेषाः क्रमात् तत्त्वम् ओघः घनमित्युच्यन्ते । तलन्ति गीतवाद्यनृत्तानि तिष्ठन्त्यत्र तालः । 'तल प्रतिष्ठायाम्' । [2]मध्यकालक्रियायाः परिच्छेदकनाम ॥ लीयतेऽत्रेति लयः । 'लीङ् श्लेषणे' । [3]न्यूनाधिकरहिततालसाम्यनाम[4] ॥ तण्डुना शिवेनोपदिष्टं ताण्डवम् । उद्धतप्रयोगनर्तननाम । नट्यते नटनम् । 'नट नृत्तौ' । नटस्य कर्म नाट्यम् । [5]नटनर्तननाम ॥ लसतीति लास्यम् । 'लस श्लेषणक्रीडनयोः' । सुकुमारप्रयोगनर्तननाम ॥ नृत्यतीति नृत्यम् । 'नृती गात्रविक्षेपे' । नर्तननामानि[6] ॥ ९ ॥

---

[1] Pt$_2$ adds विलम्बन्ते करपदादयोऽत्रेति विलम्बितम् । प्रत्येकं गतिविशेषत्वात् । 'लवि लम्बने' । द्रवन्ति त्वरन्ते करचरणादयोऽत्रेति द्रुतम् । 'द्रु गतौ' । विलम्बितद्रुतयोर्मध्ये भवत्वान्मध्यम्.
[2] मेयायाः गानक्रियायाः K$_5$, W$_2$; एषां पर्याया इत्येके । नाट्येऽपि विलम्बितादि-

लयानुसारेण क्रमात् तत्त्वाद्या वाद्यप्रभेदप्रकाराः B_2, D_1, K_5; कालक्रियायाः मानं परिमाणमिति कालक्रियामानम् B_2. [3] °आधिक्य° W_2. [4] °सामान्य° K_2. [5] °नृत्त° B_2, D_2, W_2. [6] गात्रविक्षेपणनृत्त° B_2, W_2.

(पा.) विलम्बितं—क्रमात्। विलम्बितादिमानानि[1] तत्त्वादिसंज्ञानि भवन्ति। तालः कालक्रियामानम्। कालस्याङ्गुलिकरक्रियया[2] कृतं मानं तालः स्यात्। लयः साम्यम्। सर्वाभिनयसाम्यं लयः स्यात्। अथाक्षजं—नर्तने। [3]नटनर्तननामानि। अक्षजशब्दस्थानेऽस्त्रियामिति, नृत्यशब्दस्थाने नृत्तमिति च पठन्ति[4] ॥ ९ ॥

[1] आदीनि B_3; B_4 omits मानानि. [2] अङ्गुल्यादिचेष्टया B_3. [3] नटननामानि A_1. [4] B_4 adds केचित्.

तौर्यत्रिकं नृत्यगीतवाद्यं नाट्यमिदं त्रयम् ॥ १० ॥
भ्रकुंसश्च भ्रुकुंसश्च भ्रूकुंसश्चेति नर्तकः ।
स्त्रीवेषधारी पुरुषो नाट्योक्तौ गणिकाज्जुका ॥ ११ ॥

(वि.) तौर्यत्रिकमिति—तूर्याणां त्रिकं तौर्यत्रिकम्[1]। तूर्याणां संबन्धि तौर्यम्। तच्च त्रिकं च तौर्यत्रिकम्। [2]नटकर्म नाट्यम्। समुदितनृत्तगीतवाद्यनाम ॥ भ्रूभ्यां कुंसयतीति [3]भ्रकुंसः। भ्रुकुंसश्च[4]। भ्रकुंसश्च। 'कुसि भाषायाम्'। स्त्रीवेषधारिनर्तकपुरुषनामानि ॥ नाट्योक्तौ नटव्यवहारे नामान्याह। अर्जतीत्यज्जुका। 'अर्ज अर्जने'। नाट्योक्तौ गणिकानाम ॥ १०–११ ॥

[1] तूर्यं मुरजादिः तत्र भवः शब्दः तौर्यः, त्रयोऽवयवा अस्येति त्रिकम्। तौर्येण त्रिकं W_1, Pt_2. [2] नटस्य° I, W_1; नृत्तं गीतं वाद्यम् एतत्त्रयसमुदितनटनमत्रेति B_2. [3] चेष्टादिकं भ्रियतेऽत्रेति भ्रं, तदिङ्गितसूचकचलनविशेषः। तेन कुं भूमिं तत्रत्यजनं सादयति गमयतीति, आहत्य भ्रकुंस इत्यर्थो जायते B_2. [4] भ्रुकुंशश्च A.

(पा.) तौर्यत्रिकं—त्रयम्। नृत्तगीतवाद्यानि त्रीणि तौर्यत्रिकम्। इदं[1] त्रयं नाट्यं स्यात्। तत् प्रेक्षणार्थं स्याच्चेत् संगीतं भवति। '[2]संगीतं प्रेक्षणार्थेऽस्मिन्' इति वैजयन्ती (पृ. १४१, श्लो. ७२)। भ्रकुंसश्च—पुरुषः। भ्रकुंसादयः [3]षडपि स्त्रीवेषधारिनर्तकपुरुषनामानि। भ्रकुंसशब्दो रुशब्दादिश्च [4]ऋकारादिश्च भवति। 'स भ्रूकुंसो भ्रुकुंसश्च भृकुंसश्च भ्रकुंसवत्' इति वैजयन्ती (पृ. १४१, श्लो. ६७)। अनुक्तम्—'पात्राण्यधिकृता नाट्ये'। नाट्ये नियुक्तास्ते पात्राणीत्युच्यन्ते। 'तेषां वेषस्तु भूमिका'।

तेषां वेषो भूमिका स्यात् ।। नाट्योक्तौ । अङ्गहारावधि अधिकारवचनम् । तस्मादितःपरं वक्ष्यमाणाः शब्दाः नाट्यविषयाः । व्यवस्थिताधिकारविषयत्वाद्[5] देवकुमारादिशब्दा इतरविषयाश्च भवन्ति । गणिकाज्जुका[6] । लञ्जिका [6]अज्जुका स्यात् ।। १०–११ ।।

[1] A₁ omits इदं त्रयं. [2] संगीतकमिति मुद्रितपुस्तके. [3] B₃, B₄ omit.
[4] ऋवर्णादि° A₁. [5] A₁ omits विषय. [6] अर्जुका A₁.

भगिनीपतिरावुत्तो भावो विद्वानथावुकः ।
जनको युवराजस्तु कुमारो भर्तृदारकः ।। १२ ।।

(वि.) भगिनीपतिरिति—अवति भगिनीमिति आवुत्तः । 'अव रक्षणे'। भगिनीपतिनाम ।। भावयतीति भावः । [1]विदूषकनाम ।। अवतीति आवुकः । 'अव रक्षणे'। जनकनाम ।। कुत्सितं मारयतीति कुमारः । 'मृङ् प्राणत्यागे'। युवा चासौ राजा च युवराजः। कुमारयतीति वा कुमारः। 'कुमार क्रीडायाम्'। प्रेष्यादीन् बिभर्तीति भर्ता। तस्य दारकः भर्तृदारकः। पोष्यान् दारानिव बिभर्तीति वा। 'डुभृञ् धारण-पोषणयोः'। युवराजनामनी ।। १२ ।।

[1] विदुषां W₂; विदुषः D₁, I, K₅.

(पा.) भगिनीपतिरावुत्तः। ज्येष्ठकनिष्ठभगिन्योः पतिः आवुत्तः स्यात्। अनुक्तम्—'पतिरार्योऽप्यार्यपुत्रः'। पतिरार्य आर्यपुत्रश्च स्यात् ।। भावो विद्वान्। तत्र विद्वान् भावः स्यात् ।। अथावुको जनकः। पिता आवुकः स्यात् ।। युवराजः—भर्तृदारकः। युवराजश्च कुमारश्च भर्तृदारकः स्यात् ।। अनुक्तम्—'गोस्वामिनो राजसुताः[1]'। अन्यराजपुत्रा गोस्वामिन इत्युच्यन्ते ।। १२ ।।

[1] राजपुत्राः B₄.

राजा भट्टारको देवस्तत्सुता भर्तृदारिका ।
देवी कृताभिषेकायामितरासु तु भट्टिनी ।। १३ ।।

(वि.) राजेति—भटन्ति उद्धतं भाषन्ते भट्टाः। 'भट परिभाषणे'। भट्टान् शत्रून् अरति पीडयतीति [1]भट्टारकः। 'अर पीडने'। दीव्यतीति देवः। 'दिवु क्रीडादौ'।

भर्तृदारिकाशब्दः भर्तृदारकशब्दवत् । राजपुत्रीनाम ॥ दीव्यतीति देवी । [2]अभिषिक्तराजपत्नीनाम ॥ भटति उद्धतं भाषते [3]भट्टिनी । अकृताभिषेकराजभार्यानाम ॥ १३ ॥

[1] भटाः सेवकाः तैर्युद्धमुत्तारयति 'तॄ प्लवनतरणयोः' Pt₂.　　[2] कृताभिषेक° W₂.
[3] D₁, Y omit 3 pages; 'भट परिभाषणे' W₂.

(पा.) राजा—देवः । नृपः भट्टारको [1]देवश्च स्यात् । नामान्ते प्रयुक्ता अप्येते पूज्यमपि कथयन्ति । 'पादा इति नामान्ते देवो भट्टारको वापि' इति हलायुधः (अ. मा. १. १५५) । तत्सुता भर्तृदारिका । राजसुता[2] भर्तृदारिका स्यात् ॥ देवी कृताभिषेकायाम् । महिषीनाम ॥ इतरासु तु भट्टिनी । अन्या राजपत्न्यः[3] भट्टिन्यः स्युः ॥ १३ ॥

[1] A₁ omits.　　[2] राजपुत्री B₄.　　[3] °भार्याः B₁.

अब्रह्मण्यमवध्योक्तौ राजश्यालस्तु राष्ट्रियः ।
अम्बा माताथ बाला स्याद् वासूरार्यस्तु मारिषः ॥ १४ ॥

(वि.) अब्रह्मण्यमिति—ब्राह्मणोऽवध्य इत्युक्तिः [1]अब्रह्मण्यम् । ब्रह्मणो हितं ब्रह्मण्यं, शान्तता, तदविद्यमानमत्रेति वा । अवध्योक्तिनाम ॥ राज्ञः श्यालः[2] राजश्यालः । राष्ट्री राज्ञी तस्या भ्राता राष्ट्रियः । राजपत्नीभ्रातृनाम ॥ अम्ब्यते शब्द्यते [3]बालैरित्यम्बा । 'अबि शब्दे' । मातृनाम ॥ वसति मातुः समीप इति वासूः । 'वस निवासे' । बालानाम ॥ मायामियर्ति गच्छतीति मारिषः[4] । 'ऋ गतौ' । [5]आर्यनाम ॥ १४ ॥

[1] ब्रह्मणि साधु न भवतीति, अवयवानर्थ्ये इत्येके D₁, I, K₅; अवयवानर्थमित्येके Y.
[2] स्यालः Y.　　[3] भावैः A, B₁, T.　　[4] मारयति पापानिति मारिषः । मर्षणात् सहनाद्वा Pt₂.
[5] आरात् पापकर्मभ्यो यातीत्यार्यः, अरणीयः अभिगम्यो वा Pt₂.

(पा.) अब्रह्मण्यमवध्योक्तौ । अवध्योऽस्मीत्युक्तिरवध्योक्तिः । [1]तस्यामाक्रोशनेऽपि अब्रह्मण्यशब्दः स्यात् ॥ राज्ञः—राष्ट्रियः । राज्ञः पत्नीभ्राता राष्ट्रियः स्यात् । अम्बा माता । जननी अम्बा स्यात् । 'अम्ब सरस्वति किमियं तव माता विष्णुवल्लभा [2]देवी' । अथ—वासूः । बालिका वासूरित्युच्यते । 'वासु-देवालयं गत्वा सोमं शंकरमर्चय' आर्यस्तु मारिषः । आर्यनाम । मार्षोऽपि भवति । 'आर्यौ मारिषमार्षकौ[3]' इति वैजयन्ती (पृ. १४४, श्लो. १०६) । अनुक्तम्—'क्षपणाद्या भदन्ताः स्युः' । क्षपणसौगतादयो भदन्ता इत्युच्यन्ते ॥ १४ ॥

[1] A₁ omits तस्यां.　　[2] देवि A₁.　　[3] °मार्षिकौ A₁, B₃.

अत्तिका भगिनी ज्येष्ठा निष्ठानिर्वहणे समे ।
हण्डे हञ्जे हलाह्वानं नीचां चेटीं सखीं प्रति ॥ १५ ॥

(वि.) अत्तिकेति—अत्ति[1] भ्रातृभार्यां वचनैरिति अत्तिका । 'अद भक्षणे' । ज्येष्ठभगिनीनाम ॥ नियतं [2]स्थानं निष्ठा । निःशेषेण[3] वहनं प्रस्तुतकथायाः समाप्तिः निर्वहणम् । समे इति समानार्थे । नाटकस्य [4]निर्वहणाख्यपञ्चमसंधिनामनी ॥ हण्डे इति नीचां प्रति, हञ्जे इति चेटीं प्रति, हला इति सखीं प्रति आह्वानम् । एते त्रयः संबोधनार्थे अव्ययाः ॥ नाट्योक्तयः[5] समाप्ताः ॥ १५ ॥

[1] अत्ति क्षणयति (परुषवचनैः K_5) B_2. [2] अत्र तिष्ठन्ति, 'ष्ठा गतिनिवृत्तौ' B_2. [3] नितरां वहतीति B_2. [4] 'मुखं प्रतिमुखं गर्भः सावमर्शोपसंहृतिः' U. [5] नाट्योक्तविधिः समाप्तः B_2, I.

(पा.) अत्तिका—ज्येष्ठा । ज्येष्ठभगिनी अत्तिका स्यात् । अनुक्तम्—'कनिष्ठा तु बलाबुसा' । कनिष्ठा[1] स्वसा बलाबुसा स्यात् । निष्ठा—समे । प्रस्तुतकथासंहारः निष्ठा च निर्वहणं च स्यात् । हण्डे—सखीं प्रति । नीचाह्वाने हण्डेशब्दः प्रवर्तते । चेटिकाह्वाने हञ्जेशब्दः । सख्याह्वाने हलाशब्दः[2] । 'हला सौन्दले' । [3]हलिलेशब्दोऽप्यस्ति । 'हलिले[3] जनमध्ये याचितवत्यसि' । हण्डे हञ्जे हलेति शब्दास्त्रयः संबोधनार्थका इति [4]प्राकृतसंजीविन्यामव्ययपरिच्छेदे कथितत्वादव्ययाः ॥ १५ ॥

[1] A_1 omits. [2] B_3 adds प्रवर्तते. [3] हरिते B_3. [4] °संजीवन्यां B_3.

अङ्गहारोऽङ्गविक्षेपो व्यञ्जकाभिनयौ समौ ।
निर्वृत्ते त्वङ्गसत्त्वाभ्यां द्वे त्रिष्वाङ्गिकसात्त्विके ॥ १६ ॥

(वि.) अङ्गहार इति—अङ्गानां हारोऽन्यत्रानयनम् अङ्गहारः[1] । अङ्गानां विक्षेपोऽङ्गविक्षेपः । स्थानात् स्थानान्तरानयनरूपक्रियानामनी ॥ व्यनक्त्यर्थं व्यञ्जकः[2] । 'अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु' । आभिमुख्येन नीयतेऽनेनार्थः अभिनयः । 'णीञ् प्रापणे' । वाचिकाङ्गिकसात्त्विकाख्यभावसूचकनामनी ॥ अङ्गेन निर्वृत्तम् आङ्गिकम् । सत्त्वेन निर्वृत्तं सात्त्विकम् । सत्त्वोत्कटे[3] मनसि पुलकिताद्यभिनयनामनी ॥ १६ ॥

[1] 'हृञ् हरणे' B_2; स्थानान्तरानयनं Pt_2. [2] K_5 omits 4 lines. [3] सर्वोत्कटे A, B_1, T.

(पा.) अङ्गहारोऽङ्गविक्षेपः। अवयवविक्षेपोऽङ्गहारः [1]स्यात्। व्यञ्जक—समौ। सूच्यार्थसूचननामनी॥

'निर्वृत्ते त्वङ्गसत्त्वाभ्यां द्वे त्रिष्वाङ्गिकसात्त्विके।
व्यञ्जकोऽभिनयो यस्तु सूच्यार्थोऽभिनयस्य च॥'

इत्यनेन सूच्यार्थश्चाभिनयः। अङ्गनिर्वृत्तं स्यादाङ्गिकम्। सत्त्वनिर्वृत्तं स्यात् सात्त्विकम्। द्विशब्दग्रहणेन वाचिकाहार्ययोर्गुणत्वं सूचयते॥ १६॥

---

[1] इत्युच्यते B_1.

शृङ्गारवीरकरुणाद्भुतहास्यभयानकाः।
बीभत्सरौद्रौ च रसाः शृङ्गारः शुचिरुज्ज्वलः॥ १७॥

(वि.) शृङ्गारेति—शृङ्गारो वीरः करुणा अद्भुतः हास्यं भयानकः बीभत्सः रौद्रः चकारात् शान्तश्च[1]। एते शृङ्गारादयो नव रसा भवन्ति। सामाजिकजनेन[2] रस्यन्त इति रसाः। 'रस आस्वादने'। [3]शृङ्गं युवादिकमियर्तीति[4] शृङ्गारः। 'ऋ गतौ'। [5]जुगुप्सादिरहितत्वात् शुचिः। उज्ज्वलति प्रकाशते उज्ज्वलः। 'ज्वल दीप्तौ'। शृङ्गाररसनामानि॥ १७॥

---

[1] शान्तिश्च A, T, W_1; वात्सल्यं दशमः Pt_2. [2] सामाजिकेन A, B_1, T. [3] के ते रसा इत्याकाङ्क्षायां क्रमेण प्रतिपादयति B_2. [4] शृङ्गं श्रेष्ठं B_1, Y; प्राधान्यं Pt_2. [5] परिशुद्धत्वात् Pt_2.

(पा.) शृङ्गार—रसाः। शृङ्गारादयोऽष्टौ रसशब्दवाच्याः। चशब्दो मतान्तरबोधनार्थः[1]।

'शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।
बीभत्साद्भुतशान्ताश्च नव नाट्यरसाः स्मृताः॥'
'शृङ्गारवीरौ बीभत्सरौद्रौ हास्यं भयानकम्।
करुणाद्भुतशान्ताश्च वात्सल्यं च रसा दश॥'

इति। द्वादशरसा इति केचित्। शृङ्गारः—उज्ज्वलः। शृङ्गाररसनामानि॥ १७॥

---

[1] °प्रबोधन° A_1.

उत्साहवर्धनो वीरः कारुण्यं करुणा घृणा ।
कृपा दयानुकम्पा स्यादनुक्रोशोऽप्यथो हसः ॥ १८ ॥
हासो हास्यं च बीभत्सं विकृतं त्रिष्विदं द्वयम् ।

(वि.) उत्साहेति—उत्साहं वर्धयतीति उत्साहवर्धनः । 'वृधु वृद्धौ'। [1]विरुद्धान् राति हन्तीति वीरः । 'रा दाने छेदने च'। विद्विष्टान् ईरयतीति वा। 'ईर [2]क्षेपे'। वीरयतीति वा वीरः। 'शूर वीर विक्रान्तौ'। वीररसनाम ॥ कुर्वन्त्यात्मानमदीनमनयेति करुणा। 'डुकृञ् करणे'। [3]कुरुं क्लेशं न सहत इति वा। करुणैव कारुण्यम्। [4]घृण्यन्तेऽनुगृह्यन्तेऽनयेति घृणा। 'घृणि ग्रहणे' 'घृणु दीप्तौ' इति वा धातुः। [5]क्रपयते कृपा। '[6]क्रप कृपायाम्'। दयन्ते[7] रक्षन्त्यनया दया। 'दय दानगतिहिंसारक्षणेषु'। अनुकम्पन्तेऽनयेत्यनुकम्पा। 'कपि [8]चलने'। अनुक्रोशन्त्यनेनेत्यनुक्रोशः। 'क्रुश आह्वाने रोदने च'। [9]करुणारसनामानि ॥ हासयति [10]जनानिति हसः, हासः, हास्यं च। 'हस हसने'। हास्यरसनामानि ॥ [11]बीभत्सा निन्दा, सा अत्रास्तीति बीभत्सम्। सद्विरुद्धत्वात् विकृतम्। बीभत्सरसनामनी ॥ [12]इदं द्वयं तद्वति त्रिषु ॥१८॥

---

[1] विदुष्टान् W_2; विद्विषः Y. [2] प्रेरणे A, B_1, T. [3] करुं क्लेशं नयति B_2. [4] घृणन्ते B_2. [5] कृपयन्ते U, W_1, Pt_2. [6] कृप K_5, Y, Pt_2. [7] रक्ष्यन्ते A, B_1, T. [8] किंचिच्चलने Pt_2. [9] कारुण्य° A, T, W_1. [10] सर्वान् B_1. [11] Pt_2 adds बन्ध बन्धन इत्यस्य निन्दायां सन्. [12] बीभत्सविकृतशब्दौ तद्धेतुशोणितमांसादिवाचित्वे त्रिषु लिङ्गेषु वर्तेते Pt_2.

(पा.) उत्साह—वीरः। वीररसनाम ॥ '[1]शुच्युज्ज्वलौ तु शृङ्गारो वीर उत्साहवर्धनः' इति व्याडिः। कारुण्यं—अनुक्रोशः। करुणारसनामानि ॥ 'करुणो रस' इति पुंस्त्वमपि। अथो हसः—हास्यं च। हास्यरसनामानि ॥ चशब्दो रूपान्तरसमुच्चयार्थः। 'हसिका [2]तु हसो हासो हसनं हास्यघर्घरे' इति। बीभत्सं विकृतम्। बीभत्सनामनी ॥ त्रिष्विदं द्वयम्। इमे द्वे त्रिष्वित्यनेन त्रिलिङ्गे[3]। बीभत्सो रोगः। विकृतो रोग इत्यादि ॥ १८ ॥

---

[1] शुचिः A_1. [2] हसितं for तु हसो B_3. [3] B_4 adds भवतः.

विस्मयोऽद्भुतमाश्चर्यं चित्रमप्यथ भैरवम् ॥ १९ ॥
दारुणं भीषणं भीष्मं घोरं भीमं भयानकम् ।

भयंकरं प्रतिभयं रौद्रं तूग्रममी त्रिषु ॥ २० ॥
चतुर्दश दरस्त्रासो भीतिर्भीः साध्वसं भयम् ।

(वि). विस्मय इति—[1]विस्मापयतीति विस्मयः। 'ष्मिङ् ईषद्धसने'। अत् आश्चर्यार्थेऽव्ययम्। तस्मात् भवं [2]अद्भुतम्। आचरणीयं आश्चर्यमिति साधु। 'चर गतिभक्षणयोः'। चित्रयतीति[3] चित्रम्। 'चित्र [4]चित्रीकरणे'। अद्भुतरसनामानि ॥ भीरोरिदं त्रासकरत्वाद् भैरवम्। बिभेत्यस्मात् अधीर इति वा भैरवम्। दारयति चित्तमिति दारुणम्। 'दृ [5]विदारणे'। बिभेत्यस्मादिति भीषणम्[6]। भीष्मम्। भीमम्। भयानकं च। 'ञिभी भये'। घुरतीति घोरम्[7]। 'घुर भीमार्थशब्दयोः'। भयं करोतीति भयंकरम्। 'डुकृञ् करणे'। भयं प्रति गतं [8]प्रतिभयम्। भयानकरसनामानि ॥ रुत् [9]रोगः, तां राति ददातीति रुद्रः। तस्य कर्म रौद्रम्[10]। उग्रत्वात् उग्रम्। रौद्ररसनामानि ॥ अमी अद्भुताद्याः उग्रान्ताः शब्दाः चतुर्दश त्रिषु लिङ्गेषु वर्तन्ते। [11]दरति बिभेत्यस्मादिति दरः। 'दॄ भये'। त्रस्यत्यस्मादिति [12]त्रासः। 'त्रसी उद्वेगे'। बिभेत्यस्या इति भीतिः। भीश्च। भयं च। 'ञिभी भये'। साधूनस्यति बाधत इति साध्वसम्। '[13]असु क्षेपणे'। भयनामानि ॥ १९–२० ॥

[1] विशेषेण स्मा° B_2. [2] भवतीति भूतं, तन्न भवतीत्यद्भुतम्; आसमन्तात् चर्यत इत्याश्चर्यम् B_2; आः चरणं K_5, Y. [3] I, U, W_2 add अकस्मात्. [4] 'चित्रिङ् आश्चर्ये' K_2. [5] 'दॄ अवखण्डने' B_2; 'दॄ भये' A, T, W_1. [6] भीषयते B_2, D_1, I. [7] घुरति यतः तद्घोरम् A, B_1, T. [8] प्रतिबिभेत्यस्मात् B_2. [9] रोदः D_1. [10] I adds 'रा दाने'. [11] दीर्यतेऽस्मात् Pt_2. [12] त्रसनं Pt_2. [13] 'अस निरसने' इति वा धातुः B_2.

(पा.) विस्मयो—चित्रमपि। अद्भुतरसनामानि ॥ अथ—प्रतिभयम्। भयानकरसनामानि ॥ रौद्रं तूग्रम्। रौद्ररसनामनी ॥ अमी—चतुर्दश। धर्मिधर्मवचना [1]अद्भुतादिशब्दा नियतत्रिलिङ्गा [2]भवन्ति। अद्भुतकरी विद्या अद्भुता। धर्मवचना भैरवादयो नियतत्रिलिङ्गाः। भैरवोऽहिः, दारुणोऽहिः, इत्यादि ॥ दरत्रासौ—भयम्। भयनामानि। भयरसः साध्वसरस इति रसत्वोपचाराद् रसानन्तरकथनम् ॥ १९–२० ॥

[1] अद्भुतादयः B_3. [2] B_3 omits.

विकारो मानसो भावोऽनुभावो भावबोधकः ॥ २१ ॥
गर्वोऽभिमानोऽहंकारो मानश्चित्तसमुन्नतिः ।
(दर्पोऽवलेपोऽवष्टम्भश्चित्तोद्रेकः स्मयो मदः ।)

(वि.) विकार इति—भावयति करोति रसान् भावः । 'भू [1]सत्तायाम्' । मनसोऽयं मानसः । मनोविकारो भाव इत्युच्यते ।

'हर्षोन्मादश्रमाशङ्का निर्वेदो जडता धृतिः ।
[2]ग्लानिश्चिन्तामतिव्रीडा दैन्यं गर्वः स्मृतिर्मदः[3] ॥
गर्हापस्मारसुप्तानि चापलालस्यमुग्रता ।
अमर्षत्रासतर्काश्च निद्रौत्सुक्यं [4]मृतिस्तथा ॥
आवेगो व्याधिरीर्ष्या च विषादश्च विकत्थनम् ।
अवबोध इति प्रोक्ता भावाः संचारिणो बुधैः ॥'

मनोविकारनाम ॥ अनु पश्चादर्थं भावयति प्रकाशयतीति अनुभावः । 'भुवोऽवकल्कने' । मनोविकारज्ञापकहेतुनाम[5] ।

'वागङ्गाभिनयेनेह यस्मादर्थोऽनुभूयते[6] ।
शाखाङ्गोपाङ्गसहितः सोऽनुभावस्ततः स्मृतः ॥'

इति । 'भ्रूभङ्गकटाक्षाद्या अनुभावा इति स्मृताः' इति च । [7]गर्वत्यनेनेति गर्वः । 'कर्व खर्व गर्व दर्पे' । आत्मानं [8]ज्यायांसमभिमनुते अभिमानः । 'मनु अवबोधने' । अहमेव ज्यायानिति करोतीत्यहंकारः । [9]आत्मानं मानयतीति मानः । 'मान पूजायाम्' । चित्तस्य समुन्नतिः चित्तसमुन्नतिः । अहमेव ज्यायानिति मनननामानि ॥ २१ ॥

---

[1] 'भुव अवकल्कने' A, B_1, T. [2] ध्यान° B_2. [3] क्षय: B_2. [4] धृतिः A. [5] पुल्कादिनाम B_2, D_1. [6] अनुभाव्यते K_2, K_5, U. [7] गर्वन्ति B_1. [8] उत्कृष्टं मानयति Pt_2. [9] A, W_1 add एव.

(पा.) विकारो—भावबोधकः । मनसो विकारो भावः स्यात् । स च [1]स्थायिसंचारभेदेन द्विविधो भवति । स च प्रकाशमानः सन् अनुभावः । अत्र[2] भयप्रभृतयः स्थायिनः । गर्वप्रभृतयः संचारिणः । अनादरप्रभृतयोऽनुभावाः । सात्त्विकभावानामनुभावविशेषत्वादनभिधानम्[3] । ते च घर्मप्रलयादयः । गर्वो—समुन्नतिः । गर्वनामानि ॥ गर्विशब्दोऽप्यस्ति । '[4]गर्विः स्त्री चास्मिता गर्वः' इति वैजयन्ती (पृ. ९७, श्लो. १६९) । 'स्मयोऽवलेप उत्सेको दर्पः शौण्डीर्यमित्यपि' । एतानि च ॥ २१ ॥

---

[1] स्थायी A_1. [2] A_1 adds ते के इत्युच्यमाने. [3] °धानत्वम् A_1. [4] गर्वः स्त्री गर्विरस्मिता B_3, B_4; मुद्रितग्रन्थे च.

अनादरः परिभवः परीभावस्तिरस्क्रिया ॥ २२ ॥
रीढावमाननावज्ञावहेलनमसुक्षणम् ।
मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जा सापत्रपान्यतः ॥ २३ ॥

(वि.) अनादर इति—नाद्रियतेऽनादरः[1]। 'दृङ् आदरे'। [2]परिभूयते परिभवः, परीभावश्च । 'भू सत्तायाम्'। तिरस्करोतीति तिरस्क्रिया[3]। 'डुकृञ् करणे'। रिहति हिनस्तीति[4] रीढा। '[5]रिह हिंसायाम्'। अवमानयतीत्यवमानना[6]। 'मान पूजायाम्'। अवज्ञायतेऽनया अवज्ञा। 'ज्ञा अवबोधने'। अवहेलयतीति अवहेलनम्। 'हेडृ अनादरे'। असून् क्षिणोतीति [7]असुक्षणम्। 'क्षिणु हिंसायाम्'। [8]असूर्क्षणमिति वा पाठः। 'सूर्क्ष आदरे'। तिरस्क्रियानामानि ॥ मन्दम् अक्षि यत्रेति मन्दाक्षम्। मन्दम् अक्षम् [9]इन्द्रियमत्रेति वा। जिह्रेत्यनयेति[10] ह्रीः। 'ह्री लज्जायाम्'। त्रपत इति त्रपा। 'त्रपूष् लज्जायाम्'। [11]व्रीड्यतीति व्रीडा। 'व्रीड चोदने लज्जायां च'। [12]व्रीडाशब्दो द्वयोः। लज्जते इति लज्जा। 'ओ लस्जी व्रीडने'। लज्जानामानि ॥ अपत्रपत [13]इत्यपत्रपा। परादागतह्रीनाम ॥ २२–३ ॥

---

[1] आदरः सत्कारः, स न भवतीति Pt_2.
[2] परिभावयति B_2.
[3] तिरस्करणं Pt_2.
[4] कत्थयति B_2, D_2, I, W_1.
[5] 'रिह कत्थनयुद्धनिन्दाहिंसादानेषु' A, B_1, T, W_1, Pt_2.
[6] माननं पूजा तद्विरोधिनी Pt_2.
[7] असूर्क्षणम् अनादरः Pt_2
[8] असूक्षणं इति च पाठः I, W_1.
[9] वाग्यत्र Pt_2.
[10] Pt_2 omits अनया.
[11] व्रीडयति Pt_2.
[12] व्रीडशब्दः पुंलिङ्गोऽप्यस्ति Pt_2.
[13] निकृष्टा त्रपा Pt_2.

(पा.) अनादरः—असूक्षणम्। अनादरनामानि ॥ हलायुधाभिधानेऽनादरावज्ञे भिन्नार्थके।

'अत्याकारः परिभवो [1]निराकारः पराभवः ।
अनादरश्चाभिभवस्तिरस्कारश्च कथ्यते ॥ (अ. मा. ४. १९)
[2]हेला स्यादवहेला चावज्ञा रीढा विमानना' ॥ (अ. मा. ४. ३०)

इति ॥ मन्दाक्षं—लज्जा। लज्जानामानि ॥ व्रीलशब्दोऽप्यस्ति ।

'पथि पथिकवधूभिः सादरं पृच्छ्यमाना
कुवलयदलनीलः कोऽयमार्ये तवेति ।
स्मितविकसितगण्डं व्रीलविभ्रान्तनेत्रं
मुखमवनमयन्ती स्पष्टमाचष्ट सीता ॥'

इति प्रसन्नराघवे[3] ॥ सापत्रपान्यतः। परसकाशाज्जाता लज्जा अपत्रपा स्यात् ॥ २२–३ ॥

[1] निकारश्चेति मुद्रितग्रन्थे. [2] ‘हेला स्यादवहेलं रीढावज्ञावलीढा च’ इति मुद्रितपुस्तके. [3] अयं श्लोकः मुद्रितग्रन्थे न दृश्यते, उपलभ्यते च हनुमन्नाटके (३. १५); A$_1$ adds विवासोपरिव्रीलनं लज्जा.

क्षान्तिस्तितिक्षाभिध्या तु परस्वविषये स्पृहा ।
अक्षान्तिरीर्ष्यासूया तु दोषारोपो गुणेष्वपि ॥ २४ ॥

(वि.) क्षान्तिरिति—क्षम्यत इति [1]क्षान्तिः। ‘क्षमूष् सहने’। तितिक्षते तितिक्षा। ‘[2]तिज निशाने’। निशानं सहनम्। मर्षणनामानि ॥ [3]अभिध्यायते अभिध्या। ‘ध्यै चिन्तायाम्’। [4]परद्रव्यलिप्सानाम ॥ न क्षान्तिरक्षान्तिः। ईर्ष्यतीति [5]ईर्ष्या। ‘ईर्ष्य ईर्ष्यायाम्’। अक्षमानाम ॥ असूयतीति असूया। गुणेषु [6]दोषारोपनाम ॥ २४ ॥

[1] तितिक्षा च A. [2] ‘तिज क्षमायाम्’ W$_2$. [3] अपहरणे ग्रहणे ध्यानमभिध्या Pt$_2$. [4] ईप्सा W$_1$. [5] ईर्षतीति ईर्षा। ईर्ष अमर्षार्थः। सा अत्रेति वा B$_2$. [6] रोषाद्यारोपण° D$_2$.

(पा.) क्षान्तिस्तितिक्षा। मर्षणनामनी ॥ अभिध्या—स्पृहा। परद्रव्यविषयस्पृहा अभिध्या स्यात्। विषये स्पृहेति वा पाठः। अक्षान्तिरीर्ष्या। [1]परौन्नत्यासहननामनी ॥ असूया—अपि। गुणेषु दोषारोपणमसूया स्यात् ॥ २४ ॥

[1] परोत्कर्षा° B$_3$.

वैरं विरोधो विद्वेषो मन्युशोकौ तु शुक् स्त्रियाम् ।
पश्चात्तापोऽनुतापश्च विप्रतीसार इत्यपि ॥ २५ ॥

(वि.) वैरमिति—वीरस्य कर्म वैरम्। विरुणद्धीति विरोधः[1]। ‘रुधिर् आवरणे’। विद्वेष्टीति विद्वेषः[2]। ‘द्विष अप्रीतौ’। वैरनामानि ॥ विरुद्धलक्षणया मन्यतेऽनेनेति मन्युः। ‘मन ज्ञाने’। [3]शोचत्यनेन शोकः। ‘शुच शोके’। शुक् च। शोकनामानि ॥ पश्चात्तपतीति[4] पश्चात्तापः। अनुतापश्च। ‘तप संतापे’। विरुद्धं [5]प्रतिसरतीति विप्रतीसारः। ‘सृ गतौ’। पश्चात्तापनामानि ॥ २५ ॥

[1] विशेषेण रोधः Pt$_2$. [2] विद्विष्यते A; विशेषो द्वेषः Pt$_2$. [3] शोचयति D$_2$, U; शोचनं Pt$_2$. [4] तापयति Pt$_2$. [5] प्रतिसरणं Pt$_2$; विप्रतिसारः D$_2$, K$_5$.

(पा.) वैरं—विद्वेषः। वैरनामानि ॥ अनुक्तम्—'कलहोऽस्त्री झकटकः'। कलहनामनी ॥ 'दोर्मध्यं तु [1]करेकरम्'। मुष्टिप्रहारनामनी ॥ मन्यु—स्त्रियाम्। शोकनामानि ॥ पश्चात्तापो—इत्यपि। पश्चात्तापनामानि। 'पृष्ठमांसादनं पश्चाद् गतस्यार्थस्य चिन्तनम्'। गतार्थचिन्तनं पृष्ठमांसादनं स्यात् ॥ २५ ॥

---

[1] करेङ्कडम् A_1.

कोपक्रोधामर्षरोषप्रतिघा रुट्क्रुधौ स्त्रियौ।
शुचौ तु चरिते शीलमुन्मादश्चित्तविभ्रमः ॥ २६ ॥

(वि.) कोप इति—[1]कुप्यतीति कोपः। 'कुप क्रोधे'। क्रुध्यतीति क्रोधः। 'क्रुध कोपे'। न मृष्यत्यनेन [2]अमर्षः। 'मृष सहने'। रुष्यत[3] अनेनेति रोषः। 'रुष हिंसायाम्'। रुट् च। प्रतिहन्तीति प्रतिघः। 'हन हिंसागत्योः'। क्रुध्यतीति [4]क्रुत्। 'क्रुध कोपे'। कोपनामानि ॥ [5]शीलतीति शीलम्। 'शील समाधौ'। शुचिचरितनाम ॥ उन्माद्यतेऽनेनेति उन्मादः। '[6]मदी हर्षग्लपनयोः'। चित्तस्य विभ्रमः चित्तविभ्रमः। [7]भूताद्यावेशागतचित्तविभ्रमनाम[8] ॥ २६ ॥

---

[1] कुप्यत्यनेन A, B_1, T. [2] न मर्षणममर्षः Pt_2. [3] रुष्यति B_1. [4] क्रुध्यत्यनया A, B_1, T. [5] शीलयतीति D_2. [6] 'मदी हर्षे' B_1. [7] °आवेशात् I. [8] °भ्रमण° B_2, K_5.

(पा.) कोप—स्त्रियाम्। कोपनामानि ॥ रुषाक्रुधाशब्दावपि [1]स्तः। 'रुषारुट्क्रुत्क्रुधाः[2] स्त्रियाम्[3]' इति वैजयन्ती (पृ. ९८, श्लो. १८३)। शुचौ—शीलम्। 'आचारश्चरितं वृत्तं चरित्रं चरणं च तत्' इति [4]वैजयन्ती (पृ. ९२, श्लो. ११५)। [5]सदाचारः शीलं स्यात्। उन्मादः—विभ्रमः। चित्तभ्रमणमुन्मादः स्यात्। अनुक्तम्—'तन्द्रा कौसीद्यमालस्यम्'। आलस्यनामानि ॥ 'विस्मृतिः प्रस्मृतिः समे'। [6]विस्मृतिनामनी ॥२६॥

---

[1] B_3 omits. [2] क्रुधा B_4. [3] स्त्रियः B_3; मुद्रितग्रन्थे च. [4] आचारो वृत्तचारित्रचरित्रचरणानि च इति मुद्रितग्रन्थे. [5] शुद्धयाचारः A_1. [6] विस्मरण° B_3.

प्रेमा ना प्रियता हार्दं प्रेम स्नेहोऽथ दोहदम्।
इच्छा काङ्क्षा स्पृहेहा तृड् वाञ्छा लिप्सा मनोरथः॥ २७॥
कामोऽभिलाषस्तर्षश्च सोऽत्यर्थं लालसा द्वयोः।

(वि.) प्रेमेति—प्रियस्य भावः प्रेमा। [1]प्रेम च। प्रियता च। हृदः कर्म [2]हार्दम्। स्निह्यत इति [3]स्नेहः। 'ष्णिह प्रीतौ'। स्नेहनामानि॥ दोग्धीति दोहः तं ददातीति दोहदम्[4]। 'दुह प्रपूरणे'। इच्छति ययेति इच्छा[5]। 'इषु इच्छायाम्'। [6]काङ्क्षति काङ्क्षा। 'काक्षि काङ्क्षायाम्'। स्पृहयतीति[7] स्पृहा। 'स्पृह ईप्सायाम्'। ईहनं ईहा। 'ईह चेष्टायाम्'। तृष्यतीति तृट्। तर्षश्च। 'ञितृषा पिपासायाम्'। [8]वाञ्छतीति वाञ्छा। 'वाछि इच्छायाम्'। लब्धुमिच्छा लिप्सा। 'डुलभष् प्राप्तौ'। मनो रथो यस्य सः मनोरथः[9]। [10]काम्यते कामः। 'कमु कान्तौ'। [11]अभिलषति अभिलाषः। 'लष कान्तौ'। इच्छानामानि॥ तर्षणं [12]तर्षः। 'तृष पिपासायाम्'। स एवाधिकश्चेत् लालसा। अतिशयेन लस्यते लालसा। 'लस श्लेषणक्रीडनयोः'। भृशतराभिलाषनाम॥२७॥

---

[1] प्रेम नपुंसकम् B₂; D₁ adds 'प्रीञ् तर्पणे कान्तौ च'.
[2] हृदये भवं Pt₂.
[3] स्निह्यत्यनेन A, B₁, T.
[4] दोहमाकर्षं गर्भिण्यादेर्ददाति I, K₅, W₂.
[5] एषणमिच्छा Pt₂.
[6] काङ्क्षणं Pt₂.
[7] स्पृहणं Pt₂.
[8] वाञ्छनं Pt₂.
[9] भ्रामकत्वेन मनसो रथ इव स्थितत्वात् Pt₂; मन एव रथः D₁.
[10] कम्यते U, W₁.
[11] अभिलषणं Pt₂.
[12] A, B₁, T omit.

(पा.) प्रेमा—स्नेहः। स्नेहनामानि॥ पुंलिङ्गप्रेमशब्दस्तद्धितान्तः। नपुंसकलिङ्ग-प्रेमशब्दः कृत्प्रत्ययान्तः[1]। तस्मात्—'स्नेहोऽस्त्री प्रेम सौहार्दमजीर्यं हार्दसौहृदे' [2]इत्यन्यसमीरिता संग्रहोक्तिरपि युक्ता। अथ दोहदम्—तर्षश्च। तृष्णानामानि॥ स महान् लालसा द्वयोः। अत्यर्थमिति वा पाठः। अतितृष्णानाम॥ २७॥

---

[1] कृदन्तः नपुंसकलिङ्गः B₃.
[2] अन्यसंगृहीता B₃.

उपाधिर्ना धर्मचिन्ता पुंस्याधिर्मानसी व्यथा॥ २८॥
स्याच्चिन्ता स्मृतिराध्यानमुत्कण्ठोत्कलिके समे।
उत्साहो व्यवसायः स्यात् स वीर्यमतिशक्तिभाक्॥ २९॥

(वि.) उपाधिरिति—उप समीपे आधीयते धर्मोऽत्रेति [1]उपाधिः। धर्मचिन्ताया नाम॥ आधीयते दैन्यमनेन आधिः। 'डुधाञ् धारणपोषणयोः'। मनोव्यथानाम॥ चिन्त्यते चिन्ता[2]। 'चिति स्मृत्याम्'। दारिद्र्यादिना वितर्कनाम॥ स्मर्यत इति [3]स्मृतिः। 'स्मृ आध्याने'। विस्मृतस्मरणनाम॥ आ समन्तात् ध्यायते आध्यानम्। 'ध्यै चिन्तायाम्'। उत्कण्ठात्मकस्मरणनाम॥ केचित् त्रय एकार्था इति [4]वदन्ति। उत्कण्ठ्यते[5] उत्कण्ठा। 'कठि शोके'। उत्कल्यते उत्कलिका। 'कल संख्याने'। औत्सु-

क्यनामानि ॥ [6]उत्सहनं उत्साहः । ‘षह मर्षणे’ । व्यवसीयत इति व्यवसायः । ‘षोऽन्तकर्मणि’ । अध्यवसायो[7] वा । उत्साहनामानि[8] ॥ वीरस्य कर्म वीर्यम् । अतिशक्तिसहितोद्योगनाम ॥ २८–९ ॥

[1] उपपन्नश्चासावाधिश्च, ‘डुधाञ् . .’, पुंलिङ्गः D_1. [2] ‘चिति चिन्तायाम्’ K_2, Y. [3] स्मरणं Pt_2; स्मर्यतेऽनया D_2, W_1. [4] भणन्ति I, K_3, K_5, W_2. [5] उत्कण्ठते A. [6] उत्सहते A; उद्गतं सहनं Pt_2. [7] Pt_2 adds. [8] उद्योगनामानि B_2, D_2, I, K_5, W_2.

(पा.) उपाधिः—धर्मचिन्ता । धर्मचिन्ता उपाधिः स्यात् । पुंसि—व्यथा । मनोव्यथा आधिः स्यात् । स्याच्चिन्ता—आध्यानम् । चिन्तानामानि ॥ चिन्तियाशब्दोऽप्यस्ति । ‘चिन्ता स्याच्चिन्तिया स्मृतिः’ इति रभसकोशः । उत्कण्ठा—समे । औत्सुक्यनामानि । समशब्दग्रहणात् सर्वस्यापि ग्रहणम् । ‘उत्कण्ठा स्यादुत्कलिका रतिश्च रणरणकम्’ इत्यन्योक्तायल्लकादय ईषद्भिन्नार्थकाः ।

‘उत्कण्ठा परितापो रणरणकं जागरस्तनोस्तनुता ।
फलमिदमहेयमाप्तं सुखाय मृगलोचनां दृष्ट्वा ॥’

उत्साहो—स्यात् । यत्ननामनी ॥ ‘यत्नोत्साहोद्यमायासास्तरीषोऽध्यवसायवत्’ इति वैजयन्ती (पृ. ९५, श्लो. १६७) । स वीर्यमतिशक्तिभाक् । स यत्नोऽतिशक्तिभाक्[1] चेत्[2] वीर्यं स्यात् । ‘अतिशयशक्तिर्वीर्यमिति’ [3]त्रिकाण्डेऽमरमाला ॥ २८–९ ॥

[1] शक्तिमान् B_3. [2] यदि B_1. [3] B_3 omits.

कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे ।
कुसृतिर्निकृतिः शाठ्यं प्रमादोऽनवधानता ॥ ३० ॥

(वि.) कपट इति—के शिरसि पट इव आच्छादकः कपटः । कं ब्रह्माणमपि पटतीति वा । ‘पट गतौ’ । [1]व्यजतीति व्याजः । ‘अज गतिक्षेपणयोः’ । दभ्नोति हिनस्तीति[2] दम्भः । ‘दम्भु [3]आज्ञापने’ । उप समीपे धीयत इत्युपधिः[4] । ‘डुधाञ् धारणपोषणयोः’ । छाद्यते स्वरूपमनेनेति [5]छद्म । ‘छद अपवारणे’ । कितवस्य कर्म कैतवम् । कपटनामानि ॥ कुत्सिता सृतिः हिंसा कुसृतिः । ‘सृ गतौ’ । निकृष्टं [6]कृणाति हिनस्तीति निकृतिः । ‘कृ हिंसायाम्’ । शठतीति शठः । ‘शठ हिंसासंक्लेशनकैतवेषु’ । [7]शठस्य कर्म शाठ्यम् । [8]अनात्मकव्यापारनामानि ॥ प्रमाद्यतीति [9]प्रमादः । ‘मदी हर्षे’ । न विद्यतेऽवधानं यस्य सः अनवधानः । तस्य भावः अनवधानता । [10]चित्ताकुलतानामनी ॥ ३० ॥

[1] कुत्सितपट इव आच्छादकः कपटः B_2; विशेषेण अजति क्षपयति B_2; व्यज्यतेऽनेनेति Pt_2.
[2] A, B_1, T add अनेन.
[3] दम्भने Pt_2; हिंसायाम् A, B_1, W_1.
[4] B_2, D_1, K_5, W_2 add स्फटिकस्येव सिन्दूरं.
[5] नकारान्तनपुंसकलिङ्गम् D_1.
[6] करोतीति, 'डुकृञ् करणे' A; कृणातीति कृतिः, निकृष्टा कृतिः I.
[7] तस्य D_1, I.
[8] आत्मानात्मक° K_3.
[9] प्रकृष्टो मदः Pt_2.
[10] चिन्ताकुल(ता W_2) नामानि B_1, T.

(पा.) कपटो—कैतवे। कपटनामानि ॥ 'मिषं निभं छलं दण्डाजिनं गजनिमीलनम्'। एतानि पञ्च च। कुसृतिः—शाठ्यम्। शाठ्यनामानि[1]। प्रमादोऽनवधानता। अनवधाननामनी ॥ ३० ॥

---

[1] A_1 adds भाषया 'दब्बिर'.

कौतूहलं कौतुकं च कुतुकं च कुतूहलम्।
स्त्रीणां विलासबिब्बोकविभ्रमा ललितं तथा ॥ ३१ ॥
हेला लीलेत्यमी हावाः क्रियाः शृङ्गारभावजाः।

(वि.) कौतूहलमिति—एते शब्दा रूढाः[1]। [2]कुत्सितं पापं तूलयतीति कौतूहलम्। कुतूहलं च। 'तूल निष्कर्षे'। कुत्सितं तोजयतीति कुतुकम्। 'तुज हिंसाबलादाननिकेतेषु'। कुतुकमेव कौतुकम्। [3]अननुभूताभीष्टाभिलाषनामानि ॥ विलसति येनेति [4]विलासः। 'लस श्लेषणक्रीडनयोः'। प्रिये आगते सति प्रियाया [5]अङ्गेषु यो विशेषो जायते तस्य नाम ॥ विशेषेण [6]बुक्कति गर्वतीति बिब्बोकः[7]। 'बुक्क गर्वे'। प्रिये आगते सति प्रियाया गर्वादनादरनाम ॥ विशेषेण भ्रमतीति विभ्रमः। 'भ्रमु अनवस्थाने'। शृङ्गाराधिक्यात् चित्तवृत्त्यनवस्थाननाम ॥ ललतीति ललितम्। 'लल विलासे'। [8]स्वपरिकल्पितसुकुमाररत्याद्यङ्गचेष्टितनाम ॥ हिलतीति हेला। हेडते वा। 'हिल भावकरणे' 'हेडृ अनादरे' इति वा धातुः। [9]शृङ्गारक्रीडानाम ॥ ललनं लीला। 'लीङ् श्लेषणे'। [10]मनोमधुरवागङ्गचेष्टितैः प्रियानुकरणनाम ॥ स्त्रीणां शृङ्गारभावजाः क्रिया अमी हावा उच्यन्ते। हूयन्ते कामिनः एभिरिति हावाः। 'हु दानादनयोः' ॥ ३१ ॥

---

[1] B_1, D_1, I, K_5, W_2 add the line.
[2] W_1, Pt_2 add.
[3] I, U, W_1 omit अभीष्ट°.
[4] विशेषेण लसनं Pt_2.
[5] अङ्गे A; अङ्गैः W_1.
[6] बुकति B_2, I.
[7] विवोः गतिविशेषस्य ओकः स्थानं, वबयोरभेदः, विपूर्वको 'वा गतिगन्धनयोरिति' धातुः Pt_2.
[8] सुरत° A, T; स्वपति° K_5, U.
[9] °प्रौढि° B_2, D_1, K_1, K_5, Y.
[10] मधुरतर° A, T, W_1.

(पा.) कौतूहलं—कुतूहलम् । अनुभूताभीष्टाभिलाषनामानि ॥ स्त्रीणां—भावजाः । स्मितकटाक्षसंवृत्यादयो विलासाः । भर्त्सनादयो बिब्बोकाः । वचनभूषणादिवृत्तयो[1] विभ्रमाः । सुकुमारक्रमो ललितम् । धाष्टर्याचरणं हेला । प्रियगतिवचनाद्यनुकरणं लीला । इतिशब्देन मोट्टायितकुट्टमितादीनां ग्रहणम् । तत्र मोट्टायितं कर्णकण्डूयनगात्रभङ्गादि । कुट्टमितमोष्ठग्रहणसुखे दुःखाभिनयः । [2]किलकिञ्चितं क्रोधाश्रुहर्षभीत्यादिसांकर्यं विकृतमुखभाषणम् । विच्छित्तिमाल्यभूषणादिनिरासः विक्षेपः । असकलप्रतिकर्म मौग्ध्यम्[3] । स्त्रीणां शृङ्गारभावादुत्पन्नविलासादिचेष्टा हावशब्दवाच्याः ॥ ३१ ॥

---

[1] °विभ्रयाः A₁.　[2] किलिकिञ्चितं A₁.　[3] A₁, B₄ add मुक्ताः कस्य कदा फलानीत्यादिवाक्प्रयोगश्च.

द्रवकेलिपरीहासाः क्रीडा लीला च नर्म च ॥ ३२ ॥
व्याजोऽपदेशो लक्ष्यं च क्रीडा खेला च कूर्दनम् ।
घर्मो निदाघः स्वेदः स्यात् प्रलयो नष्टचेष्टता ॥ ३३ ॥

(वि.) द्रवेति—द्रवति हृदयमनेनेति द्रवः । 'द्रु गतौ' । केलति चित्तं केलिः[1] । 'केलृ चलने' । किलतीति वा । 'किल श्वैत्ये क्रीडायां च' । परिहसतीति परीहासः । 'हसे हसने' । क्रीडतीति क्रीडा । 'क्रीडृ [2]विहारे' । ललनं लीला । 'लीङ् श्लेषणे' । खेलेति वा पाठः । खेलतीति खेला । 'खेलृ चलने' । [3]नृणाति रत्यतिशयं प्रापयतीति नर्म । 'नॄ [4]नये' । प्रियाणां प्रियाभिः सह [5]क्रियमाणरतिपरिहासनाम ॥ [6]व्यजति क्षपयतीति व्याजः । 'अज गतिक्षेपणयोः' । अपदिश्यतेऽतद्रूपेणानेनेति अपदेशः । 'दिश अतिसर्जने' । लक्ष्यतेऽनेनेति लक्ष्यम् । 'लक्ष दर्शनाङ्कनयोः' । मिषनामानि ॥ [7]क्रीडतीति क्रीडा । 'क्रीडृ विहारे' । खेलतीति खेला । 'खेलृ चलने' । कूर्दत इति कूर्दनम्[8] । 'कुर्द क्रीडायाम्' । विहारनामानि ॥ [9]अङ्गं जिघर्तीति घर्मः । 'घृ क्षरणदीप्त्योः' । नितरां दहतीति निदाघः । 'दह भस्मीकरणे' । निदाघकाले जातो वा निदाघः । स्विद्यतेऽनेनाङ्गमिति स्वेदः । 'ष्विदा गात्रप्रक्षरणे' । स्वेदनामानि ॥ [10]प्रलीयते क्रिया अत्रेति प्रलयः । 'लीङ् श्लेषणे' । [11]नष्टचेष्टतानाम ॥ ३२–३ ॥

---

[1] केलिः द्वयोः D₂, W₂; 'केलृ चलने', 'केलृ क्रीडायाम्', 'केलृ वलनक्रीडनयोः' इति धातुत्रयम् A.　[2] विहरणे B₁, D₂, K₅, W₂.　[3] नृणां B₁.　[4] प्रीणने A, K₁.　[5] B₁, D₁, W₂ omit रति.　[6] व्यज्यते क्षिप्यते Pt₂.　[7] क्रीडनं Pt₂.　[8] कुर्दनमिति केचित् पठन्ति B₂, K₅.　[9] Pt₂ omits अङ्गं.　[10] A adds प्रकर्षेण.　[11] °चेष्टित° K₅.

(पा.) द्रवकेलि—नर्म च। कान्तैः कान्ताभिः सह [1]कृतपरिहासभर्त्सनताडनादिनामानि[2]। व्याजो—लक्षं च। 'लक्षं संख्या व्याजलक्ष्ये' इति रुद्राभिधानात् लक्षं मूर्धन्यान्तम्। विषमनामानि। अत्र कपटपर्यायमपि[3] प्रपञ्चयन्ति।

> 'सरागमुर्व्या मृगनाभिदम्भादपारकर्पूरपदेन कीर्त्या।
> [4]रत्यापि दन्तच्छदरुक्छलेन स एकहेलं सुभगोऽवगूढः[5]'॥

इति धर्मशर्माभ्युदयः। क्रीडा—कूर्दनम्। कूर्दनमिति च क्वचित् पाठः। 'उपधायां [6]च' (८. २. ७८) इति दीर्घत्वमत्र कैश्चिन्नेष्यत इति रक्षितवचनात् कुर्दनमित्यप्यस्ति। विहारनामानि॥ घर्मो—स्वेदः स्यात्। स्वेदनामानि॥ प्रलयो नष्टचेष्टता। नष्टचेष्टतेति निष्पन्दस्थितिः। सा प्रलयः स्यात्। अनुक्तम्—'कालिका तु विवर्णता'। वैवर्ण्यं कालिका स्यात्॥ ३२–३॥

---

[1] °परिहसन° B₃. [2] A₁ adds भावया 'सरसालु'. [3] °पर्यायान् B₃.
[4] श्रिया B₃. [5] उपगूढः A₁, B₁. [6] 'र्वोरुपधाया दीर्घ इकः' (८. २. ७६) B₃.

अवहित्थाकारगुप्तिः समौ संवेगसंभ्रमौ।
स्यादाच्छुरितकं हासः सोत्प्रासः स मनाक् स्मितम्॥ ३४॥
मध्यमः स्याद् विहसितं रोमाञ्चो रोमहर्षणम्।

(वि.) अवहित्थेति—अवहीयते गोप्यते आकारोऽत्रेति अवहित्था[1]। 'ओहाक् त्यागे'। आकारगुप्तिनाम॥ संविज्यते[2] संवेगः। 'ओ विजी भयचलनयोः'। [3]संभ्रमत्यनेनेति संभ्रमः। 'भ्रमु अनवस्थाने'। संभ्रमनामनी॥ आ समन्तात् [4]छुरतीति आच्छुरितकम्। 'छुर छेदने'। उत्प्रास्यते उत्क्षिप्यतेऽनेनेति उत्प्रासः। तेन सह वर्तत इति सोत्प्रासः। सोत्प्रासो हासः आच्छुरितकमित्युच्यते। सामर्षहासनाम॥ स हासः मनाक् ईषच्चेत् स्मितमित्युच्यते। स्मीयते स्मितम्। 'ष्मिङ् ईषद्धसने'। ईषद्धासनाम॥ विहस्यते [5]विहसितम्। 'हस हसने'। मध्यमहासनाम॥ रोमाणि अञ्चतीति [6]रोमाञ्चः। 'अञ्चु गतिपूजनयोः'। रोमाणि हृष्यन्त्यनेन रोमहर्षणम्। 'हृष तुष्टौ'। पुलकोद्गमनामनी[7]॥ ३४॥

---

[1] अवहित्थमित्येके D₁, I. [2] Pt₂ adds अनेनेति. [3] संभ्रम्यते Pt₂; संभ्रमयति B₁.
[4] छुरयति U. [5] स्मितादिहसितयोर्मध्यमः Pt₂. [6] रोम्णामञ्चनं Pt₂. [7] B₂, D₁, I add पुलको रोमविक्रिया.

(पा.) अवहित्थाकारगुप्तिः। लज्जाभयादिहेतुकाकारगोपनमवहित्था स्यात्। अवहित्थमप्यस्ति[1]। ‘न पुमानवहित्था स्यादङ्गी गृहजालिकाप्यस्याम्’ इति वैजयन्ती (पृ. १४३, श्लो. ८६)। समौ—संभ्रमौ। इष्टदर्शनादिभ्यो भूततारतम्यविरहनामनी॥ स्यात्—सोत्प्रासः। परिहासवचनसहितहास्यमाच्छुरितकं स्यात्॥ स मनाक् स्मितम्। स [2]हासो मनाक् चेत् स्मितं भवति। मनाक्शब्देनादृष्टदन्तत्वलक्षणम्। ‘स्मितं त्वदृष्टदशने हासो वक्रोष्ठिका न ना’ इति वैजयन्ती (पृ. १४२, श्लो. ८३)। मध्यमं—विहसितम्। स्मितं मध्यमं चेद् विहसितम्। अनुक्तम्—‘अट्टहासो महत्तरः’। स हासो महान्[3] चेत् अट्टहासः स्यात्। रोमाञ्चो—हर्षणम्। पुलकोद्गमनामनी॥ क्वचित् स्पष्टलिङ्गस्यापि साहचर्यमपेक्ष्यम्।

‘भयाद् यदेवोद्गतमङ्गनानां देवासुराणां प्रधनोत्सुकानाम्।
तदेव हर्षश्च तयोर्जयेन रोमाञ्चमस्याप्युपकारि जातम्॥’

इति राघवपाण्डवीयम् (द्विसं. ६. ४८)॥ ३४॥

---

[1] A₁ adds आकारगोपनायामवहित्थिकाप्यवकुटिलिकापि स्त्री.　[2] हस: B₃.　[3] A₁ adds स्यात्.

क्रन्दितं रुदितं क्रुष्टं जृम्भस्तु त्रिषु जृम्भणम्॥ ३५॥
विप्रलम्भो विसंवादो रिङ्खणं स्खलनं समे।
स्यान्निद्रा शयनं स्वापः स्वप्नः संवेश इत्यपि॥ ३६॥

(वि.) क्रन्दितमिति—[1]क्रन्द्यतेऽनेन क्रन्दितम्। ‘क्रदि आह्वाने रोदने च’। [2]रोदित्यनेन रुदितम्। ‘रुदिर् अश्रुविमोचने’। [3]क्रोशत्यनेन क्रुष्टम्। ‘क्रुश आह्वाने रोदने च’। रुदितनामानि॥ जृम्भन्तेऽनेनेति जृम्भः। जृम्भणं च। ‘[4]जृभि गात्रविनामे’। [5]निद्रावसाने आरम्भे वा मुखविकासविशेषनामनी॥ विप्रलभ्यतेऽनेन विप्रलम्भः। ‘डुलभष् प्राप्तौ’। [6]विसंवदतीति विसंवादः। ‘वद व्यक्तायां वाचि’। अङ्गीकृतापह्नवनामनी॥ रिङ्खतीति रिङ्खणम्। ‘रिखि गतौ’। रिङ्गणमिति वा पाठः। ‘रिगि गतौ’। [7]स्खलतीति स्खलनम्। ‘स्खल संचलने’। [8]स्वधर्माच्चलननामनी॥ चत्वार्येतानि प्रतारणस्यैवेति केचित्॥ नियतं द्रान्तीन्द्रियाण्यत्रेति निद्रा। ‘द्रा कुत्सायां गतौ’। [9]शेते शयनम्। ‘शीङ् स्वप्ने’। स्वपितीति स्वापः। स्वप्नः। ‘ञिष्वप् शये’। [10]संविशत्यत्रेति संवेशः। ‘विश प्रवेशने’। निद्रानामानि॥ ३५–६॥

[1] क्रन्दति B₁, D₁. [2] रुद्यते B₂, W₂. [3] क्रुश्यते W₂; A omits अनेन. [4] जृभ जृभि A, B₁, T, Pt₂. [5] निशावसाने B₁, W₂. [6] विसंवदनं Pt₂. [7] स्खलितं D₂, Pt₂. [8] गोत्रस्खलन° A, B₁, T, W₁. [9] शेरते प्राणिनोऽत्रेति B₂; शेते यत्र I. [10] संविशति W₁.

(पा.) क्रन्दितं—क्रुष्टम्। [1]रुदितनामानि ॥ जृम्भस्तु—जृम्भणम् । अङ्गभङ्गनामानि ॥ 'निद्रावसानप्रारम्भयोर्मुखविकासविशेषनामनी' इति लिङ्गभट्टीयम् । जृम्भो नियतस्त्रीलिङ्गश्चेत् मुखविकासनाम । 'जृम्भणं तु त्रयी जृम्भा मुखभेदस्तु जृम्भिका' इति वैजयन्ती (पृ. १४३, श्लो. ८८)। विप्रलम्भो विसंवादः। फलविप्रतिपत्तिनामनी ॥ रिङ्खणं—समे। अङ्गीकृतत्यागनामनी । स्यान्निद्रा—संवेश इत्यपि। निद्रानामानि ॥ स्वप्नशब्दोऽवस्थात्रयमध्यावस्थायामपि स्यात्। 'निद्रा गुडाका सुप्तिश्च[2] स्वप्नस्त्वेवात्र दर्शनम्' इति वैजयन्ती (पृ. ९९, श्लो. १९७) ॥ ३५–६ ॥

[1] रोदन° B₃. [2] सुप्तं चेति मुद्रितपुस्तके.

तन्द्री प्रमीला भ्रकुटिर्भ्रुकुटिर्भ्रूकुटिः स्त्रियाम् ।
अदृष्टिः स्यादसौम्येऽक्षिण संसिद्धिप्रकृती त्विमे ॥ ३७ ॥
स्वरूपं च स्वभावश्च निसर्गश्चाथ वेपथुः ।
कम्पोऽथ क्षण उद्धर्षो मह उद्धव उत्सवः ॥ ३८ ॥

इति नाट्यवर्गः

(वि.) तन्द्रीति—[1]ततम् इन्द्रियाणां विस्तारं द्रातीति तन्द्री। तन्द्रा। तन्द्रिश्च। 'द्रा कुत्सायां गतौ'। प्रमीलन्ति [2]इन्द्रियाण्यत्र प्रमीला। '[3]मील निमेषणे'। महाश्रमोपजनितेन्द्रियोपरतिनामनी ॥ भ्रुवोः कुटिः कुटिलता भ्रकुटिः, भ्रुकुटिः, भ्रूकुटिश्च। 'कुट [5]कौटिल्ये'। भ्रुवोः कुटिलतानाम ॥ असौम्या दृष्टिः अदृष्टिः। [6]विरुद्धदर्शननाम ॥ संसिध्यतीति संसिद्धिः[7]। 'षिधु संराद्धौ[8]'। प्रकर्षेण क्रियते [9]प्रकृतिः। 'डुकृञ् करणे'। स्वस्य रूपं स्वरूपम्। [10]स्वमात्मानं भावयतीति स्वभावः। 'भुवोऽवकल्कने'। निसृज्यते निसर्गः। 'सृज विसर्गे'। स्वभावनामानि ॥ [11]वेपते वेपथुः। 'टुवेपृ कम्पने'। [12]कम्पते कम्पः। 'कपि चलने'। कम्पनामनी ॥ अशुभं क्षणोति हिनस्तीति क्षणः। 'क्षणु हिंसायाम्'। उत्कृष्टः हर्षः उद्धर्षः। मह्यते जनैरिति महः। 'मह पूजायाम्'। उत् उद्धतं हूयन्ते जना अत्रेति उद्धवः। उत् उद्धतं जनान्

सुवतीति उत्सवः। 'षू प्रेरणे'। उत्सूते सुखमिति वा। 'षूङ् प्राणिगर्भविमोचने'। उत्सवनामानि ॥ ३७–८ ॥

इत्यमरकोशपदविवृतौ नाट्यवर्गः

---

[1] तं ततं B_1, Y; अत्यन्तमिन्द्रियाणि द्रान्त्यत्रेति Ft_2.

[2] नयनानि A, B_1, T.

[3] 'मील निमीलने' A, B_1, T.

[4] °उत्पन्न° B_2.

[5] कापट्ये W_2.

[6] °दृष्टि° D_1, I.

[7] सम्यक् सिद्धिः Pt_2; सम्यक् सिध्यति B_2.

[8] गत्यां D_2, I, K_1, K_2, U, Pt_2.

[9] प्रकृष्टं करोतीति Pt_2.

[10] स्वस्य भावः Pt_2.

[11] वेपनं Pt_2.

[12] कम्पनं Pt_2.

(पा.) तन्द्री प्रमीला। [1]निद्राभरजनितेन्द्रियविकारनामनी[2] ॥ 'विभज्य नक्तंदिवमस्ततन्द्रिणा' (किरा. १. ९) इति केचिद्[3] ह्रस्वान्तस्तन्द्रिरिति। 'तन्त्रीः कर्णामृतं कूज तन्द्रीः संश्रय चक्षुषी' इति केषांचिद्दीर्घान्तः। भ्रकुटिः—स्त्रियाम्। भ्रूकौटिल्यनामानि। भ्रुकुटिशब्दो रुवर्णादिः ऋवर्णादिश्च भवति[4]। 'भ्रुकुटिर्भ्रूकुटिः स्त्रियाम्। भ्रकुटिर्भृकुटिः सारी काली तीरतरङ्गिका। रेचितं त्वेकया भ्रुवा' इति वैजयन्ती। (पृ. १४३, श्लो. ९१-२) एकभ्रुवो भेदो रेचितं स्यात् ॥ अदृष्टिः—अक्ष्णि। [5]रोषादिभिविकृतदृष्टिः अदृष्टिः स्यात्। संसिद्धि—निसर्गश्च। स्वभावनामानि ॥ चशब्दाः रूपभावसर्गसमुच्चयार्थाः। अथ—कम्पः। कम्पनामनी ॥ अथ क्षण—उत्सवः। उत्सवनामानि ॥ अत्र महशब्दोऽकारान्तः। यथा—'स स्वयंवरमहाय महेन्द्रान्' इति नैषधे (५. १)। अनुक्तम्—'पूर्णानकं पूर्णपात्रं वस्त्राद्याकृष्टमुत्सवे'। उत्सवे आकृष्टवस्त्रादिनामनी ॥ 'उत्सवार्थं तु यत् तूर्यं तत्र स्यात् प्रियवादिका'। उत्सवार्थतूर्यं प्रियवादिका स्यात्। मङ्गलवाद्यनाम ॥ ३७-८ ॥

इति [6]श्रीवत्सनृसिंहसूरिसुतमल्लिनाथसूरिविरचितेऽमरपदपारिजाते नाट्यवर्गः

---

[1] °इन्द्रियोपरति° A_1.

[2] B_3 adds भाषया 'कुनिकिपाट्टु'.

[3] B_3 adds भारविप्रयोगात्.

[4] B_3 adds अनुक्तम्—भृकुटिः सारी काली तीरतरङ्गिका.

[5] रुषादि° A_1.

[6] °नरसिंह° A_1.

९. पातालवर्गः

अधोभुवनपातालं बलिसद्म रसातलम् ।
नागलोकोऽथ कुहरं सुषिरं विवरं बिलम् ॥ १ ॥
छिद्रं निर्व्यथनं रोकं रन्ध्रं श्वभ्रं वपा सुषिः ।
गर्तावटौ भुवि श्वभ्रे सरन्ध्रे सुषिरं त्रिषु ॥ २ ॥

(वि.) अधोभुवनमिति—[1]अधःस्थितं भुवनम् अधोभुवनम् । पतन्त्यस्मिन् पापादिति पातालम् । 'पतॢ गतौ' । बलेः सद्म बलिसद्म । रसाया भूमेः तलमधोभागः रसातलम् । नागानां लोकः नागलोकः । [2]पातालल्लोकनामानि ॥ प्राण्यादिकं कुत्सितं कृत्वा हरतीति कुहरम । 'हृञ् हरणे' । तमसा[3] कुहयते[4] विस्मापयतीति वा । 'कुह विस्मापने' । सुष्ठु स्यति [5]गतिमिति सुषिरम् । 'षोऽन्तकर्मणि' । विव्रियते विवरम् । 'वृञ् वरणे' । बिल्यते बिलम् । 'बिल भेदने' । छिद्यते छिद्रम् । 'छिदिर् द्वैधीकरणे' । निर्व्यथन्तेऽस्मात् निर्व्यथनम् । 'व्यथ भयसंचलनयोः' । रौति [6]स्वगतप्राणिमुखेन शब्दायत इति रोकम् । रोचते प्रकाशते वा । 'रु शब्दे' 'रुच दीप्तौ अभिप्रीतौ च' । गतिं [7]रन्धयतीति रन्ध्रम् । 'रध हिंसासंराध्योः' । रणति वायुनेति वा । 'रण शब्दे' । शुभं परिहृत्य अभ्रति वर्तत[8] इति श्वभ्रम् । 'अभ्र गतौ' । शोभनमभ्रमाकाशमस्मिन्निति वा । उप्यते [9]क्षिप्यते [10]पर्णादिकमस्यां वपा । 'डुवप् बीजसन्ताने' । प्रमादपतितान् सुष्ठु स्यति सुषिः । 'षोऽन्तकर्मणि' । बिलनामानि ॥ गिरति सर्पादिकमिति गर्तः । 'गॄ निगरणे' । अवति सर्पादिकमित्यवटः[11] । 'अव रक्षणे' । [12]श्वभ्रनामानि ॥ सुषिरत्रास्तीति सुषिरम्[13] । सरन्ध्रवेण्वादिनाम ॥ १–२ ॥

(पा.) अधोभुवन—नागलोकः । पातालनामानि ॥ रसेति तलमिति व्यस्तमपि तन्नाम । 'रसातलं तलं नागलोको दैत्यक्षयो रसा' इति वैजयन्ती (पृ. १४८, श्लो १) । अथ कुहरं—बिलम् । 'छिद्रे छिद्रान्विते वाद्ये सुषिरं सुषिरो नडः' इति वैजयन्ती-

---

[1] Half folio missing in I. [2] नाग° A, B$_1$. [3] तमसि W$_2$.
[4] °कुहम् आश्चर्यमित्यर्थः । तद् रातीति कुहरं, 'रा दाने' B$_2$. [5] B$_2$, K$_2$, omit गतिम्. [6] अत्र प्राणीति B$_2$. [7] A$_1$ adds हिंसयति. [8] वर्धते W$_2$.
[9] निक्षिप्यते I, K$_3$. [10] तृणादिकं Pt$_2$. [11] अव्यतेऽत्र वातादिति वा B$_2$, D$_1$, K$_2$, K$_3$, U. [12] भूश्वभ्र° B$_1$, D$_1$, U, W$_1$. [13] सुषिरशब्दो रन्ध्रवद्वस्तुवाचकत्वे त्रिलिङ्गः Pt$_2$.

पाठाद् (पृ. २६४, श्लो. ९०) दन्त्यादिरेव सुषिरशब्दः। छिद्रं—सुषिः। 'कलशकुलिशशुभ्रश्वभ्रकाश्मीरशिल्पम्' इति श्वभ्रशब्दस्य तालव्यादित्वम्[1]। बिलनामानि॥ गर्तावटौ—श्वभ्रे। श्वभ्रनामनी॥ सरन्ध्रे—त्रिषु। रन्ध्रवद् द्रव्यं सुषिरं [2]त्रिलिङ्गं स्यात्॥ १-२॥

---

[1] A_1 adds ऊष्मभेदः.　　[2] B_3 adds भवति तत्.

अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः।
ध्वान्ते गाढेऽन्धतमसं क्षीणेऽवतमसं तमः॥ ३॥
विष्वक् संतमसम्

इति पातालवर्गः

(वि.) अन्धकार इति—[1]अन्धं करोतीति अन्धकारः। 'डुकृञ् करणे'। ध्वनन्त्यत्र [2]मार्गमपश्यन्त इति ध्वान्तम्। 'ध्वन शब्दे'। तमयति लोकं तमः। 'तमु ग्लानौ'। तम एव तमिस्रम्। [3]तिम्यत्यनुष्णत्वादिति तिमिरम्। 'तिम आर्द्रीभावे'। तमिस्रशब्दः स्त्रीनपुंसकयोः। अन्धकारनामानि॥ अन्धं तमः अन्धतमसम्। अन्धयति जनानां दृष्टिमिति वा [4]अन्धतमसम्। 'अन्ध दृष्ट्युपघाते'। गाढध्वान्तनाम॥ अवक्षीणं तमः अवतमसम्। क्षीणध्वान्तनाम॥ विष्वक् समन्तात् तमः संतमसम्। [5]सर्वतःस्थिततमोनाम॥ ३॥

इति पातालवर्गः

---

[1] अन्धवत् A, T, W_1.　　[2] पन्थानं A, T.　　[3] अनुषङ्गत्वात् A, B_1, T; तिम्यति कामिहृदयानीति वा W_1.　　[4] अन्धं करोतीत्यन्धम्। अन्धं च तत् तमश्च Pt_2.
[5] सर्वत्र° B_1, D_1.

(पा.) अन्धकारो—तमः। प्रज्ञादिपाठात् [1]तामिस्रमपि स्यात्। 'स्मररागमयी वपुस्तमिस्रा' इति माघप्रयोगात् (शिशु. ६. ७०) तमिस्रा च भवति। अन्धकारनामानि॥ 'कालिकज्जलभूच्छायतमं वा स्यात् तमिः स्त्रियाम्'। एतानि च॥ ध्वान्ते—अन्धतमसम्। अतिसान्द्रतिमिरनाम॥ शाकटायनवृत्तौ 'यन्युपसर्गस्य च'. (२. २. ८८) इति दीर्घविधानसूत्रे [2]अन्धातमसमित्युदाहृतम्। 'तदन्धातमसं प्राहुर्गाढं तिमिर-

मित्यपि' इति हारावली। क्षीणेऽवतमसम्। अल्पं तमोऽवतमसं स्यात्। क्षीणतमसो नाम ॥ तमः—संतमसम्। सर्वतः प्रसृततमोनाम ॥ अनुक्तम्—'रुपीडोऽस्त्री रुहेलिः स्त्री रुभेटिरपि धूमिका'। धूमिकानामानि[3] ॥ ३ ॥

इति पातालवर्गः

---

[1] तामिस्रः B_3. [2] बहुलवचनात् क्वचिदयञ्यप्यनुपसर्गस्यापि दीर्घः। अन्धातमसम्। अन्धतमसम्; पृ. २३०. [3] A_1 adds भाषया 'मोब्बु पेल्लु'.

---

१०. भोगिवर्गः

नागाः काद्रवेयास्तदीश्वरः।
शेषोऽनन्तो वासुकिस्तु सर्पराजोऽथ गोनसे ॥ १ ॥
तिलित्सः स्यादजगरे शयुर्वाहस इत्युभौ।

(वि.) नागा इति—पद्भ्यां नाङ्गन्ति गच्छन्तीति [1]नागाः। 'अगि गतौ'। कद्रोरपत्यानि पुमांसः काद्रवेयाः[2]। देवयोनिसर्पनामनी ॥ शेते हरिरस्मिन्निति शेषः। अन्तकालेऽपि शिष्यत इति वा। 'शिष असर्वोपयोगे'। न विद्यतेऽन्तो यस्य सः अनन्तः। देवयोनिसर्पेश्वरनामनी[3] ॥ वसति पाताल इति वासुकिः। 'वस निवासे'। वसुकस्यापत्यं वा। सर्पाणां राजा सर्पराजः। देवयोनिसर्पराजनामनी[4] ॥ गोरिव [5]नासा यस्य सः गोनसः। तिलति स्निह्यतीति तिलित्सः[6]। 'तिल स्नेहने'। तिलिङ्ग इति पाठे 'तिल गतौ'। अजं [7]मेषं गिरतीति अजगरः। 'गॄ निगरणे'। अजो नित्यो गरो विषं यस्येति वा। शेते अत्यर्थमिति शयुः। 'शीङ् स्वप्ने'। वाहं [8]गमनं स्यतीति वाहसः[9]। 'षोऽन्तकर्मणि'। [10]वाहयति प्राणिनः आत्मवशं नयतीति वा[11]। 'पेनुपामु पेरु' ॥ १ ॥

---

[1] अगन्ति गच्छन्ति अगाः, अगाः न भवन्तीति नागाः, 'अगि गतौ' B_2. [2] तदीश्वराः के ? काद्रवेया इमे ज्ञेयाः शेषवासुकितक्षकाः A. [3] शेषाहिनामनी D_1. [4] वासुकिनामनी D_1. [5] नासिका A, B_1, T. [6] तिलिप्स इति वा पाठः A. [7] छागं Pt_2. [8] गतिं D_1, K_3. [9] B_2 adds समापयति. [10] वहति B_1, T. [11] 'वह प्रापणे', अतिस्थूलसर्पनामनी B_2, K_5, W_2.

(पा.) नागाः। वक्ष्यमाणनाम। काद्रवेयास्तदीश्वराः। तन्नायकाः काद्रवेयाः स्युः। शेषवासुकिप्रभृतयः [1]कद्रुपुत्राः।

'काद्रवेया इमे ज्ञेयाः शेषवासुकितक्षकाः।
ऐरावतो महापद्मः कम्भलाश्वतरावुभौ॥
एलापुत्रश्च गर्गश्च कर्कोटकधनंजयौ।
महानीलमहाकण्ठौ धृतराष्ट्रबलाहकौ॥
दुर्मुखः खररोमा च मणिरित्येवमादयः॥'

इति॥ शेषोऽनन्तः। शेषनामनी। वासुकिस्तु सर्पराजः। वासुकिनाम॥ अथ गोनसे—स्यात्। गोनासशब्दोऽप्यस्ति। 'भवेत् तिलित्सो[2] गोनासः' इति हलायुधः (अ. मा. ३. २०)। भाषया 'मण्डलमुन्नु'। 'चिलिम[3]'। कर्णाटभाषया मण्डलनाम॥ अजगरे—इत्युभौ। अजगरनामनी। 'पेनुपामु[4]'॥ १॥

---

[1] कद्रू° B_3. [2] तिलिप्सो A_1, B_1. [3] 'कोडचलव' B_3. [4] '°भामु' B_3.

अलगर्दो जलव्यालः समौ राजिलडुण्डुभौ॥ २॥
मालुधानो मातुलाहिर्निर्मुक्तो मुक्तकञ्चुकः।

(वि.) अलगर्द इति—अलं गिरति भेकानिति अलगर्दः। 'गॄ निगरणे'। अरश्चासौ गर्दश्चेत्यरगर्दः। रलयोरभेदात्। अलिगर्द इति वा पाठः। अलिवद्गर्दतीति अलिगर्दः। 'गर्द शब्दे'। जले व्यालः जलव्यालः। जलस्थसर्पनामनी। 'नीरुकट्टुपामुपेरु'॥ राजिं रेखां लातीति राजिलः[1]। 'ला दाने आदाने च'। डुण्डतीति डुण्डुभः। 'डुडि मज्जने'। डुण्डु इति भेकशब्दानुकारेण भाषते वा। निर्विषमुखसर्पनामनी॥ मालुरोषधिः धानं स्थानमस्य [2]मालुधानः। मातुले धत्तूरे वर्तमानोऽहिः [3]मातुलाहिः। अवान्तरसर्पभेदनामनी॥ निर्मुक्तः कञ्चुको येन निर्मुक्तः[4]। 'मुच्लृ मोक्षणे'। मुक्तकञ्चुकसर्पनाम॥ २॥

---

[1] राजभिः सर्पजीविभिः लायते गृह्यत इति B_2; राजिः रेखास्मिन्नस्तीति Pt_2. [2] मालुभिर्धीयते पोष्यत इति, 'डुधाञ् धारणपोषणयोः' Pt_2. [3] मातुला नाम ओषधिः तस्यां स्थितः अहिः Pt_2. [4] कञ्चुकेन मुक्तः Pt_2.

(पा.) अलगर्दो जलव्यालः। नीरसर्पनामनी॥ भाषया 'नीरुकट्टिपामु'। अजगर्द इति क्वचित् पाठः। अलिगर्द इत्येके। अलगर्द इति केचिदिति सुभूतिटीकायां

त्रेधा विकल्पितः पाठः[1]। समौ—डुण्डुभौ। क्षीराकारनिर्विषद्विमुखसर्पनामनी। 'राजिलः [2]क्षीरकश्चाथ' इति वैजयन्ती (पृ. १४९, श्लो. २०)। मालुधानो मातुलाहिः। धत्तूरवृत्तिसर्पनामेति केचित्। 'मुरुटपामु[3]'। 'पोष्यमाणवनविनालमालुधाननकुलशिशाजालिकादिभिरटविकुटुम्बिनां गृहैरुदितं वनग्रामं ददर्श' इति हर्षचरिताभ्युदयः। अनुक्तम्—'अहिरिणी तु द्विमुखी'। द्विमुखसर्पनाम। 'रेण्डुतललविषंगलपामु'॥ 'सर्पराजस्तु सर्पभुक्'। सर्पभक्षकसर्पनाम॥ निर्मुक्तो—कञ्चुकः। परित्यक्तकञ्चुकसर्पनाम॥ २॥

---

[1] विकल्पितम् B_3. [2] क्षिलिकः A_1. [3] A_1 adds 'रक्तवेनुपोडानुन्नु'.

सर्पः पृदाकुर्भुजगो भुजंगोऽहिर्भुजंगमः॥ ३॥
आशीविषो विषधरश्चक्री व्यालः सरीसृपः।
कुण्डली गूढपाच्चक्षुःश्रवाः काकोदरः फणी॥ ४॥
दर्वीकरो दीर्घपृष्ठो दन्दशूको बिलेशयः।
उरगः पन्नगो भोगी जिह्मगः पवनाशनः॥ ५॥
(लेलिहानो द्विरसनो गोकर्णः कञ्चुकी तथा।
कुम्भीनसः फणधरो हरिर्भोगधरस्तथा।
अहेः शरीरं भोगः स्यादाशीरप्यहिदंष्ट्रिका॥)

(वि.) सर्प इति—सर्पतीति सर्पः। 'सृप्लृ गतौ'। पर्दत इति पृदाकुः। 'पर्द कुत्सिते शब्दे'। आखुग्रहणार्थं कुं भुवं प्रियते [1]गच्छति वा पृदाकुः। परनिपातः। 'पृङ् व्यायामे'। भुजं कुटिलं गच्छतीति भुजगः। भुजंगः। भुजंगमश्च। 'गम्लृ गतौ'। भुजतीति भुजः। 'भुज कौटिल्ये'। भुजः सर्पदेहः, तेन गच्छतीति वा। अंहत इत्यहिः। 'अहि गतौ'। आशिषि दंष्ट्रायां विषमस्येति आशीविषः। विषस्य धरः विषधरः[2]। चक्रं मण्डलाकारोऽस्यास्तीति चक्री। शिरसि चक्रयोगाद्वा। दष्टुं [3]व्याडतीति व्यालः। डलयोरभेदात्। 'अड उद्यमने'। कुटिलं सर्पतीति सरीसृपः। 'सृप्लृ गतौ'। कुण्डलाकारं वपुरस्येति [4]कुण्डली। [5]गूढाः पादाः यस्य सः गूढपात्। चक्षुषी श्रवसी यस्य चक्षुःश्रवाः[6]। काकस्येवोदरं यस्य काकोदरः[7]। काको विषविशेषः उदरे यस्येति वा। फणोऽस्यास्तीति फणी। दर्वी फणैव करो यस्य दर्वीकरः। दर्व्या फणया [8]कृणोति हिंसयतीति वा दर्वीकरः[9]। 'कृञ् हिंसायाम्'। दीर्घं पृष्ठमस्येति दीर्घपृष्ठः। कुत्सितं दशतीति [10]दन्दशूकः। 'दंश दशने'। बिले शेत इति बिलेशयः। 'शीङ् स्वप्ने'।

उरसा गच्छतीति उरगः । 'गम्लृ गतौ'। पद्भ्यां न गच्छतीति पन्नगः । पन्नं पतितं यथा तथा गच्छतीति वा । भोगः सर्पशरीरं । तदस्यास्तीति भोगी । जिह्मं कुटिलं गच्छतीति जिह्मगः । पवनोऽशनं यस्य सः पवनाशनः । सर्पनामानि ॥ ३–५ ॥

---

[1] व्यायच्छति K₃.　[2] D₁, I add 'धृ धारणे'.　[3] विशेषेण आडति B₂.
[4] कुण्डलयोगात् A, B₁.　[5] गूढौ पादौ W₂.　[6] चक्षुर्भ्यां शृणोतीति वा Pt₂.
[7] का ईषत् अकं कुटिलगतिकम् उदरमस्येति वा Pt₂.　[8] कृणाति, 'कॄ हिंसायाम्' K₃.
[9] दर्व्याकारत्वात् फणा दर्वी सैव प्रहरणादौ करोऽस्येति Pt₂.　[10] दन्तशूक इति वा पाठः । दन्त एव शूकः तीक्ष्णकण्टकः यस्य B₂.

(पा.) सर्पः—पवनाशनः । अनुक्तम्—'कुम्भीनसः पुण्डरीको लेलिहानश्च कञ्चुकी । गोकर्णो नाकुसद्मा च' इत्येतानि च । सर्पजातिनामानि ॥

'षड्विंशतिर्मण्डलिनस्तथा [1]दर्विकराभिधाः ।
त्रयोदश च राजीला[2] वैकरञ्जाभिधास्त्रयः ।
निर्विषा द्वादशेत्येवमशीतिः सर्पजातयः' ॥ ३–५ ॥

---

[1] दर्वीकर° B₁.　[2] राजीवाः A₁.

त्रिष्वाहेयं विषास्थ्यादि स्फटायां तु फणा द्वयोः ।
समौ कञ्चुकनिर्मोकौ क्ष्वेडस्तु गरलं विषम् ॥ ६ ॥

(वि.) त्रिष्विति—अहौ सर्पे भवम् आहेयम् । विषास्थ्यादिनाम ॥ स्फटतीति स्फटा । 'स्फट विकसने'। स्फुटति विशीर्यतेऽनया आहत इति स्फुटा वा । 'स्फुट विशरणे'। [1]फणत्यनया फणा । 'फण गतौ'। [2]दर्विनामनी ॥ कञ्चुक इव तिष्ठतीति कञ्चुकः । कञ्च्यते बध्यत[3] इति कञ्चुकः । 'कचि दीप्तिबन्धनयोः'। निर्मुच्यत इति निर्मोकः । 'मुच्लृ मोक्षणे'। सर्पकञ्चुकनामनी ॥ क्ष्वेडत इति क्ष्वेडः । 'ञिक्ष्विदा स्नेहनमोचनयोः'। अन्तः निगीर्यत इति गरलम् । गिरति जीवमिति वा । 'गॄ निगरणे'। देहं वेवेष्टीति विषम् । 'विष्लृ व्याप्तौ'। [4]विषशब्दः पुंसि क्लीबे वा । विषनामानि ॥ ६ ॥

---

[1] गच्छति B₂.　[2] दर्व्याकारफण° B₂.　[3] B₂, Pt₂ add अनेन.　[4] पुंसि क्लीबे चेत्यस्य पूर्वेण विषशब्देनान्वयात् विषशब्दः पुंलिङ्गेऽपीति केचित् Pt₂.

(पा.) त्रिषु—विषास्थ्यादि। अहेर्विषास्थ्यादि आहेयं स्यात्। तच्च त्रिलिङ्गम्। स्फटायां—द्वयोः। फणानामनी। 'फटा [1]दर्दिः खटेरुश्च'। एतानि त्रीणि च॥ समौ—निर्मोकौ। सर्पकञ्चुकनामनी॥ 'सर्पाम्बरो निर्लवयनी[2]'। एते द्वे च। क्ष्वेडस्तु—विषम्। विषनामानि॥ ६॥

[1] दर्वी B_4. [2] निर्लयनी A_1.

पुंसि क्लीबे च काकोलकालकूटहलाहलाः।
सौराष्ट्रिकः शौक्लिकेयो ब्रह्मपुत्रः प्रदीपनः॥ ७॥
दारदो वत्सनाभश्च विषभेदा अमी नव।
विषवैद्यो जाङ्गलिकः व्यालग्राह्यहितुण्डिकः॥ ८॥

इति भोगिवर्गः

(वि.) पुंसीति—काकवत् [1]मेचकः काकोलः। का ईषत् कोलति संस्त्यायतीति वा। 'कुल संस्त्याने'। कालवर्णस्य कूटः[2] कालकूटः। कालं यममपि कूटयतीति वा। 'कूट परिदाहे'। हलति विलिखति जठरं न हलति च [3]हलाहलः। 'हल विलेखने'। सुराष्ट्रदेशे भवः सौराष्ट्रिकः। शुक्लदेशे भवः शौक्लिकेयः। ब्रह्मणः पुत्रः ब्रह्मपुत्रः[4]। [5]प्रदीपयतीति [6]प्रदीपनः। 'दीपी दीप्तौ'। दरददेशे भवः दारदः। दरदे नागविशेषे भवो वा। वत्सस्येव नाभिरस्य वत्सनाभः। [7]अमूनि विषभेदनामानि॥ जाङ्गलं विषविद्या। जाङ्गुलिर्जाङ्गुली वा। तां वेत्तीति जाङ्गलिकः, जाङ्गुलिको वा। [8]विषवैद्यनाम॥ अहितुण्डेन[9] जीवतीति अहितुण्डिकः। [10]व्यालग्राहिपुरुषनाम॥ ७-८॥

इति अमरकोशपदविवृतौ भोगिवर्गः

[1] कृष्णवर्णत्वात् Pt_2. [2] इदम् अहिच्छत्रमलयकोङ्कणशृङ्गवेरपुरादिषूत्पद्यते Pt_2. [3] इदं हिमवत्पर्वतकिष्किन्धाकोङ्कणदेशदक्षिणसिन्ध्वादिषु भवति Pt_2. [4] एष कपिलवर्णो मलयाद्रिभवः Pt_2. [5] प्रकर्षेण दीपयति B_2. [6] एष रक्तवर्णोऽञ्जनाद्रिभवः Pt_2. [7] अमी नव विषभेदाः, तन्नामानि W_2. [8] विषविद्यां वेत्ति विषवैद्यः Pt_2. [9] अहिमुखेन B_2; आहितुण्डिको वा W_2. [10] व्यालं सर्पं गृह्णातीति A.

(पा.) पुंसि—नव। काकोलादयो नव विषभेदाः। समानसामर्थ्यात् पुंसि क्लीबे चेति विशेषविधिः काकोलादिषु त्रिष्वेव। काकोलः, काकोलम्। कालकूटः,

कालकूटम् । हलाहलः, हलाहलम् । 'हालाहलं विषमिवाप्रगुणं तदेव' इति प्रयोगाद् हालाहलः । हालाहलम् । 'हृदये हालहलं महद्विषम्' इति प्रयोगाद् हालहलमित्यपि । अनुक्तम्—'गरस्तु कृतकं विषम्' । कृत्रिमविषं गरः स्यात् ॥ विषवैद्यो जाङ्गुलिकः । गारुडविद्याभिज्ञनामनी । जाङ्गुलिं जाङ्गुलं वा वेत्तीति [1]व्युत्पत्तिद्वारेण । जाङ्गुलिर्विषमन्त्रः । जाङ्गुलो विषतन्त्रः ॥ व्यालग्राह्यहितुण्डिकः[2] । 'व्यालग्राहोऽहितुण्डिकः' इति रत्नकोशनाममालिके । व्यालग्राहिपुरुषनामनी ॥ ५–८ ॥

इति [3]श्रीवत्सनृसिंहसूरिसुतमल्लिनाथसूरिविरचितेऽमरपदपारिजाते पातालभोगिवर्गः

११. नरकवर्गः

स्यान्नारकस्तु नरको निरयो दुर्गतिः स्त्रियाम् ।
तद्भेदास्तपनावीचिमहारौरवरौरवाः ॥ १ ॥
संहारः कालसूत्रं चेत्याद्याः सत्त्वास्तु नारकाः ।
प्रेता वैतरणी सिन्धुः स्यादलक्ष्मीस्तु निर्ऋतिः ॥ २ ॥

(वि.) स्यान्नारक इति—नारं नरसमूहं कायत्यस्मिन्निति नारकः । [1]नरकश्च । 'कै शब्दे' । निर्गतोऽयः[2] दैवमस्मादिति निरयः । दुष्टा गतिरिति दुर्गतिः । नरकनामानि ॥ [3]तप्यन्ते पापिनोऽत्र तपनः । 'तप संतापे' । अव्यन्ते रक्ष्यन्तेऽस्माद् अवीचिः । नास्ति वीचिः सुखस्य स्वल्पोऽप्यत्रेति वा । 'अव रक्षणे' । अव्यन्ते खाद्यन्तेऽस्मिन्निति वा । स्त्रीपुंसयोः । रुः दुःखं, तस्य रवोऽत्रेति रौरवः । महांश्चासौ रौरवश्च [4]महारौरवः । संह्रियन्ते पापिनोऽस्मिन्निति संहारः । 'हृञ् हरणे' । संघात इति वा पाठे 'हन हिंसागत्योः' । कालानि अयोमयानि सूत्राण्यस्मिन्निति कालसूत्रम् । [5]एवमादीनि नरकभेदनामानि ॥ आद्यशब्देन तामिस्रान्धतामिस्रासिपत्रवनादयः उच्यन्ते । [6]सत्त्वाः प्राणिनः । नरके [7]विद्यमानाः नारकाः । प्रकर्षेण नरकमिताः [8]प्रेताः । 'इण् गतौ' । नरकसंबन्धिप्राणिनाम ॥ विगतं तरणं यत्र वितरणम् । वितरणे नरके[9] भवा वैतरणी । विगता तरणिः नौरत्रेति [10]वितरणिः । वितरणिरेव वैतरणी । विगतः तरणिः सूर्योऽत्रेति

---

[1] व्युत्पादन° A₁.	[2] आहितुण्डिकः B₄.	[3] °नरसिंह° A₁.

वितरणिः पातालः, तस्मिन् भवा वा। नरकसिन्धुनाम ॥ न लक्ष्यते अलक्ष्मीः। 'लक्ष दर्शनाङ्कनयोः'। लक्ष्मीर्न भवतीति वा। [11]ऋतेः सन्मार्गात् निष्क्रान्ता निर्ऋतिः। अभाग्यनामानि ॥ १–२ ॥

---

[1] नृणाति प्रापयति पापिनः स्वसमीपं Pt_2. [2] अयः शुभावहो विधिः Pt_2. [3] तापयति Pt_2. [4] महान् रौद्रः रवः अत्रेति Pt_2. [5] इत्यादिस्वनामप्रसिद्धनरकनामानि B_2. [6] K_5, W_2 add सीदन्तीति. [7] भवाः Pt_2. [8] क्षुत्पिपासादिभिः भृशं प्राप्ता वा Pt_2. [9] नरकलोके D_2, I, K_3. [10] वितरणेन गोदानादिना तीर्यत इति Pt_2. [11] B_2 adds नितराम्.

(पा.) स्यान्नारकस्तु—चेत्याद्याः। [1]नरकविशेषनामानि ॥ तपनादिसंघातशब्दान्ताः[2] पुंलिङ्गाः। अवीचिशब्दः केषांचित् स्त्रीलिङ्गः। 'विशेषाः स्युरवीचिः स्त्री महारौरवरौरवौ' इति वैजयन्ती[3] (प्र. १२, श्लो. ३७)। सत्त्वास्तु—प्रेताः। नरकभवजन्तवः प्रेताः स्युः। '[4]नारका जन्तवः प्रेता यात्याश्चैवातिवाहिकाः' इति हलायुधः (अ. मा. ३. ३)। वैतरणी सिन्धुः। नारकशब्दस्यात्रापि संबन्धः। नारकनदी वैतरणी स्यात्। स्यादलक्ष्मीस्तु नैर्ऋती। अलक्ष्मीनामनी ॥ 'निर्ऋतिः कालकण्ठिके' इति रभसः। 'अलक्ष्मीर्निर्ऋतिर्ज्येष्ठा' इति वैजयन्ती (प्र. १२, श्लो. ४२)। अत्र प्रज्ञादिपाठात् नैर्ऋतीति पठितम् ॥ १–२ ॥

---

[1] B_3 adds °दुर्गतिः स्त्रियाम्। नरकसामान्यनामानि. [2] A_1 adds सर्वे. [3] मुद्रितपुस्तके तु 'अवीच्यन्ता रौरवाद्याः प्रायशो नरका नरि' इति दृश्यते. [4] नरके A_1, B_2.

विष्टिराजूः कारणा तु यातना तीव्रवेदना ।
पीडा बाधा व्यथा दुःखमामनस्यं प्रसूतिजम् ॥ ३ ॥
स्यात् कष्टं कृच्छ्रमाभीलं त्रिष्वेषां भेद्यगामि यत् ।

इति नरकवर्गः

(वि.) विष्टिरिति—विशति नरकमनया विष्टिः। 'विश प्रवेशने'। आजवते यया नरकम् [1]आजूः। आ समन्तात् अज्यते वा। 'अज गतिक्षेपणयोः'। नरके हठात् प्रक्षेपनामनी ॥ कृणातीति कारणा। 'कृ हिंसायाम्'। याति [2]नाशमनयेति यातना। 'या प्रापणे'। यातयतीति वा। '[3]यत निराकारोपस्कारयोः'। तीव्रवेदनानाम ॥ पीड्यतेऽनयेति पीडा। 'पीड अवगाहने'। बाध्यते यया बाधा। 'बाधृ

विलोडने’। [4]व्यथ्यन्तेऽनयेति व्यथा। ‘व्यथ भयसंचलनयोः’। दुष्टानि खानीन्द्रियाण्यस्मिन्निति दुःखम्। दुःखमात्रनामानि ॥ अमनसो [5]भवम् आमनस्यम्। मानसे साधु मानस्यं, तन्न भवतीत्यामनस्यम्। [6]प्रसूतेर्जातं प्रसूतिजम्। दुःखविशेषनामानि ॥ [7]कषति हिंसयतीति कष्टम्। ‘कष हिंसायाम्’। [8]कृणत्ति वेष्टयतीति कृच्छ्रम्। ‘कृती वेष्टने’। आ समन्तात् भियं लातीति आभीलम्। ‘ला दाने’। शरीरपीडानामानि[9] ॥ [10]पीडाद्याभीलान्तानि नामानि दुःखवाचकानीति केचित्। त्रिष्वेषां भेद्यगामि यत्। एषां [11]शब्दानां दुःखादीनां मध्ये यद् भेद्यगामि विशेष्यगामि तत् त्रिषु; कष्टा सेवा, कष्टो भृत्यभावः, कष्टं व्याकरणमिति ॥ ३ ॥

इत्यमरकोशपदविवृतौ नरकवर्गः

---

[1] D$_2$, K$_2$ add ‘जॄ गतौ’. [2] नाशनम् D$_2$. [3] ‘यती प्रयत्ने’ Pt$_2$.
[4] विथ्यन्ते Pt$_2$. [5] भाव: B$_2$. [6] K$_3$, U add आधेः. [7] कषिष्यति W$_1$.
[8] कृणाति W$_1$; कृन्तति W$_2$, Pt$_2$; ‘कृती छेदने’ Pt$_2$. [9] K$_5$ omits 3 lines.
[10] पीडादीनि D$_2$, K$_1$. [11] एषां मध्ये यद् द्रव्यगामि तत् त्रिषु B$_1$, D$_1$.

(पा.) विष्टिराजूः। कर्मनरकनामनी। भाषया ‘वेट्टु’। स्त्रीलिङ्गमध्यपाठात् स्त्रीलिङ्गौ। ‘त्रिषु कर्मकरे विष्टिस्त्र्याजूर्वेतनकर्मसु’ इति रुद्रः ॥ कारणा—तीव्रवेदना। अत्यन्तदुःखनामानि ॥ पीडा—दुःखम्। दुःखनामानि ॥ बाधा चाबाधेति चात्र रूपद्वयं संभाव्यम्। ‘बाधा दुःखनिषेधयोः’ इति वैजयन्ती (पृ. २२२, श्लो. २५)। ‘आबाधा वेदना दुःखम्’ इति हलायुधः (अ. मा. ३. ४)। अत्रापि दुःखं दुष्खमिति रूपद्वयस्य संभावना। ‘कान्तो नयनानन्दो बाले दुःखेन भवति [1]सदा’ इति रुद्रटालंकारे (५. २८) बिन्दुच्युतकत्वाद्विसर्गश्रुतिः। ‘पुष्पभूषणविषाणघोषणादुष्खदुष्कृतवरीषु[2] पुष्करम्’ इति ऊष्मभेदपाठात् षकारश्रुतिः। आमनस्यं प्रसूतिजम्। [3]प्रसवसंजातदुःखमामनस्यं स्यात्। स्यात् कष्टं—आभीलम्। कष्टनामानि ॥ त्रिष्वेषां—यत्। कष्टादयस्त्रयो यदा भेद्यगामिनस्तदा त्रिलिङ्गाः। कष्टा सेवा। कष्टः प्रसवः। कष्टं विषभक्षणम्। [4]अन्यथा नपुंसकलिङ्गा एव। कष्टेनातिक्रान्तो नरकः[5] ॥ ३ ॥

इति [6]श्रीवत्सनृसिंहसूरिसुतमल्लिनाथसूरिविरचितेऽमरपदपारिजाते नरकवर्गः

---

[1] ‘कान्तो नयनानन्दी बालेन्दुः खे न भवति सदा’ इति मुद्रितग्रन्थे. [2] °पुरीष° A$_1$.
[3] B$_3$ omits संजात. [4] भेद्यगामिनो नो चेत् A$_1$. [5] पन्थाः B$_3$. [6] °नरसिंह° A$_1$.

१२. वारिवर्गः

समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः ।
उदन्वानुदधिः सिन्धुः सरस्वान् सागरोऽर्णवः ॥ १ ॥
रत्नाकरो जलनिधिर्यादःपतिरपांपतिः ।

(वि.) समुद्र इति—[1]सम्यगुनत्ति समुद्रः । 'उन्दी क्लेदने' । समन्तात् मुदं [2]रातीति वा । 'रा दाने' । मुद्रया मर्यादया सहित इति वा । आपो धीयन्ते अत्रेति अब्धिः । 'डुधाञ् धारणपोषणयोः' । मर्यादया कुं भुवं न पृणातीति अकूपारः । 'पॄ पालनपूरणयोः' । अकुत्सितं पारमस्येति वा । पारमावृणोतीति पारावारः । 'वृञ् वरणे' । [3]पारमपारमस्य दुस्तरत्वादिति वा पारापारः । सरितां पतिः सरित्पतिः । उदकमस्त्यस्मिन्निति उदन्वान् । [4]उदकानि धीयन्तेऽस्मिन्निति उदधिः । 'डुधाञ् धारणपोषणयोः' । स्यन्दते जलमत्र सिन्धुः । 'स्यन्दू [5]प्रस्रवणे' । सरांस्यत्र सन्तीति सरस्वान् । [6]सगरपुत्रैः खातः सागरः । अर्णांसि जलानि सन्त्यस्मिन्निति अर्णवः । रत्नानाम् आकरः रत्नाकरः । जलानां निधिः जलनिधिः । जलानि नितरां धीयन्तेऽस्मिन्निति वा । 'डुधाञ् धारणपोषणयोः' । यादसां जलजन्तूनां[7] पतिः यादःपतिः । अपां जलानां पतिः अपांपतिः । अप्पतिर्वा । समुद्रनामानि ॥ १ ॥

[1] Pt$_2$ adds चन्द्रोदयात् . [2] लाति A. [3] अस्य पारस्य दुस्तरत्वात् B$_2$. [4] उदानि एव उदकानि, स्वार्थे कप्रत्ययः B$_2$. [5] प्रवहणे B$_2$. [6] सगरैः कृतः A, B$_1$. [7] A, B$_1$, T omit.

(पा.) [1]समुद्रो—पारावारः । आवारपारकूपारावपि तत्पर्यायौ । 'आवारपारः कूपारो रत्नमीनाभिधाकरः' इति धनंजयः । सरित्पतिः—अर्णवः । 'अर्णसो लोपश्च' (वा. ५. २. १०९) इति सलोपः । रत्नाकरो—अपांपतिः । समुद्रनामानि ॥ अनुक्तम्—'ऊर्मिमाली पयोराशिः सरित्वान् [2]सलिलाकरः' । एतानि च ॥ १ ॥

[1] A$_1$ adds महागणपतिं वन्दे महादेवकुमारकम् ।
सहायं निजभक्तानां गुहानन्दप्रदायकम् ॥
श्रीधेनुवागीश्वर्यै नमः . [2] सरिदाकरः B$_3$.

तस्य प्रभेदाः क्षीरोदो लवणोदस्तथापरे ॥ २ ॥
आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम् ।

पयः कीलालममृतं जीवनं भुवनं वनम् ॥ ३ ॥
कबन्धमुदकं पाथः पुष्करं सर्वतोमुखम् ।
अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम् ॥ ४ ॥
मेघपुष्पं घनरसस्त्रिषु द्वे आप्यमम्मयम् ।

(वि.) तस्येति—[1]क्षीरमुदकं यस्य क्षीरोदः। [2]लवणमुदकं यस्य लवणोदः। तथा अपरे। के ते ? दध्युदः, घृतोदः, सुरोदः, इक्षूदः, स्वादूदः। समुद्रविशेषनामानि ॥ इन्द्रेण आप्यन्ते[3] आपः। 'आप्लृ व्याप्तौ'। बहुप्रदेशं [4]वृणोतीति वाः। वारि च। 'वृञ् वरणे'। वार्शब्दो रेफान्तः स्त्रीलिङ्गश्च पूर्वसाहचर्यात्। सरतीति सलिलम्[5]। 'सृ गतौ'। काम्यते तृषितैरिति कमलम्। 'कमु कान्तौ'। जलति जडीभवतीति जलम्। 'जल [6]घातने'। पयत इति पयः। 'पय गतौ'। पीयत इति वा। 'पा पाने'। कीलान् ज्वालान् अलति वारयतीति कीलालम्। 'अल भूषणपर्याप्तिशक्तिवारणेषु'। न म्रियन्तेऽनेनेत्यमृतम्। 'मृङ् प्राणत्यागे'। अनेन न मृतमिति वा। जीवन्ति येनेति जीवनम्। 'जीव प्राणधारणे'। भवति सर्वमस्मादिति भुवनम्। 'भू सत्तायाम्'। वन्यते याच्यत इति वनम्[7]। 'वनु याचने'। कं सुखं बध्यतेऽत्र कबन्धम्। 'बन्ध बन्धने'। कं [8]सुखं बध्नातीति वा। कमन्धमिति पाठे कम् अन्धमिति नामद्वयम्। तृषितैः काम्यत इति कम्। 'कमु कान्तौ'। अनन्त्यनेनेत्यन्धम्। 'अन प्राणने'। उनत्तीत्युदकम्। 'उन्दी क्लेदने'। पीयते पाथः। 'पीङ् पाने'। पातीति वा। 'पा रक्षणे'। [9]पुष्णातीति पुष्करम्। 'पुष पुष्टौ'। सर्वतो मुखं यस्य तत् सर्वतोमुखम्। अमति गच्छतीत्यम्भः। 'अम गत्यादिषु'। मुखम् अम्भते वा अनेनेत्यम्भः। 'अभि शब्दे'। ऋणोतीत्यर्णः। ऋच्छतीति वा। 'ऋ[10] गतौ'। तौतीति तोयम्। 'तुः आवरणार्थे'। तायते पालयतीति वा तोयम्। 'तायृ संतानपालनयोः'। पीयत इति पानीयम्[11]। पातव्यमिति वा। 'पा पाने'। नीयते नीरम्। 'णीञ् प्रापणे'। क्षीयते क्षीरम्। 'क्षि निवासगत्योः'। 'क्षि क्षये' इति वा धातुः। घस्यते वा। 'घस्लृ अदने'। अम्बते मुखमनेन अम्बु। 'अवि रवि लबि शब्दे'। शं सुखं वृणोतीति शम्बरम्। 'वृञ् वरणे'। सम्बरमिति पाठे संवृणोतीति संवरम्। वबयोरभेदः[12]। मेघस्य पुष्पं मेघपुष्पम्। घनस्य रसो घनरसः। एतानि जलनामानि ॥ अपां विकारः आप्यम्। अम्मयं च। जलविकारनामनी ॥ २-४ ॥

---

[1] क्षीरमिव Pt_2.
[2] लवणमिंव Pt_2.
[3] आप्नुवन्ति Pt_2.
[4] अपवारयति निम्नोन्नतमिति Pt_2.
[5] सलतीति, 'षल गतौ' Pt_2.
[6] 'जल घने' Pt_2.
[7] वनतीति

वा, 'वन संभक्तौ' Pt_2. [8] शरीरं Pt_2. [9] पोषयति Pt_2. [10] ऋणु गतौ, 'ऋ गतिप्रापणयोः' D_2, I. [11] पातुं योग्यमिति वा Pt_2. [12] K_1, W_2 add.

(पा.) तस्य प्रभेदाः—अपरे । क्षीरोद इति[1] क्षीरसमुद्रः । 'मन्थोदधिस्तु क्षीराब्धिः क्षीरोदः कलशोदधिः' इति वैजयन्ती (पृ. ३६, श्लो. ११) । लवणोद इति क्षारसमुद्रः । 'लावणो लवणोदः स्यात्' इति वैजयन्ती[2] (पृ. ३५, श्लो. १०) । अपरशब्देनोच्यमाना दध्युदकघृतोदकमद्योदकेक्षुरसोदकस्वादूदकाः पञ्च समुद्रभेदाः । आपः—वाः । रेफान्तनपुंसकः[3] । वारि—घनरसम्[4] । 'घनरसमम्भः क्षीरं घृतममृतं जीवनं वनं भुवनम्' इति रत्नकोशपाठात् घनरसशब्दः नपुंसकः । 'वार्न पुंसि स्त्रियो भूमन्यापो घनरसः पुमान्' इति वैजयन्तीपाठात् (पृ. १५४, श्लो. ३) पुंलिङ्गः । उदकनामानि ॥ अनुक्तम्—'स्यात् किट्टिमं क्षारजलम्' । लवणोदकं किट्टिमं स्यात् । 'स्वादुतोयं तु शीतलम्' । स्वादूदकनाम ॥ त्रिषु—अम्मयम् । अब्विकारनामनी ॥२-४॥

[1] B_3 omits. [2] A_1 adds कण्ठोक्तौ क्षीरोदलवणोदौ. [3] नपुंसकं B_2; °कान्तं B_4. [4] B_3 adds 'कृपीटं काण्डमस्त्री स्याज्जीवनीयं कुशं विषम्'.

भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचिरथोर्मिषु ॥ ५ ॥
महत्सूल्लोलकल्लोलौ स्यादावर्तोऽम्भसां भ्रमः ।

(वि.) भङ्ग इति—भज्यते[1] भङ्गः । 'भञ्जो आमर्दने' । तरतीति तरङ्गः । 'तॄ प्लवनतरणयोः' । ऊर्वतीति ऊर्मिः । 'उर्वी हिंसायाम्' । ऋच्छतीति वा । 'ऋ गतौ' । स्त्रीपुंसयोः । वेति[2] वृद्धिं गच्छतीति वीचिः । 'वी गत्यादिषु' । वीचिः स्त्रियाम् । तरङ्गनामानि ॥ उत् ऊर्ध्वं लोडति[3] उल्लोलः । 'लोडृ[4] उन्मादे' । कल्लते शब्दायते कल्लोलः[5] । 'कल्ल अव्यक्ते शब्दे' । कत् ऊर्ध्वं लोलतीति कल्लोलः । महातरङ्गनामनी ॥ आवर्तते चक्रवद् भ्राम्यतीति[6] आवर्तः । 'वृतु वर्तने' । अम्भोभ्रमणनाम ॥ ५ ॥

[1] Pt_2 adds स्वयमेव. [2] वाति, 'वा गतिगन्धनयोः' Pt_2. [3] लोडयति K_3, Pt_2. [4] 'लुड विलोडने' K_1, K_2. [5] कल्यते जलमनेन, 'कल किल क्षेपे' Pt_2. [6] भ्रमति D_1.

(पा.) भङ्गस्तरङ्गः—वीचिः । तरङ्गनामानि ॥ ऊर्मिर्विकल्पितस्त्री । वीचिर्नियतस्त्री । अथोर्मिषु—कल्लोलौ । महावीचिवाचकोर्मिषु उल्लोलकल्लोलौ स्याताम् ।

‘[1]वीचिर्भङ्गस्तरङ्गः स्यात् तन्महत्त्वे च कथ्यते ।
ऊर्मिरुत्कलिकोल्लोलः कल्लोलो लहरी तथा ॥’

इति हलायुधः (अ. मा. ३. ३१) । ‘कल्लोललीला मुरवैरिवाहा’ इति प्रयोगः[2] चन्द्रकाव्ये । स्यादावर्तो—भ्रमः । अम्भोभ्रमणमावर्तः स्यात् ॥ ५ ॥

[1] वीचीति मुद्रितग्रन्थे. [2] A_1 omits.

पृषन्ति बिन्दुपृषताः पुमांसो विप्रुषः स्त्रियाम् ॥ ६ ॥
चक्राणि पुटभेदाः स्युर्भ्रमाश्च जलनिर्गमाः ।

(वि.) पृषन्तीति—पर्षन्तीति[1] पृषन्ति । ‘पृषु [2]सेचनहिंसाक्लेशनेषु’ । तकारान्तनपुंसकलिङ्गः । बिन्दतीति बिन्दुः । ‘बिदि अवयवे’ । पर्षन्ति सिञ्चन्तीति पृषताः । विगता प्रुट् दाहोऽस्याः विप्रुट्[3] । बिन्दुनामानि ॥ चक्राकार एषामस्तीति चक्राणि । वक्राणीति पाठे वङ्कनात्[4] वक्राणि । ‘वकि कौटिल्ये गतौ च’ । जलशिरोरूपं पुटं भित्त्वा निर्यान्तीति पुटभेदाः[5] । ‘भिदिर् विदारणे’ । भ्रमन्ति जलान्येभिरिति भ्रमाः । ‘भ्रमु चलने’ । जलानि निर्गच्छन्त्येभ्य[6] इति जलनिर्गमाः । ‘गम्लृ गतौ’ । जलनिर्गम[7]नामनी ॥ ६ ॥

[1] Pt_2 adds सिञ्चन्तीति. [2] ‘पृष सेचने’ A, B_1, T, W_1, Pt_2. [3] विशेषेण प्रोक्षयति विप्रुट्, ‘उक्ष सेचने’ B_2. [4] पङ्कसंबन्धात् वक्रीभवन्तीति वक्राणि B_2; वक्रत्वात् वक्राणि Pt_2. [5] पुटं संश्लिष्टं भिन्दतीति I, Pt_2. [6] अस्मिन् A, B_1, T; अस्मात् W_2. [7] जलपथनाम D_1, K_1, K_5, U; निर्गमस्थान° W_1.

(पा.) पृषन्ति—विप्रुषः स्त्रियः । जलबिन्दुनामानि ॥ बहुत्वमत्राविवक्षितम्[1] । ‘विप्रुट् स्त्री पृषतो बिन्दुः स्तोको द्रप्सः पृषन्न पुम्’ इति वैजयन्ती (पृ. २५, श्लो. ८) । [2]वक्राणि पुटभेदाः स्युः । वेण्याकारजलकौटिल्यनामनी ॥ भ्रमाः—निर्गमाः । नीरनिर्गमनामनी । जलागमनपथनामेति केचित् । ‘निह्लगंड्लु’ ॥ ६ ॥

[1] A_1 adds शब्दस्वभावस्तु. [2] चक्राणीति पाठः B_2.

कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु ॥ ७ ॥
पारावारे परार्वाची तीरे पात्रं तदन्तरम् ।

(वि.) कूलमिति—[1]कूलयतीति कूलम्। 'कूल आवरणे'। रुध्यत इति [2]रोधः, रुणद्धि जलमिति वा। 'रुधिर् आवरणे'। सकारान्तनपुसंकलिङ्गः, अकारान्तोऽपि। तरन्त्यस्मादिति तीरम्[3]। 'तॄ प्लवनतरणयोः'। [4]प्रतीरं च। तटतीति तटम्। 'तट उच्छ्राये'। तीरनामानि॥ परं चार्वाक् च परार्वाची, ते तीरे पारावारे इत्युच्येते। पार्यते उत्तारणकर्म समाप्यतेऽत्र पारम्। 'पार कर्मसमाप्तौ'। परतीरनाम॥ न विद्यते वाः उदकमत्र कदाचिदपीति अवारम्। अर्वाक्तीरनाम[5]॥ [6]पीयत इति पात्रम्। 'पीङ् पाने'। उभयतीरमध्यप्रवाहस्वरूपनाम॥ ७॥

---

[1] कूल्यते A, D₁, T; कूलति K₅, W₁, Y, Pt₂. [2] रुन्धे वारीति B₁, K₅ [3] तरन्त्यनेनेति, तीरयति सरित्तरणकर्मात्रेति वा, 'तीर कर्मसमाप्तौ' Pt₂. [4] तीरमेव प्रतीरम् Pt₂. [5] सिकतामयतटनाम K₅. [6] K₅ omits 5 lines; पिबत्यस्मात्, 'पा पाने' A.

(पा.) कूलं—तटं त्रिषु। त्रिष्विति तटमात्रविशेषणम्। 'कूलं तीरं प्रपातश्च प्रान्ते कच्छस्तटी[1] त्रयी' इति वैजयन्ती (पृ. १५६, श्लो. ३२)। तीरनामानि॥ पारावारे—तदन्तरम्। परं तीरं पारं [2]स्यात्। अर्वाक्तीरमवारं स्यात्। तयोर्मध्यं पात्रं स्यात्॥ ७॥

---

[1] तटं A₁, B₃. [2] B₃ adds परतीरनाम.

द्वीपोऽस्त्रियामन्तरीपं यदन्तर्वारिणस्तटम्॥ ८॥
तोयोत्थितं तत्पुलिनं सैकतं सिकतामयम्।

(वि.) द्वीप इति—[1]वारिणोऽन्तः वारिमध्ये यत्तटं तस्मिन् द्वीपान्तरीपशब्दौ वर्तेते। [2]द्विधा गताः आपोऽस्मिन्निति द्वीपः। [3]अन्तर्गता आपोऽत्रेति अन्तरीपम्। अन्तरीपं चास्त्रियां वर्तते। उदकमध्यस्थतटनामनी[4]॥ [5]तोये क्षीणे सति उत्थितं दृश्यं तत् पुलिनमित्युच्यते। [6]पुलतीति पुलिनम्। 'पुल महत्त्वे'। तोयोत्थितद्वीपनाम॥ सिकता अत्र सन्तीति [7]सैकतम्। सिकतामयतटनाम॥ ८॥

---

[1] Pt₂ adds the line. [2] द्विविधा A, B₁; पीयन्त इति पाः आपः, ताः द्विधा अत्रेति द्वीपः B₂. [3] अपामन्तः मध्यमन्तरीपं Pt₂. [4] Y omits °स्थ°. [5] Pt₂ adds. [6] पुलः महत्त्वमस्यास्तीति Pt₂. [7] Pt₂ adds सिकतामयं च.

(पा.) द्वीपो—तटम्। द्वीपमस्त्री। अन्तरीपं नपुंसकम्। एते द्वे जलमध्यतटनामनी[1]॥ तोयोत्थितं—पुलिनम्। तोयोत्थितद्वीपनाम। सैकतं सिकतामयम्। सिकतामयतटनाम। [2] 'यिनुकदिव्व'॥ ८॥

---

[1] °मध्यगत° A_1.　　[2] 'इनुकदिन्न' B_3.

निषद्वरस्तु जम्बालः पङ्कोऽस्त्री शादकर्दमौ॥ ९॥
जलोच्छ्वासाः परीवाहाः कूपकास्तु विदारकाः।

(वि.) निषद्वर इति—निषीदन्ति वराहादयोऽत्रेति निषद्वरः। 'षद्लृ विशरणगत्यवसादनेषु'। निषीदन्त्यस्मिन्निति निषत्, तां वृणोतीति वा। 'वृञ् वरणे'। जमति गतिं भक्षयतीति जम्बालः। 'चमु छमु जमु अदने'। पञ्च्यन्ते[1] गन्तॄणां पदान्यत्रेति पङ्कः। [2]'पचि व्यक्तीकरणे'। [3]शीयते पादोऽत्र शादः। 'शद्लृ शातने'। कर्दतीति कर्दमः। 'कर्द कुत्सिते शब्दे'। कृणोति हिंसयतीति वा। 'कृञ् हिंसायाम्'। पङ्कनामानि॥ प्रवृद्धं जलमुच्छ्वसितीति यैर्मार्गैः ते जलोच्छ्वासाः[4]। 'श्वस प्राणने'। परितो जलं वहन्तीति परीवाहाः[5]। तटाकान्ते प्रवृद्धजलनिर्गमाय कृतमार्गनाम॥ स्वल्पाः कूपाः कूपकाः[6]। विदार्यन्ते[7] विदारकाः। 'दॄ विदारणे'। शुष्कनद्यादौ[8] जललाभाय क्रियमाणगर्तनाम॥ ९॥

---

[1] पच्यन्ते A, B_1, T, Pt_2.　　[2] 'पचि विस्तारे' Pt_2; I, K_2, K_3, U, Y add व्यज्यन्ते.　　[3] शीयन्ते पादाः B_1, T; शीयेते पादौ K_3, W_1.　　[4] जलस्य उच्छ्वासा इव Pt_2.　　[5] K_1 adds 'वह प्रापणे.'　　[6] अल्पार्थे कप्रत्ययः B_2.　　[7] B_2 adds खन्यन्ते.　　[8] शुष्कसस्यादेर्जलार्थं B_2.

(पा.) निषद्वरस्तु—कर्दमौ। पङ्कनामानि॥ जलोच्छ्वासाः परीवाहाः। तटाकान्ते प्रवृद्धजलनिर्गमाय कृतमार्गनामनी। 'चरुवुमरव'। 'पूरोत्पीडे तटाकस्य परिवाहः प्रतिक्रिया' इत्युत्तररामचरिते[1] (३. २९)। कूपकास्तु विदारकाः। शुष्कनद्यादौ [2]जललाभाय क्रियमाणगर्तनामनी। भाषया 'चलमलु'। अनुक्तम्—'अवतारो घट्टस्तीर्थम्'। [3]जलावतरणनामानि। 'निह्लिरेवु'॥ ९॥

---

[1] Wrongly attributed to वैजयन्ती in A_1, B_3.　　[2] नीर° A_1.　　[3] जलप्रवेशयोग्यदेशनामनी B_3.

नाव्यं त्रिलिङ्गं नौतार्ये स्त्रियां नौस्तरणिस्तरिः ॥ १० ॥
उडुपं तु प्लवः कोलः स्रोतोऽम्बुसरणं स्वतः ।

(वि.) नाव्यमिति—नावा तार्यं [1]नाव्यम् । नौतार्यजलनाम ॥ नुद्यते इति नौः । 'णुद प्रेरणे' । नयतीति वा । 'णीञ् प्रापणे' । तरत्यनया नदीं [2]तरणिः । तरिश्च । 'तॄ प्लवनतरणयोः' । तरणी तरिरिति वा [3]पाठः । नौनामानि ॥ ऊर्ध्वमुप्यते उडुपम् । 'डुवप् बीजतन्तुसंताने' । उडवः आपः ताभ्यो रक्षति पातीत्युडुपम् । 'पा रक्षणे' । प्लवन्तेऽनेनेति प्लवः । '[4]प्लुङ् गतौ जलोपरि सर्पणे च' । कोलति संस्त्यायतीति कोलः । 'कुल संस्त्याने बन्धुषु च' । [5]तृणप्लवनामानि ॥ स्वतः [6]स्रवतीति स्रोतः । 'स्रु गतौ' । अकृत्रिमाम्बुसरणनाम ॥ १० ॥

[1] नौतार्यं K_3. [2] तार्यतेऽनया नदी; तरी च W_2. [3] तरणी तरीति B_1.
[4] 'प्लव गतौ' W_2, Pt_2. [5] W_1 omits तृणः; सिन्धुतरणार्थं दारवप्लवनामानि B_2.
[6] सरतीति B_2, W_2, Pt_2; 'सृ गतौ' Pt_2, W_2.

(पा.) नाव्यं—नौतार्ये । नावा [1]तर्तुं योग्यं नाव्यं स्यात् । स्त्रियां—तरिः । नावो नामानि ॥ स्त्रियामिति जातिविशेषणम् । इयं नौरियं तरणिः, इयं तरिरियमङ्गिनी ॥ अनुक्तम्—'यानपात्रं प्रवहणं वोहित्थं च [2]वहित्रकम्' । यानपात्रनामानि ॥ उडुपं—कोलः । [3]तृणप्लवनामानि । 'तेप्प' ॥ अनुक्तम्—'तरण्डश्चर्मपात्रादि' । जलतरणाय कल्पितवर्तुलचर्मपात्रादिस्तरण्डः स्यात् । 'आरोह्योऽसौ तरण्डकः' इति वैजयन्ती (पृ. १५५, श्लो. १६) । स्रोतो—स्वतः । स्वतोऽम्बुसरणं प्रवाहः । तत् स्रोतः स्यात् । 'ओघः प्रवाहो वेणी च धारा स्रोतो रयः स्मृतः' इति हलायुधः (अ. मा. ३. ४८) ॥ १० ॥

[1] तरितुं B_3, B_1. [2] वहित्रवत् A_2, B_3. [3] B_3 omits तृण°.

आतरस्तरपण्यं स्याद् द्रोणी काष्ठाम्बुवाहिनी ॥ ११ ॥
सांयात्रिकः पोतवणिक् कर्णधारस्तु नाविकः ।

(वि.) आतर इति—[1]आतरन्त्यनेनेति आतरः । 'तॄ प्लवनतरणयोः' । आवाप इति वा पाठः । आ समन्तादुप्यते [2]आवापः । 'डुवप् बीजसंताने' । तरस्य तरणस्य पण्यं मूल्यं तरपण्यम् । नदीतरणाय नाविकदेयमूल्यनामनी ॥ द्रवत्यस्यां जलमिति द्रोणी । 'द्रु गतौ' । काष्ठपाषाणादिनिर्मिताम्बुवाहिनीनाम ॥ समुदितानां यात्रा संयात्रा द्वीपान्तरगमनम् । सा प्रयोजनमस्य सांयात्रिकः[3] । पोते [4]वणिक् [4]पोतवणिक् । वहित्रवणिङ्नाम ॥

कर्णम् अरित्रं धारयतीति कर्णधारः। 'धृञ् धारणे'। नावा [5]तरतीति नाविकः। 'तॄ प्लवनतरणयोः'। [6]नौतारयितृनामनी ॥ ११ ॥

[1] आ समन्तात् तरति B₂. [2] आ समन्तात् अवाप्यते, 'आप्लृ व्याप्तौ' B₂. [3] 'वहित्रमु कलमुपेरु' K₃. [4] पूयतेऽनेनेति पोतः यानं, तत्र भवः वणिक् पोतवणिक् B₂, Pt₂. [5] तारयतीति A, B₂, T. [6] नौतरणकर्तृनामनी B₂.

(पा.) आतरस्तरपण्यं स्यात्। तरपण्यं तरणमूल्यम् तदातरः स्यात्। द्रोणी काष्ठाम्बुवाहिनी। द्रोणीनामनी ॥ 'दोनि'। काष्ठाम्बुवाहिनीति करिकलभसदृशप्रयोगः। 'द्रोणी स्यादम्बुवाहिन्यां [1]द्रवभाण्डे गिरिप्लवे' इति वैजयन्ती (पृ. २२१, श्लो. १८)। सांयात्रिकः पोतवणिक्। सांयात्रिक इति वहित्रव्यवहारिणो नाम। वहित्रमिति पाषाणादि(?)निर्मितयानपात्रविशेषः। तरिव्यवहारी[2] च भवति। '[3]तरीषु तत्रत्यमफल्गुभाण्डं सांयात्रिकानावपतोऽभ्यनन्दत्' इति माघप्रयोगात् (शिशु. ३. ७६)। कर्णधारस्तु नाविकः। तरणितारयितृनामनी ॥ ११ ॥

[1] द्रव्य° B₃. [2] व्यवहारिणोऽपि B₃. [3] तरिषु A₁.

नियामकाः पोतवाहाः कूपको गुणवृक्षकः ॥ १२ ॥
नौकादण्डः क्षेपणी स्यादरित्रं केनिपातकः।

(वि.) नियामका इति—नियच्छन्ति पोतं नियामकाः। 'यम उपरमे'। पोतं [1]वहन्तीति पोतवाहाः। 'वह प्रापणे'। पोतवाहनामनी ॥ [2]कूपप्रतिकृतित्वात् कूपकः। गुणेन रज्ज्वा बद्धो वृक्षः[3] गुणवृक्षकः। [4]पोतमध्यस्थपताकास्तम्भनामनी ॥ नौकायाः प्रेरणदण्डो नौकादण्डः। क्षिप्यते नौरनयेति क्षेपणी, क्षेपणिर्वा। 'क्षिप प्रेरणे'। [5]नौप्रेरणदण्डनामनी ॥ ऋच्छति नौरनेनेत्यरित्रम्। 'ऋ गतिप्रापणयोः'। के जले नावो निपात्यन्तेऽनेनेति केनिपातकः। 'पत्लृ गतौ'। नौप्रवर्तकदर्वीनामनी ॥ १२ ॥

[1] वाहयन्ति B₁, D₁, I. [2] कूपजलहरणार्थं निर्मितो यन्त्रविशेषः सोऽपि कूप एव, तत्प्रतिकृतित्वात् कूपकः, साम्ये कप्रत्ययः B₂; कायतीति कूपकः, 'कै शब्दे' Pt₂. [3] वृक्षकः A, B₁, T. [4] °पटबन्धन° B₂. [5] इतस्ततःप्रेरण° B₂.

(पा.) नियामकाः पोतवाहाः। वहित्रतारयितृनामनी ॥ कूपको गुणवृक्षकः। गुणेन बद्धपोतमध्यगतस्तम्भनामनी ॥ नौकादण्डः क्षेपणी स्यात्। नौकाप्रेरकदण्डः क्षेपणी स्यात्। अरित्रं केनिपातकः। [1]नौदर्विनामनी ॥ १२ ॥

[1] °दर्वी° B₁.

अभ्रिः स्त्री काष्ठकुद्दालः सेकपात्रं तु सेचनम् ॥ १३ ॥
यानपात्रं तु पोतोऽब्धिभवे त्रिषु समुद्रियम् ।
क्लीबेऽर्धनावं नावोऽर्धेऽतीतनौकेऽतिनु त्रिषु ॥ १४ ॥

(वि.) अभ्रिरिति—अभ्रयति पोते लवणादिकं पातयतीति अभ्रिः । 'अभ्र गतौ' । काष्ठनिर्मितः कुद्दालः काष्ठकुद्दालः । [1]लवणादिखननकाष्ठकुद्दालनामनी ॥ [2]सेकाय पात्रं सेकपात्रम् । सिच्यतेऽनेन नौकाजलमिति सेचनम् । 'षिच क्षरणे' । पोतरन्ध्रप्रविष्टजलस्य बहिःसेचनाय नियोजितदारुपात्रनामनी ॥ यानाय[3] पात्रं यानपात्रम् । पूयते कालक्रमेणेति पोतः । 'पूयी विशरणे' । वहित्रनामनी ॥ समुद्रे भवं समुद्रियम् । [4]त्रिषु । कथं ? समुद्रिया आपः, समुद्रियं लवणं, [5]समुद्रियस्तरङ्ग इत्यादि । अब्धिभवमुक्तादिनाम[6] ॥ नावोऽर्धम् अर्धनावम् । नावोऽर्धनाम ॥ अतीता नौर्येन अतिनु । नावमतिक्रान्तमिति वा । अतीतनौकजलादिनाम ॥ १३–१४ ॥

[1] दृढदारुनिर्मितसन्धीकरणसाधनविशेषः; कुम् उद्दालयतीति कुद्दालः, 'दल विशरणे' B_2. [2] सेकः सेचनं तस्य पात्रं Pt_2; सेकायान्तःस्थजलानां निर्मितं पात्रं B_2. [3] B_2 adds निर्मितं. [4] तत् त्रिषु वर्तते D_1. [5] समुद्रियो मुक्तामणिः Pt_2. [6] Y adds °वस्तु°.

(पा.) अभ्रिः—काष्ठकुद्दालः । दारुमयकुद्दालोऽभ्रिः स्यात् । अभ्रिपुरन्ध्रिशौरिशरारितन्द्रिवल्लरिवलिगालिशष्कुलिहलिधूलिशब्दा[1] ह्रस्वान्ता दीर्घान्ताश्च भवन्तीत्यरुणदत्तलिङ्गानुशासने[2] सम्यक् प्रतिपादितम् ॥ सेकपात्रं—सेचनम् । जलसेकबोक्काणः सेचनं स्यात् । 'पोतरन्ध्रप्रविष्टजलस्य बहिःसेचनाय निर्मितदारुपात्रनाम' इति वदन्ति । तदसत् । 'चर्मपात्रं तु बोक्काणः' इति वामनलिङ्गानुशासनवचनात् । यानपात्रं तु पोतः । वहित्रनामनी ॥ अब्धिभवे—समुद्रियम् । अब्धौ समुद्रे भवं समुद्रियं स्यात् । तच्च त्रिलिङ्गम् । क्लीबे—अर्धे । नावोऽर्धेऽर्धनावं स्यात् । अर्धनावमर्धनावीति हि स्त्रीनपुंसकयोर्दृश्यत इति शाकटायनः (२. १. १६७) ॥ अतीतनौके—त्रिषु । नावमतिक्रान्तमतिनु स्यात् । 'ह्रस्वो नपुंसके प्रातिपदिकस्य' (१. २. ४७) इति ह्रस्वः[3] । 'स्त्रीपुंसयोस्तु अतिनौः' ॥ १३–१४ ॥

[1] A_1 adds °आलि°. [2] °शासनकारेण A_1. [3] इति ह्रस्वत्वं नपुंसकविषयम् A_1.

त्रिष्वागाधात् प्रसन्नोऽच्छः कलुषोऽनच्छ आविलः ।
निम्नं गभीरं गम्भीरमुत्तानं तद्विपर्यये ॥ १५ ॥

अगाधमतलस्पर्शे कैवर्ते दाशधीवरौ ।

(वि.) त्रिष्विति—वक्ष्यमाणागाधपर्यन्ताः[1] शब्दाः त्रिषु वर्तन्ते । प्रसीदतीति प्रसन्नः । 'षद्लृ विशरणगत्यवसादनेषु'। न [2]छाद्यते दृष्टिरित्यच्छः। 'छद अपवारणे'। निर्मलनामनी ॥ कं जलं लुनातीति कलुषम् । 'लूञ् छेदने'। कं लुषति हिनस्तीति वा। 'लुष हिंसायम्'। [3]न अच्छः अनच्छः। [4]आविलतीत्याविलः। 'विल संवरणे'। अनिर्मलनामानि ॥ खननाय नितरां [5]मनतीति निम्नः। 'म्ना अभ्यासे'। [6]गमनेन भियं रातीति गभीरं गम्भीरं च । 'रा दाने'। गां भुवं भियमीरयतीति वा। 'ईर प्रेरणे'। अत्यर्थनिम्ननामानि ॥ उत् ऊर्ध्वं तन्यते उत्तानम्। 'तनु विस्तारे'। निम्नविपर्ययनाम॥ न गाधम् अगाधम्। नास्ति गाधः प्रतिष्ठा अस्येति वा। 'गाधृ प्रतिष्ठालिप्सयोर्ग्रन्थे च'। न विद्यते [7]तलस्पर्शोऽत्र अतलस्पर्शः। अगाधनामनी ॥ के जले वर्तन्ते इति केवर्ताः मत्स्यादयः, तेषामयं हन्ता कैवर्तः। 'वृतु वर्तने'। विक्रयेण मत्स्यान् दाशति[8] दाशः। 'दाशृ दाने'। दाश्नोति मत्स्यानिति वा। 'दाशृ हिंसायाम्'। धत्ते मत्स्यानिति धीवरः। 'डुधाञ् धारणपोषणयोः'। ध्यायति मत्स्यानिति वा। 'ध्यै चिन्तायाम्'। जालिकनामानि ॥ १५ ॥

---

[1] °पर्यन्तं I.
[2] न छयति दृष्टिम् अच्छः, 'छो छेदने' Pt_2.
[3] अच्छो न भवतीति B_2.
[4] आ समन्तात् विलतीति (बिल्यते Pt_2), 'बिल छेदने,' वबयोरभेदः I, Y.
[5] म्नायते W_2, Y, Pt_2.
[6] गमने Pt_2.
[7] अधःस्पर्शः Pt_2.
[8] Pt_2 adds द्यति, 'दोऽवखण्डने'.

(पा.) त्रिष्वागाधात्। अगाधशब्दावधि ते त्रिलिङ्गाः त्रिष्विति पुनर्ग्रहणात्। प्रसन्नोऽच्छः। [1]निर्मलनामनी। 'तेट'। कलुषो—आविलः। [2]अनिर्मलनामानि। 'कलंकुट'। निम्नं—गम्भीरम्। अत्यर्थनिम्ननामानि ॥ उत्तानं तद्विपर्यये। निम्नविपर्ययनाम ॥ अगाधमतलस्पर्शः। तलस्पर्शविहीननाम ॥ कैवर्ते—धीवरौ। जालिकनामानि॥ 'शाल[3] . . . . . दाशपुरीशे'—इत्यूष्मभेदपाठात तालव्यः। 'कैवर्तभृत्ययोर्दासो दासी चाणा च चेटिका' इति रुद्राभिधानकोशपाठाद् दन्त्यः ॥ १५ ॥

---

[1] नैर्मल्य° A_1.
[2] अनैर्मल्य° A_1.
[3] B_3 adds दाश इत्यत्र; gap in A_1, B_3.

आनायः पुंसि जालं स्याच्छणसूत्रं पवित्रकम् ॥ १६ ॥
मत्स्यधानी कुवेणी स्याद् बडिशं मत्स्यवेधनम् ।

(वि.) आनाय इति—आनीयन्ते मत्स्या अनेनेति आनायः। 'णीञ् प्रापणे'। जालवत् गवाक्षवत् तिष्ठतीति जालम्। जले क्षिप्यत इति वा। जालनामनी ॥ शणमयं सूत्रं शणसूत्रम्। निमज्जनेन जलं पुनातीति पवित्रकम्। निर्मत्स्यत्वेन वा। 'पूञ् पवने'। जालरज्जुनामनी ॥ मत्स्या धीयन्तेऽत्रेति [1]मत्स्यधानी। कुत्सितं वेणन्ते मत्स्या अत्र कुवेणी। 'वेणृ गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु'। मत्स्यकरण्डिकानामनी[2] ॥ बलिनो मत्स्यान् श्यतीति बडिशम्[3]। 'शो तनूकरणे'। मत्स्या विध्यन्ते येन तत् मत्स्यवेधनम्। 'व्यध[4] ताडने'। [5]मत्स्यगलग्राहकसामिषवक्रायोमययन्त्रनामनी ॥ १६ ॥

[1] मत्स्याधानी A, B_1, T; 'डुधाञ् धारणपोषणयोः' A. [2] °करण्डक° D_2.
[3] बलिशं W_1; डलयोरैक्यात् I. [4] 'विध विधाने' W_1. [2] °वक्राकार° A.

(पा.) आनायः—जालं स्यात्। जालनामनी। 'वल'। शणसूत्रं पवित्रकम्। जालादिरज्जुनामनी। 'सन्नपुत्राद्गु'। मत्स्यधानी—स्यात्। मीनकरण्डिकानामनी। 'मीनबुट्टि'। बडिशं मत्स्यबन्धनम्। मत्स्यग्राहकायोयन्त्रनामनी। 'गालमु'।

'अजानन् दाहात्म्यं पततु शलभस्तीव्रदहने
स मीनोऽप्यज्ञानाद् बडिशयुतमश्नातु पिशितम्।'

इति भर्तृहरिः (वै. श. १८)।

'[1]बडिशक्रोडपाटलम्।
तारकं रसनं नीडमेते टाबन्तकाः स्त्रियाम्' ॥

इति त्रिकाण्डशेषपाठाद् (पृ. ३८, श्लो. १०४७-८) बडिशेत्यपि स्यात् ॥ १६ ॥

[1] बडिशं तारकं नीडमेते टाबन्तकाः स्त्रियाम् A_1, B_3.

पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः ॥ १७ ॥
विसारः शकली चाथ गडकः शकलार्भकः।

(वि.) पृथुरोमेति—पृथूनि रोमाणि [1]मुखदेशे यस्य सः पृथुरोमा। बालमत्स्यान् [2]झषतीति झषः। 'झष हिंसायाम्'। माद्यति मांसजिघृक्षया मुह्यतीति मत्स्यः। 'मदि[3] हर्षग्लपनयोः'। मीयते धीवरेण मीनः। 'मीञ् हिंसायाम्'। [4]मिनोति क्षिपति जलमिति वा। 'डुमिञ् प्रक्षेपणे'। [5]विसरतीति विसारी। 'सृ गतौ'। विसारी[6] एव वैसारिणः। अण्डाज्जायत इत्यण्डजः। 'जनी प्रादुर्भावे'। विचित्रं सरतीति विसारः[7]। शकलं

शल्यमस्यास्तीति शकली। शकुलीति वा पाठः। शकुल इति वा। शक्यते ग्रहीतुं शकुलः। ‘शक्लृ शक्तौ’। मत्स्यनामानि॥ [8]गडति पुच्छाच्छोटनात् गडकः[9]। ‘गड सेचने’। [10]शकलार्भकनाम॥ १७॥

---

[1] A, B_1, T add पक्षाः.　[2] Pt_2 adds हिनस्ति.　[3] ‘मदि हर्षे’ Pt_2.　[4] मीनाति B_1, W_2, Y; ‘मीञ् हिंसायाम्’ I.　[5] K_5, W_2, Y add मांसजिघृक्षया.　[6] विसारिणः संबन्धी A, B_1.　[7] ‘सृ गतौ’ I.　[8] गण्डति A, T.　[9] गण्डकः B_1, T.　[10] शकुलार्भक° A, D_1.

(पा.) प्रृथुरोमा—मत्स्यः। मच्छोऽप्यत्रेति सुभूतिवचनान्मच्छोऽप्यस्ति। मीनो वैसारिणोऽण्डजः। विसार्येव वैसारिण इति [1]व्युत्पत्तिः। विसारः शकली च। ‘शकली शल्की च विज्ञेयः’ इति हलायुधपाठात् (अ. मा. ३. ३५) शल्कीत्यपि स्यात्[2]। मीननामानि॥ ‘षडक्षीणोऽप्सुचकम आत्माशी जलपिप्पलः[3]’। एतानि च। [4]अथ गडकः शकुलार्भकः। अधिकपुच्छमीननामनी। भाषया ‘कुच्चुलमीनु’॥ १७॥

---

[1] व्युत्पत्त्या A_1.　[2] भवति B_3.　[3] °पिप्पकः A_1, B_3.　[4] गण्डोलः A_1.

सहस्रदंष्ट्रः पाठीन उलूपी शिशुकः समौ॥ १८॥
नडमीनश्चिलिचिमः प्रोष्ठी तु शफरी द्वयोः।

(वि.) सहस्रदंष्ट्र इति—[1]बहुदंष्ट्रत्वात् सहस्रदंष्ट्रः। [2]भक्ष्यतया शास्त्रेषु पठ्यत इति पाठीनः। ‘पठ व्यक्तायां वाचि’। पाठयति स्वजातीयविरुद्धमिति वा। पाटीन इति पाठे पाटयतीति। ‘पट[3] भेदने’। बहुदंष्ट्रमत्स्यनामनी॥ उत् ऊर्ध्वं लुम्पति भ्रमतीति उलूपी। ‘लुप्लृ छेदने’। उ सविस्मयं लुप्यति [4]पङ्कजादिकमिति वा। ‘लुप विमोहने’। शिशुरिव[5] शिशुकः। शिशुवच्चपलमत्स्यनामनी॥ [6]नडाख्यतृणे मीनः नडमीनः। चीयते लीयते चिलिचिमः। ‘चिञ् चयने’। ‘लीङ् श्लेषणे’। तृणसंचारिमत्स्यनामनी॥ प्रोषति पित्तादिकमिति प्रोष्ठी। ‘उष प्लुष दाहे’। शफान्[7] गतिसाधनावयवान् रिणाति पीडयतीति शफरी। ‘री गतिरेषणयोः’। [8]पित्तघ्नमत्स्यनामनी॥ १८॥

---

[1] सहस्रं दंष्ट्राः यस्य Pt_2.　[2] भक्षतया W_1.　[3] ‘पट व्यथने’ D_2.　[4] पङ्कादिकं B_2; ‘लुप लोपे’ A, B_1, T.　[5] शिशुवत् गच्छतीति B_1.　[6] नलाख्ये तृणे वर्तते मीनः B_1, Y.　[7] शफः पित्तविकारः B_2.　[8] पित्तकृन्मीननाम W_2; उत्पतनशीलमत्स्यनाम Y.

(पा.) सहस्रदंष्ट्रः पाठीनः । बहुदंष्ट्रमीननामनी । 'बेडिशमीनु' । उलूपी—समौ । शिशुवच्चपलमत्स्यनामनी । 'ससियलु' ।। नडमीनश्चिलिचिमः । वृश्चिकाकारमत्स्यनामनी । 'तेलुमीनु' । प्रोष्ठी—द्वयोः । पित्तघ्नमीननामनी[1] ।। १८ ।।

[1] °मत्स्य° B_3.

क्षुद्राण्डमत्स्यसंघातः पोताधानमथो झषाः ।। १९ ।।
रोहितो मद्गुरः शालो राजीवः शकुलस्तिमिः ।
तिमिंगिलादयश्चाथ यादांसि जलजन्तवः ।। २० ।।

(वि.) क्षुद्रेति—क्षुद्राणामपरिमितपरिमाणानां मत्स्यानामण्डाज्जाताः, तेषां मत्स्यानां संघातः क्षुद्राण्डमत्स्यसंघातः । पोता मत्स्यपोता आधीयन्तेऽस्मिन्निति पोताधानम् । 'डुधाञ् धारणपोषणयोः' । मत्स्यपोतसमूहनामनी ।। [1]रोहितवर्णत्वात् रोहितः । [2]जले मज्जतीति मद्गुरः । 'टुमस्जो शुद्धौ' । शलति शीघ्रं गच्छतीति शालः । 'शल चल आशुगमने' । राज्यः[3] रेखा अस्य सन्तीति राजीवः । शक्नोति गन्तुं शकुलः । 'शक्लृ शक्तौ' । [4]तिम्यतीति तिमिः । 'तिम आर्द्रीभावे' । तिमिं गिलतीति तिमिंगिलः । 'गॄ निगरणे' । एवमादीनि [5]झषभेदनामानि ।। यान्तीति यादांसि । 'या प्रापणे' । यतन्ते हन्तुं मत्स्यानिति वा । 'यती प्रयत्ने' । जले विद्यमाना जन्तवः जलजन्तवः । क्रूरजलजन्तुनाम ।। १९–२० ।।

[1] रक्तत्वात् A, B_1, T. [2] B_1, T omit; 'मस्ज मज्जने' A, T, W_1. [3] राजयः I.
[4] B_2 adds आर्द्रीक्रियते. [5] जलजन्तुनामानि K_3; एते सप्त प्रत्येकं मत्स्यभेदाः । आदिशब्देन तिलादयोऽपि । यतन्ते बालमत्स्यान् हन्तुं यत्नं (प्रयत्नं U) कुर्वन्तीति वा यादांसि । 'यती प्रयत्ने' W_1.

(पा.) क्षुद्राण्ड—पोताधानम् । मत्स्यसमूहनामानि ।। अथो झषः—तिमिंगिलादयश्च । 'मकरो मत्स्यराड् झषः' इति वैजयन्ती (पृ. १५२, श्लो. ५१) । [1]झषादयः पृथक्पृथङ्मत्स्याः । अथ यादांसि जलजन्तवः । क्रूरजलजन्तवो यादांसीत्युच्यन्ते । 'अन्तर्जलचरं [2]सत्त्वं क्रूरं यादोऽभिधीयते' इति हलायुधः (अ. मा. ३. ३४) ।।१९–२०।।

[1] मकरादयः A_1. [2] सर्वं A_1.

तद्भेदाः शिशुमारोद्रशङ्कवो मकरादयः।
स्यात् कुलीरः कर्कटकः कूर्मे कमठकच्छपौ ॥ २१ ॥

(वि.) तद्भेदा इति—शिशून् मारयतीति शिशुमारः। 'मृङ् प्राणत्यागे'। उनत्तीत्युद्रः। 'उन्दी क्लेदने'। शङ्कतेऽस्मात् लोकः शङ्कुः। 'शकि शङ्कायाम्'। मायां करोतीति मकरः। 'डुकृञ् करणे'। प्राणिकवलने मुखं किरतीति वा। 'कॄ विक्षेपे'। आदिशब्देन जलहस्तिग्राहादयः। [1]एवमादीनि यादोभेदनामानि ॥ कौ भूमौ लीयत इति कुलीरः। 'लीङ् श्लेषणे'। [2]कुली: [3]परलोकाय ईरयतीति वा। 'ईर प्रेरणे'। कृणाति जननीं कर्कटकः। 'कॄ हिंसायाम्'। कर्कटनामनी ॥ कुत्सितः ऊर्मिः वेगोऽस्य कूर्मः। कं जलम् ऊर्वति प्राणिभक्षणायेति वा। 'उर्वी हिंसायाम्'। के जले मठतीति कमठः। 'मठ मदनिवासयोः'। यज्ञार्थं काम्यत इति वा। 'कमु कान्तौ'। कच्छेन पुच्छेन पिबतीति कच्छपः। 'पा पाने'। कच्छमनूपदेशं पाति क्षुद्रजन्तुभक्षणेनेति वा। 'पा रक्षणे'। कूर्मनामानि ॥ २१ ॥

[1] मकरादीनि W_1. [2] W_1 adds मातृः. [3] कुवर्तनाय D_2; कैवर्तकाय K_3.

(पा.) तद्भेदाः—मकरादयः।

'शङ्कुः कच्छपसंस्थानः शिंशुमारोऽम्बुमर्कटः।
उद्रः स्याज्जलमार्जार आलभ्यश्चाम्बुसूकरः ॥'

शिंशुमारादयश्च पूर्वोक्तमकरादयश्च यादोभेदाः। स्यात्—कर्कटकः। कुलीरनामनी। आन्ध्रभाषया '[1]यंद्रिकाय'। 'पृष्ठचक्षुर्द्विधागतिः'। एते द्वे च। कूर्मे—कच्छपौ। कूर्मनामानि। 'पञ्चगूढश्चतुर्गतिः'। एते द्वे च ॥ २१ ॥

[1] 'यंद्रिपीत' B_3.

ग्राहोऽवहारो नक्रस्तु कुम्भीरोऽथ महीलता।
गण्डूपदः किंचुलको निहाका गोधिका समे ॥ २२ ॥
रक्तपा तु जलूकायां स्त्रियां भूम्नि जलौकसः।

(वि.) ग्राह इति—गृह्णाति न मुञ्चति प्राणिन इति ग्राहः। 'ग्रह उपादाने'। अवहरतीत्यवहारः। 'हृञ् हरणे'। अवराह इति वा पाठः। तत्पक्षे [1]अवरहयति

स्थलभूमिमिति अवराहः । 'रह त्यागे' । [2]तुरङ्गमास्यमत्स्यनामनी ॥ न क्रामति अतिदूरमिति नक्रः[3] । 'क्रमु पादविक्षेपे' । कुम्भिनो गजानीरयतीति कुम्भीरः । 'ईर क्षेपे' । [4]गजादिकर्षनक्रनामनी ॥ मह्यां लतेव तिष्ठतीति [5]महीलता । गण्डूः[6] शरीरग्रन्थयः, त एव [7]पदान्यस्य गण्डूपदः । [8]मृदादि किंचित् लुञ्चित्वा [9]चुलति अपनयतीति किंचुलुकः । '[10]चुल संवरणे समुच्छ्राये च' । लताकारपाटलवर्णकृमिनामानि[11] ॥ निजहाति [12]जलं निहाका । 'ओहाक् त्यागे' । गुध्यतीति गोधिका । 'गुध परिवेष्टने' । [13]जलचरप्राणिविशेषनामनी ॥ रक्तं पिबतीति रक्तपा[14] । 'पा पाने' । जलम् ओकः स्थानं यस्या [15]जलूका । जलौकसश्च । जलूकानामानि ॥ २२ ॥

---

[1] अपरहयतीति अपराहः D$_2$, K$_5$, U. [2] तुरङ्गमाकर्षणमत्स्य° B$_2$, U. [3] न क्रम्यते B$_1$, T. [4] गजाकर्षकमत्स्य° B$_1$, D$_1$, K$_5$, W$_2$. [5] महीं लुनातीति वा । 'लूञ् छेदने' A, B$_1$, T. [6] गण्डवः B$_1$, T. [7] पादाः Y. [8] मृदं W$_1$. [9] चोलयति D$_1$, W$_2$. [10] 'चुल अपनयने' K$_2$, U, W$_1$. [11] 'यरलु' K$_5$. [12] स्थलं Pt$_2$; वलं A, B$_1$, W$_1$. [13] जलचरगोधिका° Y. [14] रक्तपो वा I. [15] B$_1$, W$_2$ add जलौका; जलम् ओको येषां ते जलौकसः.

(पा.) ग्राहोऽवहारः[1] । घोटकमुखमीननामनी इति वदन्ति । तदसत् । उदकचरमण्डलिसर्पनामनी । 'तन्तुनागस्तथा तन्तुर्नागो वरुणपाशकः' । [2]एतानि च ॥ नक्रस्तु कुम्भीरः । नक्रनामनी । 'मोसलि' । गजाकर्षणमत्स्यनामनी इति केचित् । तदज्ञानविजृम्भितम् । 'गोमुखस्तालुजिह्वश्च' । एते द्वे[3] च ॥ अथ महीलता—किंचुलुकः । लताकारपाटलवर्णकृमिनामानि । 'यट्लु' । निहाका—समे । गोधिकानामनी । 'नीरुडुमु' । रक्तपा तु—जलौकसः । जलूकानामानि । 'जलौकः स्याज्जलूकायां जलौका जलजन्तुके' । इति तारपालवचनात् जलौकापि स्यात् । 'जलङ्ग' ॥ २२ ॥

---

[1] अवराहः A$_1$. [2] A$_1$ adds चत्वारि. [3] B$_3$ omits द्वे.

मुक्तास्फोटः स्त्रियां शुक्तिः शङ्खः स्यात् कम्बुरस्त्रियौ ॥२३॥
क्षुद्रशङ्खाः शङ्खनखाः शम्बूका जलशुक्तयः ।

(वि.) मुक्तास्फोट इति—मुक्ताः [1]स्फुटन्ति [2]यतः मुक्तास्फोटः । 'स्फुट विकसने' । मुक्ता यतः शोकन्तीति शुक्तिः । 'शुक गतौ' । शुक्तिनामनी ॥ [3]शं सुखं खनति जनयतीति शङ्खः । 'खनु [4]अवदारणे' । [5]शमयति दुःखं जनानामिति वा ।

'शमु उपशमे[6]'। काम्यते [7]मङ्गलार्थिनेति कम्बुः। 'कमु कान्तौ'। शङ्खनामनी ॥ क्षुद्राश्च ते शङ्खाश्च क्षुद्रशङ्खाः। शङ्खा नखा इव शङ्खनखाः। शङ्खवन्न विद्यते खम् [8]अवकाशोऽस्येति वा। [9]नद्यादौ विद्यमानक्षुद्रशङ्खनामनी ॥ शं[10] वान्तीति शम्बूकाः। 'वा गतिगन्धनयोः'। शाम्यति दुःखमिति वा। जले विद्यमानाः शुक्तयः जलशुक्तयः। जलशुक्तिनामनी ॥ २३ ॥

[1] स्फोटयन्ति B_1, T.　[2] अस्मात् Pt_2.　[3] W_1 omits two lines.　[4] K_2 adds जननार्थे च.　[5] शाम्यति I, Pt_2.　[6] परनिपातः Y.　[7] शुभार्थिभिरिति Pt_2.　[8] आकाशः D_2, Y.　[9] समुद्रादौ Y; सिन्ध्वादौ B_1.　[10] शं सुखं B_1, D_1, W_2.

(पा.) मुक्तास्फोटः—शुक्तिः। शुक्तिनामनी ॥ शङ्खः—अस्त्रियाम्। शङ्खनामनी। अस्त्रीशब्द उभयविशेषणम्। 'शङ्खो निधौ ललाटास्थि कम्बौ न स्त्री' इति [1]नानार्थशास्त्रे (३. ३. १८) स्वयमेव वक्ष्यति। अनुक्तम्—'शम्फा[2] तु शङ्खनिस्वानः'। शङ्खध्वनिः शम्फा स्यात्। 'शङ्खपात्रं तु [3]पाटली'। शङ्खपात्रं पाटली स्यात्। क्षुद्रशङ्खाः—जलशुक्तयः। जलशुक्तिनामानि। 'नत्तगुह्ललु'। शम्बूकशब्दः शङ्खशब्दसाहचर्यात् पुंलिङ्गः। 'शम्बूकः शम्बुको ज्ञेयः शाम्बूकोऽपि च पण्डितः' इति तारपालः। जलशुक्तिसाहचर्यात् स्त्रीलिङ्गोऽपि।

'सिन्धोरुच्चैः पवनवलनादुच्चलद्भिस्तरङ्गै-
　　स्तीरं नीतो हतविधिवशाद् दक्षिणावर्तशङ्खः।
दग्धः किं वा भवति मनसीवेति संदेहिनीभिः
　　शम्बूकाभिः सह परिचयान्नीयते पामरीभिः ॥'[4]

इति ॥ २३ ॥

[1] नानार्थेषु B_3.　[2] शम्भा A_1.　[3] पाटलिः A_1.　[4] सुभाषितरत्नकोशे ११९८.

भेके मण्डूकवर्षाभूशालूरप्लवदर्दुराः ॥ २४ ॥
शिली गण्डूपदी भेकी वर्षाभ्वी कमठी डुलिः ।

(वि.) भेक इति—बिभेति [1]सर्पात् भेकः। 'ञिभी भये'। मण्डति शोभते[2] तटाकादौ मण्डूकः। 'मडि भूषायाम्[3]'। वर्षासु भवतीति वर्षाभूः। 'भू सत्तायाम्'। शलति [4]उत्प्लुत्य गच्छतीति शालूरः। 'शल गतौ'। प्लवते प्लवः। 'प्लुङ् गतौ जलोपरि सर्पणे च'। [5]शब्दैः कर्णौ दृणातीति दर्दुरः। 'दृ विदारणे'। भेकनामानि ॥ शिनोति श्यतीति वा शिली[6]। 'शिञ् निशाने'। 'शो तनूकरणे'। शिलति [7]मृदमिति वा।

‘शिल उञ्छे’। गण्डूपदस्य स्त्री गण्डूपदी। भेकस्य स्त्री भेकी। वर्षाभ्वाः स्त्री वर्षाभ्वी। कमठस्य स्त्री कमठी। [8]डोलयति जलमिति डुलिः। ‘डुल उत्क्षेपणे’। कमठजातिस्त्रीनामनी ॥ २४ ॥

[1] सर्वस्मात् B_2. [2] A, B_1, T add किङ्किणीजालवत्. [3] व्यातौ च K_1, K_2. [4] प्लवैः B_2, D_1, K_5, W_2; प्लवनैः U. [5] शब्देन कर्णान् Y. [6] शिलतीति शिली, ‘शिल गतौ’ Pt_2. [7] मृदुरिति I; मृदयति K_5; मृदं भक्षयति W_1. [8] डोलति, ‘डुल उपतापे’ ‘डुल चलने’ वा धातुः B_2.

(पा.) भेके—दर्दुराः। मण्डूकनामानि। ‘स्यात् केन्दुकः प्रावृषिजः स्त्री तु कूपेपिशाचिका’। [1]एते च। शिली गण्डूपदी। गण्डूपदस्त्रीनामनी ॥ भेकी वर्षाभ्वी। भेकस्त्रीनामनी। ‘वर्षाभ्वश्च’ इति यणादेशः। ‘दृन्पुनःकरवर्षाभिर्भुवः’ इति शाकटायनशास्त्रे (१. २. ३९) करभूशब्दस्यापि यण्वादेशः ॥ कमठी डुलिः। कमठस्त्रीनामनी ॥ २४ ॥

[1] एतानि त्रीणि च B_3.

मद्गुरस्य प्रिया शृङ्गी दुर्नामा दीर्घकोशिका ॥ २५ ॥
जलाशयो जलाधारस्तत्रागाधजलो ह्रदः।

(वि.) मद्गुरस्येति—शृणातीति शृङ्गी। ‘शॄ हिंसायाम्’। [1]मद्गुरमत्स्यभार्यानाम ॥ दुष्टं [2]नाम यस्या दुर्नामा। ‘णमु प्रह्वत्वे शब्दे च’। आकारान्तः। दीर्घकोशातक्याकारत्वात् दीर्घकोशिका। [3]हस्तिजलूकानामनी ॥ जलमाशेतेऽत्र जलाशयः। ‘शीङ् स्वप्ने’। जलस्याधारो जलाधारः। साधारणजलस्थाननामनी ॥ कल्लोलैरव्यक्तं ह्रादतेऽत्रेति [4]ह्रदः। ‘ह्राद अव्यक्ते शब्दे’। अगाधं जलं यत्र सः अगाधजलः। [5]अगाधजलाशयनाम ॥ २५ ॥

[1] Pt_2 adds जलान्तर्मकरस्य. [2] W_1, W_2 add नमनं. [3] A adds वक्राकार°. [4] ह्रियतेऽत्र ह्रदः, ‘हृञ् हरणे’ B_2. [5] अगाधजल° K_5.

(पा.) मद्गुरस्य—शृङ्गी। मद्गुरस्य स्त्री शृङ्गी स्यात्। सर्पशफरीनाम। ‘पामुमीनु’। ‘शृङ्गी तु सर्पशफरी’ इति वैजयन्ती (पृ. १५१, श्लो. ४४) ॥ दुर्नामा दीर्घकोशिका। गजजलूकानामनी। ‘येरुचिप्प’। सुभूतिटीकायामस्य ङीप्डाप्प्रतिषेधाभ्यां त्रैरूप्यं [1]दर्शितं दुर्नाम्नीं दुर्नामां दुर्नामानमिति ॥ जलाशयो जलाधारः। साधा-

रणजलस्थाननामनी ॥ तत्र—ह्रदः । [2]तत्रागाधजलो जलाशयो ह्रदः स्यात् । 'द्रहः संस्कृतेऽपि' इति त्रैविक्रमवचनाद् द्रहोऽपि ह्रदनाम ॥ २५ ॥

[1] शब्दितम् A_1.　　[2] तेषु B_3.

आहावस्तु निपानं स्यादुपकूपजलाशये ॥ २६ ॥
पुंस्येवान्धुः प्रहिः कूप उदपानं तु पुंसि वा ।

(वि.) आहाव इति—आहूयन्ते [1]गावोऽत्र आहावः । 'ह्वेञ् स्पर्धायां शब्दे च'। [2]नियतं पिबन्ति जलं पशवोऽत्रेति निपानम् । 'पा पाने'। [3]कूपसमीपबद्धशिलामय-जलद्रोणिनामनी[4] ॥ अनन्ति जना अनेनेत्यन्धुः । 'अन प्राणने'। प्रजहाति[5] जलमिति प्रहिः । 'ओहाक् त्यागे'। प्रह्रियते जलमस्मादिति वा । 'हृञ् हरणे'। कुत्सिता[6] आपोऽत्र [7]सन्तीति कूपः । [8]उदकं पीयतेऽत्र उदपानम्[9] । कूपनामानि ॥ २६ ॥

[1] पशवः Pt_2 ; आहूयन्तेऽस्मिन् आप इति, 'हु दानादानयोः' B_1, T.　　[2] नितरां B_2.　　[3] °शिलादिमय° W_1.　　[4] °प्रणाली° B_1.　　[5] B_1 adds अजस्रं; ददाति W_1　　[6] कोर्वा Pt_2; B_2 adds उद्धरणीकृता.　　[7] तिष्ठन्ति D_2, I, K_3.　　[8] उदानि पीयन्ते A.　　[9] W_1 adds 'पा पाने'.

(पा.) आहावस्तु—जलाशये । पशुपानार्थं [1]शिलादार्वादिकृतकूपसमीपस्थ[2]-जलाशये आहावनिपानशब्दौ स्याताम् । पुंस्येव—पुंसि वा । कूपनामानि ॥ अन्धुप्रभृतयस्त्रयः पुंलिङ्गाः । उदपानशब्द एक एव विकल्पितपुंलिङ्गः ॥ २६ ॥

[1] ° दारुभ्यां A_1.　　[2] B_3 omits °स्थ°.

नेमिस्त्रिकास्य पीनाहो मुखबन्धनमस्य यत् ॥ २७ ॥
पुष्करिण्यां तु खातं स्यादखातं देवखातकम् ।

(वि.) नेमिरिति—नीयते [1]जलघटोऽनेनेति नेमिः । 'णीञ् प्रापणे' । त्रयाणां दारूणां समूहः[2] त्रिका । त्रयोऽवयवा अस्या इति वा । अगाधकूपात् जलाकर्षार्थं[3] कूपोपरिनिर्मितत्रिदारुयन्त्रनामनी[4] ॥ पिनह्यते इष्टकाभिरिति पीनाहः । 'णह बन्धने'। वीनाह[5] इति वा पाठः । तथापि णह[6] एव धातुः । कूपमुखे इष्टकादिभिर्बन्धन-नाम ॥ [7]पुष्करमुदकम् अस्त्यस्यामिति पुष्करिणी । खन्यत इति खातम् । 'खनु

अवदारणे'। कृत्रिमजलाशयनामनी॥ न खन्यत इत्यखातम्। देवैः खन्यत इति देवखातकम्। अकृत्रिमजलाशयनामनी॥ २७॥

---

[1] B_1, T add जलान्तिकं; जलसमीपं B_2. [2] समाहारः B_1, D_1. [3] °आकर्षणार्थं D_2, I, K_5; U. [4] °दारुत्रय° Y. [5] इष्टिकादार्वादिभिर्विशेषेण नह्यते B_2. [6] स एव K_3. [7] पुष्कराणि B_2.

(पा.) नेमिस्त्रिकास्य। कूपस्य नेमिस्त्रिका स्यात्। 'त्रिका कूपस्य नेमौ स्त्री पृष्ठवंशाधरे त्रिकम्' इति रभसकोशः। [1]वंशत्रयेण रज्जुधारणार्थं [2]कूपोपरिकल्पिततोरण[3]यन्त्रनामनी। 'गिरक'॥ पीनाहो—यत्। शिलादिकल्पितकूपमुखबन्धननाम। 'वावियोनरिकट्टु'॥ पुष्करिण्यां—स्यात्। कृत्रिमजलाशयनाम॥ अखातं देवखातके। 'अखातो देवखातके' इति पुंस्काण्डे अमरदत्तः। देवनिर्मितजलाशयनाम॥ 'दोने'॥ २७॥

---

[1] अंश° A_1. [2] A_1 omits कूपोपरि°. [3] °दारु° A_1.

पद्माकरस्तटाकोऽस्त्री कासारः सरसी सरः॥ २८॥
वेशन्तः पल्वलं चाल्पसरो वापी तु दीर्घिका।

(वि.) पद्माकर इति—पद्मानामाकरः पद्माकरः। तटानि अकति कुटिलं यथा भवति तथा प्राप्नोतीति तटाकः। 'अक अग कुटिलायां गतौ'। प्रवाहेण तटानि ताडयतीति वा तडागः। 'तड आघाते'। पद्माकरनामनी॥ कम् उदकमासरत्यत्रेति [1]कासारः। 'सृ गतौ'। नड्वलाम्बुत्वात् [2]कासनं कुत्सनमियर्तीति वा। 'ऋ गतौ'। कासत इति वा। 'कासृ शब्दे'। सरति प्रवहतीति [3]सरसी। सरश्च। सान्तोऽयम्। 'सृ गतौ'। नड्वलवर्तिमहाजलाशयनामानि॥ विशन्ति महिषादयोऽस्मिन्निति वेशन्तः। 'विश प्रवेशने'। पलन्ति[4] महिषादयोऽत्रेति पल्वलम्। 'पल गतौ'। अल्पं च तत् सरश्च अल्पसरः। अल्पसरोनामानि॥ उप्यते पद्मादिकमस्यामिति [5]वापी। 'डुवप् [6]वीजतन्तुसंताने'। दीर्घेव[7] दीर्घिका। दीर्घचतुरश्रतया खातजलाशयनामनी॥ २८॥

---

[1] कुत्सितमासरतीति वा B_2. [2] कासः A. [3] स्त्रीलिङ्गः B_2. [4] K_1 adds गच्छन्ति. [5] वारि पीयतेऽत्र वापी, 'पा पाने' W_1. [6] Pt_2, A, B_1, T omit तन्तु°. [7] दैर्घ्यात् D_2; दीर्घेव W_2.

(पा.) पद्माकरः—अस्त्री। तडाग इति क्वचित् पाठः। 'पथि पथिकदृशां दत्तरागस्तडागः' इति धर्मशर्माभ्युदयः[1]॥ कासारः—सरः। सरोनामनी। पद्माकर-

शब्दो[2] रूढो यौगिकश्च[3]। तेन[4] पद्मशून्यमपि सरः पद्माकरः स्यात् ।। वेशन्तः—चाल्पसरः। अल्पसरोनामानि ।। वापी—दीर्घिका। दीर्घचतुरश्रतया निखातजलाशयनामनी। 'केलाकूलि' ।। २८ ।।

[1] °भ्युदये B_3.
[2] A_1, B_4 add गवादिशब्दवत्.
[3] A_1, B_1 add भवति.
[4] तस्मात् A_1.

खेयं तु परिखाधारस्त्वम्भसां यत्र धारणम् ।। २९ ।।
स्यादालवालमावालमावापोऽथ नदी सरित् ।
तरङ्गिणी शैवलिनी तटिनी ह्रादिनी धुनी ।। ३० ।।
स्रोतस्विनी द्वीपवती स्रवन्ती निम्नगापगा ।
(कूलंकषा निर्झरिणी रोधोवक्रा सरस्वती)

(वि.) खेयमिति—खन्यत इति खेयम्। 'खनु अवदारणे'। परितः खन्यत इति परिखा। दुर्गवेष्टनखनिकानामनी ।। [1]आध्रियन्त [2]आपोऽत्र आधारः। 'धृञ् धारणे'। [3]अम्भोधारणगर्तनाम ।। आलूयते खन्यतेऽत्रेति आलवालम्। 'लूञ् छेदने'। आवलतेऽम्भोऽत्रेति आवालम्। 'वल संवरणे [4]संचरणे च'। आ समन्तादुप्यन्तेऽम्भां[5]स्यत्रेति आवापः। 'डुवप् बीजतन्तुसंताने'। [6]सेकार्थं तरुं परितः [7]कृतजलाधारनामानि ।। नदति जलवेगेनेति नदी। 'णद अव्यक्ते शब्दे'। सरतीति सरित्। 'सृ गतौ'। तरङ्गा अस्यां सन्तीति तरङ्गिणी। शैवलमस्यामस्तीति शैवलिनी। [8]तटमस्या अस्तीति तटिनी। ह्रादोऽव्यक्तशब्दोऽस्यामस्तीति [9]ह्रादिनी। ह्रादुनीति वा पाठः। धुनोति [10]पापमिति धुनी। 'धूञ् कम्पने'। स्रोतोऽस्यामस्तीति स्रोतस्विनी। [11]द्वीपानि सन्त्यस्यामिति द्वीपवती। स्रवति गिरिभ्य इति स्रवन्ती। 'स्रु [12]गतौ'। निम्नं गच्छतीति निम्नगा। 'गम्लृ गतौ'। अपां वेगः [13]आपम्। तेन गच्छतीत्यापगा। अपां समूहः आपम्। तेन गच्छतीति वा। नदीनामानि ।। २९–३० ।।

[1] आधीयन्ते W_2.
[2] जलं Pt_2.
[3] अम्बु° W_2.
[4] 'वल संचलने' B_1, T, Pt_2.
[5] आप: B_2.
[6] सेचनार्थं B_1, D_1.
[7] °सेतु° B_2.
[8] तटावस्यां स्त: D_2, K_1, K_2, W_1.
[9] ह्रदिनी B_1, W_2.
[10] आप: W_2; धुनोति वातेन Pt_2.
[11] द्वीपा: B_1, W_2, Y.
[12] 'स्रु स्रवणे' A, B_1, Pt_2.
[13] आप: A, B_1, T.

(पा.) खेयं—परिखा। सालपरिवेष्टनखातिकानामनी। 'अगडिते'। खातिकेति प्रौढप्रयोगः। 'यज्जेतुमेतामिव खातिकाम्भश्छायाच्छलात् क्रामति नागलोकम्'। इति

धर्मशर्माभ्युदयः (१. ६२) ॥ आधारः—धारणम् । यस्मिन् कस्मिन् [1]देशे शाल्यादिसस्यसंवर्धनायोदकं[2] प्रतिबद्धं स आधारः स्यात्। ‘सेतु’ ‘कत्तुव’॥ स्यादालवालम्—आवापः। वृक्षलतादेर्जलसेचनार्थं निबद्धसेतुनामानि[3]। ‘चेट्ल पादुकुचेसिन कुदुरु’। आधारशब्दोऽत्रापि संपद्यते। ‘आधारबन्धप्रमुखैः प्रयत्नैः संवर्धितानां सुतनिर्विशेषम्’ इति रघुवंशे (५. ६)। अथ नदी—आपगा। आपं [4]समुद्रं गच्छतीत्यापगेति व्युत्पत्त्या आपशब्दः समुद्रपर्यायः। नदीनामानि ॥ अनुक्तम्—

‘कूलंकषा निर्झरिणी रोधोवक्त्रा पयस्विनी ।
स्रोतोवहा च ह्रदिनी ॥’

एतानि च ॥ २९–३० ॥

[1] °चित् प्रदेशे A_1. [2] संवर्धनार्थं A_1. [3] °देश° B_3, B_4. [4] A_1 omits.

गङ्गा विष्णुपदी जह्नुतनया सुरनिम्नगा ॥ ३१ ॥
भागीरथी त्रिपथगा त्रिस्रोता भीष्मसूरपि ।

(वि.) गङ्गेति—[1]हरशिरसः गां भुवं गता गङ्गा। हरिचरणात् भूमिं गता वा। विष्णुपदोत्था [2]विष्णुपदी। [3]जह्नोस्तनया जह्नुतनया। जाह्नवी च। सुराणां निम्नगा[4] सुरनिम्नगा। भगीरथस्यापत्यं, तस्येयमिति वा भागीरथी[5]। त्रयाणां पथां समाहारस्त्रिपथम्। तेन गच्छतीति त्रिपथगा[6]। त्रीणि स्रोतांसि यस्याः सा त्रिस्रोताः। भीष्मं [7]सूयते भीष्मसूः। ‘षूङ् प्राणिप्रसवे’। [8]गङ्गानामानि ॥ ३१ ॥

[1] हरोत्तमाङ्गात् B_1, D_1, U, Y, W_2; हरेरीशाङ्गं गता D_2; हरिचरणात् गां भूमिं Pt_2. [2] विष्णोः पदमस्या अस्तीति B_2; विष्णुपदे तिष्ठति U. [3] राजर्षेः B_2. [4] D_2, K_1 add नदी. [5] भगीरथेन राज्ञा भूलोकमवतारितेति Pt_2; भगीरथेन आनीता K_5. [6] स्वर्गमर्त्यपातालमार्गेषु त्रिषु गच्छतीति Pt_2. [7] सूते D_2, K_1, K_3, Pt_2. [8] भागीरथीनामानि D_1, K_3, U, W_1.

(पा.) गङ्गा—भीष्मसूरपि । गङ्गानामानि। ‘घर्मद्रवी हैमवती त्रिमार्गा हरशेखरा’। [1]एतानि च ॥ ३१ ॥

[1] A_1 adds चत्वारि.

कालिन्दी सूर्यतनया यमुना शमनस्वसा ॥ ३२ ॥
रेवा तु नर्मदा सोमोद्भवा मेखलकन्यका ।

(वि.) कालिन्दीति—कलिन्दपर्वतोद्भवा[1] कालिन्दी। सूर्यस्य तनया सूर्यतनया। यमेन [2]यमलजा यमुना। शमनस्य यमस्य स्वसा शमनस्वसा। यमुनानामानि॥ रेवते [3]विन्ध्याद्रौ रेवा। 'रेवृ गतौ'। नर्म केलिं ददातीति नर्मदा[4]। 'डुदाञ् दाने'। सोम[5] उद्भवो यस्याः सा सोमोद्भवा। [6]सोमवंशजेन पुरूरवसा भुवं प्रत्यवतारिता वा। मेखलाद्रेः[7] कन्यका, उद्भवत्वात्, मेखलकन्यका। नर्मदानामानि॥ ३२॥

[1] °पर्वताज्जाता Pt_2. [2] सह जाता Pt_2. [3] विन्ध्यसमीपे D_1. [4] नर्म विलासं (केलिं D_2, K_3, U) पुरूरवसे ददाति B_1. [5] सोमात् D_2, U. [6] Pt_2 adds the line. [7] मेकलोऽद्रिः तस्य कन्यका W_2.

(पा.) कालिन्दी—शमनस्वसा। यमुनानामानि॥ रेवा तु—मेखलकन्यका। नर्मदानामानि॥ ३२॥

करतोया सदानीरा बाहुदा सैतवाहिनी॥ ३३॥
शतद्रुस्तु शुतुद्रिः स्याद् विपाशा तु विपाट् स्त्रियाम्।

(वि.) करतोयेति—[1]ईश्वरस्य करतोयाज्जाता [2]करतोया। सदा नीरमस्यामिति सदानीरा। गौरीप्रदाने [3]शर्वकरजलजातनदीनामनी॥ [4]बाहुबलं ददातीति बाहुदा। बहुदेन कार्तवीर्येणावतारितत्वाद् वा। सितमम्बु वहतीति सितवाहिनी। सितवाहिन्येव सैतवाहिनी[5]। कार्तवीर्यावतारितनदीनामनी॥ पुत्रशोकार्तं शिलां बध्वा प्रविष्टं वसिष्ठं दृष्ट्वा भयात् शतधा द्रवतीति शतद्रुः। शु शोभनं यथा पापं तुदतीति [6]शुतुद्रिः। 'तुद व्यथने'। पुत्रशोकाकुलवसिष्ठप्रविष्टनदीनामनी[7]॥ विगताः पाशा यत्र विपाशा। विपाट् च। विपाशानदीनामनी॥ ३३॥

[1] D_1, W_2 add गौरीविवाह(विहार B_1, U, Y) समये. [2] K_1 omits 3 lines. [3] ईश्वर° B_2, K_5. [4] बाहुजलं ददाति D_1; बहुबलं B_1. [5] सितवाहिनीति वा पाठः B_1; शीतवाहिनीति पाठे शीतम् अम्बु वहतीति शीतवाहिनी K_5. [6] शुतुद्रुः D_2; शितद्रुः A. [7] वसिष्ठमृतिभयात् D_2, I.

(पा.) करतोया सदानीरा। करतोयाख्यनदीनामनी॥ बाहुदा सैतवाहिनी। प्रज्ञादित्वादण्[1] (५. ४. ३८)। बाहुदाख्यनदीनामनी॥ शतद्रुस्तु शुतुद्रिः स्यात् शतद्रुनदीनामनी॥ विपाशा तु—स्त्रियाम्। विपाशाख्यनदीनामनी॥ ३३॥

[1] 'प्रज्ञादिभ्यश्च' इति स्वार्थेऽण्प्रत्ययः B_3.

शोणो हिरण्यवाहः स्यात् कुल्याल्पा कृत्रिमा सरित् ॥ ३४ ॥
शरावती वेत्रवती चन्द्रभागा सरस्वती ।
कावेरी सरितोऽन्याश्च संभेदः सिन्धुसंगमः ॥ ३५ ॥

(वि.) शोण इति—शोणतीति शोणः । 'शोणृ वर्णगत्योः' । हिरण्यं वहतीति हिरण्यवाहः । 'वह प्रापणे' । [1]शोणनदनामनी ॥ कुल्यते कुल्या[2] । 'कुल संस्त्याने बन्धुषु च' । नदीमातृकक्षेत्रसेकाय अल्पकृत्रिमसरिन्नाम ॥ [3]शराः तृणविशेषा अत्र सन्तीति शरावती । वेत्रा[4] वेणुवलयाः सन्त्यस्यामिति वेत्रवती । चन्द्रभागाभ्यां गिरिभ्यां जाता चन्द्रभागा । चन्द्रेण[5] भागतो न्यस्ता वा । सरांस्यत्र सन्तीति सरस्वती । [6]सरासि प्रवहतीति वा । कवेराद्रेर्जाता कावेरी[7] । कवेरस्य राज्ञोऽपत्यं स्त्रीति वा । एतानि प्रत्येकं नदीविशेषनामानि ॥ अन्याश्च कृष्णवेण्यादयः सरितः सन्ति । ग्रन्थकारेणात्र ग्रन्थविस्तरभयान्नोक्ताः ॥ संभिद्यन्ते संगच्छन्ते [8]सरितोऽत्र परस्परमिति संभेदः । 'भिदिर् विदारणे' । सिन्ध्वोः संगमः सिन्धुसंगमः । अनेकसिन्धुसंगमनाम ॥ ३४–५ ॥

[1] शणदत्तनदीनाम W_1. [2] कोलति संस्त्यायतीति Pt_2. [3] शराख्यः तृणविशेषः Pt_2. [4] वेत्रा वेणवः B_1, K_5, U; वेत्रयोगात् Pt_2. [5] चन्द्र इति गिरिविशेषनाम A; चन्द्रस्य भागोंऽशः अस्याः W_1. [6] सरति, 'सृ गतौ' D_2, U, W_1. [7] कवेराज्जाता Y. [8] नद्यः Pt_2.

(पा.) शोणो—स्यात् । [1]शोणनदीनामनी ॥ कुल्या—सरित् । कृतकाल्पनदी कुल्या स्यात् । 'कालुव' ॥ शरावती वेत्रवती चन्द्रभागा । अस्य सुभूतिटीकायां चातूरूप्यमभिहितम् । चन्द्रभागा, चन्द्रभागी, चान्द्रभागा, चान्द्रभागीति ॥ सरस्वती—अन्याश्च । शरावत्यादयः पञ्च । तुङ्गभद्रा गोदावरी कृष्णवेण्यादयोऽन्याश्च नद्यः[2] ॥ संभेदः सिन्धुसंगमः । नदीसंगमनाम ॥ ३४–५ ॥

[1] °नद° A_1. [2] B_3, B_4 add स्युः.

द्वयोः प्रणाली पयसः पदव्यां त्रिषु तूत्तरौ ।
देविकायां सरय्वां च भवे दाविकसारवौ ॥ ३६ ॥
सौगन्धिकं तु कह्लारं हल्लकं रक्तसंध्यकम् ।

(वि.) द्वयोरिति—[1]प्रणलत्यम्भोऽनया प्रणाली । 'णल गतौ' । प्रणाल इति वा पाठः । प्रासादादौ निर्मितजलमार्गनाम ॥ उत्तरे पदे त्रिषु वर्तेते । देविकायां भवः

[2]दाविकः। सरय्वां भवः [3]सारवः। देविकासरयूद्भववस्तुनः[4] क्रमेण नामनी ॥ शोभनः[5] गन्धः प्रयोजनमस्य सौगन्धिकम्। के जले ह्लादते कह्लारम्। '[6]ह्लादी सुखेऽव्यक्ते शब्दे च'। [7]ईषद्रक्तवर्णपरिमलबहुलोत्पलनामनी ॥ [8]हल्लति भ्रमरोऽत्रेति हल्लकम्। 'हल्ल भ्रमणे'। रक्तं [9]संध्यावत् रक्तसंध्यकम्। रक्तोत्पलनामनी ॥ ३६ ॥

[1] W_1 adds गच्छतीति. [2] दाविकं D_2, W_1. [3] सारवम् B_1, T. [4] °वस्तूनां A. [5] K_3 adds पुष्पेषु; सुगन्धि A, B_1, T; सुगन्धः K_3, K_5, W_1, Pt_2. [6] 'ह्लाद आह्लादने' B_2, K_2. [7] °पर्ण° W_1. [8] K_5 adds भ्रमति. [9] संध्यावत् रक्तवर्णत्वात् B_1, K_5, W_2.

(पा.) द्वयोः—पदव्याम्। [1]हर्म्यादेः [2]प्रवहत्सलिलवर्त्मनाम। द्वयोरित्यनेनाल्पानल्पविभागाल्लिङ्गविभागः प्रणाली प्रणाल इति ॥ त्रिषु—दाविकसारवे। [3]देविकानदीविशेषे भवं दाविकं स्यात्। [4]सरयूनदीविशेषे भवं सारवं स्यात्। तदुभयं त्रिलिङ्गम् ॥ अनुक्तम्—'समुद्रियं स्यादप्यं च समुद्रेऽप्सु भवे क्रमात्'। [5]समुद्रे भवं समुद्रियम्। अप्सु भवमप्यम् ॥ त्रिषु तूत्तरे इत्यनेन त्रिलिङ्गौ ॥ सौगन्धिकं—रक्तसंध्यकम्। अल्परक्तपरिमलाधिकोत्पलनामानि ॥ भाषया 'चेंगलुव' ॥ ३६ ॥

[1] हर्म्यादौ A_1. [2] प्रविशत्° A_1, B_3. [3] देविकायां नद्यां B_3. [4] सरय्वां नद्यां B_3. [5] समुद्रेभवाप्सुभवयोरर्थयोः समुद्रियाप्यशब्दौ वर्तेते A_1.

स्यादुत्पलं कुवलयमथ नीलाम्बुजन्म च ॥ ३७ ॥
इन्दीवरं च नीलेऽस्मिन् सिते कुमुदकैरवे।

(वि.) स्यादिति—[1]उद् ऊर्ध्वं पलति गच्छतीति उत्पलम्। 'पल गतौ'। [2]कौ वलत इति कुवलयम्। 'वल[3] संवरणे'। कुत्सितो वलयो पत्रसंवेष्टनमत्रेति वा। उत्पलमात्रनामनी ॥ अम्बुनि जन्मास्येति अम्बुजन्म। नीलं च तदम्बुजन्म च। इन्दतीति इन्दी लक्ष्मीः। 'इदि परमैश्वर्ये'। तया व्रियत इति [4]इन्दीवरम्। 'वृञ् वरणे'। पुष्पेषु इन्दतीति वा। [5]नीलोत्पलनामनी ॥ कौ भूमौ मोदत इति कुमुदम्। 'मुद हर्षे'। के जले [6]रौतीति केरवः हंसः। तस्येदं प्रियमिति कैरवम्। सितोत्पलनामनी ॥ ३७ ॥

[1] उत्पलतीति B_1, T. [2] B_1 adds भुवि. [3] 'वल संचलने' B_1, T. [4] इन्द्रियाणि वृणोति आह्लादकत्वेनाच्छादयतीति वा W_1. [5] नीलाम्बुजन्मेति स्पष्टोऽर्थः I, U. [6] रवोऽस्य I; रतोऽस्य B_1.

(पा.) स्यादुत्पलं कुवलयम्। उत्पलमात्रनामनी। 'कलुव'॥ 'कुवेलं कुवलं च तत्'। एतें द्वे च॥ अथ नीलाम्बुजन्म—नीलेऽस्मिन्। नीलोत्पलनामनी॥ 'दोलाभमपि [1]कन्दोट्टम्'। एते द्वे च॥ सिते—कैरवे। सितोत्पलनामनी॥ अनुक्तम्—'रक्तेऽस्मिन् [2]रक्तमण्डलम्'। अतिरक्तोत्पलनाम॥ ३७॥

[1] कन्दोष्ठं B_3. [2] रक्तकुण्डलम् B_4.

शालूकमेषां कन्दः स्याद् वारिपर्णी तु कुम्भिका॥ ३८॥
जलनीली तु शैवालं शैवलोऽथ कुमुद्वती।
कुमुदिन्यां नलिन्यां तु बिसिनीपद्मिनीमुखाः॥ ३९॥

(वि.) शालूकमिति—शलत इति शालूकम्। 'शल चलनसंवरणे'। उत्पलादिकन्दनाम॥ वारि पिपर्ति आच्छादयतीति वारिपर्णी। 'पॄ पालनपूरणयोः'। वारिणि पर्णान्यस्या इति वा। वारि कुम्भयतीति कुम्भिका[1]। 'कुभि आच्छादने'। [2]कुम्भिक इति वा पाठः। [3]जलोपरिस्थितलतारूपशाकनामनी[4]॥ जले [5]नीली जलनीली। जले शेते शैवालम्। शैवलं च। 'शीङ् स्वप्ने'। [6]शैवलनामानि॥ कुमुदान्यस्याः सन्तीति कुमुद्वती। कुमुदिनी च। कुमुद्वद्दीर्घिकानामनी॥ नलमस्यामस्तीति नलिनी। बिसमस्यामस्तीति बिसिनी। एवं पद्मिन्यादीनि कुमुदिनीवत्[7]॥ ३८–९॥

[1] W_1, Pt_2 add केन जलेन उभ्यत इति कुम्भिका, 'उभ पूरणे'. [2] वारिपर्णस्तु कुम्भिकः इति वा पाठः A, B_1, T. [3] जले पर्यस्तस्वल्पशैवालनामानि W_1. [4] °वलयरूप° B_2, T. [5] नीलिका D_2. [6] शैवाल I, U, W_1. [7] K_1 ends here.

(पा.) शालूकम्—कन्दः स्यात्। सौगन्धिकादीनां कन्दः शालूकं स्यात्॥ वारिपर्णी—कुम्भिका। तोये पर्यस्तलतारूपशैवलनामनी। 'अन्तर्वजल्लि'॥ जलनीली—शैवलः। शैवालनामानि। शेवालमित्यप्यस्ति। 'शेवालमपि[1] शैवालं जलशूकश्च नीलिका' इति हलायुधः (अ. मा. ३. ६१)। शिफालमिति [2]शैवलविशेषः। 'शिफालं[3] शैवलं यद्धि चूर्णाभं लोहितं जले' इति वैजयन्ती (पृ. १५३, श्लो. ४९)॥ अथ—कुमुदिन्याम्। कुमुदस्तम्बनाम॥ नलिन्यां—पद्मिनीमुखाः। पद्मस्तम्बनामानि। पद्मवत्सरोनामान्यपि भवन्ति। 'बिसिनीपद्मिनीत्याद्याः पद्मस्तम्बे सरस्यपि' इति वैजयन्ती (पृ. १५३, श्लो. ४३)॥ ३८–९॥

[1] 'शेवालं शैवलं प्रोक्तं जलशूकं च नीलिका' इति मुद्रितग्रन्थे. [2] नीलिका° B_3.
[3] शैवालं चाथ शीवालं चूर्णाभं लोहितं जले' इति मुद्रितपुस्तके.

वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम् ।
सहस्रपत्रं कमलं शतपत्रं कुशेशयम् ॥ ४० ॥
पङ्केरुहं तामरसं सारसं सरसीरुहम् ।
बिसप्रसूनराजीवपुष्कराम्भोरुहाणि च ॥ ४१ ॥

(वि.) वा पुंसीति—पद्यतेऽत्र लक्ष्मीरिति पद्मम्[1]। 'पद्‌ऌ गतौ'। नल्यते [2]बध्यते चन्द्रेणेति नलिनम्। 'णल बन्धने'[3]। अरान् केसरान् विन्दतीति अरविन्दम्। 'विद्‌ऌ लाभे'। महच्च तदुत्पलं च महोत्पलम्। सहस्रं पत्राणि यस्य तत् सहस्रपत्रम्। केन जलेन[4] मल्यत इति कमलम्। 'मल[5] धारणे'। शतं पत्राणि यस्य तत् शतपत्रम्। कुशे जले शेत इति कुशेशयम्; 'शीङ् स्वप्ने'। पङ्के रोहतीति पङ्केरुहम्। 'रुह बीजजन्मनि प्रादुर्भावे च'। ताम्यति रसति चेति तामरसम्[6]। 'तमु ग्लानौ', 'रस आस्वादने'। ताम्यद्भिः रस्यत इति वा। सरसि भवं सारसम्। सरस्यां रोहतीति सरसीरुहम्। बिसस्य प्रसूनं बिसप्रसूनम्[7]। राज्योऽस्य सन्तीति राजीवम्[8]। पुष्णातीति पुष्करम्। 'पुष पुष्टौ'। [9]अम्भसि रोहतीति अम्भोरुहम्। पद्मनामानि ॥ ४०–१ ॥

[1] पद्यते लक्ष्म्या सेव्यते, 'पद्‌ऌ सेवायाम्' B_1, D_1, K_5, U; 'पद गतौ' W_1.
[2] भिद्यते D_1, I, K_5; खिद्यते A, B_1, T. [3] 'णल गन्धने', गन्धनं भेदः A, B_1, T.
[4] वारिणा I; कं जलमलति भूषयतीति, 'अल भूषणे' Pt_2.. [5] 'मल मल्ल धारणे' B_1, T.
[6] तामः प्रकर्षो रसोऽस्य Pt_2. [7] बिसं प्रसूनमस्य A, B_1. [8] केसरराजियोगात् Pt_2.
[9] शेषं स्पष्टम् A, T.

(पा.) वा पुंसि—अम्भोरुहाणि च। पद्मनामानि। 'सरसिजमप्सुजमब्जं सरोजमिन्दीवरं बिसजम्'। एतानि च ॥ ४०–१ ॥

पुण्डरीकं सिताम्भोजमथ रक्तसरोरुहे ।
रक्तोत्पलं कोकनदं नालो नालमथास्त्रियाम् ॥ ४२ ॥
मृणालं बिसमब्जादिकदम्बे षण्डमस्त्रियाम् ।

(वि.) पुण्डरीकमिति—पुणति मङ्गलत्वात् पुण्डरीकम् । ‘पुण कर्मणि शुभे’। सितं च तदम्भोजं च सिताम्भोजम् । सितपद्मनामनी[1] ॥ रक्तं च तत् सरोरुहं च रक्तसरोरुहम् । रक्तं च तदुत्पलं च रक्तोत्पलम् । कोकाः [2]चक्रवाका नदन्त्यस्मिन्निति [3]कोकनदम् । रक्तपद्मस्य रक्तोत्पलस्य च नामानि ॥ नल्यते बध्यते पुष्पेणेति नालः। नालं च[4] । ‘णल बन्धने[5]’। पद्मादिदण्डाकारवृन्तनामनी ॥ मृण्यते भक्ष्यत इति मृणालम् । ‘[6]मृण तर्षणे’, ‘मृण हिंसायां’ इति वा धातुः । बिस्यन्ते उत्सृज्यन्ते तन्तवोऽत्र भक्षणसमय इति बिसम् । ‘बिस उत्सर्गे’ । [7]पद्मकन्दोपरिस्थितभक्ष्यनामनी ॥ भ्रमरेभ्यो रसं सनोतीति षण्डः । ‘षणु दाने’ । अब्जादिसमूहनाम ॥ ४२ ॥

---

[1] सितपुण्डरीकनाम U. [2] चक्राः K_3. [3] B_1, D_1 add ‘णद अव्यक्ते शब्दे’. [4] नाला इति स्त्रीलिङ्गत्वमपि W_2. [5] ‘नल गन्धने’ A, T. [6] ‘मृण तर्पणे’ D_2, K_5, U. [7] B_1, D_2, K_5, W_2 add तन्तूनामुत्सृष्टत्वात् .

(पा.) पुण्डरीकं सिताम्भोजम् । सितारविन्दनामनी[1] ॥ अथ—कोकनदम् । शोणाम्बुजनामानि ॥ ‘कन्दादं खरदण्डं च बिसखण्डं च तद्भवेत्’। इत्येतानि च॥ नालो नलम् । कमलनालो नलमित्युच्यते ।

‘[2]स्तनतापशून्यमवनम्रनलं बिसपत्रमत्र कुसुमास्तरणे ।
किमुतोज्झितान्यमनसा [3]विगुणी सुरयोषिता विरहवल्लरिका[4] ॥’

इति राघवपाण्डवीये (द्विसं. १२. १८) ॥ अथास्त्रियां—बिसम् । [5]तामरसमूलनामनी । ‘तामेरपेल्लु’ ॥ अब्जादिकदम्बे—अस्त्रियाम् । अब्जादिकदम्बं[6] षण्डः स्यात् । अब्जषण्डः, कुमुदषण्डः । ‘षण्डः स्याद्विट्चरेऽब्जादिकदम्बे षण्डमस्त्रियाम्’ इति रुद्राभिधानकोशान्मूर्धन्यादिः[7] । ‘शडि रुजायां संघाते च’। शण्डत इति शण्डः। पद्मशण्डः—इति धातुप्रदीपात् तालव्यादिः ॥ ४२ ॥

---

[1] अम्भोरुह° B_1. [2] सून for शून्य in the printed text. [3] विगुणा in the printed text. [4] °वल्लकिका in the printed text. [5] पद्म° B_3, B_4. [6] समूहः A_1, B_3. [7] A_1 omits कोशात् .

करहाटः शिफा कन्दः किञ्जल्कः केसरोऽस्त्रियाम् ॥ ४३ ॥
संवर्तिका नवदलं बीजकोशो वराटकः ।

इति वारिवर्गः

(वि.) करहाट इति—कं जलम् उपरिवर्तनाद् रहयन्तीति करहाः पद्मादयः। 'रह त्यागे'। तानि प्रतिदिनम् अभिवृत्याटतीति करहाटः। 'अट पट गतौ'। करं घ्नन्तीति करहाः मीनाः, तैरट्यते प्राप्यत इति वा। शिनोति क्ष्मां शिफा। 'शिञ् निशातने'। कन्दति भक्षणार्थं मत्स्यादिरिति कन्दः[1]। 'कदि आह्वाने रोदने च'। पद्मादिमूलनामानि ॥ किंचित् जलति जडीभवतीति किञ्जल्कः। 'जल घातने[2]'। के जले सरतीति केसरः। 'सृ गतौ'। केसरनामनी ॥ संवर्तयति वेष्टयतीति संवर्तिका। 'वृतु वर्तने'। नवोत्पन्नं दलं नवदलम्। [3]नवदलनामनी ॥ बीजानां पद्माक्षाणां कोशः आकरो बीजकोशः। वरं श्रेष्ठं पद्ममटतीति वराटकः। 'अट पट गतौ'। बीजकोशनामनी ॥ ४३ ॥

इति अमरकोशपदविवृतौ[4] वारिवर्गः

[1] कन्द्यते कन्दः B_1, B_2, K_5. [2] जघन्ये B_1, B_2; घात्ये T. [3] T, W_1 add पद्मादीनां.
[4] वारिवर्गनामलिङ्गविवेचनम् I.

(पा.) करहाटः—कन्दः। [1]पद्मादिमूलनामानि। 'दानिगद'। किञ्जल्कः—अस्त्रियाम्। केसरनामनी। अब्जादिकदम्बे षण्डमस्त्रियामिति विशेषविधिरब्जमात्रविषयः। 'अभूदलिविलासिनीलुलितकेसरं केसरम्' इति प्रपञ्चयन्ति ॥ संवर्तिका नवदलम्। पद्मनूतनदलं संवर्तिका स्यात् ॥ बीजकोशो वराटकः। पद्मबीजकोशो वराटकः स्यात् ॥ ४३ ॥

इति वारिवर्गः

[1] A_1 adds ग्रन्थि° after पद्मादि.

काण्डसमाप्तिः

उक्तं स्वर्व्योमदिक्कालधीवाक्छब्दादि नाट्यकम्।
पातालभोगिनरकं वारि चैषां च संगतम् ॥ ४४ ॥
इत्यमरसिंहकृतौ नामलिङ्गानुशासने।
स्वरादिकाण्डः प्रथमः साङ्ग एव समर्थितः ॥ ४५ ॥

इति श्रीमदमरसिंहकृते नामलिङ्गानुशासने प्रथमकाण्डः

(वि.) अथ काण्डसमाप्तिं चिकीर्षुः अमरसूरिः एतत्काण्डोक्तवर्गान् संक्षेपेणाह—उक्तमिति । स्वः स्वर्गः व्योम आकाशः दिशश्च कालश्च वाचश्च शब्दादिश्च । आदिना रसगन्धादिः गृह्यते । [1]नाट्यकं तत्संबन्धि गीतवाद्यादिकमुच्यते । पाताल-भोगिनरकं वारि च । द्वन्द्वैकवद्भावः । उक्तमित्यनेनान्वयः । एषां [2]यत्संगतं स्वर्गे देवतादि, दिशि दिग्गजादि, काले उपरागादि, धीसंगतं विचारादि, वाचि श्रुत्यादि, शब्दे उदात्तादि, नाट्ये भ्रकुंसादि, पाताले कुहरादि, भोगिनि कञ्चुकादि, नरके पीडाबाधादि, वारिणि नौकापद्मोत्पलादि, एतत् सर्वमुक्तमस्मिन् काण्डे इत्यर्थः ॥ ४४–५ ॥

इति वंगलभट्टोपाध्यायसूरिसुतलिङ्गयसूरिविरचितायाममरकोशपदविवृतौ
प्रथमकाण्डः समाप्तः

[1] सनाट्यकं नाट्यवर्गेण सहितं K_5, U.

[2] प्रसक्त्या संगतं देवासुरसुधादिकं D_2, I, K_5.

(पा.) उक्तं—समर्थितः ॥ ४४–५ ॥

इति [1]श्रीवत्सनृसिंहसूरिसुतमल्लिनाथसूरिविरचितेऽमरपदपारिजाते प्रथमकाण्डः

[2]श्रीवत्सान्वयमान्येन मल्लिनाथेन निर्मिते ।
व्याख्यानेऽमरसिंहस्य प्रथमः काण्ड उम्भितः ॥
चकोरैरत्यन्तं परिदलितशालीनकिरणः
प्रकुप्यद्राहूद्यद्द्विषशिखिशिखाशोषिततनुः ।
पुरारातेर्भूषा कुवलयविकासेन किमभू-
न्ममाप्येष ग्रन्थो भवति जगदानन्दजनकः ॥

[1] °नरसिंह° A_1.

[2] verses in A_1.

द्वितीयकाण्डः

वर्गभेदाः

वर्गाः पृथ्वीपुरक्ष्माभृद्वनौषधिमृगादिभिः ।
नृब्रह्मक्षत्रविट्शूद्रैः साङ्गोपाङ्गैरिहोदिताः ॥ १ ॥

(वि.) एवं प्रथमकाण्डं परिसमाप्य द्वितीयकाण्डे वक्ष्यमाणवर्गान् संग्रहेण वक्ति वर्गाः पृथ्वीतिश्लोकेन । पृथ्वी च पुरं च क्ष्माभृच्च वनौषधिश्च मृगादिश्च, तैरिह काण्डे पृथ्वीप्रभृतिभिः नृब्रह्मक्षत्रविट्शूद्रैः साङ्गोपाङ्गैः, अङ्गप्रत्यङ्गसहितैः वर्गा [1]उदिताः वक्तुमुपक्रान्ताः ॥ १ ॥

---

[1] उदिता आरब्धाः F_2; अथ भौमादिद्वितीयकाण्डमारभते F_1.

१. भूमिवर्गः

भूर्भूमिरचलानन्ता रसा विश्वंभरा स्थिरा ।
धरा धरित्री धरणिः क्षोणिर्ज्या काश्यपी क्षितिः ॥ २ ॥
सर्वंसहा वसुमती वसुधोर्वी वसुंधरा ।
गोत्रा कुः पृथिवी पृथ्वी क्ष्मावनिर्मेदिनी मही ॥ ३ ॥
(*विपुला गह्वरी धात्री गौरिला कुम्भिनी क्षमा ।
भूतधात्री रत्नगर्भा जगती सागराम्बरा ॥)

(वि.) भूरिति—[1]भवति सर्वमस्यामिति भूः । 'भू सत्तायाम्' । ऊकारान्तोऽयं स्त्रीलिङ्गः । अव्ययं तु रेफान्तः । अस्यामिदम् अभूदिति [2]भूमिः । न चलतीत्यचला । 'चल [3]कम्पने' । न विद्यतेऽन्तो यस्याः सा अनन्ता । रस्यते आस्वाद्यत इति [4]रसा । 'रस आस्वादने' । रसतीति वा । 'रस शब्दे' । रसा अत्र सन्तीति वा । विश्वं

बिभर्तीति विश्वंभरा। ‘डुभृञ् [5]धारणपोषणयोः’। [6]स्थिरत्वात् स्थिरा। तिष्ठति सर्वमस्यामिति वा। ‘ष्ठा गतिनिवृत्तौ’। ध्रियते [7]नृपैरिति धरा। धरति विश्वमिति वा। ‘धृञ् धारणे’। [8]धरित्री धरणिश्च। क्ष्णौतीति क्षोणिः। क्षोणी च। ‘टुक्षु शब्दे’। जिनाति सर्वमस्यामिति ज्या। ‘ज्या वयोहानौ’। जिनाति[9] सर्वान् पार्थिवानिति वा। कश्यपस्येयं काश्यपी। क्षियन्ति निवसन्ति सर्वेऽस्यामिति क्षितिः। ‘क्षि निवासगत्योः’। सर्वं भारं सहत इति सर्वंसहा। ‘षह मर्षणे’। वसु धनमस्यामस्तीति वसुमती। वसु [10]दधातीति वसुधा। ‘डुधाञ् धारणपोषणयोः’। [11]ऊर्णूयते पर्वतैरित्युर्वी। ‘ऊर्णुञ् आच्छादने’। उरुत्वात् विस्तीर्णत्वाद्वा। वसु धारयतीति वसुंधरा। ‘धृ धारणे’। गोत्राः शैलाः[12] सन्त्यस्यामिति गोत्रा। तृणादिना [13]गवादीन् त्रायत इति वा। ‘त्रैङ्[14] पालने’। [15]कौति ध्वनतीति कुः। ‘कु शब्दे’। पृथुत्वात् पृथिवी। पृथ्वी च। पृथुना[16] वैन्येन सत्कृता वा। प्रथते वा। ‘प्रथ प्रख्याने’। क्षमते भारं क्ष्मा। ‘क्षमूष् सहने’। क्ष्मायते [17]विधूनयते नृपनाशायेति वा। ‘क्ष्मायी विधूनने’। [18]अव्यते नृपैरित्यवनिः। स्वयमवति प्रजा इति वा। ‘अव रक्षणे’। मधुकैटभदैत्यमेदोयोगात् मेदिनी[19]। ‘ञिमिदा स्नेहने’। मह्यत इति मही। ‘मह पूजायाम्’। महिर्वा। अत्र भूम्यवनिक्षितिक्षोणिमहिधरणिशब्दाः कृदिकारान्ताः। भूनामानि ।। २–३ ।।

---

* Additional verse in B_1, F_2.

[1] भवन्ति अस्याम् K_5. [2] K_5 adds ‘भुवः कित्’ इत्यौणादिको मिप्रत्ययः (उ. ४. ४५). [3] ‘चल संचलने’ W_2. [4] रसयुक्तत्वात् F_2. [5] ‘भृञ् भरणे’ B_1, K_6, Pt_2. [6] तिष्ठति सदा Pt_2. [7] शैलैः W_2. [8] धरतीति धरित्री F_2. [9] जिनाति सर्वं B_1, K_5; जिनाति परिभवति बाधादिति K_6, U. [10] धनं धत्ते B_1, K_5. [11] ऊर्णूयते आस्तीर्यते W_2. [12] पर्वताः F_2, Pt_2. [13] गाः B_1, W_2, Pt_2. [14] ‘त्रा रक्षणे’ F_1, K_6. [15] कायति, ‘कै शब्दे’ B_1, Pt_2; काले प्रतिध्वनिं करोति F_2. [16] पृथुचक्रवर्तिना Pt_2. [17] विधुनुते K_2. [18] अवति प्रजाः B_1, K_5, Pt_2. [19] मधुकैटभयोः मेदसा परिपूतत्वात् F_2; परिप्लुतत्वात् Pt_2.

(पा.) भूर्भूमिः—मही। भूमिनामानि। ‘महिः सर्वंसहा मही’ इति [1]वैजयन्तीपाठात् (पृ. ३५, श्लो. ३) महिशब्दोऽप्यस्ति। अनुक्तम्—

‘रत्नगर्भा [2]घनश्रोणिरुर्वरा सागराम्बरा।
दुर्दरा[3] गह्वरी धात्री भूतधात्र्यब्धिमेखला ।।
रत्नसूः कुम्भिनी विश्वा [4]धारिणी गौर्गिरिस्तनी ।।’

एतानि च ।। २–३ ।।

---

[1] ‘हेमा सर्वंसहा मही’ इत्येव मुद्रितग्रन्थे. [2] घनश्रोणी B_3. [3] दुर्धरा B_3. [4] धरणी B_3.

मृन्मृत्तिका प्रशस्ता तु मृत्सा मृत्स्ना च मृत्तिका ।
उर्वरा सर्वसस्याढ्या स्यादूषः क्षारमृत्तिका ॥ ४ ॥

(वि.) मृदिति—मृद्यते [1]कुलालादिभिरिति मृत् । [2]मृत्तिका च । 'मृद क्षोदे' । मृन्नामनी ॥ प्रशस्ता [3]मृत् मृत्सा मृत्स्ना च । [4]श्रेष्ठमृन्नामनी ॥ उर्वति क्षुधं हिनस्तीत्युर्वरा[5] । 'उर्वी हिंसायाम्' । सर्वसस्य[6]संपन्नभूनाम ॥ ऊषति बीजमित्यूषः । 'ऊष रुजायाम्' । क्षारा च मृत्तिका च क्षारमृत्तिका । क्षारमृत्तिकानामनी ॥ ४ ॥

[1] कुलालादिना W_2.
[2] 'मृदस्तिकन्' (५. ४. ३९) इति स्वार्थे मृत्तिका B_1, K_5; मृद्-शब्दः दकारान्तः स्त्रीलिङ्गः F_2.
[3] प्रशस्ता मृत्तिका K_3; 'सस्नौ प्रशंसायाम्' (५. ४ .४०) B_1, K_5.
[4] प्रशस्त° W_2.
[5] Pt_2 adds उरुं महान्तं वृणोति तदर्हत्वात्.
[6] °सस्याढ्य° F_2; °संपन्नाढ्य° K_5; संपादक° W_2.

(पा.) मृन्मृत्तिका । मृदो नामनी ॥ प्रशस्ता—मृत्तिका । प्रशस्तमृत्तिकानामनी । उर्वरा—आढ्या । सर्वसस्योत्पादकमृदो[1] नाम । स्यादूषः—मृत्तिका । क्षारमृत्तिकानाम[2] ॥ ४ ॥

[1] °मृदुर्वरा स्यात् A_1.
[2] °ऊषः स्यात् A_1.

ऊषवानूषरो द्वावप्यन्यलिङ्गौ स्थलं स्थली ।
समानौ मरुधन्वानौ द्वे खिलाप्रहते समे ॥ ५ ॥

(वि.) ऊषवानिति—ऊषोऽस्यास्तीत्यूषवान् । ऊषरश्च । द्वावप्यन्यलिङ्गौ । ऊषरक्षेत्रनामनी ॥ स्थलतीति[1] स्थलम् । [2]स्थली च । 'ष्ठल स्थाने' । अकृत्रिमोन्नतदेशनामनी ॥ [3]तृषया म्रियन्तेऽत्रेति मरुः । 'मृङ् प्राणत्यागे' । धन्वन्ति तृषयात्रेति धन्वा । 'धवि [4]गतौ' । [5]निर्जलदेशनामनी ॥ लाङ्गलेन न लिखितमिति खिलम् । 'लिख अक्षरविन्यासे' । खं लातीति वा । 'ला दाने' । [6]हलादिना न प्रहन्यत इत्यप्रहतम् । 'हन हिंसागत्योः' । इमौ शब्दौ विशेष्यनिघ्नौ । [7]अकृष्टदेशनामनी ॥ ५ ॥

[1] B_1, F_2, K_5 add चिरात् तिष्ठति.
[2] स्थलं स्थला इति वा पाठः J_2, K_6; जानपदेत्यादिना (४. १. ४२) ङीष् K_5.
[3] तृष्णया F_1, F_2.
[4] 'धन्व मरणे' B_1, K_6.
[5] °प्रदेश° F_2, J_2.
[6] लाङ्गलादिना K_6, Pt_2.
[7] अप्रतिहतदेश° K_6; °क्षेत्र° B_1-

(पा.) ऊषवान्—अन्यलिङ्गौ। [1]क्षारमृत्तिकावत्प्रदेशनामनी। विशेषणं विवक्षितं चेत् तौ द्वावप्यन्यलिङ्गौ। तदविवक्षितं चेत् नपुंसकावेव॥ ‘वर्षुकस्य किमपः कृतोन्नतेरम्बुदस्य परिहार्यमूषरम्’। इति शिशुपालवधे (१४. ४६)। स्थलं स्थली। भूतलनाभनी॥ समानौ—धन्वानौ। [2]निर्जलप्रदेशनामनी॥ द्वे—समे। [3]अकृष्टभूतलनामनी। ‘पाङुनेल’॥ ५॥

[1] वनप्रदेश° A_1. [2] निर्जलोन्नत° A_1. [3] A_1 adds हलेन.

त्रिष्वथो जगती लोको विष्टपं भुवनं जगत्।
लोकोऽयं भारतं वर्षं शरावत्यास्तु योऽवधेः॥ ६॥
देशः प्राग्दक्षिणः प्राच्य उदीच्यः पश्चिमोत्तरः।

(वि.) त्रिष्वथो इति—जंगम्यते[1] भृशं गच्छतीति जगती। जगच्च। गम्यते जनैरिति वा। ‘गम्लृ गतौ’। लोक्यते सर्वमस्मिन्निति लोकः। ‘लोकृ दर्शने’। विशन्त्यस्मिन्निति [2]विष्टपम्। ‘विश प्रवेशने’। सर्वमस्मिन्[3] भवतीति भुवनम्। लोकनामानि॥ भरतस्य राज्ञः इदं [4]भारतम्। वृष्यते सिच्यते मेघैरिति वर्षम्। ‘वृषु सेचने’। हिमवत्सेतुमध्यदेशनाम[5]॥ प्राचा[6] सहितो दक्षिणो देशः प्राच्यः। शरावतीनद्यवधिभूतपूर्वदक्षिणदेशनाम॥ उदीच्या सहितः पश्चिमो देशः उदीच्यः। उदीच्यां भवः उदीच्यः। पश्चिमेन सहितः उत्तरो देशः पश्चिमोत्तरः। शरावतीनद्यवधिभूतपश्चिमोत्तरदेशनामनी॥ ६॥

[1] जं भृशं गम्यते जनैरत्र B_1, K_6; B_1, K_5 add प्रलयकाले. [2] विष्टपतीति, ‘ष्टप स्तप प्रतिघाते’ B_1, K_3. [3] अस्मात् K_6; F_2 adds ‘भू सत्तायाम्’. [4] जम्बूद्वीपस्य नवांशः भरतस्य क्षत्रियस्येदं B_1, K_5. [5] °नामनी B_1, K_6, W_2. [6] प्राच्या K_6.

(पा.) त्रिषु। अत्र त्रिष्वित्यनेन खिलशब्दानुपदोक्ताप्रहतशब्द एव[1] परामृश्यते। खिलं नपुंसकमेव। ‘[2]खिलमप्रहता भूमिः’ इति हलायुधः (अ. मा. २. ३)। अनुक्तम्—‘नारट्टः स्फुटिता भूमिः’। स्फुटितभूमिर्नारट्टः स्यात्। ‘बिटिकेनेल’। ‘जन्तुप्राया कचङ्गला’। जन्तुभूयिष्ठा भूमिः कचङ्गला स्यात्। अथो जगती—विष्टपम्। ‘विष्टपलोकौ नरौ’ इति रत्नकोशमतात् पुंलिङ्गश्च। भुवनं जगत्। लोकसामान्यनामनी॥ लोको—वर्षम्। असौ लोको भारतं च वर्षं च स्यात्। इदमा प्रत्यक्षजम्बूद्वीपः[3] परामृश्यते।

‘स्याद् व्यासभाषिते ग्रन्थे जम्बूद्वीपे च भारतम्।’
‘पुंनपुंसकयोर्वर्षं जम्बूद्वीपाब्दवृष्टिषु।’

इत्युभयत्र रुद्रः। अथवा [4]हिमाद्रेर्दक्षिणभूतजम्बूद्वीपैकखण्डः परामृश्यते। ‘नाभीदं भारतं वर्षं हिमाद्रेस्तच्च दक्षिणम्’ इति वैजयन्ती (पृ. ३५. श्लो. ५)। शरावत्याः—पश्चिमोत्तरः। शरावत्याख्या नदी [5]ऐशानदिशः सकाशात् [6]निर्ऋतिदिशं प्रत्यागत्य पश्चिमसमुद्रं प्रविष्टा। तन्नद्यवधि अङ्गवङ्गादिबहुभेदभिन्नः प्राग्दक्षिणदेशः प्राच्यः स्यात्। तदवधि गान्धारशूरसेनादिबहुभेदभिन्नः पश्चिमोत्तरदेश उदीच्यः स्यात्॥ ६॥

---

[1] °शब्दस्यैव B_3. [2] ‘खिलमप्रहतं स्थानम्’ इति मुद्रितपुस्तके. [3] °द्वीपपरामर्शः B_3.
[4] °दक्षिणभवः A_1. [5] ईशान° B_3. [6] नैर्ऋतीं दिशं B_3.

प्रत्यन्तो म्लेच्छदेशः स्यान्मध्यदेशस्तु मध्यमः॥ ७॥
आर्यावर्तः पुण्यभूमिर्मध्यं विन्ध्यहिमालयोः।
नीवृज्जनपदो देशविषयौ तूपवर्तनम्॥ ८॥

(वि.) प्रत्यन्त इति—म्लेच्छानां देशः म्लेच्छदेशः। प्रतिगतोऽन्तं प्रत्यन्तः। [1]शरावत्यन्तप्रतिगतशिष्टाचाररहितदेशनाम॥ मध्यश्चासौ देशश्च मध्यदेशः। मध्ये भवः मध्यमः। हिमवद्विन्ध्यविनशनप्रयागमध्यगतदेशनामनी[2]॥ आर्या[3] वर्तन्तेऽत्रेति आर्यावर्तः[4]। पुण्या भूमिः पुण्यभूमिः। हिमवद्विन्ध्यमध्यदेशनामनी॥ नितरां वर्तन्ते जना अत्रेति नीवृत्। ‘वृतु वर्तने’। [5]नियमेन वर्तन्त इति वा। जनपदशब्दसाहचर्यात् नीवृच्छब्दः पुंलिङ्गः। जनाः पद्यन्तेऽत्रेति जनपदः[6]। ‘पद्ऌ गतौ’। प्रसिद्धराष्ट्रनामनी॥ दिश्यत इति देशः। ‘दिश अतिसर्जने’। विशेषेण सिनोति बध्नाति[7] प्रीतिमिति विषयः। ‘षिञ् बन्धने’। उपयोगवशात् वर्तन्तेऽत्रेत्युपवर्तनम्। विंशत्त्रिंशद्ग्रामात्मकस्थाननामानि॥ ७–८॥

---

[1] °नद्यन्त° K_6;

‘हिमवद्विन्ध्ययोर्मध्यं यत् प्राग् विनशनादपि।
प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः॥’

इति मनुः (२. २१) B_1, Pt_2. [2] °विन्ध्यनग° K_6. [3] B_1 adds आ समन्तात्. [4] ‘वृतु वर्तने’;

‘आ समुद्रात्तु वै पूर्वादा समुद्राच्च पश्चिमात्।
तयोरेवान्तरं गिर्योरार्यावर्तं विदुर्बुधाः॥’

इति मनुः (२. २२) B_1, Pt_2. [5] नियतं वर्तन्ते B_1, K_5, W_2; F_2 adds तकारान्तः.
[6] जनैः पद्यत इति वा D_2, K_2, O; जनानां पदं F_2; पुंस्त्वं लोकात् B_1. [7] धृतिमिति K_2.

(पा.) प्रत्यन्तो—स्यात्। भारतवर्षान्तस्थितदेशनाम। मध्यदेशः—मध्यमः। भारतवर्षस्य मध्यमदेशनाम। आर्यावर्तो ब्रह्मवेदिः—हिमालयोः। [1]पूर्वपश्चिमसमुद्रायतयोर्विन्ध्याचलहिमाचलयोर्मध्यम्[2] आर्यावर्तश्च ब्रह्मवेदिश्चेत्युच्यते। अनुक्तम्—‘विन्ध्यात्तु दक्षिणो देशो दक्षिणापथसंज्ञितः’। विन्ध्याचलात् सेतुपर्यन्तं[3] दक्षिणापथः स्यात्। नीवृत्—उपवर्तनम्। देशनामानि। अत्र[4] तुशब्दो [5]निरर्थकः। ‘नीवृज्जनपदो देशस्तद्भेदाः पुंसि भूम्नि च’ इति वैजयन्ती (पृ. ३६, श्लो. २१)। ‘राष्ट्रं जनपदो निर्गो जनान्तो विषयः स्मृतः’ इति धनंजयः॥ ७–८॥

[1] °युतयोः A_1.
[2] B_3 omits °अचल°.
[3] °पर्यन्तदक्षिणदेशः A_1.
[4] अत्रत्य° A_1.
[5] अनर्थकः A_1.

त्रिष्वा गोष्ठान्नडप्राये नड्वान् नड्वल इत्यपि।
कुमुद्वान् कुमुदप्राये वेतस्वान् बहुवेतसे॥ ९॥

(वि.) त्रिष्विति—आ गोष्ठात् गोष्ठशब्दपर्यन्तं [1]त्रिषु। नडाः सन्त्यत्रेति नड्वान्। नड्वलश्च[2]। नडतृणप्रायदेशनामनी॥ कुमुदान्यत्र सन्तीति कुमुद्वान्। कुमुदानि प्रायः अत्र। कुमुदप्रायदेशनाम॥ वेतसाः सन्त्यत्र वेतस्वान्। बहवः वेतसाः[3] सन्त्यत्र। बहुवेतसदेशनाम॥ ९॥

[1] F_2 adds लिङ्गेषु वर्तन्ते.
[2] F_2, Pt_2 add नडप्रचुरो देशः नडप्रायः; बाहुल्येन नडोऽस्त्यस्मिन्निति F_2, Pt_2.
[3] K_2, K_6 add वृक्षाः.

(पा.) त्रिष्वा गोष्ठात्। गोष्ठशब्दात् प्राग्भूतशब्दास्त्रिलिङ्गाः। उत्तराधिकारस्य बाधितविषयत्वात् कच्छादयः शब्दा उक्तलिङ्गा एव। नडप्राये—इत्यपि। नडतृणप्रायदेशे[1] नड्वान् नड्वलश्चेत्येतौ वर्तेते। कुमुद्वान् कुमुदप्राये। कुमुदप्रायदेशनाम। वेतस्वान् बहुवेतसे। [2]बहुलनिचुलदेशनाम॥ ९॥

[1] °प्रायदेशनामनी B_3.
[2] A_1 adds °वृक्ष°.

शाद्वलः शादहरिते सजम्बाले तु पङ्किलः।
जलप्रायमनूपं स्यात् पुंसि कच्छस्तथाविधः॥ १०॥

(वि.) शाद्वल इति—[1]शादो बालतृणमस्मिन्नस्तीति[2] शाद्वलः। शाड्वलो वा। [3]शादहरितदेशनाम॥ [4]पङ्कोऽस्यास्तीति पङ्किलः। जम्बालेन पङ्केन सह वर्तत इति

सजम्बालः । [5]कर्दमसहितदेशनाम ॥ अनुगता आपोऽत्रेत्यनूपम् । [6]जलप्रायघट्टादि[7]-स्थलनाम ॥ कषन्ति आपो यं देशं स [8]कच्छः । कष्यते जलैरिति वा ; 'कष हिंसायाम्' । [9]जलप्रायदेशनाम ॥ १० ॥

---

[1] B_1 omits 3 lines.

[2] अस्यास्तीति K_2.

[3] बालतृण° for शाद° K_5.

[4] अस्मिन् K_5.

[5] जम्बाल° K_5; सजम्बाल° J_2.

[6] जलप्रचुरं स्थानं जलप्रायम् F_2.

[7] K_5, W_2 omit घट्ट.

[8] कं पानीयं छयतीति, 'छो छेदने' Pt_2.

[9] J_2 adds तथाविध°.

(पा.) शाद्वलः—हरिते । बालतृणहरितदेशनाम । सजम्बाले—पङ्किलः । जम्बालाविलदेशनाम । जलप्रायम्—तथाविधः । बहुलजलदेशोऽनूपं स्यात् । कच्छ इति च स्यात् । 'पुंस्येवान्धुः प्रहिः कूपः' (१. १२. २७) इत्यत्रैवकारः क्वचिदनित्यत्वबोधनार्थः । पुंसि च कच्छमनूपः . . . .[1]

---

[1] Break in all MSS. up to verse 18.

स्त्री शर्करा शर्करिलः शार्करः शर्करावति ।
देश एवादिमावेवमुन्नेयाः सिकतावति ॥ ११ ॥

(वि.) स्त्रीति—शृणातीति शर्करा । सा अस्त्यत्रेति शर्करा । 'शॄ हिंसायाम्' । शर्करा अस्मिन् सन्तीति शर्करिलः । शर्करावद्देशस्यैव नामनी ॥ शर्करावन्मात्रवृत्तिरत्रास्तीति शार्करः । शर्करावांश्च । [1]शर्करावद्भूमिनामनी ॥ एवं [2]सिकतावति देशे । [3]आदिमौ द्वौ शब्दौ अपरौ च इति चत्वारः शब्दा उन्नेयाः । [4]कथम् । सिकता सिकतिलः इति द्वौ तद्वद्देश एव । सैकतः सिकतावान् इत्युत्तरौ शब्दौ सिकतावन्मात्रवृत्तौ ॥ ११ ॥

---

[1] घट्टादि° for भूमि° B_1, F_1, J_2.

[2] शर्करादिशब्देषु आदिमौ शर्कराशर्करिलशब्दौ शर्करावति देश एव वर्तेते । इतरौ द्वौ देशे अन्यत्र च । यथा शार्करो देशः, शार्करमोदनमित्यादि । एवं सिकतावत्यपि ऊह्याः F_2, W_2, Pt_2.

[3] सिकता अस्य अस्तीति सिकतावान्, अस्मिन् सिकतावति । सिन्ध्वादौ देशे F_2.

[4] K_2 omits.

देशो नद्यम्बुवृष्ट्यम्बुसंपन्नव्रीहिपालितः ।
स्यान्नदीमातृको देवमातृकश्च यथाक्रमम् ॥ १२ ॥

(वि.) देश इति—नदी मातेव[1] यस्य नदीमातृकः । नद्यम्बुसंपन्नव्रीहिपावित[2]-देशनाम ॥ देवो मातेव[3] यस्य देवमातृकः । वृष्ट्यम्बुसंपन्नव्रीहिपावितदेशनाम[4] ॥ १२ ॥

[1] Pt$_2$ omits इव. [2] °पालित° B$_1$, F$_1$, W$_2$. [3] Pt$_2$ omits इव. [4] पालितो देशः F$_2$.

सुराज्ञि देशे राजन्वान् स्यात् ततोऽन्यत्र राजवान् ।
गोष्ठं गोस्थानकं तत्तु गौष्ठीनं भूतपूर्वकम् ॥ १३ ॥

(वि.) सुराज्ञीति—शोभनो राजा यस्मिन्[1] सः राजन्वान् । सुराजदेशनाम ॥ राजा अत्रास्तीति राजवान् । राजवद्देशनाम ॥ गावोऽत्र[2] तिष्ठन्तीति गोष्ठम् । ‘ष्ठा गतिनिवृत्तौ’ । [3]गोस्थाननाम ॥ [4]गावो यत्र प्रागासन् तत् गौष्ठीनम् । पुरातनगोस्थाननाम ॥ १३ ॥

---

[1] यस्य Pt$_2$; सुराजा, तस्मिन् सुराज्ञि F$_2$. [2] अस्मिन् F$_2$. [3] F$_1$ adds गवां स्थानं गोस्थानं. [4] पूर्वं भूतं भूतपूर्वं, भूतपूर्वकं पुरातनं तत् गोस्थानं F$_2$; भूतपूर्वं गोष्ठं J$_2$.

पर्यन्तभूः परिसरः सेतुरालौ स्त्रियां पुमान् ।
वामलूरुश्च नाकुश्च वल्मीकं पुंनपुंसकम् ॥ १४ ॥

(वि.) पर्यन्तभूरिति—पर्यन्ते उपान्ते भूः पर्यन्तभूः । परितः सरन्त्यत्रेति परिसरः । ‘सृ गतौ’ । ग्रामादिसमीपभूनामनी[1] ॥ सिन्वन्ति बध्नन्ति मृत्पाषाणादिभिरिति सेतुः । ‘षिञ् बन्धने’ । अल्यते निवार्यते [2]प्रवाहोऽनयेति आलिः । आली च । ‘अल भूषणपर्याप्तिवारणेषु’ । स्त्रियाम्[3] आलिः सेतुः पुमान् । सेतुनामनी ॥ वामैः प्राणिभिः लूयत इति वामलूरुः । वामलूर इति वा पाठः[4] । ‘लूञ् छेदने’ । प्राणिनः [5]प्रवेशे नमन्त्यत्रेति नाकुः[6] । ‘णमु प्रह्वत्वे शब्दे च’ । वलन्ते[7] प्राणिनोऽत्रेति वल्मीकम् । पुंनपुंसके[8] । ‘वल [9]संचलने’ । वल्मीकनामानि ॥ १४ ॥

---

[1] °भूमि° D$_2$, J$_2$, K$_3$, K$_6$. [2] जलं Pt$_2$. [3] F$_1$ adds वर्तमानायाम्. [4] वामैर्भोगिभिर्लूयत इति B$_1$, K$_6$. [5] प्रविश्य B$_1$, K$_5$. [6] अकुः अभूमिः आधारो न भवतीति B$_1$, K$_5$. [7] वलते संवृणोतीति F$_2$. [8] पुंलिङ्गनपुंसकलिङ्गौ F$_2$. [9] ‘वल संवरणे संचरणे च’ B$_1$, Pt$_2$.

अयनं वर्त्म मार्गाध्वपन्थानः पदवी सृतिः ।
सरणिः पद्धतिः पद्या वर्तन्येकपदीति च ॥ १५ ॥

(वि.) अयनमिति—अयन्तेऽनेनेति अयनम् । 'अय पय गतौ'। वर्तन्तेऽनेनेति [1]वर्त्म । 'वृतु वर्तने'। [2]मृगयन्ते गवेषयन्त्यनेनेति मार्गः । 'मृग अन्वेषणे'। अद्यते भक्ष्यते पथिकैरत्रेत्यध्वा[3]। 'अद भक्षणे'। [4]पथन्त्यनेन पन्थाः । 'पथे गतौ'। नकारान्तः । पतन्त्यत्रेति वा। 'पत्लृ गतौ'। पद्यन्तेऽनयेति[5] पदवी । 'पद गतौ'। सरन्त्यनयेति सृतिः। 'सृ गतौ'। सरणिश्च । [6]पद्भ्यां हन्यत इति पद्धतिः । 'हन हिंसागत्योः'। पदमत्र दृश्यते [7]पद्या । 'दृशिर् प्रेक्षणे'। वर्तन्तेऽनया वर्तनी[8]। एके कतिपये पादा लक्ष्यन्तेऽत्रेति एकपदी । मार्गनामानि ॥ १५ ॥

---

[1] नकारान्तः F₂. [2] मार्गयन्ति B₁, F₂, K₅, K₆; 'मार्ग अन्वेषणे' F₂, K₅; मृज्यते पथिकपदैर्निस्तृणीक्रियत इति F₂, Pt₂; 'मृजूष् शुद्धौ' Pt₂. [3] अर्द(य K₅)न्त्यत्रेत्यध्वा, 'अर्द गतौ' B₁, F₁, K₆; नकारान्तः F₂. [4] पन्थयन्ति, 'पथि गतौ' Pt₂. [5] अस्यामिति F₂. [6] पादाभ्यां Pt₂. [7] तृणकण्टकादिरहितत्वात् पादाय हिता Pt₂. [8] F₁ adds 'वृतु वर्तने'.

अतिपन्थाः सुपन्थाश्च सत्पथश्चार्चितेऽध्वनि ।
व्यध्वो दुरध्वो विपथः कदध्वा कापथः समाः ॥ १६ ॥

(वि.) अतिपन्था इति—[1]अतिपूज्यः पन्था अतिपन्थाः । सुपूज्यः[2] पन्थाः सुपन्थाः । संश्चासौ पन्थाश्च सत्पथः । अर्चिताध्वनामानि ॥ विरुद्धोऽध्वा व्यध्वः । [3]दुष्टोऽध्वा दुरध्वः । विरुद्धः पन्थाः विपथः[4] । कुत्सितोऽध्वा कदध्वा । कुत्सितः पन्थाः कापथः । कुत्सितमार्गनामानि[5] ॥ १६ ॥

---

[1] अतिश्रेष्ठः Pt₂. [2] सुशोभनः F₂, Pt₂. [3] दुष्टाध्वा K₂. [4] विपथं कापथं च क्लीबमाहुः F₂. [5] °मार्गाभास° W₂.

अपन्थास्त्वपथं तुल्ये शृङ्गाटकचतुष्पथे ।
प्रान्तरं दूरशून्योऽध्वा कान्तारं वर्त्म दुर्गमम् ॥ १७ ॥

(वि.) अपन्था इति—पन्था न भवतीत्यपन्थाः । अपथं च । मार्गाभासनामनी ॥ शृङ्गवन्नानादिगाश्रितैर्मार्गैरटतीति [1]शृङ्गाटकम् । शृङ्गैरुत्सवैर्जनोऽटतीति वा । '[2]अट गतौ'। चतुर्णां पथां समाहारः चतुष्पथम्[3] । चतुष्पथनामनी ॥ प्रकृष्टं ग्रामयोरन्तरं व्यवधानं यत्रेति प्रान्तरम् । प्रगता ग्रामादयोऽन्तरेऽस्मिन्निति वा । [4]दूरशून्याध्वनाम ॥ कस्य जलस्यान्तरं समीपमृच्छतीति जनोऽत्र कान्तारम्[5] । 'ऋ गतौ'। [6]दुर्गमवर्त्मनाम ॥ १७ ॥

[1] शृङ्गाकारैर्मार्गैरटतीति वा F_2. [2] 'अट पट गतौ' K_6, Pt_2. [3] चत्वारः पन्थानः यस्य तत् F_2. [4] F_2 adds दूरश्चासौ शून्यश्च. [5] कांश्चिन्न तारयतीति F_2, Pt_2. [6] F_2, Pt_2 add दुष्टो गमो यस्य तत् दुर्गमम् ; दुर्गवर्त्म° B_1, K_5.

गव्यूतिः स्त्री क्रोशयुगं नल्वः किष्कुचतुःशतम् ।
घण्टापथः संसरणं तत् पुरस्योपनिष्करम् ॥ १८ ॥
([1]द्यावापृथिव्यौ रोदस्यौ द्यावाभूमी च रोदसी ।
दिवस्पृथिव्यौ गञ्जा तु रुमा स्याल्लवणाकरः ॥)

इति श्रीमदमरसिंहकृते नामलिङ्गानुशासने भूमिवर्गः

(वि). गव्यूतिरिति—गवोः क्रोशयोर्यूतिः युग्मं गव्यूतिः । क्रोशयोर्युगं युग्मम् । क्रोशयुगनाम ॥ नल्यते बध्यतेऽनेनेति नल्वः । 'णल बन्धने' । किष्कूणां हस्तानां चतुःशतम् । चतुःशतहस्तप्रमाणवर्त्मनाम ॥ [2]घण्टावतां गजानां पन्थाः घण्टापथः । सम्यक् सरन्त्यनेनेति [3]संसरणम् । 'सृ गतौ' । राजमार्गनामनी ॥ उप समीपे निष्कीर्यते सैन्यमत्रेत्युपनिष्करम्[4] । 'कृ विक्षेपे' । पुरराजमार्गनाम ॥ १८ ॥

इति श्रीलिङ्गयसूरिविरचितायाम् अमरकोशपदविवृतौ भूमिवर्गः

[1] Additional verse in K_2. [2] घण्टोपलक्षितानां Pt_2. [3] संभूय (संहताः Pt_2) सरन्त्यत्र F_2 [4] F_2 adds तत् संसरणं पुरस्य संबन्धि चेत्.

(पा.) . . . हस्तानां चतुःशतं चेत् नल्वः स्यात् । घण्टापथः संसरणम् । राजमार्गनामनी । 'राजमार्गः संसरणं श्रीघण्टाभ्यां पथः परः' इति वैजयन्ती (पृ. १६०, श्लो. १६) । तत् पुरस्योपनिष्करम् । तदेव पुराभिमुखं चेदुपनिष्करं स्यात् । द्यावापृथिव्यौ—पृथिव्यौ । आकाशभूम्योर्नामानि । गञ्जा—लवणाकरः । लवणभूनामनी ॥ १८ ॥

इति [1]श्रीवत्सनृसिंहसूरिसुतमल्लिनाथसूरिविरचितेऽमरपदपारिजाते भूमिवर्गः

[1] °नरसिंह° A_1.

---

२. पुरवर्गः

पूः स्त्री पुरीनगर्यौ वा पत्तनं पुटभेदनम् ।
स्थानीयं निगमोऽन्यत्तु यन्मूलनगरात् पुरम् ॥ १ ॥
तच्छाखानगरं वेशो वेश्याजनसमाश्रयः ।

(वि.) पूरिति—पूर्यते जनैरिति पूः । 'पॄ पालनपूरणयोः' । रेफान्तस्त्रीलिङ्गः । [1]पुरी च । [2]क्रीडार्थं नगाः वृक्षाः पर्वता वा सन्त्यत्रेति नगरी । [3]पुरीनगर्यौ विकल्पेन स्त्रियौ । पत्तनसाहचर्यात्[4] नपुंसकेऽपि । पतन्ति जना अत्रेति पत्तनम् । 'पत्लृ गतौ' । पट्टणमिति पाठे पटन्ति गच्छन्ति जना अत्रेति पट्टणम् । '[5]पट गतौ' । पुटमगारं भिद्यतेऽत्रेति पुटभेदनम् । 'भिदिर् विदारणे' । पुटाः[6] घृतघटादयो जनसंमर्दादस्मिन् भिद्यन्त इति वा । तिष्ठन्त्यस्मिन्निति स्थानीयम् । अकुतोभयत्वात् स्थानाय वासाय हितम् इति वा । 'ष्ठा गतिनिवृत्तौ' । नियतं गच्छति जनोऽत्रेति निगमः[7] । प्रधानपुरनामानि ॥ वृक्षस्य शाखा यथा तथा प्रधाननगरस्याङ्गं शाखानगरम्[8] । प्रधानपुरादन्यपुरनाम ॥ विशन्ति कामुका अत्रेति वेशः । 'विश प्रवेशने' । वेश्याजनस्य समाश्रयो वासस्थानम् । [9]गणिकासमूहस्थाननाम ॥ १ ॥

[1] पूर्यते जनैरिति F_2. [2] क्रीडार्थाः K_5. [3] पुरीनगरीशब्दौ F_2. [4] साम्यात् F_1. [5] 'अट पट गतौ' B_1, J_2, K_5. [6] पुटा मृद्घटादयः W_2. [7] B_1, F_1 add 'गम्लृ गतौ'. [8] मूलनगरस्य वृक्षप्रायस्य शाखासदृशत्वात् शाखानगरम् F_2. [9] वेश्याजन° F_2.

(पा.) पूः । रेफान्तः स्त्रीलिङ्गश्च । पुरीनगर्यौ वा । पाक्षिकस्त्रीलिङ्गौ । 'पीठं क्रोडं रसनं तुम्बं नगरं च मन्दिरापुर्यौ' इत्यरुणदत्तलिङ्गानुशासनात् पक्षे नपुंसकलिङ्गौ । [1]पट्टणं—निगमः । नगरनामानि । 'पट्टणं[2] पुटभेदनम् । पत्तनं च' इति वैजयन्तीपाठात् (पृ. १५९, श्लो. ३-४) पत्तनशब्दोऽप्यस्ति । अन्यत्तु—शाखानगरम् । मूलनगरादन्यन्नगरं[3] यत्तच्छाखानगरं स्यात् । अनुक्तम्—'स्कन्धावारो[4] राजधानी दुर्गं च कटकोऽस्त्रियाम्' । राज्ञां प्रधाननगरीनामानि[5] ॥ वेशो—समाश्रयः । वेश्याजनाश्रयो वेशः स्यात् । अनुक्तम्—'वेण्ठा विटजनाश्रयः' । विटजनाश्रयः वेण्ठा स्यात् ॥ १ ॥

[1] पट्टनं B_3. [2] पट्टनमिति मुद्रितग्रन्थे. [3] पुरं B_3. [4] स्कन्धाधारो A_1, B_3. [5] °नगर° B_3.

आपणस्तु निषद्यायां विपणिः पण्यवीथिका ॥ २ ॥

रथ्या प्रतोली विशिखा स्याच्चयो वप्रमस्त्रियाम् ।
प्राकारो वरणः सालः प्राचीनं प्रान्ततो वृतिः ॥ ३ ॥

(वि.) आपण इति—आ[1] समन्तात् पणन्ते व्यवहरन्त्यस्मिन्निति[2] आपणः। 'पण व्यवहारे स्तुतौ च'। विपणिश्च[3]। निषीदन्ति [4]वणिजोऽत्रेति निषद्या। 'षद्लृ विशरणगत्यवसादनेषु'। पण्यस्य वीथिका पण्यवीथिका[5]। हट्टनामानि ॥ रथाय हिता रथ्या। प्रतोल्यते जनैरिति [6]प्रतोली। 'तुल उन्माने'। [7]मुण्डितशिरोवत् समभूमित्वाद् विशिखा। विशीयन्ते प्रकाश्यन्त इति वा। 'शीङ् स्वप्ने'। विपूर्वकत्वात् प्रकाशार्थकत्वम्। [8]रथहितमार्गनामानि ॥ चीयते पाषाणादिभिरिति चयः। 'चिञ् चयने'। उप्यते [9]प्राकारोऽत्रेति वप्रः। 'डुवप् बीजसन्ताने'। प्राकाराधारभूतमृदादेर्नामनी ॥ [10]प्रकर्षेण क्रियत इति प्राकारः। 'डुकृञ् करणे'। वृणोति सम्यगिति [11]वरणः। व्रियते वेष्ट्यतेऽनेनेति वा। 'वृञ् वरणे'। स्यति पर्यन्तं करोतीति सालः। 'षोऽन्तकर्मणि'। स्यति गमनमिति वा। प्राकारनामानि ॥ [12]प्रागास इति प्राचीनम्[13]। प्राक् चीयत इति वा। 'चिञ् चयने'। प्राचीरमिति वा पाठः। प्राक् ईर्यत इति प्राचीरम्। 'ईर क्षेपे'। ग्रामवृतिनामनी ॥ २–३ ॥

[1] आपणन्ते K_6, W_2.
[2] अत्रेति W_2.
[3] पणश्च D_2, F_1; विपणन्तेऽत्र F_2.
[4] वणिजाः F_2.
[5] पण्यानां विक्रेतुमानीतानां वीथिः Pt_2.
[6] प्रतोलयन्ति जना अस्यामिति Pt_2.
[7] मुण्डितसाम्यात् K_6, W_1.
[8] रथस्य मार्ग° F_1.
[9] प्राकाराधारो W_2.
[10] प्रक्रियते K_6, W_2.
[11] Gap of 2 pages in I.
[12] प्रागास्त K_6.
[13] Pt_2 adds प्रागञ्चतीति वा, 'अञ्चु गतिपूजनयोः'.

(पा.) आपणस्तु निषद्यायाम्। आपणनामनी। 'अङ्गडि'। विपणिः—वीथिका। आपणवीथिनामनी[1]। रथ्या—विशिखा। वीथिनामानि। अनुक्तम्—'उपरथ्या तु दर्शिनी[2]'। ग्रामस्य [3]पुरतो गवाद्यागमनगमनाभ्यां कृतमार्गनामनी। भाषया 'पशुवुल . . . अंदुरु'॥ स्याच्चयो—अस्त्रियाम्। प्राकाराधारार्थं मृच्छिलाभ्यां बद्धसेतुनामनी। भाषया 'आडुवलि'। 'वप्रः स्याद् धूलिकुट्टिमम्' इति धनंजयः[4] ॥ प्राकारो—सालः। प्राकारनामानि। 'कोट'। देहलीदीपन्यायाद् वप्रमपि। 'वप्रं [5]सालं प्राकारमाहुररं [6]कवाटं च' इति हलायुधः (अ. मा. २. १३३)॥ अनुक्तम्—'कपिशीर्षं तु सालाग्रम्'। सालाग्रनाम। भाषया 'कोटकोम्म'॥ प्राचीनं—वृतिः। सालावृतिनाम॥ अनुक्तम्—'आवेष्टको वृतिर्वाटी'। कण्टकशाखावरणनामानि। 'मुंलकंचे'॥ २–३ ॥

[1] वीथिका° B_3.
[2] दर्शनी B_3.
[3] पुरस्तात् B_3.
[4] A_1 adds वप्रमस्त्रियाम्.
[5] शालमिति मुद्रितग्रन्थे.
[6] कपाटं B_1, मुद्रितग्रन्थे च.

भित्तिः स्त्री कुड्यमेडूकं यदन्तर्न्यस्तकीकसम् ।
गृहं गेहोदवसिते वेश्म सद्म निकेतनम् ॥ ४ ॥
निशान्तवस्त्यसदनं भवनागारमन्दिरम् ।
गृहाः पुंसि च भूम्न्येव निकाय्यनिलयालयाः ॥ ५ ॥

(वि.) भित्तिरिति—भिद्यत इति भित्तिः । स्त्रियाम् । 'भिदिर् विदारणे' । कुड्यां साधु कुड्यम् । कुड्यत इति वा । 'कुडि संघाते' । [1]मृन्मयावरणनामनी ॥ इल्यते क्षिप्यतेऽस्थि अन्तरिति एडूकम् । 'इल स्वप्नक्षेपणयोः' । सास्थिभित्तिनाम ॥ [2]गृह्णाति सर्वमिति गृहम् । 'ग्रह उपादाने' । गाह्यत इति गेहम् । 'गाहू विलोडने' । वल्कलादिना उद् ऊर्ध्वमवसीयत इत्युदवसितम् । उदवसीयते बध्यते वंशादिभिरिति वा । 'षिञ् बन्धने' । विशन्त्यस्मिन्निति वेश्म । 'विश प्रवेशने' । सीदन्ति तिष्ठन्त्यत्रेति सद्म । 'षद्लृ विशरणगत्यवसादनेषु' । [3]निकेतयन्ति निवसन्त्यस्मिन्निति निकेतनम् । 'कित [4]निवासे' । निकेत्यते स्थीयतेऽस्मिन्निति वा । नितरां शाम्यति [5]दुःखमत्रेति निशान्तम् । 'शमु उपशमे' । अवश्यं निशायामम्यते गम्यत इति वा । 'अम गत्यादिषु' । [6]वस्तुं साधु वस्त्यम् । 'वस निवासे' । अवस्त्यमिति पाठे अवस्त्यायते संघीभवतीत्यवस्त्यम्[7] । 'स्त्यै शब्दसंघातयोः' । सीदन्त्यत्र सदनम् । 'षद्लृ विशरणादौ' । भवन्ति [8]बाला अत्रेति भवनम् । 'भू सत्तायाम्' । अगा वृक्षा ईर्यन्ते नीयन्ते स्वनिर्माण[9] इत्यगारम् । 'ईर प्रेरणे' । अगान् वृक्षान् स्तम्भभूतानियर्तीति वा । 'ऋ गतौ' । मन्दन्ते [10]मोदन्तेऽत्रेति मन्दिरम् । 'मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु' । मन्द्यन्ते सुप्यन्तेऽत्रेति वा । गृहशब्दः पुंसि भूम्न्येव[11] । गृह्णन्ति प्रविष्टानिति गृहाः । 'ग्रह उपादाने' । चात् क्लीबमपि । गृहाणि । निचीयते द्रव्यमत्रेति निकाय्यः । 'चिञ् चयने' । निलीयन्ते आलीयन्ते जना अत्रेति निलयः । आलयश्च । 'लीङ् श्लेषणे' । गृहनामानि ॥ ४–५ ॥

---

[1] मृण्मय° D_2, K_5, K_6.　[2] गृह्यते पुरुषेणार्जितं धनमिति Pt_2; F_1 omits 5 pages.　[3] निकेतन्ति F_2.　[4] रोगापनयने च W_2.　[5] दुःखानि W_2.　[6] वस्तौ J_2.　[7] अपस्त्यायते संघीभवतीति अपस्त्यम् J_2.　[8] शालाः B_1; भवन्त्यस्मिन् पुत्रादयः F_2.　[9] स्वनिर्माणाय B_1.　[10] मोदं प्राप्नुवन्ति W_2.　[11] गृहाः भूम्नि पुंस्येवेति नियमो नास्ति K_6, W_2.

(पा.) भित्तिः—कुड्यम् । कुड्यनामनी ॥ एडूकं—कीकसम् । अन्तर्गतास्थिकुड्यनाम । 'मेत्तिनकोड[1]' । एडुकमित्यप्यस्ति । 'एडुकमन्तर्गतास्थिकुड्यं स्यात्' इति

रत्नकोशः ॥ गृहं—उदवसितम् । गेहोदवसितशब्दयोर्गृहशब्देन[2] सामानाधिकरण्यं लिङ्गान्तरसंभावनार्थम् । 'न नोदवसितं न स्त्री गेहं पुंभूम्नि वा गृहम्' इति वैजयन्ती (पृ. १६०, श्लो. १९)। वेश्म—सदनम् । वस्तमित्यत्रान्तःस्थादिपाठे 'वस्तं वस्त्यं निकेतनम्' इति वैजयन्ती (पृ. १६०, श्लो. १७)। पवर्गादिपाठे 'संपद्गुणातिशयपस्त्य रुचं [3]तवेति' इति धर्मशर्माभ्युदयपद्मचित्रम् (१९. ९९)। भवनागारमन्दिरम्—आलयाः। गृहनामानि ॥ ४–५ ॥

---

[1] °गाड B_3. [2] °शब्दसामाना° A_1. [3] तवैति इति मुद्रितग्रन्थे.

वासः कुटी द्वयोः शाला सभा संजवनं त्विदम् ।
चतुःशालं मुनीनां तु पर्णशालोटजोऽस्त्रियाम् ॥ ६ ॥

(वि.) वास इति—[1]वसन्त्यस्मिन्निति वासः। 'वस निवासे'। कुटति कुटिलीभवतीति कुटी। 'कुट कौटिल्ये'। कुस्यन्ते पशवो [2]बध्यन्तेऽस्मिन्निति वा। कुटी द्वयोः। शलन्त्यस्यामिति शाला। 'शल[3] गतौ'। [4]शाल्यते वा। 'शालृ श्लाघायाम्'। [5]सह भान्त्यस्यामिति सभा। 'भा दीप्तौ'। सभागृहनामानि ॥ संजवन्ते[6] संगच्छन्ते चतस्रः शाला अत्रेति संजवनम्। [7]संवहनमिति पाठे संवहन्ति मिलन्त्यत्रेति। गत्यर्थो धातुरत्र। चतस्रः शालाः समाहृता अत्रेति चतुःशालम्[8]। चतुःशालगृहनामनी ॥ पर्णैः [9]कृता शाला पर्णशाला। उटैस्तृणपर्णैर्जायत[10] इति उटजः। 'जनी प्रादुर्भावे'। मुनिसदननामनी ॥ ६ ॥

---

[1] W_2 adds विशेषेण. [2] संगच्छन्ते K_6. [3] 'शल चल आशुगमने' K_2, K_6. [4] शालते K_6, W_2. [5] F_2 adds पुत्रादिभिः. [6] F_2, Pt_2 add मिथः. [7] संहननमिति पाठे संहन्ति मिलन्त्यत्रेति। 'हन हिंसागत्योः'। गत्यर्थो धातुरत्र B_1, J_2, K_5. [8] चतसृणां शालानां समाहारः Pt_2. [9] पर्णैः शालत इति F_2. [10] K_6 omits पर्णैः.

(पा.) वासः—सभा। गृहनामानि। अनुक्तम्—'निवासावसथावासा वास्त्वस्त्री निर्वृतं कुलम्'। एतानि षट् च। संजवनं—चतुःशालम्। चतुःशालगृहनामनी। 'तोड्डिल्लु'॥ मुनीनां—अस्त्रियाम्। आश्रमनामनी। 'आश्रमे तु पर्णशालोटजमस्त्रियाम्'[1] इति वैजयन्ती (पृ. १६१, श्लो. २६) ॥ ६ ॥

---

[1] '°उटजोऽस्त्रियाम्' इति मुद्रितग्रन्थे.

चैत्यमायतनं तुल्ये वाजिशाला तु मन्दुरा ।
आवेशनं शिल्पिशाला प्रपा पानीयशालिका ॥ ७ ॥

(वि.) चैत्यमिति—मृदादिना[1] चीयत[2] इति चैत्यम् । ‘चिञ् चयने’ । [3]आयतन्तेऽस्मिन्नित्यायतनम् । ‘यती प्रयत्ने’ । [4]मुन्यालयनामनी ॥ वाजिनां[5] शाला वाजिशाला । मन्दन्तेऽत्राश्वा[6] इति मन्दुरा । ‘मदि स्तुत्यादौ’ । वाजिशालानाम ॥ आविशन्त्यत्र कर्मकारा[7] इत्यावेशनम् । शिल्पिनां शाला । [8]शिल्पिशालानाम ॥ प्रपिबन्त्युदकमस्यामिति[9] प्रपा । ‘पा पाने’ । पानीयस्य जलस्य शाला । पानीयशालानाम ॥ ७ ॥

[1] पाषाणादिना F_2, Pt_2.　[2] चय्यते K_2.　[3] अत्र for अस्मिन् K_6, W_2.
[4] मुनेरालय° K_5.　[5] F_2 adds अश्वानां.　[6] वाजिन: F_2.　[7] कर्मकारयितार: B_1, K_5, Pt_2, W_2.　[8] शिल्पशाला K_5, W_2.　[9] K_2 adds प्रजा:.

(पा.) चैत्यम्—तुल्ये । देवसदननामनी । तुल्ये इत्यनेनार्थान्तरेऽपि तुल्यत्वम् ।

‘चैत्यं देवकुले बुद्धबिम्बेऽप्युद्देशपादपे[1] ।
देवसद्मन्यायतनं सद्ममात्रेऽपि तद्विदुः ॥’

इति । वाजिशाला—मन्दुरा । [2]हयशालायां मन्दुरा स्यात् । अनुक्तम्—‘चतुरं हस्तिनां शाला’ । [3]गजालयश्चतुरं स्यात् । ‘शाला संधानिनी गवाम्’ । गवां शाला संधानिनी स्यात् । आवेशनं शिल्पिशाला । कुलालपाकपुटी च कारोरव्यासवश्च पल्याणकारकचकिश्च नापितखरकुटिश्च चित्रकारजालिनी च पाटसालिकतन्तुवायगर्तिकादिकं च सर्वमावेशनं स्यात् ॥ प्रपा पानीयशालिका । पानीयशालानाम ॥ अनुक्तम्—‘सत्रशाला शुभस्थली’ । सत्रशालानामनी[4] ॥ ७ ॥

[1] उद्देश्य° B_3.　[2] हयलाय: B_3.　[3] गजलाय: A_1, B_3.　[4] °शालिका° A_1.

मठश्छात्रादिनिलयो गञ्जा तु मदिरागृहम् ।
गर्भागारं वासगृहमरिष्टं सूतिकागृहम् ॥ ८ ॥
(कुट्टिमोऽस्त्री निबद्धा भूश्चन्द्रशाला शिरोगृहम्)

(वि.) मठ इति—[1]मठन्त्यत्रेति मठः । ‘मठ मदनिवासयोः’ । [2]शिष्यापत्यादिनिवासनाम ॥ गञ्जन्ति [3]शब्दायन्ते मत्ता अस्यामिति गञ्जा । ‘गजि शब्दे’ । मदिराया मद्यस्य संधानगृहं मदिरागृहम् । सुरागृहनामनी ॥ [4]गर्भेऽन्तः अगारम् गर्भागारम् ।

वासाय[5] गृहं वासगृहम्। गृहान्तर्गृहनामनी[6]। [7]कृतरक्षत्वाद् ग्रहैर्न रिष्यत इत्यरिष्टम्। ‘रिष हिंसायाम्’। सूतिकाया अभिनवसूतिकाया गृहम्। सूतिकागृहनामनी ॥ ८ ॥

[1] मठ्यन्ते छात्रादिभिरिति F_2, Pt_2. [2] छात्रोऽन्तेवासी आदिर्येषां ते परिव्राजकक्षपणकादयः तेषां निलयः Pt_2. [3] स्वैरमालपन्ति F_2. [4] निर्वातत्वात् गर्भ इव Pt_2. [5] वासस्य शयनस्य Pt_2. [6] गृहान्तरित° W_2. [7] Pt_2 adds मन्त्रादिना.

(पा.) मठः—निलयः। अन्तेवास्याश्रयो मठः स्यात् ॥ गञ्जा—मदिरागृहम्। सुरादिविक्रेतृगृहं गञ्जा स्यात्। [1]स गञ्जाशब्दः पुंलिङ्गश्चेत् भाण्डागारनामापि स्यात्। ‘भाण्डागारे पुमान् गञ्जः स्त्री तु खन्यां सुरागृहे’ इति वैजयन्ती (पृ. २३२, श्लो. २६)॥ गर्भागारम्। कोष्ठगृहनाम। ‘[2]गर्भागारोऽपवरकः’ इति वैजयन्ती (पृ. १६३, श्लो. ५१)। वासगृहम्। सज्जिकागृहनाम। ‘उशन्ति शयनस्थानं वासागारं विशारदाः’ इति हलायुधः (अ. मा. २. १४०)। अरिष्टं सूतिकागृहम्। प्रसूतिगृहनाम ॥ ८ ॥

[1] B_3 omits. [2] ‘अपवरकं गर्भगृहम्’ A_1, B_3.

वातायनं गवाक्षोऽथ मण्डपोऽस्त्री जनाश्रयः।
हर्म्यादि धनिनां वासः प्रासादो देवभूभुजाम् ॥ ९ ॥

(वि.) वातायनमिति—वातस्यायनं[1] वातायनम्। गौश्चक्षुरक्ष्यत इति गवाक्षः[2]। ‘अक्षू व्याप्तौ’। गोचक्षुरिव वर्तुलाकारत्वाद्वा। जालकनामनी ॥ मण्ड्यते जनैरिति मण्डपः। ‘मडि भूषायाम्’। जनानामाश्रयः जनाश्रयः। सर्वजनाश्रयशालानाम ॥ मनो हरतीति हर्म्यम्। ‘हृञ् हरणे’। धनिकगृहनाम ॥ [3]प्रसीदन्त्यस्मिन्निति प्रासादः। ‘षद्लृ विशरणगत्यवसादनेषु’। प्रमुदिताः सीदन्त्यस्मिन्निति वा। देवनृपगृहनाम ॥ ९ ॥

[1] F_2, Pt_2 add मार्गः; F_2 adds अयते यात्यनेनेत्ययनम्, ‘अय पय गतौ’. [2] गवां किरणानामक्षो व्यापारोऽत्रेति वा F_2, Pt_2. [3] F_2 adds देवादयः.

(पा.) वातायनं—स्यात्। जालकनामनी। ‘दीर्घाश्रं कर्णगच्छिद्रं तद्गवाक्षमिति स्मृतम्’ इति मयमतप्रयोगान्नपुंसकम्। ‘विलोलनेत्रभ्रमरैर्गवाक्षाः सहस्रपत्रावरणा इवासन्’ इति रघुवंशप्रयोगात् (७. ११; कु. सं. ७. ६२) पुंलिङ्गः। गवाक्षनामानि ॥ अनुक्तम्—‘कुट्टिमोऽस्त्री निबद्धा भूः’। पाषाणादिनिबद्धभूमिनाम ॥ ‘चन्द्रशाला शिरोगृहम्’। गृहोपरि गृहनामनी। मण्टपोऽस्त्री जनाश्रयः। [1]मण्टपनामनी ॥ हर्म्यादि—

वासः। धनिकानां निवासः हर्म्यादिसंज्ञकः स्यात्। आदिशब्दः पर्यायवचनः। 'हर्म्यं च मालिका'। प्रासादो देवभूभुजाम्। देवनृपवासः[2] प्रासादसंज्ञः स्यात्॥ ९॥

[1] जनाश्रयशालानाम B_3. [2] °आवासः B_3.

सौधोऽस्त्री राजसदनमुपकार्योपकारिका।
स्वस्तिकः सर्वतोभद्रो नन्द्यावर्तादयोऽपि च॥ १०॥
विच्छन्दकः प्रभेदा हि भवन्तीश्वरसद्मनाम्।

(वि.) सौध इति—[1]सुधायोगात् सौधः। राज्ञां सदनं राजसदनम्। [2]राजभवननाम॥ उप समीपे क्रियत इत्युपकार्या[3]। प्रयाणे[4] उपकरोतीति उपकारिका। पटकृतराजवेश्मनामनी॥ स्वस्ति शुभं कायतीति स्वस्तिकः। 'कै शब्दे'। सर्वतो भद्रमस्येति सर्वतोभद्रः। नन्दिमानन्दम् आवर्तयतीति नन्द्यावर्तः[5]। आदिग्रहणाद् रुचकवर्धमानादि गृह्यते। विशिष्टः छन्दोऽत्र विच्छन्दकः। [6]एते ईश्वरसद्मनां विच्छन्दकप्रभेदाः रचनाविशेषा भवन्ति। रचनाविशेषयुक्तनृपगृहाणां नामानि॥ १०॥

[1] सुधालिप्तत्वात् F_2; K_6 adds अस्त्रियां. [2] राजसदन° K_6, W_2. [3] पटादिभिरुपक्रियते F_2. [4] प्रयाणाय W_2, Pt_2. [5] नन्दमानन्दमावर्तयतीति Pt_2; W_2, Pt_2 add 'वृतु वर्तने'. [6] एतानि ईश्वरसद्मनामानि W_2.

(पा.) सौधो—राजसदनम्। राजगृहनामनी॥ उपकार्योपकारिका। [1]पटादिकृतराजगृहस्थाननामनी[2]। 'गृहस्थानं मतं[3] राज्ञामुपकार्योपकारिका' इति हलायुधः (आ. मा. ४. १३५)॥ स्वस्तिकः—सद्मनाम्। स्वस्तिकसर्वतोभद्रनन्द्यावर्तरुचकवर्धमाना राजगृहरचनाविशेषाः। तत्स्वरूपं [4]तु—

'अपरान्तगतोऽलिन्दः प्रागन्तगतौ तदुत्थितौ चान्यौ।
तदवधिविधृतश्चान्यः प्राग्द्वारं स्वस्तिकं शुभदम्॥
अप्रतिषिद्धालिन्दं समन्तगे वास्तु सर्वतोभद्रम्।
नृपविबुधसमूहानां कार्यं द्वारैश्चतुर्भिरपि॥
नन्द्यावर्तमलिन्दैः शालाकुड्यात् प्रदक्षिणान्त्यगतैः।
द्वारं पश्चिममस्मिन् विहाय शेषाणि कार्याणि॥
प्राक्पश्चिमावलिन्दावन्त्यगतौ तदवधि स्थितौ शेषौ।
रुचकं द्वारं न शुभदमुत्तरतोऽन्यानि शस्तानि॥

द्वारालिन्दोऽन्यगतः प्रदक्षिणोऽन्यस्ततश्चान्यः ।
रुद्धश्च वर्धमानो द्वारं तु न दक्षिणं कार्यम् ॥'[5]

इति ॥ १० ॥

[1] A_1 omits पटादिकृत°. [2] B_3 omits स्थान°. [3] स्मृतं B_3; मुद्रितग्रन्थे च. [4] निरूप्यते A_1. [5] बृहत्संहिता ५२. ३१-५.

स्त्र्यगारं भूभुजामन्तःपुरं स्यादवरोधनम् ॥ ११ ॥
शुद्धान्तश्चावरोधश्च स्यादट्टः क्षौममस्त्रियाम् ।
प्रघाणप्रघणालिन्दा बहिर्द्वारप्रकोष्ठके ॥ १२ ॥

(वि.) स्त्र्यगारमिति—स्त्रीणामगारं स्त्र्यगारम् । अन्तः पूर्यत इत्यन्तःपुरम् । 'पॄ पालनपूरणयोः' । अन्तरभ्यन्तरे पुरं गृहमिति वा । अवरुध्यन्ते [1]राज्ञः स्त्रियोऽत्रेत्यवरोधनम् । 'रुधिर् आवरणे' । अवरोधश्च । [2]शुद्धाः सुरक्षिता अन्तिकाः समीपवर्तिनोऽत्रेति शुद्धान्तः । [3]राजस्त्रीणामगारनामानि ॥ अट्टन्ते हिंसन्ति [4]योधा अत्र स्थित्वेत्यट्टः । 'अट्ट [5]अतिक्रमणहिंसनयोः' । योधा अत्र क्षुवन्तीति क्षौमम् । 'टुक्षु शब्दे' । प्राकाराग्रस्थितरणगृहनामनी ॥ प्रहन्यते घटादिरनेनेति प्रघाणः । प्रघणश्च[6] । 'हन हिंसागत्योः' । अल्यते [7]भूष्यत इत्यलिन्दः । आलिन्द इति वा पदच्छेदः । 'अल [8]भूषणपर्याप्तिशक्तिवारणेषु' । [9]बहिर्द्वारालपगृहनामनी ॥ ११–१२ ॥

[1] राजस्त्रियः J_2, K_2, K_5, K_6, W_2. [2] शुद्धाः परिशुद्धाः रक्षका अन्ते पुरसमीपेऽस्येति F_2, Pt_2. [3] B_1, I, K_2, K_3, K_5 add नृपस्त्रीणां च नामानि. [4] F_2 adds परबलमिति. [5] अतिक्रम° W_2, Pt_2. [6] प्रविशद्भिर्जनैर्हन्यत इति वा Pt_2. [7] अलंक्रियते F_2. [8] F_2, W_2 omit शक्ति. [9] °द्वारे W_2.

(पा.) स्त्र्यगारं—अवरोधश्च । [1]राजस्त्रीगृहनामानि । तात्स्थ्यात् तद्व्यपदेश इति [2]राजस्त्रीनामान्यपि[3] ।

'कलत्रवन्तमात्मानमवरोधे महत्यपि ।
तया मेने मनस्विन्या लक्ष्म्या च वसुधाधिपः' ॥

इति रघुवंशे (१. ३२) । स्यादट्टः—अस्त्रियाम् । अट्टनामनी । 'अट्टुग' ॥ 'कोद्रङ्गस्तु तमङ्गः स्यात्[4]' । तमङ्गनामनी । भाषया 'तमगम्' ॥ प्रघाण—प्रकोष्ठके । द्वारपार्श्वाल्पगृहनामानि ॥ अलिन्द इति ह्रस्वादिः । आलिन्द इति दीर्घादिश्च भवति । ह्रस्वादेरुदाहरणम् 'प्रघाणः प्रघणोऽलिन्दः' इति रत्नकोशः । दीर्घादेः—'गृहैकदेश आलिन्दः

प्रघाणः प्रघणस्तथा’ इत्यमरमाला ।। अनुक्तम्—‘संवेशिनी मुखे शाला’। मुखशालानाम। भाषया ‘मोगसाल[5]’ ।। ११–१२ ।।

[1] वरारोहा° A₁.　[2] मत्तकाशिनी°A₁.　[3] A₁ adds भवति.　[4] B₃ adds ‘कोद्रङ्गस्तु तमङ्गकः’ इति वैजयन्ती.　[5] A₁ adds ‘चन्द्रशाला शिरोगृहम्’। पृथुगृहोपरि गृहनाम.

गृहावग्रहणी देहल्यङ्गणं चत्वराजिरे ।
अधस्ताद्दारुणि शिला नासा दारूपरि स्थितम् ।। १३ ।।

(वि.) गृहावग्रहणीति—गृहं गृहद्वारशाखा अवगृह्यतेऽनयेति गृहावग्रहणी। ‘ग्रह उपादाने’। दिह्यते [1]पङ्कादिनेति देहली। ‘दिह उपचये’। द्वारमूले तिर्यक्स्थितपूज्यदारुनामनी ।। अङ्गन्त्यत्रेत्यङ्गणम्। अङ्गनं वा। ‘अगि गतौ’। [2]चतन्ते याचका अत्र स्थित्वेति चत्वरम। ‘चते याचने’। अजन्ति क्षिपन्ति [3]धान्यादिकमत्रेति अजिरम्। ‘अज गतिक्षेपणयोः’। गृहस्य पुरःप्रदेशनामानि ।। अक्षतैः शाल्यत इति शिला। ‘शाल श्लाघायाम्’। देहल्यधःस्थितपूज्यह्रस्वदारुनाम ।। गृहस्य नासिकेव तिष्ठतीति नासा। द्वारोपरि तिर्यक्स्थितपूज्यदारुनाम[4] ।। १३ ।।

[1] सुधादिना Pt₂; देहं प्रवेशेन लातीति वा ‘ला आदाने’ F₂, Pt₂.　[2] Pt₂ adds अत्र स्थित्वा चत्यते याचकैरिति वा.　[3] F₂ adds आतपसंबन्धात्.　[4] पूज्यस्य दारुणो B₁, I, K₂, K₃.

(पा.) गृहावग्रहणी देहलिः[1]। द्वारमूले तिर्यक्प्रसारितपूज्यदारुनामनी। ‘कडप’।। अनुक्तम्—‘उत्तराङ्गं तु तत्तिर्यग्द्वारस्योपरि दारु यत्’। द्वारोपरि तिर्यक्प्रसारितदारु उत्तराङ्गं स्यात्[2] ।। अङ्गणं—अजिरे। प्राङ्गणभूनामानि। [3]अङ्गत्यस्मिन्नित्यङ्गणम्। पृषोदरादित्वाण्णत्वमिति सुभूतिटीका। अङ्गनमिति च कतिचन[4] कथयन्ति ।। अधस्तात्—स्थितम्। संधिकर्मोचितकाष्ठयोरधस्तनकाष्ठं शिला स्यात्। उपरितनकाष्ठं नासा स्यात् ।। १३ ।।

[1] देहली B₃.　[2] A₁ adds उत्तरासनं च; उत्तरङ्गं B₃.　[3] B₃ omits the line.
[4] कतिचित् B₃.

प्रच्छन्नमन्तर्द्वारं स्यात् पक्षद्वारं तु पक्षकः ।
वलीकनीध्रे पटलप्रान्तेऽथ पटलं छदिः ।। १४ ।।

(वि.) प्रच्छन्नमिति—प्रच्छाद्यत इति प्रच्छन्नम्। 'छद अपवारणे'। अन्तः स्थितं द्वारम् अन्तर्द्वारम्। गृहान्तर्गतद्वारनामनी ॥ [1]पक्षे पार्श्वे क्रियत इति पक्षकः[2]। पार्श्वकृतद्वारनामनी ॥ वलति संवृणोति [3]भित्तेः बहिःप्रदेशमिति वलीकम्। 'वल संवरणे'। [4]कुड्यादेर्नितरां बहिर्व्रियत[5] इति नीव्रम्[6]। 'वृञ् वरणे'। जलं बहिर्नीयत इति वा। 'णीञ् प्रापणे'। पटलस्य प्रान्तः पटलप्रान्तः। छदिषः प्रान्तनामानि ॥ पटं पटकार्यं [7]लातीति पटलम्। 'ला दाने'। छाद्यतेऽनेनेति छदिः। 'छद अपवारणे'। [8]सान्तोऽयं नपुंसकलिङ्गः। छदिषो नामनी ॥ आन्ध्रभाषायां 'कप्पु' ॥ १४ ॥

[1] F_2, Pt_2 add गृहस्य.
[2] गृहस्य पक्षयोः स्थितं द्वारं पक्षद्वारम् F_2; पक्षे पार्श्वे द्वारं Pt_2.
[3] कुड्यमिति Pt_2.
[4] कुड्याः W_2.
[5] Pt_2 add; अनेनेति.
[6] नीध्रमिति वा पाठः K_6, W_2.
[7] F_2 adds आदत्ते.
[8] सकारान्तः K_3.

(पा.) प्रच्छन्नम्—स्यात्। अन्तर्द्वारनाम[1]। भाषया 'लोनि वाकिलि'। पक्षद्वारं—पक्षकः। पक्षद्वारनाम। नपुंसकोऽप्यस्ति। '[2]पक्षकं तु पक्षद्वारं खडक्किका' इति वैजयन्ती (पृ. १६२, श्लो. ४२)। वलीक—प्रान्ते। पटलप्रान्तनामानि ॥ 'चारुनीव्रो वलिकः[3] पटलप्रान्त इत्यपि' इति पुंस्काण्डे गोपालितः। अथ पटलं छदिः। अपवारणनामनी। आन्ध्रभाषायां 'कप्पु'। पटलशब्दसाहचर्याच्छदिःशब्दो नपुंसकः[4] ॥ १४ ॥

[1] प्रच्छन्नं स्यात् A_1.
[2] B_3 adds 'पक्षशाला तु पक्षकः' इति वैजयन्ती (पृ. १६०, श्लो. २४).
[3] वलीकः B_3.
[4] B_3 adds °लिङ्गः.

गोपानसी तु वलभी छादनेऽवक्रदारुणि ।
कपोतपालिकायां तु विटङ्कं पुंनपुंसकम् ॥ १५ ॥

(वि.) गोपानसीति—गोपायतीति [1]गोपानसी। 'गुपू रक्षणे'। वलतीति[2] [3]वलभी। 'वल संवरणे'। [4]पटलोपस्थितस्यावक्रस्य दारुणो नामनी। वक्रदारुणीति वा [5]पदच्छेदः। तदा पटलप्रान्ते शिखेव स्थितस्य वक्रदारुणो नामनी ॥ कपोतान् पालयतीति कपोतपालिका। 'पाल रक्षणे'। विशिष्य[6] टङ्क्यतेऽत्रेति विटङ्कम्। 'टकि बन्धने'। पुंनपुंसके। वक्रदार्वधः पक्षिविश्रमाय [7]क्षिप्तस्य दारुणो नामनी ॥ १५ ॥

[1] गोपायतीति गोपा, नासेव नासा, गोपा चासौ नासा च Pt_2; 'गुपू गोपने' K_3, K_6.
[2] D_2, Pt_2 add संवृणोति.
[3] वलभिः B_1, D_2, I, K_2, K_3.
[4] °उपरि° K_6.
[5] पदविभागः K_2.
[6] विशिष्टं K_2, I, W_2.
[7] विक्षिप्तस्य K_5.

(पा.) गोपानसी—वक्रदारुणि । [1]वलभिच्छादनवक्रदारु गोपानसी स्यात् । ‘गोप्पुलु’ । कपोतपालिकायां—पुंनपुंसकम् । [2]कपोतादिपक्षिणामावासार्थं[3] निर्मितकाष्ठ-[4]विशेषनाम ॥ १५ ॥

[1] वलभी° B_3.　　[2] A_1 adds गृहासक्त°.　　[3] कपोतादीनाम् for पक्षिणाम् B_3.
[4] °दारु° B_3.

स्त्री द्वार्द्वारं प्रतीहारः स्याद् वितर्दिस्तु वेदिका ।
तोरणोऽस्त्री बहिर्द्वारं पुरद्वारं तु गोपुरम् ॥ १६ ॥

(वि.) स्त्रीति—द्वार्यते [1]जनोऽत्रेति द्वाः । रेफान्तस्त्रीलिङ्गः । द्वारं च । ‘द्वृ [2]संवरणे’ । प्रतिह्रियते नूतनो जनोऽत्रेति प्रतीहारः[3] । ‘हृञ् हरणे’ । गृहद्वारनामानि ॥ विगता तर्दिः श्रमोऽत्रेति वितर्दिः । ‘तर्द हिंसायाम्’ । श्रमं वितर्दयतीति वा । पथिकैर्विद्यते लभ्यत इति वेदिका । ‘विद्लृ लाभे’ । विदन्त्यस्यामिति वा । ‘विद ज्ञाने’ । वेदिकानामनी ॥ मङ्गलार्थं बन्धून् [4]त्वरयतीति तोरणम् । ‘तुर त्वरणे’ । द्वाराद्बहिः बहिर्द्वारम् । द्वाराद्बहिर्वन्दनमालाबन्धनाय[5] रचितस्तम्भद्वयनाम । गोप्यते [6]पौरैरिति गोपुरम् । ‘गुपू रक्षणे’ । पुरद्वारनाम ॥ १६ ॥

[1] F_2 adds नूतनो; वार्यते नूतनपुरुषोऽत्र Pt_2.　　[2] वरणे K_6; वारणे W_2.　　[3] प्रतिहारः K_6, W_2.　　[4] त्वरिता भवन्त्यत्र Pt_2.　　[5] मण्डनमाला° W_2.　　[6] पुरस्थैरिति F_2; शूरैः Pt_2.

(पा.) स्त्री—प्रतीहारः । द्वारनामानि ॥ स्यात्—वेदिका । वेदिकानामनी ॥ तोरणो—बहिर्द्वारम् । [1]बाह्यद्वारं तोरणं स्यात् । ‘तलवाकिलि’ । तदग्रे मङ्गलार्थमाबद्ध-[2]स्रग्विशेषोऽपि तोरणं स्यात् । ‘बुधैर्वन्दनमाला तु तोरणं परिकीर्तितम्[3]’ इति हलायुधः (अ. मा. २. १४६) । पुरद्वारं—गोपुरम् । नगरद्वारं गोपुरं स्यात् । ‘ऊरुवाकिलि’ ॥ १६ ॥

[1] बहिर्द्वारनाम B_3.　　[2] निबद्ध° B_3.　　[3] °कीर्त्यते A_1; मुद्रितग्रन्थे च.

कूटं पूर्द्वारि यद्धस्तिनखस्तस्मिन्नथ त्रिषु ।
कपाटमररं तुल्ये तद्विष्कम्भोऽर्गलं न ना ॥ १७ ॥

(वि.) कूटमिति—हस्तिनो [1]नखमिव तिष्ठतीति हस्तिनखः । पूर्द्वारमृत्कूटनाम ॥ [2]कं शिरः पाटयतीति कपाटम्[3] । कं वातं वटति वेष्टयतीति कवाटं वा । ‘पट भेदने’

‘वट वेष्टने’। इयर्ति यातायातप्रकारेणेति अररम्। ‘ऋ गतौ’। द्वारपिधाननामनी॥ तत् कपाटं विष्कभ्नातीति विष्कम्भः। ‘स्कम्भु[4] रोधनस्तम्भनयोः’। [5]अरेण कर्षणेन गलतीत्यर्गलम्। ‘गल अदने स्रवणे च’। कवाटानुद्घाटनाय निर्मितदारुयन्त्रनामनी॥ १७॥

---

[1] नख इव W_2. [2] Pt_2 adds प्रविशतां. [3] कैर्वातैः पाटयति भाव्रत इति वा। ‘पट शब्दे’ F_2, Pt_2. [4] ‘ष्कभि स्कभि प्रतिबन्धने’ K_3, K_6. [5] अरणे कर्षणे F_2; न गलतीत्यर्गलम् J_2, K_3, K_5; परेण K_5.

(पा.) कूटं—तस्मिन्। पुरद्वारेऽक्रमनिम्नमृत्कूटो हस्तिनखः स्यात्। ‘शनैरनीयन्त रयात् पतन्तो रथाः क्षितिं हस्तिनखादखेदैः’ इति माघः (शिशु. ३. ६८)। ‘वंकदारम्’। कवाटम्—तुल्ये। द्वारपिधाननामनी॥ त्रिलिङ्गः कवाटः। कवाटः, कवाटी, कवाटम्। [1]पवर्गमध्य इति रभसकोशकारेणाभ्यधायि। कपाटः कपाटीति। अररं नपुंसकमेव। ‘अथ त्रयी कपाटोऽपि कवाटोऽप्यररं न पुम्’ इति वैजयन्ती[2] (पृ. १६२, श्लो. ४६)। अररीत्यपचयविवक्षायां स्त्री। पुंलिङ्गोऽररिशब्दोऽप्यस्ति।

‘अप्यन्वेष्टुं रतिगृहगुहां गन्धवाहेन कार्ये
प्रेर्यन्तेऽमी परमररयो हर्म्यवातायनानाम्’।

इति चन्द्रकाव्यम्। अनुक्तम्—‘घर्घरो द्वितलादीनामधोद्वारकवाटिका’। द्वितलत्रितलादिगृहद्वारकवाटिका घर्घरः स्यात्। तद्विष्कम्भो—न ना। कवाटधारकलोहदण्डादिकमर्गलं स्यात्[3]। ‘द्वारयन्त्रं तु तालकम्’ इत्यल्पार्गलपर्यायश्च पृथक्। ‘तलुपुघडिय’। ‘वितण्डस्त्वर्गला त्रयी’ इत्ययस्तालकपर्यायोऽपि पृथक्। ‘बीगेमु’॥ १७॥

---

[1] पकारमध्यमः B_3, [2] ‘अथ त्रय्यौ कवाटोऽपि कुवाटोऽप्यररं न पुम्’ इति मुद्रितग्रन्थे. [3] दारुदण्डमयं यत्कवाटधारकम् A_1.

आरोहणं स्यात् सोपानं निश्रेणिस्त्वधिरोहिणी।
संमार्जनी शोधनी स्यात् संकरोऽवकरस्तथा॥ १८॥

(वि.) आरोहणमिति—आरोहन्त्यनेनेत्यारोहणम्। ‘रुह बीजजन्मनि प्रादुर्भावे च’। सह उपानमन्त्यत्रेति सोपानम्। ‘णम प्रह्वत्वे शब्दे’। सोपाननामनी॥ [1]निश्रयन्ति ऊर्ध्वतलमनयेति निश्रेणिः। ‘श्रिञ् सेवायाम्’। अधिरोहत्यनयेति अधिरोहिणी[2]। दारुनिर्मितसोपाननामनी॥ संमाष्टर्यनयेति[3] संमार्जनी। ‘मृजूष् शुद्धौ’। [4]शोधयत्यनयेति शोधनी। ‘शुध शौचे’। अङ्गणादौ [5]रजःसमूहनिराकरणसाधन-[6]

नामनी ॥ तृणादिना सह [7]कीर्यत इति संकरः। [8]अवकरश्च। 'कॄ विक्षेपे'। तया संमार्जन्या एकत्र क्षिप्तरजोनामनी ॥ १८ ॥

---

[1] निश्चयेन श्रयन्ति उन्नतस्थलमनयेति F_2, Pt_2.
[2] अधिरोहणी D_2.
[3] F_2 adds गृहादिकं; संमृज्यतेऽनया Pt_2.
[4] शुध्यतेऽनया F_2, Pt_2.
[5] K_2, K_3, K_5 add कीर्ण°.
[6] अपनयन° K_5.
[7] संकीर्यते अवकीर्यते Pt_2.
[8] अवक्षिप्यते धूल्यादिकमिति F_2.

(पा.) आरोहणं—सोपानम्। सोपाननामनी ॥ निश्रेणिः—अधिरोहिणी। अट्टाद्यारोहणार्थं वंशादिनिर्मितयन्त्रनामनी। 'निच्चेन' ॥ संमार्जनी—स्यात्। गृहाद् [1]रजस्तृणाद्यपनयनाय [2]निर्मितकामञ्जकादिसंदोहनामनी। '[3]पारक'। संकरो—क्षिप्ते। [4]संमार्जन्यपनीततृणराशिनामनी। 'कनवुकुप्प'। 'संमार्जनी [5]वर्धनी तन्मलेऽवकरसंकरौ' इति वैजयन्तीपाठात् (पृ. १६३, श्लो. ५२) संकरशब्दोऽबन्तः। 'संकारोऽग्निचटत्कारे संमार्जन्यवमार्जिते[6]' इति विश्वप्रकाशिकापाठात् (पृ. १३९, श्लो. १७९) संकारो घञन्तः। अनुक्तम्—'गोमुखं तूपवेशनम्[7]'। गृहाद्युपलेपननामनी। 'यिल्लुललुकुट[8]' ॥ १८ ॥

---

[1] रजःकण° A_1.
[2] कामलजकादि° A_1.
[3] 'चापुरु' B_3.
[4] °अवमर्जित° A_1.
[5] शोधनीति मुद्रितग्रन्थे.
[6] 'शङ्करोऽग्निचटत्कारे सम्मार्जन्यवपुञ्जिते' इति मुद्रितग्रन्थे.
[7] उपलेपनम् B_3.
[8] 'अलुकुट' B_3.

क्षिप्ते मुखं निःसरणं संनिवेशो निकर्षणम्।
समौ संवसथग्रामौ वेश्मभूर्वास्तुरस्त्रियाम् ॥ १९ ॥

(वि.) क्षिप्त इति—[1]गृहस्य मुखप्रायत्वात् मुखम्। [2]गृहान्निःसरन्त्यनेनेति निःसरणम्। 'सृ गतौ'। गृहादिपुरोदेशनामनी ॥ [3]समन्तात् निविशन्तेऽत्र संनिवेशः। 'विश प्रवेशने'। निवृत्तं कर्षणमत्रेति निकर्षणम्। 'कृष विलेखने'। पुरादेर्बहिर्विहरणभूनामनी[4] ॥ सम्यग् वसन्त्यत्रेति संवसथः। 'वस निवासे'। ग्रस्यते[5] भुज्यत इति ग्रामः। 'ग्रसु[6] अदने'। पुरादन्यकतिपयगृहसमूहनामनी ॥ वसन्त्यत्र [7]गृहिण इति [8]वास्तुः। वेश्मनो भूर्वेश्मभूः। वेश्मस्थानभूनामनी ॥ १९ ॥

---

[1] D_2 omits 3 lines.
[2] निःसार्यतेऽत्रेति K_6.
[3] संनिविशन्ते W_2.
[4] °भूमि° B_1.
[5] K_6 adds नियतैः; नियुक्तैः B_1, J_2, K_2, K_3, K_5.
[6] 'ग्रसु ग्लसु अदने' F_2, K_3, K_6.
[7] रक्षिणः F_2.
[8] वास्तु K_5; F_1, I add 'वस निवासे.'

(पा.) मुखं निःसरणम्.। [1]गेहादिपुरोभागनामनी ॥ संनिवेशो निकर्षणम्। गृहाद्यपरभागनामनी । 'इंट्टुवेनक' । समौ—ग्रामौ । ग्रामनामनी । तत्र परिवसथादि-[2]शब्दा अपि सन्ति । 'ग्रामः पर्युपसंनिभ्यः प्रतेश्च वसथः परः' इति वैजयन्ती (पृ. १५९, श्लो. २) ॥ वेश्मभूः—अस्त्रियाम् । गृहभूमिर्वास्तु स्यात् । वेश्मशब्द उपलक्षणम् । 'ग्रामादि-भूमिर्वास्त्वस्त्री' इति वैजयन्ती (पृ. १५९, श्लो. १०) ॥ १९ ॥

[1] गृहादि° B_3. [2] °आदयोऽपि B_3.

ग्रामान्तमुपशल्यं स्यात् सीमसीमे स्त्रियामुभे ।
घोष आभीरपल्ली स्यात् पक्कणः शबरालयः ॥ २० ॥

इति पुरवर्गः

(वि.) ग्रामान्तमिति—[1]ग्रामस्यान्तं[2] ग्रामान्तम् । उपगतः शल्यः कीलको यत्र चिह्नार्थं प्रक्षेपात् उपशल्यम् । 'शल[3] चलनसंवरणयोः' । ग्रामसमीपप्रदेशनामनी ॥ सीयते वध्यत इति सीमा । [4]नान्तः । सीमा आकारान्तस्त्रीलिङ्गश्च । 'षिञ् बन्धने' । ग्रामान्तनामनी ॥ घोषन्ति गावोऽत्रेति घोषः । '[5]घुषिर् अविशब्दने' । आभीराणां गोपानां पल्ली[6] ग्रामः आभीरपल्ली । गोपालग्रामनामनी ॥ पच्यते कदन्नमत्र पक्कणः । 'डुपचष् पाके' । शबन्ति भ्रमन्तीति शबराः । 'शब भ्रमणे' । तेषामालयः शबरालयः । शबरालयनामनी ॥ २० ॥

इति श्रीलिङ्गयसूरिविरचितायाममरकोशपदविवृतौ पुरवर्गः

[1] W_2 omits 3 lines. [2] F_2 adds समीपं. [3] 'शल गतौ' F_2; K_6 adds समीपभ्रमणे साधु वा. [4] प्रथमो नकारान्तः द्वितीयस्तु आकारान्तः F_2. [5] 'घुष घुष्टौ' F_2. [6] घृतादिक्रयार्थं जनैः पल्यते गम्यत इति पल्ली J_2; पलन्ति दध्यादिक्रयार्थमत्रेति, 'पल गतौ' F_2.

(पा.) ग्रामान्तम्—स्यात् । ग्रामान्तनाम ॥ अनुक्तम्—'प्रान्तरं ग्रामयोर्मध्यम्' । ग्रामद्वयमध्यं प्रान्तरं स्यात् ॥ सीमसीमे—उभे । सीमनामनी । 'द्व्यच्कमसिसुसन्नन्तम्' (३. ५. २४) इति विशेषविधिरबाधितः । 'सीमभिः सस्यसंपन्नैः' इति । 'मर्यादावधि

राघाटः’ । एतानि त्रीणि च ॥ घोषः—स्यात् । वल्लवपल्लीनाम[1] । पक्कणः शबरालयः । किरातालयः पक्कणः स्यात् ॥ २० ॥

इति [2]श्रीवत्सनृसिंहसूरिसुतमल्लिनाथसूरिविरचितेऽमरपदपारिजाते पुरवर्गः

[1] घोषः स्यात् A_1. [2] °नरसिंह° A_1.

---

३. शैलवर्गः

महीध्रे शिखरिक्ष्माभृदहार्यधरपर्वताः ।
अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः ॥ १ ॥

(वि.) महीध्र इति—महीं [1]धारयतीति महीध्रः । ‘धृञ् धारणे[2]’ । शिखराण्यस्य सन्तीति शिखरी । क्ष्मां बिभर्तीति क्ष्माभृत् । ‘डुभृञ् [3]भरणपोषणयोः’ । हर्तुमशक्यः अहार्यः । ‘हृञ् हरणे’ । धरति [4]भुवमिति धरः । ‘धृञ् [5]धारणे’ । पर्वाणि संधयोऽस्य सन्तीति पर्वतः । नराणामुपजीवनीयत्वाद्[6] अद्यत इत्यद्रिः । ‘अद भक्षणे’ । गां भुवं त्रायत इति गोत्रः । ‘त्रैङ् [7]पालने’ । कालेन गीर्यत इति गिरिः । ‘गॄ निगरणे’ । ग्रस्यते कालेनेति ग्रावा । ‘ग्रसु[8] अदने’ । न चलतीत्यचलः । ‘चल कम्पने’ । शिला अत्र सन्तीति शैलः । शिलानामुच्चयो राशिः शिलोच्चयः । पर्वतनामानि ॥ १ ॥

[1] कीलभूतो Pt_2; धरतीति W_2, Pt_2. [2] धरणे Pt_2. [3] धारण° F_2, W_2; ‘भृञ् भरणे’ F_2. [4] धरामिति K_6; धारयति F_2; W_2 adds धराधरश्च. [5] धरणे K_6, Pt_2. [6] उपजीव्यत्वात् K_6; जीव° F_1, K_2. [7] ‘त्रा रक्षणे’ K_6. [8] ‘ग्रसु ग्लसु अदने’ K_6, W_2.

(पा.) महीध्रे—शिलोच्चयाः । पर्वतनामानि । ‘कुत्कीलो भूधरः [1]कुण्डः कुण्डिरः[2] सानुमानपि’ । एतानि पञ्च च ॥ १ ॥

[1] कुड्डः A_1. [2] कुड्ढरः A_1.

लोकालोकश्चक्रवालस्त्रिकूटस्त्रिककुत् समौ ।
अस्तस्तु चरमक्ष्माभृदुदयः पूर्वपर्वतः ॥ २ ॥

(वि.) लोकालोक इति—एकस्मिन् भागे लोक्यते, एकस्मिन् भागे न लोक्यत इति [1]लोकालोकः। 'लोकृ दर्शने'। चक्राकारेण वलते संवृणोतीति चक्रवालः। 'वल संवरणे'। [2]भुवमावेष्ट्य स्थितस्य[3] गिरेर्नामनी ।। त्रयः कूटाः शिखराण्यस्येति त्रिकूटः। अत एव त्रिककुत्[4]। त्रिकूटपर्वतनामनी ।। [5]सूर्यादिरस्यते अत्रेत्यस्तः। 'असु क्षेपणे'। अस्तमनुपलब्धिं ग्रहनक्षत्राणां करोतीति वा। चरमः पश्चिमः स चासौ क्ष्माभृच्च चरमक्ष्माभृत्। चरमगिरिनामनी ।। सूर्यादयोऽत्र [6]उदयन्त इत्युदयः। 'अय पय गतौ'। पूर्वश्चासौ पर्वतश्च पूर्वपर्वतः। [7]उदयगिरिनामनी ।। २ ।।

[1] अस्याभ्यन्तरं सूर्यकिरणैः प्रकाश्यते न बाह्यमिति प्रकाशाप्रकाशतया लोक्यते न लोक्यत इति J_2, K_3, Pt_2. [2] भुवनम् B_1. [3] स्थितगिरेः K_6, W_2. [4] तिस्रः (त्रयः Pt_2) ककुदो यस्य F_2. [5] सूर्यादीनस्यत्यत्र W_2; सूर्यादिर्नश्यत्यत्र K_6. [6] उदयन्ति K_6; उद्यन्ति ग्रहाः सूर्यादयोऽस्मात् B_1, K_5, Pt_2. [7] पूर्वपर्वतनाम B_1, K_5.

(पा.) लोकालोकश्चक्रवालः। लोकालोकपर्वतनाम ।। त्रिकूटः—समौ। त्रिकूटपर्वतनामनी ।। अस्तः—क्ष्माभृत्। [1]अस्तपर्वतनाम। उदयः—पर्वतः। [2]पूर्वपर्वतनाम। अनुक्तम्—'मलयश्चन्दनाद्रिः स्यात्'। मलयपर्वतनाम ।। 'मन्थशैलस्तु मन्दरः'। मन्दरगिरिनाम। अस्तपर्वतमेव मन्दरपर्वत इति कतिचित् कथयन्ति। 'मन्दरोऽपरशैलोऽस्तः' इति धनपालनिघण्टुः ।। २ ।।

[1] चरम° B_3. [2] उदय° A_1.

हिमवान् निषधो विन्ध्यो माल्यवान् पारियात्रकः।
गन्धमादनमन्ये च हेमकूटादयो नगाः ।। ३ ।।

(वि.) हिमवानिति—हिममस्यास्तीति हिमवान्। निषीदन्ति [1]सुरा अत्रेति निषधः। 'षद्लृ विशरणगत्यवसादनेषु'। अगस्त्येन विद्धत्वाद् विन्ध्यः। 'व्यध ताडने'। [2]सूर्यपथं विध्यतीति वा। स[3] एव धातुः। [4]माल्याकारतास्यास्तीति[5] माल्यवान्। परितो यात्रा गमनमस्यास्तीति पारियात्रकः। गन्धेन [6]मादयतीति गन्धमादनः। 'मदी हर्षग्लपनयोः'। [7]अस्त्रियाम्। हेममयाः कूटा अस्य हेमकूटः। अन्ये च हेमकूटादयो गिरयः सन्ति। एतेषामुक्तान्येव नामानि प्रशस्तानि ।। ३ ।।

[1] गन्धर्वादयः K_5, K_6, W_2. [2] °पदवीं F_2, Pt_2. [3] B_1, D_2 omit. [4] माल्याकारत्वात् K_6, W_2; माल्यः for माल्यवान् K_2. [5] अत्र for अस्य K_5. [6] मदयति J_2; K_2, W_2, Pt_2 add हर्षयति. [7] अयं पुंलिङ्गेऽपि F_2, Pt_2.

(पा.) हिमवान्—गन्धमादनम्। 'अस्त्री कुलाचले ना तु मत्तेभे गन्धमादनम्' इति भागुरिमतान्नपुंसकम्। अन्ये च—नगाः। [1]हिमवदादयः पृथक्[2] पर्वताः ॥ ३ ॥

---

[1] हेमकूटादयः B_3. [2] पृथक् पृथक् A_1.

पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषत्।
कूटोऽस्त्री शिखरं शृङ्गं प्रपातस्तु तटो भृगुः ॥ ४ ॥

(वि.) पाषाणेति—वस्तूनि पिनष्टि चूर्णयतीति पाषाणः। 'पिष्लृ संचूर्णने'। प्रस्तृणाति आच्छादयति [1]भुवमिति प्रस्तरः। 'स्तृञ् आच्छादने'। [2]आतपादिभिस्तप्तः सन् [3]जलं गिरतीति ग्रावा। नान्तः। 'गॄ निगरणे'। उपलाति भिनत्ति वस्तूनीति उपलः। 'ला [4]आदाने'। अश्नुते व्याप्नोति [5]भुवमित्यश्मा। 'अशू व्याप्तौ'। वस्त्रादिकमश्नातीति वा। 'अश भोजने'। शिनोति तनूकरोत्यायुधमिति[6] शिला। 'शिञ् निशातने'। द्रून् वृक्षान् सादयतीति नाशयतीति दृषत्। 'षद्लृ विशरणगत्यवसादनेषु'। दृणातीति वा। 'दॄ विदारणे'। शिलादृषदौ स्त्रियौ। पाषाणनामानि ॥ कूट्यते दह्यते [7]रविणेति कूटः। 'कूट दाहे'। अयमस्त्री। [8]शिखा अग्रशिलात्रास्तीति शिखरम्। शृङ्गवदौन्नत्यगुणयोगात्[9] शृङ्गम्। शृणातीति[10] वा। 'शॄ हिंसायाम्'। शिखरनामानि[11] ॥ अस्मात् प्रपततीति प्रपातः। 'पत्लृ गतौ'। तटत्युच्छ्रायं प्राप्नोतीति तटः। 'तट उच्छ्राये'। भृज्ज्यते सूर्याग्नितेजसा पच्यत इति भृगुः। 'भ्रस्ज पाके'। शिखराद्धस्तटनामानि ॥ प्रपातस्त्वतटो भृगुरिति पाठे [12]अतटः प्रपातः [13]संकटदेशो भृगुरित्युच्यते ॥ ४ ॥

---

[1] महीम् K_5; भुवनम् D_2, F_1. [2] आतपाभितप्तत्वात् J_2, K_2, W_2. [3] पतितं सलिलं F_1, I. [4] दानादानखण्डनेषु F_1, J_2. [5] भुवनम् K_6. [6] क्षुरादिकम् F_2. [7] सूर्यकिरणेन F_2. [8] शिखेव Pt_2. [9] गुणात् B_1, F_1; गुणत्वात् J_2. [10] F_2, Pt_2 add हिनस्ति. [11] शृङ्गनामानि J_2. [12] न विद्यते तटं यस्य अतटः B_1, K_5. [13] स्वकटदेशः B_1, K_5.

(पा.) पाषाण—दृषत्। 'कषायः कूष्माण्डो महिषवृषभव्योषदृषदः' इत्यूष्मभेदपाठान्मूर्धन्यः। 'शरच्छरद्दृशत्त्रिंशश्चत्वारिंशश्च विंशतिः' इत्यरुणदत्तलिङ्गानुशासनपाठात् तालव्यमध्यः। तदा च दृशद् दृषदित्युभयथापि[1] पाठः साधुः। शिलानामानि ॥ कूटोऽस्त्री—शृङ्गम्। गिरिशिखरनामानि ॥ प्रपातस्तु—भृगुः। [2]संचारानर्हशिखराधस्तलनामानि। भाषया 'चरि' ॥ ४ ॥

---

[1] उभयत्र A_1. [2] आसारप्रसारानर्हकूटाधोदेशनामानि A_1.

कटकोऽस्त्री नितम्बोऽद्रेः स्नुः प्रस्थः सानुरस्त्रियाम् ।
उत्सः प्रस्रवणं वारिप्रवाहो निर्झरो झरः ॥ ५ ॥

(वि.) कटक इति—कटत्याकाशमावृणोतीति कटकः । 'कटे वर्षावरणयोः'। पर्वतस्य नितम्बप्रायत्वात् नितम्बः । अद्रिनितम्बनाम ॥ स्नौति जलमिति [1]स्नुः । 'ष्णु प्रस्रवणे'। [2]प्रतिष्ठन्तेऽस्मिन् समभूभागत्वात् प्रस्थः । 'ष्ठा गतिनिवृत्तौ'। सनोति [3]सुखं ददाति उपवेशन[4] इति सानुः । अस्त्रियाम् । 'षणु दाने'। फलकाकारावस्थितमहाशिलानामानि ॥ उनत्ति [5]जलसंपर्केणेत्युत्सः । 'उन्दी क्लेदने'। आपः प्रस्रवन्त्यस्मात् शिलासंध्यादाविति प्रस्रवणम् । 'स्रु गतौ'। पर्वतान्ताद् बहिर्निर्गताल्पस्यन्दितनीरनामनी[6] ॥ वारिणः प्रवाहः वारिप्रवाहः । निर्झीर्यते [7]कालेन स्वल्पो[8] भवतीति निर्झरः । झरश्च[9] । 'झॄष् वयोहानौ'। प्रवाहवत्प्रस्रवणनामानि ॥ ५ ॥

[1] Pt_2 adds स्नातीति, 'ष्णा शौचे'. [2] प्रतिष्ठते स्थावरादिरत्रेति K_6. [3] अवकाशं F_2. [4] उपवेशेन I. [5] अम्भसा Pt_2. [6] पर्वतान्ताद् बहिर्निर्गतस्य जलस्य नाम B_1, K_5. [7] काले K_2. [8] स्वल्पीभवति K_6. [9] निर्झरा झरा इति वा पाठः K_5, K_6.

(पा.) कटको—अद्रेः । अद्रिनितम्बप्रदेशनाम । स्नुः—अस्त्रियाम् । स्नुर्वप्रः सानुरस्त्रियाम् इति पाठान्तरम् । [1]तदधोगतविशालफलकशिलानामानि[2] ।

'आमेखलं संचरतां घनानां छायामधःसानुगतां निषेव्य ।
उद्वेजिता वृष्टिभिराश्रयन्ते श्रृङ्गाणि यस्यातपवन्ति सिद्धाः ॥'

इति कालिदासः (कु. सं. १. ५) । स्नुशब्दः प्रस्थवप्रशब्दसाहचर्यात् पुंलिङ्गः । वप्रशब्दः सानुशब्दसाहचर्यात् पुंनपुंसकः । 'स्नुः पुमानस्त्रियां वप्रः' इति जयकोशः । उत्सः प्रस्रवणम् । प्रस्यन्दननामनी । '[3]निल्लुगारुंट'। वारिप्रवाहो—झरः । 'झारी झरी झलश्चापि'। एतानि च । झरीत्युपचयविवक्षायां स्त्रीलिङ्गः । 'झरीदत्तपरीरम्भदरीसुप्तसरीसृपम्' इति । [4]निपत्य प्रवहदुदकनामानि ॥ अनुक्तम्—'नदी चेद्योजनातिगा'। योजनमतिक्रान्ता झरी नदीत्युच्यते ॥ ५ ॥

[1] B_3 omits °गत°. [2] °तलनामानि B_3. [3] 'ऊंट' B_3. [4] B_3 omits निपत्य and adds गिरि°.

दरी तु कन्दरो वा स्त्री देवखातबिले गुहा ।
गह्वरं गण्डशैलास्तु च्युताः स्थूलोपला गिरेः ॥ ६ ॥
(दन्तकास्तु बहिस्तिर्यक्प्रदेशान्निर्गता गिरेः)

(वि.) दरीति—दीर्यते दरी । 'दॄ विदारणे'। कं कुत्सितं दृणातीति [1]कन्दरः । केन जलेन दीर्यत इति वा । [2]भित्तिवद्धासमानपर्वतपार्श्वनामनी ॥ देवैः खन्यत इति देवखातम् । 'खनु अवदारणे'। विल्यत इति विलम् । 'बिल भेदने'। देवखातं च तद्बिलं च देवखातबिलम् । तस्मिन् गुहागह्वरशब्दौ वर्तेते । [3]गूहत्यन्धकारमिति गुहा । 'गुहू संवरणे'। सिंहादिभिर्गाह्यत इति गह्वरम्[4] । 'गाहू विलोडने'। [5]पर्वतान्तराकृत्रिमविवरनामनी ॥ गण्डा इव शैला गण्डशैलाः । गण्डाः [6]स्थूलाः शैला वा । भूकम्पादिना गिरिच्युतस्थूलोपलनाम ॥ ६ ॥

[1] कन्दरा वा B₁, K₅.　[2] कन्दर° B₁, K₅.　[3] गुह्यते F₂.　[4] गतिं ह्वरतीति, 'ह्वृ कौटिल्ये' Pt₂.　[5] दरीगृहनामनी B₁, I, K₅; देवखातबिलशब्दौ गुहापर्यायाविति केचित् I, K₅.　[6] गुरवः F₁, K₆; गिरेः च्युताः स्थूलोपला गण्डाकाराश्च ते शैलाकाराश्च गण्डशैलाः F₂.

(पा.) दरी—वा स्त्री । गिरिनारट्टनामनी । भाषया [1]'पर्वतमुयोक्कशिशु'। देव—गह्वरम् । [2]गुहानामानि ॥ षडपि पर्याया[3] इति केचित् । 'दरी [4]गुहा कन्दरोऽक्ली' इति वैजयन्ती (पृ. ४१, श्लो. ६)। गण्डशैलाः—गिरेः । गिरेः च्युताः पृथुलोपलाः[5] गण्डशैलाः स्युः । अनुक्तम्—'दन्तास्तून्नतपाषाणाः'। उच्चोपलनाम[6] । भाषया 'दक्कनिनिल्पुराल्लु'॥ ६ ॥

[1] 'लोय' B₃.　[2] सुरनिघातनामानि A₁.　[3] एकार्थके A₁.　[4] दरीगृह° B₃.　[5] पृथूपलाः B₃.　[6] °ला दन्ताः स्युः A₁.

खनिः स्त्रियामाकरः स्यात् पादाः प्रत्यन्तपर्वताः ।
उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका ॥ ७ ॥
धातुर्मनःशिलाद्यद्रेर्गैरिकं तु विशेषतः ।
निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे ॥ ८ ॥

इति शैलवर्गः

(वि.) खनिरिति—खन्यते [1]रत्नादिकमत्रेति खनिः । 'खनु अवदारणे'। स्त्रियाम् ॥ आकीर्यन्ते [2]धातवोऽत्रेत्याकरः । 'कॄ विक्षेपे'। लोहादिधातुखननस्थाननामनी ॥ [3]पादा इव तिष्ठन्तीति पादाः । प्रत्यन्ते समीपे पर्वताः प्रत्यन्तपर्वताः । समीपस्थक्षुद्रपर्वत-

नामनी ॥ उप समीपे भूरुपत्यका । अद्रेरासन्नभूमिनाम ॥ अद्रेरधिभूः ऊर्ध्वभूरधित्यका । अद्रेरूर्ध्वभूनाम ॥ धत्ते मिथो व्यावर्तकं धर्ममिति धातुः । 'डुधाञ् धारणपोषणयोः' । मनःशिलादिनाम ॥ गिरौ[4] भवं गैरिकम् । [5] धातुविशेषनाम ॥

'सुवर्णरौप्यताम्राश्महरितालमनःशिलाः ।
[6]गैरिकाञ्जनकांस्यादिलोहसीसाः सहिङ्गुलाः ।
गन्धकोऽभ्रकमित्याद्या धातवो गिरिसंभवाः ॥'

पक्षिणोऽत्र स्थित्वा निकूजन्तीति निकुञ्जः[7] । कुञ्जश्च । 'कूज अव्यक्ते शब्दे' । उभौ शब्दौ वा क्लीबे । गृहवद्भासमानलतापिहितप्रदेशनामनी ॥ ७–८ ॥

इति श्रीलिङ्गयसूरिविरचितायाममरकोशपदविवृतौ शैलवर्गः

[1] सुवर्णादिकम् K_6, W_2. [2] लोहादयः F_2, Pt_2. [3] अद्रेः पादा इव अधस्ताद्धारणाच्च पद्यन्त इति पादाः, 'पद्लृ गतौ' F_2. [4] गिरेः K_6, W_2; गिरौ भवतीति B_1. [5] विशेषधातुर्गैरिकमित्युच्यते F_2. [6] °कासीस° F_2. [7] निम्नप्रदेशे निकुञ्जश्च F_2; कावजनि कुञ्जः, 'जनी प्रादुर्भावे' Pt_2; कुञ्जन्ति K_6.

(पा.) खनिः—आकरः स्यात् । रत्नाद्युत्पत्तिस्थाननामनी[1] । भाषया 'गनि' । खानिशब्दोऽप्यस्ति । 'आकरश्च खनिः खानिः' इति व्यालिः । अनुक्तम्—'रुमा[2] तु लवणाकरः' । लवणखनी रुमा स्यात् । पादाः प्रत्यन्तपर्वताः । [3]अधःस्थितस्वल्पपर्वताः पादाः स्युः । उपत्यका—भूमिः । गिरेरासन्ना भूमिरुपत्यका स्यात् । ऊर्ध्वमधित्यका । ऊर्ध्वभूमिरधित्यका स्यात् । धातुः—अद्रेः । [4]हरितालं मनःशिलादिशिलाविकाराः[5] सर्वेऽपि सामान्यतो धातव एव[6] । गैरिकं—विशेषतः । गैरिकं विशेषतो धातुरित्युच्यते । 'गैरिकं[7] स्वर्णरेतोऽस्थिषु विशेषतः' इति वैजयन्ती (पृ. ४१, श्लो. ११) । निकुञ्ज—पिहितोदरे । लतादिभिः पिहितोदरस्य [8]प्रदेशस्य नामनी । 'पादरिळ्लु' ॥ ७–८ ॥

इति [9]श्रीवत्सनृसिंहसूरिसुतमल्लिनाथसुधीविरचितेऽमरपदपारिजाते शैलवर्गः

[1] खनिः स्यात् A_1. [2] B_3 adds इति वैजयन्ती. [3] प्रान्त° B_3. [4] B_3 adds अद्रेः संबन्धि. [5] °अश्म° B_3. [6] इत्युच्यन्ते B_3. [7] 'गैरिकं पीतधातुः स्यात्' इति मुद्रितग्रन्थे. [8] A_1 adds पर्वत°. [9] °नरसिंह° A_1.

४. वनौषधिवर्गः

[1]अटव्यरण्यं विपिनं गहनं काननं वनम् ।
महारण्यमरण्यानी गृहारामास्तु निष्कुटाः ॥ १ ॥

(वि.) अटवीति—अटन्त्यस्यां [2]वनेचरा[3] इत्यटवी । '[4]अट गतौ'। इयर्ति भ्राम्यति दुर्गमार्गत्वादत्रेत्यरण्यम् । 'ऋ गतौ'। वेपन्तेऽत्र भयादिति विपिनम् । 'टुवेपृ कम्पने'। गाह्यतेऽवगाह्यतेऽत्रेति गहनम् । 'गाहू विलोडने[5]'। अरण्यनामानि ॥ कन्यते गम्यते वानरादिभिरिति काननम् । 'कनी दीप्तिकान्तिगतिषु'। कं जलमननं प्राणनमस्येति वा । 'अन प्राणने'। फलवत्वाद् वन्यते सेव्यत इति वनम् । 'वन षण संभक्तौ'। बहुवृक्षलतादिप्रदेशमात्रनामनी ॥ एतानि षड् अरण्यस्यैव नामानीति केचित्[6] । महदरण्यं[7] महारण्यम् । अरण्यानी च । गृहे आरामा गृहारामाः । कुटाद् गृहान्निष्क्रान्तो निष्कुटः । गृहवननामनी ॥ १ ॥

[1] F_2, J_2 add इतःपरमटवीवर्ग आरभ्यते. [2] Pt_2 adds मृगयार्थं. [3] मृगादयः F_2; अटन्तीत्यटाः पश्वादयः, वयः पक्षिणः अत्रेति F_2. [4] 'अट पट गतौ' K_6, Pt_2. [5] विगाहने D_2. [6] W_2 omits rest of this Varga. [7] K_6 adds अत्रास्तीति.

(पा.) चूलीस्थलीमिलद्वालकलानिधिकलाङ्कुरैः ।
विकासयञ्छिवः पायात् कविताकुमुदाटवीम् ॥

अटवी—वनम् । [1]अटवीनामानि । '[2]वाटिका मलयं कक्ष्यम्'। एतानि च ॥ महारण्यमरण्यानी । महारण्यनामनी ॥ अनुक्तम्—'शुष्काटवी[3] तु कक्षः स्यात्'। शुष्ककाष्ठाटवीनाम[4] ॥ 'प्रस्तरस्तु तृणाटवी[5]'। तृणारण्यनामनी ॥ गृहारामस्तु निष्कुटः । [6]गृहकानननामनी ॥ १ ॥

[1] अटवि° A_1. [2] काटिका A_1. [3] °अटविस्तु A_1. [4] °काष्ठाटवि° A_1. [5] तृणाटविः A_1. [6] गेह° A_1.

आरामः स्यादुपवनं कृत्रिमं वनमेव यत् ।
अमात्यगणिकागेहोपवने वृक्षवाटिका ॥ २ ॥

(वि.) आराम इति—[1]आ समन्ताद् रमन्तेऽत्रेत्यारामः । 'रमु क्रीडायाम्'। [2]पुरस्य उप समीपे वनम् उपवनम् । पुरस्य बाह्योद्याननामनी ॥ वृक्षा वटन्ते वेष्टन्तेऽत्रेति

वृक्षवाटिका[3]। 'वट [4]वेष्टने परिभाषणे च'। पुष्पवाटिकेति वा पाठः। धनिनां वेश्यानां च [5]गृहोपवननाम ॥ २ ॥

[1] आरमन्ति Pt_2. [2] वनस्य B_1, J_2, K_6. [3] वटतीति वाटिका, वृक्षाणां वाटिका F_2, Pt_2. [4] परिवेष्टने K_6. [5] गृहवन° J_2, K_6.

(पा.) आरामः—वनमेव यत्। यत् कृत्रिमं वनं तदेवोपवनमारामश्च स्यात्। स्यादपवनम् इति पाठान्तरम्। 'कृत्रिमं वनमारामोऽपवनोपवने अपि' इति वैजयन्ती (पृ. ४५, श्लो. २)। वनमित्यपि भवति। 'नन्दनं वनमारामः' इति धनंजयः। अमात्य—वृक्षवाटिका। [1]अमात्यगणिकाग्रहणं [2]वैभवोपलक्षणार्थम्। 'किराटगृहवृक्षवाटिकासु' इति वासवदत्ता। [3]पुष्पवाटिकेति पाठान्तरम्। '[4]पुष्पवाटी त्वमात्यादेः' इति वैजयन्ती (पृ. ४५, श्लो. ४)। पुर्पवाटिकेत्यत्र सस्य पाक्षिको रेफादेशः ॥ २ ॥

[1] अमात्यानां गणिकानां च A_1. [2] धनिको° B_3. [3] पुर्पवाटिका A_1, B_3. [4] पुर्पवाटी A_1, B_3; मुद्रितपुस्तके पुष्पवाटीत्येव.

पुमानाक्रीड उद्यानं राज्ञः साधारणं वनम्।
स्यादेतदेव प्रमदवनमन्तःपुरोचितम् ॥ ३ ॥

(वि.) पुमानिति—आक्रीडन्ते जना अत्रेत्याक्रीडः[1]। 'क्रीडृ [2]विहारे'। उद्यान्ति[3] उद्योगं [4]कुर्वतेऽत्रेति [5]उद्यानम्। 'या प्रापणे'। सर्वसाधारणराजवननामनी ॥ प्रमदानां वनं प्रमदवनम्। प्रमदावनमिति वा। [6]राजस्त्रीविनोदवननाम ॥ ३ ॥

[1] आक्रीड्यते राजादिभिः K_5. [2] विहरणे K_6. [3] उद्यतन्ते, 'यती प्रयत्ने' F_2, K_5. [4] कुर्वन्ति J_2. [5] उद्यानवननाम K_6. [6] राजस्त्रीणां विनोदार्थम् I, J_2.

(पा.) पुमानाक्रीडः—वनम्। राजसाधारणोपवननामनी[1]। स्यादेतदेव—पुरोचितम्। अन्तःपुरोचितमेतदेव वनं प्रमदवनं स्यात्। ह्रस्वतृतीयः। 'प्रमदावनोपकण्ठनलिनीषु लताभवनेषु भूभुजः' इति दीर्घतृतीयश्च भवति। '[2]चारकर्मणि निष्णातः प्रविष्टः प्रमदावनम्' इति ॥ ३ ॥

[1] B_5 omits उप. [2] विचार° A_1.

वीथ्यालिरावलिः पङ्क्तिः श्रेणी लेखास्तु राजयः।
वन्या वनसमूहे स्यादङ्कुरोऽभिनवोद्भिदि ॥ ४ ॥

(वि.) वीथीति—वियन्ति गच्छन्त्यनयेति वीथी। 'वी गतिप्राप्तिप्रजनकान्त्यसनखादनेषु'। विथ्यतेऽत्रेति वा। 'विथृ याचने'। अलति भूषयति वनादिकमिति आलिः। 'अल [1]भूषणपर्याप्तिवारणेषु'। आवलते संवृणोतीति आवलिः। 'वल संवरणे संचरणे च'। पञ्च्यते वृक्षगणेनेति पङ्क्तिः। 'पचि व्यक्तीकरणे'। श्रीयते[2] स्वशोभयेति श्रेणिः। 'श्रिञ् सेवायाम्'। वृक्षादिवीथिनामानि ॥ अक्षररेखावल्लिख्यन्त इति लेखाः। 'लिख अक्षरविन्यासे'। राजन्त इति राजयः। 'राजृ दीप्तौ'। अतिसंनिकृष्टवीथिनामनी ॥ वनानां समूहो वन्या। वनसमूहनाम ॥ अङ्कयते बीजं भित्त्वा दृश्यत[3] इत्यङ्कुरः। 'अकि लक्षणे'। उद्भिद्यते[4] बीजमनेनेति उद्भित्। 'भिदिर् विदारणे'। प्रत्यग्रप्ररोहनाम ॥ ४ ॥

---

[1] भूषणशक्ति° K_6.　　[2] श्रयते शोभामिति B_1, K_5.　　[3] लक्ष्यते F_2, Pt_2.
[4] उद्भिनत्ति भुवं बीजं च F_2, Pt_2.

(पा.) वीथी—श्रेणिः। पङ्क्तिनामानि। 'धोरणिः पद्धतिः पालिः'। एतानि च। [1]सान्तरालवृक्षादीनां पङ्क्तेर्नामानि ॥ लेखास्तु राजयः। [2]निरन्तरालतृणादीनां श्रेणिनामनी ॥ वन्या—स्यात्। वनसमूहनाम ॥ अङ्कुरोऽभिनवोद्भिदि। [3]नवोद्भिद्यङ्कुरः स्यात्। 'अङ्किलः प्ररोहोऽप्यत्रेति' [4]सुभूतिटीकावचनात् प्राकृतरूपस्यापि ग्रहणम्। 'अङ्कुरोऽङ्कूरमस्त्रियाम्' इति वैजयन्तीपाठात्तु[5] (पृ. ४५, श्लो. १०) [6]अङ्कूरोऽपि स्यात्। 'मोलक' ॥ ४ ॥

---

[1] विरल° B_3.　　[2] निरन्तरतत्पङ्क्तिनामनी B_3.　　[3] अभिनव° B_3.　　[4] टीकाकार° A_1.　　[5] वचनात् B_3.　　[6] 'स्यादङ्कुरोऽङ्कूरमस्त्रियौ' इति मुद्रितग्रन्थे.

वृक्षो महीरुहः शाखी विटपी पादपस्तरुः।
अनोकहः कुटः शालः पलाशी द्रुद्रुमागमाः ॥ ५ ॥

(वि.) वृक्ष इति—वृश्च्यते छिद्यते कुठारादिनेति वृक्षः। 'ओव्रश्चू छेदने'। [1]वृक्षत इति वा। 'वृक्ष वरणे'। वृणोतीति वा वृक्षः। 'वृञ् वरणे'। मह्यां रोहतीति महीरुहः। 'रुह बीजजन्मनि प्रादुर्भावे च'। शाखा अस्य सन्तीति [2]शाखी। विटपा अस्य सन्तीति विटपी। पादैर्मूलैरुदकं पिबतीति पादपः। 'पा पाने'। तरन्त्यातपमनेनेति तरुः। 'तॄ प्लवनतरणयोः'। अनसः शकटस्य अकं [3]गतिं हन्तीति अनोकहः। 'हन हिंसागत्योः'। कुटति शाखादिना वक्रीभवतीति कुटः। 'कुट कौटिल्ये'। शाल्यते पुष्पफलादिनेति शालः।

'शाल्ट श्लाघायाम्'। [4]साल इति पाठे सीयते भिद्यते[5] सालः[6]। 'षोऽन्तकर्मणि'। पलाशानि पर्णानि सन्त्यस्येति पलाशी। [7]दीर्यत इति द्रुः। [8]द्रुमश्च। 'दृ विदारणे'। न गच्छतीत्यगमः। 'गम्लृ गतौ'। वृक्षसामान्यनामानि ॥ ५ ॥

[1] वृक्षतीति F₂. [2] शाखतीति वा, 'शाखृ व्याप्तौ' F₂. [3] गमनं J₂, Pt₂.
[4] सल्यते गम्यते जनैरिति, 'षल गतौ' F₂, Pt₂. [5] छिद्यते D₂, J₂, K₅. [6] अयमपि पाठः B₁, F₁, I. [7] द्रूयते द्रुः, 'द्रु गतौ' Pt₂. [8] द्रुः वृक्षावयवोऽस्य Pt₂.

(पा.) वृक्षो—अगमाः। तरुनामानि। 'कुजो रूक्षोऽगच्छश्च[1]'। एतान्यपि च ॥ ५ ॥

[1] अगच्छंश्च A₁; नगच्छंश्च B₃.

वानस्पत्यः फलैः पुष्पात् तैरपुष्पाद् वनस्पतिः ।
ओषध्यः फलपाकान्ताः स्युरवन्ध्यः फलेग्रहिः ॥ ६ ॥

(वि.) वानस्पत्य इति—वनस्य पतिः वनस्पतिः। पुष्पैर्विना [1]फलवद्वृक्षनाम ॥ वनस्पतौ भवः वानस्पत्यः। पुष्पवत्फलजनकवृक्षनाम ॥ वनस्पतिरुदुम्बरादिः। वानस्पत्यः चूतादिः ॥ ओषं दाहं [2]धयन्तीत्योषध्यः। 'धेट् पाने'। ओषो दाहो धीयतेऽत्रेति वा। 'डुधाञ् धारणपोषणयोः'। फलपाक एवान्तो यासां ताः फलपाकान्ताः। फलमुत्पाद्य पाकानन्तरं [3]विनश्वरप्ररोहनाम[4] ॥ व्रीह्यादिरोषधिः। न वन्ध्योऽवन्ध्यः। फलानि गृह्णातीति[5] फलेग्रहिः। 'ग्रह उपादाने'। अनिष्फलवृक्षादिनाम ॥ ६ ॥

[1] फलजनक° F₂, J₂. [2] D₂, K₅ add पिबति नाशयति. [3] विनाश° K₅.
[4] F₂, J₂, K₂, K₃ add °मात्र°. [5] F₂ adds धारयति.

(पा.) वानस्पत्यः—पुष्पात्। [1]पुष्पफलितमाकन्दादिर्वानस्पत्यः स्यात्। तैः—वनस्पतिः। अपुष्पफलितपनसादिर्वनस्पतिः स्यात्। वृक्षमात्रमपि वनस्पतिर्भवति। '[2]सालो वनस्पतिरगो विटपी कुटश्च[2]' इति हलायुधः (अ. मा. २. २२)। ओषध्यः—पाकान्ताः। फलपाकनाशिन्यः कदल्यादय ओषध्यः स्युः। अत्र बहुवचनमतन्त्रम्। 'ओषधिः फलपाकान्ता' इति वैजयन्ती (पृ. ४५, श्लो. ६)। स्यात्—फलेग्रहिः। अवन्ध्यतरुनामनी ॥ स्युरवन्ध्यादयस्त्रिषु (श्लो. ८) इत्यनेन त्रिलिङ्गाः। अवन्ध्यो वृक्षः। अवन्ध्या लता ॥ ६ ॥

[1] पुष्पित° A₁. [2] शालो इति कुठ इति च मुद्रितग्रन्थे.

वन्ध्योऽफलोऽवकेशी च फलवान् फलिनः फली ।
प्रफुल्लोत्फुल्लसंफुल्लव्याकोशविकचस्फुटाः ॥ ७ ॥
फुल्लश्चैते विकसिते स्युरवन्ध्यादयस्त्रिषु ।

(वि.) वन्ध्य इति—स्वगतवैगुण्येन [1]फलानि [2]बध्नातीति वन्ध्यः । 'बन्ध [3]बन्धने' । न [4]सन्ति फलान्यस्य अफलः । अवकं शून्यमीष्टे पालयतीत्यवकेशी । 'ईश ऐश्वर्ये' । निष्फलवृक्षनामानि ॥ फलानि सन्तीति फलवान् । फलिनश्च । फली च । फलाढ्यवृक्षादिनामानि ॥ प्रफुल्लति उत्फुल्लति संफुल्लतीति प्रफुल्लः उत्फुल्लः संफुल्लश्च । 'फुल्ल विकसने' । प्रफलतीति वा प्रफुल्लः । 'ञिफला विशरणे' । विगत आकोचः संकोचो यस्य सः व्याकोचः । 'कुच संकोचने' । व्याकोश इति पाठे व्यावृत्तः कोशः संकोचोऽस्मादिति व्याकोशः । विगतः कचो मुकुलावस्था[5] अस्य विकचः । '[6]कचि दीप्तिबन्धनयोः' । स्फुटति विकसतीति स्फुटः । 'स्फुट विकसने'[7] । विकसितवृक्षादिनामानि ॥ अवन्ध्यादयः फुल्लान्ताः शब्दास्त्रिषु लिङ्गेषु वर्तन्ते ॥ ७ ॥

---

[1] फलनिष्पत्तिं K_6. [2] प्रतिबध्नाति F_1, J_2, K_2, K_3. [3] 'बधि संयमने' K_6; F_1, I add बवयोरभेदः. [4] न विद्यन्ते F_2, K_5. [5] बन्धनं F_2. [6] 'कच बन्धने' Pt_2. [7] F_2, Pt_2 add फुल्लतीति फुल्लः, 'फुल्ल विकसने'.

(पा.) वन्ध्यो—अवकेशी च । वन्ध्यतरुनामानि ॥ फलवान्—फली । फलिततरुनामानि ॥ प्रफुल्लो—विकसिते । [1]पुष्पितपादपादिनामानि ॥ '[2]दलितोन्मिषितोन्निद्राः प्रफुल्लश्च विजृम्भितः' । एतानि च ॥ स्युः—त्रिषु । एते त्रिलिङ्गाः ॥ ७ ॥

---

[1] विकसित° B_3. [2] 'उत्फुल्लोन्मिषितोन्निद्रा उद्बुद्धोन्मीलितस्मिताः' इति मुद्रितवैजयन्त्याम्.

स्थाणुर्वा ना ध्रुवः शङ्कुर्ह्रस्वशाखाशिफः क्षुपः ॥ ८ ॥
अप्रकाण्डे स्तम्बगुल्मौ वल्ली तु व्रततिर्लता ।
लता प्रतानिनी वीरुद् गुल्मिन्युलप इत्यपि ॥ ९ ॥

(वि.) स्थाणुरिति—वायुना [1]विहतोऽपि तिष्ठतीति [2]स्थाणुः । 'ष्ठा गतिनिवृत्तौ' । चलनाभावाद् ध्रुवतीति ध्रुवः । 'ध्रुव[3] गतिस्थैर्ययोः' । शङ्कतेऽस्मात्[4] तस्करादिकमिति शङ्कुः । 'शकि शङ्कायाम्' । सर्वशाखाव्यपेतवृक्षमूलनामानि ॥ ह्रस्वाः शाखाः शिफाः

यस्य सः क्षुप इत्युच्यते। [5]दवाग्निना दह्यमानः क्षौतीति क्षुपः। 'टुक्षु शब्दे'। अल्पशाखावृक्षनाम॥ न प्रकाण्डोऽस्य अप्रकाण्डः। स्कन्धेन विनापि तिष्ठतीति स्तम्बः। 'ष्ठा गतिनिवृत्तौ'। गुडति चोरादिभीतान्[6] गुल्मः। 'गुड रक्षायाम्'। स्कन्धरहितवृक्षनामनी॥ वलते वेष्टते यष्ट्यादिकमिति वल्ली। 'वल [7]संवरणे'। प्रकृष्टा ततिर्विस्तारोऽत्र[8] व्रततिः। 'तनु विस्तारे'। प्रतनोतीति वा। पकारस्य वकारप्राप्तिः। लाति वेष्टनाय यष्ट्यादिकमिति लता। 'ला आदाने'। लतानामानि॥ प्रतानोऽस्त्यस्याः प्रतानिनी लता वीरुत्। [9]विरोहतीति वीरुत्। 'रुह बीजजन्मनि प्रादुर्भावे च'। विरुणद्धीति वा। 'रुधिर् आवरणे'। [10]गुल्मो लतासमूहोऽस्या अस्तीति गुल्मिनी। उलत्यावृणोतीत्युलपः। 'उल आवरणे'। उभ्यते गुल्मादिना मिश्रीभवतीति वा उलपः। 'उभ पूरणे'। [11]मिथोऽत्यन्तसंश्लेषलतासमूहनामानि॥ ८–९॥

[1] निहतः B_1, K_5. [2] स्थाणुशब्दो विकल्पेन पुंलिङ्गः K_5; नपुंसकलिङ्गः B_1. [3] 'ध्रुव स्थैर्ये' F_2, K_3, K_5, K_6. [4] F_2, Pt_2 add पुरुषधिया. [5] दावाग्निना F_2, Pt_2. [6] °भीतेः K_6. [7] संवेष्टने K_3. [8] अस्याः F_2, J_2. [9] विविधं रोहति F_2, Pt_2. [10] B_1 omits 10 lines. [11] अत्यन्तसंश्लिष्ट° D_2, F_1.

(पा.) स्थाणुरस्त्री—शङ्कुः। भग्नसर्वशाखवृक्षनामानि[1]। '[2]मोटचट्टु'। ह्रस्व—क्षुपः। [3]वामनशाखाजटस्तरुः क्षुपः स्यात्। इतः परं प्रसिद्धेनाप्रसिद्धं विबोधनीयमिति न्यायमनुसृत्य प्राय आन्ध्रभाषया नामानि व्याहरामः। 'कुरुचकोम्मलु उडलुगलचेट्टु क्षुपमु'। छुप इत्यप्यस्ति। 'छुपः क्षुपः स्पर्शनयोः' इति विश्वप्रकाशिका (पृ. १०३, श्लो. ३)। अप्रकाण्डे—गुल्मौ। [4]प्रकाण्डविरहितवृक्षादेर्नामनी। 'गोरिंट्टमोदयनवि'। वल्ली—लता। लतानामानि॥ लता—इत्यपि। [5]परस्परसंश्लिष्टद्राक्षादेर्नामानि। लताग्रहणात् [6]परस्परसंश्लिष्टकेतक्यादेर्नामानि न भवन्ति॥ ८–९॥

[1] °द्रुम° B_3. [2] 'मोरडु' B_3. [3] वामनानां शाखानां A_1. [4] A_1 adds °नखरञ्जक°. [5] A_1 adds °अत्यन्त°. [6] तादृश° B_3.

नगाद्यारोह उच्छ्राय उत्सेधश्चोच्छ्रयश्च सः।
अस्त्री प्रकाण्डः स्कन्धः स्यान्मूलाच्छाखावधिस्तरोः॥१०॥

(वि.) नगाद्यारोह इति—[1]उत् श्रयणमुच्छ्रायः। उच्छ्रयश्च। 'श्रिञ् सेवायाम्'। उत्सेधयतीति उत्सेधः। 'षिध गत्याम्'। वृक्षाद्युन्नतत्वनामानि॥ प्रकाम्यते फलरक्षणा-[2]दिभिरिति प्रकाण्डः। 'कमु कान्तौ'। स्कन्द्यतेऽधिरुह्यत[3] इति स्कन्धः। 'स्कन्दिर् गतिशोषणयोः'। मूलादारभ्य शाखान्तस्य तरोर्मध्यदेशनामनी॥ १०॥

[1] नगस्य वृक्षस्य, आरुह्यत इत्यारोहः F_2; उत् श्रयतीति K_6.

[2] °रक्षणार्थिभिः F_2, K_6.

[3] कथंचिदारुह्यते K_5, K_6.

(पा.) नगाद्यारोहः—उच्छ्रयश्च सः। वृक्षादीनामूर्ध्वमाननामानि। अस्त्री प्रकाण्डः—तरोः[1]। मूलप्रभृति शाखावधेर्वृक्षभागनामनी। तत्र मूलभागः प्रकाण्डः। शाखाभागः स्कन्धः। 'स्कन्धादधः प्रकाण्डः स्यात् प्रधानः स्कन्ध उच्यते' इति हलायुधः (अ. मा. २. २७) ॥ १० ॥

---

[1] °अवधेः for अवधिः A_1.

समे शाखालते स्कन्धशाखाशाले शिफाजटे।
शाखाशिफावरोहः स्यान्मूलाच्चाग्रं गता लता॥ ११ ॥

(वि.) समे इति—शाखति दिशो व्याप्नोतीति शाखा। 'शाखृ व्याप्तौ'। [1]लतति दिशो व्याप्नोतीति लता। 'लति व्याप्तौ'। वृक्षशाखानामनी॥ स्कन्धस्य शाखा स्कन्धशाखा। स्कन्धात् निर्गता शाखेति वा। शालते शाला। 'शाड़ृ श्लाघायाम्'। स्कन्धशाखानामनी॥ शिनोति तनूकरोति वृक्षमूलमिति शिफा। 'शिञ् निशातने'। जटति [2]संघीभवतीति जटा। 'जट संघाते'। वृक्षमूलनामनी॥ अवरोहति लम्बत इत्यवरोहः। 'रुह बीजजन्मनि प्रादुर्भावे च'। वृक्षशाखाग्रलम्बिजटाया[3] वृक्षमूलादूर्ध्व-[4]संगतायाश्च शाखाया नाम॥ ११ ॥

---

[1] लाति वेष्टनार्थं यष्ट्यादिकमिति F_2, Pt_2.

[2] समूहीभवति J_2, Pt_2.

[3] अवलम्बि° I, J_2, K_3, K_5.

[4] मूलादग्रं गता शाखा लता Pt_2.

(पा.) समे—लते। शाखामात्रनामनी॥ स्कन्ध—शाले। प्रधानशाखानामनी। 'पेनुगोन्न'॥ शिफाजटे। पतन्त्याः शाखाया नामनी। 'पड्डुगोम्म[1]'। शाखा—स्यात्। [2]शाखातोऽधःप्रसृताया जटाया नाम॥ मूलात्—लता। मूलादारभ्याग्रं गता वल्ल्यप्यवरोहः स्यात्॥ ११ ॥

---

[1] 'पड्डुकोम्म' B_3.

[2] शाखायाः पातोऽवरोहः स्यात् A_1.

शिरोऽग्रं शिखरं वा ना मूलं बुध्नोऽङ्घ्रिनामकः।
सारो मज्जा नरि त्वक् स्त्री वल्कं वल्कलमस्त्रियाम् ॥१२॥

(वि.) शिरोऽग्रमिति—श्रीयते स्वाङ्गं शिरः। 'श्रिञ् सेवायाम्'। अगतीत्यग्रम्। 'अग कुटिलायां गतौ'। शिखा अग्रशाखा अस्यास्तीति शिखरम्। वृक्षशिरोनामानि॥ मूल्यतेऽनेनेति [1]मूलम्। 'मूल [2]प्रतिष्ठायाम्'। बध्यन्ते स्थिरीक्रियन्ते उद्भिदादयोऽनेनेति बुध्नः। 'बन्ध बन्धने'। अङ्घ्रेर्नाम पादपर्यायो यस्य अङ्घ्रिनामकः। वृक्षादेरङ्घ्रिसंज्ञिकभागनामानि॥ [3]कालान्तरेऽपि सरतीति सारः। 'सृ गतौ'। मज्जति दारुणोऽन्तरिति मज्जा। '[4]टुमस्जो शुद्धौ'। [5]नकारान्तः। वृक्षान्तःसारनामनी। [6]त्वच्यन्ते आव्रियन्तेऽनयेति त्वक्। 'त्वच संवरणे'। [7]वलते संवृणोतीति वल्कम्। वल्कलं च। 'वल संवरणे'। वृक्षत्वचो नामानि॥ १२॥

---

[1] मूलतीति F_2, Pt_2. [2] 'मूल रोहणे' F_1, K_6. [3] कालान्तरमपि F_2.
[4] 'मज्ज निमज्जने' K_6. [5] आकारान्तः स्त्रीलिङ्गोऽपि F_2. [6] त्वचति आवृणोति Pt_2.
[7] वल्यते K_5.

(पा.) शिरोऽग्रं—वा ना। अग्रनामनी। 'कोन'। मूलं—नामकः। मूलनामानि। 'वेरु'। नामशब्दः पादादिपर्यायग्रहणार्थः॥ सारो—नरि। स्थिरांशनामनी। 'चाव'। मज्जा नान्तः॥ त्वक्—अस्त्रियाम्। तर्वादित्वङ्नामनी॥ अस्त्रीशब्दो वल्कलमात्रविशेषणम्। '[1]वल्कलश्चोलकोऽस्त्रियाम्' इति वैजयन्ती (पृ. ४६, श्लो. १३)॥ १२॥

---

[1] 'वल्कलं चोलकोऽस्त्रियौ' इति मुद्रितपुस्तके.

काष्ठं दार्विन्धनं त्वेध इध्ममेधः समित् स्त्रियाम्।
निष्कुहः कोटरं वा ना वल्लरी मञ्जरी स्त्रियौ॥ १३॥

(वि.) काष्ठमिति—काशते [1]दैर्घ्येणेति काष्ठम्[2]। 'काशृ दीप्तौ'। दीर्यते कुठारादिनेति दारु। 'दॄ विदारणे'। [3]भिन्नशाखानामनी॥ इध्यतेऽग्निरनेनेति इन्धनम्। इध्मं च। 'ञिइन्धी दीप्तौ'। एधतेऽग्निरनेनेति एधः। सान्तः[4]। अजन्तश्च, पुमानयम्। 'एध वृद्धौ'। समिध्यतेऽग्निरनयेति समित्। स्त्रियाम्। 'ञिइन्धी दीप्तौ'। अग्निसमिन्धनार्थकाष्ठनामानि॥ निष्कुहयते [5]विस्मापयत्यत्यन्तविस्तृतत्वादिति निष्कुहः। 'कुह विस्मापने'। कुटिलसुषिरत्वात् कुटतीति कोटरम्। 'कुट कौटिल्ये'। निष्कुटमिति वा पाठः। वृक्षगतविवरनामनी॥ वल्लते संवृणोति शाखामिति वल्लरी वल्लरिर्वा[6]। मन्यते कोकिलादिभिर्बहुमन्यत इति मञ्जरी। मञ्जरिर्वा। 'मनु अवबोधने'। सकुड्मलनवा-[7]विर्भूतवृक्षशाखानामनी॥ १३॥

[1] अग्निना समं F_2, Pt_2. [2] कासते कुत्सयते स्वविकलं स्थाणुमिति वा, 'कासृ कुत्सायाम्' D_2, J_2. [3] छिन्न° F_2. [4] नपुंसकलिङ्गः, एधोऽयमकारान्तः पुंलिङ्गः B_1, F_1, K_5. [5] अतिविस्तृत° B_1, K_3. [6] F_2 adds 'वल वल्ल संवरणे'. [7] प्रवालभूत° B_1, K_5.

(पा.) काष्ठं दारु। शुष्कवृक्षनामनी। 'पुंनपुंसकयोर्दारुजीवातुस्थाणुशीधवः'[1] इति त्रिकाण्डशेषः (प्र. ३७, श्लो. १०३६)॥ इन्धनं—स्त्रियाम। एध इति सान्तप्रथमा। द्वितीय एधोऽदन्तः। समिदिति धान्तः स्त्रियाम्। उदाहरणानि—'अनलायागरुचन्दनैधसे' (रघु० ८. ७१)। 'एधान् हुताशनवतः स मुनिर्ययाचे' (रघु० ९. ८१)। द्वे समिधावाधायेति। 'वंटचरुकु'। 'आलाज्यं सर्पणं शुष्कम्'। एतानि च। [2]गरहादयो विशेषवचनाः। 'काष्ठेन्धनं तु [3]गरहं गोकरीषेन्धनं बुसा' इति वैजयन्ती (प्र. ९१, श्लो. ९७)। निष्कुहः—वा ना। तरुसुषिरनामनी। 'तोर्'। निष्कुट इति क्वचित् पाठः। निष्कुष इति क्वचित्। निष्कूट इत्यपि। 'तरुनिष्कूटगतश्चकार चिन्ताम्' इति वालभारते। वल्लरी—स्त्रियौ। सकिसलयनवतरुशाखानामनी। 'चिगुरुकोम्म'॥ मञ्जाशब्दोऽपि। 'वल्लरिर्मञ्जरिर्मञ्जा'[4] इति वैजयन्ती (प्र. ४६, श्लो. २०)॥ १३॥

[1] सीधव इति मुद्रितग्रन्थे; शीधवः पादटिप्पण्यां च. [2] गहरादयः B_3 [3] गहरं B_3. [4] 'मञ्ज्यां मञ्जरिवल्लरी' इति मुद्रितपुस्तके.

पत्रं पलाशं छदनं दलं पर्णं छदः पुमान्।
पल्लवोऽस्त्री किसलयं विस्तारो विटपोऽस्त्रियाम्॥ १४॥

(वि.) पत्रमिति—पतति [1]वृक्षसकाशादिति पत्रम्। 'पत्लृ गतौ'। पल्यते भिद्यत[2] इति पलाशम्। 'पल छेदने'। पलाश्यते ग्रस्यत इति वा। परपूर्वः 'अश भोजन' इति धातुः। रलयोरभेदः। [3]छाद्यते वृक्षोऽनेनेति छदनम्। छदश्च। 'छद अपवारणे'। दलति शीर्यत इति दलम्। 'दल विशरणे'। पिपर्ति वृक्षं पूरयतीति पर्णम्। 'पॄ पालनपूरणयोः'। वृक्षपर्णनामानि॥ पलति वायुवशाच्चलतीति पल्लवः। 'पल गतौ'। अयमस्त्रियाम्। किंचित् सलतीति किसलयम्। 'षल गतौ'। नवत्वेनारुणत्वमापन्नदलनामनी॥ विस्तीर्यते तरुरनेनेति विस्तारः। 'स्तृञ् आच्छादने'। विटान् गृहच्युतान् पातीति [4]विटपः। 'पा रक्षणे'। विटति आक्रोशयति वा। 'विट [5]आक्रोशे'। वृक्षविस्तारनामनी॥ १४॥

[1] वृक्षात् F_2, Pt_2. [2] छिद्यते B_1; अपलश्यते छिद्यत इति वा, 'लश छेदने' F_2. [3] छद्यते J_2, K_6. [4] वटति वेष्टयति वा, 'वट वेष्टने' F_2, Pt_2. [5] 'विट शब्दे' J_2; आक्रोशने B_1.

(पा.) पत्रं—छदः पुमान्। पत्रनामानि। ‘आकुलु’। पल्लवो—किसलयम्। पल्लवनामनी। ‘चिगुरु’॥ किसलशब्दोऽपि। ‘किसलं स्यात् किसलयं पुंसि क्लीबे च पल्लवम्’ इति [1]व्याडिः। विस्तारो—अस्त्रियाम्। पल्लवितशाखानामनी॥ १४॥

---

[1] व्यालिः B_3.

वृक्षादीनां फलं सस्यं वृन्तं प्रसवबन्धनम्।
आमे फले शलाटुः स्याच्छुष्के वानमुभे त्रिषु॥ १५॥

(वि.) वृक्षादीनामिति—फलतीति फलम्। ‘फल निष्पत्तौ’। सस्ति वृक्षमधिशेते सस्यम्। ‘षस स्वप्ने’। वृक्षलतादिफलनामनी॥ [1]वृणोति स्वीकरोति पुष्पमिति वृन्तम्। ‘वृञ्[2] वरणे’। प्रसूयत इति प्रसवः। ‘षु प्रसवैश्वर्ययोः’। बध्यतेऽनेनेति बन्धनम्। ‘बन्ध बन्धने’। प्रसवाः पुष्पफलपत्राणि तेषां बन्धनम्। पुष्पादीनां लतादिसंबन्धघटकनालादियुक्तस्य नाम॥ शलति पुष्टिमापद्यत इति शलाटुः[3]। ‘शल [4]गतौ’। अपक्वफलनाम॥ वायति शुष्यतीति वानम्। ‘पै ओवै शोषणे’। शुष्कफलनाम॥ उभे त्रिषु। उभे शलाटुवाननामनी त्रिषु लिङ्गेषु वर्तेते॥ १५॥

---

[1] वृणीते Pt_2. [2] ‘वृङ् संभक्तौ’ K_3, Pt_2. [3] शलति पुष्टिमापद्यते शलः। शलश्चासौ अटुश्च शलाटुः F_2, Pt_2. [4] ‘शल चलनसंवरणयोः’ Pt_2.

(पा.) वृक्षादीनां—सस्यम्। वृक्षादिफलनाम। ‘ग्राम्यकविकथाबन्ध इव नीरसस्य-मनोहरो देशः’ इति नलदमयन्तीश्लेषाद् द्विदन्त्यः। वृन्तं—बन्धनम्। पुष्पफलबन्धनं वृन्तं स्यात्। ‘तोडिमे’। प्रसवबन्धनमिति करिकलभवत्प्रयोगः। ‘प्रसवः पिप्पलं सस्यं फलं वृन्तं तु बन्धनम्’ इति वैजयन्ती (पृ. ४६, श्लो. २०)। आमे—स्यात्। अपक्वफलनाम। ‘काय’।

‘शार्दूलशम्बलपलाशशलाटुशाटी-
शुण्ठीशटीशरदशोकशुभप्रकाशाः।’

इत्यूष्मभेदपाठात् तालव्यादिः। शुष्के वानम्। शुष्कफलनाम। उभे त्रिषु। शलाटुवानशब्दौ द्वौ त्रिलिङ्गौ। शलाटवो माषाः, वानाश्चणकाः॥ १५॥

क्षारको जालकं क्लीबे कलिका कोरकः पुमान्।
स्याद् गुच्छकस्तु स्तबकः कुड्मलो मुकुलोऽस्त्रियाम्॥१६॥

(वि.) क्षारक इति—क्षरति प्रसूत इति क्षारकः। 'क्षर संचलने'। [1]समूहावस्थावत्त्वात् जलतीति जालकम्। 'जल घातने'। नवकलिकावृन्दस्य नामनी॥ कल्यते प्रसूनमिति शब्द्यते कलिका। 'कल शब्दसंख्यानयोः'। कुर्यते शब्द्यते कोरकः। 'कुर शब्दे'। अत्यन्ताविकसितपुष्पनामनी॥ अत्र कोरकशब्दोऽस्त्री[2]। [3]गूयते साधुरिति गुच्छकः। 'गुङ् शब्दे'। स्तूयत इति स्तबकः। 'ष्टुञ् स्तुतौ'। विकसितपुष्पसंघातस्य नामनी[4]॥ कुटति कुटिलभावमीषद्व्रजति [5]कुट्मलः। 'कुट कौटिल्ये'। मुञ्चति कलिकावस्थामिति मुकुलः। 'मुच्लृ मोक्षणे'। [6]अयमस्त्रियाम्। ईषद्विकसितकलिकानामनी॥ १६॥

[1] समूहवत्त्वात् K_6; समूहावस्थासत्त्वात् B_1. [2] पुंसि F_2. [3] गुर्यते, 'गुरी शब्दे' F_2, K_6. [4] F_2 adds:

'एकप्ररोहे पुष्पाणि पृथग् यत्र बहूनि च।
पुष्पगुच्छस्य विजयो यथा स्यात् करवीरके॥'

[5] कुड्मलः K_2. [6] K_2 adds मुकुलः.

(पा.) क्षारको—पुमान्। अत्यन्ताविकसितकुसुमनामानि। 'मुग्ग'। रूपभेदसिद्धलिङ्गे विशेषविधिरनित्यज्ञापकः। तेन—

'मरुदवनिरुहां रजो वधूभ्यः
समुपहरन् विचकार कोरकाणि।' (शिशु. ७. २६)

स्यात्—स्तबकः। पुष्पगुच्छनामनी। 'पुव्वलगुत्ति'। गुच्छक इति चकार-छकारसंयोगी। 'गुच्छो गुलुच्छः स्तबकः' इति वैजयन्ती (पृ. ४६, श्लो. २०)। 'स्तबको गुच्छको गुच्छः' इति हलायुधः (अ. मा. २. ३३)। सुभूतिटीकायां 'गुपस्सकि (?) गुत्स' इति तकारसकारसंयोगयुक्तः। 'गुत्सो गुञ्चो गुलुच्छकः। [1]गुलुञ्छश्चार्धवासिते' इति शेषे। अर्धवासित इत्युत्तरान्वयि॥ कुड्मलो—अस्त्रियाम्। अर्धविकसितकोरकनामनी। 'अरविरिमोग्ग'। केषांचित् कुड्मलकोरकावेकार्थौ। 'कोरकजालककलिकाकुड्मलमुकुलानि तुल्यानि' इति हलायुधः (अ. मा. २. ३१)॥ १६॥

[1] 'गुलुंछः परिकीर्तितः' इति हलायुधः।

स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम्।
मकरन्दः पुष्परसः परागः सुमनोरजः॥ १७॥

(वि.) स्त्रिय इति—सुष्ठु मन्यते जनैरिति सुमनाः। सान्तः स्त्रियाम्। 'मनु[1] अवबोधने'। पुष्प्यतीति पुष्पम्। 'पुष्प विकसने'। प्रसूयत[2] इति प्रसूनम्। 'षूङ् प्राणिप्रसवे'। कुस्यति [3]भ्रमरादिना संश्लिष्यतीति कुसुमम्। 'कुस [4]संश्लेषणे'। [5]सुनोतीति सुमम्। 'षु प्रसवैश्वर्ययोः'। सममिति वा पाठः। पुष्पनामानि॥ मङ्क्यते मण्ड्यते पुष्पमनेनेति मकरन्दः। 'मकि मण्डने'। पुष्पाणां रसः पुष्परसः। पुष्परसनामनी॥ परागच्छति [6]वायुनेति परागः। सुमनसां रजः सुमनोरजः। पुष्परजोनामनी॥ १७॥

---

[1] 'मन ज्ञाने' F_2. [2] प्रसूते K_2. [3] भ्रमरादिरिति K_5. [4] श्लेषणे B_1, F_1, K_2, K_5. [5] सवति J_2. [6] वायुवेगेन F_1, J_2, K_2; वायुवशेन K_5.

(पा.) स्त्रियः—सुमम्। पुष्पनामानि। सुमनःशब्द एकवचनान्तोऽपि। 'पुष्पं सुमनाः कुसुमम्' इति नाममाला। पुष्पशब्दः पुंलिङ्गोऽपि। 'पुष्पोऽस्त्री कुसुमं सुमम्' इति वैजयन्ती (पृ. ४६, श्लो. १८)। प्रयोगश्च—

'आरामसीमनि यथा वियति प्रसन्ने
तारास्तथैव विलसन्ति कदम्बपुष्पाः।'

इति। 'प्रसूतमुद्गमं फुल्लं लतान्तं तरुजं तथा'। एतानि च॥ मकरन्दः पुष्परसः। पुष्परसनाम। 'मरन्दो मकरन्दोऽस्य [1]रसः' इति वैजयन्ती (पृ. ४६, श्लो. १९)। आसवमधूलिकादिपदान्यपि प्रपञ्चयन्ति—

'भ्रान्तः पलाशकुसुमासवसौरभज्ञः
प्राप्तोऽद्य मामिति वृथा न विधेहि गर्वम्।
जातेर्वियोगविधुरस्फुटदावबुद्ध्या
भृङ्गस्त्वदीयकुसुमानि परं विवेश॥'
'अहो मे सौभाग्यं मम च भवभूतेश्च [2]फणितं
तुलायामारोप्य प्रतिफलति तस्यां लघिमनि।
गिरां देवी सद्यः श्रुतिकलितकल्हारकलिका-
मधूलीमाधुर्यं क्षिपति परिपूर्त्यै स्मितमुखी[3]॥'

इत्यादि॥ परागः सुमनोरजः। पुष्पधूलिनामनी। अनुक्तम्—'निर्यासः स्यात् द्रुमरसः खपुरो वेष्टको लशः'। तरुरसनामानि। 'वङ्क'॥ १७॥

---

[1] रसे इति मुद्रितग्रन्थे. [2] भणितं, धटायाम् इति च मुद्रितग्रन्थे. [3] भगवती (भो. प्र. पृ. ५६, श्लो. २५३).

द्विहीनं प्रसवे सर्वं हरीतक्यादयः स्त्रियाम् ।
आश्वत्थवैणवप्लाक्षनैयग्रोधैङ्गुदं फले ॥ १८ ॥
बार्हतं च फले जम्ब्वा जम्बूः स्त्री जम्बु जाम्बवम् ।

(वि.) द्विहीनमिति—सर्वं वक्ष्यमाणं प्रसवे मूलपुष्पफलादौ वर्तमानं वृक्षलतौषधिजातं द्विहीनं स्त्रीपुंलिङ्गहीनं भवति। नपुंसकमेवेत्यर्थः[1]। लुप्ततद्धितान्तं[2] च भवति। चम्पकस्य पुष्पं चम्पकम्। आम्रस्य फलम् आम्रम्। [3]द्विहीनस्यापवादमाह—हरीतक्यादयः स्त्रियामिति। हरीतकीकोशातकीकेतकीधात्र्यादयः फले प्रसवे वर्तमानाः प्रकृतिः[4] हरीतकीशब्दवत् स्त्रियां वर्तन्ते। कथम्? हरीतक्याः फलं हरीतकी। एवं[5] कोशातकीत्यादि। लुप्ततद्धितान्तस्यापवादमाह—आश्वत्थेत्यादि। एते शब्दाः फले[6] प्रसवे वर्तमाना अलुप्ततद्धितान्ता भवन्ति। न तु चूतादिशब्दवत्। अश्वत्थस्य फलम् आश्वत्थम्। वेणोरिदं वैणवम्। प्लक्षस्य फलं प्लाक्षम्। न्यग्रोधस्य फलं नैयग्रोधम्। इङ्गुद्याः[7] फलम् ऐङ्गुदम्। बृहत्याः फलं बार्हतम्। जम्बूशब्दः फले वर्तमानः स्त्रीरूपत्वं [8]भजते। कथम्? जम्ब्वाः फलं जम्बूः। पक्षे जम्बु जाम्बवं च॥ १८॥

---

[1] इति यावत् J_2, Pt_2. [2] लुप्ततद्धितं K_6. [3] B_1 omits one page.
[4] स्वप्रकृतिः F_2. [5] F_2 adds कोशातक्याः फलं कोशातकी. [6] फलप्रसवे D_2, F_1.
[7] इङ्गुदस्य Pt_2. [8] स्त्रीरूपं भवति F_1.

(पा.) द्विहीनं—सर्वम्। वक्ष्यमाणशब्दजातं सर्वं पुष्पफलमूलादौ वर्तमानं सत् नपुंसकलिङ्गं भवति। चम्पकस्य पुष्पं चम्पकम्। कदम्बम्। करवीरम्। 'पुष्पमूलेषु बहुलम्' (वा. ४. ३. १६६) इति बहुलवचनादुत्पन्नप्रत्ययस्य लुक् च। आम्रस्य फलमाम्रम्। दाडिमम्। तिन्दुकम्। 'फले लुक्' (४. ३. १६३) इति लुक्। हरीतक्यादयः स्त्रियाम्। हरीतक्यादयः फले वर्तमानाः स्त्रीलिङ्गाः। हरीतक्याः फलं हरीतकी। कोशातकी, द्राक्षा। 'हरीतक्यादिभ्यश्च' (४. ३. १६७) इति लुप्। 'लुपि युक्तवद्व्यक्तिवचने' (१. २. ५१) इति प्रकृतिलिङ्गता। आश्वत्थ—बार्हतं च। अश्वत्थादयः फले नपुंसकलिङ्गाः। अश्वत्थस्य फलमाश्वत्थमित्यादि। 'प्लक्षादिभ्योऽण्' (४. ३. १६४) इत्यनपवादकाण्विधानसामर्थ्यान्न लुक्। एवं वैणवादीनामपि। चकाराद् गणपठितशिग्र्वादेरपि। शैग्रवमित्यादि॥ फले—जाम्बवम्। जम्बूफले जम्बूः स्त्रीलिङ्गः। 'लुप् च' (४. ३. १६६) इति लुप्। जम्बुजाम्बवशब्दौ नपुंसकौ। 'जम्ब्वा वा' (४. ३. १६५) इति विभाषाण्। पक्षे 'ओरञ्' (४. २. ७१)। तस्य लुक् जम्बु। अणि जाम्बवम्॥ १८॥

पुष्पे जातीप्रभृतयः स्वलिङ्गा व्रीहयः फले ॥ १९ ॥
विदार्याद्यास्तु मूलेऽपि पुष्पे क्लीबेऽपि पाटला ।

(वि.) पुष्प इति—[1]जातीमालती[2]यूथिकादयः[3] पुष्पे प्रसवे वर्तमानाः स्वलिङ्गा भवन्ति। कथम्? [4]जात्याः पुष्पं जाती। एवं [5]मालत्यादयः। व्रीहयः फले। व्रीहिशब्द-बहुवचनेन गोधूमादयो गृह्यन्ते। व्रीहियवगोधूमादयः फले प्रसवे वर्तमानाः स्वलिङ्गाः प्रकृतिलिङ्गा भवन्ति। कथम्? व्रीहीणां फलानि व्रीहयः। [6]एवं गोधूमादयः। विदारी-[7]गान्धार्यंशुमत्यादयो मूले वर्तमानाः स्वलिङ्गाः प्रकृतिलिङ्गा भवन्ति। अपिशब्दात् परेऽपि। कथम्? विदार्याः फलं मूलं [8]वा विदारी। एवं [9]गान्धार्यादि। पाटलशब्दः पुष्पप्रसवे वर्तमानः क्लीबेऽपि। अपिशब्दात् स्वलिङ्गश्च भवति। कथम्? पाटलायाः पुष्पं पाटलं पाटला वा ॥ १९ ॥

---

[1] J_2, K_2 add पुष्पे जातिप्रभृतयः स्वलिङ्गाः. [2] मल्लिका F_1, I, K_5; शेफालिका F_2. [3] प्रभृतयः F_1. [4] जातेः कुसुमं जातिः Pt_2. [5] मल्लिकायाः कुसुमं मल्लिका Pt_2. [6] मुद्गस्य फलं मुद्गः, माषस्य फलं माषः Pt_2. [7] गन्धारी Pt_2. [8] Pt_2 adds कुसुमं वा. [9] गन्धार्याः फलं मूलं कुसुमं वा गन्धारी Pt_2.

(पा.) पुष्पे—स्वलिङ्गाः। पुष्पे वर्तमाना जातिप्रभृतयः प्रकृतिलिङ्गाः। जातिर्मल्लिका यूथिका नवमालिका। 'पुष्पमूलेषु बहुलम्' (वा. ४. ३. १६६) इति लुप्। व्रीहयः फले। व्रीहयः फले प्रकृतिलिङ्गाः। माषा यवास्तिला मुद्गाः। [1]लुक्प्रकरणे 'फलपाकशुषाम्' (वा. ४. ३. १६६) [1]इति लुबुपसंख्यानात्[2] ॥ विदार्या—मूलेऽपि। विदार्याद्या मूले प्रकृतिलिङ्गाः। विदारी, अंशुमती, शतावरी, बृहती, अपिशब्दात् पुष्पे यथादर्शनं प्रकृतिलिङ्गता। बृहत्याः पुष्पमपि बृहतीति ॥ पुष्पे—पाटला। पाटलाशब्दः पुष्पे वर्तमानो नपुंसकलिङ्गः प्रकृतिलिङ्गश्च भवति। पाटलं, पाटला ॥१९॥

---

[1] 'लुप्प्रकरणे फलपाकशुषामुपसंख्यानम्' इति काशिकायाम् (पृ. ३६२). [2] A_1 adds लुप्.

बोधिद्रुमश्चलदलः पिप्पलः कुञ्जराशनः ॥ २० ॥
अश्वत्थेऽथ कपित्थे स्युर्दधित्थग्राहिमन्मथाः ।
तस्मिन् दधिफलः पुष्पफलदन्तशठावपि ॥ २१ ॥

(वि.) बोधिद्रुम इति—इह वृक्षलतौषधीनां नामान्यान्ध्रभाषयैव[1] वक्ष्यामः। [2]बोधिसंज्ञको द्रुमः बोधिद्रुमः। स्वल्पेऽपि वाते [3]चलानि दलानि यस्य चलदलः। सेवितारं[4] पातीति पिप्पलः। 'पा रक्षणे'। कुञ्जरैरश्यत इति कुञ्जराशनः। 'अश भोजने'। कुञ्जराणामशनमिति वा। अश्वरूपेणाग्निरस्मिन् तिष्ठतीति अश्वत्थः। अश्वत्थनामानि। 'राविचेट्टु'॥ कपीनां प्रियत्वेन तिष्ठतीति कपित्थः। 'ष्ठा गतिनिवृत्तौ'। दधिवत्[5] फलन् तिष्ठतीति दधित्थः। [6]ग्राहिफलत्वात् ग्राही। 'ग्रह उपादाने'। नान्तः। फलैः कपिमनो मथ्नातीति[7] मन्मथः। 'मन्थ विलोडने'। दधिवदम्लं ग्राहिफलमस्य दधिफलः। पुष्पात्[8] फलमस्येति पुष्पफलः। पुष्प्यति फलति चेति वा। 'पुष्प विकसने'। 'फल निष्पत्तौ'। आम्लत्वात् [9]दन्तान् शठतीति दन्तशठः। 'शठ कैतवे च'। चशब्दात् हिंसासंक्लेशनयोः। कपित्थनामानि। 'वेलङ्गचेट्टु'[10]॥ २०–१॥

---

[1] कर्णाटकभाषायां J_2. [2] बुध्यतेऽनेनेति बोधिः, 'बुध अवगमने', बोधिश्चासौ द्रुमश्च F_2, Pt_2. [3] चलन्ति D_2, K_6. [4] भक्तान् Pt_2. [5] दधीव तिष्ठति Pt_2; दध्युपेतवत् K_6. [6] विष्टम्भत्वात् Pt_2. [7] F_2, Pt_2 add बध्नाति. [8] पुष्पाण्येव फलानि B_1. [9] दन्तानां शठः F_2, Pt_2. [10] 'वेललमर' J_2.

(पा.) बोधिद्रुमः—अश्वत्थे। अश्वत्थनामानि। 'राविचेट्टु'। द्रुमशब्दो द्रुमाभिधानख्यापनाय। 'श्रीवृक्षः पिप्पलोऽश्वत्थो बुधैर्बोधिश्च कथ्यते' इति हलायुधः (अ. मा. २. ४१)॥ अथ कपित्थे—दन्तशठावपि। कपित्थनामानि। 'वेलग'॥ २०–१॥

उदुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः।
कोविदारे चमरिकः कुद्दालो युगपत्रकः॥ २२॥

(वि.) उदुम्बर इति—उन्नतत्वाद् उल्लङ्घितमम्बरं [1]येनेत्युदुम्बरः। उन्दनाद्वा। 'उन्दी क्लेदने'। जन्तवः क्रिमयः फले यस्य [2]जन्तुफलः। [3]यूपादियज्ञाङ्गत्वात्[4] यज्ञाङ्गः। हेमवर्णं दुग्धं क्षीरमस्य हेमदुग्धकः। उदुम्बरनामानि। 'अत्तिचेट्टु'॥ कुं [5]भुवं [6]विदारयतीति कोविदारः। 'दॄ विदारणे'। चमरसदृशमञ्जरित्वात्[7] चमरिकः। कुं भुवं [8]मूलैर्दालयतीति कुद्दालः। 'दल विशरणे'। युगानि पत्राणि यस्य युगपत्रकः। कोविदारनामानि। '[9]काञ्चनपुचेट्टु॥ २२॥

---

[1] अनेन F_2, Pt_2. [2] जन्तुयुक्तं फलमस्येति F_2, Pt_2. [3] यूपादिरूपेण J_2, Pt_2. [4] Pt_2 adds उपकरणमिति. [5] भूमिं J_2, Pt_2. [6] विदृणाति J_2. [7] मञ्जरी° J_2, Pt_2. [8] दलयति K_6, Pt_2; दलति D_2, J_2. [9] 'काबालमर' J_2.

(पा.) उदुम्बरो—हेमदुग्धकः । उदुम्बरनामानि । 'मेडि'। कोविदारे—युगपत्रकः । कोविदारनामानि । 'काञ्चनमु'। 'कञ्जदारः काञ्चनारः'। एते च ॥ २२ ॥

सप्तपर्णो विशालत्वक् शारदो विषमच्छदः ।
आरग्वधे राजवृक्षशम्याकचतुरङ्गुलाः ॥ २३ ॥
आरेवतव्याधिघातकृतमालसुवर्णकाः ।

(वि.) सप्तपर्ण इति—[1]सप्त पर्णानि यस्य सप्तपर्णः । विशाला त्वक् यस्य विशालत्वक् । शरदि [2]पुष्पोद्गमात् शारदः । शारदीति वा स्त्रीलिङ्गः । [3]विषमाः छदाः पत्राणि यस्य विषमच्छदः । सप्तपर्णनामानि । 'एडाकुल यरटिचेट्टु'॥ आरञ्जयन्तीति आरजः फलाकारा मलास्तेषां वधः छेदनमस्यास्मिन्निति वा आरग्वधः । राजा चासौ वृक्षश्च राजवृक्षः । रोगराजं वृश्चति छिनत्तीति वा । 'ओव्रश्चू छेदने'। शमीमकत्यनुगच्छतीति [4]शम्याकः । 'अक अग कुटिलायां गतौ'। चतुरङ्गुलपर्णपर्वकत्वात् चतुरङ्गुलः । आरेवते उत्प्लुत्य गच्छति रोगोऽनेनेति आरेवतः । 'रेवृ प्लव गतौ'। आरेव खड्ग इव रोगदेवतां हन्तीति वा । व्याधिं हन्तीति[5] व्याधिघातः । फलैः कृता माला यस्य कृतमालः । सुवर्णाकाराणि पुष्पाणि यस्य सुवर्णकः । सुवर्णकनामानि । 'रेलचेट्टु'॥ २३ ॥

---

[1] प्रतिपर्व सप्त पर्णानि Pt_2. [2] पुष्प्यतीति F_2, Pt_2; शारदीति वा पाठः K_5, Pt_2. [3] Pt_2 adds सप्तपर्णत्वात्. [4] सम्यक् पाकोऽत्र सम्पाक इति वा पाठः। शं कल्याणः पाकोऽत्रेति वा Pt_2. [5] 'हन हिंसागत्योः' K_6.

(पा.) सप्तपर्णो—विषमच्छदः । सप्तपर्णनामानि । 'येडाकुलरटु'। शारदीशब्दोऽपि । 'शारदी तोयपिप्पल्यां सप्तपर्णे च शारदी' इति रुद्रः । सांकर्यं पुंस्त्वज्ञापनार्थम् ॥ 'शारदः [1]सप्तपर्णः स्याद् बृहत्त्वक् ग्रहनाशनः' इति रत्नकोशः । आरग्वधे—सुवर्णकाः । आरग्वधनामानि । 'रेल चेट्टु'॥ अरग्वधशब्दोऽपि । 'आरग्वधस्तु शम्याकः कृतकूलोऽप्यरग्वधः' इति रत्नमाला । अर्ग्वधशब्दोऽपि । '[2]अर्ग्वधे तु व्याघातः' इति वैजयन्ती (पृ. ४९, श्लो. ४८) ॥ २३ ॥

---

[1] सप्तपर्णेभ्यो बृहत्यः B_3. [2] 'आरग्वध आरवेतः शम्याकः प्रग्रहोऽर्ग्वधः' (पृ. ४९, श्लो. ४८) इति, 'आर्ग्वधे तु व्याघातश्चतुरङ्गुलः' इति च मुद्रितग्रन्थे.

स्युर्जम्बीरे दन्तशठजम्भजम्भीरजम्भलाः ॥ २४ ॥
वरुणे वरणः सेतुस्तिक्तशाकः कुमारकः ।
पुंनागे पुरुषस्तुङ्गः केसरो देववल्लभः ॥ २५ ॥

(वि.) स्युरिति—जम्यते [1]भक्ष्यत इति जम्बीरः । 'जमु अदने'। दन्तान् शठति [2]हिंसयति आम्लत्वेनेति दन्तशठः । 'शठ हिंसासंक्लेशनकैतवेषु'। जम्भयति मोहयतीति जम्भः । जम्भीरः जम्भलश्च । 'जभी गात्रविनामे'। जम्भीरनामानि । 'निम्मिचेट्टु'॥ वृणोति आवृणोतीति वरुणः । 'वृञ् वरणे'। वरणश्च । आवरणकारित्वात् सेतुः । सिनोति व्याधिं हन्तीति वा । 'षिञ् बन्धने'। [3]तिक्तश्चासौ शाकश्च तिक्तशाकः । सदा तरुणत्वात् कुमारकः । वरणनामानि । 'उलिमिरि चेट्टु'॥ पूजितः पुमान् पुंनागः । पुंनाग इव पुंनागः । पुरुषवदुन्नतत्वात् पुरुषः । तुङ्गश्च । तुज्यत इति तुङ्गः । 'तुजि हिंसायाम्'। प्रशस्ताः केसराः सन्त्यस्य केसरः । देवानां वल्लभः प्रियः देववल्लभः । पुंनागनामानि । 'सुरपोन्नचेट्टु'॥ २४–५ ॥

[1] भुज्यते B_1, K_5.   [2] हिनस्ति K_6; दन्तानां शठः अम्लत्वेन F_2, Pt_2.   [3] तिक्तरसः शाकोऽस्य Pt_2.

(पा.) स्युर्जम्बीरे—जम्भलाः । [1]जम्बीरनामानि । [2]'निम्म'॥ वरणे—कुमारकः । वरणवृक्षनामानि । 'उविमिरि चेट्टु'। 'मटमाविनपेरुन्नु'॥ पुंनागे—देववल्लभः । पुनागनामानि । 'पोन्नचेट्टु'। सुरपुंनाग इति तद्भेदः । 'नमेरुः सुरपुंनागः'। इति निघण्टुसर्वंकषः । 'सुरपोन्नचेट्टु'॥ २४–५ ॥

[1] जम्भीर° B_3.   [2] B_3 adds 'चेट्टु'.

पारिभद्रे निम्बतरुर्मन्दारः पारिजातकः ।
तिनिशे स्यन्दनो नेमी रथद्रुरतिमुक्तकः ॥ २६ ॥
वञ्जुलश्चित्रकृच्चाथ द्वौ पीतनकपीतनौ ।
आम्रातके मधूके तु गुडपुष्पमधुद्रुमौ ॥ २७ ॥
वानप्रस्थमधुष्ठीवौ जलजेऽत्र मधूलकः ।

(वि.) पारिभद्र इति—परितो भद्रमस्य पारिभद्रः । नयत्यारोग्यमिति निम्बः । 'णीञ् प्रापणे'। स चासौ तरुश्च निम्बतरुः । [1]मन्दाः सूक्ष्मा अराः कण्टका यस्य

मन्दारः। मन्दारशब्दसाहचर्यात् पारिजातकः। पारिणः समुद्राज्जातः पारिजातकः। निम्बतरुनामानि। 'पारिजातवृक्षमु'॥ [2]चिरजीवित्वादतिक्रान्ता [3]निशा येन तिनिशः। स्यन्दनोपयोगित्वात्[4] स्यन्दनः। रथचक्रान्ते[5] नमतीति नेमिः। 'णम प्रह्वत्वे शब्दे च'। नेमी वा। रथाय द्रुर्वृक्षो रथद्रुः। अतिविस्तृतत्वाद् अतिमुक्तकः। वन्यतेऽर्थ्यत[6] इति वञ्जुलः। 'वनु याचने'। [7]लघुत्वेऽपि दार्ढ्यदैर्ध्याभ्यामाश्चर्यं करोतीति चित्रकृत्। 'डुकृञ् करणे'। अतिमुक्तकनामानि। 'नेम्मिचेट्टु'। पीतयति वस्त्रादिकं रसेन पीतीकरोतीति पीतनः। मिष्टैः फलैः कपीनां [8]प्रीतिं तनोतीति कपीतनः। 'तनु विस्तारे'। आम्रमततीषदनुगच्छतीति आम्रातकः। 'अत सातत्यगमने'। आम्लवत् कपिभिरद्यत इति वा आम्लातकः। 'अद भक्षणे'। रलयोरभेदः। आम्रातकनामानि। '[9]अम्बालपुचेट्टु'॥ मधुरसः उच्यते युज्यतेऽत्रेति मधूकः। 'उच समवाये'। गुडवन्मधुराणि पुष्पाणि यस्य गुडपुष्पः। मधुप्रधानो द्रुमो मधुद्रुमः[10]। वनप्रस्थे वनस्थले भवो वानप्रस्थः। मधु ष्ठीवतीति[11] मधुष्ठीवः। 'ष्ठिवु निरसने'। मधुष्ठील इति पाठे मधु ष्ठीले गर्भेऽस्य मधुष्ठीलः[12]। मधु उलत्यावृणोत्यत्रेति मधूलकः। 'उल आवरणे'। जलजमधूलकनाम। 'नीरिप्पचेट्टु'॥ २६–७॥

(पा.) पारिभद्रे—पारिजातकः। पारिभद्रनामानि। 'पारिजमु'॥ तिनिशे—चित्रकृच्च। तिनिशनामानि। 'तिनासमु'। 'मथुरादेशप्रसिद्धमु'॥ अथ द्वौ—आम्रातके। आम्रातकनामानि। 'अम्बालमु'। 'अदे कोतिमामिडि'। 'कपिचूतोऽम्लबाटश्च'। एते द्वे च। कपिभूष इति वा पाठः॥ मधूके तु—मधुष्ठीलौ। मधूकनामानि। 'इप्प'॥ जलजोऽत्र मधूलकः। जलजमधूकनाम। 'नीरिप्प'। 'मधूकोऽन्यो मधूलस्तु जलजो दीर्घपत्रकः' इति वामनतन्त्रानुसारिपाठः। 'गिरिजेऽत्र मधूलकः'। गिरिजमधूकनाम। 'गौरशालो मधूलोऽन्यो गिरिजस्वल्पपत्रकः' इत्यरुणदत्ततन्त्रानुसारिपाठः॥ २६–७॥

पीलौ गुडफलः स्रंसी तस्मिंस्तु गिरिसंभवे॥ २८॥
अक्षोटकन्दरालौ द्वावङ्कोले तु निकोचकः।

(वि.) पीलाविति—पीयते माधुर्यात् [1]पीलुः। 'पा पाने'। गुडवन्मधुराणि फलानि यस्य गुडफलः। स्रंसयति [2]फलादिकमिति स्रंसी। 'स्रंसु अवस्रंसने'।

---

[1] मन्दानि सूक्ष्माणि अराणि कण्टकानि J_2, Pt_2. [2] चिरजीवित° J_2. [3] निशामतिक्रान्तः Pt_2. [4] उपयोग्यदारुत्वात् K_5, K_6. [5] चक्रान्तेन K_6. [6] वर्धते J_2, K_6. [7] लघुदार्ढ्यात् F_2, J_2, K_6. [8] कामं K_5, K_6. [9] 'सिन्न अम्बालमु' K_3. [10] मधुरश्चासौ द्रुमश्च F_2, J_2, K_6. [11] K_5, K_6 add प्रस्रवतीति. [12] 'इप्पचेट्टु' K_6.

‘[3]गोनुगुचेट्टु’ ॥ अक्ष्णोति मूलैर्भुवं[4] व्याप्नोतीति अक्षोटः । ‘अक्षू व्याप्तौ’ । [5]कन्दरस्थानम् अलति भूषयतीति कन्दरालः । कर्पराल इति पाठे कल्पते रोगं हन्तुमिति कर्परालः[6] । ‘कृपू सामर्थ्ये’ । पर्वतपीलुनामनी । ‘कोण्डगोङ्गुचेट्टु’॥ अङ्क्यते कण्टकैरित्यङ्कोलः । ‘अकि लक्षणे’ । अङ्कोट इति वा पाठः । [7]निकुच्यते कण्टकत्वेनास्मान्निकोचकः । ‘कुञ्च कौटिल्याल्पीभावयोः’ । अङ्कोलनामनी । ‘ऊडुगचेट्टु’ ॥ २८ ॥

---

[1] पीड्यत इति वा, ‘पीड अवगाहने’, डलयोरभेदः K_5, K_6.
[2] मालादिकम् J_2, K_6.
[3] K_3 adds ‘सिन्न’.
[4] भुवनं K_5.
[5] कन्दरान् सानूनि Pt_2.
[6] कर्पररोगं हन्तीति K_2.
[7] निकुञ्चति K_5, K_6.

(पा.) पीलौ—स्रंसी । पीलुवृक्षनामनी । ‘गोनुगुचेट्टु’ ॥ तस्मिंस्तु—आक्षोटकन्दरालौ द्वौ । अक्षोट इति वा । पर्वतोत्पन्नपीलुनामनी । ‘कोण्डगोनुगुचेट्टु’ । ‘अव्दोढ’ इति वणिक्प्रसिद्धः ॥ अङ्कोले—निकोचकः । अङ्कोलनामनी । ‘उडुग’ । अङ्कोडे त्विति पाठे—‘अथाङ्कोले निचोलोऽङ्कोडशोधनौ[1]’ इति वैजयन्ती (पृ. ४८, श्लो. ४१) ॥ २८ ॥

---

[1] अङ्कोढ इति मुद्रितग्रन्थे.

पलाशे किंशुकः पर्णो वातपोथोऽथ वेतसे ॥ २९ ॥
रथाभ्रपुष्पविदुलशीतवानीरवञ्जुलाः ।
द्वौ परिव्याधविदुलौ नादेयी चाम्बुवेतसे ॥ ३० ॥

(वि.) पलाश इति—पुण्यानि पलाशानि पर्णानि यस्य सः पलाशः । स्वपुष्पैः पलं मांसमश्नातीव तिष्ठतीति वा । ‘[1]अश भोजने’ । किंचिच्छुकवत्[2] शुकतुण्डसदृशपुष्पत्वात् किंशुकः । [3]पुण्यानि पर्णानि यस्य पर्णः । वातरोगं पोथयतीति[1] वातपोथः । ‘पुथ हिंसायाम्’ । पलाशनामानि । ‘मोदुगचेट्टु’ ॥ ति[5] वृद्धिं गच्छतीति वेतसः । ‘वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु’ । वितस्यते कालेनोपक्षीयत इति वा । ‘तसु उपक्षये’ । [6]रमन्तेऽस्मिन् पक्षिण इति रथः । ‘रमु क्रीडायाम्’ । अभ्रवर्णानि पुष्पाण्यस्य अभ्रपुष्पः । [7]अभ्रसमये पुष्पमस्येति वा । विदोल्यते[8] वायुवेगेनेति विदुलः । ‘दुल उत्क्षेपे’ । विडुल इति वा ! ‘डुल उत्क्षेपणे’ । शीतवीर्यत्वात् शीतः । दाहशमनत्वाद् [9]वन्यत इति वानीरः । वञ्जुलश्च । ‘वन षण संभक्तौ’ । वेतसनामानि । ‘[10]पुव्वचेट्टु’॥ परिविध्यतेऽम्भसेति[11] परिव्याधः । विदोल्यतेऽम्भसीति विदुलः । नद्यां भवा नादेयी । जलजातवेतसनामानि । ‘निरुपुव्वचेट्टु’ ॥ २९–३० ॥

[1] 'अश भक्षणे' K₅. [2] नीलत्वात् K₆, Pt₂. [3] प्रशस्तानि J₂, Pt₂. [4] F₁, K₂, K₅ add नाशयति. [5] वेति अम्भोऽनुवर्तते Pt₂. [6] F₁ omits 2 pages. [7] J₂ adds वर्षासमये. [8] विदुल्यते Pt₂. [9] K₆ adds सेव्यते. [10] 'प्रब्बलि-चेट्टु' Pt₁, Pt₂. [11] अम्भसि K₆.

(पा.) पलाशे—वातपोथः। पलाशद्रुमनामानि। 'मोदुग'। 'ब्रह्मवृक्षस्त्रि-पत्रकः'। एते च॥ अथ वेतसे—वञ्जुलाः। वेतसनामानि। 'प्रब्बचेट्टु'॥ द्वौ परिव्याध—चाम्बुवेतसे। जलवेतसनामानि। 'नीरुप्रब्ब'॥ २९–३०॥

सौभाञ्जने शिग्रुतीक्ष्णगन्धकाक्षीबमोचकाः।
रक्तोऽसौ मधुशिग्रुः स्यादरिष्टः फेनिलः समौ॥ ३१॥

(वि.) सौभाञ्जन इति—[1]कटुत्वेन सुष्ठु मुखं भनक्तीति[2] सौभाञ्जनः। 'भञ्जो आमर्दने'। शोभामनक्तीति शोभाञ्जन इति वा पाठः। 'अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु'। शिनोति [3]शमयति कफादीनिति शिग्रुः। 'शीञ् निशातने'। तेजयति कफादीनिति तीक्ष्णः। 'तिज निशातने'। गन्धं करोतीति गन्धकः। तीक्ष्णो गन्धोऽस्यास्तीति तीक्ष्णगन्धक इति वा। मद्यादिवत् आक्षीबन्त्यनेनेति आक्षीबः[4]। 'क्षीबृ मदे'। [5]मुञ्चति [6]तीक्ष्णगन्धमिति मोचकः। 'मुच्लृ मोक्षणे'। शिग्रुनामानि। 'मुनगचेट्टु'॥ ३१॥

[1] तीव्रगन्धत्वेन Pt₂. [2] K₆ adds भेदयतीति. [3] हन्ति K₅, K₆. [4] मन्दो न भवतीति अक्षीबः K₅. [5] मोचयति K₅. [6] उग्रगन्धम् Pt₂.

(पा.) शोभाञ्जने—मोचकाः। शोभाञ्जननामानि। 'मुनुग'। 'शोभाञ्जने तीक्ष्णगन्धशिग्रुकाक्षीवमोचकाः' इति पाठादक्षीवः। सौभाञ्जन इति पाठान्तरम्॥ रक्तोऽसौ—स्यात्। रक्तशिग्रुनाम। 'येर्मुनुग'॥ अनुक्तम्—'अगस्त्ये शुकनासः स्यान्मार्जारो वङ्गसेनकः[1]'। अगस्त्यद्रुमनामानि। 'अगिशचेट्टु'॥ अरिष्टः फेनिलः समौ। अरिष्टवृक्षनामनी। 'कुङ्कुडुचेट्टु'॥ ३१॥

[1] वंगसेवकः B₃; वङ्गसेनक इति मुद्रितवैजयन्त्याम् (पृ. ५८, श्लो. १५६).

बिल्वे शाण्डिल्यशैलूषौ मालूरश्रीफलावपि।
प्लक्षो जटी पर्कटी स्यान्न्यग्रोधो बहुपाद् वटः॥ ३२॥

(वि.) बिल्व इति—बिलति [1]कुष्ठरोगमिति, सेवकस्य पापं [2] हिनस्तीति वा बिल्वः। 'बिल भेदने'। शाण्डिल्यमुनिवत्[3] विप्रमान्यत्वात्[4] शाण्डिल्यः। शैलूषो[5] नट इव [6]रूपपरिवर्तनात्[7] शैलूषः[8]। मलते निष्कभ्नाति मलमिति मालूरः। 'मल मल्ल धारणे'। मल्यते धार्यते देवैरिति वा। मां लक्ष्मीं लातीति वा मालूरः। 'ला दाने'। श्रीप्रदानि श्रीप्रियाणि वा फलानि यस्य सः श्रीफलः। बिल्वनामानि। '[9]मारेडु चेट्टु'॥ प्लक्षति [10]कफादिदोषमिति प्लक्षः। 'प्लक्ष [11]भक्षणे'। प्लक्षति मूलैरधोगच्छतीति वा। जटाः सन्त्यस्येति जटी। 'जट संघाते'। पृच्यते परस्परं संसृज्यत इति पर्कटी। 'पृची संपर्के'। नकारान्तोऽयम्। केचित् ईकारान्तस्त्रीलिङ्गमिच्छन्ति[12]। प्लक्षनामानि। 'जुव्वि चेट्टु'॥ न्यक् तिर्यक् [13]रुणद्धीति न्यग्रोधः। 'रुधिर् आवरणे'। बहवः पादा मूलान्यस्य बहुपात्। वटति मूलैः स्वस्थानं वेष्टयतीति वटः। 'वट परिवेष्टने'। वटवृक्षनामानि। 'मर्रिचेट्टु[14]'॥ ३२॥

[1] कफरोगम् K_5. [2] K_2, K_3 add बिलति. [3] ऋषि° J_2, Pt_2. [4] °मानित्वात् K_5. [5] शैलूषवत् J_2, Pt_2; इव K_5. [6] K_6 adds दुर्जरत्वादिना. [7] विपरि° K_5. [8] शिलूषपुत्रवद्वा I, K_2, K_3, K_5. [9] 'बिल्वपत्रे' J_2. [10] वस्त्रादि° B_1, K_5. [11] अदने K_6; क्षरणे B_1. [12] इति वदन्ति B_1, I, K_5. [13] F_2, Pt_2 add मार्गमिति. [14] 'आलमर' J_2.

(पा.) बिल्वे—श्रीफलावपि। बिल्वनामानि। 'मारेडु'। प्लक्षो—पर्कटी स्यात्। प्लक्षवृक्षनामानि। 'गोनुचेट्टु'। 'प्लक्षे[1] तु पर्कटिजटी पलाशी गिरिलक्षणः' इति वैजयन्तीपाठात् (पृ. ४७, श्लो. २८) जटिपर्कटिशब्दौ पुंलिङ्गौ॥ न्यग्रोधो—वटः। वटवृक्षनामानि। 'मर्रिचेट्टु'॥ ३२॥

[1] 'प्लक्षस्तु पर्कटिजटिकलापिगिरिलक्ष्मणाः' इति मुद्रितग्रन्थे.

गालवः शाबरो लोध्रस्तिरीटस्तिल्वमार्जनौ।
आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभः॥ ३३॥

(वि.) गालव इति—गालयति स्रावयत्यक्षिरोगमिति[1] गालवः। 'गल स्रवणे'। गालवादृषेः प्रभूत इति वा। शबरसंबन्धित्वात्[2] शाबरः। साबर इति पाठान्तरम्[3]। अतिसारं रुणद्धीति लोध्रः। रलयोरभेदः। 'रुधिर् आवरणे'। तिरयति पित्तादिरोगान् नाशयतीति तिरीटः। तीरयतीति वा। 'पार तीर कर्मसमाप्तौ'। तिलति स्निह्यत्यङ्गमनेनेति तिल्वः। 'तिल स्नेहने'। मार्जयति उद्वर्तयत्यङ्गमनेनेति मार्जनः। 'मृजूष् शुद्धौ अलंकारे च'। लोध्रनामानि। 'तेल्ललोद्दुगु चेट्टु'॥ षडपि लोध्रसामान्यनामानीति केचित्।

आद्यौ श्वेतलोध्रस्य, इतरे रक्तलोध्रस्येत्यपरे ॥ अम्यते [4]भक्ष्यत इत्याम्रः । ‘अम गत्यादिषु’ । [5]चोतति स्रवति रसमिति चूतः । ‘चुतिर्[6] क्षरणे’ । रसम् अलति भूषयतीति रसालः । ‘अल भूषणपर्याप्तिवारणेषु’ । रसम् आलातीति वा । ‘ला दाने’ । आम्रनामानि । ‘मामिडि चेट्टु’ ॥ सह कारयति मेलयति स्त्रीपुंसाविति सहकारः । ‘डुकृञ् करणे’ । [7]अतिसुगन्धाम्रनाम ॥ ‘तिय्यमामिडि चेट्टु’ ॥ ३३ ॥

---

[1] अस्थिरोगम् K_3. [2] J_2, K_6 add °वृक्ष°. [3] B_1, I, K_2 add श्वेतलोध्रनामनी. [4] अभिलष्यते F_2, Pt_2. [5] च्योतति B_1, D_2, I, K_5. [6] ‘च्युतिर् क्षरणे’ I, J_2. [7] F_2 adds अतिशयितं सौरभमस्य.

(पा.) गालवः—मार्जनौ । लोध्रनामानि । ‘लोद्दुगचेट्टु’ ॥ आम्रः—रसालः । चूतवृक्षनामानि । ‘मामिडिचेट्टु’ । ‘वसन्तशाखी माकन्दः कामाङ्गो मदिरासखः’ । एतानि च ॥ असौ—सौरभः । अत्यन्तसुरभिचूतः सहकारः स्यात् ॥ ३३ ॥

कुम्भोलूखलकं क्लीबे कौशिको गुग्गुलुः पुरः ।
शेलुः श्लेष्मातकः शीत उद्दालो बहुवारकः ॥ ३४ ॥

(वि.) कुम्भोलूखलकमिति—कुम्भोलूखलाकारात् वृक्षकोशान्निर्यातीति कुम्भोलूखलकम् । कुम्भोलूखलके क्लीबे इति केचित् द्विवचनान्ततया नामद्वयं दर्शयितुं [1]पठन्ति । वृक्षकोशे भवः कौशिकः । गुडति रक्षति वातरोगादिति गुग्गुलुः । ‘गुड रक्षणे[2]’ । पुरत्यग्रे सरति धूपवृक्षेष्विति पुरः । ‘पुर अग्रगमने’ । गुग्गुलुवृक्षनामानि । ‘गुग्गिलपुचेट्टु’ ॥ शिलति उञ्छति केशकार्ष्ण्यं करोतीति शेलुः । ‘शिल उञ्छे’ । शिनोति [3]जिह्वामिति वा । ‘शिञ् निशातने’ । श्लेष्माणम् अतति [4]कटुतयेति श्लेष्मातकः । ‘अत सातत्यगमने’ । विरुद्धलक्षणया [5]उष्णवीर्यत्वात् शीतः । उष्णवीर्यत्वादङ्गमुद्दालयतीत्युद्दालः । ‘दल [6]विशरणे’ । वहूनि स्रोतांसि कटुत्वेन वृणोतीति बहुवारकः । ‘वृञ् वरणे’ । उद्दालकनामानि । ‘विरिगिचेट्टु’ ॥ ३४ ॥

---

[1] वदन्ति B_1. [2] ‘गुड रक्षायाम्’ K_6. [3] रोगान् J_2, Pt_2. [4] कटूष्णतया K_5. [5] शीतवीर्यत्वात् Pt_2. [6] विदारणे Pt_2.

(पा.) कुम्भोलूखलकं क्लीबे । सुभूतिटीकायां त्रिधा विभक्तं कुम्भोलूखलकं कुम्भम् उलूखलकमिति ॥ कौशिको—पुरः । गुग्गुलुद्रुमनामानि । ‘गुग्गिलपुचेट्टु’ । ‘जटायुः कालनिर्यासो महिषाक्षः पलंकषः’ । एतानि च ॥ शेलुः—बहुवारकः । श्लेष्मातकनामानि । ‘विरिगचेट्टु’ ॥ ३४ ॥

राजादनं प्रियालः स्यात् सन्नकद्रुर्धनुष्पटः ।
गम्भारी सर्वतोभद्रा काश्मरी मधुपर्णिका ॥ ३५ ॥
श्रीपर्णी भद्रपर्णी च काश्मर्यश्चाप्यथ द्वयोः ।
कर्कन्धूर्बदरी घोण्टा कोली कुवलफेनिले ॥ ३६ ॥
सौवीरं बदरं कोलमथ स्यात् स्वादुकण्टकः ।
विकङ्कतः स्रुवावृक्षो ग्रन्थिलो व्याघ्रपादपि ॥ ३७ ॥

(वि.) राजादनमिति—[1]राजभिरद्यते मृष्टत्वादिति राजादनम्। 'अद भक्षणे'। प्रीयते हृदयं गच्छति अतिरसत्वादिति[2] प्रियालः। 'प्रीङ् प्रीतौ'। पियाल इति पाठे पीयत इति। सन्नानि सूक्ष्माणि कद्रुवर्णानि बीजान्यस्येति सन्नकद्रुः। सन्नको[3] द्रुः स्कन्धोऽस्येति वा। धनुष इव पटो विस्तारोऽस्यास्तीति धनुष्पटः। नामद्वयं वा। [4]धनतीति धनुः। 'धन धान्ये'। उकारान्तः। पटवद्विस्तृतः पटः। प्रियालनामानि। 'मोरटिचेट्टु'॥ [5]सारतया मूलादिगमने भारोऽस्या अस्तीति गम्भारी। सर्वतो भद्रमस्या अस्तीति सर्वतोभद्रा। कृशयति तनूकरोति पित्तादिकमिति काश्मरी। 'कृश तनूकरणे'। मधूनि [6]स्वादूनि पर्णान्यस्या इति मधुपर्णिका। श्रीः पर्णेष्वस्या इति श्रीपर्णी[7]। भद्रप्रदानि पर्णान्यस्या भद्रपर्णी। कृशयति तनूकरोति पित्तादिकमिति काश्मर्यः। 'कृश तनूकरणे'। कश्यते कर्म कुरुतेऽनेनेति वा काश्मर्यः। 'कशि गतिशासनयोः'। काश्मरीनामानि। 'गुम्मुडुचेट्टु'॥ कर्काणि लोहितानि[8] पर्णानि धत्त इति कर्कन्धूः। 'डुधाञ् धारणपोषणयोः'। बदति स्थिरा भवतीति बदरी। 'बद स्थैर्ये'। कोलति[9] निविडावयवत्वात् कोली। 'कुल संस्त्याने'। घुणति वृत्ततया भ्रमतीति घोण्टा। 'घुण घूण भ्रमणे'। बदरीनामानि। रेंगुचेट्टु'॥ कौ भुवि [10]वलते भ्रमतीति कुवलम्। 'वल[11] संवरणे संचरणे च'। फेनोऽस्यास्तीति फेनिलम्। सुवीरदेशे प्रचुरत्वात् सौवीरम्। बदर्याः फलं बदरम्। कोल्याः फलं कोलम्। घोण्टाशब्दो वृक्षफलयोर्वाचकः। बदरीफलनामानि। 'रेंगुपण्डु'॥ स्वादुफलत्वात् कण्टकवत्त्वाच्च स्वादुकण्टकः। विकङ्कते प्रसरतीति विकङ्कतः। 'ककि गतौ'। स्रुवा स्रुक् तदर्थं वृक्षः स्रुवावृक्षः। स्रुचावृक्ष इति वा पाठः। [12]ग्रन्थिलत्वात् ग्रन्थिलः। व्याघ्रस्य पादा इव पादा[13] मूलान्यस्य व्याघ्रपात्। विकङ्कतनामानि। 'पुल्लवेलंगचेट्टु'॥ ३५–७॥

[1] राज्ञामदनं J_2, Pt_2. [2] सारवत्त्वात् B_1; सारत्वात् I, K_2, K_3. [3] K_6 adds खरः.
[4] दधातीति K_5. [5] सारवत्त्वात् F_2, Pt_2. [6] मृष्टानि K_5, K_6; K_5 adds

पुष्पाणि. [7] श्रीप्रदानि Pt_2. [8] लोहितवर्णानि J_2; Pt_2 adds फलानि च. [9] कुल्यते K_5, K_6. [10] वलति K_6, Pt_2. [11] ‘वल संचलने’ Pt_2. [12] ग्रन्थिमत्त्वात् K_5, K_6. [13] पदानि K_5.

(पा.) राजादनं—धनुः। उकारान्तः। पटः। [1]प्रियालद्रुमनामानि। पियालोऽपि। ‘मोरटिचेट्टु’॥ अनुक्तम्—‘तद्बीजे चारबीजं स्यात्’। प्रियालबीजनाम। ‘मोरटिवित्तु’॥ गम्भारी—काश्मर्यश्चापि। गम्भारीवृक्षनामानि। ‘पेग्गुम्मडुचेट्टु’॥ अथ द्वयोः—कोली। स्थूलबदरीनामानि। ‘गङ्गरेंगु’॥ घोण्टा। बदरीनाम। ‘रेंगु’॥ कुवलफेनिले—कोलम्। तत्फलनामानि। हरीतक्यादित्वाद्[?]घोण्टीति[2]। ‘रेङ्गुपण्डु’॥ अथ स्यात् स्वादुकण्टकः—स्रुचां वृक्षः। स्रुवावृक्ष इति वा। ग्रन्थिलो व्याघ्रपादपि। विकङ्कतवृक्षनामानि। ‘मुलुवेलुम’॥ ३५–७॥

[1] प्रियालु° B_3. [2] काशिकायां कौमुद्यां च घोण्टीशब्दो हरीतक्यादिगणे न दृश्यते.

ऐरावतो नागरङ्गो नादेयी भूमिजम्बुका।
तिन्दुकः स्फूर्जकः कालस्कन्धश्च शितिसारके॥ ३८॥

(वि.) ऐरावत इति—[1]इरावती विद्युत् सेव रक्तत्वाद् ऐरावतः। नागस्य सिन्दूरस्येव रङ्गो रागोऽस्येति [2]नागरङ्गः। नागरङ्गनामनी। ‘नारिञ्जचेट्टु’॥ नद्यां नदीतीरे भवा [3]नादेयी। भूमौ जम्यत इति [4]भूमिजम्बुका। ‘जम अदने’। भूमौ जन्यत इति वा। ‘जनी प्रादुर्भावे’। नादेयीनामनी। ‘काकिनेरंडु’॥ चत्वार्यपि नागरङ्गस्यैव नामानीति केचित्[5]॥ तिम्यति[6] आर्द्रीभवतीति तिन्दुकः। ‘तिमि आर्द्रीभावे’। तिन्दुकोऽस्त्री। स्फूर्जति दह्यमानः [7]चिपिटशब्दं करोतीति स्फूर्जकः। ‘टुओस्फूर्जा वज्रनिर्घोषे’। कालो नीलः स्कन्धोऽस्य कालस्कन्धः। [8]शितिर्नीलः सारो मज्जास्येति शितिसारकः। तिन्दुकनामानि। ‘तुमिकिचेट्टु’॥ ३८॥

[1] इरावत्या विद्युत इव K_5, K_6. [2] नागच्छतीति नागः सहजः रङ्गोऽस्येति वा K_6. [3] नदीतीरे जायते (जाता J_2) इति K_5, K_6. [4] भूमौ जम्बूः Pt_2. [5] K_3 adds वदन्ति. [6] तिम्यत्वात् K_3. [7] चिदिचिदीति F_1, I. [8] सितिः . . . सितिसारकः K_6.

(पा.) ऐरावतो नागरङ्गः। नारङ्गनामनी। ‘नारदमु’। ‘नागरङ्गे तु नारङ्गो [1]नारुङ्गस्तक्रवासनः’ इति वैजयन्ती (पृ. ४८, श्लो. ३६)। नादेयी—जम्बुका। काकजम्बूनामनी। ‘काकिनेरडु’।

‘नादेयी नागरङ्गे स्याज्जयायां जलवेतसे।
भूमिजम्ब्वां जवायां च।’

इति विश्वप्रकाशवचनात् (पृ. १२३, श्लो. १०५) [2]नारङ्गजातीयनामन्यपि। ‘कित्तसिचेट्टुन्नु’॥ तिन्दुकः—शितिसारके। तिन्दुकवृक्षनामानि। ‘तुम्मिकचेट्टु’॥ ३८॥

---

[1] नार्यङ्ग इति मुद्रितग्रन्थे.   [2] नारुङ्ग° B_3.

काकेन्दुः कुलकः काकपीलुकः काकतिन्दुके।
गोलीढो झाटलो घण्टापाटलिर्मोक्षमुष्ककौ॥ ३९॥

(वि.) काकेन्दुरिति—काका इन्दन्त्यत्रेति काकेन्दुः। ‘इदि परमैश्वर्ये’। कुत्सितैः काकादिभिर्लक्यत इति कुलकः। [1]‘लक्क आस्वादने’। काकैः पीयत इति काकपीलुकः[2]। ‘पा पाने’। काकैस्तिम्यत इति काकतिन्दुकः। ‘तिमि आर्द्रीभावे’। काकतिन्दुकनामानि। ‘नह्लतुमिकिचेट्टु’॥ गोभिर्लिह्यत[3] इति गोलीढः। ‘लिह आस्वादने’। झाटं संघातं लाति आदत्त इति झाटलः। ‘ला ‘दाने’। पशुभक्षणार्थं हन्यत इति घण्टा। ‘हन हिंसागत्योः’। पाटं विस्तारं लातीति पाटलिः। पाटला[5] वा। ‘ला दाने’। मोक्षति सहते पश्वादिसंमर्दमिति मोक्षः। ‘मोक्ष सहने’। मुष्णाति [6]विषमिति मुष्ककः। ‘मुष स्तेये’। मुष्कर इति वा पाठः। गोलीढनामानि॥ ‘मोक्कपुचेट्टु’॥३९॥

---

[1] लकि Pt_2.   [2] काकवर्णानि पीलूनि पुष्पाणि यस्य J_2, K_5.   [3] J_2, Pt_2 add आस्वाद्यते; गोलिह इति वा B_1, K_5.   [4] ‘ला आदाने’ K_6.   [5] पाटलो वा I, K_6.
[6] रोगान् Pt_2.

(पा.) काकेन्दुः—काकतिन्दुके। काकतिन्दुकनामानि। ‘काकितुम्मिक’। गोलीढो—मुष्ककौ। मोक्षवृक्षनामानि। ‘मोक्कपुचेट्टु’।

‘मुष्कको मोक्षको घण्टामूर्खको मुञ्जुकस्तथा।
क्षारश्रेष्ठो गोलिहश्च द्विविधः श्वेतकृष्णकः॥’

इति वैद्यकाद् गोलिहोऽपि॥ ३९॥

तिलकः क्षुरकः श्रीमान् समौ पिचुलझावुकौ।
श्रीपर्णिका कुमुदिका कुम्भी कैटर्यकट्फलौ॥ ४०॥

(वि.) तिलक इति—तिलाभानि पुष्पाण्यस्य तिलकः। क्षुरति [1]परुषत्वात् क्षुरकः। 'क्षुर [2]विलेखने'। श्रीः शोभास्यास्तीति श्रीमान्। तिलकनामानि। 'तिलकपुचेट्टु'॥ पिचुं तूलं लातीति पिचुलः। 'ला दाने'। झम्यत इति झावुकः। 'झमु अदने'। झावुकनामनी। 'सन्ननियाकुलुगलपक्कचेट्टु'॥ श्रीः पर्णेष्वस्याः श्रीपर्णिका। कुमुदवर्णत्वात् [3]कुमुदिका। कुम्भयति पर्णैराच्छादयतीति कुम्भी। '[4]कुभि आच्छादने'। कड्यते प्रकर्षेण लक्ष्यत इति कैडर्यः। 'कड मदे'। कटूनि[5] फलानि यस्य [6]कट्फलः। कुम्भीनामानि। 'टेकुम्रानिचेट्टु'॥ ४० ॥

[1] निष्ठुरत्वात् B_1, F_1, K_5. [2] 'क्षुर दीप्तौ' K_3, K_6; 'ऐश्वर्यदीप्त्योः' Pt_2. [3] कुं भुवं मोदयतीति वा B_1, K_5. [4] 'कुबि आच्छादने' J_2. [5] कटुरसानि B_1, I, J_2; रसवन्ति K_6. [6] कटुकफलः J_2.

(पा.) तिलकः—श्रीमान्। तिलकवृक्षनामानि। 'परुषः छन्नपुष्पकः'। एते च।

'यस्य शाखा वह्नियोगाद् दीपवद् दीप्यते चिरम्।
स वृक्षस्तिलको नाम यो वसन्ते हि पुष्यति॥'

इति। 'बोट्टुग'। अनुक्तम्—'मदनः स्यात् कुरवको मधुर्दूतश्च नागरः'। कुरवकनामानि। 'कोरविचेट्टु'॥ समौ—झावुकौ। झावुकवृक्षनामनी। 'सन्नपुटे कुलपक्के'॥ श्रीपर्णिका—कट्फलौ[1]। कुम्भीवृक्षनामानि। 'पिनगुम्मुडु'॥ ४० ॥

[1] कट्फले B_3.

क्रमुकः पट्टिकाख्यः स्यात् पट्टी लाक्षाप्रसादनः।
तूदस्तु यूपः क्रमुको ब्रह्मण्यो ब्रह्मदारु च॥ ४१ ॥
तूलं च नीपप्रियककदम्बास्तु हलिप्रिये।

(वि.) क्रमुक इति—[1]क्रामतीति क्रमुकः। 'क्रमु पादविक्षेपे'। [2]पट्टिकेत्याख्या यस्य सः पट्टिकाख्यः। पट्टी व्रणबन्धनसामर्थ्यमस्यास्तीति पट्टी। लाक्षां प्रसादयतीति लाक्षाप्रसादनः[3]। 'षद्लृ विशरणगत्यवसादनेषु'। क्रमुकनामानि। 'एट्टलोद्दुगुपेल्लु'॥ तुद्यते यूपीकर्तुं[5] तक्ष्यत इति तूदः। 'तुद व्यथने'। [6]यूपार्हवृक्षत्वाद् यूपः। पूग[7] इति पाठे पुनातीति [8]पूगः। 'पूञ् पवने'। क्रामतीति क्रमुकः[9]। ब्रह्मणि वैदिके कर्मणि साधुः ब्रह्मण्यः। ब्राह्मण्य इति वा पाठः। ब्रह्मणे वैदिककर्मणे योग्यं

दारु ब्रह्मदारु। [10]तूल्यतेऽस्मादग्निरिति तूलम्। 'तूल निष्कर्षे'। ब्रह्मदारुनामानि। [11]'गङ्गराविचेट्टु'॥ नयति प्राणिनां सुखमिति नीपः। 'णीञ् प्रापणे'। प्रीणातीति प्रियकः। 'प्रीञ् तर्पणे'। कं [12]वातं दमयति [13]शमयतीति कदम्बः। 'दमु [14]उपशमे'। हलिनो बलभद्रस्य प्रियः सुरादिपानाद् हलिप्रियः। कदम्बनामानि। '[15]कडपचेट्टु' ॥ ४१ ॥

---

[1] कामयति J_2.
[2] पट्टिकेव F_2, K_6.
[3] °प्रसादकः K_2.
[4] :पट्टिकालोध्रनाम K_2, K_6.
[5] यूपार्थं F_2, Pt_2.
[6] यूपार्हत्वात् J_2, Pt_2.
[7] इति वा पाठः, तदा F_1, J_2, K_3.
[8] इति व्युत्पत्तिः F_1, I.
[9] F_1 adds 'क्रमु पादविक्षेपे'.
[10] तूलति K_5.
[11] 'मङ्गलवल्ली' J_2.
[12] कमुदकं K_6; कफं (कष्टं K_5) दमयति F_1, J_2.
[13] उपशमयति J_2.
[14] उपशमने B_1, F_1, I, J_2.
[15] 'मुगलुंगचेट्टु' K_3.

(पा.) क्रमुकः—लाक्षाप्रसादनः। [1]क्रमुकनामानि। 'पट्टिकालोध्रमु'॥ तूदस्तु—तूलं च। अश्वत्थाकृतेर्वृक्षस्य नामानि। 'गङ्गरावि'॥ नीप—हलिप्रिये। कदम्बनामानि। 'कडिमि'॥ 'पुलकः कर्णपूरश्च कादम्बर्यो हरीतकः'। एतानि च॥ अनुक्तम्—'अन्यो धूलीकदम्बः स्याद् वासन्तो वृत्तपुष्पकः'। धूलीकदम्बनामानि। 'बट्टकडिमि' ॥ ४१ ॥

---

[1] पट्टिकालोध्रनामानि B_3.

वीरवृक्षोऽरुष्करोऽग्निमुखी भल्लातकी त्रिषु ॥ ४२ ॥
गर्दभाण्डे कंदरालकपीतनसुपार्श्वकाः।
प्लक्षश्च तिन्त्रिणी चिञ्चाम्लिकाथो पीतसालके ॥ ४३ ॥
सर्जकासनबन्धूकपुष्पप्रियकजीवकाः।

(वि.) वीरवृक्ष इति—[1]दुःस्पर्शत्वाद् वीरा एव इमं वृक्षं स्पृशन्तीति वीरवृक्षः[2]। अरूंषि [3]व्रणानि करोतीत्यरुष्करः[4]। अग्निवन्मुखमस्यास्तीति अग्निमुखी। भल्लः शर इवाततीति भल्लातकी। 'अत सातत्यगमने'। [5]त्रिषु। अग्निमुखीनामानि। 'जिडिमानिचेट्टु'॥ गर्दभ[6] इवाण्डं मूलमस्य गर्दभाण्डः। कंदरमलतीति कंदरालः[7]। 'अल भूषणादौ'। [8]कमुदकं पीतयति पीतवर्णं करोतीति कपीतनः। शोभनौ [9]पार्श्वौ यस्य सः सुपार्श्वकः। प्लक्ष्यते भक्ष्यत इति प्लक्षः। 'प्लक्ष [10]भक्षणे'। प्लक्षनामानि। 'पञ्चजुव्विचेट्टु'॥ तिम्यते मुखमत्यर्थमनयेति तिन्त्रिणी। 'तिम आर्द्रीभावे'। तिन्तिडीति वा पाठः। [11]चिञ्चिमायते मुखमाम्लत्वादनया चिञ्चा। [12]अम्लफलत्वाद् आम्लिका। तिन्त्रिणीनामानि। 'चिन्तचेट्टु'॥ पीतवर्णः सालः पीतसालकः। पीतवर्णः सारोऽस्येति

पीतसारक इति वा पाठः। सृजति निर्यासमिति सर्जकः। 'सृज [13]विसर्गे'। अस्यति कुष्ठादीनीत्यसनः। 'असु क्षेपणे'। बन्धूकस्येव रक्तानि पुष्पाणि यस्य बन्धूकपुष्पः। [14]प्रीणातीति प्रियकः। 'प्रीञ् तर्पणे[15] कान्तौ च'। कुष्ठरोगिणं जीवयतीति जीवकः। 'जीव प्राणधारणे'। वीजक इति वा पाठः। बन्धूकपुष्पनामानि। '[16]वेगिचेट्टु' ॥ ४२–३ ॥

[1] वीराणामुपस्पर्शयोग्यः J₂, Pt₂. [2] K₆ adds 'स्पृश स्पर्शने'. [3] व्रणान् Pt₂. [4] F₁ adds 'डुकृञ् करणे.' [5] F₁ adds अयं. [6] F₁ omits 3 pages. [7] कन्दराश्रयो रातीति K₅, K₆. [8] जलं Pt₂. [9] पार्श्वकौ K₅, K₆. [10] अदने K₅. [11] चिमिचिमायते K₅. [12] °रसत्वात् J₂, Pt₂. [13] सर्जने B₁, K₅. [14] प्रीणयति B₁, I, K₂. [15] प्रीणने K₆. [16] 'वेंगि' D₂.

(पा.) वीरवृक्षो—भल्लातकी त्रिषु। [1]भल्लातकीवृक्षनामानि। 'जीडिचेट्टु'॥ गर्दभाण्डे—प्लक्षश्च। अश्वत्थानुकारिणः प्लक्षस्य नामानि। '[2]कलजुव्वि'॥ तिन्त्रिणी—आम्लिका। तिन्त्रिणीवृक्षनामानि॥ 'तिन्तिडा तिन्तिडी' इत्येते च। 'चिन्तचेट्टु'॥ अथो पीतसारके—जीवकाः। असनवृक्षनामानि। 'वेङ्गिस'।

'प्रियविमानितमानवतीरुषां
निरसनैरसनैरवृथार्थता।' (शिशु. ६. ४७)

इति माघप्रयोगाद् ह्रस्वादिः। 'पीठेभस्कन्धयोः क्लीबमासनं ना तु जीवके'[3] इति रभसकोशपाठाद् दीर्घादिः॥ ४२–३ ॥

[1] भल्लातक° B₃. [2] 'पच्चजुव्वि' B₃. [3] नाम्रजीवकः B₃.

साले तु सर्जकार्श्याश्वकर्णकाः सस्यसंवरः ॥ ४४ ॥
नदीसर्जो वीरतरुरिन्द्रद्रुः ककुभोऽर्जुनः ।

(वि.) साल इति—स्यति कुष्ठरोगमिति सालः। 'षोऽन्तकर्मणि'। सृजति निर्यासमिति सर्जः। 'सृज विसर्गे'। [1]कृशयति [2]कुष्ठरोगमिति कार्श्यः। 'कृश तनूकरणे'। कार्ष्य इति वा पाठः। [3]अश्वकर्णाभानि पत्राण्यस्य अश्वकर्णकः[4]। सस्यं [5]वृक्षादिफलं संवृणोतीति सस्यसंवरः। 'वृञ् वरणे'। सालनामानि। 'मद्दिचेट्टु'॥ नद्यां भवः सर्जो नदीसर्जः। वीरोऽर्जुनस्तन्नामकत्वाद्[6] वीरतरुः। अत एव इन्द्रस्य प्रियो द्रुर्वृक्षः इन्द्रद्रुः। शाखाभिः ककुभो[7] व्याप्नोतीति ककुभः। शौक्ल्यात् अर्जुनः। इन्द्रप्रियत्वाद्वा। अर्जुनवृक्षनामानि। 'वेरुमद्दि'॥ ४४ ॥

[1] कृशति K_5, K_6. [2] कुष्ठादीन् Pt_2. [3] अश्वकर्णाभपत्रत्वात् J_2, K_5, K_6. [4] °कर्णिः J_2. [5] Pt_2 omits वृक्षादि. [6] संज्ञकत्वात् K_5, K_6. [7] Pt_2 adds दिशः, कं शीतं कुभ्नातीति वा ककुभः Pt_2.

(पा.) साले तु—सस्यसंवरः। सालवृक्षनामानि। '[1]नल्लमद्दि'॥ नदीसर्जो—अर्जुनः। [2]नदीसर्जननामानि। 'येरुमद्दि'॥ ४४॥

[1] 'मद्दिचेट्टु' B_3. [2] अर्जुनवृक्षनामानि B_3.

राजादनः फलाध्यक्षः क्षीरिकायामथ द्वयोः॥ ४५॥
इङ्गुदी तापसतरुर्भूर्जे चर्मिमृदुत्वचौ।

(वि.) राजादन इति—राजभिरद्यते राजादनः। 'अद भक्षणे'। अध्यक्षाणि श्रेष्ठानि फलान्यस्य[1] फलाध्यक्षः। क्षीरवन्मधुराणि फलान्यस्याः क्षीरिका[2]। क्षीरिकानामानि। 'पालचेट्टु'॥ इङ्गत्यूर्ध्वं गच्छतीति इङ्गुदी। इङ्गुदश्च। '[3]इगि लिगि गत्यर्थाः'। [4]तापसानां तरुः तापसतरुः। इङ्गुदीनामनी। 'गारचेट्टु'॥ भूरित्यव्ययम्। भूर्भूम्यां जायत[5] इति भूर्जः। 'जनी प्रादुर्भावे'। [6]चर्माभपत्रयोगात् चर्मी। मृद्वी त्वगस्य मृदुत्वक्। भूर्जनामानि। '[7]भुजपत्रवुचेट्टु'॥ ४५॥

[1] D_2, K_2 add सन्तीति. [2] क्षीरयुक्तफलानीति वा K_3; 'पालेय मर' J_2. [3] 'इगि गतौ' J_2. [4] तपस्विजनोपयुज्यमानत्वात् Pt_2. [5] जातः J_2. [6] चर्माकार° Pt_2. [7] 'भूर्जपत्रमुपेरु' B_1, K_3.

(पा.) राजादनः—क्षीरिकायाम्। क्षीरिकावृक्षनामानि। 'पालचेट्टु'॥ अथ द्वयोः—तापसतरुः। [1]इङ्गुदतरुनामनी। 'गारचेट्टु'॥ भूर्जे—मृदुत्वचौ। [2]भुजपत्रनामानि। 'भुजपत्रवृक्षमु'। 'भूर्जपत्रे भुजो भूर्जौ मृदुत्वक् [3]चर्मिचर्मिकौ' इति वैजयन्ती (पृ. ४८, श्लो. ४५)॥ ४५॥

[1] इङ्गुदी° B_3. [2] भूर्जपत्र° B_3. [3] चर्मकावपि B_3.

पिच्छिला पूरणी मोचा स्थिरायुः शाल्मलिर्द्वयोः॥ ४६॥
पिच्छा तु शाल्मलीवेष्टे रोचनः कूटशाल्मलिः।
चिरबिल्वो नक्तमालः करजश्च करञ्जके॥ ४७॥

(वि.) पिच्छिलेति—पिच्छा निर्यासोऽस्या अस्तीति पिच्छिला। पूरयति तूलेन फलानीति पूरणी। 'पूरी आप्यायने'। मुञ्चति रसमिति मोचा। 'मुच्लृ मोक्षणे'। स्थिरमायुर्यस्य [1]कालसहत्वात् स्थिरायुः। चिरमायुर्यस्य चिरायुरिति वा पाठः। [2]शालते विटपैरिति शाल्मलिः। शाल्मली वा। 'शालृ श्लाघायाम्'। शाल्मलीनामानि। '[3]बूरुगुचेट्टु'॥ पराङ्गुलिसङ्गत्वात् पिच्छा। शाल्मलीं वेष्टयतीति शाल्मलीवेष्टः। शाल्मलिनिर्यासनाम। '[4]बूरुगुबंक'॥ रोचते सूक्ष्मतयेति रोचनः। 'रुच दीप्तौ'। कूटा कुत्सिता चासौ शाल्मलिश्च कूटशाल्मलिः। '[5]कोण्ड बूरुगु'॥ चिरिणोति चिरी। 'चिरि जूरि दाश हिंसायाम्'। चिरिणं हिंस्रगं बिलति भिनत्तीति चिरिबिल्वः। 'बिल भेदने'। नक्तमलति मण्डयतीति नक्तमालः। 'अल भूषणादौ'। नक्तं रात्रौ भूतानामालयत्वात्[6] नक्तमालः। कं जलं रञ्जयतीति करजः। करञ्जकश्च। 'रञ्ज रागे'। करञ्जवृक्षनामानि। '[7]कानुगुचेट्टु॥ ४६–७॥

[1] स्थिरत्वात् J_2. [2] शाल्यते Pt_2. [3] 'बूरद मर' J_2. [4] 'बुरदवीयल' J_2.
[5] 'पिन्नबूरुगु' K_2, K_5; 'चिक्कबुर' J_2. [6] आश्रयत्वात् I, K_2, Pt_2; भूताश्रयत्वादलं भूतसंघोऽस्मिन्निति J_2. [7] 'हलिगिनमर' J_2.

(पा.) पिच्छिला—शाल्मलिर्द्वयोः। 'शालते शाल्मलिः शलति शल्मलिः' इति सुभूतिटीकायां दीर्घादिर्ह्रस्वादिश्च व्युत्पादितः। शाल्मलिवृक्षनामानि। '[1]भूरुग'॥ पिच्छा—शाल्मलीवेष्टे। शाल्मलिनिर्यासनाम। 'बूरुगबंक'॥ रोचनः—शाल्मलिः। हंसशाल्मलिनामनी। 'कोण्डबूरुङ्ग'॥ चिरबिल्वो—करञ्जके। करञ्जनामानि। 'कानुग'॥४६–७॥

[1] 'बूरुगुचेट्टु' B_3.

प्रकीर्यः पूतिकरजः पूतिकः कलिमारकः।
करञ्जभेदाः षड्ग्रन्थो मर्कट्यङ्गारवल्लरी॥ ४८॥

(वि.) प्रकीर्य इति—प्रकीर्यते कलहस्थान इति प्रकीर्यः। 'कॄ विक्षेपे'। पूतिगन्धिः करजः पूतिकरजः। पूतिकश्च[1]। कलेः [2]कलहस्य मारकः नाशकः कलिमारकः। कलिं करोतीति कलिकारक इति वा पाठः। पूतिकरञ्जनामानि। 'नेमलियड्डुगुचेट्टु'॥ षड् ग्रन्थयो यस्य षड्ग्रन्थः। 'आरुकनुपुलुगलकानुग'॥ मर्कटवत्[3] पाटयतीति मर्कटी। 'कोन्तिवन्नेकानुग'॥ अङ्गारवर्णा वल्लर्योऽस्याः सन्तीति अङ्गारवल्लरी। 'निप्पुवन्नेगल[4] पूगुत्तुलु गलकानुग'॥ एते करञ्जभेदाः॥ ४८॥

[1] दुर्गन्धत्वात् पूतिकः J_2, Pt_2. [2] कलहंसस्य K_2. [3] मर्कटवर्णत्वात् K_5, Pt_2. [4] 'रक्तपुष्पदहलिगिलु' J_2.

(पा.) प्रकीर्यः—कलिमारकः। पूतीकोऽपि। 'गौरः प्रकीर्णः पूतीकः सुमनामृतपत्रकः' इति शेषः। 'पूतीकपत्रगजचिर्भटचव्यवह्नान्' इति धन्वन्तरिश्च। पूतिकरजनामानि। 'नेमिलिचेट्टु'॥ करञ्जभेदाः—अङ्गारवल्लरी। षड्ग्रन्थादयः करञ्जभेदा भवन्ति॥ षड्ग्रन्थः 'गण्टुलकानुग'॥ मर्कटी 'तीङ्गेकानुग'॥ अङ्गारवल्लरी 'निप्पुलवन्नेगुत्तुलकानुग'॥ ४८॥

रोही रोहितकः प्लीहशत्रुर्दाडिमपुष्पकः।
गायत्री बालतनयः खदिरो दन्तधावनः॥ ४९॥

(वि.) रोहीति—[1]भिन्नप्ररूढोऽपि रोहतीति रोही। नकारान्तः। रोहितकश्च। रोहिरिति इकारान्त इति केचित्। 'रुह बीजजन्मनि प्रादुर्भावे च'। प्लीहाख्यरोगशत्रुः[2] प्लीहशत्रुः। दाडिमस्येव [3]पुष्पाण्यस्य दाडिमपुष्पकः। रोहितकनामानि। 'मुल्लुमोदुग'॥ गायन्तं वैद्यं त्रायत इति गायत्री। 'त्रैङ् पालने[4]'। इयमीकारान्तः[5]। [6]बालः सूक्ष्मः तनयः पत्राख्यप्रसवो यस्य बालतनयः। खदति स्थिरतरं[7] भवतीति खदिरः। 'खद [8]स्थैर्ये'। दन्तान् [9]धावन्त्यनेनेति दन्तधावनः। 'धावु गतिशुद्ध्योः'। खदिरनामानि। [10]'चन्द्रचेट्टु'॥ ४९॥

[1] छिन्न° B_1, I, K_2; छिन्नोऽपि प्ररूढो Pt_2. [2] °आख्यस्य रोगस्य B_1, K_5, Pt_2. [3] पुष्पः J_2, K_2, K_5. [4] रक्षणे K_2, K_6. [5] तदीकारान्तः J_2. [6] बालाः सूक्ष्माः पत्रात्मकास्तनया यस्य Pt_2; पत्रात्मकप्रसवः J_2. [7] स्थिरीभवति Pt_2. [8] K_6 adds हिंसायां च. [9] धावयन्ति B_1, I, J_2, K_3, Pt_2. [10] 'मरुयदमर' J_2.

(पा.) रोही—दाडिमपुष्पकः। रोहिर्नान्त इकारान्तश्च। 'ढ्रलोप—' (६. ३. १११) इति दीर्घः। रोहितवृक्षनामानि। स च मगधविषयप्रसिद्धः। कण्टकपलाश इति केचित्। तदज्ञानविलसितमेव॥ गायत्री—दन्तधावनः। खदिरतरुनामानि। 'चंड्रचेट्टु'। 'गायत्री खदिरे स्त्री स्याच्छन्दस्यपि षडक्षरः' इत्यभिधानप्रसिद्ध्या स्त्रीलिङ्गः। 'पारिजातजपानिम्बवह्निगायत्रिणां पृथक्' इति वैद्यकप्रसिद्ध्या नान्तपुंलिङ्गोऽपि॥ ४९॥

अरिमेदो विट्खदिरे कदरः खदिरे सिते।
सोमवल्कोऽप्यथ व्याघ्रपुच्छगन्धर्वहस्तकौ॥ ५०॥

एरण्ड उरुबूकश्च रुचकश्चित्रकश्च सः ।
चञ्चुः पञ्चाङ्गुलो मण्डवर्धमानव्यडम्बकाः ॥ ५१ ॥

(वि.) अरिमेद इति—[1]अरिर्दुःसहो मेदोऽस्य[2] अरिमेदः । अयमकारान्तः । विड्गन्धी[3] खदिरो विट्खदिरः । 'दुर्गन्धमुगुलचन्द्रचेट्टु' ॥ कुत्सितं गन्धं दृणातीति कदरः । 'दृ विदारणे' । सोमवत् चन्द्रवत् वल्कं वल्कलमस्य सोमवल्कः । श्वेतखदिरनामनी । 'वेलिचन्द्रचेट्टु' ॥ व्याघ्रपुच्छाकारशाखायोगाद् व्याघ्रपुच्छः । गन्धर्वस्य [4]भूतविशेषस्य हस्त इव स्थूलपत्राण्यस्य गन्धर्वहस्तकः । [5]ईरयति वातं नाशयतीति एरण्डः । 'ईर[6] क्षेपे' । उरु भृशं वातं वाति नाशयतीति उरुबूकः । 'वा गतिगन्धनयोः' । वबयोरभेदः । रोचते [7]पर्णैरिति रुचकः । 'रुच दीप्तौ' । चित्रवर्णत्वात् चित्रकः । चञ्चति[8] वायुना चञ्चुः । 'चञ्चु गतौ' । पञ्चाङ्गुलयोऽवयवाः[9] पत्रात्मके हस्तेऽस्येति पञ्चाङ्गुलः । मण्डयति स्वप्रदेशमिति मण्डः । 'मडि [10]भूषायाम्' । आमण्ड इति वा पाठः । यत्र क्वापि वर्धत इति वर्धमानः । 'वृधु वृद्धौ' । व्यडति [11]रोगिणमुद्धरतीति व्यडम्बकः । 'अड उद्यमने' । एरण्डनामानि । 'आमुद्दमुचेट्टु' ॥ ५०–१ ॥

---

[1] अरिः शत्रुरिव J_2, Pt_2. [2] स्रावः Pt_2. [3] विड्गन्धः K_2, K_3. [4] Pt_2 adds मृगविशेषस्य. [5] J_2 adds आ समन्तात्. [6] 'ईर प्रेरणे' K_6. [7] वर्णैः K_6. [8] चलति पत्रभरेण K_5, K_6. [9] अङ्गुलय इव पत्राणि K_5; पर्णानि F_1. [10] व्याप्तौ च D_2; हर्षे च K_5. [11] रोगं हन्तुं Pt_2.

(पा.) अरिमेदो विट्खदिरे । दुर्गन्धखदिरनामनी । 'तुम्म' ॥ कदरः—सोमवल्कोऽपि । श्वेतसारखदिरनामानि ॥ 'उण्डुचेट्टु' ॥ अथ व्याघ्रपुच्छ—व्यडम्बकाः । एरण्डनामानि । 'आमुदमुचेट्टु' ॥ ५०–१ ॥

अल्पा शमी शमीरः स्याच्छमी सक्तुफला शिवा ।
पिण्डीतको मरुवकः श्वसनः करहाटकः ॥ ५२ ॥
शल्यश्च मदने शक्रपादपः पारिभद्रकः ।
भद्रदारु द्रुकिलिमं पीतदारु च दारु च ॥ ५३ ॥
पूतिकाष्ठं च सप्त स्युर्देवदारुणि

(वि.) अल्पा इति—अल्पा शमी शमीरः। 'चिन्नदैनजम्मि'॥ [1]शमयति दोषानिति शमी। 'शमु उपरमे'। सक्तुवत् स्वादूनि [2]फलान्यस्य सक्तुफला। [3]दोषशमनात् शिवा। शमीनामानि। '[4]जम्मिचेट्टु'॥ स्वल्पं पिण्डीभावम् इतः प्राप्तः पिण्डीतकः। 'इण् गतौ'। [5]विषपुष्पत्वात् म्रियन्तेऽनेन[6] मरुवकः। 'मृङ् प्राणत्यागे'। श्वसन्त्य-[7]नेकरोगहरत्वात् श्वसनः। 'श्वस प्राणने'। दुःस्पर्शत्वेन[8] करं हन्तीति करहाटकः। 'हन हिंसागत्योः'। [9]शल्यं कण्टकमस्यास्तीति [10]शल्यः। मदयतीति मदनः। 'मदी हर्षग्लपनयोः'। मरुवकनामानि। 'मङ्गचेट्टु'॥ शक्रस्य प्रियः पादपः शक्रपादपः। पारि निष्ठां प्राप्तं भद्रमस्य पारिभद्रकः। भद्रं च तद्दारु च भद्रदारु। द्रौ स्कन्धे किलिमं निर्यासोऽस्य द्रुकिलिमम्[11]। पीतवर्णं च तद्दारु च पीतदारु। पूतिदार्विति पाठे पूतिगन्धि काष्ठं पूतिकाष्ठं,[12] पूतिकाष्ठं च तद्दारु च पूतिदारु। एतौ शब्दौ विरुद्धलक्षणया [13]निष्पन्नौ। दीर्यत इति दारु। 'दॄ विदारणे'। देवानां दारु देवदारु। अयं पुल्लिङ्गेऽपि। देवदारुनामानि। 'देवदारुवृक्षमु'॥ ५२–३॥

---

[1] शाम्यति J_2. [2] स्वादु फलत्वात् K_5, K_6. [3] विहीनत्वात् B_1, K_5. [4] 'बंनिय मर' J_2. [5] विषपुष्पात् K_5; पुष्पवत्त्वात् B_1. [6] खादनेन B_1. [7] अनेन F_1, K_5, K_6. [8] दुःस्पर्शत्वात् Pt_2. [9] B_1, K_5 add स्वल्पं. [10] शल्यकण्टकः D_2. [11] द्रुकीलिममिति वा पाठः K_6. [12] पूति उग्रगन्धं काष्ठमस्येति Pt_2. [13] व्युत्पन्नौ F_1, I, K_3, K_5.

(पा.) अल्पा शमी—स्यात्। अल्पशमीवृक्षनाम। 'नेलजम्मि[1]'॥ शमी—शिवा। शमीवृक्षनामनी। 'जम्मिचेट्टु'॥ पिण्डीतको—श्वसनः करहाटकः। स्वसन इति केचित्॥ शल्यश्च मदने। मदनवृक्षनामानि। 'मङ्गचेट्टु'॥ शक्रपादपः—देवदारुणि। देवदारुद्रुमनामानि। 'देवदारुचेट्टु'॥ ५२–३॥

---

[1] B_3 adds °चेट्टु.

अथ द्वयोः।

पाटलिः पाटलामोघा काला स्थाली फलेरुहा॥ ५४॥
कृष्णवृन्ता कुबेराक्षी श्यामा तु महिलाह्वया।
लता गोवन्दनी गुन्द्रा प्रियङ्गुः फलिनी फली॥ ५५॥
विष्वक्सेना गन्धफली कारम्भा प्रियकश्च सः।

(वि.) अथेति—[1]पाटलवर्णपुष्पत्वात् पाटलिः। पाटला च। उपयोगिपुष्पत्वाद् अमोघा। मोघा इत्यपि पाठः। [2]कृष्णवृन्तत्वात् काला[3]। [4]रसाधारकुम्भत्वात् स्थाली। काचस्थालीति पाठे काचवर्णा स्थाली वृन्तमस्या अस्तीति काचस्थाली। कालस्थालीति पाठे [5]कालवर्णस्थालीत्वात् कालस्थाली। साचस्थालीति [6]पाठे सा च स्थालीति पदच्छेदः। साङ्कुरफलत्वात् फले रोहतीति फलेरुहा। कृष्णं वृन्तमस्या अस्तीति कृष्णवृन्ता। यक्षाक्षितुल्यपुष्पत्वात् कुबेराक्षी। पाटलाया नामानि। '[7]कलिगोट्टुचेट्टु'॥ श्यामवर्णत्वात् श्यामा। महिलायाः स्त्रियाः [8]आह्वयः नाम यस्याः सा महिलाह्वया। स्त्रियाः[9] यानि नामानि तान्यस्या वर्तन्त[10] इत्यर्थः। लतारूपत्वात् लता। गवि भूमौ वन्द्यते[11] स्तूयत इति गोवन्दनी। 'वदि अभिवादनस्तुत्योः'। गुद्यते क्रीड्यतेऽनयेति गुन्द्रा। 'गुद क्रीडायाम्'। प्रीणाति रोगहरणेन प्रियङ्गुः। 'प्रीञ् [12]तर्पणे कान्तौ च'। फलयोगात् फलिनी। फलति विशीर्यत इति वा। फली च। 'ञिफला विशरणे'। विष्वक् सिनोति बध्नातीति[13] विष्वक्सेना। गन्धानि स्थूलानि फलान्यस्या गन्धफली। गन्धप्रधानं फलमस्या इति वा। किंचित्[14] रम्भा कारम्भा। प्रिय एव[15] प्रियकः। प्रियङ्गुनामानि। 'प्रेंकणपुचेट्टु'॥ ५४–५॥

[1] आताम्रपुष्पत्वात् K_5, K_6.
[2] काल° Pt_2.
[3] कालः K_3.
[4] पुष्परसाधारत्वात् K_5, K_6.
[5] काला कृष्णा स्थाली यस्याः B_1, K_5.
[6] इति वा पाठः, तदा F_1.
[7] 'हादकायमर' J_2.
[8] आह्वा F_1, I, J_2.
[9] स्त्रियां F_1; स्त्रीणां K_5.
[10] सन्ति B_1, F_1, K_3.
[11] वन्दते K_5, K_6.
[12] प्रीणने K_6.
[13] B_1, D_2, K_2, K_5 add सर्वतः.
[14] किंचिद्रम्भाकारत्वात् B_1, K_5; ईषद्रम्भाकारा Pt_2.
[15] प्रिय इव K_5, K_6.

(पा.) अथ द्वयोः पाटलिः—अमोघा। 'अमोघा पाटलीर्न क्ली' इति वैजयन्ती (पृ. ५२, श्लो. ९०)। 'मोघा स्त्री पाटलीवृक्षे मोघस्त्रिषु निरर्थकः' इति रुद्रः॥ काचस्थाली—कुबेराक्षी। पाटलातरुनामानि। 'कालिगोट्टु'॥ श्यामा तु—फली। 'प्रियके तु प्रियङ्ग्वाख्या[1]' इति वैजयन्ती (पृ. ५०, श्लो. ६६)॥ विष्वक्सेना—प्रियका च सा। प्रियङ्गुवृक्षनामानि। 'प्रेंकणमुन्नु'[2] ॥ ५४–५॥

[1] 'प्रियङ्गुः पीततण्डुला' इत्यपि मुद्रितग्रन्थे (पृ. १२७, श्लो. ५५).
[2] B_3 adds 'सेनमु.'

मण्डूकपर्णपत्त्रोर्णनटकट्वङ्गटुण्टुकाः॥ ५६॥
स्योनाकशुकनासर्क्षदीर्घवृन्तकुटन्नटाः।
शोणकश्चारलौ तिष्यफला त्वामलकी त्रिषु॥ ५७॥

अमृता च वयस्था च त्रिलिङ्गस्तु विभीतकः ।
नाक्षस्तुषः कर्षफलो भूतावासः कलिद्रुमः ॥ ५८ ॥

(वि.) मण्डूकपर्णेति—मण्डूका इव पर्णान्यस्य [1]मण्डूकपर्णः । पत्रेषूर्णा यस्य पत्रोर्णः । नटति वातेनेति नटः । 'नट नृत्तौ' । [2]कट्वन्यङ्गान्यस्येति कट्वङ्गः । शिखाभिः[3] टुंटु इति शब्दं कायतीति टुण्टुकः । 'कै शब्दे' । डुण्डुक इति वा पाठः । स्योनं सुखमकतीति स्योनाकः । 'अक अग कुटिलायां गतौ' । श्योनाक इति पाठे श्यायत इति श्योनाकः । 'श्यैङ् गतौ' । [4]शुकनासाकाराणि पुष्पाण्यस्य शुकनासः । ऋक्ष्णोति [5]हिनस्तीति ऋक्षः । 'ऋक्ष हिंसायाम्' । दीर्घं वृन्तमस्य दीर्घवृन्तः । कुटन्[6] वक्रीभवन्[7] नटतीति कुटन्नटः । 'नट नृत्तौ' । शोणतीति शोणकः । 'शोणृ वर्णगत्योः' । शोनक इति [8]पाठे शवति व्याप्नोति सर्वतः शाखाभिरिति शोनकः । 'शव गतौ' । इयर्ति [9]पित्तादिकमपसरतीत्यरालुः । 'ऋ गतौ' । शोणकनामानि । 'पेद्मानु' ॥ तिष्यनक्षत्रवद्[10] भास्वरं फलमस्या इति तिष्यफला[11] । आमलते गुणानामलकी । 'मल मल्ल धारणे' । [12]अमलफलयोगाद्वा । रसायनत्वादमृता । [13]वयसि तिष्ठत्यस्या भक्षणेनेति वयस्था । वयो यौवनं तिष्ठति स्थिरीभवत्यनयेति वा । 'ष्ठा गतिनिवृत्तौ' । आमलकीनामानि । [14] 'उसिरिकचेट्टु' ॥ बिभेत्यस्माद् रोग इति विभीतकः । 'ञिभी भये' । अक्ष्णोति फलैरिति [15]अक्षः । 'अक्षू व्याप्तौ' । तुष्यति स्वल्पवारिणेति तुषः । 'तुष तुष्टौ' । कर्षमात्राणि फलान्यस्येति कर्षफलः । भूतानामावासो[16] भूतावासः । कलेराश्रयो द्रुमः कलिद्रुमः[17] । विभीतकनामानि । 'दाण्ड्रचेट्टु' ॥ ५६–८ ॥

---

[1] मण्डूकाकाराणि पर्णानि J_2, Pt_2.　[2] स्कन्धाः B_1, F_1, J_2, K_5.　[3] शिम्ब्यादिभिः K_5, K_6.　[4] शुकनासेव F_2, Pt_2.　[5] अश्थि° B_1, F_1, I, K_3; अक्षिरोगान् D_2, K_6.　[6] कुटं वक्रीभावं F_1, I, K_3; वक्राकारं J_2.　[7] K_6 adds स्यन्दते; स्पन्दति F_2.　[8] वा पाठः, तदा B_1, F_1, I, J_2.　[9] अवसादयति K_5.　[10] तिष्यवच्छुभफलत्वात् F_2, Pt_2; तिष्यनक्षत्रयुक्ते काले फलं करोतीति वा Pt_2.　[11] तिष्यफली K_5, K_6.　[12] आमल° K_6.　[13] नववयसि J_2.　[14] 'नेल्लियमर' J_2.　[15] ना अक्ष इति पदच्छेदः F_2.　[16] आवासत्वात् K_3.　[17] कलिपुरुषस्य प्रियः K_3.

(पा.) मण्डूकपर्ण—शोणकश्चारलौ । 'भूतपुष्पो नटोदङ्कभक्षकट्वङ्ग आरलुः' इत्यभिधानाद्दीर्घादिः । 'मयूरजङ्घोऽरलुकः [1]प्रियकेतुः कुटन्नटः' इत्यभिधानात् ह्रस्वादिः । आरलुद्रुमनामानि । 'पेनुमानु । दुंदिलमुन्नु' ॥ तिष्यफला—वयस्था च । आमलकनामानि । 'उशिरिकचेट्टु' । अनुक्तम्—'माकन्दी तु फलं तस्याः' । तत्फलनाम ।

'उशिरिक्काय' ॥ त्रिलिङ्गः—विभीतकः । नाक्षः । [2]स्वग्रहणं नियमार्थम् ॥ तुषः—कलिद्रुमः । विभीतकतरुनामानि । 'तांडिचेट्टु' ॥ ५६–८ ॥

[1] प्रियजीव इति मुद्रितधन्वन्तरिनिघण्टुग्रन्थे. [2] नाक्ष इत्यत्र 'ना' इति पुंलिङ्गग्रहणं नियमार्थम्.

अभया त्वव्यथा पथ्या कायस्था पूतनामृता ।
हरीतकी हैमवती रेचकी श्रेयसी शिवा ॥ ५९ ॥

(वि.) अभयेति—नास्ति [1]भयमस्याः सकाशाद् अभया । न [2]व्यथयति रोगहरत्वाद् अव्यथा । 'व्यथ भयसंचलनयोः' । निरामये पथि साध्वी पथ्या । कायस्तिष्ठत्यनयेति कायस्था । काये [3]शरीरे आरोग्यकरी तिष्ठतीति वा । वयस्थेति पाठे व्युत्पत्तिः पूर्वोक्ता । पूतयति[4] पुरुषं पूतं करोतीति पूतना । 'पूञ् पवने' । रसायनत्वात् नास्ति मृतिर्मरणमस्या इत्यमृता । हरति रोगानिति हरीतकी । हृञ् हरणे' । हिमवति गिरौ प्रचुरा हैमवती । रेचयति विरेचनं करोतीति रेचकी । 'रिचिर् विरेचने[5]' । श्रेयः करोतीति श्रेयसी । दोषशमनात्[6] शिवा । हरीतकीनामानि । '[7]करकचेट्टु' ॥ ५९ ॥

[1] रोगभयं यस्याः Pt_2. [2] नास्ति रोगव्यथास्याः F_2, Pt_2. [3] देहे B_1, J_2, K_5. [4] पुनाति देहं J_2, Pt_2. [5] 'रिचिर् पृथग्भावे' Pt_2; चेतकीति पाठे चेतयति चेतकी । 'चिती संज्ञाने' F_2. [6] रोग° J_2. [7] 'अलिलेमर' J_2.

(पा.) अभया—वयस्था । कायस्थेत्यपि ॥ पूतना—शिवा । हरीतकीनामानि । 'करकचेट्टु' ॥ ५९ ॥

पीतद्रुः सरलः पूतिकाष्ठं चाथ द्रुमोत्पलः ।
कर्णिकारः परिव्याधे लकुचो लिकुचो दहुः ॥ ६० ॥

(वि.) पीतद्रुरिति—पीतवर्णो द्रुर्द्रुमः[1] पीतद्रुः । सरति विस्तारं प्राप्नोतीति सरलः । सरलसंज्ञकत्वाद्वा । पूतिगन्धि काष्ठं[2] पूतिकाष्ठम् । सरलनामानि । 'सरल[3]पुचेट्टु' ॥ अस्य द्रुमस्योत्पलानीव पुष्पाणि सन्तीति द्रुमोत्पलः । [4]कर्णिकाकारभूषणम् इयर्तीति कर्णिकारः । 'ऋ गतौ' । वायुना परिविध्यत[5] इति परिव्याधः । 'व्यध ताडने' । कर्णिकारनामानि । 'कोण्डगोंगु' ॥ लक्यते आस्वाद्यत इति लकुचः । लिकुचश्च । 'लकि आस्वादने' । अग्निना दह्यत इति दहुः[6] । 'दह भस्मीकरणे' । 'कम्मरेंगु ॥ ६० ॥

[1] K$_2$, K$_3$ add वृक्षः. [2] °काष्ठत्वात् K$_5$. [3] ‘सरलमर’ J$_2$. [4] कर्णिकां कर्णभूषणं B$_1$, K$_5$. [5] परिविध्यति K$_5$, K$_6$. [6] दहति, तोहति वा डहुः। डदयोरभेदः। ‘तुहिर् अर्दने’ Pt$_2$.

(पा.) पीतद्रुः—पूतिका च। सरलनामानि। ‘अंदुगचेट्टु’॥ अथ द्रुमोत्पलः—परिव्याधः। कर्णिकारनामानि। ‘कोंडगोंडु’॥ लकुचो—डहुः। गजजम्बीरनामानि। ‘गजनिम्म’॥ अनुक्तम्—‘शाकः क्रकचपत्रः स्यात् पृथक्छदहरीतकौ’। शाकवृक्षनामानि। ‘तेंकुचेट्टु’॥ ६०॥

पनसः कण्टकिफलो निचुलो हिज्जलोऽम्बुजः।
काकोदुम्बरिका फल्गुर्मलपूर्जघनेफला॥ ६१॥

(वि.) पनस इति—पन्यते स्तूयत[1] इति पनसः। ‘पन स्तुतौ’। पणस इति पाठे पण्यते [2]व्यवह्रियते पणसः। ‘पण व्यवहारे स्तुतौ च’। कण्टकितानि[3] फलान्यस्य कण्टकिफलः। ‘पनस चेट्टु’॥ निचोल्यते[4] जलेनेति निचुलः। ‘चुल [5]समुच्छ्राये’। हितं जलमस्य हिज्जलः। अम्बुनि जायत इत्यम्बुजः। ‘जनी प्रादुर्भावे’। निचुलनामानि। ‘एर्रगन्नेरु’॥ काकप्रिया च सा [6]उदुम्बरकल्पा च काकोदुम्बरिका। निःसारत्वात् [7]फलतीति फल्गुः। ‘ञिफला विशरणे’। मलात् श्वित्रादिकात् पुनातीति मलपूः। ‘पूञ् पवने’। मलं यावयते[8] कुत्सयतीति मलयूरिति वा पाठः। ‘यु जुगुप्सायाम्’। जघने स्कन्धे फलानि यस्याः सा जघनेफला। ‘कुक्कमेडिचेट्टु॥ ६१॥

[1] B$_1$, G, K$_2$ add स्वादुतया. [2] पण्यत इति व्युत्पत्तिः K$_2$, K$_3$. [3] कण्टकवन्ति G; कण्टकयुक्तानि Pt$_2$. [4] निचुल्यते K$_5$. [5] ‘चुल निमज्जने’ K$_3$, K$_6$. [6] उदुम्बरी G, Pt$_2$; ‘बह्ममेदिचेट्टु’ K$_3$. [7] फलवती K$_6$. [8] यापयति K$_5$, K$_6$.

(पा.) पनसः कण्टकिफलः। पनसवृक्षनामनी। ‘पनसचेट्टु’। पवर्गद्वितीयादिरिति केचित्। पणस इति टवर्ग्यमध्यम इति केचित्॥ निचुलो—जघनेफला। काकोदुम्बरनामानि। ‘ब्रह्ममेडि[1]’॥ ६१॥

[1] बह्ममेदिचेट्टु B$_3$.

अरिष्टः सर्वतोभद्रहिङ्गुनिर्यासमालकाः।
पिचुमन्दश्च निम्बेऽथ पिच्छिलागुरु शिंशुपा॥ ६२॥

(वि.) अरिष्ट इति—न रिष्यते [1]कुष्ठरोगग्रस्तोऽनेनेति अरिष्टः। 'रिष हिंसायाम्'। सर्वतो भद्रमस्य[2] सर्वतोभद्रः। हिङ्गुवन्निर्यासोऽस्येति हिङ्गुनिर्यासः[3]। [4]मल्यते काकैर्वेष्ट्यत इति मालकः। 'मल [5]धारणे'। पिचुं कुष्ठं मन्दयतीति पिचुमन्दः[6]। 'मदि हर्षग्लपनयोः'। आरोग्यं नयतीति निम्बः। 'णीञ् प्रापणे'। निम्बनामानि। 'वेपचेट्टु'॥ पिच्छास्या अस्तीति पिच्छिला। न गुरु अगुरु[7]। रोगं शिनोति [8]तनूकरोतीति शिंशुपा। 'शीञ् निशातने'। शिंशपेति वा पाठः। शिंशुपानामानि। 'डरुगुडुम्रानि'॥ ६२॥

[1] रोगिजनः G, Pt_2. [2] K_5 adds अस्तीति. [3] हिङ्गुनो निर्यास इव निर्यासः G, Pt_2. [4] माल्यते K_6; मलते काकसमूहं Pt_2. [5] 'मल मल्ल धारणे' K_3, K_6, Pt_2. [6] पिचुं मृद्नातीति पिचुमर्द इति वा पाठः; 'मृद क्षोदे' G, Pt_2. [7] न गुरुः अगुरुः K_3, K_6. [8] नाशयति B_1, K_2, K_3, K_5.

(पा.) अरिष्टः—निम्बे। निम्बनामानि। 'वेंपचेट्टु'। अनुक्तम्—'कालशाकस्तु कैडर्यः'। कैडर्यनामनी। 'करिवेंपचेट्टु'॥ अथ पिच्छिलागुरु। नपुंसकम्। 'अगुरु क्ली शिंशपायां जोङ्गके लघुनि त्रिषु' इति रुद्रः। 'शिंशपा'॥ ६२॥

कपिला भस्मगर्भा सा शिरीषस्तु कपीतनः।
भण्डिलोऽप्यथ चाम्पेयश्चम्पको हेमपुष्पकः॥ ६३॥

(वि.) कपिलेति—काम्यत इति कपिला। 'कमु कान्तौ'। [1]भस्मतुल्या मज्जा गर्भे अस्या अस्तीति भस्मगर्भा। हस्तिगर्भेति पाठे हस्तितुल्यो गर्भो मज्जा अस्या अस्तीति हस्तिगर्भा। कपिलानामनी। 'कंपुगलयरुगुडु चेट्टु'॥ पिच्छिलादीनि[2] भस्मगर्भान्तानि [3]पदानि शिंशुपाया नामानीति केचित्[4]॥ शीर्यते मृदुपुष्पत्वादिति[5] शिरीषः। 'शॄ हिंसायाम्'। कपीन्[6] तनोतीति कपीतनः। 'तनु विस्तारे'। भण्ड्यते[7] परिभाष्यते शुकैरिति भण्डिलः[8]। 'भडि परिभाषणे'। शिरीषनामानि। 'दिरिसेनपुचेट्टु'॥ [9]चम्पादेशे भवः चाम्पेयः। चम्यते षट्पदैरिति चम्पकः। 'चमु[10] अदने'। हेमवर्णं [11]पुष्पमस्येति हेमपुष्पकः। चम्पकनामानि। 'संपेंगचेट्टु'॥ ६३॥

[1] भस्मतुल्यो गर्भो मज्जा G, K_5. [2] पिच्छिलादि G, K_6. [3] K_3 adds पञ्च. [4] K_2 adds वृणन्ति. [5] सौकुमार्यात् G, Pt_2. [6] कपिं K_5, K_6. [7] भण्डतीति भण्डिलः, 'भडि कल्याणे' Pt_2. [8] भण्डिरः B_1, K_2, K_3, K_5. [9] चम्पाख्य° G, Pt_2; चम्पाख्ये B_1. [10] चमु छमु जमु K_6. [11] °वर्णपुष्पत्वात् K_5, K_6.

(पा.) कपिला—सा । [1]शिंशपावृक्षनामानि । 'पिच्छिला च महाश्यामा कृष्णसारस्तथागरुः' इति शेषे । 'यिरुगुड्डुचेट्टु' । शिरीषस्तु—भण्डिलोऽपि । ह्रस्वमध्यः । 'अथ भण्डिले कपीतनः शिरीषश्च' इति वैजयन्ती (पृ. ५१, श्लो. ७२) । शिरीषनामानि । '[2]दिरिशिनचेट्टु' ॥ अथ चाम्पेयः—हेमपुष्पकः[3] । चम्पकनामानि । 'संपेङ्गचेट्टु' । 'पञ्चपञ्चश्च सुरभिः' । एते च ॥ ६३ ॥

[1] शिंशुपा° B_3. [2] 'दिरिशेन°' B_3. [3] हिम° B_3.

एतस्य कलिका गन्धफली स्यादथ केसरे ।
वकुलो वञ्जुलोऽशोके समौ करकदाडिमौ ॥ ६४ ॥

(वि.) एतस्येति—गन्ध एव फलमस्या इति गन्धफली । चम्पककलिकानाम । 'संपेंगमोग्गुपेरु' ॥ के शिरसि सरति गन्धसारत्वात् केसरः । 'सृ गतौ' । (कविभिः) उच्यते रोगानत्तीति[1] वकुलः । 'वच परिभाषणे' । वकुलनामनी । 'पोगडचेट्टु' ॥ [2]वन्यते याच्यते कर्णपूरायेति वजुलः । 'वनु याञ्चने' । अश्नुते व्याप्नोतीत्यशोकः । 'अशू व्याप्तौ' । शोकनाशकत्वाद्वा । अशोकनामनी । '[3]अशोकवृक्षमु' ॥ करोति दोषाभावमिति करकः । 'डुकृञ् करणे' । किरति बीजानीति वा । 'कॄ विक्षेपे' । दल्यते पक्वावस्थायामिति दाडिमः । 'दल विशरणे' । दाडिमनामनी । '[4]दानिम्मचेट्टु' ॥६४॥

[1] नुदतीति B_1, D_2, K_6; अपनुदति K_5. [2] वर्ण्यते G, K_2. [3] 'अशोकपुचेट्टु' G, Pt_2. [4] 'दाडिम्बमु' K_2; 'दाडिमचेट्टु' K_3.

(पा.) एतस्य—स्यात् । एतत्कोरकनाम । 'संपेङ्गमुग्ग' ॥ अथ—बकुलः । केसरवृक्षनामनी । 'पोगड[2]' । 'केसरः[3] सिंहपूर्वश्च भव्यपूर्वश्च लम्पटः' । एते च ॥ वञ्जुलोऽशोके । अशोकनामनी । 'अशोकमु' ॥ 'कङ्केलिः कर्णपूरकः' । एते च ॥ समौ—दाडिमौ । दाडिमद्रुमनामनी । 'दानिम्म' । 'स्वाद्वम्लो रक्तबीजश्च कुट्टिमः फलषाडवः[4]' । एतानि च ॥ ६४ ॥

[1] वकुलः B_3. [2] B_3 adds °चेट्टु. [3] 'केसरे बकुलो मद्यलालसः सिंहकेसरः' इति वैजयन्त्याम् . [4] °शाडवः इति त्रिकाण्डशेषे (पृ. ११, श्लो. २३७).

चाम्पेयः केसरो नागकेसरः काञ्चनाह्वयः ।
जया जयन्ती तर्कारी नादेयी वैजयन्तिका ॥ ६५ ॥

(वि.) चाम्पेय इति—चम्पाख्यदेशे भवः[1] चाम्पेयः। के शिरसि सरतीति केसरः। 'सृ गतौ'। नागप्रियाणि केसरवन्ति पुष्पाण्यस्य नागकेसरः[2]। काञ्चनस्य स्वर्णस्याह्वयो यस्य काञ्चनाह्वयः[3]। नागकेसरनामानि। 'नागकेसरमु'॥ जयति [4]शोषादिरोगानिति जया। जयन्ती च। तर्कं [4]शोषादिविनाशहेतुभावम् [5]इयर्तीति तर्कारी। 'ऋ गतौ'। नद्यां भवा नादेयी। विजयते[6] शोभादिकमनयेति वैजयन्तिका[7]। जयन्तीनामानि। 'तक्किलिचेट्टु'॥ ६५॥

---

[1] भवत्वात् Pt₂.

[2] नागो हस्ती तन्नाम केसरोऽस्येति वा Pt₂.

[3] काञ्चनस्य सर्वाणि नामानि अस्येति D₂, K₅, K₆.

[4] शोभादि° B₁, I.

[5] K₅, K₆ add प्राप्नोति.

[6] विजयत इति K₅, K₆.

[7] 'जि जये' G, J₂.

(पा.) चाम्पेयः—काञ्चनाह्वयः। नागकेसरनामानि। 'नागकेसरमु'॥ जया—वैजयन्तिका। तर्कारीनामानि। 'तक्कोलचेट्टु'॥ ६५॥

श्रीपर्णमग्निमन्थः स्यात् कणिका गणिकारिका।
जयाथ कुटजः शक्रो वत्सको गिरिमल्लिका॥ ६६॥

(वि.) श्रीपर्णमिति—श्रीः शोभा पर्णेष्वस्य श्रीपर्णम्। [1]अग्निं मथ्नात्यस्मिन्निति अग्निमन्थः[2]। 'मन्थ विलोडने'। कणाः सन्त्यस्यामिति [3]कणिका। गणिकावत् [4]कुहकमियर्ति गच्छतीति गणिकारिका। जयति रोगानिति जया। 'जि जये'। अग्निमन्थस्य नामानि। 'कूरनेल्लिचेट्टु'॥ कुटिलो जायत इति कुटजः। 'जनी प्रादुर्भावे'। शक्रवृक्षत्वात् शक्रः। वस्ते त्वचमिति वत्सकः। 'वस आच्छादने'। गिरौ मल्लिकावत् तिष्ठतीति गिरिमल्लिका। कुटजनामानि। [5]'कोडिसेचेट्टु॥ ६६॥

---

[1] मन्थन्ति J₂.

[2] B₁ omits 16 lines.

[3] कर्णिका K₂.

[4] मोहनतां Pt₂.

[5] 'कोडसिगे' J₂.

(पा.) श्रीपर्ण—जया। अग्निमन्थवृक्षनामानि। 'नेल्लिचेट्टु'। अथ कुटजः—गिरिमल्लिका। कुटजनामानि। 'कोडिश'॥ ६६॥

एतस्यैव कलिङ्गेन्द्रयवभद्रयवं फले।
कृष्णपाकफलाविग्नसुषेणाः करमर्दके॥ ६७॥

(वि.) एतस्येति—[1]कलिङ्गदेशे जातं कलिङ्गम्। इन्द्रवृक्षफलत्वाद् यववीजाकृतित्वाच्च इन्द्रयवम्। दीपनादिकल्याणकारित्वाद्[2] भद्रयवम्। भद्रयवनामानि। '[3]कोडिसेपण्डु'॥ कृष्णं पाके फलमस्य कृष्णपाकफल[4]ः। आविजतेऽस्मादिति आविग्नः। 'ओविजी भयचलनयोः'। उद्विग्न इति पाठे उद्विजन्ते जनाः पित्तकरेऽस्मिन्निति उद्विग्नः। सुषेणाख्यकपिमुखाभफलत्वात्[5] सुषेणः। करेण [6]मृद्यते करमर्दकः। 'मृद मर्दने'। करमर्दकनामानि। '[7]करिवे चेट्टु'॥ ६७॥

[1] कलिङ्गफलत्वात् K_5, K_6.	[2] G, Pt_2 add यवाकृतित्वाच्च.	[3] 'कोडरीगनपील' J_2.	[4] कृष्णवर्णपाकं फलमस्य Pt_2.	[5] °मुखाभत्वात् J_2; मुखाकृतित्वात् Pt_2.	[6] मर्द्यते J_2, Pt_2.	[7] 'वोरिग' K_6.

(पा.) एतस्यैव—फले। एतत्फलनामानि। 'कोडिशकाय'। 'कुटजस्य फले क्लीबं कलिङ्गेन्द्रयवं स्मृतम्' इति रत्नकोशपाठात् समासाभिप्रेतम्। 'कलिङ्गं तु यवे ना तु देशपक्षिविशेषयोः' इति वैजयन्तीपाठाद् (पृ. २५९, श्लो. ३३) व्यासाभिप्रेतं कलिङ्गम् इन्द्रयवमिति॥ अनुक्तम्—'दोषग्राहस्तु कतकः'। कतकनाम। 'इण्डुपुचेट्टु'॥ 'जम्बूः स्त्री सुरभिच्छदः'। जम्बूनाम। 'नेरेडु'॥ कृष्णपाकफला—करमर्दके। करमर्दकनामानि। 'कलिवेचेट्टुन्नु वोंकचेट्टुन्नु'। शब्दार्णवे कृष्णपाकफलशब्दाः बहुधा विकल्पिताः—

'कृष्णः पाकः फलो विग्नः सुषेणः करमर्दकः।
कृष्णपाकफलः कृष्णफलपाको वनालकः॥
कृष्णपाकफलादिश्च पाककृष्णः फलादिकः।
कृष्णपाकः पाककृष्णः फलकृष्णो वरालकः॥
पाककृष्णफलः पाकफलकृष्णः कराम्बुकः।
फलपाकः पाकफलो बोलः कृष्णफलो वशः॥'

इति॥ ६७॥

कालस्कन्धस्तमालः स्यात् तापिच्छोऽप्यथ सिन्दुकः।
सिन्दुवारेन्द्रसुरसौ निर्गुण्डीन्द्राणिकेत्यपि॥ ६८॥

(वि.) कालस्कन्ध इति—कालवर्णः स्कन्धोऽस्य कालस्कन्धः। [1]तम्यते तापिभिरिति तमालः। 'तमु [2]काङ्क्षायाम्'। [3]तापिनः छादयतीति तापिच्छः। 'छद अपवारणे'। तमालनामानि। 'तमालमु'॥ स्यन्दते [4]कटुरक्तरसमिति [5]सिन्दुकः।

'स्यन्दू प्रस्रवणे'। सिन्दुं स्यन्दनं त्वगादिना वृणोतीति सिन्दुवारः। 'वृञ् वरणे'। इन्द्रस्य सुरसः प्रिय इति इन्द्रसुरसः। गुडतीति गुडः। 'गुड वेष्टने'। [6]गुडाद्वेष्टनान्निष्क्रान्ता निर्गुण्डी। इन्द्रस्य प्रिया इन्द्राणिका। सिन्दुवारनामानि। '[7]वाविलिचेट्टु'॥ ६८॥

---

[1] ताम्यतीति Pt_2 [2] 'तमु ग्लानौ' Pt_2. [3] तापिनं G, Pt_2. [4] तिक्त° D_2, G, I, K_2. [5] सिन्धुकः K_6; स्यन्दते रसं Pt_2. [6] गुडवत् G. [7] 'लाक्कगड' J_2.

(पा.) कालस्कन्धः—तापिच्छोऽपि। तमालतरुनामानि। 'चीकटिचेट्टु'॥ अथ [1]सिन्दुके—इन्द्राणिकेत्यपि। [2]सिन्दुकनामानि। 'वाविलिचेट्टु'॥ ६८॥

---

[1] सिन्धुके B_3; सिन्धुवारः B_3. [2] सिन्धुक° B_3.

वेणी गरागरी देवताडो जीमूत इत्यपि।
श्रीहस्तिनी तु भूरुण्डी तृणशूल्यं तु मल्लिका॥ ६९॥
भूपदी शीतभीरुश्च सैवास्फोटा वनोद्भवा।

(वि.) वेणीति—[1]वेणीवत् तिष्ठतीति वेणी। गरं मूषिकविषम् आगिरतीति गरागरी। 'गॄ निगरणे'। खरागरी, खरा, गरीति वा पाठः। ताडयन्ति कर्णं ताडाः अङ्कुराः। 'तड आघाते'। अङ्कुरा उद्भिदस्तेषु मुख्यत्वात् देवताडः। देवमिन्द्रियं ताडयतीति वा। [2]जीमूत इवाह्लादकत्वात् जीमूतः। देवतालनामानि। 'देवताडि पेल्लु'॥ [3]शोभान्वितहस्तिकर्णाभपत्रयोगात्[4] श्रीहस्तिनी। भुवि रोहतीति भूरुण्डी। 'रुह बीजजन्मनि प्रादुर्भावे च'। 'गुरुगुचेट्टु'॥ तृणशूले वातगुल्मे साधु तृणशूल्यम्। तृणशून्यं, तृणशून्या, तृणशूल्या इति पाठाः। मल्यते मूर्ध्नि मल्लिका। 'मल मल्ल धारणे'। भुवि पदं यस्याः सा भूपदी। शीताद् [5]भीरुरिति शीतभीरुः। 'ञिभी भये'। मल्लिकानामानि। '[6]मल्लेचेट्टु'॥ [7]आस्फोटति ईषद्विकसतीति आस्फोटा। 'स्फुट विकसने'। आस्फोतेति वा पाठः। '[8]अडविमल्लेपेरु'॥ ६९॥

---

[1] वेणीव J_2, Pt_2. [2] जीमूतवत् Pt_2. [3] शोभाकार° K_5, K_6. [4] कर्णाकार° J_2. [5] बिभेतीति G, K_2, K_3, K_5; Pt_2 adds ग्रीष्मजत्वात्. [6] 'मोल्ले' J_2. [7] ईषत् स्फुटतीति K_5, K_6. [8] 'अटवीमोल्ले' J_2.

(पा.) वेणी—जीमूत इत्यपि। देवतालनामानि। 'डापरडङ्गि'। अनुक्तम्—'अजभक्षस्तु गोश्रृङ्गो बर्बुरश्च युगाक्षरः'। बर्बुरनामानि। 'बोब्बचेट्टु'। 'कारस्करो

महाकोलः किंपाकः कालकूटकः’। किंपाकद्रुमनामानि। ‘कांजीरवृक्षमु’॥ श्रीहस्तिनी—भूरुण्डी। श्रीहस्तिनीनामनी। ‘गुरुगुचेट्टु’॥ [1]तृणशूल्यं तु। सुभूतिटीकायां तृणशूल्या तृणशून्या वेति रूपान्तरसत्ता स्त्रीलिङ्गता चोक्ता। मल्लिका—शीतभीरुश्च। मल्लिकानामानि। ‘मल्ले’। ‘मदयन्ती विचकिलः’। एते च॥ सैव—वनोद्भवा। ‘अडविमल्ले’। ‘[2]काकमल्यां वनोद्भवा’ इति वैजयन्ती (पृ. ६०, श्लो. १८४)॥ ६९॥

---

[1] तृणशून्यं B_3. [2] काकमाल्याम् इति मुद्रितग्रन्थे.

शेफालिका तु सुवहा निर्गुण्डी नीलिका च सा॥ ७०॥
सितासौ श्वेतसुरसा भूतवेश्यथ मागधी।
गणिका यूथिकाम्बष्ठा सा पीता हेमपुष्पिका॥ ७१॥

(वि.) शेफालिकेति—शेरत इति शेफाः निद्राणा अलयोऽत्रेति शेफालिका। सुष्ठु वहत्यामोदं सुवहा। ‘वह प्रापणे’। गुडाद्वेष्टनान्निष्क्रान्ता [1]निर्गुण्डी। नीलपुष्पत्वात् नीलिका। शेफालिकानामानि। ‘[2]नल्लवाविलि’॥ श्वेतः शोभनो[3] रसो यस्याः सा श्वेतसुरसा। भूतानि विशत्याह्लादयतीति भूतवेशी। ‘[4]विश आह्लादने’। श्वेतशेफालिकानामनी। ‘तेल्लवाविलि’॥ [5]मगधदेशप्रचुरा मागधी। गणिकावच्चित्ताकर्षणाद्[6] गणिका। यूथो [7]जालकमस्या अस्तीति यूथिका। भ्रमरैरम्ब्यते शब्द्यत इत्यम्बष्ठा। ‘अबि शब्दे’। अम्बो भ्रमराणां ध्वनिः, सोऽत्र तिष्ठतीति वा। ‘ष्ठा गतिनिवृत्तौ’। [8]यूथिकानामानि। ‘अडविमोल्ल’॥ हेमवर्णानि पुष्पाणि यस्या हेमपुष्पिका। पीतपुष्पयूथिकानाम। ‘पच्चपूवुलमोल्लपेरु’॥ ७०–१॥

---

[1] Pt_2 adds ‘गुड वेष्टने’. [2] ‘नल्लनिपुष्पुलुवाविलि’ K_3. [3] शोभनश्च G.
[4] ‘विश प्रवेशने’ B_1, K_3. [5] °देशे J_2, Pt_2; प्रचुरत्वात् J_2. [6] कर्षणात् Pt_2.
[7] जालमस्या इति Pt_2. [8] एतानि मालतीकल्पस्य नामानि J_2.

(पा.) शेफालिका—नीलिका च सा। नीलपुष्पनिर्गुण्डीनामानि। ‘नल्लवाविलि’॥ सितासौ—भूतवेशी। श्वेतपुष्पनिर्गुण्डीनामानि। ‘तेल्लवाविलि’॥ अथ मागधी—अम्बष्ठा। ‘मुल्ल’। सा—हेमपुष्पिका। सा यूथिका पीतपुष्पा चेत् हेमपुष्पिका। ‘पच्चपुप्पुलमुल्ल’॥ ७०–१॥

अतिमुक्तः पुण्ड्रकः स्याद् वासन्ती माधवी लता ।
सुमना मालती जातिः सप्तला नवमालिका ॥ ७२ ॥

(वि.) अतिमुक्त इति—[1]वैराग्यसंपत्त्या मुक्तानप्यतिक्रामत्यभिभवतीति अतिमुक्तः। पुण्ड्रदेशे भवः पुण्ड्रकः। वसन्तमासे[2] भवा वासन्ती। मधौ वसन्ते[3] भवा माधवी। लात्यादत्ते [4]शारिकाचित्तमिति लता। 'ला आदाने'। वासन्तीनामानि। 'पूवुलगुरुविंदपेल्लु'॥ सुष्ठु मन्यते जनैरिति सुमनाः। सान्तोऽयम्। 'मन [5]अवबोधने'। मालां कुर्वन्त्यनयेति मालती। मल्यते आमोदैरिति वा। 'मल मल्ल धारणे'। जायते [6]प्रीतिरनयेति जातिः[7]। 'जनी प्रादुर्भावे'। जातिनामानि। 'जाजिचेट्टु'॥ सप्त [8]इन्द्रियाणि लात्यादत्ते सुगन्धित्वात् सप्तला। 'ला आदाने'। नूयत इति नवा। 'णु स्तुतौ'। नवा चासौ [9]मालिका च नवमालिका। नवा स्तुत्या माला अस्या इति वा। नवमालिकानामनी॥ '[10]विरजाजिचेट्टु'॥ ७२ ॥

[1] अतिक्रान्तो मुक्तान् विरक्तानिति Pt_2.
[2] °काले J_2; वसन्ते पुष्प्यतीति Pt_2.
[3] चैत्रे पुष्प्यतीति Pt_2
[4] जनमनांसि Pt_2.
[5] 'मन ज्ञाने' F_2, Pt_2.
[6] सुखम् Pt_2.
[7] जाती इति वा पाठः G, I.
[8] Pt_2 adds मनोबुद्ध्यन्तानि.
[9] मल्लिका J_2.
[10] 'इरवन्तिगे' J_2.

(पा.) अतिमुक्तः—माधवी लता। माधवीनामानि। 'पूवुलगुरिविंद'॥ सुमना—जातिः। जातिनामनी। 'जाजि'॥ सप्तला नवमालिका। 'विरुवाविलि विरवाजिन्नि'। 'वनमाली च नेपाली . . . शेखरीत्यपि (?)' इति शेषे॥ ७२ ॥

माघ्यं कुन्दं रक्तकस्तु बन्धूको बन्धुजीवकः ।
सहा कुमारी तरणिरम्लानस्तु महासहा ॥ ७३ ॥

(वि.) माघ्यमिति—[1]माघमासे भवं माघ्यम्। कुं भुवमुद्भेदनकाले[2] द्यति खण्डयतीति कुन्दम्। 'दो अवखण्डने'। कुन्दनामनी। '[3]मोल्लचेट्टु'॥ रक्तपुष्पशालित्वाद्[4] रक्तकः। सुकुमारत्वाच्चित्तं बध्नातीति बन्धूकः। 'बन्ध बन्धने'। बन्धून् जीवयतीति बन्धुजीवकः[5]। बन्धुः जीवतां यूनामिति वा। बन्धूकनामानि। 'मङ्केनचेट्टु'॥ [6]सहते परिमलमिति सहा। 'षह मर्षणे'। कुं[7] भूमिस्थं मारयति नाशयतीति कुमारी। 'मृङ् प्राणत्यागे'। तरन्त्यनया [8]दोषजानि दुःखानीति तरणिः। 'तॄ प्लवनतरणयोः'। [9]कुमारीनामानि। 'पिन्नगोरिंट'॥ म्लानिर्न विद्यतेऽस्मिन्नित्य-

म्लानः[10]। महतीं पीडां संमर्दं सहते महासहा। महती च सा सहा चेति वा। महासहानामनी। 'पेद्दगोरिंट'॥ ७३॥

---

[1] माघे मासे K_5, Pt_2. [2] उद्भेदेन B_1; उद्भवकाले Pt_2. [3] 'मोल्ले' J_2. [4] °पुष्पतया F_2, J_2, Pt_2. [5] जीवानां बन्धुः J_2. [6] B_1, K_5 add मुखेऽन्वहं. [7] कुस्थं K_5, K_6; कुत्सितान् रोगान् मारयतीति वा Pt_2; K_5 adds प्राणिजातं. [8] त्रिदोष° B_1, D_2, G; रोगजनितदुःखं Pt_2. [9] 'केरुयोरते' J_2. [10] आशु अम्लानं पुष्पमस्य Pt_2.

(पा.) माघ्यं कुन्दम्। कुन्दनाम। 'कुन्दं चासो स्मृतं माघ्यो दलकोशो दलाढकः' इति पुंनपुंसकयोर्व्यालिः। 'तोंटमुल्ल'। रक्तकस्तु—बन्धुजीवकः। बन्धुजीवनामानि। 'मंकेन'। सहा—तरणिः। सहानामानि। 'चामन्ति'॥ अम्लानस्तु महासहा। महासहानामनी। 'अनल्यमैनरेकुलुगलचामन्ति। अदे गोझ्गि'। 'कुब्जिका भद्रतरणिः वृहत्पत्रार्तिकेसरा। महासहा' इति धन्वन्तरिः॥ ७३॥

तत्र शोणे कुरवकस्तत्र पीते कुरण्टकः।
नीली झिण्टी द्वयोर्बाणा दासी चार्तगलश्च सा॥ ७४॥

(वि.) तत्रेति—तत्र अम्लाने। कौ भुवि रूयते साधुरिति कुरवकः। 'रु शब्दे'। कुरवकनाम। '[1]एर्रपूवुलगोरिंट'॥ कौ भूमौ रम्यते कुरण्टकः। 'रमु क्रीडायाम्'। कुरण्टकनाम। '[2]पच्चपूवुलगोरिंट'॥ तत्र नीलपुष्पत्वात् नीली। झिमिति शब्दं करोति शुष्कदशायामिति झिण्टी। बणति शुष्कदशायामिति बाणा। 'वण शब्दे'। दस्यते क्षीयते कालेनेति[3] दासी। 'दसु उपक्षये'। आर्तः क्षीणः सन् गलतीति आर्तगलः। '[4]गल अदने स्रवणे च'। नीलझिण्टिकानामानि। 'नल्लपूवुलगोरिंट[5]'॥ ७४॥

---

[1] 'कयपनगोरटे' J_2. [2] 'पच्चनोगोरटे' J_2. [3] कालेन गच्छति K_5, K_6. [4] 'गल अवस्रंसने' F_2, Pt_2. [5] 'किरियगोरटे' J_2.

(पा.) तत्र—कुरबकः। शोणसहानाम। 'येर्र्चामन्ति'॥ तत्र—कुरण्टकः। पीतसहानाम। 'पच्चशामन्ति'॥ नीली—चार्तगलस्तथा। नीलझिण्टीनामानि। 'नल्लगोरिंट'॥ ७४॥

सैरेयकस्तु झिण्टी स्यात् तस्मिन् कुरवकोऽरुणे।
पीता कुरण्टको झिण्टी तस्मिन् सहचरी द्वयोः॥ ७५॥

(वि.) सैरेयक इति—सिराख्या वृक्षा यस्मिन् सन्तीति सैरः, सैरदेशे भवः सैरेयकः। शुष्के सति झिमिति [1]शब्दं करोतीति झिण्टी। सैरेयकनामनी। 'मुलुगोरिंट'॥ कुरवकशब्दश्चोक्तः[2]। कुरण्टक उक्तः[2]। भ्रमरीभिः सह भ्रमराश्चरन्त्यस्यामिति [3]सहचरी। 'चर गतौ'। '[4]पच्चपुव्वुलगोरिंट'॥ ७५ ॥

---

[1] रटति, 'रट परिभाषणे' B_1, K_3; 'सिन्न मुलुगोरिंट' B_1. [2] श्लो. ७४.
[3] तस्मिन्नेव कुरण्टके सहचरीशब्दो वर्तते B_1, J_2. [4] 'मुल्लु गोरटे' J_2.

(पा.) सैरेयकस्तु—स्यात्। श्वेतझिण्टीनाम। 'तेल्लगोरंट'॥ तस्मिन्—अरुणे। 'येर्रगोरंट'। पीते—द्वयोः। पीतझिण्टीनामानि। 'पच्चगोरंट'। अनुक्तम्—'किंकराटः किंकरातो वर्णपुष्पो मिलातकः'। 'वन्नेचेट्टु'॥ ७५ ॥

उड्डपुष्पं जपा पुष्पं वज्रपुष्पं तिलस्य यत्।
प्रतिहासशतप्रासचण्डातहयमारकाः ॥ ७६ ॥
करवीरे करीरे तु क्रकरग्रन्थिलावुभौ।

(वि.) उड्डपुष्पमिति—उड्डदेशे भवं पुष्पं उड्डपुष्पम्। ओड्रपुष्पमिति वा पाठः। जपतीव तिष्ठति जलमध्ये जपा। 'जप जल्प[1] व्यक्तायां वाचि'। जपानामनी। '[2]दासानिचेट्टु'॥ विरुद्धलक्षणया वज्रवत् कठिनं पुष्पं वज्रपुष्पम्[3]। 'नुव्वु [4]पूवुपेरु'॥ विकसितैः पुष्पैः प्रतिहसतीव तिष्ठतीति प्रतिहासः। 'हसे हसने'। शतं प्रासा[5] इव तीक्ष्णाः[6] कुड्मला अस्येति शतप्रासः। चण्डं तीक्ष्णमततीति[7] चण्डातः। 'अत सातत्यगमने'। [8]कशासादृश्यशाखात्वाद् हयान् मारयतीति हयमारकः। 'मृङ् प्राणत्यागे'। करवीरवत् खड्गवत् मारकत्वात् रसपानेन करवीरः। करवीरनामानि। 'गन्नेरु[9]'॥ करिणं समीपगतम् ईरयति तीक्ष्णकण्टकैरिति करीरः। 'ईर क्षेपे'। तीक्ष्णत्वात् क्रेति शब्दं करोति क्रकरः[10]। 'डुकृञ् करणे'। ग्रन्थिमत्त्वात् ग्रन्थिलः[11]। करीरनामानि। 'वेणुतुरुचेट्टु[12]'॥ ७६ ॥

---

[1] J_2, Pt_2 omit जल्प. [2] 'दासिवाण' J_2. [3] वज्रमिव विदारकं Pt_2.
[4] 'कांसेप्यपुष्प' J_2. [5] K_5, K_6 add कुन्ताः. [6] तीक्ष्णानि कुड्मलानि Pt_2.
[7] K_5, K_6 add तुदति; व्याप्नोति J_2. [8] हयमारककशा° J_2. [9] 'कणिगलु' J_2.
[10] कृणातीति K_5, K_6. [11] ग्रन्थयः सन्त्यस्य Pt_2. [12] 'वेन्दे' J_2.

(पा.) [1]ओड्रपुष्पं जपा। जपानामनी। 'दासनमु'। 'जपायामोड्रपुष्पं[2] स्यादत्र पद्मादयोऽपि च' इति वैजयन्ती (पृ. ६१, श्लो. १९५)। रुद्रपुष्पं जपेति क्वचित्पाठः। '[3]रुद्रपुष्पमभिधीयते जपा' इति हलायुधः (अ. मा. २. ५२)। पुष्पं—तिलस्य यत्। तिलस्य पुष्पं यत् तद्वज्रपुष्पं स्यात्। 'नुवुपुव्वु'॥ प्रतिहास—करवीरे। करवीरनामानि। 'गन्नरु'॥ अनुक्तम्—'तारावतस्तु दगरो नन्द्यावर्तो नभोङ्गणः'। 'नन्दिवर्धनमु'॥ करीरे—ग्रन्थिलावुभौ। करीरतरुनामानि। 'वेणुतुरु'॥ ७६॥

---

[1] ओड्रपुष्पं for उडुपुष्पं in B_3.　[2] रुद्रपुष्पम् इत्येव मुद्रितग्रन्थे.　[3] ओड्रपुष्पमिति मुद्रितपुस्तके.

उन्मत्तः कितवो धूर्तो धुत्तूरः कनकाह्वयः॥ ७७॥
मातुलो मदनश्चास्य फले मातुलपुत्रकः।
फलपूरो बीजपूरो रुचको मातुलङ्गके॥ ७८॥

(वि.) उन्मत्त इति—उन्मादयतीत्युन्मत्तः। 'मदी हर्षग्लपनयोः'। अत एव कितवः। [1]धूर्वत्युन्मादकरणेनेति धूर्तः। '[2]उर्वी तुर्वी धुर्वी हिंसायाम्'। वातादिदोषान्[3] धुवतीति[4] धुत्तूरः। 'धू विधूनने'। काञ्चनस्याह्वयो नाम यस्य काञ्चनाह्वयः। कनकाह्वय इति वा पाठः। [5]उन्मादकद्रव्येषु मा नास्ति तुला साम्यमस्येति मातुलः। मदयतीति मदनः। 'मदी हर्षग्लपनयोः'। धुत्तूरनामानि। 'उम्मेत्तपेरु'॥ मातुलस्य पुत्रः[6] फलं मातुलपुत्रकः। 'उम्मेत्तकाय'॥ फलैः पूर्यत इति फलपूरः। 'पॄ पालनपूरणयोः'। बीजैः पूर्यत[7] इति बीजपूरः। रोचते स्वफलं नरेभ्य इति रुचकः। 'रुच[8] दीप्तावभिप्रीतौ च'। रुच्यवस्तुष्वनेन मा तुलां[9] गच्छतीति मातुलुङ्गकः। मातुलुङ्गकनामानि। '[10]मादीफलमुचेट्टु'॥ ७७-८॥

---

[1] उन्मादेन हिनस्तीति F_2, Pt_2.　[2] 'धुर्वी हिंसायाम्' F_2, Pt_2.　[3] °रोगान् J_2, Pt_2.　[4] धवति G, K_2, K_3.　[5] उन्मादकृत्सु K_5, K_6.　[6] पुत्रकः K_6.　[7] परिपूर्यते J_2, K_2.　[8] 'रुच स्तुतौ' K_3, K_5, K_6.　[9] G, K_3 add साम्यं.　[10] 'मादिफलं' D_2; 'मादले' J_2.

(पा.) उन्मत्तः—धुत्तूरः[1]। तुर्तूरः दुस्तूर इति च क्वचित्पाठः। काञ्चनाह्वयः—मदनश्च। उन्मत्तद्रुमनामानि। 'उम्मेत्तचेट्टु'॥ अस्य—मातुलपुत्रकः। तत्फलनाम।

‘उम्मेत्तकाय’। अनुक्तम्—‘त्रिपुरो मदमत्तः स्यात्’। ‘वंगिचेट्टु’॥ फलपूरो—मातुलुङ्गके। मातुलुङ्गकनामानि। ‘मादिफलमुचेट्टु’॥ ७७–८॥

[1] दुत्तूरः B_3.

समीरणो मरुवकः प्रस्थपुष्पः फणिज्जकः।
जंबीरोऽप्यथ पर्णासे कठिंजरकुठेरकौ॥ ७९॥

(वि.) समीरण इति—समीरयति प्रकाशयत्यामोदमिति समीरणः। ‘ईर क्षेपे’। [1]मरुदेशे वाति वर्तते इति मरुवकः। ‘वा गतिगन्धनयोः’। प्रस्थे[2] सानौ स्थितोऽपि पुष्प्यतीति प्रस्थपुष्पः। ‘पुष्प विकसने’। तीक्ष्णत्वेन फणाभपत्रत्वात् फणिज्जकः[3]। फणिज्जकशब्दो देश्यः। [4]जम्यते भक्ष्यत इति जंबीरः। ‘जमु अदने’। जंबीरनामानि। ‘मरुवमु’॥ [5]पुराणानि पर्णान्यस्यति क्षिपतीति पर्णासः। ‘असु क्षेपणे’। कठिनं मुद्गशष्कुल्यादिकं जरयति जीर्णं करोतीति कठिंजरः। ‘[6]जॄष् वयोहानौ’। कुण्ठति मशकादिगतिं प्रतिबध्नातीति कुठेरकः। ‘कुठि [7]प्रतिघाते’। कठिंजरनामानि। ‘नल्लगग्गेर’॥ ७९॥

[1] मरौ देशे J_2, K_3, Pt_2. [2] प्रस्थेऽपि K_5. [3] तीक्ष्णत्वेन फणीव आर्जकः फणिर्जकः Pt_2. [4] जक्ष्यते, ‘जक्ष भक्षहसनयोः’ K_5, K_6. [5] पुराणपर्णानि D_2. [6] ‘जॄष् झॄष् वयोहानौ’ K_5, K_6. [7] ‘कुठ बन्धने’ K_6.

(पा.) समीरणो—जम्बीरोऽपि। मरुवकनामानि। ‘मरुवमु’॥ अथ पर्णासे—कुठेरकौ। पर्णासनामानि। ‘नल्लगग्गेर’॥ ७९॥

सितेऽर्जकोऽत्र पाठी तु चित्रको वह्निसंज्ञकः।
अर्काह्ववसुकास्फोटगणरूपविकीरणाः॥ ८०॥
मन्दारश्चार्कपर्णोऽत्र शुक्लेऽलर्कप्रतापसौ।

(वि.) सित इति—अर्जयति [1]नवपत्रादीन् अर्जकः। ‘अर्ज [2]अर्जने’। श्वेतपर्णासनाम। ‘तेल्लगग्गेर’॥ वह्निपर्याये[3] पाठोऽस्यास्तीति पाठी। चेतन्तीति चितो जन्तवस्तान् त्रायते व्याधित इति चित्रकः[4]। ‘त्रैङ् पालने’। [5]वह्निसंज्ञा नामास्यास्तीति[6] वह्निसंज्ञकः। चित्रकनामानि। ‘चित्रमूलमु’॥ [7]अर्कस्याह्वा नामास्यास्तीति अर्काह्वः। वसत्यस्मिन् तेज इति वसुकः। ‘वस निवासे’। आस्फुटतीत्यास्फोटः। ‘स्फुट

विकसने'। [8]आस्फोत इति वा पाठः। कालक्रमेण गणरूपाणि बहुरूपाण्यस्य गणरूपः। पुष्पाणि विकिरतीति विकीरणः। 'कॄ विक्षेपे'। मन्दान् [9]क्षुद्रव्याधीनौषधत्वेन इयर्तीति मन्दारः। 'ऋ गतौ'। अर्कवर्णपर्णत्वाद् अर्कपर्णः। मन्दारनामानि। 'जिल्लेडुचेट्टु[10]'॥ अलति भूषयतीत्यल्[11]। अल् चासौ अर्कश्च अलर्कः। 'अल भूषणादौ'। प्रकृष्टास्तापसा [12]अनेनेति प्रतापसः। अलर्कनामनी। 'तेल्लपूव्वुलजिल्लेडु'॥ ८०॥

[1] आरोग्यं Pt_2. [2] 'अर्ज षर्ज अर्जने' K_5, K_6. [3] °पर्यायेण K_6; पर्यायपाठः K_2; पठ्यत इति K_5. [4] चित्रकार्यत्वात् चित्रकः K_5. [5] वह्नेः अग्नेः B_1, K_5. [6] Pt_2 adds दीपनत्वात्. [7] B_1, K_5 add सूर्यस्य. [8] आस्फुट इति वा पाठः K_6. [9] K_6 adds ग्रन्थ्यादि°. [10] 'येक्के' J_2. [11] अलः, अलश्चासौ Pt_2. [12] K_5, K_6 add योगिनो भवन्ति.

(पा.) सितेऽर्जकोऽत्र। श्वेतपर्णासनाम। 'तेल्लगग्गेर'॥ अनुक्तम्—'दमनं तु ब्रह्मजटा'। 'दवनमु'॥ 'तुलसी भारती समे[1]'। 'तुलसी'॥ पाठी—वह्निसंज्ञकः। चित्रमूलनामानि। 'चित्रमूलमु'। 'चित्रको दहनव्यालपाठिसौरारुणोऽग्निकः' इति तन्त्रान्तरपाठात् पाठी इन्नन्तः॥ अर्काह्वे—अर्कपर्णे। स्फाटस्फोटस्फोता इत्यमरमाला। अर्कवृक्षनामानि। 'जिल्लेडु'॥ अत्र शुक्ले—प्रतापसौ। अलर्कनामनी। 'तेल्लजिल्लेडु' ॥ ८०॥

[1] शिवा इति वैजयन्त्याम् (पृ. ५४, श्लो. ११९).

शिवमल्ली पाशुपत एकाष्ठीलो बको वसुः॥ ८१॥
वन्दा वृक्षादनी वृक्षरुहा जीवन्तिकेत्यपि।

(वि.) शिवमल्लीति—शिवेन[1] मल्लयत इति शिवमल्ली। 'मल मल्ल धारणे'। पशुपतेरयं प्रियः पाशुपतः। [2]एकोऽष्ठीलो मज्जास्यास्तीति एकाष्ठीलः। गन्धानुमेयसूक्ष्मांशैर्वाति गच्छतीति [3]बकः। 'वा गतिगन्धनयोः'। वस्ते भूमिमाच्छादयतीति वसुः। 'वस आच्छादने'। बकपुष्पनामानि। 'बकपुष्पमु[4]'॥ वन्द्यते स्तूयते औषधत्वेनेति [5]वन्दा। 'वदि अभिवादनस्तुत्योः'। वृक्षमत्ति पीडयतीति वृक्षादनी। 'अद भक्षणे'। वृक्षे रोहतीति वृक्षरुहा। 'रुह बीजजन्मनि प्रादुर्भावे च'। जीवयतीति जीवन्तिका[6]। 'जीव प्राणधारणे'। जीवन्तिकानामानि। '[7]बदनिकपेरु'॥ ८१॥

[1] शिवस्य मल्लिकेव K_5, K_6. [2] D_2, G add मुख्यः. [3] वबयोरभेदः G, I. [4] 'बकुलपुष्प' J_2. [5] वन्द्या J_2. [6] जीवन्त्यनया K_5, K_6; जीवतीति B_1. [7] 'मरुदवन्दणिगे' J_2.

(पा.) शिवमल्ली—बुकः । बक इति वा । वसुः । बकपुष्पनामानि । 'बकपुष्पमन्नचेट्टु'। वन्दा—जीवन्तिकेत्यपि । वृक्षोपरिप्ररूढविजातीयोद्भिन्नामानि । 'वदनिक' ॥ ८१ ॥

वत्सादनी छिन्नरुहा गुडूची तन्त्रिकामृता ॥ ८२ ॥
जीवन्तिका सोमवल्ली विशल्या मधुपर्ण्यपि ।

(वि.) वत्सादनीति—वत्सानां बालानामदनीयत्वाद्[1] वत्सादनी । 'अद भक्षणे'। [2]छिन्नापि रोहतीति छिन्नरुहा । 'रुह बीजजन्मनि प्रादुर्भावे च'। ज्वरितान्[3] गुडति रक्षतीति गुडूची । 'गुड रक्षायाम्'। तन्त्रयत्यायुरिति[4] तन्त्रिका । 'तन्त्रि कुटुम्बधारणे' । रसायनत्वादमृता[5] । जीवयति रोगिणमिति जीवन्तिका । 'जीव प्राणधारणे'। [6]सोमस्यांशभूता वल्ली सोमवल्ली । विगतं शल्यमस्या इति विशल्या । मधुराणि [7]पर्णान्यस्या इति मधुपर्णी । गुडूचीनामानि । 'तिप्पतीगे' ॥ ८२ ॥

---

[1] अदनं (भवतीति D_2, J_2, K_2) Pt_2. [2] छिन्ने स्थानेऽपि K_6; छिन्नस्थाने B_1, K_5. [3] ज्वरितादीन् K_5. [4] ज्वरितान् K_6; धारयति पोषयति B_1, D_2. [5] न म्रियत इत्यमृता Pt_2. [6] अंशे भूता B_1. [7] K_5 adds पत्राणि.

(पा.) वत्सादनी—मधुपर्ण्यपि । गुडूचीनामानि । 'तिप्पतीङ्गे' ॥ ८२ ॥

मूर्वा देवी मधुरसा मोरटा तेजनी स्रवा ॥ ८३ ॥
मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ।

(वि.) मूर्वेति—मूर्वति [1]वेष्टयति यष्ट्यादिकमिति मूर्वा । 'मुर्वी बन्धने'। दीव्यतीति देवी । 'दिवु क्रीडादौ'। [2]मधुरसोऽस्या अस्तीति मधुरसा । मुरति वेष्टयति मोरटा । 'मुर संवेष्टने'। तेजयत्यग्निमिति [3]तेजनी । 'तिज निशातने[4]'। स्रवति रसमिति स्रवा । 'स्रु [5]प्रस्रवणे'। [2]मधु[6] लातीति मधूलिका । 'ला दाने'। [2]मधुनः श्रेणिः पङ्क्तिरस्या इति मधुश्रेणी । गोकर्णाभपत्रत्वाद् गोकर्णी । पीलोरिव पर्णान्यस्याः पीलुपर्णी । मूर्वानामानि ॥ 'चांगचेट्टु' ॥ ८३ ॥

---

[1] वेष्टते Pt_2. [2] K_5, K_6 add विरुद्धलक्षणया; मधुः रसः B_1. [3] तेजिनी K_5. [4] निशाने J_2. [5] 'स्रु गतौ' F_2; 'स्रु स्रवणे' D_2, K_6. [6] माधुर्यान्वयात् B_1, I, K_3, K_5.

(पा.) मूर्वा—पीलुपर्ण्यपि। यत्प्रभवत्वेन धनुर्गुणो मौर्वीत्युच्यते तस्योद्भिद्विशेषस्य नामानि। 'चांग' ॥ ८३ ॥

पाठाम्बष्ठा विद्धकर्णी स्थापनी श्रेयसी शिवा ॥ ८४ ॥
एकाष्ठीला पापचेली प्राचीना वनतिक्तका।

(वि.) पाठेति—बहुषु[1] योगेषु पठ्यत इति पाठा। 'पठ व्यक्तायां वाचि'। अम्बे शब्दे तिष्ठतीति अम्बष्ठा[2]। 'ष्ठा गतिनिवृत्तौ'। [3]वैद्यकर्णावनया विद्धाविति विद्धकर्णी। वस्तौ कर्मणि स्थापनीयत्वात् [4]स्थापनी। [5]श्रेयःसाधनत्वात् श्रेयसी। [6]दोषशमनात् शिवा। एकोऽष्ठीलो मज्जास्या अस्तीति एकाष्ठीला। पापं चलयतीति [7]पापचेली। 'चल संचलने'। [8]प्राच्यां भवा प्राचीना। [9]वनजा च तिक्तरसा च वनतिक्तका। पाठानामानि। 'अगुरुसोंटि' ॥ ८४ ॥

[1] बहु° B_1, Pt_2. [2] अम्बेत्र तिष्ठतीति वा Pt_2. [3] Pt_2 adds शास्त्रेषु श्रूयमाणत्वात्. [4] वस्तिकर्मणि B_1; जनान् स्थापयतीति, 'ष्ठा गतिनिवृत्तौ' Pt_2. [5] श्रेयस्करत्वात् F_2, Pt_2. [6] विष° B_1. [7] वृकीनामत्वात् J_2; वृजिन° K_5. [8] प्राचि प्रायशः K_5, K_6. [9] वने I, Pt_2.

(पा.) पाठाम्बष्ठा—वनतिक्तका। पाठाया नामानि। 'पाट', 'इदे चिरिबोद्दि' ॥ ८४ ॥

कटुः कटुंबराशोकरोहिणी कटुरोहिणी ॥ ८५ ॥
मत्स्यपित्ता कृष्णभेदी चक्राङ्गी शकुलादनी।

(वि.) कटुरिति—कटुरसोऽस्या अस्तीति कटुः। कटत्यावृणोति रोगमिति वा। 'कटे वर्षावरणयोः'। कटत्यावृणोति बलाख्यरोगमिति कटुंबरा। 'वृञ् वरणे'। कटुंभरेति पाठे कटुं बिभर्तीति कटुंभरा। कटंभरेत्यपि पाठः। रोगजशोकं[1] हन्ति रोपयति[2] चाङ्गमिति अशोकरोहिणी। अशोका रोहणीति पदद्वयं वा। तत्पक्षे न विद्यते शोकोऽस्या अशोका। रोहति व्याप्नोत्यङ्गानीति रोहिणी। 'रुह बीजजन्मनि प्रादुर्भावे च'। [3]कटुश्चासौ रोहिणी[4] च कटुरोहिणी। मत्स्यानां पित्तं जीवनमिति मत्स्यपित्ता। कृष्णो भेदः छेदोऽस्याः कृष्णभेदी[5]। चक्रवदङ्गमस्या अस्तीति चक्राङ्गी। [6]वक्राङ्गीति वा पाठः। शकुलानां मत्स्यानामदनमिति शकुलादनी। कटुरोहिणीनामानि। 'कटुकरोहिणीपेरु' ॥ ८५ ॥

[1] रोगजं शोकं J_2; राजशोकं B_1. [2] रोहति K_6. [3] कटुरसा K_5, K_6. [4] रोहति च B_1. [5] भेदे छेदने कृष्णवर्णोऽस्याः K_5, K_6. [6] वक्रमङ्गमस्याः F_2, Pt_2.

(पा.) कटुः—रोहिणी।

'अशोका कटुरोहिण्यामशोको वञ्जुलद्रुमे।
रोहिणी कटुरोहिण्यां भभेदे रोहिता गवोः[1] ॥'

इति रभसकोशादशोका रोहिणीति पदद्वयमपि। कटुरोहिणी। कटुकरोहिण्यपि ॥ मत्स्यपित्ता—शकुलादनी। शकुलादिनीति वा। कटुरोहिणीनामानि। 'कटुकरोहिणी-पेरु' ॥ ८५ ॥

[1] 'तद्भेदे लोहितागरोः' इति टीकासर्वस्वे (पृ. १३९); 'भभित्कटंभरासोमवल्केषु लोहितागवोः' इति मेदिनीति भानुजीदीक्षितः (पृ. १७९).

आत्मगुप्ताजहा व्यण्डा कण्डूरा प्रावृषायणी ॥ ८६ ॥
ऋश्यप्रोक्ता शूकशिम्बिः कपिकच्छूश्च मर्कटी।

(वि.) आत्मगुप्तेति—आत्मा गुप्यतेऽस्या[1] आत्मगुप्ता। '[2]गुपू रक्षणे'। न जहाति शूकान् अजहा[3]। 'ओहाक् त्यागे'। जडेति वा पाठे जडयतीति जडा। 'जल अपवारणे'। कन्दूकरणाय व्यडति वर्धत[4] इति व्यण्डा। 'अड उद्यमने'। अव्यण्डेति वा पाठः। कण्डूं रातीति कण्डूरा। 'रा दाने'। प्रायेण प्रावृषि भवा प्रावृषायणी। ऋश्यैर्मृगैः प्रोक्ता दर्शिता ऋश्यप्रोक्ता। ऋष्यप्रोक्तेति वा पाठः। शूकप्रधाना [5]शिम्बिः शूकशिम्बिः। कपीन्[6] कषति [7]हिनस्तीति कपिकच्छूः। 'कष हिंसायाम्'। [8]मर्कटरोमवर्ण-फलत्वात् मर्कटी। मर्कटीनामानि। '[9]दुरदगोडिचेट्टु' ॥ ८६ ॥

[1] अनया K_5. [2] 'गुप गोपने' K_3, K_5. [3] जिहीते जिहा K_6. [4] उद्यच्छति B_1, Pt_2. [5] शिम्बी शूकशिम्बी K_5, K_6, [6] कपिं K_3. [7] हिंसति K_5, K_6. [8] °रोमाभफलत्वात् F_2, Pt_2. [9] 'तुरुचे' J_2.

(पा.) आत्मगुप्ता—अव्यण्डा। अकारपूर्वाविमौ शब्दौ। तथा चाहेन्दुः। 'अव्यण्डा[1] वृषती शस्यादजहा शूकशिम्बिका' इति। 'स्वयंगुप्ता जहा जटा' इत्युक्तत्वात् जटेति पाठश्च ॥ कण्डूरा—मर्कटी। आत्मगुप्तानामानि। 'दूलगोंडि' ॥८६॥

[1] 'अव्यण्डा वृषभी गुप्ता' इतीन्दुरिति भानुजीदीक्षितः (पृ. १८०, श्लो. ८६).

चित्रोपचित्रा न्यग्रोधी द्रवन्ती शंबरी वृषा ॥ ८७ ॥
प्रत्यक्श्रेणी सुतश्रेणी रण्डा मूषिकपर्ण्यपि ।

(वि.) चित्रेति—[1]चित्रवर्णपर्णत्वात् चित्रा। उपचित्रा[2] च। न्यक् तिर्यक् [3]रुणद्धीति न्यग्रोधी। 'रुधिर् आवरणे'। द्रवति [4]विसरतीति द्रवन्ती। 'द्रु गतौ'। शं सुखं वृणोतीति शंबरी। 'वृञ् वरणे'। आरोग्यकामिनां [5]कामं वर्षतीति वृषा। 'वृष सेचने'। प्रत्यक् प्रतीची श्रेणी [6]पर्णावलिरस्या इति प्रत्यक्श्रेणी। सुतानां पर्णादीनां श्रेणिरस्या इति सुतश्रेणी। [7]रम्यते पक्षिभिरिति रण्डा। 'रमु क्रीडायाम्'। मूषिककर्णाभपत्रत्वात् मूषिकपर्णी। मूषिकपर्णीनामानि। 'एलुकचेविचेट्टु'॥ ८७॥

[1] नानावर्णत्वात् F_2, Pt_2.　[2] साक्षादचित्तत्वात् K_5, K_6.　[3] रोहतीति K_5, K_6; I adds 'रुह बीजजन्मनि प्रादुर्भावे च.'　[4] विगलति J_2, Pt_2.　[5] सुखं Pt_2.
[6] पर्णादिप्रसवानां K_5, K_6.　[7] रमयति Pt_2.

(पा.) चित्रोपचित्रा—मूषकपर्ण्यपि। मूषकपर्णीनामानि। 'येलुकजीडि' ॥ ८७ ॥

अपामार्गः शैखरिको धामार्गवमयूरकौ ॥ ८८ ॥
प्रत्यक्पर्णी कीशवल्ली किणिही खरमञ्जरी।

(वि.) अपामार्ग इति—अपकृष्टः आ समन्तात् मार्गोऽस्येति अपामार्गः। शिखरे भवतीति शैखरिकः। धाम स्थानमर्जयतीति धामार्गवः[1]। 'अर्ज अर्जने'। धाम्नोऽर्गो धामार्गः। धामार्गं वातीति वा। मयूरचूडाप्रतिकृतित्वात्[2] मयूरकः। प्रत्यञ्चि[3] पर्णान्यस्याः सन्तीति प्रत्यक्पर्णी। कीशस्य कपेः रोमाभा वल्ल्योऽस्याः सन्तीति कीशवल्ली। कीशपर्णीति वा पाठः। किणिनो दद्रुरोगिण औषधत्वेन जिहीते यातीति किणिही। 'ओहाङ् गतौ'। खरास्तीक्ष्णा मञ्जर्योऽस्याः सन्तीति खरमञ्जरी। अपामार्गनामानि। 'उत्तरेणि चेट्टु'॥ ८८॥

[1] अथवा अधमं मार्गेऽतिवाति गच्छतीति K_5, K_6.　[2] मयूरचूडाकृतिप्रकृतित्वात् D_2.
[3] प्रत्यक् विमुखं Pt_2.

(पा.) अपामार्गः—किणिही। दीर्घतृतीयः। खरमञ्जरी। अपामार्गनामानि। 'उत्तरेणि' ॥ ८८ ॥

हञ्जिका ब्राह्मणी पद्मा भार्गी ब्राह्मणयष्टिका ॥ ८९ ॥
अङ्गारवल्ली बालेयशाकबर्बरवन्दकाः ।

(वि.) हञ्जिकेति—हन्ति [1]यक्ष्माणमिति हञ्जिका । 'हन हिंसागत्योः'। भञ्जिकेति पाठे भनक्ति रोगं भञ्जिका । 'भञ्जो आमर्दने'। [2]ब्राह्मणीवत् पवित्रत्वाद् ब्राह्मणी । [3]पद्माभपुष्पत्वात् पद्मा । भृज्जति कफादिकं नाशयतीति भार्गी । 'भ्रस्ज पाके'। [4]ब्राह्मणरीतित्वाद् ब्राह्मणयष्टिका । अङ्गाराभा[5] वल्ल्योऽस्या अङ्गारवल्ली, लौहित्यात् । बालेयस्य गर्दभस्य [6]शाको बालेयशाकः । शाखाभिः वृणोतीति[7] बर्बरः । 'वृञ् वरणे'। [8]वैद्यैर्वन्द्यते स्तूयत इति वन्दकः । 'वदि अभिवादनस्तुत्योः'। वर्धक इति वा पाठः । भार्गीनामानि ॥ '[9]गंडुबारंगि' ॥ ८९ ॥

[1] रोगं Pt_2.
[2] ब्राह्मणवत् Pt_2.
[3] °पुष्पवत्त्वात् K_5.
[4] ब्राह्मणयष्टिरिव F_2.
[5] अङ्गाराकारवल्ली अस्याः K_5, K_6.
[6] G, Pt_2 add भोज्यः
[7] K_6 adds व्याप्नोति; बवयोरभेदः G.
[8] वैद्येन K_5, K_6.
[9] 'भङ्गि' J_2.

(पा.) हञ्जिका । भञ्जिकापि ।

'भार्ङ्गी गर्दभशाकश्च भृगुजा च सुवर्चला ।
ब्रह्मरीतिः शुक्रमाता कासघ्नी भञ्जिका तथा ॥'

इति वैद्यके । ब्राह्मणी—वन्दकाः । भार्ङ्गीनामानि । 'भारंगि' ॥ ८९ ॥

मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका ॥ ९० ॥
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्ल्यपि ।

(वि.) मञ्जिष्ठेति—मञ्जुनि मनोज्ञे[1] वर्णे तिष्ठतीति मञ्जिष्ठा[2] । विकसति दूरं प्रसरतीति विकसा । 'कस गतौ'। जिङ्गति [3]सर्वतः प्रसरतीति जिङ्गी । 'जिगि गतौ'। समन्तादङ्गतीति[4] समङ्गा । 'अगि गतौ'। [5]काले मिष्यते शब्द्यते कालमेषिका । कालमेशिकेति वा पाठः । 'मिष मिश [6]शब्दे' । मण्डूका इव पर्णान्यस्या मण्डूकपर्णी । [7]भण्ड्यते भण्डीरी । [8]भण्डी । 'भडि परिभाषणे'। दीर्घवल्लीत्वात् योजनवल्ली । मञ्जिष्ठानामानि ॥ 'मञ्जिष्ठचेट्टु[9]' ॥ ९० ॥

[1] K_5, K_6 add लोहिते.
[2] G, I add 'ष्ठा गति निवृत्तौ.'
[3] G adds पर्वतात्.
[4] अगति D_2, G, K_3.
[5] कालेन B_1; कालेति K_6.
[6] 'मिश शब्दे

रोषकृते बन्धने गतौ च’ F_2; ‘मिष स्पर्धायाम्’ G. [7] भण्डते Pt_2. [8] भाण्डी K_5, K_6, Pt_2. [9] G, I add पेरु.

(पा.) मञ्जिष्ठा—योजनवल्ल्यपि। योजनफल्ल्यपीति केचित्। मञ्जिष्ठानामानि। ‘मञ्जिष्ठि’॥ ९०॥

यासो यवासो दुःस्पर्शो धन्वयासः कुनाशकः॥ ९१॥
रोदनी कच्छुरानन्ता समुद्रान्ता दुरालभा।

(वि.) यास इति—याति लतावत् प्रसरतीति यासः। ‘या प्रापणे’। यौतीति यवासः। ‘यु गतौ’ ‘यु मिश्रणे अमिश्रणे च’ इति वा धातुः। कण्टकाचितत्वात् दुःखेन स्पृश्यत इति [1]दुःस्पर्शः। ‘स्पृश[2] स्पर्शने’। धन्वनि मरुदेशे यासो धन्वयासः। कुं भुवं [3]कण्टकत्वेन नाशयतीति कुनाशकः। ‘णश अदर्शने’। स्पृशन्तं रोदयतीति रोदनी। ‘रुदिर् अश्रुविमोचने’। कच्छुरोगं रातीति कच्छुरा। ‘रा दाने’। [4]अतिदूरव्यापिनीत्वाद् अनन्ता। समुद्रान्ता च। दुःखेन [5]आलभ्यत इति दुरालभा। ‘डुलभष् प्राप्तौ’। धन्वयासनामानि। ‘[6]तीण्टकसिण्डपेरु’॥ ९१॥

[1] कण्टकित्वाद् दुःस्पर्शः K_5, K_6. [2] ‘स्पृश संस्पर्शे’ K_6; संस्पर्शने D_2. [3] कण्टकित्वेन J_2, K_6. [4] B_1, G, I omit अति; दीर्घमूलतया J_2, Pt_2. [5] लभ्यते स्पृश्यत इति Pt_2. [6] ‘रोगटिदूलकोकिलतेगड’ K_6; ‘रेगडुदूलपेरु’ G, K_2, K_5.

(पा.) यासो—दुरालभा। दुरालभानामानि। ‘तींटकसवेंद’। ‘रेगडिदूल’॥ ९१॥

पृश्निपर्णी पृथक्पर्णी चित्रपर्ण्यङ्घ्रिपर्णिका॥ ९२॥
क्रोष्टुविन्ना सिंहपुच्छी कलशी धावनी गुहा।

(वि.) पृश्निपर्णीति—पृश्नीन्यल्पानि पर्णान्यस्याः पृश्निपर्णी। [1]पृथक् भिन्नानि पर्णान्यस्याः पृथक्पर्णी। [2]चित्राणि पर्णान्यस्याः चित्रपर्णी[3]। अङ्घ्रेर्बुध्नादारभ्य पर्णान्यस्या अङ्घ्रिपर्णिका[4]। अङ्घ्रिवल्लिकेति वा पाठः। क्रोष्टुभिर्विन्ना [5]दत्तेवाभाति तत्पुच्छसाम्यात्[6] क्रोष्टुविन्ना। ‘विद विचारणे’। [7]सिंहस्येव पुच्छं शाखा अस्याः सिंहपुच्छी। रसाधारत्वात् कलशसाम्यं किंचिदस्तीति कलशी। धावति प्रसरतीति धावनी। धावनिरिति वा पाठः। ‘धावु गतिशुद्ध्योः’। गूहति रसमिति गुहा। ‘गुहू संवरणे’। सिंहपुच्छीनामानि। ‘नक्कतोंकपोन्नचेट्टु’॥ ९२॥

[1] विविक्तपर्णत्वात् F_2, K_5, K_6. [2] चित्ररूपाणि Pt_2. [3] चित्रपर्णिका D_2.
[4] K_5, Pt_2 add 'कालपोन्नपेल्लु'. [5] आदत्तेव Pt_2. [6] तत्पुच्छनाशात् K_5, K_6.
[7] सिंहपुच्छाकृतिमञ्जरीत्वात् Pt_2.

(पा.) पृश्निपर्णी—गुहा। पृश्निपर्णीनामानि। 'नक्तोंकपोन्न'॥ ९२॥

निदिग्धिकास्पृशी व्याघ्री बृहती कण्टकारिका॥ ९३॥
प्रचोदनी कुली क्षुद्रा दुःस्पर्शा राष्ट्रिकेत्यपि।

(वि.) निदिग्धिकेति—निदिह्यतेऽङ्गोपाङ्गैरुपचीयत इति निदिग्धिका। 'दिह उपचये'। कण्टकित्वान्न स्पृश्यतेऽस्पृशी। 'स्पृश [1]स्पर्शने'। स्पृशीति वा पाठः। अत एव व्याघ्रीव तिष्ठतीति [2]व्याघ्री। कण्टकैर्बृहतीति[3] बृहती। 'बृह वृद्धौ[4]'। कण्टकानियर्तीति कण्टकारिका। 'ऋ गतौ'। [5]रुचिरत्वेन भोजनं [6]प्रचोदयतीति प्रचोदनी। '[7]चुद प्रेरणे'। कोलति [8]सान्द्रीभवतीति कुली। 'कुल संस्त्याने बन्धुषु च'। [9]वार्ताकीमपेक्ष्य [10]ह्रस्वत्वात् क्षुद्रा। दुःखेन स्पृश्यते कण्टकित्वात् दुःस्पर्शा। राष्ट्रे भवा राष्ट्रिका। कण्टकारिकानामानि। '[11]वांकुडुचेट्टु'॥ ९३॥

[1] संस्पर्शने K_5, K_6. [2] व्याघ्रनखरसमानकण्टकत्वात् Pt_2. [3] बृहत इति K_6.
[4] 'बृह बृंहि वृद्धौ' K_5, K_6. [5] रुचिकरत्वेन K_2, K_3, K_5; कण्टकैश्चोदयति प्रेरयतीति Pt_2. [6] B_1, J_2, K_2 add प्रति. [7] 'चुद संचोदने' F_2. [8] सार्द्र J_2, K_6; संघीभवति Pt_2. [9] वार्ताकादिकं Pt_2. [10] क्षुद्रत्वात् Pt_2. [11] 'किरियुह्ल' J_2.

(पा.) निदिग्धिका—राष्ट्रिकेत्यपि। निदिग्धिकानामानि। 'वांकुडु'॥ ९३॥

नीली काला क्लीतकिका ग्रामीणा मधुपर्णिका॥ ९४॥
रञ्जनी श्रीफली तुत्था द्रोणी डोला च नीलिनी।

(वि.) नीलीति—नीलवर्णत्वान्नीली। काला च। [1]क्रीतकं विनिमयोऽस्या अस्तीति क्लीतकिका[2]। ग्रामे [3]भवतीति ग्रामीणा। [4]मधूनि मधुराणि पर्णान्यस्या मधुपर्णिका। रञ्जयति [5]पटादिकं नीलीकरोतीति रञ्जनी। 'रञ्ज रागे'। [6]रम्यफलत्वात् श्रीफली। फलनिष्पत्तिसमये तुद्यते पीड्यते तुत्था। 'तुद व्यथने'। अस्पृश्यतया द्विजोऽत्र द्रवतीति [7]द्रोणी। 'द्रु गतौ'। तूणीति वा पाठः। 'तुण संकोचने'। 'तूण प्रपूरणे' इति वा धातुः। डोल्यते वायुनेति डोला। 'डुल उत्क्षेपे'। दोलेति वा पाठः। नीलवर्णोऽस्या अस्तीति नीलिनी। नीलीनामानि। 'नीलिचेट्टु'॥ ९४॥

[1] क्लीतकं K_6.　[2] Pt_2 adds ‘डुक्रीञ् द्रव्यविनिमये’.　[3] भवा F_2, Pt_2.　[4] मधुमासे Pt_2.　[5] वस्त्रादिकं Pt_2.　[6] फलवतीत्वात् K_2.　[7] द्रवन्ति जना अस्या अस्पृश्यत्वात् Pt_2.

(पा.) नीली—क्लीतकिका। क्लीतकीति पाठान्तरम्। ग्रामीणा। ह्रस्वमध्येति केचित्। मधुपर्णिका—नीलिनी। द्रोणी दोरेति वा। द्रोणी तूणी चेति केचित्। नीलीनामानि। ‘नीलिचेट्टु’॥ ९४॥

अवल्गुजः सोमराजी सुवल्ली सोमवल्लिका॥ ९५॥
कालमेषी कृष्णफली वाकुची पूतिफल्यपि।

(वि.) अवल्गुज इति—[1]पूतिगन्धित्वाद् अवल्गोररम्याद् बीजाज्जातः[2] अवल्गुजः[3]। सोमेनाह्लादेन राजत इति सोमराजी। ‘राजृ दीप्तौ’। शोभना वल्ल्योऽस्या सन्तीति सुवल्ली। सोमा आह्लादका[4] वल्ल्योऽस्या इति सोमवल्लिका। कालवर्णेन मिष्यते [5]कृष्णफलेन शब्द्यत इति कालमेषी। ‘मिष[6] शब्दे’। कृष्णवर्णानि फलान्यस्याः कृष्णफली। वाति क्रिमीन् हन्ति [7]कुष्ठादिरोगान् संकोचयतीति वाकुची। ‘वा गतिगन्धनयोः’। ‘कुच[8] संकोचने’ इति च धातुः। पूतिः गन्धः फलेऽस्या इति पूतिफली। वाकुचीनामानि॥ ‘कारुगच्चपेरु’॥ ९५॥

[1] असाम्यात् K_6; पूतिबीजत्वात् D_2, K_6.　[2] जायत इति K_5, K_6.　[3] G adds ‘जनी प्रादुर्भावे.’　[4] आह्लादकारिणी वल्ली Pt_2.　[5] कृष्णफलीति G, J_2; फलेति B_1, K_2, Pt_2.　[6] ‘मिष मिश शब्दे’ K_6.　[7] वातं Pt_2.　[8] ‘कुच शब्दे तारे’ Pt_2.

(पा.) अवल्गुजः—पूतिवल्ल्यपि। वाकुचीनामानि। ‘बावंजि’ ‘वारुगच्च’ ॥ ९५॥

कृष्णोपकुल्या वैदेही मागधी चपला कणा॥ ९६॥
ऊषणा पिप्पली शौण्डी कोलाथ करिपिप्पली।
कपिवल्ली कोलवल्ली श्रेयसी वसिरः पुमान्॥ ९७॥

(वि.) कृष्णेति—कृष्णवर्णत्वात् कृष्णा। कर्षति रोगानिति वा। ‘कृष विलेखने’। [1]उपकोलति संस्त्यायत इति उपकुल्या। ‘कुल संस्त्याने बन्धुषु च’। [2]विदेहाख्य-

देशे भवा वैदेही। [3]मगधदेशे भवा मागधी[4]। चपलः उष्णो रसः तद्योगाच्चपला[5]। कणाः सन्त्यस्याः कणा। [6]रोगानूषतीति ऊषणा। 'ऊष [7]रुजायाम्'। पिपर्ति पालयतीति पिप्पली। 'पॄ पालनपूरणयोः'। [8]रोगापनोदने शक्तित्वात् शौण्डी। [9]कोलति संस्त्यायतीति कोला। 'कुल संस्त्याने'। पिप्पलीनामानि। 'पिप्पलिपेरु'॥ [10]करिणः पिप्पली करिपिप्पली। [11]मर्कटरोमाभावयवयोगात् कपिवल्ली। कोलवद् वराहवत् स्थूला वल्ली यस्याः कोलवल्ली। श्रेयस्करत्वात् श्रेयसी। वस्यते [12]रोमभिराच्छाद्यत इति वसिरः। 'वस आच्छादने'। वशिर इति वा पाठः। गजपिप्पलीनामानि। 'गजपिप्पलिपेल्लु'[13]॥ ९६–७॥

---

[1] उपगता कुल्या जन्मभूमित्वेनानयेति Pt_2. [2] विदेहदेशे F_2, Pt_2. [3] मगधाख्य° J_2. [4] मागधी च only in K_2. [5] चपलाः कणा अस्याः सन्तीति G, K_5, K_6. [6] B_1 omits two lines. [7] 'ऊष दाहे' G. [8] K_6 adds त्रिदोष°. [9] कुल्यते K_5, K_6. [10] करियोग्या Pt_2. [11] कपि° Pt_2. [12] लोमभिः B_1, K_5. [13] 'गजहंपिप्पली' J_2.

(पा.) कृष्णा—कोला। पिप्पलीनामानि। 'पिप्पलि'॥ अथ करिपिप्पली—वशिरः पुमान्। श्रेयसी तु शिरः पुमानिति पाठान्तरम्। 'काण्डी[1] वशिरकाण्डीका[2] गृहाकाण्डा[3] शिरः पुमान्' इति वैजयन्ती (पृ. १२९, श्लो. ७८)। 'गजपिप्पलि'॥९६–७॥

---

[1] 'काण्डी वसीरकाण्डीरौ गृहकाण्डः शिरः पुमान्' इति मुद्रितग्रन्थे. [2] काण्डीरा B_3. [3] गृहकाण्डा B_3.

चव्यं तु चविकं कोकचिञ्चीगुञ्जे तु कृष्णला।
पलंकषा त्विक्षुगन्धा श्वदंष्ट्रा स्वादुकण्टकः॥ ९८॥
गोकण्टको गोक्षुरको वनशृङ्गाट इत्यपि।

(वि.) चव्यमिति—चर्व्यत इति चव्यम्[1]। चविकं च। चविका च। 'चर्व अदने'। चव्यनामनी। 'चव्यमुपेल्लु'॥ कोकवर्णाश्चिञ्चाः प्रान्ता अस्या इति कोकचिञ्ची। काकचिञ्चीति वा पाठः। शुष्कदशायां[2] गुञ्जतीति गुञ्जा। 'गुजि अव्यक्ते शब्दे'। [3]कृष्णवर्णं प्रान्ते लातीति कृष्णला। 'ला आदाने'। गुञ्जानामानि। 'पूसलगुरिवेंद्पेरु'॥ पलं मांसं कण्टकमुखेन कषतीति पलंकषा। 'कष हिंसायाम्'। इक्षोर्गन्ध इव गन्धोऽस्या अस्तीति इक्षुगन्धा[4]। शुनो दंष्ट्रेव हिंस्रत्वात् श्वदंष्ट्रा[5]। स्वादवः कण्टका अस्य [6]स्वादुकण्टकः। गवां कबलेषु कण्टको गोकण्टकः[7]। गवि [8]भूमौ क्षुर इव पाददुःखहेतुत्वाद् गोक्षुरकः। वने शृङ्गमिव [9]दुःखहेतुत्वादटति प्रतिपद्यत इति वनशृङ्गाटः[10]। 'अट[11] गतौ'। गोक्षुरनामानि। 'पल्लेरुचेट्टु'॥ ९८॥

[1] पृषोदरादि B_1.　[2] शुष्कदलायां B_1.　[3] कृष्णं वर्णं J_2.　[4] इक्षुगन्धी J_2.　[5] शुन इव दंष्ट्रा कण्टकात्मा Pt_2.　[6] मृदुकण्टकत्वात् G, I, K_5, Pt_2.　[7] गवां कण्टको बाधकः Pt_2; गोषु G, I.　[8] भुवि G, I, K_3, Pt_2.　[9] दुःखकरत्वमटतीति Pt_2.　[10] वनशृङ्गाटकः B_1, D_2, K_5, K_6.　[11] 'अट पट गतौ' K_5, K_6.

(पा.) चव्यं तु चविका । 'चव्यमु' ॥ [1]काकबिम्बीगुञ्जे तु कृष्णला । शेषे—

'वर्तन्तेऽस्यां रक्तिका च ताम्रिका कृष्णरक्तिका ।
चूडामा कपिलक्रोडा काकसाह्वा परा नव ॥
काकशब्दा पीलुपाठ्यौ चिञ्चीणन्त्यदनी नखी ।
जङ्घा रक्ता च दक्षा च ॥'

रक्तगुञ्जानामानि । 'येर्रुगुरिज' ॥ शेषे—'सा शुक्ला चेन्मधुस्रवा' । 'तेल्लगुरिज' ॥ पलंकषा—वनशृङ्गाट इत्यपि । पलंकषानामानि । 'पल्लेरु' ॥ ९८ ॥

[1] Reading found in B_3.

विश्वा विषा प्रतिविषातिविषोपविषारुणा ॥ ९९ ॥
शृङ्गी महौषधं चाथ क्षीरावी दुग्धिका समे ।

(वि.) विश्वेति—विशति [1]रोगिणामुदरमिति विश्वा । 'विश प्रवेशने' । कटुत्वेन शरीरं वेवेष्टीति विषा । 'विष्लृ व्याप्तौ' । विषस्य प्रति [2]प्रतिकारः प्रतिविषा[3] । विषमतिक्रान्ता अतिविषा । उपगता विषम् उपविषा । अपविषेति पाठे अपगतं विषमस्या अपविषा । विरुद्धलक्षणया अरुणकन्दत्वाद् अरुणा,[4] श्वेतकन्देत्यर्थः । शृङ्गयुक्तत्वात् शृङ्गी । महच्च तदौषधं च महौषधम् । अतिविषानामानि । 'अतिवस[5]' ॥ क्षीरमवतीति[6] क्षीरावी । दुग्धमस्या इति दुग्धिका । दुग्धिकानामनी । '[7]चिरुपालचेट्टु' ॥ ९९ ॥

[1] रोगिणो हृदये F_2, Pt_2.　[2] प्रतीकारः J_2.　[3] वीतिविषा G.　[4] अरुणवर्णत्वात् Pt_2.　[5] 'सिन्न अतिवसपेरु' K_3.　[6] K_5, K_6 add रक्षतीति ; 'अव रक्षणे' G, J_2, K_2, K_5.　[7] 'करीबेल्लियगिड' J_2.

(पा.) विश्वा—महौषधं च । अतिविषानामानि । 'अतिवस' । अथ क्षीरावी—समे । क्षीरिणीलताया नामनी । क्षीरकाकोलीति गौडाः । 'पिन्नपाल' । अष्टकवर्गौषधम् ।

'जीवकरऋषभकऋद्धिवृद्धिमेधामहामेधाः ।
काकालीक्षीरावीकाकोलीत्यष्टको वर्गः' ॥ ९९ ॥

शतमूली बहुसुताभीरुरिन्दीवरी वरी ॥ १०० ॥
ऋश्यप्रोक्ताभीरुपत्रीनारायण्यः शतावरी ।
अहेरुरथ पीतद्रुकालेयकहरिद्रवः ॥ १०१ ॥
दार्वी पचंपचा दारुहरिद्रा पर्जनीत्यपि ।

(वि.) शतमूलीति—शतं बहूनि मूलान्यस्याः सन्तीति शतमूली । बहवः सुता मूलान्यस्या इति बहुसुता । न भीरुः अभीरुः, स्थिरपत्रत्वात् । [1]उत्पलाभपत्रत्वाद् इन्दीवरी । भुवं मूलैर्वृणोतीति वरी । 'वृञ् वरणे' । ऋश्यैर्मृगैः प्रोक्ता [2]आश्रिता ऋश्यप्रोक्ता । ऋष्यप्रोक्तेति वा पाठः । अभीरूणि [3]कम्पशून्यानि पत्राण्यस्याः सन्तीति अभीरुपत्री । [4]नारायणाज्जाता नारायणी । शतमूलैरावृणोति भुवमिति शतावरी । 'वृञ् वरणे' । न हिनोतीति अहेरुः[5] । 'हि गतौ' । आहेरुरिति वा पाठो ग्राह्यः । शतावरीनामानि । 'पिल्लपिच्चर पेल्लु' ॥ पीतो द्रुः स्कन्धोऽस्येति पीतद्रुः । [6]विरुद्धलक्षणया कालवर्णोऽस्येति कालेयकः । पीतवर्ण इत्यर्थः । कालयति दोषानिति कालीयक इति वा पाठः । 'कल किल क्षेपे' । हरिश्चासौ द्रुश्च हरिद्रुः । [7]दारुसंबन्धिनी दार्वी । अत्यर्थं रोगान् पचतीति पचंपचा । 'डुपचष् पाके' । [8]दारोर्हरिद्रा दारुहरिद्रा । कुष्ठादिरोगेभ्यः पिपर्तीति पर्जनी । 'पॄ पालनपूरणयोः' । पर्जनीनामानि । 'म्रानिपसुवुपेल्लु' ॥ १००–१ ॥

---

[1] पुष्पत्वात् K_5, K_6. [2] दर्शिता F_2, K_5, K_6. [3] दृढत्वेन भयरहितानि Pt_2. [4] विष्णुना सहजातत्वात् K_6; सहजत्वात् K_5; सहभावत्वात् B_1. [5] विरुद्धलक्षणया अहितत्वाद् अहेतुः K_6; अहेतुत्वात् G, J_2. [6] K_5 omits 3 lines. [7] दारोः K_2, K_6. [8] दारुसंबन्धिनी Pt_2.

(पा.) शतमूली—[1]वृष्यप्रोक्ता । ऋष्यप्रोक्ता वा । ऋश्यप्रोक्तेति तन्त्रान्तरम् । भीरुपत्रीनारायण्यः । द्वन्द्वाद्बहुवचनम् । शतावरी । आहेरुः[1] । अहेरुर्वा । शतावरीनामानि ।

'आहेरुः शतवीर्या स्यादभीरुः शतमूलिका ।
सहस्रवीर्याभीरुश्च ।'

इति प्रतापाभिधानादभीरुरपि । 'पिल्लपींचर' ॥ अथ पीतद्रु—पर्जनीत्यपि । दारुहरिद्रानामानि । 'मानुपनुपु' ॥ १०८–१ ॥

---

[1] Reading adopted in B_3.

वचोग्रगन्धा षड्ग्रन्था गोलोमी शतपर्विका ॥ १०२ ॥
शुक्ला हैमवती वैद्यमातृसिंह्यौ तु वाशिका ।
वृषोऽटरूषः सिंहास्यो वासको वाजिदन्तकः ॥ १०३ ॥

(वि.) वचेति—अनया वक्तीति वचा[1]। 'वच परिभाषणे'। उग्रो दुःसहो गन्धोऽस्या इत्युग्रगन्धा। षड् ग्रन्थयः पर्वाण्यस्याः षड्ग्रन्था। गोरिव लोमान्यस्या गोलोमी। शतं बहूनि पर्वाण्यस्याः [2]शतपर्विका। वचानामानि। 'वसपेल्लु'॥ शुक्लवर्णत्वात्[3] शुक्ला। हिमवति भवा हैमवती। श्वेतमूलवचानाम। 'तेल्ल [4]वस पेरु'॥ वचादिशतपर्विकान्तानि पञ्च नामानि सामान्यवचाया एवेति केचित्॥ वैद्यानां मातेव [5]हितकारित्वाद् वैद्यमाता। हिनस्ति कासादिरोगानिति सिंही। 'हिसि हिंसायाम्'। ज्वरितादिभिर्वाश्यते स्तूयत इति वाशिका। 'वाश्ट शब्दे'। उश्यते काम्यते वैद्यैरिति वा। 'वश कान्तौ'। [6]तिक्तं रसं वर्षतीति वृषः। 'वृषु सेचने'। अटतो[7] व्याप्तस्य रोगस्य रोषति अटरूषः। 'रुष हिंसायाम्'। [8]सिंहमुखाभपुष्पत्वात् सिंहास्यः। वासयतीति [9]वासिकः। वस्ते आच्छादयतीति वा। वाजिदन्ता इव केसराण्यस्य वाजिदन्तकः[10]। वाशिकानामानि। 'अड्डुसरमु'॥ १०२-३ ॥

---

[1] 'वस पेरु' K_5, K_6; 'बजे' J_2.
[2] 'नल्लवसपेरु' K_2, K_6.
[3] पर्वत्वात् K_5.
[4] 'बिळियबजे' J_2.
[5] रोगभेदीति K_6.
[6] मधु वर्षतीति Pt_2.
[7] अटान् व्याप्तान् रोगान् Pt_2.
[8] सिंहास्याकारपुष्पत्वात् Pt_2.
[9] वाशिकाशब्दवद् वाशिक (वासिक D_2) शब्दव्युत्पत्तिः K_5, K_6.
[10] वाजिदन्ताकारकेसरत्वात् Pt_2.

(पा.) वचोग्रगन्धा—शतपर्विका। वचानामानि। 'वस'॥ शुक्ला हैमवती। 'तेल्लवस'॥ वैद्यमातृसिंह्यौ—वृषा। स्त्रीलिङ्गः। वैद्यके पुंलिङ्गश्च दृश्यते॥ अटरूषः। दीर्घादिरपि[1]। सिंहास्यो—वाजिदन्तकः। वाशानामानि। 'अडसरमु'॥ १०२-३ ॥

---

[1] B_3 adds आटरूष इति.

आस्फोटा गिरिकर्णी स्याद् विष्णुक्रान्तापराजिता ।
इक्षुगन्धा तु काण्डेक्षुकोकिलाक्षेक्षुरक्षुराः ॥ १०४ ॥

(वि.) आस्फोटेति—[1]आस्फोटयति पित्तादीनित्यास्फोटा। 'स्फुट भेदने'। गिरेः[2] कर्णसादृश्याद् गिरिकर्णी। विष्णुना समाक्रान्ता विष्णुक्रान्ता[3]। विष्णोरिव क्रान्तिरस्या इति वा। अत एव भूतव्रातेनाप्रतिहता [4]अपराजिता। विष्णुक्रान्तानामानि।

'विष्णुक्रान्तमु'॥ इक्षोरिव [5]गन्धोऽस्या इति इक्षुगन्धा। काण्डे इक्षोरिव ग्रन्थयोऽस्य सन्तीति काण्डेक्षुः[6]। कोकिलस्य अक्षिणी इव पुष्पाण्यस्य कोकिलाक्षः[7]। इक्षुगन्धं [8]राति ददातीति इक्षुरः। 'रा दाने'। पारुष्यात् क्षुर इव क्षुरः। क्षुरतीति क्षुरः। 'क्षुर विलेखने'। इक्षुर एव क्षुरः। इकारलोपः। पिधानशब्दवत्[9]। कोकिलाक्षनामानि। '[10]गोलिमिडि'॥ १०४॥

[1] आस्फोटति, 'स्फुट विकसने' Pt_2. [2] सूक्ष्मगिरिवत् सूक्ष्माश्मवत् कर्णों (कर्णिका J_2) ऽस्याः K_5, K_6. [3] रक्षाहेतुत्वाद् विष्णुना क्रान्ता Pt_2. [4] अपराजिता भूतैः Pt_2. [5] गन्ध इव गन्धः F_2, Pt_2. [6] काण्डेन इक्षुरिव Pt_2. [7] कोकिलाक्षाभपुष्पत्वात् K_5, K_6. [8] दिक्षु राति करोति K_5. [9] D_2, K_6 add द्रष्टव्यः. [10] 'सिन्न गोलिमिदिचेट्टु' K_3.

(पा.) आस्फोटा—स्यात्। शेषे—'शीपलाश्वखुरी च सा। सृण्डा च' गिरिकर्णिकानामानि। 'दिंटेन'॥

'... अत्र सितायां तु श्वेतसारा गवार्दनी।
चारणी कटुनी सूर्याश्वक्षुद्राश्वखुरा तथा॥
श्वेतपुष्पी च'।

श्वेतगिरिकर्णिकानामानि। 'तेल्लदिंटेन'॥ 'नीला तु नीलपुष्प्यतिमेचका। वनिता स्थूलपुष्पी च'। नीलगिरिकर्णिकानामानि। 'नल्लदिंटेन'॥ वैजयन्त्याम् (पृ. ५६, श्लो. १३३-४)—'अपराजिता। [1]विष्णुक्रान्तापरास्फोटाश्वखुरी शीतलात्र[2] तु' इत्युक्तत्वाद् विष्णुक्रान्तापराजिताशब्दौ गिरिकर्णिकायामपि॥ विष्णुक्रान्तापराजिता। विष्णुक्रान्तानामनी। 'विष्णुक्रान्त'। 'विष्णुक्रान्ता तु सुमुखी भवघ्नी स्यान्महारसा'। एतानि च॥ इक्षुगन्धा—काण्डेक्षा। काण्डेक्षुरिति वा। कोकिलाक्षा—क्षुराः। इक्षुगन्धानामानि। 'मुलिगोलिमिडि'। 'गोजाकर्णी फेनदुग्धा लूताशत्रुः पयस्विनी' इति क्षीरेक्षुगन्धापर्यायोऽपि पृथक्। 'पालगोलिमिडि'॥ १०४॥

[1] वरास्फोटा B_3; परास्फोतेति मुद्रितग्रन्थे. [2] तथा B_3.

शालेयः स्याच्छीतशिवा छत्रा मधुरिका मिसिः।
मिश्रेयोऽप्यथ सिंहुण्डो वज्रद्रुः स्नुक्स्नुही गुडा॥ १०५॥
समन्तदुग्धाथो वेल्लममोघा चित्रतण्डुला।
तण्डुलश्च कृमिघ्नश्च विडङ्गं पुंनपुंसकम्॥ १०६॥

(वि.) शालेय इति—शाल्यते श्लाघ्यते शाकाय भवतीति शालेयः। 'शाल श्लाघायाम्'। स्वपुष्पैः शालया गृहेणेवाच्छादितत्वात् इति वा। शीतवीर्यत्वात् शिवा भद्रा [1]शीतशिवा। छत्राकृतिरस्याः पुष्पेष्विति [2]छत्रा। [3]स्वादुत्वात् मधुरिका। मस्यति परिणमति तिक्तत्वेनेति [4]मिसिः। 'मसी परिणामे'। दुःखमिश्रितं श्रेयोऽत्रास्तीति मिश्रेयः। पुष्पैर्मिश्रयते[5] संश्लिष्यत इति वा। 'मिश्र संपर्के'। मधुरिकानामानि। 'सदापपेरु'॥ सिंहतुण्डाभशाखत्वात्[6] सिंहुण्डः। तकारलोपः। वज्र इव[7] प्लीहादिरोगान् दृणातीति वज्रद्रुः। 'दॄ विदारणे[8]'। वज्र इव द्रुः स्कन्धोऽस्येति वा। [9]स्नुह्यति क्षीरमिति स्नुक्। स्नुही च। 'ष्णुह उद्गिरणे'। गुडति प्लीहादिरोगेभ्यो गुडा। 'गुड रक्षायाम्'। समन्ताद् दुग्धं क्षीरमस्या इति समन्तदुग्धा। [10]सिंहुण्डनामानि। 'जेमुडुपेरु'॥ वेल्लति लघुत्वादिति वेल्लम्। 'वेल्ल [11]चलने'। [12]उपयोगिबीजत्वाद् अमोघा। चित्रास्तण्डुलाः सूक्ष्मबीजान्यस्याः चित्रतण्डुला। तण्डुलाः सन्त्यस्येति तण्डुलः। कृमीन् हन्तीति कृमिघ्नः। 'हन हिंसागत्योः'। विडति गुल्मादिग्रन्थीनिति विडङ्गम्[13]। 'विड भेदने'। विडङ्गनामानि। 'वायुविलङ्गमु पेरु'॥ १०५–६॥

---

[1] शितवीर्येण, शितशिवा K_5, K_6.
[2] छादयति भुवनं Pt_2; छत्राकृतित्वात् J_2.
[3] मधुररसयोगात् Pt_2.
[4] मसिः B_1, J_2.
[5] मिश्यते, 'मिश शब्दे रोषकृते च' K_5, K_6.
[6] शाखात्वात् K_3.
[7] वज्रमिव भेदकत्वात् F_2, Pt_2.
[8] 'द्रु गतिहिंसाकौटिल्येषु' K_6.
[9] स्नौति, 'ष्णु प्रस्रवणे' K_5, K_6.
[10] 'गुड्डुकल्लि' J_2.
[11] संचलने Pt_2.
[12] उपयोग° J_2; सुप्रयोजनत्वात् F_2, Pt_2.
[13] रोगं J_2, Pt_2.

(पा.) शालेयः—मिसिः। 'तालपर्णी शीतशिवा छत्रेति' प्रतापवचनात् स्त्रियां च। 'तालपर्णी मिसिः पुमान्' इति वचनात् मिसिः पुंलिङ्गः॥ मिश्रेयोऽपि। 'वन्यायां शतपुष्पायां मिश्रेया तालपत्रिका' इति प्रतापवचनात् स्त्रियामपि। वन्यशतपुष्पानामानि। 'अडवि सदाप'। अथ सिंहिण्डः—

'प्रायो जनाः सन्ति वनेचराद्याः[1] गोपादयः प्राकृतनामतज्ज्ञाः[2]।
प्रयोजनार्थां वचनप्रवृत्तिर्यतस्ततः[3] प्राकृतमित्यदोषः॥'

इति धन्वन्तरिवचनात् (ध. नि. १. ८) प्राकृतग्रहणम्। '[4]सिंहुण्डः सिन्धुरप्यस्याम्' इति वैजयन्त्यामपि (पृ. ५३, श्लो. ९८) प्राकृतग्रहणमेव कृतम्॥ वज्रद्रुः—समन्तदुग्धा। सिंहुण्डनामानि। 'अकुचमुडु'। अनुक्तम्—'निष्पत्रिका तु गण्डीरी वज्रिका च त्रिकण्टकः'। कण्टकवतीस्नुहीनामानि। 'मुलुचमुडु'॥ अथो—पुंनपुंसकम्। विडङ्गनामानि। 'विडङ्गमु'॥ २०५–६॥

[1] °स्ते B_3. [2] °संज्ञाः B_3. [3] यस्मात् B_3. [4] ‘सिद्गुण्डः’ इति मुद्रितग्रन्थे; सीहुण्ड इति पाठः क्षीरस्वामिटीकायाम् (पृ. १०७).

बला वाट्यालको घण्टारवा तु शणपुष्पिका ।
मृद्वीका गोस्तनी द्राक्षा स्वाद्वी मधुरसेति च ॥ १०७ ॥

(वि.) बलेति—बलन्त्यनया [1]बला । ‘बल प्राणने’ । वटति [2]वेष्टयति समीपदेशमिति वाट्यालकः । ‘वट वेष्टने परिभाषणे च[3]’ । बलानामनी । ‘चिट्टामुदपुचेट्टु’ ॥ घण्टेव रौतीति[4] घण्टारवा । ‘रु शब्दे’ । शणस्येव पुष्पाण्यस्याः शणपुष्पिका । शणपुष्पिकानामनी । ‘गिलकचेट्टु’ ॥ मृद्यत इति मृद्वीका । ‘मृद क्षोदे’ । मृदुत्वयोगाद्वा । गोस्तनाभफलत्वाद् गोस्तनी । द्राति द्रावयति दाहादिकमिति द्राक्षा । ‘द्रा कुत्सायां गतौ’ ‘द्रु गतौ’ । [5]स्वादुत्वात् स्वाद्वी । अत एव [6]मधुरसा च । द्राक्षानामानि । ‘[7]द्राक्षपेल्लु’ ॥ १०७ ॥

[1] बलति I, J_2, K_6; बलत्वसमा K_5. [2] K_5 adds गुल्मादिस्थलं. [3] ‘वट परिवेष्टने’ K_6. [4] D_2, I, J_2 add शुष्कदशायां; °दलायां B_1, K_2; घण्टाया रवो अस्या इति Pt_2. [5] स्वादुत्वयोगात् J_2, K_5, K_6. [6] मधुरसयोगात् Pt_2. [7] ‘द्राक्षेयगिड्डु’ J_2.

(पा.) बला वाट्यालकः । बलानामनी । ‘मुत्तुवपुलगमु’ । अनुक्तम्—‘वाट्यपुष्ट्यामतिबला’ । ‘अतिबल’ । ‘वाट्यवन्यां महाबला’ । ‘महाबल’ ॥ घण्टारवा—शणपुष्पिका । घण्टारवानामनी । ‘गिलगिच्च’ ॥ मृद्वीका । ह्रस्वमध्येति च कथयन्ति । ‘मृद्वीका किङ्किणीकादेर्मृद्विका सौकुमार्यतः’ इति । गोस्तनी—मधुरसेति च । द्राक्षानामानि । ‘द्राक्षतींगे’ । ‘हारहूरा प्रियाला च कृष्णा स्वादुरसा गुडा’ । एतानि च ॥ १०७ ॥

सर्वानुभूतिः सरला त्रिपुटा त्रिवृता त्रिवृत् ।
त्रिभण्डी रेचनी श्यामापालिन्द्यौ तु सुषेणिका ॥ १०८ ॥
काला मसूरविदलार्धचन्द्रा कालमेषिका ।

(वि.) सर्वानुभूतिरिति—[1]कषायमधुररसत्वात् सर्वैरनुभूयत इति सर्वानुभूतिः । ‘भू सत्तायाम्’ । रेचनीत्वात् सरतीति सरला । ‘सृ गतौ’ । त्रयः पुटा अस्या इति त्रिपुटा[2] । त्रिभिः पुटैर्व्रियते आच्छाद्यत इति त्रिवृता । ‘वृञ् वरणे’ । [3]वृत्यत

इति वा, 'वृतु [4]वरणे'। त्रिवृच्च[5]। कफहरत्वपित्तहरत्वरेचकत्वगुणैस्त्रिभिः प्रवृत्तिनिमित्तैर्भण्ड्यते[6] शब्द्यत इति त्रिभण्डी। 'भडि [7]परिभाषणे'। रेचयति विरेचयति रेचनी। 'रिचिर् [8]विरेचने'। रेचनहेतुत्वाद्वा। रोचनीति वा पाठः। [9]रुचिकरत्वात् रोचनी। रेचनीनामानि। 'तेल्लतिगडपेल्लु'॥ [10]श्यामवर्णत्वात् श्यामा। क्रिम्यादिरोगेभ्यः पालयतीति पालिन्दी। 'पाल रक्षणे'। पालिनीति वा पाठः। सुष्ठु सिनोति क्रिमीन् हन्तीति सुषेणिका। 'षिञ् बन्धने'। [11]कालवर्णत्वात् काला। [12]मसूराणि मृष्टानि विदलान्यस्या इति मसूरविदला। [13]अर्धचन्द्रा[14]कारदलत्वाद् अर्धचन्द्रा। [15]कालेति नाम्ना मिष्यते शब्द्यत इति कालमेषिका। '[16]मिष स्पर्धायाम्'। श्यामानामानि। 'नल्लतेगडपेल्लु'॥ १०८॥

---

[1] मधुरतिक्तादीनां सर्वरसानामनुभूतिरत्रेति Pt_2. [2] पुटत्रयशालिनीत्वात् D_2, J_2, K_5. [3] वर्त्यते J_2. [4] आच्छादने K_5, K_6. [5] कफहरणपित्तहरणरेचकत्वरूपाणां त्रयाणां गुणानां वृत्तिर्वर्तनमत्रेति Pt_2. [6] उद्भाव्यते K_6. [7] कल्याणे K_5, K_6. [8] पृथग्भावे Pt_2. [9] रुचिरत्वात् B_1, K_5. [10] कृष्ण° Pt_2. [11] कृष्णत्वात् I, K_2; कृष्णवर्णत्वात् K_5, K_6. [12] मसूर इव विदला Pt_2; मयूरविदलेति वा पाठः Pt_2. [13] Pt_2 adds कथंचित्. [14] सदृश for आकार F_2, Pt_2. [15] कालेन वर्णेन F_2, Pt_2. [16] 'मिष मिश शब्दे' K_6.

(पा.) सर्वानुभूतिः—रेचनी। श्वेतत्रिवृतानामानि। 'तेल्लतेगड'॥ श्यामा—कालमेषिका। नीलत्रिवृतानामानि। 'नल्लतेगड'॥ १०८॥

मधुकं क्लीतकं यष्टिमधुकं मधुयष्टिका॥ १०९॥
विदारी क्षीरशुक्लेक्षुगन्धा क्रोष्ट्री च या सिता।
अन्या क्षीरविदारी स्यान्महाश्वेतर्क्षगन्धिका॥ ११०॥

(वि.) मधुकमिति—[1]मधुकरत्वेन मधुसमत्वात् मधुकम्। क्लीवत्वं तकति [2]प्रतिहन्तीति क्लीतकम्। 'तक [3]प्रतिघाते'। यष्ट्याकारत्वात् मधुद्रवत्वाच्च [4]यष्टिमधुकम्। मधुयष्टिका[5] च। यष्टिमधुकनामानि। 'अतिमधुरमु'॥ विदारयति भूमिमिति [6]विदारी। 'दॄ विदारणे'। क्षीरेव[7] शुक्लेवामलस्वरूपेति[8] क्षीरशुक्ला। इक्षोरिव गन्धोऽस्या इक्षुगन्धा। 'तेल्लनेलगुम्मुडु'॥ रोगान् नाशयामीति क्रोशतीति क्रोष्ट्री[9]। 'क्रुश आह्वाने रोदने च'। 'नल्लनेलगुम्मुडुपेल्लु'॥ विदार्यादीक्षुगन्धान्तानि नामानि क्रोष्ट्रीनामानीति केचित्॥ क्षीरवत् श्वेता विदारी क्षीरविदारी। स्वरूपतः कन्दतश्च क्षीरतश्च श्वेतत्वात महाश्वेता। ऋक्षवत् क्रिम्यादिरोगान् गन्धयते नाशयतीति ऋक्ष-

गन्धिका। 'गन्ध अर्दने'। ऋक्ष्णुवन्ति हिंसन्तीति ऋक्षाः। 'ऋक्ष हिंसायाम्'। [10]ऋक्षान् पित्तादिरोगान् गन्धयत इति वा। क्षीरविदारीनामानि। 'पालगुम्मुडुपेल्लु' ॥ १०९–१० ॥

[1] मधुरत्वात् K_5, K_6.
[2] हन्ति K_5.
[3] हसने D_2, J_2.
[4] यष्टिरूपं मधुकं Pt_2.
[5] मधुना तुल्या यष्टिः F_2, Pt_2.
[6] विदार्य पच्यत इति D_2, K_5, K_6.
[7] क्षीरमिव K_5.
[8] अमलस्वरूपिणी B_1, K_5.
[9] मधुरत्वाद् वृष्यादिप्रयोगेषु समर्थाहमिति क्रोशतीति Pt_2.
[10] ऋक्षसदृशान् हिंस्रान् F_2, Pt_2.

(पा.) मधुकं—मधुयष्टिका। अत्र द्वे नपुंसके। द्वे [1]स्त्रीलिङ्गे। मधुयष्टिकानामानि। 'यष्टिमधुकमु'॥ विदारी—या सिता। श्वेतविदारीनामानि। 'तेल्लनिनेलगुंमडि'॥ अन्या—ऋक्षगन्धिका। कृष्णभूमिकूश्माण्डनामानि। 'नल्लनिनेलगुंमडि'। महाश्वेतापदे विरोधिलक्षणा॥ १०९–१०॥

[1] यष्टिमधुकेति पारिजातानुसारी पाठः.

लाङ्गली शारदी तोयपिप्पली शकुलादनी।
खराश्वा कारवी दीप्यो मयूरो लोचमस्तकः॥ १११॥

(वि.) लाङ्गलीति—[1]हलाकारफलयोगात् लाङ्गली। शरदि [2]भवा शारदी। [3]तोयजा पिप्पली तोयपिप्पली। शकुलानां [4]मत्स्यानामदनं[5] भवतीति शकुलादनी। जलपिप्पलीनामानि। 'नीरुपिप्पलिपेल्लु'॥ खरत्वम् उष्णत्वमश्नुत इति खराश्वा[6]। 'अशू व्याप्तौ'। कारुवत् सर्वौषधीनां भवतीति [7]कारवी। दीपनं करोतीति दीप्यः। दीप्यतेऽनेनेति वा। 'दीप दीप्तौ'। अग्निमान्द्यं मीनाति[8] नाशयतीति मयूरः। 'मीञ् हिंसायाम्'। लोचमुपनीतं मस्तकमस्येति लोचमस्तकः[9]। मयूरशिखानामानि॥ 'ओममु'॥ १११॥

[1] लाङ्गलाकारत्वात् F_2, Pt_2.
[2] भवत्वात् K_5, K_6.
[3] तोये D_2, J_2; जलजत्वात् B_1, K_3, K_5.
[4] B_1 omits two lines.
[5] अदनीभवति J_2; शकुलैर्मत्स्यैरद्यत इति Pt_2.
[6] खरमत्युष्णमश्नुते D_2, K_2, K_5.
[7] केन जलेन रौतीति करवः मयूरः, करवस्येयं F_2, Pt_2.
[8] मिनोति, 'डुमिञ् प्रक्षेपणे' K_5, K_6.
[9] मस्तकात् बीजानि लुच्यन्तेऽस्येति। 'लुञ्च अपनयने' K_5, K_6.

(पा.) लाङ्गली—शकुलादनी। नीरपिप्पलीनामानि। 'नीरुपिप्पलि'। 'मराटपुचेट्टुनु'॥ खराश्वा—लोचमस्तकः। मयूरशिखानामानि। 'वोममनि कोंदरु' ॥ १११॥

गोपी श्यामा शारिबा स्याच्चन्दनोत्पलशारिबा ।
योग्यमृद्धिः सिद्धिलक्ष्म्यौ वृद्धेरप्याह्वया इमे ॥ ११२ ॥

(वि.) गोपीति—[1]अतिसाररोगिणं गोपायतीति गोपी । 'गुपू रक्षणे' । श्यामवर्णत्वात्[2] श्यामा । शीर्यन्तेऽनया दोषा इति शारिबा । 'शॄ हिंसायाम्' । चन्दयति [3]सुगन्धेनाह्लादयतीति चन्दना । 'चदि आह्लादने' । उत्पलाभपुष्पत्वाद् उत्पलशारिबा । उत्पलशारिबानामानि । 'सुगन्धिपालपेरु' ॥ अष्टवर्गगतौषधियोगे साध्विति योग्यम् ; ऋध्नोत्यनयेति ऋद्धिः । 'ऋधु वृद्धौ' । सिद्ध्यत्यारोग्यमनयेति सिद्धिः । 'षिधु संराद्धौ' । [4]लक्ष्यत इति लक्ष्मीः । 'लक्ष दर्शनाङ्कनयोः' । ऋद्ध्याख्यौषधिनामानि । 'ऋद्धियनुगन्धद्रव्यमु' ॥ इमे [5]वृद्ध्याख्यौषधेरपि आह्वया नामानि ॥ ११२ ॥

[1] अतिसारादि° K_5, K_6. [2] °रूपत्वात् D_2, J_2. [3] सौगन्ध्येन D_2, K_5, K_6.
[4] F_2, Pt_2 add अष्टवर्गयोगे. [5] F_2, J_2 add वर्धतेऽनया वृद्धिः.

(पा.) गोपी—चन्दना । अनन्तेति केचित् । उत्पलशारिबा । शारिबानामानि । 'मामेन' ॥ योग्यम—लक्ष्म्यौ । ऋद्धेर्नामानि । 'ऋद्धि' ॥ वृद्धेरपि—इमे । इमे योग्यादयो वृद्धिसंज्ञाया ओषधेरपि नामानि । 'वृद्धिपेल्लुन्नु' ॥

'अष्टवर्गो महामेदा[1] मेदा[2] स्याज्जीवकर्षभौ ।
काकोली क्षीरकाकोली ऋद्धिर्वृद्धिरितीरितः ॥'

इति ॥ ११२ ॥

[1] महामेधा B_3. [2] मेधा B_3.

कदली वारणवुसा रम्भा मोचांशुमत्फला ।
काष्ठीला मुद्गपर्णी तु काकमुद्गा सहेत्यपि ॥ ११३ ॥

(वि.) कदलीति—केन वायुना दल्यत[1] इति कदली । 'दल विशरणे' । वारणानां[2] बुसा घासः वारणबुसा । रमन्ते पक्षिणोऽत्रेति रम्भा । 'रमु क्रीडायाम्' । मुञ्चति त्वचमिति मोचा । 'मुच्लृ मोक्षणे' । अंशुमन्ति तेजस्वन्ति फलान्यस्या इति अंशुमत्फला । ईषदष्ठीला मज्जा अस्या अस्तीति काष्ठीला । कदलीनामानि । '[3]अरंटिचेट्टु' ॥ [4]मुद्गस्येव पर्णान्यस्या मुद्गपर्णी । हीनमुद्गत्वात् काकमुद्गा । [5]सह्यते वातरोगोऽनया सहा । 'षह मर्षणे' । काकमुद्गानामानि । '[6]पिल्लपेसरपेल्लु' ॥ ११३ ॥

[1] दल्तीति J_2, Pt_2. [2] वारणेन बुस्यत इति, ‘बुस उत्सर्गे’ Pt_2. [3] ‘बाळेमर’ J_2. [4] मुद्गपर्णाभपर्णयोगात् G, J_2, K_2, K_5. [5] सहते वातरोगं F_2, Pt_2. [6] ‘मरुहेसरु’ J_2.

(पा.) कदली वारणबुसा। वारणवृषा च। ‘कदले पुनः। वृषा वारबुसा रम्भा’ इति वैजयन्तीपाठात् (पृ. ५९, श्लो. १७३) कदलशब्दो वारबुसाशब्दश्च॥ रम्भा—काष्ठीला। कदलीनामानि। ‘अरटिचेट्टु’। अनुक्तम्—‘[1]शिलीन्ध्रः कदलीपुष्पम्’। तत्पुष्पनाम॥ मुद्गपर्णी—सहेत्यपि। मुद्गपर्णीनामानि। ‘पिल्लपेसर’॥ ११३॥

[1] शिलीन्द्रः B_3.

वार्ताकी हिङ्गुली सिंही भण्डाकी दुष्प्रधर्षणी।
नाकुली सुरसा नागसुगन्धा गन्धनाकुली॥ ११४॥
नकुलेष्टा भुजंगाक्षी छत्राकी सुवहा च सा।

(वि.) वार्ताकीति—[1]वृत्तफलयोगाद् वार्ताकी। वार्तं निरामयं करोतीति वा। हिनोति वर्धत[2] इति हिङ्गुली। ‘हि गतौ वृद्धौ च’। हिनस्ति कण्टकैरिति सिंही[3]। ‘हिसि हिंसायाम्’। भण्ड्यते रुचिकरत्वाद् [4]भण्डाकी। ‘भडि परिभाषणे’। भाण्डारीत्येके। भाण्डाकीत्यन्ये। कण्टकैर्दुःखेन प्रधृष्यत[5] इति दुष्प्रधर्षणी[6]। ‘ञि-धृषा प्रागल्भ्ये’। भण्डाकीनामानि। ‘मुलकचेट्टु’॥ [7]नकुलानामियं प्रियेति नाकुली। शोभनो रसोऽस्या इति सुरसा। नागानां सर्पाणामिव सुगन्धोऽस्या इति नागसुगन्धा। [8]रास्ना, सुगन्धेति वा पाठः। गन्धतो[9] नकुलानां प्रिया[10] गन्धनाकुली। गन्धतो नकुलानामिष्टा नकुलेष्टा। सर्पनयनसदृशपुष्पत्वाद् [11]भुजंगाक्षी। छत्राभानि पर्णान्यकतीति छत्राकी[12]। ‘अक कुटिलायां गतौ’। सुष्ठु वहत्यामोदं सुवहा। ‘वह प्रापणे’। भुजंगाक्षीनामानि। ‘सर्पाक्षिपेल्लु’॥ ११४॥

[1] आरोग्याय वर्तत इति, ‘वृतु वर्तने’ F_2, Pt_2. [2] वर्धयति J_2. [3] हिंस्री J_2. [4] भटति बिभर्त्यनया दीपनाग्निमिति भण्टाकी, ‘भट भृतौ’ F_2, Pt_2. [5] प्रधर्ष्यत इति K_5, K_6. [6] दुष्प्रधर्षिणी D_2. [7] नकुलप्रियत्वात् G, I, K_6. [8] रस्यते रास्ना, ‘रस आस्वादने’ K_5. [9] गन्धेन Pt_2. [10] प्रियत्वात् J_2. [11] सर्पाक्षितुल्यपुष्पत्वात् J_2, K_5, K_6. [12] छत्राभपुष्पत्वात् D_2, K_5.

(पा.) वार्ताकी हिङ्गुली। हिङ्गुदीति केचित्। सिंही। क्षुद्रवार्ताकीनामानि। ‘मुलक’। ‘बृहत्यां प्रसहा काली वार्ताकी हिङ्गुली[1] कुली’ इति वैजयन्ती (पृ. ५३, श्लो. १०४)। भण्टाकी दुष्प्रधर्षिणी। वार्ताकनामानि। ‘वंग’।

'वातिङ्गणस्तु वार्ताकुर्वार्ताकः शाकविल्वकः।
भाण्डाकी राजकूश्माण्डी वार्ताकी दुष्प्रधर्षिणी ॥'

इति रभसकोशः। अनुक्तम्—'कटङ्काका राजमाता'। 'वंग'॥ नाकुली—सुवहा च सा। वैद्यके[2]—

'नाकुली सर्पगन्धा च सुगन्धा चोग्रगन्धिका।
अन्या महासुगन्धा तु सुवहा गन्धनाकुली ॥
सर्पाक्षी नकुलेष्टा च छत्राकी विषमर्दिनी।'
'नाकुली[3] सुरसा रास्ना सुगन्धा गन्धनाकुली ॥'

इत्युक्तत्वात् सर्पाक्ष्या रास्नायाश्च नामानि। 'सर्पाक्षिरास्नानु'॥ ११४॥

---

[1] हिङ्गुदीति मुद्रितग्रन्थे; वार्ताकुर्हिङ्गुलुरिति १०२ श्लोके. [2] धन्वन्तरीयनिघण्टुः (४. १०३–५) [3] भावप्रकाशे (Apte's Dict. p. 1341).

विदारिगन्धांशुमती सालपर्णी स्थिरा ध्रुवा ॥ ११५ ॥
तुण्डिकेरी समुद्रान्ता कार्पासी बदरेति च।
भारद्वाजी तु सा वन्या शृङ्गी तु वृषभो वृषः ॥ ११६ ॥

(वि.) विदारिगन्धेति—विदार्या इव गन्धोऽस्या इति विदारिगन्धा। [1]दीर्घा अंशवो मूलान्यस्याः सन्तीति अंशुमती। सालस्येव पर्णान्यस्याः सन्तीति सालपर्णी। [2]तिष्ठतीति स्थिरा। 'ष्ठा गतिनिवृत्तौ'। ध्रुवति स्थिरीभवतीति ध्रुवा। 'ध्रुव स्थैर्ये'। सालपर्णीनामानि। 'मुय्याकुपोन्नपेल्लु'॥ [3]तुण्डिकाद्वदनतो गवादीनीरयति प्रेरयतीति तुण्डिकेरी। 'ईर क्षेपे'। दूरप्रसरणात्[4] समुद्रान्ता। तन्त्वाद्यनेकलोकोपकाराय[5] कल्पत इति कार्पासी। 'कृपू सामर्थ्ये'। बदर्या इव फलान्यस्याः सन्तीति बदरा। कार्पासीनामानि। '[6]प्रत्तिचेट्टु'॥ भरद्वाजसृष्टत्वाद्[7] भारद्वाजी। वन्यकार्पासीनाम। [8]'अडविप्रत्ति'॥ वृषभशृंगाकारावयवयोगात् शृङ्गी। वृषभः। वृषश्च। ऋषभ इति वा पाठः। 'वृषभमहौषधमु'॥ ११५–१६॥

---

[1] दीर्घमूलरूपा अंशवः सन्त्यस्याः F_2, Pt_2. [2] दृढत्वात् स्थिरा D_2, K_5, K_6. [3] तुण्डिकान् वदनगतरोगान् B_1, F_2, Pt_2. [4] प्रसरात् Pt_2; प्रसारात् B_1, I, K_2. [5] जनोपकाराय F_2, Pt_2. [6] 'पत्ति' G_1, I; 'हत्ति' J_2. [7] भरद्वाजेन सृष्टा D_2, K_5, K_6. [8] 'मडदियहत्ति' J_2.

(पा.) विदारी—ध्रुवा। विदारीगन्धानामानि। 'मुय्याकुलपोन्न'। तुण्डिकेरी—बदरेति च। बदरं फलमस्यां बदरा। 'अर्शआदिभ्योऽच्' इति (५. २. १२७) सुभूतिटीकावचनाट्टाबन्तः। 'बदरं कोलकार्पास्योः फले स्याद्बदरी तयोः' इति विश्वप्रकाशवचनात् (पृ. १३४, श्लो. ११०) ङ्यन्तः। 'कार्पासो बदरः प्रोक्तः' इत्यमरमालावचनात् पुंलिङ्गोऽपि। कार्पासीनामानि। 'प्रत्तिचेट्टु'॥ भारद्वाजी—वन्या। वन्यकार्पासीनाम। 'अडविप्रत्तिचेट्टु'। वैद्यके—

'तुण्डिकेरी[1] समुद्रान्ता केसरा बदरा फला।
कार्पास्यक्ष्यत्र वन्यायां भारद्वाज्यपि कुष्ठनुत्॥'

इति। शृङ्गी—वृषः। वृषभाख्याया ओषधेर्नामनी। 'वृषभकमु'॥ ११५–१६॥

---

[1] 'तुण्डिकेर्यां रवा शीरा केसरा बदराफला' इति मुद्रितवैजयन्त्याम् (पृ. ५३, श्लो. ९९).

गाङ्गेरुकी नागबला झषा ह्रस्वगवेधुका।
धामार्गवो घोषकः स्यान्महाजाली स पीतकः॥ ११७॥

(वि.) गाङ्गेरुकीति—गङ्गाया[1] इदं [2]गाङ्गम्। जलमित्यर्थः। [3]तस्मिन्नीरयति प्रेरयतीति गाङ्गेरुकी। अथवा पवित्रत्वाद् गङ्गास्मरणफलमीरयतीति वा। 'ईर क्षेपे'। नागानां गजानां [4]बलकृत् नागबला। [5]झषति हिनस्ति रोगमिति झषा। 'झष हिंसायाम्'। ह्रस्वे स्वल्पे गवि जले एधत इति ह्रस्वगवेधुका। 'एध वृद्धौ'। नागबलानामानि। '[6]जिविलिकचेट्टु'॥ धाम कफस्थानं कण्ठादिकम् [7]अर्जयतीति धामार्गवः। 'अर्ज अर्जने'। शुष्कदशायां [8]घोषयति शब्दायत इति घोषकः। 'घुषिर् विशब्दने'। घोषवल्लीनामनी। 'तेल्लपूवुल गल आवड चेट्टुपेल्लु'॥ [9]महाजालं वितानमस्या अस्तीति महाजाली। पीतवर्णघोषवल्लीनाम। 'पच्चपूवुलयावडचेट्टुपेरु'॥ ११७॥

---

[1] गङ्गायां K_5, K_6. [2] गाङ्गेयं J_2. [3] गाङ्गमीरयति Pt_2. [4] बलं K_5, K_6. [5] तीक्ष्णगन्धेन हिनस्ति D_2, F_2, K_6. [6] 'नागबलदहेद्यरु' J_2. [7] अर्जति F_2; -मार्ष्टीति K_6; 'मृजूष् शुद्धौ' G, I. [8] घोषति J_2. [9] महत् जालं Pt_2.

(पा.) गाङ्गेरुकी—ह्रस्वगवेधुका। नागबलानामानि। वैद्यके—

'गाङ्गेरुकी नागबला [1]नीरबन्धनिका झषा।
विश्वदेवा तथारिष्टा [2]खञ्जा ह्रस्वगवेधुका॥'

इति । 'चिविविक' ॥ धामार्गवो—पीतकः । पीतकनामानि । 'आरवीर' । स इति सर्वनामनिर्देशः सांकर्यनिरासार्थः ॥ ११७ ॥

---

[1] खरगन्धिनिकेति धन्वन्तरीयनिघण्टौ (१. २८४).　　[2] खण्डा ibid.

ज्यौत्स्नी पटोलिका जाली नादेयी भूमिजम्बुका ।
स्याल्लाङ्गलिक्यग्निशिखा काकाङ्गी काकनासिका ॥ ११८ ॥

(वि.) ज्यौत्स्नीति—ज्योत्स्नेव रात्रौ [1]भासते ज्यौत्स्नी[2] । पटति विस्तीर्यत[3] इति पटोलिका[4] । पटं पटसदृशं पुष्पसमूहम् उलत्यावृणोतीति वा । 'उल आवरणे' । पुष्पे [5]जालसदृशत्वात् जाली । पटोलिकानामानि । 'पोट्लचेट्टुपेल्लु' ॥ नद्यां भवा नादेयी । भूमौ जम्बूः भूमिजम्बुका[6] । नादेयीनामनी ॥ [7]लाङ्गलवद् गर्भभेदकत्वात् [8]लाङ्गलिकी । अत एवाग्नेः शिखेव तिष्ठतीति अग्निशिखा[9] । लाङ्गलीनामनी । 'तरि[10] गोट्टु चेट्टु' ॥ काकाङ्गसदृशफलमस्या अस्तीति [11]काकाङ्गी । काकनासिकासदृशफलमस्या[12] अस्तीति काकनासिका । काकनासिकनामनी । 'काकिदोण्डचेट्टु' ॥ ११८ ॥

---

[1] अवभासते B_1, K_5.　[2] 'भासृ दीप्तौ' G, F_2.　[3] विस्तार्यते G, I, K_3, K_5.
[4] 'पट गतौ' F_2; 'पट विस्तारे' K_5, K_6.　[5] जालवत्त्वात् K_5, K_6.　[6] जायते, 'जनी प्रादुर्भावे' D_2, K_5, K_6.　[7] लाङ्गलीव F_2, Pt_2.　[8] लाङ्गली Pt_2.
[9] उष्णवीर्यत्वादग्निशिखा F_2, Pt_2.　[10] 'तरियोरी' J_2.　[11] काकस्येवाङ्गं फलमस्याः F_2, Pt_2.　[12] °नासा° K_5, K_6.

(पा.) ज्योत्स्नी—जाली । पटोलिकानामानि । 'चेन्तिपोळ्ळ' । अनुक्तम्—'वहुजाली कोकफला' । 'अडविबीर' ॥ नादेयी—जम्बुका । भूमिजम्बूनामनी । 'नेलनेरेडु' ॥ स्यात्—अग्निशिखा । लाङ्गलिकीनामनी । 'तरिगोर्' ॥ काकाङ्गी—नासिका । वैद्यके[1]—'काकतुण्डफला च सा । सुरङ्गी तस्करस्नायुर्ध्वाङ्क्षतुण्डफला मता' ॥ प्रतापे—

'काकजङ्घा नटी दासी काकसव्यपि लोमका ।
पारावतपदी स्यातां पुंसि काण्डप्रचीवरौ ॥'

इति ॥ 'वन्यबिम्बी तु काकाङ्गी' इति गौडः । वैजयन्त्याम् (पृ. ५४, श्लो. १११) 'दास्यां षडश्रा शार्ङ्गेष्ठा[2] काकजङ्घा विलोमिका' इति । वन्यबिम्बीनामानि । 'काकिदोंड' ॥ ११८ ॥

---

[1] धन्वन्तरीयनिघण्टुः (४. २५).　[2] शार्ङ्गिष्ठा B_3.

गोधापदी तु सुवहा मुसली तालमूलिका ।
अजश्रृङ्गी विषाणी स्याद् गोजिह्वादार्विके समे ॥ ११९ ॥

(वि.) गोधापदीति—गोधाया[1] इव पादा मूलानि यस्याः गोधापदी । सुष्ठु वहत्यामोदं[2] सुवहा । 'वह प्रापणे' । गोधापदीनामनी । 'चेप्पुतट्टचेट्टु'[3] ॥ मुस्यति त्रिदोषानिति[4] मुसली । 'मुस खण्डने' । तालस्येव मूलमस्या इति तालमूलिका । मुसलीनामनी । 'नेलताटिपेल्लु[5]' ॥ अजश्रृङ्गाभफलयोगाद् अजश्रृङ्गी । अत[6] एव विषाणी च । अजश्रृङ्गीनामनी । 'दुष्टुवुतींगेपेल्लु' ॥ गोजिह्वाभपत्रत्वाद् गोजिह्वा । दारयति रोगान् दार्विका । 'दॄ विदारणे' । गोजिह्वानामनी । '[7]एद्दुनालुकचेट्टु' ॥११९॥

[1] गोधा इव Pt_2. [2] आरोग्यं F_2, Pt_2; आमोहं K_3. [3] 'हंसपादिन्नि' D_2. [4] रोगान् F_2, Pt_2. [5] 'नेलशङ्गु' J_2. [6] तथैव K_5, K_6. [7] 'दर्विंकपूचेट्टु' D_2, K_5, K_6; 'यतुनालगेयगिड' J_2.

(पा.) गोधापदी—सुवहा । हंसपदीनामनी । 'चप्पुतट्ट' ॥ मुसली—मूलिका । भूतालिनामनी । 'अर्शोघ्न्यां मुसली ताली तालमूली फलिन्यपि' इति वैजयन्ती (पृ. ६१, श्लो. २०३) । 'नेलताडि' ॥ अजश्रृङ्गी—स्यात् । साहचर्यात् स्त्रीलिङ्गः । वैजयन्त्याम्[1]—'अजश्रृङ्गी मेषश्रृङ्गी सर्पदंष्ट्रा च वर्तिका' इत्येतत्पर्यायत्वेन मेषश्रृङ्गी प्रोक्ता । वैद्यके—'मेषश्रृङ्गीफलं स्वादु तिक्तमुष्णं प्रमेहनुत्' इति फलप्रतिपादनादिमौ शब्दौ फलवद्वृक्षविशेषनामनी । 'टोद्दिचेट्टु' । लताविशेषनामानीति केचित् । 'दुट्टुगु' । कर्कटकश्रृङ्गीनामनी इत्यन्ये । शेषे—'कुलुङ्गी कर्कटाह्वया' । 'कुलीरश्रृङ्गी श्रृङ्गी च' । कुलुङ्ग्यादयः कर्कटश्रृङ्गीनामानि । 'कर्काटकश्रृङ्गी' ॥ गोजिह्वा—समे । गोजिह्वानामनी । 'येद्दनालिकचेट्टु' ॥ ११९ ॥

[1] मुद्रितग्रन्थे न दृश्यते; धन्वन्तरीयनिघण्टुः (१. ८७).

ताम्बूलवल्ली ताम्बूली नागवल्ल्यप्यथ द्विजा ।
हरेणू रेणुका कौन्ती कपिला भस्मगन्धिनी ॥ १२० ॥

(वि.) ताम्बूलवल्लीति—[1]ताम्बूलार्थं वल्ली ताम्बूलवल्ली । [2]ताम्बूलसाधनत्वात् ताम्बूली । नागलोकादाहृता वल्ली नागवल्ली । नागस्यैरावणस्यालाने [3]जातत्वाद्वा । नागवल्लीनामानि । '[4]तमलपाकुतींगेपेल्लु' ॥ द्विर्जायते द्विजा[5] । द्विजसादृश्याद्वा ।

[6]तृष्णादिकं हरतीति हरेणुः । 'हृञ् हरणे'। रेणुयोगाद् रेणुका। कुन्त्यै दुर्वाससा [7]दत्ता कौन्ती। कपिलवर्णत्वात् कपिला। भस्मना रेणुना [8]गन्धयति वासयतीति भस्मगन्धिनी । 'गन्ध अर्दने'। [9]हरेणुनामानि । 'तक्कोलमु' ॥ १२० ॥

[1] ताम्बूलस्य K_5, K_6.　[2] ताम्यति विवशो भवति जनोऽनयेति Pt_2.　[3] नागालाने यतो जाता नागवल्ली भविष्यति इति स्कान्दवचनम् Pt_2.　[4] 'ताम्बूलदएलेबल्लि' J_2.　[5] राजपुत्रीत्वात् K_5, K_6.　[6] रोगान् F_2, Pt_2.　[7] दत्तत्वात् D_2, K_5, K_6.　[8] गन्धयते मदिराचूर्णं K_5, K_6.　[9] K_5 adds केचित् हरिणरेणुवर्णमित्येव वदन्ति.

(पा.) ताम्बूलवल्ली—नागवल्ल्यपि । ताम्बूलवल्लीनामानि । 'तमलपाकुतींग'। अथ द्विजा । हरेणू रेणुका । 'ढ्रलोपे . . .' (६. ३. १११) इति दीर्घः । कुन्ती । कौन्तीत्यन्ये । कपिला भस्मगन्धिनी । रेणुकाख्यगन्धद्रव्यविशेषनामानि । 'रेणुकमु'। शेषे—'पाण्डुपत्नी राजपुत्री भस्मगर्भा च नन्दिनी' ॥ १२० ॥

एलावालुकमैलेयं सुगन्धि हरिवालुकम् ।
वालुकं चाथ पालङ्क्या मुकुन्दः कुन्दकुन्दुरू ॥ १२१ ॥

(वि.) एलावालुकमिति—एलावत् प्रियगन्धेन [1]वनस्थलं वलते [2]संवृणोतीत्येलावालुकम् । 'वल संवरणे'। इलायां[3] भवम् ऐलेयम् । [4]शोभनो गन्धो यस्येति सुगन्धि । हरिः[5] पिङ्गलवर्णः, तेन वलत इति हरिवालुकम् । वलते भुवं संवृणोतीति वालुकम् । 'वल संवरणे संचलने च'। वालुकनामानि । 'कूंतुरुबुडमु'॥ वैद्यैः पाल्यत इति पालङ्क्या । 'पाल रक्षणे'। पालेन रक्षणेन अङ्क्यत इति वा । 'अकि लक्षणे'। [6]मुखेन कुन्द इव प्रतिभातीति मुकुन्दः । कुन्द इव [7]भातीति कुन्दः[8] । कुं भुवं द्यति मूलैरिति कुन्दुरुः । 'दो अवखण्डने'। कुन्दनामानि । 'कुन्दुरुष्कमु[9]' ॥ १२१ ॥

[1] वनस्थानं J_2.　[2] आवृणोति J_2.　[3] J_2 adds भुवि.　[4] सुगन्धयोगात् सुगन्धि K_5, K_6.　[5] हरि कपिलवर्णं वालुकं Pt_2.　[6] मुखात् Pt_2.　[7] प्रतिभाति K_3, Pt_2.　[8] J_2 adds 'भा दीप्तौ'.　[9] 'कुन्दरवृक्ष' J_2.

(पा.) एलावालुकम्—वालुकं च । एलावालुकनामानि । 'कून्तुरुबुडमु' ॥ अथ पालङ्क्या—कुन्दकुन्दुरू । कुन्दुरुनामानि । 'कुन्दुरुलु' ॥ १२१ ॥

बालं ह्रीवेरबर्हिष्ठोदीच्यं केशाम्बुनाम च ।
कालानुसार्यवृद्धाश्मपुष्पशीतशिवानि तु ॥ १२२ ॥

शैलेयं तालपर्णी तु दैत्या गन्धकुटी मुरा।
गन्धिनी गजभक्ष्या तु सुवहा सुरभी रसा ॥ १२३ ॥
महेरणा कुन्दुरुकी सल्लकी ह्लादिनीति च।

(वि.) बालमिति—वलते भुवं मूलबाहुल्यात् बालम्। 'वल संवरणे संचलने च'। निगूढत्वेन ह्रीयुक्तमिव वेरमस्येति ह्रीवेरम्[1]। बर्हति वर्धत[2] इति बर्हिष्ठम्। 'बृह [3]वृद्धौ'। उदग्देशे भवमुदीच्यम्[4]। केशानामम्बुनां च नामान्यस्य सन्तीति केशाम्बुनाम। ह्रीबेरनामानि। '[5]कुरुवेरुपेल्लु'॥ शीतोष्णाभ्यां[6] कालोऽनुसर्यतेऽनेनेति कालानुसार्यम्। [7]चिरस्थितत्वात् वृद्धम्। अश्मनः पुष्पमिव अश्मपुष्पम्। शीतवीर्येण शिवं शीतशिवम्। शिलायां भवं पुष्पं शैलेयम्। शैलेयनामानि। '[8]रातिपुव्वुपेल्लु'॥ तालस्येव पर्णान्यस्या इति तालपर्णी। [9]मुराख्यदैत्यनामास्या अस्तीति दैत्या। [10]गन्धस्य कुटी गृहं गन्धकुटी। मुरतीति मुरा। 'मुर वेष्टने'। मुराख्यदैत्यनामयोगाद्वा। प्रशस्तो गन्धोऽस्या अस्तीति गन्धिनी। गन्धकुटीनामानि। 'मुरयनुगन्धद्रव्यमुपेल्लु'॥ गजैर्भक्ष्यत इति [11]गजभक्ष्या। 'भक्ष अदने'। सुष्ठु वहत्यामोदं सुवहा। 'वह प्रापणे'। घ्राणतर्पणगन्धत्वात् सुरभिः। बहुरसयोगाद् रस्यत इति रसा। महदीरणं प्रेरणं गजानां भक्षणेऽस्या इति महेरणा। 'ईर प्रेरणे'। कुं भुवं द्यति मूलैरिति कुन्दुरुकी। 'दो अवखण्डने'। सत्कृत्य लक्यते आस्वाद्यते गजैरिति सल्लकी। 'लक आस्वादने'। ह्लादोऽस्या अस्तीति ह्लादिनी। ह्लादिनीति वा पाठः। सल्लकीनामानि। 'अन्दुगुचेट्टुपेल्लु'॥ १२२–३ ॥

[1] जिह्रेति वर्तत इति। 'ह्री लज्जायाम्'। धातूनामनेकार्थत्वाद् वर्तमानार्थोऽवगन्तव्यः K_5, K_6. [2] वर्धयति J_2. [3] 'बृह बृंहि वृद्धौ' D_2, K_5, K_6. [4] उदीच्यानामतिशयेन भवति F_2, K_5. [5] 'मुरिवाल' J_2. [6] हिमत्वात् हेमन्तकालमनुसरति K_5, K_6. [7] स्थायित्वात् Pt_2. [8] 'कल्लपूवु' J_2. [9] मुरदैत्यनामयोगात् F_2, Pt_2. [10] गन्धाश्रयत्वात् K_5, K_6. [11] गजभक्षा K_5, K_6.

(पा.) वालं—केशाम्बुनाम च। ह्रीबेरनामानि। 'कुरुवेलु'॥ कालानुसार्य—शैलेयम्। शैलेयनामानि। 'रापुव्वु'। दैत्या—गन्धिनी। मुरानामानि। 'मुर अने गन्धद्रव्यमु'॥ गजभक्ष्या—सुरभी रसा। 'ढ्रलोपे . . .' (६. ३. १११) इति दीर्घः! महेरणा—[1]ह्लादिनीति च। सल्लकीनामानि। 'अंदुगचेट्टु'। तस्य निर्यासो गन्धद्रव्यम् ॥ १२२–३ ॥

[1] B_3 adds ह्लादिनीति वा पाठः.

अग्निज्वालासुभिक्षे तु धातकी धातुपुष्पिका ॥ १२४ ॥
पृथ्वीका चन्द्रबालैला निष्कुटी बहुलाथ सा ।
सूक्ष्मोपकुञ्चिका तुत्था कोरङ्गी त्रिपुटा त्रुटिः ॥ १२५ ॥

(वि.) अग्निज्वालेति—अग्निज्वालाभपुष्पयोगाद्[1] अग्निज्वाला । शोभना भिक्षा प्रार्थनास्यामिति [2]सुभिक्षा । 'भिक्ष याच्ञायाम्' । दधाति पुष्पाणीति धातकी । 'डुधाञ् धारणपोषणयोः' । धातुवद् [3]रक्तपुष्पयोगाद् धातुपुष्पिका । धातकीनामानि । 'धातकीकुसुममु' ॥ बहुफलयोगात् पृथ्वीका । चन्द्रस्य कर्पूरस्य बाला पुत्रिकेव स्थिता चन्द्रबाला । एलयति नाशयति मुखदौर्गन्ध्यमिति एला । 'इल स्वप्नक्षेपणयोः[4]' । निष्क्रान्ता कुटेः कोशादिति [5]निष्कुटी । बहूनि फलानि लातीति बहुला । 'ला दाने' । एलानामानि । 'पेद्दयेलकुलपेल्लु' ॥ उपकुञ्चति स्वल्पीभवतीति उपकुञ्चिका । 'कुञ्च [6]कौटिल्याल्पीभावयोः' । अत एव तुच्छत्वात् तुच्छेति वा पाठः । तुदति तापं तुत्था । 'तुद व्यथने' । कुरति शब्दायत इति कोरङ्गी । 'कुर [7]शब्दे' । पुटत्रयशालिनीत्वात्[8] त्रिपुटा[9] । सूक्ष्मत्वात् त्रुट्यतीति त्रुटिः । 'त्रुट भेदने' । सूक्ष्मैलानामानि । 'सन्नयेलकुलपेल्लु[10]' ॥ १२४–५ ॥

[1] पुष्पत्वात् F_2, J_2, Pt_2.　[2] सुलभत्वात् K_5, K_6.　[3] रक्तानि पुष्पाण्यस्याः F_2, Pt_2.　[4] 'इल स्वप्नप्रेरणयोः' K_5, Pt_2.　[5] निष्कुटिः F_2, Pt_2.　[6] K_5, K_6, Pt_2 add गति°.　[7] 'कुर कूर शब्दे' K_5, K_6.　[8] °शालित्वात् K_3, K_5.　[9] त्रिपुटाकारत्वात् F_2, Pt_2.　[10] 'चिक्कयेलक्कि' J_2.

(पा.) अग्निज्वाला—धातुपुष्पिका । धातकीनामानि । 'येरुजाजि' । पुष्पगन्धद्रव्यम् ॥ पृथ्वीका—बहुला । वैद्यके[1]—

'भद्रैला बृहदेला च त्रिदिवा[2] त्रिदिवोद्भवा[3] ।
स्थूलैला त्वक्सुगन्धा च पृथ्वीका कन्यका पुटा ॥'

इति स्थूलैलानामानि । 'पेद्दयालकुलु' ॥ अथ सा—त्रुटिः । वैद्यके—

'सूक्ष्मैला द्राविडी [4]तुत्था कोरङ्गी बहुला त्रुटिः ।
एला कपोतवर्णा च चन्द्रबाला[5] च निष्कुटी[6] ॥'

इति । सूक्ष्मैलानामानि । 'सन्नपुयालकुलु' ॥ १२४–५ ॥

[1] ध. नि. २. ४६.　[2] त्रिपुटा B_3.　[3] त्रिपुटोद्भवेति मुद्रितनिघण्टौ-　[4] तुच्छा B_3.　[5] °माला B_3.　[6] ध. नि. २. ४४.

व्याधिः कुष्ठं पारिभाव्यं वाप्यं पाकलमुत्पलम् ।
शङ्खिनी चोरपुष्पी स्यात् केशिन्यथ वितुन्नकः ॥ १२६ ॥
झटामलाज्झटा ताली शिवा तामलकीति च ।

(वि.) व्याधिरिति—[1]कुष्ठव्याधिनामान्यस्य [2]सन्तीति व्याधिः । कौ[3] तिष्ठतीति कुष्ठम् । 'ष्ठा गतिनिवृत्तौ' । कुष्ठनामधेययोगाद्वा । पारिषु जलेषु भवतीति पारिभाव्यम् । वारिभाव्यमिति[4] वा पाठः । अत एव वाप्यां भवं वाप्यम् । व्याप्यमिति वा पाठः । त्रिदोषपरिपाकं लाति ददातीति पाकलम् । उत्पलाभपुष्पत्वाद् उत्पलम् । कुष्ठनामानि । 'चेंगल्वकोष्ट्रपेल्लु' ॥ [5]शङ्खाभपुष्पयोगात् शङ्खिनी । रात्रावेव पुष्प्यतीति[6] चारपुष्पी । [7]केशप्ररोहत्वात् केशाः सन्त्यस्येति केशिनी । शङ्खिनीनामानि । 'कडिलट्टुपेल्लु' ॥ वितुद्यते पित्तं[8] श्लेष्म चानेनेति वितुन्नकः । 'तुद व्यथने' । झटः फलसंघातोऽस्या अस्तीति झटा । [9]विशदफलयोगाद् अमला । आश्चर्यकारी झटः फलसंघातोऽस्या अज्झटा[10] । अदिति आश्चर्ये वर्तते । मालाभानि फलान्यस्या अन्योन्यं ताडयन्तीति [11]ताली । ताडीति वा पाठः । 'तड आघाते' । आरोग्यरूपमङ्गलहेतुत्वात् [12]शिवा । तम्यते काङ्क्ष्यत इति तामलकी । 'तमु काङ्क्षायाम्' । तालीनामानि । 'नेलयुसिरिकपेल्लु' ॥ १२६ ॥

---

[1] व्याधेः K_5, K_6.
[2] संप्रयोगात् J_2.
[3] K_5 adds भूमौ.
[4] वारिषु जलाधारेषु K_6.
[5] शङ्खवत् पाण्डुरत्वात् K_5, K_6.
[6] D_2, K_5 add विकसति ; K_6 adds 'पुष्प विकसने'.
[7] केशाकारावयवत्वात् D_2, G.
[8] पित्तश्लेष्मादिकं F_2, Pt_2.
[9] रोगहरत्वात् F_2, Pt_2.
[10] आज्झटा, आ इत्याश्चर्ये वर्तते K_6.
[11] ताडयति रोगानिति Pt_2.
[12] विशदफलयोगात् D_2, K_5, K_6.

(पा.) व्याधिः । व्याधेर्नामान्यपि । 'पारिभाव्यं गदाह्वयम्' इति रभसकोशः । कुष्ठनामानि । 'कोष्टवु' ॥ शङ्खिनी—केशिनी । शेषे—'ग्रन्थिका च निशाचरी चोरी धनहरी चण्डा' । शङ्खिनीनामानि । 'कट्लुतींगपद्मपुतींगानु' ॥ अथ वितुन्नकः—तामलकीति च । शेषे—'आमलक्युत्तमा चैव तमाला च तमालिनी'[1] । भूम्यामलकीनामानि । 'नल उशिरिक' ॥ १२६ ॥

---

[1] 'तामलक्यजटा ताली तमालं तु तमालिनी ।
वितुन्नभूता तमकं भूधात्री भ्वामलक्यपि' ॥ ध. नि. ३. ८४.

प्रपौण्डरीकं पौण्डर्यमथ तुन्नः कुबेरकः ॥ १२७ ॥
कुणिः कच्छः कान्तलको नन्दिवृक्षोऽथ राक्षसी ।
चण्डा धनहरी क्षेमदुष्पत्रगणहासकाः ॥ १२८ ॥

(वि.) प्रपौण्डरीकमिति—पुण्डरीकस्येदं [1]पौण्डरीकम्। प्रकृष्टं पौण्डरीकं प्रपौण्डरीकम्। [2]पौण्डर्यमिति [3]देशीयपदम्। पौण्डर्यनामनी। 'पुण्डरीकमनु गन्धद्रव्यमु[4]'॥ तुद्यते हस्तादिभिरिति तुन्नः। 'तुद व्यथने'। कुत्सितं [5]बेरमस्यास्तीति कुबेरकः। शाखाभङ्गात् कौतीति कुणिः[6]। 'कु शब्दे'। कष्यते गजैरिति कच्छः। 'कष हिंसायाम्'। कस्य [7]जलस्यान्तं समीपं गच्छन्तीति कान्ता गजाः, तैर्लक्यत इति कान्तलकः। 'लक आस्वादने'। नन्दिसंज्ञको वृक्षो नन्दिवृक्षः। नन्दिवृक्षनामानि। 'नन्दिवृक्षमु[8]'॥ वनचरा गन्धाढ्यां मूर्तिं रक्षन्तीति राक्षसी[9]। 'रक्ष पालने'। तीक्ष्णत्वात् चण्डा। राक्षसीनामसाम्यात् चण्डत इति वा। 'चडि कोपे'। बहुमूल्यत्वाद्[10] धनं हरतीति धनहरी। 'हृञ् हरणे'। दीपनत्वेन क्षेमकरत्वात् क्षेमः। क्षियति वसति गन्धोऽस्मिन्निति वा। 'क्षि निवासगत्योः'। [11]दुष्टानि पत्राण्यस्य[12] दुष्पत्रः। दुष्पुत्र इति वा पाठः। सौरभ्यातिशयेन सर्वजनमुखविकासकरत्वाद् गणहासकः[13]। 'हसे हसने'। हासो विकासः। धनहरीनामानि। 'नल्लकचोरमुपेल्लु'॥ १२७–८ ॥

(पा.) प्रपौण्डरीकं पौण्डर्यम्। द्रव्यावल्याम्—

'[1]प्रपौण्डरीकं चक्षुष्यं पुण्डर्यं पुण्डरीयकम्।
पुण्डरीकं श्वेतपुष्पं सुपुष्पं साधुमूलकम्।
मूलसाधनसंज्ञं च श्रीपुष्पं पुण्ड्रकाह्वयम्॥'

इति॥ 'पौण्डर्यकं सालपुष्पं दृष्टिकृत् पुण्डरीयकम्' इति रभसकोशः। पुण्डरीकाख्यगन्धद्रव्यनामानि। 'पुण्डरीकमन्नगन्धद्रव्यमु। अदे सालपुष्पमुन्नु'॥ अथ तुन्नः—

---

[1] पुण्डरीकस्यैव रूपान्तरं K_5; प्रकर्षेण पुण्डरीकस्येदं F_2, Pt_2.
[2] Pt_2 adds अस्यैकदेशानुसारात्.
[3] देशीयं I, K_3.
[4] 'पुण्डरीकवेम्त्र औषध' J_2.
[5] K_5, K_6 add शरीरम्.
[6] कुत्सितशाखात्वात् G, K_5.
[7] उदकस्य G, K_2.
[8] 'नन्दिअनेडि वृक्षमु' K_6; 'नन्दियेम्ब वृक्ष' J_2.
[9] रक्ष्यतेऽस्याः F_2, Pt_2.
[10] मूल्यत्वेन F_2, Pt_2.
[11] दुष्टाः पुत्राः पत्राण्यस्य दुष्पुत्रः K_5, K_6.
[12] पुष्पाणि K_3.
[13] गणं हासयतीति F_2, Pt_2.

नन्दिवृक्षः । नन्दिवृक्षनामानि । ‘नन्दिवृक्षमु’ ॥ अथ राक्षसी—गणहासकाः । शेषे—‘चोरकः शङ्कितस्तेनः कुहनः कितवो रिपुः’। चोराख्यगन्धद्रव्यनामानि । ‘नल्लकचोरम्’। हस्तिकर्णीनामानि च । ‘बलुरक्किस’ ॥ १२७–८ ॥

---

[1] प्रपौण्डरीकं—पुण्डरीयकम् ध. नि. ३. ९२.

व्यालायुधं व्याघ्रनखं करञ्जं चक्रकारकम् ।
सुषिरा विद्रुमलता कपोताङ्घ्रिर्नटी नली ॥ १२९ ॥
धमन्यञ्जनकेशी च हनुर्हट्टविलासिनी ।

(वि.) व्यालायुधमिति—[1]व्यालस्य व्याघ्रस्यायुधं नखमिव तिष्ठतीति व्यालायुधम् । व्याघ्रनखं च । कमुदकं रञ्जयतीति करञ्जम् । ‘रञ्ज रागे’। करजमिति वा पाठः । [2]धूपसमूहेन चक्रं मेलनं करोतीति चक्रकारकम् । ‘डुकृञ् करणे’। व्याघ्रनखनामानि । ‘पुलिगोरुचेट्टु’ ॥ [3]सुषिरं रन्ध्रमस्या अस्तीति सुषिरा । विद्रुमलताभत्वात्[4] विद्रुमलता । कपोताङ्घ्रिसदृशमूलत्वात् कपोताङ्घ्रिः । वायुवशान्नटति चलतीति नटी । ‘नट[5] नृत्तौ’। नल्यते नली । ‘णल [6]गन्धने’। सुषिरवत्त्वाद्[7] धम्यत इति धमनी । ‘ध्मा[8] शब्दाग्निसंयोगयोः’। अञ्जनसदृशाः केशाः सूक्ष्ममूलान्यस्या इत्यञ्जनकेशी[9]। धमनीनामानि । ‘नलियनुगन्धद्रव्यमु’॥ हन्त्यामयमिति[10] हनुः । ‘हन हिंसागत्योः’। [11]हट्टवीथ्यां विलसतीति हट्टविलासिनी । ‘लस श्लेषणक्रीडनयोः’ ॥ १२९ ॥

---

[1] K_5 omits 7 lines. [2] चक्रं धूपद्रव्यमेलनं Pt_2. [3] सुषिः F_2, Pt_2. [4] विद्रुमवत् रक्तत्वात् Pt_2. [5] ‘नट स्पन्दने’ Pt_2. [6] बन्धने च J_2. [7] सुषिरत्वधर्मात् K_5, K_6; धर्मयोगात् J_2. [8] ‘ध्मा पूरणे’ K_2, K_3, K_5. [9] अञ्जनाभसूक्ष्मबहुमूलत्वात् D_2, K_3, K_6. [10] भूतान् K_5, K_6; भूतानि I, K_3. [11] हट्टे पण्ये D_2, K_5, K_6.

(पा.) व्यालायुधं—चक्रकारकम् । शेषे—‘त्र्यक्ष व्याघ्रतलं पादं कूटस्थं पुण्ड्रकं नखम्’। व्याघ्रनखाख्यवृक्षनामानि । ‘व्याघ्रनखवृक्षमु’॥ नखनामकगन्धद्रव्यनामानीति केचित् ॥ सुषिरा—नली । नलीनामवृक्षनामानि । ‘नलीवृक्षमु’। ‘सुषिरा धमनी शून्या निर्मथ्या नर्तकीति[1] च’ इति धन्वन्तरिः (ध. नि. ३. ४३)। गन्धद्रव्यविशेषस्य कपोताङ्घ्रिनामौषधिविशेषस्य च नामानीति केचित् । ‘नली अनि गन्धद्रव्यमुन्नु गुव्वकुत्तुकानु’॥ धमनी—हट्टविलासिनी ॥ १२९ ॥

---

[1] नटीति मुद्रितग्रन्थे (ध. नि. ३. ४३).

शुक्तिः शङ्खः खुरः कोलदलं नखमथाढकी ॥ १३० ॥
काक्षी मृत्स्ना तुवरिका मृतालकसुराष्ट्रजे ।

(वि.) शुक्तिरिति—शुक्त्याकृतित्वात्[1] शुक्तिः । [2]शङ्खसाम्यात् शङ्खः । खुरति [3]भूतान् हन्तीति खुरः । 'खुर विलेखने'। कोली बदरी तत्पत्रयोगात् [4]कोलः । कुल्यत इति कोलः। 'कुल संस्त्याने'। दलति भूतानीति दलम् । 'दल विशरणे'। कोलस्येव दलं कोलदलम् । नखति कुष्ठादिरोगान्[5] गृहीत्वा गच्छतीति नखम् । 'नख गतौ'। नखगन्धद्रव्यनामानि । 'नखमनेडिगन्धद्रव्यमु'॥ [6]आढक्याख्यधान्यतुल्यरसत्वाद् आढकी । कषति हिंसति कण्ड्वादिरोगानिति [7]काक्षी । 'कष हिंसायाम्'। प्रशस्ता मृत् मृत्स्ना । तुवरः कषायो [8]रसोऽस्यास्तुवरिका । म्रियते [9]विलीयते ।[10]सुवर्णमनेनेति मृतालकम् । 'मृङ् प्राणत्यागे'। मृत्तालकमिति वा पाठः । मृत्, तालकमिति पदद्वयमिति केचित् । मृद्यते मृत् । 'मृद क्षोदे'। तलन्ति प्रतिष्ठन्तेऽनेनेति तालकम् । सुराष्ट्रदेशे भवं[11] सुराष्ट्रजम् । तुवरिकानामानि । 'तोवरिमन्नु'॥ १३० ॥

[1] आकारत्वात् F_2, Pt_2.　[2] शङ्खाकृतित्वात् D_2, K_5.　[3] भूतानि B_1, I, K_2.　[4] कोली K_5, K_6.　[5] कुष्ठादीन् F_2, Pt_2.　[6] तुवरीवाचकत्वात् F_2, Pt_2.　[7] काङ्क्षी K_5, K_6.　[8] तद्योगात् Pt_2.　[9] निलीयते Pt_2.　[10] हिरण्यम् J_2, K_5.　[11] भवत्वात् K_5.

(पा.) शुक्तिः—नखम् । शेषे—

'नागहनुः सहः ।
चलः कोशी च केशी च शिल्पी कररुहस्तथा ।
सामुद्रो हस्तिकर्णश्च नखी ॥'

नखाख्यवृक्षनामानि । 'नखवृक्षमु'॥ 'धमन्यञ्जनकेश्यौ तु हनुर्हट्टविलासिनी' इति वैजयन्ती (पृ. १३१, श्लो. १०१) । अथाढकी—सुराष्ट्रजे । आढकीनामानि । 'कंदिचेट्टु'।

'तालकं . . . मृन्मृत्स्ना मृत्तिकाजिता ।
सौराष्ट्री तुवरी काक्षी[1] काची तालमृतालके ॥'

इतीन्दुः । सुराष्ट्रमृत्तिकानामानीति केचित् । 'तोगरिमन्नु'। 'अडवितोगरितींगेनु । सुरुगुडु'॥ १३० ॥

---

[1] 'काक्षी कामी सुराष्ट्रजा' (ध. नि. ३. १०५).

कुटन्नटं दाशपुरं वानेयं परिपेलवम् ॥ १३१ ॥
प्लवगोपुरगोनर्दकैवर्तीमुस्तकानि च ।
ग्रन्थिपर्णं शुकं बर्हपुष्पं स्थौणेयकुक्कुरे ॥ १३२ ॥

(वि.) कुटन्नटमिति—[1]कुटन् वक्रीभवन्नटतीति कुटन्नटम् । 'नट [2]नृत्तौ' । दशपुराख्यदेशे भवं दाशपुरम् । वनं जलमत्रास्तीति वानम् । वाने जलाशये भवं वानेयम्[3] । कोमलत्वात्[4] परितः पेलवं परिपेलवम् । [5]लघुतया प्लवत इति प्लवम् । 'प्लुङ् गतौ[6]' । अभक्ष्यतया गवां [7]पुरति अग्रे तिष्ठति[8] गोपुरम्[9] । 'पुर अग्रगमने' । [10]अरुचित्वेन गा नर्दयति क्रोशयतीति [11]गोनर्दम् । 'नर्द शब्दे' । केवर्तानां मत्स्यानां [12]भक्षणमिति कैवर्ती । मुस्यते वराहैरिति [13]मुस्तकम् । 'मुस खण्डने' । कैवर्तमुस्तकं तदिति वा पाठः । तथाष्टमं नाम त्रिलिङ्गम् । एवं भिन्नलिङ्गानां द्वन्द्वः कृत इति नावगन्तव्यम् । कैवर्तीमुस्तकनामानि । 'तुङ्गमुस्तलुपेल्लु' ॥ ग्रन्थिषु पर्णान्यस्मिन् सन्तीति [14]ग्रन्थिपर्णम् । शुकवत् पत्राण्यस्य शुकम् । बर्हतुल्यपुष्पत्वात् बर्हपुष्पम् । केचित्तु शुकबर्हमिति पठन्ति । तदा शुकस्य बर्हाणीव पत्राण्यस्येति विग्रहः । पुष्यतीति पुष्पं च । 'पुष्प विकसने' । [15]स्थूणाकृतित्वात् स्थौणेयम् । [16]शुनकाकारत्वात् कुक्कुरम् । ग्रन्थिपर्णनामानि ॥ '[17]स्थौणेयमनेडि गन्धद्रव्यमु' ॥ १३१–२ ॥

(पा.) कुटन्नटं—कैवर्तीमुस्तकानि च । कैवर्तीमुस्तकमित्येकपदम् ।

> 'जायते मुस्तकाकारः शैवालदलसंचयः ।
> कैवर्तीमुस्तकं नाम गन्धद्रव्यं तदुच्यते ॥'

इति ॥ 'कैवर्तीमुस्तके क्लीबं शोनके नाकुटं नटः' इति च । कैंवर्ती पृथक्पदमिति केचित् । रूपभेदात् स्त्रीलिङ्गम् । नपुंसकमपि । 'कैवर्त मुस्तकं तच्च तथा च करिवल्लभम्' इति तन्त्रान्तरोक्तत्वादित्याहुः । शेषे—

> 'प्लवनं कर्तनं मुस्ता सुगन्धिः कर्णपूरकः ।
> शकुलादश्वेतमध्यो नादेयपिठरावपि ॥'

---

[1] कुटति J_2.
[2] 'नट स्पन्दने' F_2, Pt_2.
[3] वने जले जातं Pt_2.
[4] अतिकोमलत्वात् B_1, J_2, K_5.
[5] लघुत्वात् F_2, Pt_2.
[6] जलोपरिसर्पणे च J_2.
[7] पुरतः J_2.
[8] सरतीति K_3.
[9] गौर्जलं पुरं संस्थानमस्येति Pt_2.
[10] रुचिकरत्वेन Pt_2.
[11] गोनर्दः D_2, K_2, K_3; गोनर्दी K_6.
[12] अदनं F_2, Pt_2.
[13] वातकफौ मुस्यतीति I, K_5, K_6.
[14] ग्रन्थिप्रधानानि पर्णानि D_2, I, K_6.
[15] स्थूणस्येव रूपं Pt_2.
[16] श्वाकृतित्वात् K_5, K_6.
[17] 'स्थौणेयवेंब्र गन्धद्रव्य' J_2.

इति । तथा च वैजयन्त्याम्—

‘जलमुस्ते तु प्लवनं [1]गोनर्दं परिपेलवम् ।
कुटन्नटं दशपुरं गोपुरं [2]वर्तकं प्लवम् ॥’ (पृ. ६१, श्लो. २०१)

इति । जलमुस्तानामानि । ‘कैवडिमुस्तलु ॥’ ग्रन्थिपर्णं—कुक्कुरे । शेषे—

‘बर्हपुष्पं बर्हिचूडं शुकपुष्पं शुकच्छदम् ।
विकचं शुकबर्हं च हरितं शीर्णलोमकम् ॥’

इति । ग्रन्थिपर्णनामानि । ‘गंदिवनमुपच्चाकुन्नुमाचिपत्रिन्नि’ ॥ १३१-२ ॥

---

[1] गोदर्भमिति मुद्रितग्रन्थे. [2] कर्तनं B_3.

मरुन्माला तु पिशुना स्पृक्का देवी लता लघुः ।
समुद्रान्ता वधूः कोटिवर्षा लङ्कोपिकेत्यपि ॥ १३३ ॥

(वि.) मरुन्मालेति—मरुतः माला अस्या इति [1]मरुन्माला । पदद्वयं वा । मरुता तुल्यत्वात् मरुत् । मालाकारत्वात् माला । गन्धं पिंशति सूचयतीति पिशुना[2] । ‘पिश अवयवे’ । स्पृशति दूरस्थं गन्धेनेति स्पृक्का[3] । ‘स्पृश संस्पर्शने’ । [4]देवपुत्रीसंज्ञकत्वाद् देवी । लतारूपत्वात् लता । लघुत्वात् [5]लघुः । [6]दूरप्रसरणात् समुद्रान्ता । उह्यते परिमलेन[7] वधूः । ‘वह प्रापणे’ । कोटिभिरग्राभिर्मधु[8] वर्षतीति कोटिवर्षा । ‘वृष सेचने’ । लङ्कायामुप्यते[9] लङ्कोपिका[10] । ‘डुवप् बीजसन्ताने’ । लङ्कोपिकानामानि । ‘स्पृक्कयनुगन्धद्रव्यमुपेल्लु’ ॥ १३३ ॥

---

[1] मरुच्चासौ माला च K_6; अत्र तुशब्दः पादपूरणार्थः K_6. [2] गन्धसूचकत्वात् F_2, Pt_2. [3] स्पृश्यते स्पृक्का D_2, K_6. [4] K_5, K_6 omit संज्ञक. [5] J_2 adds ‘लघि गतौ’; ‘अघि लघि गत्याक्षेपे’ K_5, K_6. [6] प्रसारणत्वात् J_2; प्रसरत्वात् Pt_2. [7] आशावधूत्वात् B_1, K_5, K_6; °वहत्वात् J_2. [8] नेमिभिः स्वरसं F_2, Pt_2. [9] I adds वितन्यते. [10] लङ्कोयिकेति वा पाठः, तदा लङ्कायामूय(य्य ?)ते तन्यते; ‘ऊयी तन्तुसन्ताने’ K_5, K_6.

(पा.) मरुन्माला—लङ्कोपिकेत्यपि । शेषे—‘स्पृङ्गनिर्माल्या पङ्कमुष्टिर्माला च ब्राह्मणी मरुत्’ । तथा च वैद्यके—

‘स्पृङ्गनीरुता पङ्कमुष्टिर्माला देवी लता गुरुः ।
देवपुत्री देवजाता सिता पङ्कजमुष्टिका ॥

सुन्दरी च मरुत्कोटिवर्षा निर्मालिका वधूः ।
लङ्कोपिका ब्राह्मणी च निर्माल्या पिशुना तथा ॥'

इति । स्पृक्कानामानि । 'पिक्कचेट्टु' ॥ १३३ ॥

तपस्विनी जटा मांसी जटिला लोमशा मिसी ।
त्वक्पत्रमुत्कटं भृङ्गं त्वचं चोदं वराङ्गकम् ॥ १३४ ॥

(वि.) तपस्विनीति—जटायोगसाम्यात् तपस्विनी । जटाः सन्त्यस्या इति जटा । जटिला च । मांससदृशावयवत्वात्[1] मांसी । जटामांसीति वा पाठः । लोमानीव जटा अस्याः सन्तीति [2]लोमशा । मस्यतीति मिसी[3] । 'मसी परिणामे' । जटामांसीनामानि । 'जटामांसिअनेडि [4]गन्धद्रव्यमु' ॥ त्वग्भूयस्त्वात् त्वक् । त्वचं च । पत्रमिश्रितत्वात् पत्रम् । अतितीक्ष्णत्वाद् उत्कटम् । भृङ्गकार्ष्ण्यसाम्याद् भृङ्गम् । अग्निं चोदयतीति चोदम् । 'चुद प्रेरणे' । चोचमिति वा पाठः । वरं [5]श्रेष्ठमङ्गमस्येति वराङ्गकम् । वराङ्गकनामानि । '[6]लवङ्गपुचेट्टु' ॥ १३४ ॥

---

[1] अवयवयोगात् K_5, K_6; साम्यावयवत्वात् F_2, Pt_2. [2] लोमयोगात् F_2, Pt_2. [3] आमिषीति वा पाठः K_5, K_6. [4] 'जटामांसिवेम्ब्रगन्धद्रव्य' J_2. [5] J_2, K_3 add त्वक्प्रचुरं. [6] 'लवङ्गदहेसरु' J_2.

(पा.) तपस्विनी—मिसी । 'स्यान्मांस्यां शतपुष्पायां मधुरायां मिसी स्त्रियाम्' इति रभसकोशपाठात् मिसी । 'जटिला लोमशी मांसी तपस्विन्यामिषी मिषी[1]' इति वैजयन्तीपाठात् (पृ. १३१, श्लो. १००) मिषी । शेषे—

'स्त्रियां तपस्विपिशितपिशाचाम्बार्थवाचकाः ।
तथा भूतजटा कृष्णजटा हिंस्रा च पूतना ॥'

स्त्रियां वर्तमानास्तपस्व्यादिपर्याया जटामांसीनामानि भवन्ति । यथा तपस्विनी तापसी पिशिती मांसी पिशाची क्रव्यादी अम्बा माता जननीत्यादयः । जटामांसीनामानि । 'जटामांसि' ॥ त्वक्पत्रं—वराङ्गकम् । त्वक्पत्रमेकपदमिति केचित् । 'मुखरोदं प्रियं वर्णं वल्कं सुरभिवल्कलम्' इति वैद्यके । लवङ्गद्रुमत्वचो नामानि । 'लवङ्गपुचेक्क' ॥ १३४ ॥

---

[1] 'जटा' इति मुद्रितग्रन्थे.

कर्चूरको द्राविडकः काल्यको वेधमुख्यकः ।
ओषध्यो जातिमात्रे स्युरजातौ सर्वमौषधम् ॥ १३५ ॥

(वि.) कर्चूरक इति—[1]कर्जति रोगानिति कर्चूरकः । 'कर्ज व्यथने' । द्रावयति रोगानिति द्राविडकः । 'द्रु गतिहिंसाकौटिल्येषु' । कल्यं निरामयं करोतीति काल्यकः । प्लीहादिरोगवेधे[2] मुख्यत्वात् वेधमुख्यकः । 'व्यध ताडने' । कर्चूरकनामानि । 'गन्धकचोरमु' ॥ जातिमात्रे[3] फलपाकादिव्यक्तिमात्रे वर्तमान ओषधिशब्दः इकारान्त ईकारान्तो वा स्त्रीलिङ्गो भवति । अजातौ फलपाकादिव्यक्तेरन्यत्र वर्तमान ओषधिशब्दः औषधमित्यकारान्तनपुंसकलिङ्गो भवति ॥ १३५ ॥

[1] कृन्तति K_5, K_6; 'कृति छेदने' D_2, K_6.

[2] भेदकत्वात् B_1, K_6.

[3] लतादिजातय ओषध्यः न तु त्रिफलादयः । अजाताविति लतादिजातेरन्यत्र यत्किमपि रोगापनयनकरं तदौषधम् Pt_2.

(पा.) कर्चूरको—वेधमुख्यकः । द्रव्यावल्याम्—

'कर्चूरो गन्धमूलश्च द्रविकः[1] काल्य[1] एव च ।
वेधमुख्यो दुर्लभश्च कस्यचित्संमता [1]शटी ॥'

इति । कर्चूरनामानि । 'कचूरमु' ॥ ओषध्यो—स्युः । वनस्पतिवानस्पत्यक्षुपोलपलतातृणत्वक्सारादिभेदभिन्नोद्भिज्जातिमात्रे ओषध्यो वर्तन्ते । 'कृदिकाराद् . . .' इति[2] वा ङीष् । 'ओषध्यः फलपाकान्ता लता गुल्माश्च वीरुधः' इति काशिका (पृ. ४४९, सू. ८. ४. ६) । उद्भिज्जातिनाम । 'चेट्लु मोदलयिनवि' ॥ अजातौ—औषधम् । रोगहरं फलमूलघृतचूर्णक्षौद्रादिसर्वमौषधं स्यात् । 'ओषधेरजातौ' (५. ४. ३७) इत्यण् । 'मन्दु' ॥ १३५ ॥

[1] द्राविडः, कार्श्यः, सढी इति ध. नि. ३. ९४.

[2] गणसूत्रम् under 4. 1. 45.

शाकाख्यं पत्रपुष्पादि तण्डुलीयोऽल्पमारिषः ।
विशल्याग्निशिखानन्ता फलिनी शक्रपुष्पिका ॥ १३६ ॥

(वि.) शाकाख्यमिति—शक्यते भोक्तुमनेनेति शाकम् । 'शक्लृ शक्तौ' । पत्रपुष्पादि शाकाख्यं शाकनामकम् । अत्र [1]श्लोकः—

'मूलपत्रकरीराग्रफलकाण्डादिरूढकम् ।
त्वक् पुष्पं कवचं चेति शाकं दशविधं स्मृतम् ॥'

इति । [2]लघुतण्डुलाभबीजयोगात् तण्डुलीयः । अल्पं संमर्दनं मृष्यति सहत इत्यल्पमारिषः । 'मृष सहने' । अल्पामपि मारिं व्याधिं स्यतीति वा । 'षोऽन्तकर्मणि' । तण्डुलीयनामनी । 'चिर्रिकूरपेल्लु' ॥ विगतं शल्यमस्या इति विशल्या[3] । गर्भभेदकत्वाद् अग्निशिखेव तिष्ठतीत्यग्निशिखा[4] । बहुदेशव्यापित्वाद् अनन्ता[5] । फलानि सन्त्यस्या इति [6]फलिनी । शक्रप्रियपुष्पत्वात् शक्रपुष्पिका । शक्रपुष्प्यपीति वा पाठः । अग्निशिखानामानि । 'वेन्नवेदुरुकूर' ॥ १३६ ॥

---

[1] तदुक्तम् F_2, Pt_2.

[2] °आभानि बीजान्यत्र Pt_2.

[3] विशल्यं करोतीति F_2, Pt_2.

[4] दीपनकारित्वात् Pt_2.

[5] दूरप्रसरणात् D_2, K_5, K_6.

[6] हलपर्यायसंज्ञकत्वात् हलिनीति वा पाठः Pt_2.

(पा.) शाकाख्यं—पुष्पादि । पत्रपुष्पफलमूलादिरूपभोज्यं शाकशब्दवाच्यं भवति ।

'मूलपत्रकरीराग्रफलकाण्डादिरूढजाः ।
[1]पुष्पं त्वक् कवचं चेति शाकं दशविधं स्मृतम् ॥'

'कूर' ॥ तण्डुलीयो—मारिषः ।

'[2]मारिषे जीवशाकः स्यादत्राल्पे[3] तण्डुलीयकः ।
मेघनादो[4] विगण्डीरम् ॥'

इति [5]यादववचनात् । 'चिर्रिकूर' । मारिषः, जीवः, शाकनाम । 'तोंबकूर' ॥ विशल्या—शक्रपुष्प्यपि । फलिनीशाकनामानि । 'नादंटिजालुकूर । अदे तरिगोर्रानुन्तु' ॥ 'तिन्दुकाकारपत्रस्तु विटपाग्निशिखा मता' ॥ १३६ ॥

---

[1] त्वक्पुष्पं कवकं चेति B_3.

[2] मारिषः B_3.

[3] तत्र B_3.

[4] मेघनादोऽपि गण्डीरं B_3.

[5] वैजयन्ती (पृ. ५७, श्लो. १५०–१.)

स्याहृक्षगन्धा छगलाण्ड्यावेगी वृद्धदारकः ।
जुङ्गो ब्राह्मी तु मत्स्याक्षी वयःस्था सोमवल्लरी ॥ १३७ ॥

(वि.) स्यादिति—ऋक्षवत् क्रिमीन् [1]गन्धयतेऽर्दयतीति ऋक्षगन्धा । 'गन्ध अर्दने' । छगलस्याजस्येवाण्डान्यस्थीन्यस्या इति छगलाण्डी । [2]छगलाङ्गीति वा पाठः ।

धातुवृद्धिकरत्वाद् आवेगोऽस्या अस्तीति आवेगी[3]। वृद्धत्वं दारयतीति[4] वृद्धदारकः। 'दॄ विदारणे'। जुङ्गति कफाल्पादिदोषान्[5] वर्जयतीति जुङ्गः। 'जुगि वर्जने'। ऋक्षगन्धानामानि। 'बोद्दि क्रूरपेल्लु'॥ [6]पावनत्वात् ब्राह्मी। मत्स्याक्षितुल्यपुष्पत्वात् मत्स्याक्षी। [7]वयसि तिष्ठतीति वयःस्था। 'ष्ठा गतिनिवृत्तौ'। सोमवत् शीतवीर्यत्वात् सोमवल्लरी[8]। ब्राह्मीनामानि। 'पोन्नगण्टिकूरपेल्लु'॥ १३७॥

[1] गन्धयति K_5, K_6, Pt_2.
[2] छगलाङ्गसदृशावयवत्वात् छगलाङ्गी K_5, K_6.
[3] वृष्यत्वादावेगोऽस्याः D_2, K_5.
[4] B_1, K_3, K_6 add नाशयति.
[5] °रोगान् D_2, K_3, K_5.
[6] ब्राह्मणीवत् पवित्रत्वात् B_1, D_2, K_3.
[7] वयः स्थापयति F_2, Pt_2.
[8] सोमांशभूतवल्लरीत्वात् B_1, D_2, G.

(पा.) स्याद्दक्षगन्धा—जुङ्गः। जुङ्गाख्यशाकनामानि। 'बोद्धिकूर'॥ ब्राह्मी तु। मण्डूकब्रह्मीनाम। 'ब्राह्मी कपोतवेगा स्यान्माण्डूकीति सुवर्चला' इति [1]वैजयन्ती॥ मत्स्याक्षी। लोहमारकनाम। 'पोन्नगंटि'॥ 'मत्स्याक्ष्यां [2]शालशारिण्डौ पत्तूरो लोहमारकः' इति वैजयन्ती (पृ. ५८, श्लो. १५६)॥ वयस्था—वल्लरी। सोमवल्लरीनामानि। 'सेंमेदकूर'। 'ब्रह्मयां सत्यवती [3]ब्राह्मी मत्स्याक्षी सोमवल्लरी' इति वैजयन्ती (पृ. ५७, श्लो. १४४)॥ १३७॥

[1] मुद्रितग्रन्थे न दृश्यते श्लोकार्धम्.
[2] शालीनौ इति मुद्रितग्रन्थे.
[3] ब्रह्मी B_3.

पटुपर्णी हैमवती स्वर्णक्षीरी हिमावती।
हयपुच्छी तु काम्बोजी माषपर्णी महासहा॥ १३८॥

(वि.) पटुपर्णीति—पटूनि श्रेष्ठानि पर्णान्यस्या इति पटुपर्णी[1]। [2]हिमवति [3]प्रचुरत्वाद् हैमवती। स्वर्णवर्णं क्षीरमस्या इति [4]स्वर्णक्षीरी। हिमं[5] शीतलत्वमस्या इति हिमावती। स्वर्णक्षीरीनामानि। 'कंकोट्टुपुचेट्टु'॥ [6]हयपुच्छाभशाखात्वाद् हयपुच्छी। काम्बोजदेशे भवा [7]काम्बोजी। माषस्येव पर्णान्यस्या माषपर्णी। महान्[8] रोगः सह्यतेऽनया महासहा। 'षह मर्षणे'। माषपर्णीनामानि। 'कारुमिनुमु'॥ १३८॥

[1] श्रेष्ठपर्णत्वात् D_2, K_5, K_6; वरं श्रेष्ठं पर्णमस्या वरपर्णी K_2, K_3.
[2] हिमवद्गिरौ F_2, Pt_2.
[3] प्रचुरा K_3, K_5, K_6.
[4] स्वर्णवर्णक्षीरत्वात् K_5, K_6.
[5] हिमत्वमस्याः K_3, K_6; हेमवती D_2, K_2.
[6] हयपुच्छाकारत्वात् F_2, Pt_2.
[7] काम्भोजी K_2, K_6.
[8] महारोगान् सहत इति Pt_2.

(पा.) पटुपर्णी—हिमावती। शेषे—‘क्षीरिणी काञ्चनाह्वा च तिक्तदुग्धा च कर्षिणी’। हेमदुग्धिकानामानि। ‘रेड्ंढिवारिनानावालु’।

‘हेमपीतं पयस्तस्या हिमवद्भूमिसंभवा।
सा नागजिह्विकाकारा तन्मूलं वणिगौषधम्॥’

हयपुच्छी—महासहा। वनमाषनामानि। ‘कारुमिनुमु’॥ १३८॥

तुण्डिकेरी रक्तफला बिम्बिका पीलुपर्ण्यपि।
बर्बरा कबरी तुङ्गी खरपुष्पाजगन्धिका॥ १३९॥

(वि.) तुण्डिकेरीति—[1]तुण्डिकमोष्ठबिम्बमियर्त्यनुकरोतीति तुण्डिकेरी। ‘ऋ गतौ’। [2]रक्तवर्णफलत्वाद् रक्तफला। फलैरोष्ठबिम्बमनुकरोतीति [3]बिम्बिका। पीलोरिव पर्णान्यस्याः पीलुपर्णी। तुण्डिकेरीनामानि। ‘[4]दोण्डचेट्टुपेल्लु’॥ कुटिलह्रस्वकेशाभत्वाद् बर्बरा[5]। [6]कबरी च। विरुद्धलक्षणया तुङ्गत्वात् [7]तुङ्गी। खराणि परुषाणि पुष्पाण्यस्याः खरपुष्पा[8]। अजस्येव गन्धोऽस्या अस्तीति अजगन्धिका। खरपुष्पानामानि॥ ‘वायण्टचेट्टुपेल्लु’॥ १३९॥

[1] तुण्डं वदनमाश्रयत्वेनास्येति, तुण्डिकमोष्ठः F_2, Pt_2.. [2] रक्तं फलमस्याः Pt_2. [3] ओष्ठस्य विम्बमाकृतिरिव फलमस्याः F_2, Pt_2. [4] ‘तोंडेयबीलु’ J_2. [5] परुषपर्णत्वात् F_2, Pt_2. [6] केशसाम्यात् J_2, Pt_2. [7] अतितीक्ष्णत्वात् F_2, Pt_2. [8] तीक्ष्णपुष्पत्वात् F_2, Pt_2.

(पा.) तुण्डिकेरी—पीलुपर्ण्यपि। विम्बिलतानामानि। ‘दोंड’॥ बर्बरा—अजगन्धिका[1]। बर्बराशाकनामानि। ‘दायिंट[2]’॥ १३९॥

[1] अजगन्धिनी B_3. [2] ‘वायिंट’ B_3.

एलापर्णी तु सुवहा रास्ना युक्तरसा च सा।
चाङ्गेरी चुक्रिका दन्तशठाम्बष्ठाम्ललोणिका॥ १४०॥

(वि.) एलापर्णीति—एलाया[1] इव पर्णान्यस्या इति एलापर्णी। सुष्ठु वहत्यामोदमिति[2] सुवहा। ‘वह प्रापणे’। रस्यत इति रास्ना। ‘रस आस्वादने[3]’। युक्तः प्रियो रसोऽस्या इति [4]युक्तरसा। एलापर्णीनामानि। ‘सन्नरास्नमुपेल्लु’॥ [5]चाङ्गं

दन्तपटुत्वमीरयति अपगमयतीति चाङ्गेरी[6]। चकन्त्यनेनेति चुक्रः अम्लः। तद्योगात् चुक्रिका। 'चक तृप्तौ'। चुक्किकेति वा पाठः। चुक्कयन्ति व्यथन्तेऽस्या उष्णवीर्यत्वात् [7]चुक्रिका। 'चुक्क व्यथने'। आम्लत्वाद् दन्तानां शठं करोतीति दन्तशठा[8]। अम्बेव तिष्ठतीति अम्बष्ठा[9]। अम्लरसेन दन्तान् लुनातीति अम्ललोणिका[10]। 'लूञ् छेदने'। अम्ललोणिकानामानि। 'पुलिचिन्तपेल्लु[11]'॥ १४०॥

---

[1] एलापर्णानीव पर्णानि B_1, J_2. [2] रसं F_2, Pt_2. [3] आस्वादे Pt_2. [4] रसेन युक्ता F_2, Pt_2. [5] F_2, Pt_2 add चङ्गो दक्षः तस्य भावः चाङ्गं. [6] K_6 adds 'ईर क्षेपे.' [7] चक्रिका K_5, K_6. [8] दन्तान् शठतीति, 'शठ हिंसासंक्लेशनकैतवेषु' K_5, K_6. [9] अम्वे शब्दे D_2, K_5, K_6; अम्बशब्दे K_2; I adds 'ष्ठा गतिनिवृत्तौ'. [10] आम्ल° Pt_2. [11] 'हलिहरुवे' J_2.

(पा.) एलापर्णी—युक्तरसा च सा। रास्नानामानि। 'कारुयालकि'॥ चाङ्गेरी—अम्ललोणिका। वैद्यके[1]—'क्षुद्राम्लिका तु चाङ्गेरी लोणिका चाम्ललोणिका'। इति। चाङ्गेरीनामानि। 'पुलिचिंचलम्'। अम्बरोहिकेति पाठः साधुः। अम्बरोलिकेति केचित्॥ १४०॥

---

[1] ध. नि. ५. ३६.

सहस्रवेधी चुक्रोऽम्लवेतसः शतवेध्यपि।
नमस्कारी गण्डकाली समङ्गा खदिरेत्यपि॥ १४१॥

(वि.) सहस्रवेधीति—[1]सहस्रसंख्याकैर्मूलैर्भुवं विध्यतीति सहस्रवेधी। शतवेधी च। [2]चुक्कयन्ति व्यथन्तेऽस्मादुष्णवीर्यात् चुक्रः। 'चुक्क व्यथने'। [3]अम्लरससंयुक्तो वेतसः अम्लवेतसः। अम्लवेतसनामानि। 'पुळ्ळ प्रब्बलिपेल्लु'॥ [4]अञ्जलिरूपत्वान्नमस्करोतीव नमस्कारी। गण्डेषु ग्रन्थिषु कालिमास्या[5] अस्तीति गण्डकाली। समन्तादङ्गतीति समङ्गा। 'अगि गतौ'। सम्यगङ्गान्यस्या इति वा[6]। खदिरवत्[7] कृष्णसूक्ष्मपर्णत्वात् खदिरा। खदिरानामानि। '[8]मुनुगुदामरपेल्लु'॥ १४१॥

---

[1] सहस्रं रोगान् विध्यतीति, 'व्यध ताडने' F_2, K_3, Pt_2. [2] चक्यन्ते वध्यन्ते दन्ता अनेनेति चुक्रः। 'चक प्रतिघाते' Pt_2. [3] अम्लरसोपेतः D_2, K_5, K_6. [4] अञ्जल्याकारपर्णशालिनीत्वात् K_5, K_6; K_6 adds पर्णैर्नमस्कुर्वन्निव तिष्ठति. [5] काली F_2, Pt_2. [6] संकुचितानि पत्ररूपाण्यङ्गानि F_2, Pt_2. [7] खदिर इव सूक्ष्मपत्रत्वात् F_2, Pt_2. [8] 'मोगुडुदामर' K_6; 'मुगुलतावरे' J_2.

(पा.) सहस्रवेधी—शतवेध्यपि। अम्लवेतसनामानि। ‘अम्लवेतसमु’। नमस्कारी—खदिरेत्यपि। वैद्यके—

‘रक्तपादी[1] शमीपत्रा समङ्गाञ्जलिकारिका।
लज्जालुर्गण्डकारी च रास्ना खदिरिकेत्यपि॥’

इति। अञ्जलिकारिकानामानि। ‘मुणुगुदामर’॥ १४१॥

---

[1] पूर्वार्धम्—ध. नि. ४. १०९.

जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा।
कूर्चशीर्षो मधुरकः शृङ्गह्रस्वाङ्गजीवकाः॥ १४२॥

(वि.) जीवन्तीति—जीवन्ति [1]प्राणिनोऽनयेति जीवन्ती। जीवनी। जीवा। जीवनीया च। ‘जीव प्राणधारणे’। [2]मधु स्रवतीति मधुस्रवा। ‘स्रु[3] गतौ’। जीवन्तीनामानि। ‘पालकूरपेल्लु’॥ कूर्चवत् श्मश्रुवत् [4]शीर्षमस्येति कूर्चशीर्षः। मधुरत्वात् [5]मधुरकः। [6]शृङ्गाभावयवयोगात् शृङ्गः। [7]ह्रस्वान्यङ्गान्यस्य ह्रस्वाङ्गः। जीवयतीति जीवकः[8]। जीवकनामानि। ‘[9]जीवकमुसुगन्धद्रव्यमुपेल्लु’॥ १४२॥

---

[1] F₂, J₂, Pt₂ omit. [2] B₁, J₂ omit 3 lines. [3] ‘स्रु स्रवणे’ Pt₂. [4] समशीर्षत्वात् F₂, Pt₂. [5] मधुकरत्वात् मधुकरः K₅. [6] शृङ्गयोगात् F₂, Pt₂. [7] ह्रस्वावयवत्वात् Pt₂. [8] K₆ adds ‘जीव प्राणधारणे’. [9] ‘जीवरमु’ K₂; ‘जीवर’ J₂.

(पा.) जीवन्ती—मधुस्रवा। जीवन्तीनामानि।

‘चक्षुष्या सर्वदोषघ्नी जीवन्ती मधुरा हिमा।’

इति धन्वन्तरिः (ध. नि. १. १४१)। ‘पालकूर’॥ कूर्चशीर्षो—जीवकाः। शेषे—‘दीर्घायुः[1] सर्जकः स्वादुः प्राणदश्चिरजीव्यपि’। जीवकनामानि। ‘जीवकमु’॥ १४२॥

---

[1] ‘ह्रस्वाङ्गो मधुरः स्वादुः प्राणदश्चिरजीव्यपि’ इति ध. नि. १. १२३.

किराततिक्तो भूनिम्बोऽनार्यतिक्तोऽथ सप्तला।
विमला सातला भूरिफेना चर्मकषेत्यपि॥ १४३॥

(वि.) किराततिक्त इति—तिक्तरसयोगात् तिक्तः, किरातदेशे भवस्तिक्तः किराततिक्तः। भुवि निम्बो भूनिम्बः। अनार्याः किराताः तद्देशे भवस्तिक्तः[1] अनार्यतिक्तः।

भूनिम्बनामानि। 'नेलवेमुपेल्लु'॥ सपति स्वावयवेषु समेता[2] सप्तला। 'षप समवाये'। विगतं मलमनयेति[3] विमला। सातं सुखं लातीति[1] सातला[5]। सतां सुखं लातीति वा। भूरयः फेनबिन्दवोऽस्याः सन्तीति भूरिफेना। चर्म कषतीति चर्मकषा। 'कष हिंसायाम्'। चर्मकसेति पाठे चर्म कसति वर्धतेऽत्रेति चर्मकसा। 'कस गतौ'। सप्तलानामानि। 'सम्बरेनिपेल्लु'॥ १४३॥

---

[1] तिक्तरसश्च B_1, K_5. [2] समवैति K_5, K_6. [3] अस्याः D_2, K_5, K_6.
[4] D_2, K_5, K_6 add रोगाद्यपनयनेन. [5] I, J_2 add 'ला दाने'.

(पा.) किराततिक्तो—अनार्यतिक्तः। भूनिम्बनामानि। 'नेलवेमु'। अनुक्तम्—'[1]काकजङ्घा तु शार्ङ्गेष्ठा[2] षडश्रा च विलोमिका[3]'। 'वेलमलन्दि'। स भूनिम्बावान्तरभेदः॥ अथ सप्तला—चर्मकषेत्यपि। चर्मेव कसति वर्धत इति चर्मकसेति दन्त्योपधः सुभूतिटीकायां व्युत्पादितः। सातलानामानि।

'फेनाभविन्दुयुक्तेयं पश्चाद्देशसमुद्भवा।
सातरिष्येव विख्याता गन्धद्रव्यं वणिग्धनम्॥'

'संबरेणि'॥ १४३॥

---

[1] 'दास्यां षडश्रा शार्ङ्गेष्ठा काकजङ्घा विलोमिका' इति वैजयन्त्याम् (पृ. ५४, श्लो. १११).
[2] शार्ङ्गिष्ठा B_3. [3] विलोलिका B_3.

वायसोली स्वादुरसा वयःस्थाथ मकूलकः।
निकुम्भो दन्तिका प्रत्यक्श्रेण्युदुम्बरपर्ण्यपि॥ १४४॥

(वि.) वायसोलीति—वायसवदुलति चलतीति वायसोली। 'उल संचलने'। अवलीयत इति वा। 'ली श्लेषणे'। स्वादू रसोऽस्या इति स्वादुरसा। वयसि स्थीयतेऽनयेति वयःस्था। कायस्थेति पाठे काये बुध्ने तिष्ठतीति [1]कायस्था। 'ष्ठा गतिनिवृत्तौ'। वयःस्थानामानि। 'कारुगोलिमि'॥ [2]मङ्क्यते चित्रत्वात् मकूलकः। 'मकि मण्डने'। रसाधारत्वेन निश्चितः कुम्भो निकुम्भः। [3]कफादिदोषाः दाम्यन्त्युपशाम्यन्त्यनयेति दन्तिका। 'दमु उपशमने'। प्रत्यक् तिर्यक् पर्णश्रेणयोऽस्याः सन्तीति [4]प्रत्यक्श्रेणी। उदुम्बरस्येव [5]पर्णान्यस्या उदुम्बरपर्णी। दन्तिकानामानि। 'दन्तिचेट्टुपेल्लु'॥ १४४॥

[1] कीयते ज्ञायते कयः। 'कि ज्ञाने'। कये बुध्ने तिष्ठतीति कयस्था K_5, K_6. [2] मङ्कते राजते B_1, J_2, K_3. [3] दम्यन्ते दोषा अनयेति F_2, Pt_2. [4] प्रत्यग्भवती(न्ती) प्रत्यक् श्रेणिरस्याः Pt_2. [5] पर्णानीव पर्णानि Pt_2.

(पा.) वायसोली—वयःस्था। कायस्थेति केचित्। अत्र कालिका काकोली शुक्लादयः शब्दाश्च। गौडदेशप्रसिद्धकाकोलीनामानि। 'काकोलीकारुकोरिन्नि'॥ अथ मकूलकः—उदुम्बरपर्ण्यपि। दन्तीनामानि। 'दन्तिचेट्टु'॥ १४४॥

अजमोदा तूग्रगन्धा ब्रह्मदर्भा यवानिका।
मूले पुष्करकाश्मीरपद्मपत्राणि पौष्करे॥ १४५॥

(वि.) अजमोदेति—अजस्येव[1] मोदो गन्धोऽस्या अस्तीति अजमोदा। उग्रो गन्धोऽस्या उग्रगन्धा। ब्रह्मसंबन्धित्वात् दर्भाकारत्वाच्च ब्रह्मदर्भा[2]। यवानीव[3] सूक्ष्मपुञ्जसरूपत्वाद् [4]यवानिका। अजमोदानामानि। 'अजमोदमनुनोममुपेल्लु[5]'॥ स्थलपद्मिनीमूलत्वेन पुष्करस्य मूलमिदं पुष्करम्[6]। [7]काश्मीरदेशे भवं काश्मीरम्। पद्मस्येव पत्राण्यस्य पद्मपत्रम्। पुष्करस्येदं पौष्करम्। पुष्करमूलनामानि। 'पुष्करमूलमुपेल्लु[8]'॥ १४५॥

[1] अजवत् K_5, K_6. [2] ब्रह्मदर्भत्वात् D_2, K_5. [3] J_2 adds वृत्त°. [4] यवसादृश्यात् F_2, Pt_2. [5] 'ओमपूंगूरपेरु' I; 'अवत्तिका' J_2. [6] K_5, K_6 add पुष्णातीति पुष्करं; 'पुष पुष्टौ' K_6. [7] काश्मीरदेशजन्यत्वात् K_5, K_6; कश्मीर° K_2. [8] K_3 adds 'नाडुगु'.

(पा.) अजमोदा—यवानिका। इयं द्विविधा। एका गन्धद्रव्यम्। अपरा क्षेत्रजा। द्वयोर्नामानि। 'अजमोदमुन्नु वोममुन्नु'॥ मूले—पौष्करे। पौष्करे मूले पुष्करकाश्मीरपद्मपत्राणि स्युः। द्रव्यावल्यां तु—

> 'मूलं पुष्करमूलं च पौष्करं पुष्कराह्वयम्।
> काश्मीरं पुष्करजटाचीरं तत् पद्मपत्रकम्॥
> श्वासारिर्ब्रह्मतीर्थं च पद्मकं पुण्यसागरम्॥'

इति मूलपौष्करशब्दौ पर्यायत्वेनोक्तौ॥ १४५॥

अव्यथातिचरा पद्मा चारटी पद्मचारिणी।
काम्पिल्यः कर्कशश्चन्द्रो रक्ताङ्गो रोचनीत्यपि॥ १४६॥

(वि.) अव्यथेति—न व्यथतेऽनयेति [1]अव्यथा। 'व्यथ भयचलनयोः'। अत्यर्थं चरति व्याप्नोतीति अतिचरा। 'चर[2] गतिभक्षणयोः'। [3]पद्मसादृश्यात् पद्मा। चरति व्याप्नोतीति चारटी। पद्ममिव चरतीति पद्मचारिणी। 'मेट्ट (काश्मीरदेशपु) [4]दामरपेल्लु'॥ कम्पिल्याख्यदेशे भवः काम्पिल्यः। कटुतिक्तोष्णरूपत्वात् कृणोतीति कर्कशः[5]। 'कृञ् हिंसायाम्'। रोगहरणेन[6] चन्दयत्याह्लादयतीति चन्द्रः। 'चदि आह्लादने'। रक्तमङ्गमस्येति रक्ताङ्गः। [7]रोचयति [8]रक्तपर्णेनेति रोचनी। 'रुच दीप्तौ'। रोचनीनामानि। 'कम्पिल्लमुपेल्लु'॥ १४६॥

[1] न व्यथयति K_5, K_6. [2] 'चर गतौ' D_2, K_5. [3] पद्माभत्वात् K_2, K_6. [4] '°मन्दलितामरपेरु' K_5. [5] कठिनत्वात् कर्कशः F_2, Pt_2. [6] पित्तश्लेष्मादिरोगिणो रोगहरत्वेन D_2, J_2, K_6. [7] रोचते Pt_2. [8] °वर्ण° I.

(पा.) अव्यथा—पद्मचारिणी। शेषे—'पद्मावती गन्धमूला लक्ष्मीः श्रेष्ठा च पुष्करा'। स्थलपद्मिनीनामानि। 'मेट्टदामर'॥ काम्पिल्यः—रोचनीत्यपि। 'रजतो रोहिताङ्गश्च कर्कशो रक्तचूर्णकः। करम्बः स्यात्' इतीन्दुः। काम्पिल्यनामानि। 'कम्पिल्लमु'॥ १४६॥

प्रपुन्नाटस्त्वेडगजो दद्रुघ्नश्चक्रमर्दकः।
पद्माट उरणाक्षश्च पलाण्डुस्तु सुकन्दकः॥ १४७॥

(वि.) प्रपुन्नाट इति—प्रकर्षेण पुमांसं नाटयतीति प्रपुन्नाटः। [1]प्रकर्षेण पुनातीति वा[2]। 'पूञ् पवने'। बलं प्रपुणतीति प्रपुण्णाट इति वा पाठः। 'पुण कर्मणि शुभे'। एडाभपुष्पत्वाद्[3] एडः। गज्यत[4] इति गजः। 'गज शब्दे'। एडश्चासौ गजश्च एडगजः। दद्रुं रोगं हन्तीति दद्रुघ्नः[5]। चक्राणि दद्रुमण्डलानि मृद्नाति नाशयतीति चक्रमर्दकः[6]। 'मृद[7] क्षोदे'। पद्मवदटति चरतीति पद्माटः। 'अट पट गतौ'। उरणो[8] मेषस्तदक्षिसदृशपुष्पत्वाद् उरणाक्षः। उरणाख्य इति वा पाठः। तदोरणस्य मेषस्याख्या अस्येति। पद्माटनामानि। 'तगिरसचेट्टुपेल्लु'॥ कफं पिपर्ति पूरयतीति पलाण्डुः। 'पृ पालनपूरणयोः'। शोभनः कन्दोऽस्यास्तीति सुकन्दकः। पलाण्डुनामनी॥ '[9]नीरुल्लिपेरु'॥ १४७॥

[1] D_2, K_5, K_6 add कफहरत्वेन. [2] प्रपुनाटः K_2, K_3. [3] मेषाक्षितुल्यत्वात् K_5. [4] B_1, I, K_2 add शब्द्यते; श्रेष्ठत्वात् F_2, Pt_2. [5] F_2, Pt_2 add 'हन हिंसागत्योः'. [6] मर्दनः J_2. [7] 'मृद मर्दने' K_3, K_6. [8] उरणस्यैडस्याक्षितुल्यपुष्पत्वात् B_1, K_5. [9] 'केम्पुनीरुल्लि' J_2.

(पा.) प्रपुन्नाटः—उरणाक्षश्च । 'प्रपुन्नटः प्रपुन्नाडो[1] दद्रुपामनिघातकः' इति वैद्यके । प्रपुन्नाटनामानि । 'तंटेपुचेट्टु' ॥ पलाण्डुस्तु सुकन्दकः । पलण्डुश्च पलण्डश्च पलाण्डुनामनी । 'नीरुह्लि' ॥ १४७ ॥

---

[1] प्रपुन्नाट: B_3.

लतार्कदुर्द्रुमौ तत्र हरितेऽथ महौषधम् ।
लशुनं गृञ्जनारिष्टमहाकन्दरसोनकाः ॥ १४८ ॥

(वि.) लतार्क इति—[1]लताभिः शाखाभिरर्च्यत इति लतार्कः । अपवित्रत्वेन दुष्टो द्रुमो दुर्द्रुमः । हरितपलाण्डुनामनी । 'पच्चनिनीरुह्लिपेरु' ॥ महच्च तदौषधं च महौषधम् । [2]अश्यते भुज्यत इति लशुनम् । 'अश भोजने' । गृञ्ज्यते कुत्सितं शब्द्यत इति गृञ्जनः[3] । 'गृजि शब्दे' । न [4]रिष्यतीत्यरिष्ट । 'रिष हिंसायाम्' । महान् कन्दो यस्य सः महाकन्दः । षट्सु रसेषु एकेनाम्लरसेनोनः [5]रसोनकः । लशुननामानि । 'वेल्लुह्लिपेल्लु' ॥ १४८ ॥

---

[1] लतार्कस्यार्काह्वयस्यावयवसदृशावयवत्वात् लतार्क: B_1, D_2, K_5. [2] लशति कफादिकमिति, 'लश भेदने' D_2, I, K_2, K_5. [3] गृञ्जनं D_2, K_2, K_5. [4] रिष्यते K_6; नास्ति रिष्टं हिंसास्मादिति F_2, Pt_2. [5] अम्लरसेन कदूनत्वात् D_2, K_5, K_6.

(पा.) लतार्कदुर्द्रुमौ—हरिते । हरितपलाण्डुनामनी । 'पच्चनिनीरुह्लि' । अथ महौषधं—रसोनकाः । लशुननामानि । 'वेल्लुह्लि' । वैद्यके तु[1]—

'लशुनं दीर्घपत्रं च पिच्छागन्धो महौषधम् ।
पलण्डुश्च पलाण्डुश्च लतार्कश्च पताकिका ॥
गृञ्जनो यवनेष्टश्च पलाण्डोर्दश जातयः ॥'

इत्युक्तम् ॥ १४८ ॥

---

[1] इति सुश्रुतेनोक्तत्वात्—भानुजीदीक्षितः (पृ. २०३).

पुनर्नवा तु शोथघ्नी वितुन्नं सुनिषण्णकम् ।
स्याद्वातकः शीतलोऽपराजिता शणपर्ण्यपि ॥ १४९ ॥

(वि.) पुनर्नवेति—पुनः पुनर्नवो[1] भवतीति पुनर्नवा। पुनर्भव इति वा पाठः। [2]शोथं हन्तीति शोथघ्नी। शोफघ्न इति वा पाठः। 'हन हिंसागत्योः'। शोथघ्नीनामनी। '[3]गलिजेरुपेरु'॥ वितुद्यते विशेषेण छिद्यत इति वितुन्नम्। 'तुद व्यथने'। सुष्ठु निषीदन्ति [4]गुणा अत्रेति[5] सुनिषण्णकम्। 'षद्लृ विशरणगत्यवसादनेषु'। वितुन्ननामनी। नीरुचेञ्चलिपेल्लु॥ वातं करोतीति वातकः। अत एव शीतं लातीति शीतला। रोगैरपराजितत्वाद्[6] अपराजिता। शणस्येव पर्णान्यस्याः शणपर्णी। शणपर्णीनामानि। 'सोमिदपुचेट्टुपेल्लु[7]'॥ १४९॥

---

[1] नवीभवति B_1, K_5. [2] शोफं J_2. [3] 'गणक्षिलु' J_2. [4] D_2, K_5, K_6 add दीपकत्वादि°. [5] अस्मिन् K_5, K_6. [6] रोगान् जिता, 'जि अभिभवे'. [7] 'उलिगु' J_2.

(पा.) पुनर्नवा—[1]शोफघ्नी। पुनर्नवानामनी। 'गलिजेरु'।

'शोभघ्न्यां पूरणा[2] पूरी वर्षाभ्वी जीवबोधिनी[3]॥
पुनर्नवा च रक्तायां तस्यां योग्या कटिल्लका[4]।
श्वेतायां वृश्चिकोऽल्पायां दीर्घपत्री विटाटिका॥
अस्या जात्यन्तरे [5]स्वल्पे पूरणी [6]हस्तिपूरणी॥'

इति वैजयन्ती (पृ. ५७, श्लो. १४५-७)। वितुन्नं सुनिषण्णकम्। जलचुक्रिकानामानि। 'नीरुचिंचिलम्'। स्याद्वातकः—शणपर्ण्यपि।

'बलापराजिता मोटा स्यन्दा शीतलवातलः।'

इत्यायुर्वेदप्रकाशोक्त्या शीतलवातल इत्येकपदमिति केचित्। शणपर्णीनामानि। 'सोमिदम्'॥ १४९॥

---

[1] शोभघ्नी B_3. [2] पूरणः पूरः B_3. [3] बोधनी B_3. [4] कटुल्लकः B_3. [5] सर्वे B_3. [6] हस्त° B_3.

पारावताङ्घ्रिः कटभी पण्या ज्योतिष्मती लता।
वार्षिकं त्रायमाणा स्यात् त्रायन्ती बलभद्रिका॥ १५०॥

(वि.) पारावताङ्घ्रिरिति—पारावताङ्घ्रिसदृशावयवयोगात् [1]पारावताङ्घ्रिः। कटत्यावृणोतीति [2]कटभी। 'कटे वर्षावरणयोः'। पण्यते स्तूयत[3] इति पण्या। 'पण

व्यवहारे स्तुतौ च’। ज्योतिरुष्णमस्या अस्तीति ज्योतिष्मती[4]। दूरप्रसरात्[5] लता[6]। ज्योतिष्मतीनामानि। ‘एक्कुडुदिंगेपेल्लु’॥ वर्षासु भवं वार्षिकम्। रोगेभ्यस्त्रायत इति त्रायमाणा। ‘त्रैङ् पालने’। त्रायन्ती च। बलेन प्राणेन भद्रत्वात् बलभद्रिका[7]। त्रायमाणानामानि। ‘कटुगानुगुपेल्लु’॥ १५०॥

---

[1] रक्तत्वेन पारावताङ्घ्रिसदृशात् F_2, Pt_2. [2] कटतिः B_1; कटती J_2. [3] B_1, K_2, K_3 add मधुकरित्वात्; मेधाकरित्वात् I, J_2. [4] अग्न्याभावयवत्वात् D_2, K_3, K_6. [5] °प्रसरणात् K_5, K_6. [6] J_2 adds लतति, ‘लति व्याप्तौ’. [7] बलेन भद्रिका F_2, Pt_2.

(पा.) [1]पारावताङ्घ्रिः—लता। शेषे—

‘ज्योतिष्का साग्निभा सा च लवणोक्ता च दुर्मदा।
स्यात्सुपर्णलता चैद्या त्रिपर्णी किंशुकापि च॥’

ज्योतिष्मतीनामानि। ‘मानेरुदीग’॥ वार्षिकं—बलभद्रिका। त्रायन्तीनामानि। ‘कलुक्रान्त’॥ १५०॥

---

[1] कटभिरिति पाठः B_3.

विष्वक्सेनप्रिया घृष्टिर्वाराही बदरेति च।
मार्कवो भृङ्गराजः स्यात् काकमाची तु वायसी॥ १५१॥

(वि.) विष्वक्सेनप्रियेति—[1]विष्वक्सेनस्य प्रिया विष्वक्सेनप्रिया। वराहैर्घृष्यत इति [2]घृष्टिः। ‘घृष संकर्षणे’। [3]वराहैराक्रान्ता वाराही। बदति स्थिरीभवतीति बदरा। ‘बद स्थैर्ये’। वाराहीनामानि। ‘पांचितींगेपेल्लु’॥ मार्कः संपर्कः औषधेषु तं वातीति मार्कवः[4]। ‘वा गतिगन्धनयोः’। [5]भृङ्गवद् राजते भृङ्गराजः। ‘राजृ दीप्तौ’। भृङ्गराजनामनी। [6]‘गुंटगलगरपेल्लु’॥ काकान् मञ्चत इति काकमाची। ‘मचि धारणोच्छ्रायपूजनेषु’। काकमूचीति पाठे काकवर्णेन मूयते संबध्यत इति काकमूची। ‘मूङ् बन्धने’। वायसवर्णरसत्वाद् वायसी। ‘कांचिचेट्टुपेल्लु[7]’॥ १५१॥

---

[1] विष्वक्सेनप्रियत्वात् F_2, Pt_2. [2] गृष्टिरिति पाठे प्रयोगबाहुल्याद् घकारस्य गकारः D_2, K_5, K_6. [3] वराहाक्रान्तत्वात् K_6. [4] शोफादिरोगान् मार्जयति मार्कवः। ‘मृजूष् शुद्धौ’ B_1, J_2, K_6; मार्जवः K_3. [5] K_5, K_6 add वर्णात्. [6] ‘गरुडा’ J_2. [7] ‘कांचुरुकांगे’ J_2.

(पा.) विष्वक्सेनांप्रिया—बदरेत्यपि। यद्रसयोगेन तक्रस्यानतता तज्ञतानामानि। ‘पांचितींगे’॥ मार्कवो—स्यात्। द्रव्यावल्याम्—

‘अङ्गारको भृङ्गराजो भृङ्गः स्यात् केशरञ्जनः।
भृङ्गारकेशरागा च भृङ्गराजार्थवाचकाः॥’

इति। भृङ्गराजनामानि। ‘गुंटकलगर’। काकमाची—वायसी। वैद्यके—‘[1]काकार्थेभ्यः परा माची काकसाह्वा च वायसी’ इति। अनेन ध्वाङ्क्षमाचीत्यादिरपि। काकी करटेत्यादिश्च। काकमाचीनामानि। ‘कांचिचेट्टु। अदे नल्लबुड्डसर’॥ १५१॥

---

[1] ‘काकमाची ध्वाङ्क्षमाची काकाह्वा चैव वायसी’ इति ध. नि. (४. २१).

शतपुष्पा सितच्छत्रातिच्छत्रा मधुरा मिसिः।
अवाक्पुष्पी कारवी च सारणी तु प्रसारिणी॥ १५२॥
तस्यां कटंभरा राजबला भद्रबलेति च।

(वि.) शतपुष्पेति—बहुपुष्पत्वात्[1] शतपुष्पा। [2]सितच्छत्राभानि पुष्पाण्यस्या इति सितच्छत्रा। छत्रमतिक्रान्ता अतिच्छत्रा। [3]विरुद्धलक्षणया मधुरत्वात् मधुरा। मस्यति परिणमतीति [4]मिसिः। ‘मसी परिणामे’। अवाञ्च्यधोमुखानि पुष्पाण्यस्या अवाक्पुष्पी। कारेण यत्नेन वीयते खाद्यते, कटुतिक्तत्वादिति [5]कारवी। ‘वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु’। मधुरानामानि। ‘पेद्दसदापपेल्लु’॥ [6]सार्यते निःसार्यते पीडानयेति सारणी। प्रसारिणी च। ‘सृ गतौ’। कटिं श्रोण्याद्यवयवं बिभर्ति पुष्णातीति[7] कटंभरा। ‘[8]डुभृञ् धारणपोषणयोः’। बलप्रदवस्तुषु राजवन्मुख्यत्वाद् राजबला। भद्रं बलमस्या अस्तीति भद्रबला। प्रसारिणीनामानि। [9]‘गोन्तेमगोरुचेट्टुपेल्लु’॥ १५२॥

---

[1] °पुष्पयोगात् K_5, K_6.　[2] सितानि छत्राकाराणि D_2, K_3.　[3] F_2, Pt_2 add कटुतिक्तरसत्वेऽपि.　[4] मसिः K_6.　[5] करोतीति कारुः तस्येयं कारवी F_2, Pt_2.　[6] सार्यन्ते वातसंकुचितान्यङ्गान्यनयेति F_2, Pt_2.　[7] D_2, J_2 add वातहरणेन.　[8] ‘भृञ् भरणे’ K_5, K_6, Pt_2.　[9] ‘हेसर्वणा’ J_2.

(पा.) शतपुष्पा—कारवी च। शतपुष्पानामानि। ‘सदाप’। सारणी—भद्रबलेति च। प्रसारिणीनामानि। ‘गोंतेमगारु। दूसर’॥ १५२॥

जनी जतूका जननी जतुकृच्चक्रवर्तिनी ॥ १५३ ॥
संस्पर्शाथ शटी गन्धमूली षड्ग्रन्थिकेत्यपि ।
कर्चूरोऽपि पलाशोऽथ कारवेल्लः कटिल्लकः ॥ १५४ ॥
सुषवी चाथ कुलकं पटोलस्तिक्तकः पटुः ।

(वि.) जनीति—जनयति शैत्यादिकं जनी । जननी च । 'जनी प्रादुर्भावे' । जतु लाक्षा तद्वद्रोगक्षयं करोतीति जतूका । [1]जतुकृच्च । चक्रे शाकानां समूहे वर्तत[2] इति चक्रवर्तिनी । 'वृतु वर्तने' । शीतगुणत्वात् सम्यक् स्पृश्यते [3]संस्पर्शा । 'स्पृश संस्पर्शने' । संस्पर्शोऽस्या इति वा । चक्रवर्तिनीनामानि । 'कीरिन्दचेट्टुपेल्लु' ॥ शटति कफादिरोगान् नाशयतीति शटी । 'शट रुजाविशरणगत्यवसादनेषु' । गन्धयुक्तं मूलमस्या इति [4]गन्धमूली । षड्ग्रन्थयोऽस्याः सन्तीति षड्ग्रन्थिका । कर्चूं चूर्यते दहतीति कर्चूरः[5] । 'चूरी दाहे' । पृथुपलाशत्वात् पलाशः[6] । व्रणस्थं पलं मांसमश्नुते वा । 'अशू व्याप्तौ' । गन्धमूलीनामानि । 'गंट्लकचोरमुपेल्लु' ॥ कारेण प्रयत्नेन यष्ट्यादिकमवलम्ब्य वेल्लति चलतीति कारवेल्लः[7] । 'वेल्ल[8] चलने' । कटत्यावृणोतीति[9] कटिल्लकः । 'कटे वर्षावरणयोः' । सुष्ठु सूयते फलानीति सुषवी । 'षूङ् प्राणिप्रसवे' । कारवेल्लनामानि । '[10]कांकरचेट्टु' ॥ कुत्सितं लक्यते आस्वाद्यत इति कुलकम्[11] । 'लक आस्वादने' । पटति सरतीति पटोलः । 'अट पट गतौ' । तिक्तरसत्वात् तिक्तकः[12] । देहपटुत्वयोगात् पटुः । कटुरिति वा पाठे कटुरसत्वात् कटुः । पटोलनामानि । 'चेन्दुपोट्लचेट्टु[13]' ॥ १५२–४ ॥

(पा.) जनी—संस्पर्शा । लाक्षाजनकलताविशेषनामानि । 'कारिंद' । अथ शटी । मूर्धन्योपधः । गन्धमूली—पलाशः । ग्रन्थिकचोरनामानि । 'गंट्लकचोरमु' । कारवेल्लः—सुषवी च । कारवेल्लनामानि । 'कांकर' । अनुक्तम्—'सुकन्दरस्तु कर्कोटः' । तद्विशेषनामनी । 'मट्टुकांकर' ॥ अथ कुलकः—पटुः । वैद्यके—

'पटोलस्तिक्तकस्तिक्तस्तिलकः कर्कशच्छदः ।
राजिमान्[1] बीजगर्भश्च कुष्ठहा कासमर्दनः ॥

---

[1] जतु करोतीति जतुकृत् F_2, Pt_2. [2] D_2, J_2 add श्रेष्ठतया. [3] समीचीनः स्पर्शोऽस्या अस्तीति F_2, Pt_2. [4] ग्रन्थिमूली J_2. [5] कचतीति कच्चूरः । 'कच बन्धने' K_5, K_6. [6] मृदुपलाशत्वात् मृदुपलाशः D_2, K_5. [7] कारवेल्ली D_2, K_5, K_6. [8] 'वेल्ल चलने' K_6. [9] B_1, K_3 add पञ्जरादिकं. [10] 'हलुगु' J_2. [11] कुलतीति कुलकं Pt_2. [12] तिक्तरसयोगात् F_2, Pt_2. [13] 'कैपटल' J_2.

प्रतीककर्कशौ चैव तथा राजिपटोलकः ।
राजिराजामृतापाण्डुभूतेभ्यश्च फलः परः ॥
रवणश्चेति ॥'

यादवस्त्वाह—

'पटोलिका ह्रस्वफला कन्याकुब्जा यवीयसी ।
सा तिक्ता तिक्तफलिका वन्या[2] तिक्तपटोलिका ॥'

इति । पटोलनामानि । 'पोट्ल' ॥ '[3]पटोलायास्तु पर्यायैर्योजयेद्भिषगुत्तमः' इति धन्वन्तरिवचनात् (ध. नि. १. ५२) तिक्तपटोलनामान्यपि । 'चेंति पोट्लानुन्नु' ॥१५३–४॥

---

[1] राजनामा B_3.　[2] कन्या B_3.　[3] पटोऽस्य च B_3.

कूष्माण्डकस्तु कर्कारुरुर्वारुः कर्कटी स्त्रियौ ॥ १५५ ॥
इक्ष्वाकुः कटुतुम्बी स्यात् तुम्ब्यलाबूरुभे समे ।
चित्रा गवाक्षी गोतुम्बा विशाला त्विन्द्रवारुणी ॥ १५६ ॥

(वि.) कूष्माण्डक इति—कुत्सित[1] ऊष्मा अण्डेषु बीजेषु यस्य [2]कूष्माण्डकः । तृप्तिं करोतीति कर्कः । इयर्तीति अरुः । 'ऋ गतौ' । कर्कश्चासावरुश्च कर्कारुः । कूष्माण्डनामनी । '[3]गुम्मडिपेल्लु' ॥ कटुरसेन जिह्वामूर्वतीति उर्वारुः[4] । '[5]उर्वी हिंसायाम्' । कर्कापेक्षया ह्रस्वत्वात् कर्कटी[6] । उर्वारुनामनी । 'दोसचेट्टुपेल्लु' ॥ इक्षुमप्यकयति कुटिलयति तिक्तत्वेनेति इक्ष्वाकुः[7] । 'अक कुटिलायां गतौ' । कटुत्वेन जनं तुम्बयति पीडयतीति [8]कटुतुम्बी । 'तुबि अदर्शने अर्दने च' । कटुतुम्बीनामनी । '[9]चेंदुसोरपेल्लु' ॥ तुम्बयति पित्तं नाशयतीति तुम्बी । 'तुबि अर्दने' । न लम्बते जलेऽधो न गच्छति शुष्कदशायामिति अलाबूः । 'लबि शब्दे अवस्रंसने च' । अलाबूनामनी । 'मंचिसोरपेल्लु' ॥ चित्ररूपफलत्वात् चित्रा । वृषभाक्षितुल्यपुष्पयोगात् गवाक्षी । गोभिर्भक्षणेन तुम्ब्यते गोतुम्बा । 'तुबि अर्दने' । गवाक्षीनामानि । 'पिन्नपापरपेल्लु' ॥ विशालफलयोगाद् विशाला[10] । इन्द्र [11]इव वृषभाक्षाभैः [12]फलैः स्वदेहं वृणोतीति इन्द्रवारुणी । 'वृञ् वरणे' । इन्द्रवारुणीनामनी । '[13]पेद्दपापर' ॥ १५५–६ ॥

---

[1] कु ईषत् ऊष्मा Pt_2.　[2] कूश्माण्डकः K_5, K_6, Pt_2.　[3] 'कुंबल' J_2.
[4] उरु मूत्रमारयति निःसारयतीति F_2, Pt_2.　[5] 'उर्वी तुर्वी धुर्वी हिंसायाम्' K_5, K_6.
[6] करोति वर्षमिति Pt_2.　[7] क्षत्रियधनत्वात् K_5, K_6.　[8] कटुस्तिक्ता तुम्बी F_2, Pt_2.
[9] 'कैसोरे' J_2, W_2.　[10] विशालफलत्वात् Pt_2.　[11] इन्द्रवत् F_2, Pt_2.　[12] पुष्पैः Pt_2.
[13] 'दोड्ड दामेके' J_2.

(पा.) कूश्माण्डकः—कर्कारुः । वैद्यके—

‘ कूश्माण्डश्चित्रकः सोमः पीतपुष्पो नृपात्मजः ।
वनवासः पुण्ड्रफलः कालिङ्गीपीतके स्त्रियौ ।
महाफला शाकफला सुभद्रा शष्कुलापि च ॥ ’

इति । वाक्चन्द्रिकायां तु—

‘ कूश्माण्डस्तु कलिङ्गः स्याच्चित्रको गर्भपातनः । ’

इति । कूश्माण्डनामानि । ‘ गुंमडि ’ ॥ उर्वारुः—स्त्रियौ । वैजयन्त्याम्—‘ भीरुस्त्विवर्वारुकर्कटी, ’ (पृ. ५८, श्लो. १६६) ‘ चोदन्युर्वारुपालक्यः ’[1], ‘ अल्पा[2] सा राजकर्कटी[3] ’ (पृ. ५८, श्लो. १६७) इति कर्कटीसामान्यनामानि । ‘ दोस ’ ॥ शेषे—‘ सुखवासी [4]शीर्णवृन्तस्तीव्रगन्धः सुवासकः ’ । तद्विशेषनामानि । ‘ कोरुबुडम ’ । शेषे—

‘ त्रिलिङ्ग्यां[4] त्रपुसेत्रालं डर्दिनी हस्तिपर्णिनी ।
विपाण्डुश्चिद्विटीमूत्रफलः स्यात् तिक्तकर्कटी ॥ ’

त्रपुसा-इत्रालमिति छेदः । इतालमिति केचित् । तिक्तकर्कटीनामानि । ‘ चिंतिदोस ’ । ‘ करबुजमुन्नु ’ । ‘ [5]चिर्भटी पुनरुर्वारुः ’ इति वैजयन्ती । (पृ. ५९, श्लो. १७२) ‘ नक्कदोस ’ । ‘ विटङ्कोऽतिमृगेर्वारुः ’ इति वैजयन्ती (पृ. ५९, श्लो. १७२) । ‘ बुडुम ’ ॥ इक्ष्वाकुः—स्यात् । शेषे—

‘ अम्बा पिण्डफला तथा ।
उषा च क्षत्रियरसास्तिक्तबीजो महाफलः ।
बृहत्फला राजपुत्री ॥ ’

तिक्ततुम्बीनामानि । ‘ सदर ’ । ‘ चेंतिसोर ’ ॥ तुम्ब्यलाबूः—समे । अलाबूनामानि । ‘ अनुगमु ’ ॥ अनुक्तं—‘ कालिङ्ग्यां सोमकर्कारुर्वनवासक इत्युभौ ’ । कालिङ्गानामनी । ‘ पुच्चचेट्टु ’ ॥ चित्रा—गोतुम्बा । ‘ चित्रा विशाला द्रवन्ती चेति ’ द्व्यर्थतन्त्राभिधाने सत्यपि विशालवान्तरभेदत्वाद् गवाक्षीपर्यायत्वेनोक्तिः । गवाक्षीनामानि । क्षुद्रफलेन्द्रवारुणीनामानि च । ‘ बुडुमानु ’ । ‘ पिन्नपांपरानु ’ ॥ विशाला—इन्द्रवारुणी । शेषे—ऐन्द्रीद्रसाह्वा त्रपुसी शक्रेर्वारुश्च तुम्बिनी ’ । इन्द्रवारुणीनामानि । ‘ पेद्दपांपर ’ ॥ १५५–६ ॥

---

[1] वाल्क्यः इति मुद्रितग्रन्थे. [2] फल्या B_3. [3] °कर्कटिः B_3. [4] उग्रगन्ध इति, ‘ त्रिलिङ्गे त्रपुषे ताल्व् छर्दनी हस्तिपर्णिनी ’ इति च मुद्रितवैजयन्त्याम् (पृ. ५९). [5] चिद्भिटे B_3.

अर्शोघ्नः सूरणः कन्दो गण्डीरस्तु समष्ठिला ।
कलम्ब्युपोदकास्त्री तु मूलकं हिलमोचिका ॥ १५७ ॥

(वि.) अर्शोघ्न इति—अर्शोरोगं हन्तीति अर्शोघ्नः। सूयते प्रेर्यते भक्षणे [2]रुचित्वादिति [3]सूरणः। 'षू प्रेरणे'। अर्शोरोगिभिः कन्द्यतेऽन्विष्यत इति कन्दः[4]। 'कदि आह्वाने रोदने च'। सूरणनामानि। 'कन्दपेल्लु'॥ गण्डीन् ग्रन्थीनीरयत्यपनयतीति गण्डीरः। 'ईर [5]क्षेपे'। सम्यगस्थीन्यन्तर्वस्तूनि लात्यादत्ते समष्ठिला[6]। 'ला आदाने'। गण्डीरनामनी। '[7]एरुवंगपेल्लु'॥ के जले लम्बते कलम्बी[8]। '[9]तींगेवच्चलिपेरु'॥ उपगतमुदकं यस्याः सा उपोदका[10]। 'दुंबवच्चलि'॥ प्रशस्तानि मूलान्यस्येति मूलकम्[11]। 'मुल्लंगि'॥ हेलया रोगान् मोचयतीति हिलमोचिका। 'मुच्लृ मोक्षणे'। 'चिलुककूर'॥ १५७॥

---

[1] I, Pt_2 add 'हन हिंसागत्योः'. [2] रुचिरत्वात् D_2. [3] सूर्यत इति सूरणः, 'सूरी हिंसायाम्' Pt_2. [4] कन्द्यते रोगोऽनेनेति Pt_2. [5] 'ईर गतौ' K_6, Pt_2. [6] सम्यगष्ठिला बीजं यस्याः F_2, Pt_2. [7] 'हल्लवदने' J_2. [8] कं शिरः अग्रं लम्बमानमस्याः D_2, K_5, K_6; 'लबि शब्दे अवस्रंसने च' J_2, K_3, Pt_2. [9] 'हब्बुबसले' J_2. [10] उपशब्दोऽधिकार्थः, अधिकमुदकमस्येति Pt_2. [11] मूलमधिकं करोतीति, 'डुकृञ् करणे' I.

(पा.) अर्शोघ्नः—कन्दः। शेषे—'कण्डूरश्चित्रदण्डकः। उल्लुश्च दैत्यमदनः'। सूरणनामानि। 'कंद'। 'कन्दं त्वस्त्री चित्रदण्ड उल्लुः कण्डूरसूरणौ' इति वैजयन्ती (पृ. ६२, श्लो. २०८)। अनुक्तम्—'अस्त्रियामानुवक्रोष्टि'। 'गेणुसु'॥ 'शकुटो जलकूचिका'। 'अडिविचाम'॥ 'बृहच्छदो महापद्मो मोहमाण इमे समाः'। 'बलुरक्किस'॥ 'वज्रवल्ली काण्डलता'। 'नल्लेरु'॥ 'कन्याह्वा तु स्थलेरुहा'। 'कलुबंद'॥ 'छत्राकस्तु शिलीन्ध्रोऽहिच्छत्रं भूस्फोटमित्यपि'। 'पुट्टगोड्डुगु'॥ 'मुण्डिनी श्रमणी मुण्डा'। 'बोडतरमु'॥ 'कुणुञ्जो वनवास्तुकम्'। 'चञ्चलिकपित्थपत्रिझरसी'। 'चेंतलासि'॥ 'द्रोणपुष्पी कुरण्टिका'। 'तुम्मि'॥ 'अरण्यवासिनी घोली'। 'घोलिकूर'॥ 'क्षुद्रा सैव विचिल्लिका'। 'पावलिकूर'॥ गण्डीरः—समष्ठिला। गण्डीरनामनी। 'योरुवंग। तुरुजकूरानु'॥ कलम्बी—हिलमोचिका। कलम्ब्यादिपञ्चकं शाकविशेषवाचकम्। कलम्बी—'तीङ्गेबच्चवी'। उपोदका। 'अपोदका मत्स्यकाली'। इति [1]धन्वन्तरिपाठादपशब्दादिरपि। 'दुंप्फबच्चलि'। अस्त्री तु मूलकं। मूलकः। 'मुल्लंगि'। हिल्मोचका—'चिलुकक्रूर'॥ १५७॥

---

[1] उपोदकीति मुद्रितग्रन्थे (ध. नि. ७. ७४)

वास्तुकं शाकभेदाः स्युर्दूर्वा तु शतपर्विका ।
सहस्रवीर्याभार्गव्यौ रुहानन्ताथ सा सिता ॥ १५८ ॥
गोलोमी शतवीर्या च गण्डाली शकुलाक्षकः ।

(वि.) वास्तुकमिति—वसन्त्यत्र त्रिदोषघ्नगुणा इति वास्तुकम् । ‘वस निवासे’। ‘चक्रवर्तिकूर[1]’॥ एते कलम्ब्याद्याः पञ्च शाकभेदा इत्युच्यन्ते ॥ दूर्व्यते पशुभिरिति दूर्वा। ‘दुर्वी हिंसायाम्’। दूरं वाति गच्छतीति वा। ‘वा गतिगन्धनयोः’। [2]शतं पर्वाण्यस्यामिति शतपर्विका। महाप्रभावत्वात् सहस्रवीर्या। भृगोरियं भार्गवी। छिन्नापि रोहतीति रुहा[3]। ‘रुह बीजजन्मनि प्रादुर्भावे च’। दूरप्रसरणाद्[4] अनन्ता। दूर्वानामानि। ‘गरिकपेल्लु[5]’॥ गोरिव लोमान्यस्या इति गोलोमी। शतं[6] वीर्याणि प्रसरणरूपाण्यस्या इति शतवीर्या। सितदूर्वानामनी। ‘तेल्लगरिकपेल्लु’॥ गण्डैर्ग्रन्थिभिरल्यते भूष्यत इति गण्डाली। ‘अल भूषणादौ’। [7]मत्स्यनयनतुल्यग्रन्थियोगात् शकुलाक्षकः। शकुलाक्षकनामनी। ‘तेल्लगरिक[8] यनि कोंदरु’॥ १५८ ॥

---

[1] ‘ चक्कोत ’ J_2. [2] बहुग्रन्थित्वात् D_2, K_5, K_6. [3] मूलैरेव रोहतीति K_5, K_6.
[4] प्रसरत्वात् F_2, Pt_2. [5] ‘ करिके ’ J_2. [6] महाप्रभावत्वात् D_2, K_5, K_6.
[7] मत्स्याक्षितुल्यग्रन्थित्वात् J_2, K_6. [8] ‘ बिलियकर्क ’ J_2.

(पा.) वास्तुकं—स्युः। वास्तुकं, वास्तूकमपि। ‘वास्तूकं चक्रवास्तुकम्’ इति वाग्भटः। ‘चक्रवर्तमु’॥ शाकाख्यं पत्रपुष्पादीत्यारभ्य (श्लो. १३६) वास्तुकान्ताः (श्लो. १५८) शाकभेदाः स्युरित्युपसंहारः॥ दूर्वा तु शतपर्विका। तुशब्देन तृणप्रकरणारम्भो द्योत्यते। सहस्रवीर्या—अनन्ता। दूर्वानामानि। ‘गरिकि’। अथ सा—शतवीर्या च। श्वेतदूर्वानामनी। ‘तेल्लगरिकि’॥ गण्डाली शकुलाक्षकः। महादूर्वानामनी। ‘अथ महादूर्वा परा पुनः। गण्डाली शकुलाक्षश्च’ इति प्रतापः। ‘तींगेगरिकि’॥ १५८॥

कुरुविन्दो मेघनामा मुस्ता मुस्तकमस्त्रियाम् ॥ १५९ ॥
स्याद् भद्रमुस्तको गुन्द्रा चूडाला चक्रलोच्चटा ।

(वि.) कुरुविन्द इति—कुरुदेशं विन्दत्याश्रयत्वेनेति कुरुविन्दः। ‘विद्लृ लाभे’। [1]मेघनामान्यस्य सन्तीति मेघनामा। मुस्यति खण्डयति पित्तादिरोगानिति मुस्ता। ‘मुस खण्डने’। मुस्तकं च। मुस्तानामानि। ‘निड्डुपुगल तुंगमुस्तलपेल्लु’॥

भद्रश्चासौ मुस्तश्च[2] भद्रमुस्तकः। अतिसारादिरोगहरत्वगुणैर्द्रातीति[3] गुन्द्रा। 'द्रा कुत्सायां गतौ'। 'भद्रमुस्तलु[4]'॥ चूडां [5]लातीति चूडाला। 'ला दाने'। चक्राकारं लात्यादत्त इति चक्रला। उच्चटति रोगानिति उच्चटा[6]। 'चट[7] भेदने'। चूडालानामानि। 'वट्टुवमुस्तलपेल्लु'॥ १५९॥

[1] मेघस्य F_2, Pt_2.　[2] मुस्तकः D_2, K_5, K_6.　[3] गुणान् Pt_2.　[4] 'भद्रमुस्ते बदनीरटे' J_2.　[5] K_5, K_6 add आदत्ते.　[6] उच्चाटा J_2.　[7] 'चट स्फुट भेदने' K_5, K_6.

(पा.) कुरुविन्दो—मुस्तकमस्त्रियाम्। दीर्घमुस्तानामानि। 'निड्डुपुतुंगमुस्तेलु'। स्यात्—गुन्द्रा। भद्रमुस्तानामनी। 'भद्रमुस्तलु'। चूडाला—उच्चटा। वृत्तमुस्तानामानि। 'वट्लुवमुस्तलु'। आम्लपत्रतृणविशेषनामानीति [1]टीकासर्वस्वे (पृ. २०३, श्लो. १६०)॥ १५९॥

[1] 'अयमल्पपत्रस्तृणविशेषः' इति मुद्रितग्रन्थे.

वंशे त्वक्सारकर्मारत्वचिसारतृणध्वजाः॥ १६०॥
शतपर्वा यवफलो वेणुमस्करतेजनाः।

(वि.) वंश इति—[1]वन्यते सेव्यत इति वंशः। 'वन षण संभक्तौ'। [2]त्वचि सारो दार्ढ्यमस्येति त्वक्सारः। त्वचिसारश्च। मिथः संघट्टनादि कर्म इयर्तीति कर्मारः। 'ऋ गतौ'। तृणानां मध्ये मुख्यत्वात् तृणध्वजः[3]। शतमनेकानि पर्वाण्यस्येति [4]शतपर्वा। यवफलाभफलत्वाद् यवफलः[5]। वयन्त्यनेन कटादिकमिति वेणुः। 'वेञ् तन्तुसंताने'। मङ्क्ते नौकादिरनेनेति मस्करः। 'मकि मण्डने'। मा क्रियते[6] प्रतिषिध्यतेऽनेनेति वा। तेजयत्यग्निमिति तेजनः। 'तिज [7]निशाने'। वेणुनामानि। '[8]वेदुरुपेल्लु'॥ १६०॥

[1] D_2, K_5, K_6 add अङ्कुष्ठैः.　[2] त्वचि सरति स्थैर्यमाप्नोतीति K_5, K_6. [3] तृणानां मुख्यः K_5, K_6.　[4] बहुग्रन्थित्वात् D_2, J_2, K_6.　[5] यवसदृशानि फलान्यस्येति F_2, Pt_2.　[6] मा कीर्यते K_5; मङ्क्यते कटादिरनेन प्रसार्यते B_1.　[7] निशातने K_6. [8] 'विदिरु' J_2.

(पा.) वंशे—तेजनाः। शेषे—'मृत्युपुष्पं च यः खेलः'। वंशनामानि। 'वेदुरु'॥ शेषे—भल्लुङ्गः। 'गट्टुवेदुरु'। कृष्णसारकः। 'नल्लनिवेदुरु'॥ १६०॥

वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः ॥ १६१ ॥
ग्रन्थिर्ना पर्वपरुषी गुन्द्रस्तेजनकः शरः ।
नडस्तु धमनः पोटगलोऽथो काशमस्त्रियाम् ॥ १६२ ॥
इक्षुगन्धा पोटगला पुंभूमनि तु बल्वजाः ।

(वि.) वेणव इति—ये वेणवोऽनिलोद्धता वायुना ताडिताः स्वनन्ति ते कीचका इत्युच्यन्ते। की चेति कायन्ति शब्दायन्त इति कीचकाः। 'कै शब्दे'। 'बोंगुवेदुल्लपेरु'॥ ग्रन्थ्यते [1]सन्धिरूपेण बध्यत इति ग्रन्थिः। 'ग्रथि कौटिल्ये' 'ग्रन्थ सन्दर्भे' इति वा धातुः। पर्वति स्थूलो भवतीति पर्व। 'पर्व [2]पूरणे'। पिपर्तीति परुः। 'पॄ पालनपूरणयोः'। [3]सान्तोऽयं नपुंसकलिङ्गः। पर्वनामानि। 'वेदुरु [4]गणुपुलपेल्लु'॥ गूयत इति गुन्द्रः। 'गूञ् शब्दे'। इन्द्र इति पाठे इन्दतीन्द्रः। 'इदि परमैश्वर्ये'। तेजयति पित्तादिरोगान्[5] तनूकरोतीति तेजनकः। 'तिज निशातने'। शृणाति [6]रोगं शरः। 'शॄ हिंसायाम्'। शरनामानि। '[7]काकिवेदुरुपेंल्लु'॥ वायुवशात् नलति चलतीति नडः[8]। 'नल गतौ'। सुषिरत्वात् ध्मायते पूर्यत इति धमनः। 'ध्मा[9] शब्दाग्निसंयोगयोः[9]'। पुटति[10] गलति चेति पोटगलः। 'पुट संश्लेषणे'। नडनामानि। '[11]किक्कसकसवुपेल्लु'॥ काशत इति काशम्। 'काशृ दीप्तौ'। इक्षोरिव गन्धोऽस्या इति इक्षुगन्धा। गले मूलस्थाने पुटतीति पोटगला। 'पुट संश्लेषणे'। काशनामानि। 'रेल्लुकसवुपेल्लु'॥ बल्वाख्ये विशेषस्थाने जायन्त इति बल्वजाः[12]। 'जनी प्रादुर्भावे'। अयं शब्दः पुंसि भूम्न्येव वर्तते। '[13] मोदयवुकसवुपेल्लु'॥ १६१–२ ॥

(पा.) वेणवः—अनिलोद्धताः। ये वंशा अनिलोद्धताः सन्तः स्वनन्ति ते वेणवः कीचकाश्च स्युः। 'बोंगुवेदुल्लु'। अनुक्तम्—'विषमो निःस्तुषौ रेणौ'। 'वोलुलेनि वेदुरु'॥ ग्रन्थिः—पर्वपरुषी। सान्तद्विवचनम्। द्वे नपुंसके। ग्रन्थिनामानि। 'कणुपु'॥ गुन्द्रः—शरः। शेषे—'शरनामा भद्रमुञ्जो मुञ्जेक्ष्वतिखराः समाः'। वंशकारतृणविशेषस्य नामानि। 'कारिवेदुरुन्तु काकिचरुकुन्तु कनुमुन्तु'। अनुक्तम्—'लतावंशश्च वेत्रश्च भूधरश्च समार्थकाः'। 'पेमु'। नडस्तु—पोटगलः। शेषे—'रन्ध्री च

---

[1] काण्डसंधिरूपेण D_2, K_6. [2] 'पर्व मर्व पूरणे' K_5, K_6. [3] सकारान्तः J_2, K_5. [4] 'गंणिनवसरु' J_2. [5] °रोगं J_2. [6] दाहकं D_2, K_5, K_6. [7] 'काकाबु' J_2. [8] नलति विध्यतीति, 'नल बन्धने' Pt_2. [9] 'ध्मा पूरणे' K_5, K_6. [10] गले मूले पुटति संश्लिष्यत इति D_2, K_5, K_6. [11] 'देवनालतृणमु' K_2. [12] वलन्ते संवृण्वन्ति स्तम्बबाहुल्याद् भुवमिति बल्बजाः F_2, Pt_2; ववयोरभेदः, 'वृञ् वरणे' Pt_2. [13] 'मोदे' J_2.

नर्तकः। विभीषणः शून्यमध्यो नलः’। अन्तः सरन्ध्रस्य तृणविशेषस्य नामानि। ‘किक्किस’। अथो काशं—पोटगलः। अपचयविवक्षायां [1]स्त्रीलिङ्गो भवति काशीति। ‘इक्षुगन्धा तु काण्डेक्षुकाशयोः’ इति यादववचनात्। ‘दर्भेऽश्ववालः काशिर्ना काशोऽस्त्री स्त्रीक्षुगन्धिका’ इति वैजयन्तीवचनाच्च (पृ. ६३, श्लो. २२७) स्त्रीलिङ्गत्वमिक्षुगन्धाशब्दस्य। अश्ववालदर्भनामानि। ‘रेल्लु’॥ पुंभूमनि—बल्वजाः। पुंलिङ्गो बहुवचनश्चायं शब्दः। ‘एकश्च बल्बजो बन्धनेऽसमर्थः’ इत्यर्थवत्सूत्रे (१. २. ४५) महाभाष्यप्रयोगदर्शनादेकवचनान्तत्वमपि। मुञ्जकल्पस्य तृणविशेषस्य नाम। ‘मोदयमु’। केचिल्लिङ्गवचनद्योतनार्थस्तुशब्द इति काशादिबल्बजान्तान् पर्यायानेवाहुः॥ १६१–२॥

---

[1] गौरादित्वान्ङीप् इति टीकासर्वस्वे (पृ. २०५).

रसाल इक्षुस्तद्भेदाः पुण्ड्रकान्तारकादयः॥ १६३॥
स्याद्वीरणं वीरतरं मूलेऽस्योशीरमस्त्रियाम्।
अभयं नलदं सेव्यममृणालं जलाशयम्॥ १६४॥
लामज्जकं लघुलयमवदाहेष्टकापथे।

(वि.) रसाल इति—रस्यत इति रसालः। ‘रस आस्वादने’। रसेनालत इति वा। ‘अल भूषणादौ’। इष्यते सर्वैरिति इक्षुः। ‘इषु इच्छायाम्’। रसालनामनी। ‘चेरुकुपेल्लु’॥ तद्भेदानाह। पुण्ड्राख्यदेशे भवः [1]पुण्ड्रः। काम्यत इति कान्तारकः। ‘कमु कान्तौ’। पुण्ड्रनामनी। ‘बंगालपुचेरुकु’॥ पूर्वः श्वेतरसालः, इतरमान्ध्राः बंगालमिति वदन्ति। इत्यादयः सन्ति॥ [2]वीरयति विक्रमति [3]तीक्ष्णत्वेनेति वीरणम्[4]। [5]वीरतरं च। ‘वीर[6] विक्रान्तौ’। वीरणनामनी। ‘[7]अवुरुकसवुपेल्लु’॥ उश्यते काम्यते उशीरम्। ‘वश कान्तौ’। न विद्यते भयमनेनेत्यभयम्[8]। नलत्यर्दयतीति नलं पित्तादिकम्। तद् द्यतीति [9]नलदम्। ‘दो अवखण्डने’। ‘नल गन्धने’। सेव्यते पित्तादिशमनार्थमिति[10] सेव्यम्। ‘षेवृ [11]सेवायाम्’। मृणति हिनस्तीति मृणालं हिंस्रं, तन्न भवतीति [12]अमृणालम्। ‘मृण हिंसायाम्’। जले आशेत इति जलाशयम्। ‘शीङ् स्वप्ने’। [13]रक्तदोषं लाति नाशयतीति ला। ला मज्जासारोऽस्यास्तीति लामज्जकम्। [14]इक्षुरसवदगुरुत्वात् लघु। जठराग्नौ[15] लीयतेऽनेनेति लयम्। ‘लीङ् श्लेषणे’। अवलीयते[16] दाहोऽनेनेत्यवदाहम्। पथि इष्टकमबाधकस्थानमस्येतीष्टकापथम्[17]। वारणमूलनामानि। ‘तेल्लनिवट्टिवेरु[18]’॥ १६६–४॥

---

[1] पुणतीति पुण्ड्रः, ‘पुण कर्मणि शुभे’ F_2, Pt_2. [2] वीरयते K_5, K_6. [3] पशुषु तीक्ष्णतृणत्वेन D_2, J_2, K_6. [4] वीरतृणं K_5, K_6. [5] वीरतरुश्च D_2, J_2. [6] ‘शूर

-वीर विक्रान्तौ’ K_6. [7] ‘वट्टिवेरुचेट्टु’ K_2, K_6; ‘लामंचद पूवु’ J_2. [8] रोगहरत्वादभयम् D_2, K_5, K_6; K_2, K_5 add ‘वट्टिवेरु’; ‘लामंचदवेरु’ J_2. [9] नलमत्यर्थं पित्तादिरोगं (रोगान् I) द्यति K_5, K_6. [10] रोगहरत्वात् D_2, K_6. [11] ‘षेत्र् सेवने’ K_6. [12] हिममपि मृणालविलक्षणत्वात् K_5, K_6. [13] J_2, K_6 add जलूकावत्. [14] गुरुत्वाभावात् F_2, Pt_2. [15] जाठरोऽग्निः J_2, K_5. [16] अवनश्यति F_2, Pt_2. [17] वातवत्त्वेन गमननिरोधकत्वाद् इष्टं कापथमस्येति F_2, Pt_2. [18] ‘बिलियलामच्चदवेरु’ J_2.

(पा.) रसाल इक्षुः । शेषे—

‘पिप्पलरसो मधुतृणस्तथा ।
खड्गपत्रं कर्कटकः कान्तारो वेणुनिःसृतिः ।
मृत्युप्रसूनः ॥’

इक्षुनामानि । ‘चेरुकु’ ॥ तद्भेदा—कान्तारकादयः । आदिपदाच्छतपर्ववङ्गालनेपालादयो गृह्यन्ते । ‘चेरुकु भेदालु’ । अनुक्तम्—‘अनिक्षुस्त्विक्षुनासिका’ । ‘नल्लजेरुकु’ ॥ स्यात्—वीरतृणम् । यन्मूलमुशीरं तत्तृणस्य नामनी । ‘अवुरु’ ॥ मूलो—अमृणालम् । वीरणमूलस्य नामानि । ‘वट्टिवेल्लु’ । जलाशयं—इष्टकापथे । सेव्यामृणालशब्दौ लामज्जकेऽपि वर्तेते । तथा चोक्तं द्व्यर्थे—अमृणालं लामज्जकमुशीरं च । (अ. द्र. २. ७०) सेव्यं लामज्जकमुशीरं च । (अ. द्र. २. २१) अत एव उशीरलामज्जकयोर्भेदः ।

‘लामज्जकं [1]सुनालं स्यादमृणालं [2]लयं लघु ।
इष्टकापथकं शीघ्रं दीर्घमूलं जलाशयम् ॥’

इति वैद्यके (ध. नि. ३. ८६) दर्शनात् लघु लयमितिसंज्ञाद्वयमेतत् ।

‘लामज्जकं हितं तिक्तं रक्तपित्तविषार्तिनुत् ।
उशीरं शीतलं तिक्तं दाहक्लमहरं च तत् ॥’

इति वैद्यके च भेदो विवक्षितः । जलस्थवीरणमूलनामानि । ‘नीटवट्टिवेल्लु’ । केचिदभेदविवक्षयोशीरादीष्टकापथान्तानां पर्यायत्वमाहुः ॥ १६३–४ ॥

[1] सुरालं B_3. [2] लवमिति मुद्रितनिघण्टौ (पृ. ११३).

नडादयस्तृणं गर्मुच्छ्यामाकप्रमुखा अपि ॥ १६५ ॥
अस्त्री कुशं कुथो दर्भः पवित्रमथ कत्तृणम् ।
पौरसौगन्धिकध्यामदेवजग्धकरौहिषम् ॥ १६६ ॥

(वि.) नडादय इति—नडकाशादयः[1] गर्मुच्छ्यामाकप्रमुखाश्च तृणं तृणभेदा इत्युच्यन्ते। गीर्यतेऽस्य धान्यं मनुष्यैरिति गर्मुत्। 'गॄ निगरणे'। श्यामवर्णमकति प्राप्नोतीति श्यामाकः। 'अक अग कुटिलायां गतौ'। एते प्रत्येकं तृणविशेषाः॥ तृण्यतेऽद्यते पशुभिरिति तृणम्। 'तृणु अदने'। कौ भूमौ[2] शेते कुशम्[3]। 'शीङ् स्वप्ने'। विप्रपाणिषु कुथ्यत इति कुथः[4]। 'कुथ[5] श्लेषणे'। दृणाति करादिकमिति दर्भः। 'दॄ विदारणे'। पुनातीति पवित्रम्[6]। 'पूञ् पवने'। दर्भनामानि। 'दर्भपेल्लु[7]'॥ [8]कुत्सितं तृणं कत्तृणम्। पुरे भवं पौरम्। शोभनो गन्धः प्रयोजनमस्येति सौगन्धिकम्[9]। ध्यायते पशुभिरप्रियत्वादिति[10] ध्यामम्। 'ध्यै चिन्तायाम्'। देवेन कालेन जक्ष्यत इति देवजग्धकम्[11]। 'जक्ष भक्षहसनयोः'। यत्र तत्र वा रोहतीति रौहिषम्। 'रुह बीजजन्मनि प्रादुर्भावे च'। सौगन्धिकनामानि। '[12]कामंचिपूरिपेल्लु'॥ १६५–६॥

[1] नडकाशवल्बजेक्षुवीरणाः नडादयः सर्वे D_2, K_5, K_6. [2] भुवि J_2. [3] F_2, Pt_2 add कुं श्यति वा, 'शो तनूकरणे'. [4] विप्राः पाणिषु कुश्नन्ति J_2. [5] संश्लेषणे D_2. [6] पूयतेऽनेनेति F_2, Pt_2. [7] 'कुशपेरु' K_6. [8] Pt_2 adds पशूनामभक्ष्यत्वेन. [9] सुगन्धिकत्वात् D_2, K_5, K_6. [10] अप्रियत्वेन K_5, K_6. [11] देवेनाग्निना जग्धं देवजग्धम् F_2, Pt_2. [12] 'गंजिणिपेल्लु' B_1, I.

(पा.) नडादयः—प्रमुखा अपि। पूर्वोक्ता नडकाशाद्यास्तृणजातयस्तृणशब्देनोच्यन्ते। तथा गर्मुत् श्यामाकादयोऽपि। गर्मुत्—'गण्टे'। श्यामाकः—'चाम'। 'श्यामाको नीलपुष्पः स्यात्' इति वैजयन्ती (पृ. १२७, श्लो. ५८)। अस्त्री—कुथः। विप्रपाणिषु कुथ्यत इति। 'कुथ संश्लेषणे'। दर्भः पवित्रम्। शेषे—

'बर्हिरद्वयोः।
ऋषिशस्त्रो दीर्घमूलः पीनाहो यज्ञजागरः।
क्षुरवप्रो मुनिर्वीरा सूचिः॥'

कुशनामानि। 'कुशदर्भ'। 'लताकुशे तु शारिः स्त्री मुञ्जः स्याद् ब्रह्ममेखलः'॥ अथ कत्तृणं—रौहिषम्। सुगन्धितेजनतृणनामानि। 'कामञ्चि'। 'रामकर्पूरमु' ॥ १६५–६॥

छत्रातिच्छत्रपालघ्नौ मालातृणकभूस्तृणे।
शष्पं बालतृणं घासो यवसं तृणमर्जनम्॥ १६७॥

(वि.) छत्रेति—छत्राकारत्वात् छत्रा। अत एव छत्रमतिक्रान्तोऽतिच्छत्रः। छत्रातिच्छत्र इत्येकं वा नाम। नैष्ठुर्यात् पालं पालकं रक्षकं हन्तीति [1]पालघ्नः। 'हन

हिंसागत्योः’। छत्रानामानि। ‘छत्राकारमैनतृणमुपेल्लु’॥ मालारूपाणि तृणान्यस्येति मालातृणकम्[2]। भूरित्यव्ययम्। तस्यां तृणं भूस्तृणम्[3]। मालातृणकनामनी। ‘चिप्पकसवुपेल्लु’॥ शस्यते पशुभिर्भक्षणेनेति शष्पम्। ‘शसु हिंसायाम्’। ‘शंसु स्तुतौ’ वा धातुः। बालं च तत् तृणं च बालतृणम्। शष्पनामनी। ‘तेंतकसवुपेल्लु’॥ घस्यते पशुभिरिति घासः। ‘घस्लृ अदने’। यूयते [4]मिश्रीक्रियते लावकैर्बन्धनकाल इति यवसम्। ‘यु मिश्रणे’। घासनामनी। ‘वेंतपूरि’॥ तृण्यते पशुभिरिति तृणम्। ‘तृणु अदने’। पशुग्रासार्थमर्जतेऽर्जनम्[5]। ‘अर्ज [6]अर्जने’। अर्जुनमिति वा पाठः। तृणनामनी। ‘सामान्यमुगा कसवुपेल्लु’॥ १६७॥

---

[1] पलं मांसं हन्ति तैक्ष्ण्यादिति पलघ्नः। पलघ्न एव पालघ्नः Pt_2. [2] मालारूपतृणत्वात् K_5, K_6. [3] भुवं संस्तृणातीति, ‘स्तृञ् आच्छादने’ Pt_2. [4] मिश्रीयते K_5; यौतीति F_2, Pt_2. [5] अर्ज्यते I. [6] ‘अर्ज षर्ज अर्जने’ K_6.

(पा.) छत्रा—पालघ्नौ। छत्रेति भिन्नं पदं, स्त्रीलिङ्गं च। अतिच्छत्रपालघ्नौ पुंलिङ्गेऽपि। तथा च रुद्रः—

‘आतपत्रं मतं छत्रं छत्रा मधुरिका मता।
अतिच्छत्रोऽपि छत्रः स्याच्छत्रा धान्याकमुच्यते॥’

इति। छत्रातिच्छत्र इत्येकपदमिति केचित्। छत्रा द्रोणिका अतिच्छत्रपालघ्नौ देवद्रोणिकेति केचित्। ‘ऋषणी द्रोणिका छत्रा चक्षुष्या द्रोणपुष्पिका’ इति वैजयन्ती (पृ. ५५, श्लो. १२४)। देवद्रोणीति गोपालः। छत्राकारस्य तृणविशेषस्य नामानि। ‘गुड्ढिकामंचि’। मालातृणकभूस्तृणे। सकाररहितं भूतृणमिति केचित्। यस्य ग्रन्थिस्थानेषु परिमण्डलावयवा भवन्ति स भूतृणाख्यः शाकविशेषः। ‘तथा च भूस्तृणशिग्रुसर्षप—’ इत्यादि शाकप्रकरणे विष्णुवचनं (विष्णुस्मृतिः ७९. १७) स्मृतिचन्द्रिकाकारः पपाठ। भूतृणनामनी। ‘तुम्मिकूर’। वैद्यके तु—(ध. नि. ८. ४२).

‘[1]भूस्तृणं रोहिणं[1] भूतिर्भूम्यूतिश्च[1] कुटुम्बकः।
मालातृणं च [1]पालघ्नः छत्रातिच्छत्रकस्तथा॥’

इति छत्रादिभूस्तृणान्तानां पर्यायत्वमाह। ‘चिप्पकसवु’। शष्पं बालतृणम्। अमरमालायां पुंस्यप्युक्तम्। नवतृणनामनी। ‘वेंतकसवु’। नीलदूर्वानामापि। ‘नीलदूर्वा भवेच्छष्पं शाद्वलं हरिता तथा’ इति माधवः। घासो—अर्जुनम्। तृणसामान्यनामानि। ‘कसवु’। घासादिद्वयं पशुभक्ष्ये, तृणादिद्वयं तृणसामान्य इति वदन्ति। अन्ये शष्पादिचतुष्टयं बालतृणे, तृणादिद्वयं तृणमात्र इति वदन्ति॥ १६७॥

---

[1] भूतृणं, रोहिणः, भूतिकोऽथ, सुमालीति मुद्रितनिघण्टौ (पृ. ३६०).

तृणानां संहतिस्तृण्या नड्या तु नडसंहतिः ।
तृणराजाह्वयस्तालो नालिकेरस्तु लाङ्गली ॥ १६८ ॥

(वि.) तृणानामिति—तृणानां समूहः तृण्या । ‘[1]गड्डिकुप्प’ ॥ [2]नडतृणानां समूहो नड्या । ‘किक्कसवुकसवुकुप्प’ ॥ [3]तृणानां राजा मुख्यः तृणराजः । तृणराजः इत्याह्वयो यस्येति तृणराजाह्वयः । तलति प्रतिष्ठते दृढमूलत्वात् तालः । ‘तल प्रतिष्ठायाम्’ । तालनामनी । ‘ताटिचेट्टुपेल्लु’ ॥ नाल्या कमुदकमीरयतीति नालिकेरः । ‘ईर क्षेपे’ । नालीकानि नालयुक्तानि फलादीनीरयति वर्धयतीति वा । लाङ्गलवत् कुञ्चिताग्रावयवत्वात् [4]लाङ्गली । नालिकेरनामनी । ‘नारिकेलवृक्षमु (टेंकायचेट्टु[5])’ ॥ १६८ ॥

(पा.) तृणानां—तृण्या । तृणसमूहनाम । ‘गड्डिमोपु । अदे कुप्पैतेनुवरड्ढमु’ । ‘वरण्डस्तृणसञ्चयः’ इति वैजयन्ती (पृ. १२८, श्लो. ६५) । ‘पूल्मु’ । ‘पूलोऽस्त्री तृणपञ्चिका’ इति वैजयन्ती (पृ. १२८, श्लो. ६४) ॥ नड्या—नडसंहतिः । नडसमूहनाम । ‘किक्किसवामि’ । शेषे—‘पुञ्जिलस्तु तृणस्तम्बे’ । तृणगुल्मनाम । ‘गड्ढिदुब्बु’ । ‘इषीकात्र सकण्टके’ । कण्टकसहिततृणस्तम्बनाम । ‘मुंझदुब्बु’ । ‘मुञ्जस्तु यज्ञियो मेध्यो मृदुत्वग्ब्रह्ममेखलः’ । मुञ्जदर्भनामानि । ‘उल्लूनस्तूलपो दर्भ ऊर्ध्वमूलः खरच्छदः’ । उलपदर्भनामानि ॥ तृणराजाह्वयस्तालः । शेषे—

‘दीर्घस्कन्धो द्रुमेश्वरः ।
फलेरुहो महापत्रस्तलो भूमिपिशाचकः ॥
कालो दीर्घतरुर्लेख्यपत्रकश्च दुरारुहः ।
ध्वजद्रुमो द्रुमश्रेष्ठः ॥’

तालनामानि । ‘ताडि’ । नारिकेलः—लाङ्गली । शेषे—

‘नारिकेलो रसफलः सुतुङ्गः कूर्चकेसरः ।
लालावृक्षो दृढफलो दाक्षिणात्यः सुपत्रकः ।
तृणराजो महाप्रांशुर्दृढमूलो महाफलः ।
जीवनध्रुवको रोही दीर्घदण्डः सुनीरकः ।
घटोदकः स्कन्धफलो बली चापि सुराफलः ॥’

---

[1] ‘वामि’ K_6. [2] नडसमूहो K_5; ‘नड अनेडि कसवुकुप्प’ K_6. [3] तृणमध्ये मुख्यत्वात् D_2, K_5. [4] लाङ्गलाकारपत्रत्वात् F_2, Pt_2. [5] ‘नालिकेर’ J_2.

नारिकेरनामानि। ‘नारिकेरमु’।

‘[1]नारिकेरे तु लाङ्गली।
दाक्षिणात्यो नीरफलः सुतुङ्गः कूर्चकेसरः।
सुराफलो नली च’।

इति वैजयन्ती (पृ. ६३, श्लो. २२०–१)। शेषे—‘ह्रस्वे त्वखण्डुकः’। ‘चेन्नंगि’। ‘रक्तेऽग्निकः स्वर्णः’। ‘येर्निकायलनारिकडमु’। ‘अस्य पट्टके परिक्रोणा’। ‘नारिकडपुदोत्ति’। ‘फलं त्वस्य चोर्चं च घटसंज्ञकम्’। ‘नारिकडपुकाय’॥ १६८॥

घोण्टा तु पूगः क्रमुको गुवाकः खपुरोऽस्य तु।
फलमुद्वेगमेते च हिन्तालसहितास्त्रयः॥ १६९॥
खर्जूरः केतकी ताली खर्जूरी च तृणद्रुमाः।

इति वनौषधिवर्गः

(वि.) घोण्टेति—घुणन्ति भ्रमन्त्यनया [1]जना इति घोण्टा। ‘गुंण भ्रमणे’। [2]पुनाति मुखं फलेनेति पूगः। ‘पूञ् पवने’। [3]क्रामन्त्यस्मिन् फलार्थिन इति क्रमुकः। ‘क्रमु पादविक्षेपे’। गुवति मलं निःसारयत्यनेनेति गुवाकः। ‘गु पुरीषोत्सर्गे’। खानीन्द्रियाणि पृणोतीति खपुरः। ‘पृ प्रीतौ’। ‘[4]पोंकचेट्टु’॥ उद्गतो [5]वेगोऽस्येति उद्वेगम्। उद्विजन्तेऽस्माद् दुर्बला इति वा उद्वेगम्। ‘ओविजी भयचलनयोः’। ‘पोंकपण्डु’॥ हिनोति वर्धते तलति प्रतिष्ठत इति हिन्तालः। ‘हि गतौ वृद्धौ च’। ‘हितालमु’॥ हिन्तालसहिताः प्रागुक्तास्तृणराजा नालिकेरक्रमुकाख्यास्त्रयो वृक्षाः तृणद्रुमा इत्युच्यन्ते। खर्जति रक्तपित्तमिति खर्जूरः। ‘खर्ज व्यथने’। ‘खर्जूरमुपेरु’॥ कित्यते ज्ञायते गन्धेनेति केतकी[6]। ‘कित ज्ञाने’। ‘मोगलिचेट्टुपेरु’॥ तलति प्रतिष्ठते ताली। ‘तल प्रतिष्ठायाम्’। ‘श्रीतालमुपेरु[7]’॥ खर्जति रोगं खर्जूरी। ‘खर्ज[8] व्यथने’। ‘वेर्ट्रींदुपेरु’॥ [9]एते चत्वारो वृक्षा अपि तृणद्रुमा इत्युच्यन्ते॥ १६९॥

इति श्रीलिङ्गयसूरिविरचितायाममरकोशपदविवृतौ वनौषधिवर्गः

---

[1] ‘नालिकेरः . . . अप्फलोऽबालः सुत(तु)ङ्गः कूर्चकेसरः। सदाफलो बली च’ इति मुद्रितग्रन्थे (पृ. ६३).

[1] पुरुषाः K_5, K_6; नराः B_1, J_2. [2] पवते, 'पूङ् पवने' D_2, K_5, K_6. [3] क्राम्यन्त्यस्योपरि D_2, K_6. [4] 'अडकेरे' J_2. [5] K_5, K_6 add प्रवाहः. [6] गन्धोऽनेनेति K_6, Pt_2. [7] 'पेद्दयीन्दु' K_2, K_6. [8] 'खर्ज व्यथने पूजने च' B_1, D_2; खर्जयति K_6, Pt_2. [9] खर्जूरश्च केतकी च ताली च खर्जूरी च एते I.

(पा.) घोण्टा—गुवाकः। गूवाक इति वा। 'गुवाकोऽपि च गूवाकः' इत्युभयत्र तारपालः। खपुरः। शेषे—आसवः क्रूरः कषायस्त्रिवाटी रागवान् वीटिका। क्रमुकनामानि। 'पोंकमानु'॥ अस्य—अस्त्री स्यात्। शेषे—स्रंसिपर्कटम्। पूगादिशब्दाः नपुंसकलिङ्गाः सन्तः फलवाचकाः। घोण्टाशब्दः स्त्रीलिङ्गः सन्नेव फलवाचकः। तथा च प्रतापः—

'अस्य तु।
फलं पूगफलस्रंसि गुडा घोण्टा फलं भवेत्॥
उद्वेगश्चिक्कणश्चिक्का चिक्कणं च प्रकीर्तितम्।
तथा गोपफलं चेति॥'

क्रमुकफलनामानि। 'पोंकलु'। अत्र तु—'पक्के पोढम्'। 'पंडुपोंक'। 'खरं शुष्के'। 'यॆंडुपोंक'। 'मसृणे चिक्कचिक्कणे'। 'चिक्किनीचक्क'। 'दीर्घवृन्ते रामपूगः'। 'तोडिमेनिड्डुवैनपोंक'। 'लतापूगे तु योजनः'। 'सूदिगोंटि'। 'भूपूगे लघुकः'। 'तोंटपोंक'। 'क्षुद्रफले बोदाबकापि च'। 'सन्नपुपोंक'। 'गौलेयकः शैलजातपूगः'। 'कारुपोंक'। 'पूगस्य पटकी खपुरः'। 'पोंकजबर'। 'पुष्पपट्टे तु कुहली घटिकेति च'। 'पोंकपोत्ति'। तालागमाद्या एते च॥ हिन्तालः—तृणद्रुमाः। एते प्रागुक्तास्त्रयस्तालागमाद्यास्तालनारिकेलपूगा हिन्तालसहिताः खर्जूरादयश्चत्वारः शब्दास्तृणद्रुमा इत्युच्यन्ते। 'येनिमिदिन्नि तृणद्रुममुलु'। शेषे—'हिन्तालस्तृणराजश्च लताङ्कुरक इत्यपि'। हिन्तालनामानि। 'गिरुकताडि'। 'महारसो मधुक्षीरः परूषः पाण्डुरेव च। खर्जूरः'। खर्जूरनामानि 'खजूरमु'। 'पेरींदुन्तु'।

'पत्रलायां तु फलपाकान्तिकेत्यपि।
ताली दृढफला नाली श्रीतालो च वराङ्गना॥'

श्रीतालीनामानि। 'श्रीताडि'।

'[1]हलीमे केतकी न क्ली दीनो व्यञ्जनजम्बुलौ[2]।
स्त्रीभूषणो[3] रजःपुष्पो गुप्तरागो बलीनकः॥'

इति वैजयन्ती (पृ. ६३, श्लो. १२३)। केतकीनामानि। 'मोगलि'। 'सा पीता मदनद्रोणी सुगन्धिः कनकच्छदा'। 'गेदंगि'। 'परूषी चापि खर्जूरी निस्त्वचा दृढकण्टका'। खर्जूरीनामानि। 'चिट्टीन्दु'॥ १६९॥

इति वनौषधिवर्गः

[1] हरिमः B_3. [2] जम्बुकौ B_3. [3] भूषणं B_3.

---

५. सिंहादिवर्गः

सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिः।
(कण्ठीरवो मृगरिपुर्मृगदृष्टिर्मृगाशनः[1]।
पुण्डरीकः पञ्चनखचित्रकायमृगद्विषः॥)
शार्दूलद्वीपिनौ व्याघ्रे तरक्षुस्तु मृगादनः॥ १॥

(वि.) अथ सिंहादिवर्ग आरभ्यते—सिंह इति। हस्त्यादिकं [2]हिनस्तीति सिंहः। 'हिसि हिंसायाम्'। मृगाणामिन्द्रः श्रेष्ठः मृगेन्द्रः[3]। पञ्चत[4] इति पञ्चम्। 'पचि विस्तारे'। पञ्चं विस्तृतमास्यमस्येति[5] पञ्चास्यः। हरिणी कपिलवर्णेऽक्षिणी अस्येति हर्यक्षः[6]। के शिरसि सरन्तीति केसराः सटाः, तेऽस्य सन्तीति केसरी। हरति गजादिकं हरिः। 'हृञ् हरणे'। [7]सिंहनामानि। 'सिंहमुपेल्लु'॥ शृणाति बलीवर्दादिकमिति शार्दूलः। 'शॄ हिंसायाम्'। [8]द्वीपमाश्रयो यस्य स द्वीपी। व्याजिघ्रतीति व्याघ्रः[9]। 'घ्रा गन्धोपादाने'। व्याघ्रनामानि। 'पेद्दपुलिपेल्लु'॥ तरं प्लवमत्यर्थं क्षिणोतीति तरक्षुः। 'क्षिणु हिंसायाम्'। मृगानत्तीति मृगादनः। 'अद भक्षणे'। तरक्षुनामनी। 'सिवंगिपेल्लु'॥ १॥

[1] पिङ्गदृष्टिः Pt_2. [2] हन्तीति, 'हन हिंसागत्योः' J_2. [3] मृगेषु बलवान् D_2, K_5, K_6. [4] पञ्च्यते W_2. [5] D_2, K_6 add मुखं. [6] कपिलाक्षत्वात् D_2, K_6, W_2. [7] K_6, Pt_2 add कण्ठे रवो यस्य कण्ठीरवः। मृगाणां रिपुः। पिङ्गे दृष्टी यस्य। मृगाणामधिपः मृगाधिपः. [8] F_2, Pt_2 add निवासत्वेन. [9] K_6, Pt_2 add पञ्च विस्तृता नखा नखरा यस्य पञ्चनखः, चित्रः कायो यस्य चित्रकायः, पुण्डं मांसं रीकति हरतीति पुण्डरीकः, मृगाणां द्विट् मृगद्विट्.

(पा.) सिंहो—हरिः। 'हलीक्ष्णस्तृणसिंहः स्यात् कुटरुर्मृगसिंहकः' इति वैजयन्ती (पृ. ६५, श्लो. २)। अभेदादत्रोक्तम्। शेषे—

'कण्ठीरवो मृगरिपुः पारीन्द्रः श्वेतपिङ्गलः।
महानादश्च शार्दूलो हरितोऽतुल्यविक्रमः।
सुगन्धिः सिन्धुरद्वेषी व्यादीर्णवदनो हरित्॥'

यादवप्रकाशेऽपि—

'कण्ठीरवो मृगरिपुः सुगन्धिर्हरितो हरित्।
व्यादीर्णास्यो महानादः शार्दूलोऽतुल्यविक्रमः।
हरिर्मृगेन्द्रो हर्यक्षः पारीन्द्रः श्वेतपिङ्गलः॥'

सिंहनामानि। 'सिंहमु'। हलीव हलवानिव कुटिलनखतया ईक्ष्यत इति हलीक्ष्णः। तृणमपि हिनस्तीति तृणसिंहः। मृगान् हिनस्ति मृगसिंहकः। शार्दूलद्वीपिनौ व्याघ्रे। शेषे—

'तत्र व्यालो गुहाशयः।
पुण्डरीकस्तीक्ष्णदंष्ट्रस्तरस्वी घोरदर्शनः।
मृगातपञ्चनखो हुण्डो हिंसारुश्चण्डकश्च सः॥'

व्याघ्रनामानि। 'पुलि'। शेषे—

'खर्वेऽस्मिन् मेहनो मेही भेलश्चुलुकचित्रकौ।
द्वीपी पित्वश्चित्रकायः॥'

यादवप्रकाशेऽपि—

'स्वल्पकस्त्वयम्।
मेलो मेही च चुलुको द्वीपी पित्वश्च चित्रकः।
चित्रकायश्च॥'

इति। 'चिरुतपुलि'। तरक्षुः—मृगादनः। शेषे—

'तरक्षश्च मृगाजीवस्तिलित्सश्च मृगार्दनः।
मृगाददेहिभेदे च तिलित्सः स्यात्॥'

इति गोपालः। कुर्कुरप्रायस्याल्पव्याघ्रस्य नामानि। 'शिवंगि'॥ १॥

वराहः सूकरो घृष्टिः कोलः पोत्री किरिः किटिः ।
दंष्ट्री घोणी स्तब्धरोमा क्रोडो भूदार इत्यपि ॥ २ ॥

(वि.) वराह इति—वरं श्रेष्ठं [1]सस्यं पोत्रेणाहन्तीति[2] वराहः। 'हन हिंसागत्योः'। बहून्यपत्यानि सूते सूकरः। 'षूञ् प्राणिप्रसवे'। उन्नतप्रदेशान् [3]कूलादीन् घर्षतीति घृष्टिः। 'घृष [4]संकर्षणे'। कोलति संहताङ्गो भवतीति कोलः[5]। 'कुल संस्त्याने'। दीर्घं पोत्रं [6]मुखाग्रमस्यास्तीति पोत्री। पोत्रेण क्षितिं किरतीति किरिः। किर इति वा। 'कॄ विक्षेपे'। केटति[7] स्वयमेकाकी गच्छतीति किटिः। 'किट गतौ'। दंष्ट्रास्यास्तीति[8] दंष्ट्री। स्थूला घोणास्यास्तीति घोणी। स्तब्धानि रोमाण्यस्य सन्तीति स्तब्धरोमा। क्रुडति[9] क्रमेण घनत्वं प्राप्नोतीति क्रोडः। 'क्रुड घनत्वे'। [10]भुवं दारयतीति भूदारः। 'दॄ विदारणे'। [11]वराहनामानि ॥ 'अडवि पन्दिपेल्लु[12]' ॥ २ ॥

---

[1] शाल्यादिकं D_2, K_5, K_6. [2] J_2 adds आदत्ते. [3] कूलानि K_5, K_6. [4] संघर्षे B_1, D_2. [5] पीनत्वात् कोलः K_5, K_6. [6] मुखेऽस्तीति W_2. [7] किटति स्वैरं F_2, Pt_2. [8] सन्तीति Pt_2. [9] क्रोडति D_2, K_5, Pt_2. [10] J_2, K_5, W_2 add पोत्रेण. [11] अरण्यसूकरनामानि W_2. [12] 'काडहन्दि' J_2.

(पा.) वराहः—भूदार इत्यपि। किर इत्यकारान्तोऽपि। 'वराहश्च किरः किरिः' इति यादवः। शेषे—

> 'जलप्रियो वक्रदंष्ट्रः पीनस्कन्धस्तलेक्षणः ।
> काकरूपी स्थूलनासः कुमुखश्च बहुप्रजः ॥
> [1]दंष्ट्रायुधश्चाफसिकः(?) पङ्कक्रीडश्च रोमशः ॥'

इति। वराहनामानि। 'दंष्ट्रायुधः कामरूपी कुंदारो मुखलाङ्गलः'। एतानि च ॥ २ ॥

---

[1] दंष्ट्रायोधः B_3.

कपिप्लवंगप्लवगशाखामृगवलीमुखाः ।
मर्कटो वानरः कीशो वनौका अथ भल्लुके ॥ ३ ॥
ऋक्षाच्छभल्लभालूका गण्डके खड्गखड्गिनौ ।
लुलायो महिषो वाहद्विषत्कासरसैरिभाः ॥ ४ ॥

(वि.) कपिरिति—प्रायेण कम्पते चलतीति कपिः। 'कपि चलने'। प्लवैरुल्लङ्घनैर्गच्छतीति प्लवंगः[1]। प्लवगश्च। 'गम्लृ[2] गतौ'। शाखासु संचारी मृगः शाखामृगः[3]। श्लथं चर्म वली, सा मुखेऽस्य वलीमुखः[4]। मिथः संश्लिष्टशाखासंकटे म्रियत इति मर्कटः। 'मृङ् प्राणत्यागे'। मर्कति गच्छतीति वा। 'मर्क ग्रहणे'। नर इव वानरः। की इत्यनुकरणशब्दं कर्तुमीष्टे कीशः। 'ईश ऐश्वर्ये'। वने[5] ओकः स्थानमस्य वनौकाः। सान्तः। वानरनामानि। 'कोन्तिपेल्लु'॥ [6]भल्लते हिनस्ति क्रिमीनिति भल्लुकः। भल्लूकश्च। 'भल्ल भल परिभाषणहिंसादानेषु'। [7]ऋक्ष्णोति हिनस्ति क्रिमीनिति ऋक्षः। 'ऋक्ष हिंसायाम्'। ऋष्यते गहनमनेनेति वा। 'ऋषी गतौ'। अच्छेनाभिमुख्येन भल्लते हिनस्तीति अच्छभल्लः। भलत इति भालूकः। 'भल परिभाषणहिंसादानेषु'। भल्लूकनामानि। '[8]एलुंगुपेल्लु'॥ प्रशस्तो गण्डोऽस्यास्तीति गण्डकः[9]। गण्डति वर्धयत्यास्यमिति वा। 'गडि वदनैकदेशे'। खडयति जिघांसन्तं भिनत्तीति [10]खड्गः। 'खडि भेदने'। खड्गो हिंस्रं शृङ्गमस्यास्तीति खड्गी। खड्गमृगनामानि। '[11]गण्डमृगमुपेल्लु'॥ पङ्के लुलति लोडतीति [12]लुलायः। 'लुड विलोडने'। डलयोरभेदत्वात्। 'लुल संश्लेषणे' इति वा धातुः। सत्त्ववत्वात् मह्यत इति महिषः। 'मह पूजायाम्'। मह्यां शेत इति वा। 'शीङ् स्वप्ने'। वाहानामश्वानां समूहो वाहं; तद् द्वेष्टीति वाहद्विषत्[13]। 'द्विष अप्रीतौ'। महाकायत्वात् ताड्यमानोऽपि का ईषत् सरतीति कासरः। 'सृ गतौ'। सीरा एषां सन्तीति सीरिणः बलीवर्दाः। सीरिभिः सह भातीति सैरिभः[14]। 'भा दीप्तौ'। महिषनामानि॥ '[15]कारेनुपोतुपेल्लु'॥३–४॥

---

[1] प्लवो लङ्घनं तेन गच्छतीति F_2, Pt_2; K_5, K_6 add 'प्लुङ् गतौ'.
[2] 'गम्लृ सृप्लृ गतौ' I, J_2, W_2.
[3] शाखाचारी (संचारी I, J_2) मृगः F_2, Pt_2.
[4] वलयो मुखेऽस्य सन्तीति D_2, K_5, K_6.
[5] वनं F_2, Pt_2.
[6] भल्लति K_5, K_6.
[7] ऋक्षति K_5, K_6.
[8] 'करडि' J_2.
[9] गण्डति गण्डस्थलवत् D_2, K_6.
[10] खण्डयति तीक्ष्णत्वात् खड्गः शृङ्गं, तद्योगात् F_2, Pt_2.
[11] 'खड्गमृगमु' Pt_2.
[12] लोलनं लुलस्तमयतीति, 'अय गतौ' F_2, Pt_2.
[13] वाहस्य हयस्य द्विषत् शत्रुः F_2, Pt_2.
[14] सीरिभिर्हलयुक्तैः पशुभिः भान्तीति सीरिभाः कर्षकाः, तेषामयं F_2, Pt_2.
[15] 'काडकोण' J_2.

(पा.) कपिः—वनौकाः। शेषे—

'च प्लवङ्गमः।
महावेगो दधिमुखः कुरङ्गो भल्लुकः [1]पृथुः।
सालावृको हरिश्चापि॥'

'भल्लूकौ कपिभल्लूकौ' इति चिन्तामणिः। 'महावेगो दधिमुखः कुरङ्गो भल्लुकः पृथुः' इति वैजयन्ती (पृ. ६८, श्लो. ४०)। कपिनामानि॥ अथ गोलाङ्गूलोऽसितराननः।

नीलशीर्षोऽपि। नीलशीर्षीति नकारान्तोऽपि। स्त्रियां नीलशीर्षीत्यपि। 'कोण्डमुच्चु' शेषे—अथ क्ष्विङ्को रक्तास्यः। स्त्रियाम्—क्ष्विङ्का। तथा च पुरुषमृग इत्यनुवाके। क्षुरे। 'सा ज्ञेया वानरी क्ष्विङ्का यस्या रक्तमुखं भवेत्' इति। 'चिंकलिक्क'। शेषे—नीलजः कपिः नीलकः। नीलेन वर्णेन नीलात्पर्वताद्वा जातो नीलजः। स नीलकः इत्युच्यते। 'कोंडेङ्ग'। शेषे—कर्म भावश्च कापेयम्। कर्मभावयोः कापेयशब्दः स्यात्। अथ भल्लुके—भल्लूकाः। बाल्लूक इत्यपि क्वचित्। शेषे—'भल्लाटो मृगधूर्तकः'। 'भल्लाच्छौ दीर्घरोमाक्षे'। 'भल्लौ भल्लूकबाणौ स्तः' इति धरणिः। 'अच्छौ निर्मलभल्लूकौ' इत्यजयः। ऋक्षशब्द ऋकारादिः। 'भल्लूको दीर्घरोमर्क्षो भल्लाटो [2]वृकधूर्तकः' इति वैजयन्ती (पृ. ६५, श्लो. ७)। केषांचिद् रिशब्दादिरपि। '[3]रिक्षहर्यक्षकक्षरी' (द्विसं. १८. ५८) इति राघवपाण्डवीयम्। अच्छभल्ल इत्येकं नाम। 'विकरालोऽच्छभल्लश्च' इति वैजयन्ती (पृ. ६५, श्लो. ७)। केषांचिन्नामद्वयम्, 'अच्छः स्फटिकभल्लूकनिर्मलेष्वच्छमव्ययम्' (पृ. ३१, श्लो. १)। 'भल्लो भल्ली च बाणे स्याद् भल्लो भल्लूक[4] इष्यते' (पृ. १५१, श्लो. ३०) इत्युभयत्र विश्वप्रकाशिका। भल्लूकनामानि॥ गण्डके खड्गखड्गिनौ। शेषे—'वार्ध्रीणसो वनोत्साहस्तत्र वार्ध्रोणसोऽपि च'। खड्गमृगनामानि॥ लुलायो—सैरिभाः। शेषे—

'लोहिताक्षः कृष्णशृङ्गो वीरस्कन्धो रजस्वलः।
जरन्तः कलुषः पोत्री जलात्मा गद्गदस्वरः।
स्कन्धशृङ्गो यमरथः कटादो दंशलालिकौ[5]।
[6]हंसकालीसुतः शृङ्गी हेरम्बः कृष्ण इत्यपि॥'

महिषनामानि। शेषे—'सृजयो गवलः कृष्णः'। कृष्णमहिषनामानि। 'स परस्वानरण्यजः'। स महिषोऽरण्यजश्चेत् परस्वानित्युच्यते। 'कामाय परस्वान्' (तै. सं. ५. ५. ११. १) इत्यत्र परस्वानरण्यमहिष इति क्षुरे। परःशब्दोऽसुन्नन्तो मांसपर्यायः! अरण्यमहिषनाम॥ ३–४॥

[1] करी B_3.
[2] मृग° B_3.
[3] 'रिक्षकर्यर्थकक्षरि' इति मुद्रितग्रन्थे.
[4] भल्लुक इति मुद्रितग्रन्थे.
[5] 'कटाहो दंशलालिकः' इति वैजयन्त्याम् (पृ. ६५, श्लो. १०).
[6] हासः B_3.

स्त्रियां शिवा भूरिमायुगोमायुमृगधूर्तकाः।
सृगालवञ्चकक्रोष्टुफेरुफेरवजम्बुकाः॥ ५॥
ओतुर्बिडालो मार्जारो वृषदंशक आखुभुक्।

(वि.) स्त्रियामिति—शकुनेन मोदहेतुत्वात् शिवा। भूरयो माया यस्य भूरिमायुः। भूरिमाय इति वा पाठः। गा मिनोति क्षिपतीति गोमायुः। 'डुमिञ् प्रक्षेपणे'। मृगेषु धूर्तो मृगधूर्तकः। वने तत्र तत्र सरति, सृजति मायामिति वा सृगालः। 'सृ गतौ' 'सृज विसर्गे'। असृगालातीति वा। 'ला आदाने'। [2]वञ्चयतीति वञ्चकः। 'वञ्चु [3]प्रलम्भने'। क्रोशतीति [4]क्रोष्टुः, क्रोष्टा वा। 'क्रुश आह्वाने रोदने च'। फे इति[5] रौतीति फेरुः। फेरवश्च[6]। 'रु शब्दे'। मांसं जमत्यत्तीति जम्बुकः। 'जमु अदने'। शृगालनामानि। 'नक्कपेल्लु'॥ अवति मूषकबाधाया ओतुः। 'अव [8]रक्षणे'। विडति मूषिकान् विडालः। 'विड भेदने'। विडवद् अस्पृश्यं मूलं पुच्छमस्येति वा। आखुभक्षणेन[9] गृहं मार्ष्टि मार्जारः। 'मृजूष् शुद्धौ'। वृषान् मूषकान् दशतीति वृषदंशकः। 'दंश [10]अदने'। आखुं भुङ्क्ते आखुभुक्। 'भुज पालनाभ्यवहारयोः'। मार्जारनामानि॥ '[11]पिल्लिपेल्लु' ॥ ५॥

(पा.) स्त्रियां शिवा—जम्बुकाः। पुमभिधानोऽपि स्त्रीलिङ्ग एवेति स्त्रियां शिवेति। भूरिमायोऽदन्तः[1] इति टीकासर्वस्वकारः। शेषे—

'भरुजश्चापि फेरुण्डः श्वभीरुर्मृगमर्तकः।
शयालुः सूचको घोरः'॥

जम्बुकनामानि। तथा च यादवः—(वैजयन्ती पृ. ६८, श्लो. ३७–८)

'सृगालो भरुजः क्रोष्टा श्वभीरुर्मृगमर्तकः[2]।
शयालुः सूचको घोरः फेरुफेरुण्डफेरवाः॥'

इति। स्वल्पे तत्र किखिः स्त्रियाम्। पुमभिधानेऽपि स्त्रीलिङ्गः। 'किखिः स्त्री क्रोष्टुभेदेऽल्पे[3]' इति वैजयन्ती (पृ. ६८, श्लो. ३९)। अल्पजम्बुकनाम॥ पृथौ गृण्डिवलोपाशौ। 'पृथौ लोपाशगृण्डिवौ[4]' इति वैजयन्ती (पृ. ६८, श्लो. ३९)। पृथुजम्बुकनामनी॥ 'नाक्रो नक्रमुखे स्मृतः'। नक्रमुखजम्बुकनाम॥ ओतुः—आखुभुक्। शेषे—'जहको गात्रसंकोची मण्डली नखरायुधः'। मार्जालनामानि। शेषे—'लोमशोऽन्यो विडालः स्यात् पूतिकः शालिजातिकः'। पूतिमार्जारनामानि। कशशब्दोऽप्यत्र। 'कशो लोमश' इति क्षुरे। 'मार्जारिका वेधमुख्या'। 'पुनुगुपिल्लि'। 'मदनी [5]गन्धचेलिका'।

---

[1] शकुनावेदक(दनहेतु K_3)त्वात् K_5, K_6; अयं शब्दः स्त्रियाम् K_6.　[2] D_2, J_2, K_5 add बुद्ध्या.　[3] कौटिल्ये F_2, Pt_2.　[4] उकारान्तः ऋकारान्तश्च F_2, Pt_2.　[5] B_1, K_6 add अव्यक्तं.　[6] फे इति रवो यस्य D_2, K_2, Pt_2.　[7] मूषकोपद्रवेभ्यः K_5, K_6; °द्रवात् J_2.　[8] रक्षणादौ D_2, Pt_2.　[9] ग्रहणेन J_2, Pt_2.　[10] दंशने K_6, W_2.　[11] 'वेक्कु' J_2.

'जवादिपिह्लि'। शेषे—'गोधा पञ्चनखी गोवी निहाका दीर्घपुच्छिका। मुसली'॥ बिलगोधा जलगोधा तरुगोधा गृहगोधा शिलागोधेति गोधा बहुविधाः। गोधासामान्यनामानि। 'उड्डुमु'। वृक्षजाता[6] सा शयण्डक उदाहृतः। तरुगोधानाम॥ ५॥

[1] दान्तः B_3; मुद्रितग्रन्थे तु 'भूरि अनन्ता माया अस्येति भूरिमायः' इत्येव दृश्यते (पृ. २१८). [2] °मत्तकः [वैज. पृ. ६८]. [3] अल्पः B_3. [4] गन्धिलौ B_3. [5] गण्ड° B_3. [6] 'वृक्षजा सा शयण्डकः' इति वैजयन्त्याम् (पृ. १५०, श्लो. २६).

त्रयो गौधारगौधेरगौधेया गोधिकात्मजे ॥ ६ ॥
श्वावित्तु शल्यस्तल्लोम्नि शलली शललं शलम् ।

(वि.) त्रय इति—गोधाया अपत्यं[1] गौधारः, गौधेरः, गौधेयश्च। गोधिकात्मजनामानि। 'उड्डुमुपिल्लपेल्लु[2]'॥ श्वानं विध्यतीति श्वावित्। 'व्यध ताडने'। शलतीति शल्यः[3]। 'शल चलने'। 'एदुपन्दिपेल्लु'॥ शलतीति शलली, शललं, शलं च। 'शल [4]गतौ'। 'एदुपन्दिमुंड्लपेल्लु[5]'॥ ६॥

[1] I adds पुमान्. [2] 'उड्डुविनमरि' J_2. [3] शलाकाभरोमत्वात् D_2, K_5, K_6. [4] आशुगमने K_5, K_6. [5] 'येदुपन्दिमुल्लु' D_2.

(पा.) त्रयो—गोधिकात्मजे। गोधिकासुतनामानि। 'उनुमुपिल्ल'। जात्यन्तरमिति स्वामी[1]॥ श्वावित्—शल्यः। शेषे—'शलली स्याद्वज्रशललः शलः। शल्यरोमा च'। शल्यमृगनामानि। 'येड्डुपंद्दि'। तल्लोम्नि—शलम्। श्वावितो लोमनामानि। 'तल्लोम्न्यना शलली[2] शलम्' इति यादवः (वैज. पृ. ६८, श्लो. ३७)। स्त्रीलिङ्गे [3]गौरादिङीषि शलली॥ ६॥

[1] (पृ. १२५). [2] शललं B_3. [3] (४. १. ४१).

वातप्रमीर्वातमृगः कोक ईहामृगो वृकः ॥ ७ ॥
मृगे कुरङ्गवातायुहरिणाजिनयोनयः ।

(वि.) वातप्रमीरिति—वातं प्रत्याभिमुख्येन प्रमिमीते वातप्रमीः। ग्रामणीशब्दवदीकारान्तः पुंलिङ्गः। '[1]माङ् माने शब्दे च'। वातं [2]मृगयते वातमृगः। 'मृग अन्वेषणे'। मृगभेदनामनी। 'गालि केदुरुगानडचुमृगमुपेल्लु'॥ कौतीति कोकः। 'कुञ् शब्दे'। कोकते[3] मांसादिकं वा। 'कुक [4]आदाने'। मृगानीहत इति ईहामृगः।

'ईह चेष्टायाम्'। ईहां धावनादिचेष्टां मृगयते वा। 'मृग अन्वेषणे'। इरां भूमिं वर्कते प्रचारार्थमिति वृकः[5]। 'वृक [6]आदाने'। वृकनामानि। '[7]तोंडेलुपेल्लु'॥ मृग्यते [8]व्याधैर्मांसार्थमिति मृगः। 'मृग अन्वेषणे'। कौ[9] रङ्गतीति कुरङ्गः। 'रगि नृत्ते'। 'रगि गतौ' इति वा धातुः। वातं प्रत्ययते यातीति वातायुः। 'अय गतौ'। वानायुरिति वा पाठे वानं शुष्कं वृथेतस्ततोऽयते धावतीति वानायुः। 'अय पय गतौ'। [10]व्याधेनान्यत्र ह्रियते हरिणः। 'हृञ् हरणे'। अजिनस्य[11] योनिः कारणमित्यजिनयोनिः। हरिणनामानि॥ '[12]इर्रिपेल्लु'॥ ७॥

[1] 'मा (माङ् Pt_2) माने वर्तने च' K_5. [2] मृगयति K_5, K_6, Pt_2. [3] K_2, K_5, K_6 add ईहां गृह्णातीति वा. [4] 'कुक वृक आदाने' K_3, K_6.' [5] बर्कते मांसादिकमिति Pt_2. [6] आच्छादने K_5, K_6. [7] 'तोडे' J_2; आरण्याश्व(ण्यश्व)नामानि W_2. [8] लुब्धकैः F_2, Pt_2. [9] K_5, K_6 add भुवि; 'रगि गतौ' Pt_2. [10] W_2 adds गीतेन. [11] F_2, Pt_2 add चर्मणः. [12] 'यरलेयहेसरु' J_2.

(पा.) वातप्रमीर्वातमृगः। शेषे—'निःशृङ्गो हरिणाकृतिः। शिववातायुजविनः'। वातमृगनामानि। कोकः—वृकः। शेषे—'तस्मिन्निडावृकोऽरण्यशुनकस्तस्करोऽपि च'। वृकनामानि। 'तोंडेलु'। मृगे—अजिनयोनयः। शेषे—'भीरुचेता लिगुः प्लावी [1]वननो मरुकस्तथा'[2]। कुरङ्गजातिमात्रनामानि। 'इर्रि'॥ ७॥

[1] वलनः B_3. [2] वैजयन्ती (पृ. ६५, श्लो. ११).

ऐणेयमेण्याश्चर्माद्यमेणस्यैणमुभे त्रिषु॥ ८॥
कदली कन्दली चीनश्चमूरुप्रियकावपि।
समूरुश्चेति हरिणा अमी अजिनयोनयः॥ ९॥

(वि.) ऐणेयमिति—एण्या इदम् ऐणेयम्। एणस्येदं चर्माद्यम् ऐणम्। 'इर्रितोलु मांसमुमोदलयनवानिपेल्लु'॥ ऐणेयमैणं च गुणिलिङ्गे। केन वायुना दल्यते[1] कदली। 'दल विशरणे'। 'बोह्लिचायमेडचारलु गलिगि, बलमु तोनुंडु मृगमु'॥ कन्दानि कन्दतीति [2]कन्दली। 'कदि आह्वाने रोदने च'। [3]तुन्दिलनीलवर्णमृगनाम। चीयते व्याधैः संपाद्यत इति चीनः। 'चिञ् चयने'। श्वेतस्कन्धमृगनाम॥ चम्यते व्याधैरिति चमूरुः। 'चमु [4]भक्षणे'। पुच्छहीननानावर्णमृगनाम॥ प्रीयते वातं प्रति प्रियकः[5]। 'प्रीङ् प्रीतौ' 'प्रीञ् तर्पणे कान्तौ च'। [6]फाले श्वेतरोमाङ्कमृगनाम[7]॥ [8]संगतौ ऊरू अस्येति समूरुः। महाग्रीवकेसरयुतसितमृगनाम॥ अमी हरिणा अपि अजिनयोनयः चर्मकारणानीत्युच्यन्ते॥ ८–९॥

[1] I, K_5, W_2 add अस्याः चक्षुषी. [2] कन्दलीशब्दव्युत्पत्तिः कदलीशब्दवत् K_2, W_2. [3] इन्दीवर° W_2. [4] अदने W_2, Pt_2. [5] प्रियते गच्छति वातं प्रति, ‘ प्रिय गतौ ’ K_6, Pt_2. [6] भाले J_2, W_2. [7] D_2, I, K_2, K_6, W_2 add नीलवर्ण°. [8] सम्यगूयते तन्तुसंतानवत् क्रमेण गच्छतीति, ‘ वेञ् तन्तुसंताने ’ K_5, K_6.

(पा.) ऐणेयं—त्रिषु। एणशब्दो हरिणपर्यायः। ‘एणः कुरङ्गमो रिश्यो [1]वातायुर्हरिणो मृगः’ इति त्रिकाण्डशेषः (पृ. १२, श्लो. २६७)। एण्याश्चर्मादिकमैणेयम्। एणस्य तु ऐणं स्यात्। द्वे त्रिलिङ्गे। कदली—अजिनयोनयः। कदल्यादयः षडप्यमी हरिणविशेषाः। प्रावरणाद्युपयुक्तचर्मकारणानि। कदलीकन्दलीशब्दौ स्त्रीलिङ्गौ। अथ कदल्यां कन्दल्यां क्रमतो विदुः। कदलीनं कन्दलीनमिति। कदली कन्दलीत्येतौ नान्तौ पुंलिङ्गाविति केचित्। शेषे—

‘कदली तु बिले शेते मृदुरूक्षैश्च कर्बुरैः।
नीलाग्रैर्लोमभिर्युक्ता सा विंशत्यङ्गुलायता॥
कदली तु श्यामवर्णा हस्तायामा महोदरी।
चीनस्तु चीनसी स्त्रीत्वे कपोता त्रिंशदङ्गुला॥
चनका तु चमूरुर्ना सहोऽपि त्रिविधः स्मृतः।
सितः कृष्णश्वित्ररोमेत्यस्य पुच्छोऽस्ति वा न वा॥
प्रियको रोमभिर्युक्तो मृदुरक्तासितैर्घनैः।
समूना स्त्री समूरुर्ना महाग्रीवसमूरुकौ॥
सितके सरवान् वेगी स्निग्धश्च मृदुरोमवान्।
गोधूमाभः स्निग्धवर्ण इति स द्विविधो मतः’॥ ८–९॥

[1] उत्तरार्धं मुद्रितग्रन्थे न दृश्यते.

कृष्णसाररुरुन्यङ्कुरङ्कुशम्बररौहिषाः।
गोकर्णपृषतैणर्श्यरोहिताश्चमरो मृगाः॥ १०॥

(वि.) कृष्णसार इति—कृष्णेन[1] सारः शबलः कृष्णसारः। कृष्णशुक्लरोमवत्प्रदेशयुगयुक्तमृगनाम। ‘नल्ल कप्पुन विचित्रमैन यर्रि’॥ रौति प्रायेणेति रुरुः। ‘रु शब्दे’। ‘नल्लचारलदुप्पि’॥ न्यञ्चत्यधोमुखतया न्यङ्कुः। ‘अञ्चु गतिपूजनयोः’। ‘जिंकपोतु’॥ रमते सजातीयमृगेषु रङ्कुः[3]। ‘रमु क्रीडायाम्’। [4]अत्यन्तश्वेतमृगनाम॥ शयनादिना शं सुखं वृणोतीति शम्बरः। ‘वृञ् वरणे’। रक्तवर्णह्रस्वन्यङ्कुनाम॥ रोहिषाख्यतृणे भवः रौहिषः[5]। ‘कोण्डगोर्रे’॥ गोकर्णसदृशकर्णत्वाद् [6]गोकर्णः। ‘कणिति

युनुमृगमु'॥ [7]पृषता विन्दवोऽस्य सन्तीति पृषतः। 'दुप्पि'॥ सरलमतित्वाद् व्याधमेतीत्येणः[8]। 'इण् गतौ'। सर्वतोनीलमृगनाम ॥ इयर्ति [9]वनम् ऋश्यः। 'ऋ गतौ'। 'मनुं बोतु'॥ रक्तवर्णत्वेन रोहितः[10]। 'केसरि [11]यनु मृगमु'॥ चमति तृणं चमरः। 'चमु [12]अदने'। 'चमरीमृगमु'॥ एतानि प्रत्येकं मृगविशेषनामानि ॥ १० ॥

[1] F_2, Pt_2 add नीलवर्णे.न　[2] D_2, J_2, K_6 add गच्छति.　[3] रञ्जयति रङ्कुः, 'रञ्ज रागे' F_2, Pt_2.　[4] अधिक° J_2, K_5, W_2.　[5] रोहतीति रोहिषः तृणविशेषः, स भक्ष्यमस्येति F_2, Pt_2.　[6] गोकर्णशस्तसवर्णत्वात् W_2.　[7] पृषतः D_2, K_5, K_6.　[8] सरसमतित्वाद् व्याधमेति W_2.　[9] लीनं W_2.　[10] रोहतीति, 'रुह बीजजन्मनि प्रादुर्भावे च' K_5, K_6.　[11] 'केसरयेंबमृगनाम' J_2.　[12] 'चमु छमु जमु अदने' K_2, K_6.

(पा.) कृष्णसारः—मृगाः। इह मृगशब्देन इतरे च वनगोचराश्चतुष्पादो विवक्षिताः। न तु हरिणजातीया एव। कृष्णसारादयश्चमरान्ता मृगभेदा भवन्ति। [1]रौहिष इति केचित्। शेषे—

'कृष्णसारः कृष्णशारः कृष्णश्चैव निरञ्जनः।
यज्ञार्हो बिन्दुयुक्तस्तु महाकृष्णमृगो रुरुः॥
न्यङ्कुस्तु हरिणाकारः त्रिकोणविपुलोन्नतः।
रङ्कुः स यद्रोमकृतं राङ्कवं वस्त्रमुच्यते॥
शम्बरः स्वल्पहरिणो रोहिषो गर्दभाकृतिः।
गोकर्णः स भवेद्यस्य गोकर्णप्रतिमे श्रुती॥
स्थविष्ठैर्बिन्दुभिः शुक्लरोमजैश्चित्रितः शतैः।
हरिणः पृषतः प्रोक्त एणः स्यात् कृष्णवर्णकः॥
ऋश्यः स्त्री यस्य रोहित् स्यादरुणो वर्णतश्च यः।
कृष्णो धवात्री(?) शृङ्गश्च तुरङ्गमसमाकृतिः॥
रोहितो रक्तवर्णः स्यात् पृष्ठतः श्वेतराजिमान्।
चमरो धवलः कृष्णश्चित्रो वा महिषाकृतिः।
हरिणश्च कुरङ्गश्च राजीवो मृगमातृका॥'

हरिणकुरङ्गशब्दौ मृगसामान्यत्वेनोक्तावप्यत्र विशेषवचनत्वेन कथितौ ॥ १० ॥

[1] रोहिषः इति पारिजातानुसारी पाठः.

गन्धर्वः शरभो रामः सृमरो गवयः शशः।
इत्यादयो मृगेन्द्राद्या गवाद्याः पशुजातयः ॥ ११ ॥

(वि.) गन्धर्व इति—गन्धयत्यर्दयतीति[1] गन्धर्वः। ‘गन्ध अर्दने’। तुन्दिलमृगनाम ॥ हिंस्रत्वात् शरवद् भातीति शरभः। ‘भा दीप्तौ’। शृणाति [2]सिंहादिकमिति वा। ‘शॄ हिंसायाम्’। अष्टापदमृगनाम ॥ व्याधा अस्मिन् दृष्टे रमन्ते[4] रामः। ‘रमु क्रीडायाम्’। ‘पेद्द[5] दुप्पि’ ॥ वने सर्वत्र [6]सरतीति सृमरः। ‘सृ गतौ’। ‘पेद्द सवरवुमृगमु’॥ गवते गवयः। ‘गुङ् अव्यक्ते शब्दे’। गामयते सदृशत्वादिति वा। ‘अय गतौ’। ‘गुरुपोतु’॥ शशति प्लुतेन[7] गच्छतीति शशः। ‘शश प्लुतगतौ’। ‘[8]कुंदेलु’॥ इत्यादयो गन्धर्वादयः। मृगेन्द्राद्याः सिंहादिचमरान्ता गवाद्या वक्ष्यमाणमूषकप्रभृति गोपर्यन्ताश्चतुष्पदाः सर्वे च पशुजातयः पशुसंज्ञिका भवन्ति। पाश्यन्ते दामभिः [9]पशवः। ‘पश बन्धने’॥ ११ ॥

(पा.) गन्धर्वः—शशः। मृगा इत्यनुवर्तते। हरिणादिशशान्ताश्च मृगविशेषा भवन्ति। ‘गन्धर्वपृषतश्चेति ज्ञेयाः सारङ्गजातयः’ इति भागुरिः। गवयो रामः सृमरो जाहकलम्पाकमुकयगन्धर्वा इति मतान्तरबोधनार्थं पृथक्पाठः। शेषे—

‘हरिणस्ताम्र उद्दिष्टः कुरङ्गो हरिणो महान्।
राजीवस्तु मृगो ज्ञेयो राजभिः परितो वृतः॥
पृष्ठतश्चन्द्रबिम्बाभो हरिणात् किञ्चिदल्पकः।
स्वल्पावृत्तोदरारक्ता शशाभा मृगमातृका॥
गन्धर्वः स्याद्गोलपुच्छः शरभस्तूर्ध्वलोचनः।
गजादिरष्टपादित्वाद्रामस्तु वृकधोरणः।
सृमरः स्याद्व्यालमृगः परुर्ना चमरी न षण्॥’

षण्डनामैकदेशः षण्। ‘अरण्याय सृमरः’ (तै. सं. ५.५.१६.१) इत्यत्र क्षुरे सृमरश्चमर इत्युक्त्या महतश्चमरस्य नामानि।

‘गवयः स्याद्वनगवः शशस्तु मृदुरोमवान्।
शूलिको लम्बकर्णोऽग्रपल्लवाद्रोमकर्णिकः॥’

---

[1] D_2, K_5 K_6 add नाशयति. [2] हिंस्रादिकं I, K_2, K_3, W_2. [3] अष्टपद° W_2; अष्टपाद° J_2, K_5. [4] K_5, K_6 add मोदन्ते. [5] ‘रामं दुप्पु’ K_6. [6] प्रसारयति J_2. [7] प्लुत्या W_2. [8] ‘मोलदहेसरु’ J_2. [9] ‘नाल्कुकालुळ्ळबालवुळ्ळ यह्लाजीवंगलहेसरु’ J_2.

हरिणादीनां यथासंभवं लक्षणानि नामानि च ।। इत्यादयो—पशुजातयः । इत्यादयो हरिणगन्धर्वादयः आस्येनानुक्तकुमारीमूकादयः प्रागुक्तसिंहाद्या वक्ष्यमाणगवाद्याश्च पशुत्वव्यञ्जकपुच्छपादचतुष्टयादिमत्त्वेन पशुजातयो भवन्ति । अनुक्तम्—'नकुलः पिङ्गलः'। 'मुंगि'। 'अथ स्याच्चिक्रोडः कालिका स्त्रियाम्'। 'उडत' ।। ११ ।।

(अधोगन्ता तु खनको वृकः पुन्ध्वज उन्दुरः)
उन्दुरुर्मूषिकोऽप्याखुर्गिरिका बालमूषिका ।
(चुचुन्दरी गन्धमूषी दीर्घदेही तु मूषिका)
सरटः कृकलासः स्यान्मुसली गृहगोधिका ।। १२ ।।
लूता स्त्री तन्तुवायोर्णनाभमर्कटकाः समाः ।

(वि.) उन्दुरुरिति—उनत्ति मुखस्पृष्टं[1] मुखस्रावेण सेचयतीति[2] उन्दुरुः । 'उन्दी क्लेदने'। अन्नादिकं मुष्णातीति मूषिकः । 'मुष स्तेये'। मूषक इति वा पाठः । [3]स्वाश्रयमाखनतीति[4] आखुः । 'खनु अवदारणे'। मूषिकनामानि ।। '[5]एलुक पेल्लु' ।। गिरति धान्यादिकमिति गिरिका । गीर्यते मार्जारेणेति वा । 'गॄ निगरणे'। बाला चासौ मूषिका च बालमूषिका । '[6]चिट्टेलुकपेल्लु' ।। (छ्यतीति चुचुन्दरी । 'छो छेदने'। गन्धवती मूषी गन्धमूषी । 'चुंचु पेल्लु' ।। दीर्घो देहोऽस्या इति दीर्घदेही । मुष्णाति धान्यादिकं मूषिका । 'पन्दिकोक्क पेल्लु') सरति प्रायेणेति सरटः। 'सृ गतौ'। कृकेन[7] शिरोऽग्रेण [8]लसतीति कृकलासः । 'लस श्लेषणक्रीडनयोः'। '[9]तोण्डपेल्लु' ।। [10]मुस्यति खण्डयति क्रिमीनिति मुसली । 'मुस खण्डने'। गृहे गोधिकेव तिष्ठतीति गृहगोधिका[11] ।। '[12]बल्लिपेल्लु' ।। लूयते [13]छिद्यतेऽस्यास्तन्तुरिति लूता । 'लूञ् छेदने'। तन्तून् वयतीति तन्तुवायः । 'वेञ् तन्तुसंताने'। [14]ऊर्णं नाभौ यस्य ऊर्णनाभः[15] । तन्तुमवलम्ब्य [16]मर्कटवदारोहणात् मर्कटः । ऊर्णनाभनामानि ।। [17]'सालेपुरुगु पेल्लु' ।। १२ ।।

---

[1] F₂, Pt₂ add वस्तु. [2] सिञ्चति J₂, W₂. [3] स्वालयं I. [4] आसमन्तात् J₂, Pt₂. [5] 'इलिय हेसरु' J₂. [6] 'चिक्कयिलि' J₂. [7] गलेन F₂, Pt₂. [8] विलसति J₂, W₂. [9] 'ओती हेसरु' J₂. [10] D₂, K₅, K₆ add मुखेन. [11] J₂, K₆, W₂ add गृहाश्रयत्वाच्च ईषद्गोधिकासादृश्योपेतत्वाच्च. [12] 'हल्लि' J₂. [13] अस्यां W₂. [14] ऊर्णा K₅, K₆. [15] ऊर्णनाभिः J₂. [16] K₆, W₂ add अवरोहणात् . [17] 'जेडनहुलु' J₂.

(पा.) उन्दुरुः—आखुः। उन्दुर इत्यकारान्तश्चास्ति। मूषक इत्यकारमध्यस्त्वसाधुः। शेषे—‘गर्ताटः खानकः खनः’। खनकशब्दोऽप्यस्ति। तथा च माधवः—‘उन्दुरुर्मूषिकः काण्ड आखुश्च खनकः खनः’ इति। मूषिकनामानि। ‘येलुक’। ‘पन्दिकोक्कुन्तु’॥ ‘चुचुन्दरी तु गन्धाखुः’। (वैज. पृ. १५०, श्लो. ३२)। ‘चुन्दरी राजपुत्रीति’ कोशान्तरम्। ‘चुञ्चु’। गीरिका बालमूषिका। ‘चिट्टेलुक’॥ सरटः—स्यात्। शेषे—‘शयानश्च शयण्डकः। शयश्च जाहको गात्रसंकोची प्रतिसूर्यकः’। सरटनामानि। ‘कृकलासः प्रतिरविः शयानः सरटः शयः’ इति वैजयन्ती (पृ. १५०, श्लो. २८)। ‘तोण्ड’॥ ‘कामरूपिणि तत्र स्याच्चित्रविम्बश्च विम्बकः’। ‘उसरवेल्लि’। ‘कृकवाकुर्दुष्प्रभे स्यात्’। ‘मैलचायतोण्ड’॥ मुसली—गोधिका। शेषे—‘ज्येष्ठा पल्ली कुड्यमत्स्या दैवज्ञा नदनी तथा। माणिक्या’। पल्लीनामानि॥ ‘बल्लि’॥ सा तु शुक्ला कुण्डृणाची [1]सुराजिका। कुण्डृणं कुड्यम्। तत्राञ्चतीति कुण्डृणाची। शुक्लपल्लीनामनी। ‘तेल्लबल्लि’॥ हालाहलस्तु सृजया व्राह्मणी रक्तपुच्छिका। वैजयन्त्यां च (पृ. १५०, श्लो. २९) ‘हालाहलस्त्वञ्जनिका ब्राह्मणी रक्तपुच्छिका’ इति। हालाहलनामानि। ‘मिंड’॥ लूता—समाः। ऊर्णनाभिरपि। ‘तन्तुवायोर्णनाभोर्णनाभयः शलकोऽपि च’। इति रभसकोशात्। शेषे—

> ‘मूषिका[2] लूतिका[3] तन्तुनाभोर्णाबहिर्जालिकाः।
> जालकृत्क्रिमिदिग्बन्धाः॥’

लूतानामानि। ‘सालेपुरुगु’। ‘लूतापट्टोऽस्य जालकम्’। आशाबन्धोऽस्येति पाठान्तरम्। ‘सालेपट्ट’॥१२॥

---

[1] सराजका B_3. [2] दूषिका B_3. [3] लूषिकाB_3.

नीलङ्गुस्तु क्रिमिः कर्णजलौका शतपद्युभे ॥ १३ ॥
वृश्चिकः शूककीटः स्यादलिद्रोणौ तु वृश्चिके ।

(वि.) नीलङ्गुरिति—नीलति [1]मन्दं नीलङ्गुः। ‘नील [2]वर्णगत्योः’। अयं शब्दो देशीय[3]ः। [4]मन्दं [5]क्रामतीति क्रिमिः। ‘क्रमु पादविक्षेपे’। क्रिमिनामनी। ‘सामान्यमुगा पुरुगु[6] पेल्लु’॥ कर्णे [7]जलौका इव कर्णजलौका। शतम्[8] अपरिमितानि पदानि सन्त्यस्याः शतपदी। ‘[9]जेर्रिपेल्लु’॥ वृश्चति [10]शूकाग्रेण वृश्चिकः। ‘ओव्रश्चू छेदने’। [11]शूकयुक्तः कीटः शूककीटः। ‘नल्ल[12] तेलु’॥ अलमनर्थोऽस्मादित्यली।

नकारान्तः । अलिरिति वा पाठः । द्रुणति हिनस्तीति द्रोणः । 'द्रुण हिंसागतिकौटिल्येषु'। वृश्चतीति वृश्चिकः । '[13]एर्र तेलुपेल्लु'॥ १३ ॥ कीटकप्रकरणं समाप्तम् ॥

[1] नीलत्यङ्गमिति K_3; मन्दं गच्छति K_5. [2] 'नील गतौ' K_6. [3] देश्यः J_2, K_5, W_2. [4] मन्दं मन्दं K_5, K_6. [5] आक्रामति W_2. [6] 'हुळुगलहेसरु' J_2. [7] जलूका D_2, K_5, K_6. [8] शतपरिमितानि W_2. [9] 'जेरु' J_2. [10] शूकेन J_2. [11] शूकप्रधानः D_2, K_5, K_6. [12] 'यमचेलु' J_2. [13] विषकीटनामानि W_2; 'केंचेलु' J_2.

(पा.) नीलङ्गुः—कृमिः। शेषे—'नीले द्रुकीटे पुलकस्तथा'। नीलवर्णे द्रुकीटे नीलङ्गुकृमिपुलकशब्दा वर्तन्ते। नीलङ्गुर्वृक्षजः कीटो नीलवर्ण इति वेदभाष्ये। नीलङ्गुकृमिशब्दौ कीटमात्रनामनी इति केचित्। 'द्रुमामये भवेत् पुंसि कीटे च क्रिमिवत्कृमिः' इति रभसकोशः। 'दुर्दंशो मत्कुणे'। 'नल्लि'। 'काष्ठभवे ज्ञेयः क्रिमौ घुणः'। काष्ठभक्षकक्रिमिनाम। 'पिपीलिका द्वयोर्लूता'। पिपीलिकनामनी। 'चीम'॥ 'महान् त्राह्मी स पिङ्गलः'। स पिपीलिकः महान् पिङ्गलश्च यदि त्राह्मीत्युच्यते। 'गोप्पयर्चीम'॥ 'महान् कृष्ण उलंगवः[1]'। महान् कृष्णश्च स यदि उलंगव[1] इत्युच्यते। 'कण्ड्रचिम'॥ 'या तु स्वल्पा कृष्णवर्णा सा [2]मर्कटपिपीलिका'। 'चिन्ननल्लचीम'॥ 'कृष्णा सूक्ष्मा च चेत् सान्या जातिः कन्यापिपीलिका'। 'मिंचसन्नपुनल्लचीम'॥ 'वम्रो वम्र्युपदीकोपजिह्विकास्त्र्युपदेहिका'। रूपभेदेन वम्रः पुंलिङ्गः। वम्रयादयः पञ्च स्त्रीलिङ्गाः। स्त्यायति संघातयति मृदं स्त्री। वम्रिकनामानि। 'चदलुपुरुगु'।

'अनेकसुषिरोपेतं कान्तं स्त्रीमुखपङ्कजम्।
सुसिद्धं त्र्यक्षरोपेतं चक्षुःश्रोत्रमनोहरम्'॥

इति प्रयोगः। '[3]तत्प्राया शिथिली [4]पिङ्गवर्णा'। उपदेहिकासदृशी पिङ्गवर्णा शिथिलीत्युच्यते। 'चेकोणुजु'। 'अथ क्रिमयोऽणवः। भवेयुः कीकसाः'। पुलकाः इति केचित्। 'अतिसूक्ष्ममुलैन पुरुगुलु'॥ कर्णजलूका—उभे। जलौका इति सान्त इति केचित्। 'आढा शतपदी कर्णजलूका ढारिकापि च' इति वैजयन्ती (पृ. १५०, श्लो. ३३)। शतपदीनामानि। 'जेर्रिन्निचेविचोरुपामुन्नु'॥ वृश्चिकः—कीटः स्यात्। कम्बलकीटनामनी। 'गोंगलपुरुगु'। भ्रमरभेद इति केचित्। अलिद्रूणौ—वृश्चिके। 'भृङ्गवृश्चिकयोरलिः' इति रभसकोशादलिरिकारान्तः। अलमस्यास्तीति अली। 'अलं वृश्चिकलाङ्गूलम्' इति हलायुधः (अ. मा. ३. २३)। अलनमालः, तद्वानालीति केचित्। 'वृश्चिके त्वाल्यलिद्रूणा[5] मलं तत्पुच्छकण्टकः[6]' इति वैजयन्ती (पृ. १५०, श्लो. ३२)।

'द्रुणो वृश्चिकभृङ्गयोः' इति विश्वप्रकाशिकापाठात् (पृ. ४७, श्लो. ६) ह्रस्वादिरपि। वृश्चिकनामानि। 'तेलु'॥ १३॥

---

[1] उलंकल: (वैज. पृ. १५१, श्लो. ३७).
[2] मर्कोट° (वैज. पृ. १५१, श्लो. ३७).
[3] तत्प्राय: B$_3$.
[4] पिङ्गल° B$_3$.
[5] °द्रूणावलं B$_3$.
[6] °कण्टकम् B$_3$.

पारावतः कलरवः कपोतोऽथ शशादनः॥ १४॥
पत्री श्येन उलूके तु वायसारातिपेचकौ।
(दिवान्धः कौशिको घूको दिवाभीतो निशाटनः)

(वि.) अथ पक्षिप्रकरणमारभ्यते। पारावत इति—पारेण बलेनावतीति पारावतः। 'अव रक्षणादौ'। परमवतीति परावतः। 'अव गतौ'। शीघ्रगामी[1] खगादिः, तस्यायमिति पारावतो वा। कलो रवोऽस्येति कलरवः[2]। शीघ्रगामित्वेन कस्य वायोः पोत इव कपोतः। 'पावुरमुपेल्लु, [3]गुव्वपेल्लु'॥ शशानत्तीति शशादनः। 'अद भक्षणे'। प्रशस्तं पत्रं पक्षोऽस्यास्तीति पत्री। श्यायते आशु गच्छतीति श्येनः। 'श्यैङ् गतौ'। श्येननामानि। 'डेगपेल्लु[4]'॥ उलति नेत्रज्योतिषा दहति काकानिति उलूकः। 'उल आवरणे'। धातूनामनेकार्थत्वाद् अत्र दहनार्थो ग्राह्यः। वायसानामरातिः वायसारातिः[5]। स्वनेत्रज्योतिषा वायसान् पचति हन्तीति पेचकः। 'डुपचष् पाके'। उलूकनामानि। 'गूबपेल्लु[6]'॥ १४॥

---

[1] °गामिक: I.
[2] D$_2$, K$_2$, K$_3$ add 'पारुवमु'.
[3] 'पालिवाण' J$_2$; W$_2$ adds कपोतशब्द: पारावतस्य वा नाम.
[4] 'हद्दिन हेसरु' J$_2$.
[5] W$_2$ omits one line.
[6] D$_2$, Pt$_2$ add दिवा अन्ध: दिवान्ध:। कुशा: वृक्षा:, तेषु चरतीति कौशिक:। घू इति शब्दं करोतीति घूक:। दिवा भीत: दिवाभीत:। निशायामटतीति निशाटन:। 'अट गतौ'.

(पा.) पारावतः कलरवः। शेषे—'पाटलाङ्घ्रिश्च रक्तदृक्। मदोत्कटो बालवत्सः कपोतः'। पारावतादिकपोतान्ताः शब्दाः पारावते वर्तन्त इति टीकासर्वस्वकारेण व्याख्यातम् (पृ. २२८-९)। तथा च माधवः—'पारावतः कलरवः कपोतो रक्तलोचनः' इति। केचित्तु पारावतादिपञ्चकं पारावते बालवत्सादिद्वयं कपोते वर्तत इति व्याचक्षते। तथा च वैजयन्त्याम् (पृ. २७, श्लो. १४) 'पारावतः कलरवो रक्तदृष्टिर्मदोत्कटः' इत्युक्त्वानन्तरं 'काकस्तु द्विक एकाक्षः' इत्यादिना काकनामान्यनुशिष्य, 'कपोतो बालवत्सः[1] स्यात्' (पृ. २५) इत्युक्तम्। अत एव—

‘प्रच्छाद्य पुष्पपटमेष महान्तमन्त-
रावर्तिभिर्गृहकपोतशिरोधराभैः ।’

इति माघकाव्ये (४. ५२) गृहेण कपोतो विशेषितः । तस्मात् पारावतादिपञ्चकं गृहकपोतनामानि । ‘पाविरमु’ । बालवत्सादिद्वयं वनकपोतनामनी । ‘गुव्व’ ।। अथ शशादनः—श्येनः । अत्र वर्तुलाक्षशब्दश्च । श्येननामानि । ‘डेग । सानुवमुन्तु’ । उलूकास्तु—पेचकौ । शेषे—

‘घूकः [2]कोण्टो दिवाभीतः कौशिको हरिलोचनः ।
[3]नक्तंचरो घर्घरको निशादर्शी बहुस्वनः ।
महापक्षी च ॥’

उलूकनामानि । ‘गूब’ । ‘कृष्णोऽसौ नक्तकः कृतमालकः’ । (वैज. पृ. २७, श्लो. २३) । कृष्णोलूकनामानि । ‘नल्लनिगूब’ ।। १४ ।।

[1] वालवत्सकः B_3.　[2] कोटः B_3.　[3] वैजयन्त्याम् (पृ. २७, श्लो. २२-३).

व्याघ्राटः स्याद् भरद्वाजः खञ्जरीटस्तु खञ्जनः ॥ १५ ॥
लोहपृष्ठस्तु कङ्कः स्यादथ चाषः किकीदिविः ।

(वि.) व्याघ्राट इति—[1]व्याजिघ्रन्नटतीति व्याघ्राटः । ‘अट[2] गतौ’ । भरद्वाजमुनिवत् [3]कणवृत्तित्वात् भरद्वाजः[4] । व्याघ्राटनामनी । ‘एट्रिन्तपेरु’ ।। खमाकाशम् अञ्जसा [5]एटतीति खञ्जरीटः । ‘इट किट गतौ’ । खञ्जनश्च[6] । खञ्जरीटनामनी । ‘रुप्पुपुलुगु’ ।। लोहवर्णः प्रृष्ठोऽस्य लोहप्रृष्ठः[7] । कङ्कते गच्छतीतस्तत इति कङ्कः । ‘ककि गतौ’ । कङ्कनामनी । ‘मल्लेजेगुरु’ ।। चषत्येकाकी भक्षयतीति चाषः । ‘चष भक्षणे’ । किकीति[8] दीव्यति वाश्यत इति किकीदिविः । ‘दिवु क्रीडादौ[9]’ । धातूनामनेकार्थत्वात् । किकी दिविरिति वा पदच्छेदः । तदा किकी[10] नान्तः । दिविशब्दः कविशब्दवद् इकारान्तः । चाषनामनी । ‘पालपक्षिपेल्लु’ ।। १५ ।।

[1] व्याघ्रवत् I, K_3, K_5, Pt_2.　[2] ‘अट पट गतौ’ W_2.　[3] कणानत्तीति K_5.
[4] भरद्वाजेन सृष्टः F_2, Pt_2.　[5] जयतीति W_2.　[6] खञ्जतीति खञ्जनः । भाद्रपदमासादिषट्केऽदृश्यगतित्वात् । ‘खजि गतिवैक्लब्ये’ Pt_2.　[7] दृढत्वात् लोहमिव पृष्ठोऽस्येति F_2, Pt_2.
[8] B_1, K_6 add अनुकरणं.　[9] ‘दिवु शब्दे’ K_5, K_6.　[10] कीति कायति Pt_2.

(पा.) व्याघ्राटः—भरद्वाजः । शेषे—‘क्षिप्रश्येनः [1]सुपर्णकः । पैङ्गराजश्चाटकैरः’ । भरद्वाजपक्षिनामानि । ‘एद्रिंत’ ।। खञ्जरीटः—खञ्जनः । [2]रसरत्नाकरे—

‘खञ्जरीटं सजीवं तु गृहीत्वा फाल्गुने क्षिपेत्।
पञ्जरे रक्षयेत्तावद्यावद्गाद्रपदो भवेत्॥
तदा स पञ्जरोऽदृश्यो जायते नात्र संशयः।
खञ्जरीटशिखा ग्राह्या हस्तस्था दृश्यकारिणी॥’

इत्यदृश्यकरणप्रकरणे। शेषे—मिथुनी चञ्चलश्च। चटकविशेषस्य नामानि। ‘मन्दपिचुक’। ‘अथ कृष्णोऽस्मिन् कृष्णवक्षसि’। कृष्णवक्षस्यस्मिन् कृष्णः स्यात्। ‘नल्लनिपोट्ट मलमन्दपिचुक’। ‘गोलत्तिका खञ्जरीटी शार्ङ्गकी सा च पिप्पका’। तज्जातिस्त्रीनामानि। ‘अण्डमन्दपिचुक’। लोकपृष्ठः—स्यात्। शेषे—‘दीर्घपात् कमलच्छदः। पर्कटः कर्कटस्कन्धोऽपि’। कङ्कनामानि। ‘रांबुलुगु’॥ अथ चाषः किकीदिविः। ‘चाषो राजविहङ्गमः’ इति वैजयन्ती (पृ. २८, श्लो. २९)। ‘इक्षुपक्षिभिदोश्वासः’। इति रभसकोशे दन्त्यान्तेषु पाठाच्चासोऽपि। किकी नान्तः, दिविरिदन्तः, नामद्वयमिति केचित्। ‘किकिदीविश्चाषः स्यात्’ इति रत्नकोशपाठात् तृतीयवर्णदीर्घोऽपि। शेषे—‘मणिकण्ठः स्वर्णचूडश्चित्रवालश्च राजविः[3]’। चाषनामानि। ‘पालगुम्म’॥ १५॥

---

[1] सुवर्णकः B_3. [2] मुद्रितग्रन्थे न दृश्यते. [3] राजविहङ्गमः इति वैजयन्त्याम् (पृ. २८, श्लो. २९).

कलिङ्गभृङ्गधूम्याटा अथ स्याच्छतपत्रकः॥ १६॥
दार्वाघाटोऽथ सारङ्गः स्तोककश्चातकः समाः।

(वि.) कलिङ्ग इति—के शिरसि लिङ्गं शिखारूपमस्यास्तीति कलिङ्गः। भृङ्गवर्णसाम्याद् भृङ्गः। [1]धूम्येवाटति [2]लौहित्यमिश्रकार्ष्ण्ययोगादिति धूम्याटः। ‘अट[3] पट गतौ’। कलिङ्गपक्षिनामानि। ‘कूङ्कटिमूङ्गयनुपक्षिपेल्लु’॥ बहुपक्षत्वात् शतपत्रकः[4]। [5]चञ्चुना दारु आहन्तीति दार्वाघाटः। ‘हन हिंसागत्योः’। दार्वाघाटनामनी। ‘वेग्गुरुपुलुगु’॥ [6]चातकान्तरैः सहारङ्गति[7] संचरत इति सारङ्गः। ‘रगि गतौ’। स्तोकं [8]मन्दं कायतीति स्तोककः। ‘कै शब्दे’। चतते चलवर्षबिन्दून् चातकः[9]। ‘चते याचने’। चातकपक्षिनामानि॥ ‘[10]वानकोयलपेल्लु (चातकमु)’॥ १६॥

---

[1] धूमवानिव K_5, K_6. [2] रौहित्य° K_3. [3] ‘अट चलने’ K_6. [4] शतं पत्राण्यस्य F_2. [5] चञ्च्वा K_5; दारुवच्चञ्चुना K_6; दारुणा चञ्च्वा W_2. [6] संहत्यारं गच्छतीति Pt_2. [7] दूरं गच्छति K_5. [8] अल्पं शिरोऽस्येति F_2, Pt_2. [9] वर्षोदकं चततीति Pt_2. [10] ‘चातकपक्षि’ J_2.

(पा.) कलिङ्ग—धूम्याटाः । शेषे—'धूम्राटो धूम्र आटकः । मान्धीरो[1] वागुदश्च[2] स्यात्'। कलिङ्गनामानि । 'कूंकटामूग'। 'स तु [3]मान्धीलवो महान् । बुद्धिमान् राजभृङ्गश्च'। 'पेद्दकूंकटिमूग'॥ अथ स्यात्—दार्वाघाटः । द्रुमकुट्टशब्दश्चात्र । दार्वाघाटनामानि । 'षड्रंगिपिट्ट'॥ अथ सारङ्गः—समाः । शेषे—'[4]पौरेन्द्रश्चाम्बुजोऽनम्बुर्वर्षाम्भःपारणव्रतः'। चातकनामानि । 'वानकोकिल'॥ १६ ॥

---

[1] मान्धिरः B_3. [2] वाग्गुदः (वैज. पृ. २८, श्लो. २८). [3] मान्धिलवः B_3.
[4] वादीन्द्रः B_3.

कृकवाकुस्ताम्रचूडः कुक्कुटश्चरणायुधः ॥ १७ ॥
चटकः कलविङ्कः स्यात् तस्य स्त्री चटका तयोः ।
पुमपत्ये चाटकैरः स्त्र्यपत्ये चटकैव हि ॥ १८ ॥

(वि.) कृकवाकुरिति—कृकेण शिरोऽग्रेण [1]वक्ति कृकवाकुः । 'वच परिभाषणे'। ताम्रवर्णा चूडास्यास्तीति ताम्रचूडः । कुकु इति शब्दमुच्चारयन्[2] कुटति वक्रोभवतीति कुक्कुटः । 'कुट कौटिल्ये'। चरणमेवायुधं यस्य सः चरणायुधः । कुक्कुटनामानि । 'कोडि[3] पेल्लु'॥ चटति तुण्डेन [4]धान्यादिकमिति चटकः । 'चट[5] स्फुट भेदने'। कं शिरः आनम्य[6] तुण्डेन कुक्षिं लुनातीति[7] कलविङ्कः[8]। 'लूञ् छेदने'। चटकनामनी । 'पिच्चुकपेल्लु'॥ चटकशब्दव्युत्पत्तिवत् [9]चटकाशब्दव्युत्पत्तिः । '[10]आण्डुपिच्चुकपेल्लु'॥ तयोश्चटकाचटकयोः पुमपत्यं पुरुषापत्यं चाटकैरः । 'पिच्चुकलयोक्कमोगपिल्लपेरु'॥ तयोश्चटकयोः स्त्र्यपत्यं चटका । 'आण्डुपिच्चुकपिल्लपेरु[11]'॥ १७–१८ ॥

---

[1] D_2, K_5, K_6 add वाश्यते. [2] कुर्वन् K_5, K_6. [3] 'कोळि' J_2.
[4] अङ्गणगतधान्य° B_1, K_5, K_6. [5] K_3 omits स्फुट. [6] आलम्ब्य J_2.
[7] विलुनाति W_2. [8] कं सुखं यथा भवति तथा लपति, 'लप व्यक्तायां वाचि' Pt_2.
[9] चटकस्य स्त्री Pt_2. [10] 'हेंणगुब्बि' J_2. [11] 'गुब्बिहेंणमरि' J_2.

(पा.) कृकवाकुः—चरणायुधः । शेषे—

'शिखण्डिको विवृत्ताक्षो दीर्घवाग्दक्ष [1]आरणिः ।
ज्ञानी कुमारोपवाहः कालज्ञः शिखिचूलिकौ[2] ॥'

कुक्कुटनामानि । 'मयूरश्चटकः[3] शौण्डः कीरीटी नखरायुधः' । एतानि च । 'कोडि' ॥ चटकः—स्यात् । शेषे—

'चटाको वर आटकः ।
वलिभुग् लङ्घनगतिः सेव्यस्तिलककण्टकः ॥'

चटकमात्रनामानि ॥ शेषे—कलविङ्कस्त्वसौ पीतो मुण्डः' । असौ कलविङ्कः पीतश्चेन्मुण्ड इत्युच्यते । 'पच्चनिपिचुक' ॥

'श्यामा तु पोतकी ।
देवी वराही शकुनिः कुमारी चटकोत्तमा ॥
ब्रह्मपुत्री पाण्डविका कृष्णिका सितपक्षिणी ।
धनुर्धरी पान्थमाता ॥'

असौ चटकजातिः श्यामवर्णा चेत् पोतक्यादिशब्दैरुच्यते । श्यामशब्दवाच्या च । तदुक्तं वसन्तराजीयाख्ये शकुनग्रन्थे—

'श्यामा[4] वराही शकुनेः कुमारी दुर्गाथ देवी चटका तथोत्तमा ।
त्वं पोतकी पाण्डविका त्वमेव त्वं कृष्णिका त्वं सितपक्षिणी च ।
त्वं ब्रह्मपुत्री शकुनैकदेवी धनुर्धरी पान्थसमूहमाता ॥'

इति । तल्लक्षणं च तत्रैवोक्तम्—

'ग्राम्येण तुल्यश्चटकेन नीलो योऽसौ पुमान् पाण्डुरधर्मयुग्मः ।
लघ्वी ततो धूमनिभा च नारी तत्पोतकी युग्ममुपाहरन्ती ॥'

इति । एते शब्दाः पुमभिधानेऽपि स्त्रीलिङ्गा एव । 'नल्लपिचुक' ॥ तस्य—चटका । अजादित्वाट्टापि [5]इत्वाभावः । 'अण्डपिचुक' ॥ तयोः—चाटकैरः । चटकायाश्चटकस्य वा पुंरूपेऽपत्ये चाटकैरशब्दो वर्तते । 'मोगपिल्ल' ॥ स्त्र्यपत्ये—हि । चटकायाश्चटकस्य वा स्त्रीरूपेऽपत्ये चटकाशब्द एव । 'अण्डपिल्ल' ॥ १७–१८ ॥

---

[1] आरणी (वैज. पृ. २७, श्लो. १३). [2] शिखिचूलिकः B₃. [3] मयूरचटकः B₃.
[4] 'यात्राप्रवेशादिषु च प्रशस्ता श्यामा यथा दक्षिणवामगेयम् । लट्वेव नीलश्चटकः प्रदिष्टः शुभाय कालश्चटकोऽपि तद्वत्' इति मुद्रितग्रन्थे (पृ. ६३). [5] 'क्षिपकादीनाम्' (वा. ७. ३. ४५).

कर्करेटुः करेटुः स्यात् कृकणक्रकरौ समौ ।
वनप्रियः परभृतः कोकिलः पिक इत्यपि ॥ १९ ॥

(वि.) कर्करेटुरिति—कर्क इति रेटतीति कर्करेटुः। कुत्सितं रेटतीति करेटुः। ‘[1]रेटृ परिभाषणे’। कर्कः सिताश्व इव रेटतीती वा। ‘पेट्टकोक्करपेल्लु’॥ कृकं शिरोऽग्रं पार्श्वकण्डूयनाय पुनः पुनर्नयतीति कृकणः[2]। ‘णीञ् प्रापणे’। क्रेति शब्दं रोति क्रकरः[3]। ‘डुकृञ् करणे’। ‘कोक्केरपेल्लु’॥ वनं प्रियमस्य वनप्रियः। परया[4] जात्या भृतः पोषितः परभृतः। कोकते [5]सुस्वरेण चित्तं गृह्णातीति कोकिलः। ‘कुक वृक आदाने’। अपि कायतीति पिकः। ‘कै गै शब्दे’। पिधानशब्दवदकारलोपः। कोकिलनामानि॥ ‘[6]कोयलपेल्लु’॥ १९॥

---

[1] ‘रट परिभाषणे’ K_3, K_6; F_2, Pt_2 add के वृक्षादीनां शिरसि रेटति. [2] कृ इति क्वणति शब्दायते, ‘क्वण शब्दे’ Pt_2. [3] कृणाति स्वजातीयविरुद्धं कृकरः, ‘कॄ हिंसायाम्’ B_1, D_2, K_6. [4] काकजात्या K_5; परैः काकैः भृतः F_2, Pt_2; I adds ‘भृञ् भरणपोषणयोः’. [5] श्रोत्रचित्तं F_2, Pt_2. [6] ‘कोकिले’ J_2; ‘कोयिल’ B_1, K_6.

(पा.) कर्करेटुः—स्यात्। ‘पेद्दकक्केर’। कृकण—समौ। ‘पिन्नकक्केर’॥ वनप्रियः—पिक इत्यपि। शेषे ‘कलकण्ठः काकपुष्टः ताम्राक्षो मधुवागपि’। कोकिलस्य नामानि। ‘कोकिल’॥ १९॥

काके तु करटारिष्टबलिपुष्टसकृत्प्रजाः।
ध्वाङ्क्षात्मघोषपरभृद्बलिभुग्वायसा अपि॥ २०॥
(चिरजीवी चैकदृष्टिर्मौकलिः पिकवर्धनः)

(वि.) काक इति—का इति कायति[1] काकः। ‘कै शब्दे’। [2]केति रटतीति करटः। ‘रट परिभाषणे’। न रिष्यते[3] रोगैरित्यरिष्टः। ‘रिष हिंसायाम्’। बलिना पुष्टो बलिपुष्टः। ‘पुष पुष्टौ’। सकृदेव प्रजा संततिरस्येति सकृत्प्रजः। ध्वाङ्क्षति [4]मांसमभिकाङ्क्षतीति ध्वाङ्क्षः। ‘[5]ध्वाक्षि काङ्क्षायाम्’। [6]आत्मानमेव घोषयति काकेति आत्मघोषः। ‘घुषिर् विशब्दने’। परजातिं[7] बिभर्तीति परभृत्। ‘डुभृञ् धारणपोषणयोः’। बलिं भुङ्क्ते बलिभुक्। ‘भुज पालनाभ्यवहारयोः’। वय एव वायसः। (चिरं जीवतीति चिरजीवी। एकैव दृष्टिरस्य एकदृष्टिः। मूकलस्य यमस्यायं मौकलिः। पिकं वर्धयति पिकवर्धनः।) काकनामानि। ‘[8]काकिपेल्लु’॥ २०॥

---

[1] W_2 adds वाश्यते; वाशते I, J_2. [2] के रटति K_5, K_6. [3] W_2 adds हिंस्यते. [4] बलिं D_2, K_5, K_6. [5] ‘ध्वाक्षि घोरवाशिते च’ D_2. [6] आत्मनाम्नो घोषोऽस्य D_2, K_5, K_6. [7] परं कोकिलं F_2, Pt_2. [8] ‘कागे’ J_2.

(पा.) काके तु—वायसा अपि। शेषे—

‘दिवाटन [1]उलूकारिर्नाडीजङ्घोऽप्रहृष्टकः।
[2]धूलीजङ्घोऽन्यवापश्च चिरंजीव्यन्यपुट् द्विकः।
मौकलिश्च महानेमिरेकाक्षः कण्टकः कुणः॥’

काकनामानि। ‘काकि’॥ २०॥

[1] प्रहृष्टकः B_3.   [2] धूलि° B_3.

द्रोणकाकस्तु काकोलो दात्यूहः कालकण्ठकः।
आतापिचिल्लौ दाक्षाय्यगृध्रौ कीरशुकौ समौ॥ २१॥
क्रुङ् क्रौञ्चोऽथ बकः कह्वः पुष्कराह्वस्तु सारसः।

(वि.) द्रोणकाक इति—द्रुणतीति द्रोणः। द्रोणश्चासौ काकश्च द्रोणकाकः। ‘द्रुण हिंसागतिकौटिल्येषु’। काकेषु[1] कोलति स्थूलो भवतीति काकोलः। ‘कुल संस्त्याने’। काकोलनामनी। ‘मालकाकि’॥ द्वितीयं तृतीयं वा रूपं वहतीति दित्यवाट्। दित्यवाहः पक्ष्यादेरपत्यं दात्यूहः। दान्ति प्लवनं ऊहत इति वा। ‘ऊह वितर्के’। कालवर्णः कण्ठेऽस्येति कालकण्ठकः[2]। दात्यूहनामनी। ‘कूड्कुरुगुड्डुंगिपिट्टपेल्लु भरतपक्षि’॥ आतापयति [3]परजातिमिति आतापी। नकारान्तः। ‘तप संतापे’। [4]चिल्लति परजातिमिति चिल्लः। ‘चिल्ल[5] शैथिल्ये भावकरणे च’। ‘पिन्न ग्रद्दपेल्लु जेमुडु काकि’॥ दक्षते [6]शीघ्रं गच्छतीति दक्षाय्यः। तस्यापत्यं दाक्षाय्यः। ‘दक्ष वृद्धौ शीघ्रार्थे च’। गृध्यति मांसं सर्वदा काङ्क्षतीति गृध्रः। ‘गृधु अभिकाङ्क्षायाम्’। गृध्रनामनी। ‘[7]ग्रद्दपेल्लु’॥ कीति शब्दं रातीति कीरः। ‘रा आदाने’। शोभते लोहिततुण्डेन हरितवर्णदेहेनेति च शुकः। ‘शुभ[8] दीप्तौ’। शुकतीति वा। ‘शुक गतौ’। शुकनामनी। ‘[9]चिलुकपेल्लु’॥ क्रुञ्चति क्रुङ्। ‘क्रुञ्च कौटिल्याल्पीभावयोः’। क्रौञ्चश्च। क्रौञ्चनामनी। ‘कोङ्गपेल्लु’॥ [10]वक्तीति बकः। ‘वच परिभाषणे’। वबयोरभेदः। वङ्कते कुटिलो भवतीति वा। ‘वकि कौटिल्ये गतौ च’। के जले ह्वयति मत्स्यानिति कह्वः। ‘ह्वेञ् स्पर्धायां शब्दे च’। ‘वक्कुपुलुगुपेल्लु, [11]वक्कुकोंग’॥ सरसि सरःसमीपे भवः सारसः। सारसनामकत्वात् पुष्कराह्वः, पुष्करस्याह्वा अस्येति। सारसनामनी॥ ‘[12]बेग्गुरुपेल्लु’॥ २१॥

---

[1] काकेषु पीनत्वात् B_1, D_2, K_6.   [2] कल एव कालोऽव्यक्तध्वनिः स कण्ठेऽस्येति वा। कालवर्णः कण्टको रोमोद्गमोऽस्येति वा Pt_2.   [3] परजातीयं K_5, K_6.   [4] चिल्लयति

K$_6$, Pt$_2$.　[5] 'चिल्ल कौटिल्ये' K$_5$, K$_6$, Pt$_2$.　[6] आशु K$_6$, W$_2$.　[7] 'मुदिकागे' J$_2$.　[8] 'शुभ शुम्भ शोभनार्थे' K$_5$, K$_6$.　[9] 'गिण' J$_2$.　[10] वं वक्ति W$_2$.　[11] 'बकपक्कि' J$_2$.　[12] 'पेग्गुल' J$_2$.

(पा.) द्रोणकाकः—काकोलः। 'कृष्णकाकस्तथासुरः। ऐन्द्रिश्च वृद्धकाके'। वृद्धकाकनामानि। 'मालकाकि'। अद्रिभवे वा द्रोणवायसः। तथा च ग्रन्थान्तरे—'द्रोणकाकस्तु काकालोऽद्रिकाक इति चेष्यते' इति। 'कोण्डकाकि'। 'धूङ्क्ष्णा तु श्वेतकाकः स्यात्'। 'तेल्लकाकमु'। 'काकः सामुद्रकः पुनः। कुषीतकः संप्रदिष्टः'। समुद्रभवः काकः कुषीतक इति संप्रदिष्टः। समुद्रकाकनाम ॥ दात्यूहः कालकण्ठकः। शेषे—'जलरङ्कः[1] कालकण्ठः'। जलचरपक्षिणो नामनी। 'कुंकरगुडेङ्ग'। 'जलरङ्कुस्तु वञ्जुलः'। जलरङ्कभेद एवायम्। तथा च प्रतापः—'दात्यूहस्तु वञ्जुलः। जलरङ्कुः कालकण्ठः कालकण्टक इत्यपि' इत्यभेदविवक्षयोक्तवान्। वैजयन्त्यां तु (पृ. २६, श्लो. ११) दात्यूहपर्यायानुक्त्वा 'जलरङ्कुस्तु वञ्जुलः' इति विशिष्योक्तम्। ततस्तद्भेद एव। 'हंससाचिः क्षुद्रहंसः'। क्षुद्रहंसनाम। 'चिरिहंस'। 'कयिस्तु[2] कुवलायिकः'। कयिर्हंसजातिरिति वेदभाष्ये। हंसजातिविशेषनामानि ॥ आतापिचिल्लौ आतापी नान्तः। सदा सजातीयकलहकारिणः पक्षिविशेषस्य नामनी। 'पेग्रद्द चमरुगाकिपेरुन्तु'। दाक्षाय्यगृध्रौ। शेषे—'तत्र सुदर्शनः। दूरदृक् पुरुषव्याघ्रः' गृध्रनामानि। 'ग्रद्द'॥ अथ कीर—समौ। शेषे—'[3]दण्डस्त्रिकेतुर्मेधावी श्रीमान् वाग्मी फलाशनः। दरणः'। कीरनामानि। 'चिलुक'। 'पोषितशुकः पान्त्र इत्यभिधीयते'। क्षुरे—पान्त्रो गृहशुक इति। 'पेंप्पुडु चिलुक'। क्रुङ् क्रौञ्चः। 'क्रौञ्चपक्षि'। अथ बकः कह्वः। 'कोंग'। 'बकोटः शुक्लवायसः'। बकनामनी ॥ पुष्कराह्वस्तु सारसः। शेषे—'गोनर्दो लक्ष्मणः कामी दीर्घजङ्घश्च मैथुनी'। तदाह प्रतापः—

'अथ नीलाङ्गः समौ सारसलक्ष्मणौ।
पुष्कराह्वो दीर्घजङ्घो रक्तनेत्रोऽन्यवल्लभः॥
दीर्घग्रीवो रक्तगलस्तनतो रक्ततुण्डकः।
रक्तपादः॥'

इति। सारसनामानि। 'पेग्गुर'॥ २१॥

---

[1] जलरङ्गः B$_3$.　[2] क्षयिः B$_3$; (वैज. पृ. २६, श्लो. ९).　[3] दण्डीति वैजयन्त्याम् (पृ. २८, श्लो. २५).

कोकश्चक्रश्चक्रवाको रथाङ्गाह्वयनामकः ॥ २२ ॥
कादम्बः कलहंसः स्यादुत्क्रोशकुररौ समौ ।

(वि.) कोक इति—कवते प्रियाविरहाद्[1] रात्रौ[2] कोकः। 'कुञ् शब्दे'। चकते तर्पयति प्रियामिति [3]चक्रः। 'चक[4] तृप्तौ'। चक्रेण चक्रशब्देनोच्यत इति चक्रवाकः। चक्र इति वाको नाम यस्येति वा। रथाङ्गं चक्रम्। रथाङ्गशब्दोऽस्याह्वय इति रथाङ्गाह्वयः। रथाङ्गाह्वयशब्दो नामास्यास्तीति रथाङ्गाह्वयनामकः। चक्रवाकनामानि। 'जक्कवपिट्टपेल्लु[5]'॥ कदम्बस्य [6]सजातीयसमूहस्यायं कादम्बः। [7]कलस्वरो हंसः कलहंसः। कलहंसनामनी। 'लेस्सस्वरमुगलहंसपेरु'॥ उच्चैः क्रोशति उत्क्रोशः। 'क्रुश आह्वाने रोदने च'। कुरत्युच्चैरिति कुररः। 'कुर [8]शब्दे'॥ कुररनामनी। 'पेन्नडपुलुगुपेल्लु'॥ २२॥

---

[1] प्रियावियोगात् F_2, Pt_2. [2] K_3 adds वाश्यते. [3] प्रियागमनेन चकते प्रीणातीति D_3, K_5, K_6. [4] 'चक तृप्तौ प्रतिघाते च' B_1, D_2, K_6. [5] 'चक्रवाकपक्षि' J_2. [6] स्वसङ्घस्य सहचारित्वात् F_2, Pt_1, Pt_2. [7] कलः स्वनः J_2; कलो मधुरास्फुटध्वनिः, तद्वान् हंसः Pt_2. [8] 'कुरु कुर शब्दे' D_2, K_2.

(पा.) कोकः—नामकः। रथाङ्गं चक्रम्। तद्वाचिनः प्रातिपदिकात् परौ आह्वयनामशब्दौ वाचकत्वेनास्येति रथाङ्गाह्वयनामकः। रथाङ्गाह्वयो रथाङ्गनामेति द्वे नामनी इत्यर्थः। आह्वयनामशब्दयोरेव नियमात् रथाङ्गसंज्ञिक इत्यादि नास्तीत्यवगम्यत इति कामधेनुकारः। अन्ये तु—रथाङ्गस्याह्वयो हूतिस्तत्पर्यायो [1]नामास्येति व्याचक्षते। तथा च माघे (शिशु. ९. १५) 'हरिहेतिहूतिमिथुनं पततोः' इति। केचित् रथाङ्गशब्दाह्वयशब्दपर्याया एते नामान्यस्येति व्याचक्रुः। एतदुक्तं भवति। रथाङ्गाख्यः चक्राह्वः रथचरणनामा इत्यादि। अत्र चक्राङ्गचक्रिरथशब्दाश्च। तथा च प्रतापः—'अथ चक्राङ्गो रथङ्गाह्वयचक्रिणौ' इति। 'चक्रवाको रथः [2]कोकश्चक्रश्चक्राह्वयाह्वयः' इति वैजयन्ती (पृ. २६, श्लो. ९)। चक्रवाकनामानि। 'जक्कुवपिट्ट'॥ कादम्बः—स्यात्। 'कादम्बः कलहंसश्च हंस आधूसरच्छदः' इति वैजयन्ती (पृ. २६, श्लो. ८)।

> 'धूम्राभचञ्चुचरणः कलहंसश्च बन्धुरः।
> कादम्बो जालपादः स्यात्'।

इति प्रतापः। धूम्रवर्णचञ्चुचरणपक्षस्य हंसस्य नामानि॥ उत्क्रोश—समौ। 'मत्स्यनाशन उत्क्रोशः' इति वैजयन्ती (पृ. २८, श्लो. ३४)। योऽन्तरिक्षे चरन् जलान्तर्वर्तिनं

मत्स्यादिकं निपत्यादत्ते तस्य पक्षिविशेषस्य नामनी। 'लकुमुकि'। शारिकानामनी इति केचित्। 'गोरिंक' ॥ २२ ॥

---

[1] नामानि B_3.　　[2] Pāda omitted in B_3.

हंसास्तु श्वेतगरुतश्चक्राङ्गा मानसौकसः ॥ २३ ॥
राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः ।

(वि.) हंसा इति—हन्ति मनोहरतया गच्छतीति हंसः। 'हन हिंसागत्योः'। श्वेता गरुतः पक्षा अस्येति श्वेतगरुत्। चक्रवत् [1]वृत्तमङ्गमस्येति चक्राङ्गः। [2]मानससरः ओकः स्थानमस्य मानसौकाः। हंसनामानि। 'सामान्यमुगा हंसलपेल्लु'॥ हंसेषु श्रेष्ठत्वाद् राजहंसः। रक्तचञ्चुपादस्य श्वेतदेहस्य हंसस्य नाम। 'हंसललो श्रेष्ठमैनदि' ॥ २३ ॥

---

[1] वृत्ताङ्गत्वात् D_2, K_5, K_6.　　[2] मानससरसि B_1, K_6, W_2.

(पा.) हंसास्तु—मानसौकसः। शेषे—

'मरालश्चक्रपक्षश्च नीलाक्षो जालपादकः ।
परिप्लाव्याचिशकवः शङ्कुः संकुश्च [1]धोरणः ॥'

अत्र ज्येष्ठप्रस्थितक्षीराशशब्दाश्च। तथा च वैजयन्त्याम्—(पृ. २६, श्लो. ५-७)।

'हंसो मरालो नीलाक्षश्चक्रपक्षः सितच्छदः ।
मानसौकाः परिप्लावी चक्राङ्गो जालपादकः ॥
आचिः शङ्कुः शकुः संकुर्ज्येष्ठः प्रस्थितधोरणौ[2] ।
क्षीराशश्चाप्यसौ राजहंसो रक्तैः पदाननैः ॥'

इति। हंसनामानि॥ राजहंसाः—सिताः। रक्तचञ्चुचरणविशिष्टास्तदितराङ्गधवला राजहंसा इत्युच्यन्ते ॥ २३ ॥

---

[1] दोरणः B_3.　　[2] °दोरणौ B_3.

मलिनैर्मल्लिकाक्षास्ते धार्तराष्ट्राः सितेतरैः ॥ २४ ॥
शरारिराटिरातिश्च बलाका बिसकण्ठिका ।

(वि.) मलिनैरिति—मलिनैः किंचिद्धूम्रैश्चञ्चुचरणैः उपलक्षिताः सिताश्च शरीरेण हंसा मल्लिकाक्षा इत्युच्यन्ते। [1]मल्लिकाकुसुमपाण्डुराङ्गत्वात् मल्लिकाक्षाः। [2]ईषन्नीलपादस्य श्वेतहंसस्य नाम। धृतराष्ट्रदेशे भवा धार्तराष्ट्राः। सितेतरैः कृष्णैश्चञ्चुचरणैरुपलक्षिता हंसा धार्तराष्ट्रा इत्युच्यन्ते। अतिनीलचञ्चुपादस्य सितहंसस्य नाम॥ [3]परजातिं शृणातीति शरारिः। 'शृ हिंसायाम्'। शरं नीरं हिंसां वा ऋच्छतीति वा। 'ऋ गतौ'। अटतीतस्ततो गच्छतीत्याटिः। 'अट पट गतौ'। अतति [4]संततं गच्छतीत्यातिः। 'अत सातत्यगमने'। त्रयः[5] पुंलिङ्गा भवन्ति। शरारिनामानि। 'आंडेलनुपक्षिपेल्लु'॥ बलेन [6]मेघपङ्क्तिमकति प्राप्नोतीति बलाका। 'अक अग कुटिलायां गतौ'। शौक्ल्यात् दैर्घ्याच्च बिसवत् कण्ठोऽस्या इति बिसकण्ठिका। बलाकानामनी। 'तेल्लकोक्करपेल्लु'॥ २४॥

[1] मल्लिकाख्या इति वा पाठः F_2, Pt_2. [2] I, K_2, K_5 add चञ्चु. [3] पराजितं J_2. [4] सत्वरं W_2. [5] त्रीणि पुंलिङ्गानि भवन्ति I, J_2, K_3, K_5. [6] मालां F_2, Pt_2.

(पा.) मलिनैः—ते। मलिनैश्चञ्चुचरणैरुपलक्षिताः सिता हंसा मल्लिकाक्षा इत्युच्यन्ते। धार्तराष्ट्राः सितेतरैः। कृष्णवर्णैश्चञ्चुचरणैरुपलक्षिताः सिता हंसा धार्तराष्ट्रा इत्युच्यन्ते। शरारिः—आतिश्च। त्रयोऽपि शब्दाः स्त्रीलिङ्गाः। 'आटिस्त्वातिः शरारिका'[1] इति वैजयन्ती (पृ. २६, श्लो. ११)। 'आटिः शरारिर्वरटा गण्डोरी वानरी कपी। आतिश्च' इति रत्नकोशे स्त्रीकाण्डे पठिताः। आटिनामानि। 'आडेलु'॥ बलाका बिसकण्ठिका। बिसकाशिकेति केचित्। अत्र [2]दर्वीतुण्डशब्दश्च। बकस्यैव जातिभेदोऽयम्। 'तेल्लकोक्कर'॥ २४॥

[1] शरारिके B_3; शराटिका इति मुद्रितग्रन्थे. [2] दर्वीमण्ड° B_3; °तुण्ड° वैज. (पृ. २६, श्लो १०).

हंसस्य योषिद् वरटा सारसस्य तु लक्ष्मणा॥ २५॥
जतुकाजिनपत्रा स्यात् परोष्णी तैलपायिका।

(वि.) हंसस्येति—वृणीते हंसमिति [1]वरटा। '[2]वृञ् वरणे'। वरं श्रेष्ठमटनमस्या इति वा। हंसस्त्रीनाम। 'आण्डुहंसपेरु'॥ सारसस्य लक्ष्माणि चिह्नानि सन्त्यस्या इति लक्ष्मणा। लक्ष्मीरस्या अस्तीति वा। सारसस्त्रीनाम। 'आण्डु बेग्गुरु'॥ [3]जतुवत् कृष्णपिङ्गलत्वात् जतुका। अजिनवत् पत्राणि पक्षा अस्या इति अजिनपत्रा[4]। जतूकानामनी। 'चीकुरुवायपेल्लु'॥ शीतासहत्वेन परमुष्णमस्या इति परोष्णी[5]। [6]नित्यं

मुखविकासेन तैलं पिबतीव तिष्ठतीति तैलपायिका। 'पा पाने'। देवालयस्थजतुका[7]-नामनी। 'गब्बिलायपेल्लु'॥ केचिदेतानि चत्वारि नामानि जतुकाया[8] एवेति वदन्ति॥ २५॥

---

[1] हंसेन व्रियत इति B_1, D_2, K_6. [2] 'वृङ् संभक्तौ' K_6. [3] जतुकवत् W_2. [4] पत्रस्थाने (पक्षस्थाने W_2) अजिनं चर्मास्या अस्तीति D_2, K_5, K_6. [5] परं केवलमुष्णं तेजो यस्याः J_2, K_6. [6] सर्वदा विवृतास्यत्वेन Pt_2. [7] °जतूका° J_2. [8] K_3, K_5, W_2 add नामानि.

(पा.) हंसस्य—वरटा। हंसस्त्री वरटेत्युच्यते। 'वरटा हंसकान्ता स्याद्वराला वरलापि च' इति वैजयन्ती (पृ. २६, श्लो. ८)। सारसस्य—लक्ष्मणा। स्त्रीविषयत्वाट्टावेव। 'आण्डवेग्गुरु'॥ शेषे—

'उलूकचेटी हिक्का स्यात् कनकाक्षी निशाचरी।
पिङ्गला दैवपिशुनी॥'

शुभाशुभसूचकस्य रात्रिचारिणः पक्षिविशेषस्य नामानि। 'पशिडिकंटे'। 'श्येन्यां तु प्राचिका स्मृता'। 'अण्डडेग'॥ जतुका—स्यात्। 'जतुका चर्मचटकः' इति वैजयन्ती[1]। निशाचटकनामनी। 'चिकुरुवाय'।

'निशा निश्यग्रेऽपि स्थितघनजतूकापटलकं
कदा शून्यागारं भवति तव जन्म क्षपयितुम्।'

इति प्रयोगाज्जतूकापि॥ परोष्णी तैलपायिका। शेषे—'निशाटा मुखविड्ङ्गी'। वैजयन्त्यां तु—'[1]अथ निशाटनी। तमःप्रिया तरोष्णी च मुखविष्ठा च वल्लकी' इति। 'मुखविष्ठा वल्लरिका' इति तन्त्रान्तरे। चर्मचटकविशेषनामानि। 'जिवुकपिट्ट। गब्बिलमुन्नु'। जतुकादीनि सप्तापि [2]जतूकानामान्येवेति केचित्। 'बंबराली तु मक्षिका'। मक्षिकासामान्यनामानि॥ 'ईंग'॥ २५॥

---

[1] मुद्रितग्रन्थे न दृश्यते. [2] जतुका B_3.

चर्वणा मक्षिका नीला सरघा मधुमक्षिका॥ २६॥
पतङ्गिका पुत्तिका स्याद् दंशस्तु वनमक्षिका।

(वि.) चर्वणेति—पश्वादिकं चर्वतीति चर्वणा[1]। 'चर्व अदने'। वर्वणेति वा पाठः। तदा सजातीयैः सह पश्वादिकं वृणोतीति वर्वणा। 'वृञ् वरणे'। [2]भक्ष्यन्ते

पशव आभ्य इति मक्षिका। 'मक्ष रोषे'। मक्षिकानामानि। 'नल्लनियीङ्गपेल्लु'॥ [3]सरन्तीति सराः स्वविषयं प्राप्ताः मधुहर्तारः, तान् हन्तीति सरघा। 'हन हिंसागत्योः'। मधुनि सक्ता मक्षिका मधुमक्षिका। 'तेनेटींङ्ग'॥ पततीति पतङ्गिका। 'पत्लृ गतौ'। पुत् कुत्सितं मधु तनोतीति[4] पुत्तिका। 'तनु विस्तारे'। 'गोप्प तेनेयीङ्ग'॥ दशतीति दंशः। 'दंश दशने'। वने मक्षिका वनमक्षिका। वनमक्षिकानामनी॥ 'अडवियीङ्गपेल्लु[5]'॥ २६॥

---

[1] प्राणिनां त्वचं चर्वति F_2, Pt_2. [2] मक्षन्ति, 'मक्ष रोषे संघाते च' D_2. [3] सरतीति (मधुहर्तारं W_2) सरघा K_5, K_6. [4] J_2 adds विस्तारयति; तायते, 'तायृ संतानपालनयोः' Pt_2. [5] 'काडनोण' J_2.

(पा.) चर्वणा—नीली। नीलवर्णमक्षिका चर्वणा स्यात्। वर्वणेत्यन्तस्थादिं केचिदाहुः। 'नल्लनींगे'॥ सरघा—मक्षिका। 'तेनटींग'॥ पतङ्गिका—स्यात्। पुत् कुत्सितं तनोति पुत्तिका। पृषोदरादिः।

> 'माक्षिकं तैलवर्णं स्याद् घृतवर्णं तु पौत्तिकम्।
> भ्रामरं तु भवेच्छुक्लं क्षौद्रं तु कपिशं भवेत्॥'

इति वचनात्, मधुमक्षिकाविशेषस्यैव नामनी। 'पेरयींग'॥ दंशस्तु वनमक्षिका। 'अडवियीङ्ग'॥ २६॥

दंशी तज्जातिरल्पा स्याद् गन्धोली वरटा द्वयोः॥ २७॥
भृङ्गारी चीरुका चीरी झिल्लिका च समा इमाः।

(त्रि.) दंशीति—अल्पा[1] दंशजातिः दंशी। 'अडविदोमपेरु'॥ गन्धयति परजातिमर्दयतीति[2] गन्धोली। 'गन्ध अर्दने'। गण्डोलीति पाठे गण्डं कपोलमुलत्यावृणोतीति गण्डोली। 'उल संवरणे'। [3]वृणोतीति वरटा। 'वृञ् वरणे'। 'एर्रतुम्मेदपेल्लु'। [4]आकारेण [5]भृङ्गमियर्तीति भृङ्गारी। 'ऋ गतौ'। ची इति रौतीति [6]चीरुका। 'रु शब्दे'। ची इति शब्देन रिणाति पीडयतीति चीरी। 'री गतिरेषणयोः'। झिल्लाख्यवाद्यवत् कायतीति झिल्लिका। 'कै शब्दे'। झिल्लिकानामानि। 'चिमटपेल्लु'॥ २७॥

---

[1] दंशस्याल्पजातिः D_2, K_5, K_6. [2] अर्दति K_5, K_6. [3] K_5, K_6 add हंसिकावत्. [4] आकृत्या F_2, Pt_2. [5] D_2, K_6 add अनुगच्छति; अनुकरोति J_2, K_5, W_2. [6] चिरुका K_5; चिरिका K_6.

(पा.) दंशी—स्यात्। अल्पा दंशजातिर्दंशीत्युच्यते। 'अडविदोम'। शेषे—'जलजा तु कषायिका'। जलजा मक्षिका कषायिकेत्युच्यते। 'नीरुदोम'। 'कुम्भीरमक्षिका घोणा'। कुम्भिनोऽपि ईरयति या मक्षिका सा घोणेत्युच्यते। 'येनिकदोम'। 'मशकस्तु मलिम्लुंचः। नीलदंशस्तीक्ष्णतुण्डः'। नीलदंशनामानि। 'नल्लदोम'। गण्डोली—द्वयोः। गन्धोलीति कतिचित्। 'गन्धोलिरपि गण्डोलिर्वरटा वरटोऽपि च' इति गोपालः। अत्र—'गृहिणी गृहकारिका। अन्यदाख्या कोष्ठकारी' इति तन्त्रान्तरे। 'कण्टका कण्टकानना। [1]गृहिणी' इति वैजयन्त्यां (पृ. २९, श्लो. ४७) च नामान्तराणि। पक्षवतः कीटविशेषस्य नामानि। 'येर्रतुंमिद। कंदिरीगानु'। भृङ्गारी—समा इमाः। [1]झिल्लीनामानि। 'चिंबिट'॥ २७॥

---

[1] 'गृहिणी गृहकारिका' इति ४६ श्लोके. [2] झल्ली B_3.

समौ पतङ्गशलभौ खद्योतो ज्योतिरिङ्गणः॥ २८॥
मधुव्रतो मधुकरो मधुलिण्मधुपालिनः।
द्विरेफपुष्पलिड्भृङ्गषट्पदभ्रमरालयः॥ २९॥
(इन्दिन्दिरश्चञ्चरीको रोलम्बो बम्भरश्च सः)

(वि.) समाविति—पतत्यग्नौ पतङ्गः। 'पत्लृ गतौ'। अग्नौ शं शमं लभत इति शलभः। 'डुलभष् प्राप्तौ'। शलत्याशु गच्छत्यग्निमिति वा। 'शल आशुगमने'। शलभनामनी। '[1]मिडतपेल्लु'॥ खं[2] द्योतयतीति खद्योतः। 'द्युत दीप्तौ'। स्वज्योतिषा इङ्गति चलतीति[3] ज्योतिरिङ्गणः[4]। '[5]इगि गतौ'। खद्योतनामनी। 'मिणिङ्गुरु[6] पुरुगुपेल्लु'॥ मधु पुष्परसं व्रतयति [7]भुङ्क्ते मधुव्रतः। मधु[8] करोतीति मधुकरः। 'डुकृञ् करणे'। मधु लेढीति मधुलिट्। 'लिह आस्वादने'। मधु पिबतीति मधुपः। 'पा पाने'। अलति भूषयति पद्मादिकमिति[9] अली। 'अल भूषणादौ'। नकारान्तः पुंलिङ्गः। अस्य भ्रमर इति नाम्नि द्वौ रेफौ स्त इति द्विरेफः। पुष्पं लेढ्यास्वादयतीति पुष्पलिट्[10]। कार्ष्ण्यं [11]भरतीति भृङ्गः। 'भृञ् भरणे'। षट् पदानि यस्य सः षट्पदः। भ्रमतीति भ्रमरः। 'भ्रमु अनवस्थाने'। अलति पुष्पाणि अलिः। 'अल भूषणादौ'। (इन्दति इन्दिरया इन्दिन्दिरः। 'इदि परमैश्वर्ये'। चरतीति चञ्चरीकः। 'चर गतिभक्षणयोः'। रौतीति रोलम्बः। 'रु शब्दे'। बमिति शब्दं बिभर्तीति बम्भरः।) भ्रमरनामानि॥ 'तुम्मेदपेल्लु'॥ २८–९॥

---

[1] 'पतंगदहुलु' J_2. [2] I, J_2, K_5, W_2 add आकाशं; खे द्योतत इति F_2, Pt_2. [3] ज्वलति W_2. [4] ज्योतिषा प्रकाशेनोपलक्षितः सन् रिङ्गति गच्छतीति F_2, Pt_2. [5] 'रिगि

गतौ’ K_5, Pt_2.
[6] ‘मिंचनहुलु’ J_2.
[7] उपभुङ्क्ते D_2, K_5, K_6.
[8] I, J_2, K_2 add स्वयं.
[9] स्वस्थानं (पुष्पादिकं J_2; पद्मादिकं D_2; वृक्षादिकं K_5) B_1, K_6.
[10] I, Pt_2 add ‘लिह आस्वादने.’
[11] बिभर्ति, ‘डुभृञ् धारणपोषणयोः’ D_2, K_6.
[12] अली इति शब्दवद् अलिशब्दव्युत्पत्तिः, इकारान्तोऽयम् D_2, K_5, K_6.

(पा.) समौ पतङ्गशलभौ। ‘मिडत’। खद्योतो ज्योतिरिङ्गणः। शेषे—‘तमोमणिः कीटमणिर्ज्योतिर्माली निशामणिः’। खद्योतनामानि। ‘मिणुगुरुपुरुगु’॥ मधुव्रतो—भ्रमरालयः। शेषे—

‘इन्दिन्दिरश्चञ्चरीको रोलम्बः शितपुटस्तथा।
भृङ्गाणो भ्रमणश्चापि भसलः पुष्पलोलुपः॥’

इन्दिन्दिरचञ्चरीकरोलम्बभसलशब्दा देश्या इति स्वामी (पृ. १३०)। शितेः कार्ष्ण्यस्य पुटः शितपुटः। पृषोदरादिः। ‘बृहस्पतये[1] शितपुटः पीतभ्रमरः’ इति वेदभाष्यम्। पुष्पंधयबम्भरशब्दावप्यत्र—

‘पुष्पंधयो बम्भरश्च भसलः पुष्पलोलुपः।
भृङ्गभ्रमणरोलम्बभयदभ्रमरालयः॥’

इति यादवः। मिलिन्दशब्दोऽपि। ‘पुष्पंधयो मिलिन्दश्च भसलः शितपुटश्च सः’ इति कोशान्तरम्। भृङ्गनामानि। ‘तुंमिद’॥ २८–९॥

[1] तै. सं. ५. ५. १७. १.

मयूरो बर्हिणो बर्ही नीलकण्ठो भुजङ्गभुक्।
शिखावलः शिखी केकी मेघनादानुलास्यपि॥ ३०॥
केका वाणी मयूरस्य समौ चन्द्रकमेचकौ।

(वि.) मयूर इति—मीनाति हिनस्ति सर्वानिति मयूरः। ‘मीञ् हिंसायाम्’। बर्हमस्यास्तीति बर्हिणः। बर्ही च। नीलः कण्ठोऽस्येति नीलकण्ठः[1]। भुजङ्गान् भुङ्क्ते भुजङ्गभुक्। ‘भुजपालनाभ्यवहारयोः’। शिखा चूडास्यास्तीति शिखावलः। शिखी च। [2]केकारवोऽस्यास्तीति केकी। मेघनादमनुलसतीति मेघनादानुलासी। ‘लस श्लेषणक्रीडनयोः’। मयूरनामानि॥ ‘नेमिलि पेल्लु’॥ के मूर्ध्नि [3]कायतेऽभिव्याप्य व्यज्यत इति केका। ‘कै शब्दे’। मयूरवाणीनाम। ‘[4]नेमिलिकून्तपेरु’॥ [5]चन्द्रप्रतिकृतित्वात् चन्द्रकः। हरितमिश्रवर्णत्वात्[6] मेचकः। चन्द्रकनामनी॥ ‘[7]नेमिलिपुरिकन्नुपेल्लु’॥ ३०॥

[1] नीलवर्णः (नीलः I, W_2) कण्ठे यस्य B_1, D_2, K_6. [2] केका K_5, K_6.
[3] अभिव्यज्यते I, J_2, Pt_2. [4] 'नविल ध्वनि' J_2. [5] चन्द्र इव Pt_2.
[6] हरितवर्णमिश्रकृष्ण° D_2, K_2, K_6, W_2. [7] 'नविल चेंदिके' J_2.

(पा.) मयूरो—मेघनादानुलास्यपि। शेषे—

'मार्जारकण्ठः केकालिश्चन्द्रकी चित्रपिङ्गलः।
वर्षामदः शापटीको दार्वण्डश्चित्रपक्षकः।
शुक्लापाङ्गो मयूकश्च विष्किरो नर्तकप्रियः॥'

मरूकश्च इति पाठान्तरम्। मयूरनामानि। 'नेमलि'॥ केका—मयूरस्य। मयूरवाणी केका स्यात्। 'नेमलिपलुकु'॥ समौ—मेचकौ। वर्हगतलोचननिभप्रदेशनामनी। 'नेमलिपुरिमीदिकन्नु'॥ ३०॥

शिखा चूडा शिखण्डश्च पिच्छबर्हे नपुंसके॥ ३१॥
खगे विहंगविहगविहंगमविहायसः।
शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः॥ ३२॥
पतत्रिपत्रिपतगपतत्पत्ररथाण्डजाः।
नगौकोवाजिविकिरविविष्किरपतत्रयः॥ ३३॥
नीडोद्भवा गरुत्मन्तः पित्सन्तो नभसंगमाः।

(वि.) शिखेति—शिरसि खेलतीति [1]शिखा। 'खेल चलने'। चुद्यते वायुनेति चूडा[2]। 'चुद प्रेरणे[3]'। शिखाभिरग्रभागैर्डयते चलतीति शिखण्डः। 'डीङ् विहायसा गतौ'। पिच्छयतीति पिच्छम्। 'पिच्छ कुट्टने'। पिञ्छमिति पाठे पिञ्छयतीति पिञ्छम्। 'पिञ्छ दीप्तौ'। बर्हति नृत्तेन बर्हम्। 'बृह [4]वृद्धौ'। बर्हनामानि। 'नेमिलि-[5]पुरिपेल्लु'॥ खे[6] आकाशे गच्छतीति खगः। 'गम्लृ गतौ'। विहायसा[7] गच्छतीति विहंगः। विहगः[8]। विहंगमश्च। विजिहीते विशेषगतिभिरिति विहायाः। 'ओहाङ् गतौ'। आकाशे गन्तुं शक्नोतीति शकुन्तिः। शकुनिः। शकुन्तः। शकुनश्च। 'शक्लृ शक्तौ'। पक्षौ स्तोऽस्येति पक्षी। अण्डरूपेण पक्षिरूपेण च द्विर्जायत इति द्विजः। [9]पतत्रे अस्य स्त इति पतत्री। पत्रे पक्षौ स्तोऽस्येति पत्री। पतन् गच्छतीति पतगः। पतंगश्च। पततीति पतन्। 'पत्लृ गतौ'। पत्रमेव [10]रथो यस्य सः पत्ररथः। अण्डाज्जायतेऽण्डजः। 'जनी प्रादुर्भावे'। [11]नगे वृक्षे ओकः स्थानमस्य नगौकाः। वाजः पक्षोऽस्यास्तीति

वाजी। विकिरति मांसं[12] तुण्डेनेति विकिरः। विष्किरश्च। 'कॄ विक्षेपे'। वयति तृणादिना नीडमिति विः। 'वेञ् तन्तुसंताने'। पततीति पतत्रिः। [13]नोडाद् उद्भवतीति नीडोद्भवः। गरुतः पक्षा येषां सन्तीति गरुत्मन्तः। पतितुमिच्छन्तः पित्सन्तः। नभसि गच्छन्तीति नभसंगमाः। पक्षिनामानि। '[14]सामान्यमु गावलपेल्लु'॥ ३१–३॥

[1] शाखते व्याप्नोतीति, 'शाखृ व्याप्तौ' D₂, K₅, K₆. [2] चुड्यते, 'चुड संवरणे समुच्छ्राये च' K₅. [3] I, K₂, K₃ add 'नेमिलिशिखपेरु'. [4] 'बृह बृहि वृद्धौ' K₆. [5] 'नविलगरि' J₂. [6] खेन आकाशेन J₂, K₃, W₂. [7] विहायसि B₁, D₂, K₆. [8] विविधं जिहीते गच्छतीति F₂, Pt₂. [9] पतत्रं पक्षः D₂, K₅, K₆. [10] F₂, Pt₂ add गमनसाधनं. [11] नगो वृक्षः F₂, Pt₂. [12] भक्ष्यं Pt₂. [13] नीडे K₅, K₆. [14] 'पक्षिपेल्लु' K₅, K₆; 'पक्षिय हेसरु' J₂.

(पा.) शिखा चूडा। मयूरस्य चूडा शिखा स्यात्। 'नेमिलिजुट्टु'। शिखण्डस्तु—नपुंसके। शेषे—

'बर्हश्च प्रचलाकश्च कलापश्च समार्थकाः'।
'बर्होऽस्त्री प्रचलाकश्च कलापश्च शिखण्डकः'।

इत्यजयपालः। 'सीतायाः पुरतश्च हन्त शिखिनां बर्हाः सगर्हा इव' इति प्रयोगश्च। तस्मात् पुंलिङ्गोऽपि बर्हशब्दः। प्रचलः सन्नकति गच्छतीति प्रचलाकः। तद्योगात् प्रचलाकी मयूरः। तथा च—'एतस्मिन् प्रचलाकिनां प्रचलतामुद्वेजिताः कूजितैरुद्वेल्लन्ति [1]पुराणरोहिणतरुस्तम्भेषु[2] कुम्भीनसाः।' इत्युत्तररामचरिते (२. २९) भवभूतिप्रयोगः। बर्हनामानि। 'नेमिलिपिञ्छमु'॥ खगे—नभसंगमाः। नीडोद्भवादिषु बहुवचनं वृत्तानुरोधात्। शेषे—

'प्लावी पिपतिषन्नीडी मल्लकः शुकतुण्डिनौ।
वशाकुर्मदनः पीतुर्मशाको[3] विप्रुषो भसन्॥'

पक्षिसामान्यनामानि। 'वातगामी[4] [5]शलक ऊकः' इति चैते वैजयन्त्याम् (पृ. २६, श्लो. ३-४)॥ ३१–३॥

[1] रोहण° A₁. [2] स्कन्धेषु B₃. [3] मकारः B₃. [4] वातप्रमीः B₃. [5] शकलः B₃.

तेषां विशेषा हारीतो मद्गुः कारण्डवः प्लवः॥ ३४॥

तित्तिरिः कुक्कुभो लावो जीवंजीवश्चकोरकः ।
कोयष्टिकष्टिट्टिभको वर्तको वर्तिकादयः ॥ ३५ ॥

(वि.) तेषामिति—हरितवर्णत्वाद्[1] हारीतः । '[2]पच्चनिपिट्ट' । मज्जति जले मद्गुः । 'टुमस्जो शुद्धौ' । '[3]नीरुकाकि' । करण्डे भवः[4] कारण्डः । तं वाति गच्छतीति कारण्डवः । 'वा गतिगन्धनयोः' । प्लवत इति प्लवः । 'प्लुङ् गतौ जलोपरिसर्पणे च' । 'नीरुकोडि' ॥ तित्तीति रौति शब्दायत इति तित्तिरिः । 'रु शब्दे' । 'तीतिवु' ॥ कुगिति [5]कुभति शब्दायत इति कुक्कुभः । कुभिः सौत्रो धातुः । 'गम्पपुलुगु' ॥ लाति मांसमिति लावः[6] । 'ला आदाने' । लूयते मांसमनेनेति वा । 'लूञ् छेदने' । 'लावुक' ॥ जीवेन [7]सहचरेण क्रीडन् जीवतीति जीवंजीवः । 'जीव प्राणधारणे' । '[8]वन्नेपुलुगु' ॥ चकति तृप्यति ज्योत्स्नया[9] चकोरः । 'चक तृप्तौ' । '[10]चकोरपक्षि' ॥ ओकसा[11] स्थानेन यजते संगच्छते कोयष्टिकः । 'यज देवपूजासंगतिकरणयजनदानेषु' । 'चीकुकोक्कैर' ॥ टिट्टीति निष्ठुरं भाषत इति टिट्टिभकः । 'भाष व्यक्तायां वाचि' । टिट्टीति शब्देन भातीति वा । 'भा दीप्तौ' । 'लकुमुकिपेरु' ॥ वर्तते स्वेच्छया[12] वर्तकः । 'वृतु वर्तने' । 'वेलिचेपिट्ट' ॥ [13]वर्तकशब्दवद् वर्तिकाशब्दव्युत्पत्तिः । 'मूलवल्लंकिपेरु' ॥ एते पक्षिविशेषाह्वयाः ॥ ३४–५ ॥

---

[1] वर्णयोगात् F_2, Pt_2. [2] 'हरीतपक्षि' J_2. [3] 'नीरकागे' J_2. [4] वद्धः K_6. [5] भाषते K_6. [6] 'लावेहक्कि' J_2. [7] जलेन K_5, K_6. [8] 'जोवंजीवमु' D_2, K_2. [9] चन्द्रिकया D_2, J_2, K_2, K_5. [10] 'वेन्निलपुलुगु' I, K_5. [11] ओकः स्थानं D_2, K_2, K_6. [12] K_5, K_6 add इतस्ततः. [13] व्युत्पत्तिः पूर्ववत् J_2.

(पा.) तेषां विशेषा—वर्तिकादयः । तेषां पक्षिणां विशेषा हारीतादय उक्ताः । शेषे—'हारीतो हरितापीते' । हरिते आपीते हारीतः स्यात् । 'पच्चपिट्ट' । 'मद्गुस्तु जलवायसः' । 'नीरुकाकि' । 'कारण्डवो महापक्षः' । 'कन्नेलेडि' । 'प्लवः स्याद्वारिकुक्कुटः' । परिप्लवश्च [1]शकटबिलश्चात्र समाहृतः । 'प्लवः शकटबिलः' इति वेदभाष्ये । 'नीरुकोडि' ॥ 'तित्तिरस्तु खरक्वाणो वरिष्ठः शंकरप्रियः' । 'रुद्राणां तित्तिरिः' इति श्रुतिः (तै. सं. ५. ५. १६. १) । 'तीतुव' । 'भस्मवर्णोऽलजो भासः शकुन्तः कुक्कुभस्तथा' । 'भस्मवर्णस्तु भासः स्यात्' इति क्षुरे । 'अलज आन्तरिक्ष' इत्यत्र (वाज. सं. २४. ३४) अलजो भास इति ज्ञानपत्रे व्याख्यातम् । शकुन्तशब्दः पक्षिसामान्यवचनः, तद्विशेषवचनश्च । कुगिति कौति शब्दायते कुक्कुभः । [2]भक्प्रत्ययः । 'गंपपुलुगु' ॥

'लावकश्चित्रयोधी स्याच्चतुर्धा स प्रकीर्तितः ।
गौरिकः पांसुलः पौण्ड्रः कर्बुरश्च ॥'

[3]लावकश्चित्रयोधी। [3]लावकनामनी। स च गौरिकादिभेदेन चतुर्विधः। 'अथ जीवदृक्। जीवंजीवो भवेत्'। जीवंजीवनामनी ॥ रक्तनयनस्तु चकोरकः। 'चलच्चञ्चूत्पिवज्ज्योत्स्नाप्रियाश्च विषसूचके'। विषसूचकपक्षिणो नामानि। जीवंजीवशब्दश्चात्र। 'जीवंजीवश्चकोरे स्याद् द्रुमपक्षिविशेषयोः' इति विश्वः (पृ. १६७, श्लो. ६२)। 'वेन्नेलपुलुगु'॥ 'कोयष्टिकः शिखरिणि'। शिखरिनाम्नि पक्षिणि कोयष्टिकशब्दः स्यात्। 'कोयष्टिः शिखरी समौ' इति यादवः (वैज. पृ. २७, श्लो. २०)। 'चीकुगोक्केर'। 'टिट्टिभस्तु कटुक्वणः'। तस्मिन्नुत्पादशयनोऽण्डुकश्च। टिट्टिभनामानि। 'टिट्टिभमु'॥ 'अथ वलनक्रमे वर्तकः'। वलनक्रमे वर्तकशब्दः स्यात्। 'वेलिशगुव्व'। 'शकुनौ प्राचाम्। वर्तिका मीनवल्लिका'। प्राचां पक्षिणां मध्ये प्रशस्ते शकुनौ वर्तिका मीनवल्लिकेति शब्दद्वयं वर्तते। 'मीलवल्लिक'। 'कपिञ्जलश्चित्रपक्षः'। 'कञ्जु'। इत्याद्याः पक्षिणः परे ग्रन्थगौरवभयान्नोक्ताः।

'हंसादयो जलचरा ग्राम्याः स्युः कुक्कुटादयः।
वनजाः पीतमुण्डाद्या भृङ्गाद्याः क्षुद्रपक्षिणः' ॥ ३४–५ ॥

गरुत्पक्षच्छदाः पत्रं पतत्रं च तनूरुहम् ।
स्त्री पक्षतिः पक्षमूलं चञ्चुस्त्रोटिरुभे स्त्रियौ ॥ ३६ ॥
प्रडीनोड्डीनसंडीनान्येताः खगगतिक्रियाः ।

(वि.) गरुदिति—[1]गिरति [2]गगनमाक्राम्यत्यनेनेति गरुत्। 'गॄ निगरणे'। पक्षति परिगृह्णात्याकाशमनेनेति[3] पक्षः। 'पक्ष परिग्रहे'। छाद्यतेऽङ्गमनेनेति [4]छदः। 'छद अपवारणे'। पतत्यनेनेति पत्रम्[5]। 'पत्लृ गतौ'। पतन्तं त्रायत इति पतत्रम्। 'त्रैङ् रक्षणे'। तन्वां रोहतीति तनूरुहम्। 'रुह बीजजन्मनि प्रादुर्भावे च'। पक्षनामानि। '[6]रेक्कलपेल्लु'॥ पक्षस्य मूलं पक्षतिः। पक्षमूलं च। 'रेक्कमोदलु'॥ चञ्चति[7] चलत्याहारग्रहणे चञ्चुः। 'चञ्चु गतौ'। त्रुट्यति[8] मांसादिकमनेनेति[9] त्रोटिः। 'त्रुट छेदने'। 'पक्षुलमुक्कपेल्लु'॥ प्रकृष्टं [10]डयनं प्रडीनम्। उद् ऊर्ध्वं डयनम् उड्डीनम्। संहतं डयनं संडीनम्[11]। 'डीङ् विहायसा गतौ'। पक्षिणां गतिविशेषनामानि॥ 'पक्षुलगतिविशेषनाममुलु'॥ ३६॥

---

[1] शकटाविल इति वैजयन्त्याम् (पृ. २७, श्लो. १२). [2] B₃ adds बाहुलकात्.
[3] लावुकः B₃.

[1] आक्रामति D_2, K_6; क्राम्यति K_5; अतिक्रामति J_2. [2] आकाशं K_5, K_6. [3] गगनं F_2, Pt_2. [4] I, K_5, K_6 add छादयत्याकाशमनेनेति. [5] D_2, K_5, K_6 add पतत्त्रं च. [6] 'पक्ष' J_2. [7] K_5 omits one line. [8] D_2, K_5, K_6 add भिनत्ति. [9] मांसमनेन J_2, K_6. [10] डयत इति I. [11] संगतं (D_2, K_5, K_6) डयत इति I.

(पा.) गरुत्—तनूरुहम्। पक्षनामानि। 'रेक्कलु'। स्त्री—पक्षमूलम्। पक्षमूलनाम। 'रेक्कलमोदलु'॥ चञ्चुः—स्त्रियौ। शेषे—'तस्यां सृपाटिका तुण्डम्'। चञ्चुनामानि। 'पक्षिमुक्कु'। 'विडीनं डयनं गतिः'। पक्षिणो गतिनामानि। प्रडीनोड्डीनसंडीनान्येताः खगगतिक्रियाः। एता इति विधेयानुरोधी लिङ्गनिर्देशः। पक्षिगतिविशेषनामानि।

'प्रडीनमाद्यं डयनमुड्डीनं तु वियद्गतिः।
संडीनं तरुगुल्मादिप्राप्तये डयनं मतम्'॥ ३६॥

पेशी कोशो द्विहीनेऽण्डं कुलायो नीडमस्त्रियाम्॥ ३७॥
पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः।

(वि.) पेशीति—पिंशतीति पेशी। अथवा पेशयति गर्भमिति पेशी। 'पिश अवयवे'। गर्भस्य कोशत्वात् कोशः। पेशीकोश इति पाठे पेशीनां [1]मांसखण्डानां कोशः पेशीकोशः। अमति निःसरत्यस्मात् शिशुरित्यण्डम्। 'अम गत्यादिषु'। अण्डशब्दो द्विहीने, नपुंसके[2] वर्तते। अण्डनामानि। 'गुड्डुपेल्लु'॥ सायंकाले पक्षिकुलमयत एनमिति कुलायः[3]। 'अय गतौ'। पक्षिकुलमेतीति वा कुलायम्। 'इण् गतौ'। नीयते तृणादिकमत्रेति नीडम्। 'णीञ् प्रापणे'। '[4]गूडुपेल्लु'॥ [5]पुनाति कुलमिति पोतः। 'पूञ् पवने'। पायते रक्ष्यते पाकः। 'पा रक्षणे'। पच्यते गर्भक्लेशेन वा पाकः[6]। 'डुपचष् पाके'। जनन्या[7] हस्तमवलम्ब्य ऋच्छतीत्यर्भकः। 'ऋ गतौ'। गमनाय डयते डिम्भः[8]। 'डीङ् विहायसा गतौ'। क्षुत्पीडितः सन् पृथु अत्यर्थं कायतीति पृथुकः[9]। 'कै शब्दे'। श्यति तनूकरोति पित्रोर्दुःखमिति शावकः। क्षुत्पीडितजठरं श्यतीति वा। 'शो तनूकरणे'। शेतेऽत्यर्थमिति शिशुः। 'शीङ् स्वप्ने'। शिशुनामानि॥ '[10]सर्वजन्तुसामान्यशिशुमात्रमुनकुनु पेल्लु'॥ ३७॥

---

[1] D_2, K_6 add शरीरिणां. [2] K_2, K_3, K_6 add लिङ्गे. [3] कुलायम् K_5, K_6. [4] 'गूडु' J_2. [5] K_5, K_6 add विरुद्धलक्षणया. [6] D_2, J_2, K_5 add माता पात्येनमिति वा; स्तनौ पिबतीति वा K_5, K_6, W_2. [7] J_2, W_2 add आदि. [8] डिम्बयति,

‘डिभि क्षेपे’ K_2. [9] पृथुतरं यथा भवति तथा कायति F_2, Pt_2. [10] ‘पिल्ल पेरु’ D_2, K_2, K_6.

(पा.) पेशी—अण्डम्। पेशीकोश इत्येकपदमिति केचित्। [1]डिम्बशब्दश्चात्र। ‘पेशी कोशश्च डिम्बोऽण्डम्’ इति वैजयन्त्याम् (पृ. ३०, श्लो. ५०)। अण्डनामानि। ‘गुड्डु’॥ कुलायो—अस्त्रियाम्। पञ्जरशब्दश्चात्र। ‘कुलाये पञ्जरं क्लीबे’ इति तन्त्रान्तरे। पक्षिनिलयनामानि। ‘गूडु’॥ पोतः—शिशुः। शिशुसामान्यनामानि। शेषे—‘पक्षिपोतस्तु [2]पिल्लाकश्चञ्चुसः पीलुकावटौ’। चञ्चुस इत्यत्र चमस इत्येके। पक्षिशिशुनामानि।

‘इह सह संक्रीडन्ते बिडालपोती च कीरपाकौ च।
अहमहमिकया पिबतो हरिणीस्तनमिह च हरिणहरिशाबौ’॥ ३७॥

[1] डिम्भ° B_3. [2] चिल्लाकश्चम्पुक इति वैजयन्त्याम् (पृ. २६, श्लो. ४).

स्त्रीपुंसौ मिथुनं द्वन्द्वं युग्मं तु युगलं युगम्॥ ३८॥
समूहनिवहव्यूहसंदोहविसरव्रजाः।
स्तोमौघनिकरव्रातवारसंघातसंचयाः॥ ३९॥
समुदायः समुदयः समवायश्चयो गणः।
स्त्रियां तु संहतिर्वृन्दं निकुरुम्बं कदम्बकम्॥ ४०॥

(वि.) स्त्रीपुंसाविति—स्त्री च पुमांश्च स्त्रीपुंसौ। मेथति मिथः संगच्छत इति मिथुनम्। ‘मिथृ मेथृ [1]संगमे’। [2]द्वौ सह वर्तेते इति द्वन्द्वम्। ‘स्त्रीपुरुषलजंटपेल्लु’॥ परस्परं युज्यते[3] युग्मम्। युगलं। युगं च। ‘युजिर् योगे’। युग्मनामानि॥ ‘सामान्यमुगा रेण्डु जोडैयुंडुटकु पेल्लु’॥ [4]सम्यगूह्यते एकत्रेति समूहः। ‘ऊह वितर्के’। नितरां वहति प्रापयति स्वसंबन्धिनामेकत्वमिति निवहः[5]। ‘वह प्रापणे’। विशेषेण ऊह्यत इति व्यूहः[6]। संदुह्यते प्रपूर्यत[7] इति संदोहः। ‘दुह प्रपूरणे’। विस्त्रियत इति विसरः। ‘सृ गतौ’। [8]व्रज्यते बहुभिरिति व्रजः। ‘व्रज गतौ’। स्तूयते बहुत्वेनेति स्तोमः। ‘ष्टुञ् स्तुतौ’। उच्यते संघीभूयत इत्योघः। ‘उच समवाये’। निकीर्यत इति निकरः। ‘कृ विक्षेपे’। व्रियत इति व्रातः। वारश्च। ‘वृञ् संभक्तौ’। संहन्यत इति संघातः। ‘हन हिंसागत्योः’। संचीयते संचयः। ‘चिञ् चयने’। [9]समुदयन्तेऽत्र समुदायः। समुदयश्च[10]। ‘अय गतौ’। समवैति समवायः[11]। ‘इण् गतौ’। चीयते चयः। ‘चिञ् चयने’। गण्यते गणः। ‘गण संख्याने’। संहन्यते

संहतिः। 'हन हिंसागत्योः'। व्रियते बृन्दम्। 'वृञ् संभक्तौ'। वबयोरभेदः। नितरां कुरति शब्दायते निकुरुम्बम्। 'कुर शब्दे'। निकुरयति शब्दमन्योन्यसंघट्टनेन कारयति वा। कोलाहलरूपेण कुत्सितमम्बते कदम्बकम्। 'अबि शब्दे'। समूहनामानि॥ 'गुंपुपेल्लु'॥ ३८–४०॥

[1] संगमने I, K_2, K_3, W_2.　[2] द्वौ द्वौ D_2, K_5, K_6.　[3] J_2 adds संगच्छते.
[4] समूह्यते I, J_2, W_2.　[5] D_2, K_5, K_6 add निवहति समुदायत्वं पक्षादीनां प्रापयति.
[6] व्यूहते K_6, W_2; I adds 'ऊह वितर्के'.　[7] D_2, K_6 add अनेन.　[8] व्रजति W_2.
[9] समुदयनं I, K_6; समुदयन्ति K_5.　[10] समुद्यन्त्यत्र, 'इण् गतौ' F_2, Pt_2.　[11] समवयन्ति प्राप्नुवन्त्यत्रेति F_2, Pt_2.

(पा.) स्त्रीपुंसौ—द्वन्द्वम्। स्त्रीपुंसयुगनामनी। युग्मं—युगम्। द्वितयसामान्यनामानि। 'द्वयं द्वैतं यमं द्वन्द्वं द्वितयं यमलं द्वयोः' इति तन्त्रान्तरे द्वितयसामान्यवाचकेषु द्वन्द्वपदमप्युक्तम्। तेन पदद्वन्द्वमित्यादिप्रयोगः।

'मिथुनं द्वितयं द्वैतं द्वयं द्वन्द्वं युगं यमम्।
यमलं युगलं युग्मं युतकं च द्वयोर्गणः[1]॥'

इति वैजयन्ती (पृ. १८७, श्लो. १५)। तेन मिथुनपदमपि द्वितयसामान्यार्थकमाहुः। समूह—कदम्बकम्। समूहनामानि।

'पूगो वितानः प्रकरो मण्डलं चक्रवालकम्।
पटलं पेटिका स्त्री स्यात् चक्रं जातं च जालकम्॥
स्कन्धः कलापः संस्त्यायो ग्रामः परिकरश्छटा॥'

एतानि च॥ ३८–४०॥

[1] गणे इति मुद्रितग्रन्थे.

वृन्दभेदाः समैर्वर्गः संघसार्थौ तु जन्तुभिः।
सजातीयैः कुलं यूथं तिरश्चां पुंनपुंसकम्॥ ४१॥

(वि.) वृन्दभेदा इति—वृन्दभेदाः समूहभेदा वक्ष्यन्ते। वृज्यते[1] विजातीयैरिति वर्गः। 'वृजी वर्जने'। उदाहरणे—प्राणिवर्गः, कवर्गः॥ संहन्यते [2]परस्परसजातीयविजातीयैरिति संघः। 'हन हिंसागत्योः'। सरतीति सार्थः। 'सृ गतौ'। उदा—पक्षिसंघः, वणिक्सार्थः। कोलति संघीभवतीति कुलम्[3]। 'कुल [4]संस्त्याने'।

यथा—ब्राह्मणकुलम् ॥ तिरश्चां तिर्यग्जातीनां समूहो यूथमित्युच्यते। यौति[5] मिश्रीभवतीति यूथम्। 'यु मिश्रणे'। यथा—गजयूथं, वराहयूथमित्यादि ॥ ४१ ॥

---

[1] वर्ज्यते D_2, K_2, W_2. [2] परस्परं K_5, K_6. [3] सजातीयैर्जन्तुभिर्निर्वृत्तः समूहः कुलमित्युच्यते, कुल्यत इति कुलम् I, K_2, W_2. [4] 'कुल संस्त्याने बन्धुषु च' I, K_2, K_5. [5] K_6, W_2 add परस्परं.

(पा.) वृन्दभेदाः। वक्ष्यन्त इति शेषः। समैर्वर्गः। केनचिदुपाधिना सजातीयैर्निर्वृत्तः समूहो वर्ग इत्युच्यते। यथा शिष्यवर्गः कवर्ग इत्यादि। संघः—जन्तुभिः। प्राणिभिर्निर्वृत्तः समूहः संघः सार्थ इति चोच्यते। गोसंघो विप्रसंघ इत्यादि। मेघसंघ इत्यादि तूपचारात्। निरुपपदः सार्थशब्दो वणिक्समूहे। 'सार्थो वणिक्समूहे स्यादपि संघातमात्रके' इति विश्वः (पृ. ७६, श्लो. ९) ॥ सजातीयैः कुलम्। सजातीयैर्जन्तुभिर्निर्वृत्तः समूहः कुलमित्युच्यते। गोकुलं विप्रकुलमित्यादि। यूथं—पुंनपुंसकम्। सजातीयानां तिरश्चां समूहः यूथं यूथ इति चोच्यते। गजयूथं कथायूथं कथयिष्यामीति समूहमात्रेऽपि प्रयोगः। 'यूथं तिर्यक्समूहेऽपि[1] वृन्दमात्रेऽपि[1] भाषितम्' इति विश्वप्रकाशिका (पृ. ७६, श्लो. १२) ॥ ४१ ॥

---

[1] 'स्यात्', 'च' इति च मुद्रितग्रन्थे.

पशूनां समजोऽन्येषां समाजोऽथ सधर्मिणाम्।
स्यान्निकायः पुञ्जराशी तूत्करः कूटमस्त्रियाम् ॥ ४२ ॥

(वि.) पशूनामिति—[1]समजन्त्यत्र समजः। 'अज गतिक्षेपणयोः'। पशुसमूहनाम॥ [2]समाजशब्दव्युत्पत्तिः समजशब्दवत्[3]। पशुभिन्नसंघनाम॥ निचीयते निकायः। 'चिञ् चयने'। सधर्मिवृन्दनाम॥ पुञ्ज्यते समूह्यत इति पुञ्जः[4]। 'पुञ्ज समूहे'। अश्नुत इति राशिः। 'अशू व्याप्तौ'। उत्कीर्यत उन्नतत्वेनेति उत्करः। 'कॄ विक्षेपे'। कूटवत् शिखरवत् [6]स्थितं कूटम्। धान्यादिराशिनामानि ॥ ४२ ॥

---

[1] समजति I, K_6, W_2. [2] F_2, Pt_2 add समजन्त्यत्र समाजः, 'अज गतिक्षेपणयोः'. [3] D_2, K_5, K_6 add व्युत्पत्ति°. [4] F_2, Pt_2 add पुंसो जायत इति वा. [5] रश्यत इति वा राशिः, रशिः सौत्रो धातुः दीप्त्यर्थः D_2, J_2, W_2. [6] K_5, K_6 add उन्नतत्वात्.

(पा.) पशूनां समजः। पशुसमूहः समजः स्यात्। गोसमजः। अश्वसमज इत्यादि ॥ अन्येषां समाजः। पशुव्यतिरिक्तसमूहः समाजः स्यात्। राजसमाज इत्यादि।

अथ, सधर्मिणां—निकायः। समानधर्मवतो समूहो निकायः स्यात्। ऋषिनिकायः। पुञ्जराशी—अस्त्रियाम्। धान्यादीनामुच्चितसमूहनामानि। चणकानां पुञ्जः। मौक्तिकानां राशिः। 'रैपाष्णींषुधिराशयः' इति स्त्रीपुंसयोस्त्रिकाण्डशेषः (पृ. ३८, श्लो. १०४४)। पुञ्जराशीत्युत्तरनिपात एवात्र ज्ञापकः। वस्त्राणामुत्करः। 'कॄ धान्ये' (३. ३. ३०) इति घञ्विधानसामर्थ्यादुत्कारो धान्यमात्रसमूहः। 'उत्कारस्तण्डुलीनां—तण्डुलानामिति वा, शिवपदपदवीपान्थपाथेयमस्तु'। शिलानां कूटम्॥ ४२॥

कापोतशौकमायूरतैत्तिरादीनि तद्गणे।
गृहासक्ताः पक्षिमृगाश्छेकास्ते गृह्यकाश्च ते॥ ४३॥

इति सिंहादिवर्गः

(वि.) कापोत इति—कपोतानां समूहः कापोतम्। कपोतसमूहनाम[1]॥ शुकानां समूहः [2]शौकम्। शुकसमूहनाम॥ मयूराणां समूहो मायूरम्। [3]मयूरसमूहनाम॥ तित्तिरीणां समूहः तैत्तिरम्। तित्तिरिसमूहनाम[4]॥ गृहासक्ता गृहनिरुद्धाः पक्षिमृगाः छेका गृह्यकाश्च इत्युच्यन्ते। छायन्ते छिद्यन्ते पक्षादिषु छेकाः। 'छो छेदने'। गृहे बद्धा गृह्यकाः। गृह्यन्त इति वा गृह्यकाः। 'ग्रह उपादाने'। गृहबद्धपक्षिमृगनामनी॥ ४३॥

[1] 'गुव्वलसमूहमु' K_5. [2] 'चिलुकलयोक्क समूहमु' F_2, Pt_2. [3] 'नेमल्लयोक्क गुंपु' K_5, Pt_2. [4] तित्तिराणां D_2; 'तीतुवुलगुंपु' K_5, Pt_2.

इति श्रीवङ्गलकामभट्टोपाध्यायसूनुलिङ्गयसूरिविरचितायाममरकोशपदविवृतौ सिंहादिवर्गः

(पा.) कापोत—तद्गणे। तेषां कपोतशुकमयूरतित्तिर्यादीनां गणे कापोतादयः स्युः। आदिना काकानां समूहः काकमित्यादि। गृहासक्ताः—गृह्यकाश्च ते। गृहोषितपक्षिमृगाश्छेका गृह्यकाश्चेत्युच्यन्ते। 'गृह्याश्छेका गृहाण्डजाः। गृहका गृहजाश्चेति' इति रत्नकोशः॥ ४३॥

इति श्रीवत्स[1]नृसिंहसूरिसुतमल्लिनाथसूरिविरचितेऽमरपदपारिजाते सिंहादिवर्गः

---

[1] नरसिंह A_1.

६. मनुष्यवर्गः

गृहनिरुद्धपक्षिमृगप्रसङ्गात् तद्वर्तिमनुष्याणां नामानि विवक्षुः इदानीं साङ्गोपाङ्गं मनुष्यवर्गमाह मनुष्या इत्यादिना—

मनुष्या मानुषा मर्त्या मनुजा मानवा नराः ।
स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नरः ॥ १ ॥

(वि.) मनुष्या इति—मनोरपत्यानि[1] मनुष्याः, मानुषाश्च । म्रियन्त इति मर्त्याः । 'मृङ् प्राणत्यागे'। मर्तो भूलोकः । तत्र भवा वा । मनोर्जाता मनुजाः । 'जनी प्रादुर्भावे'। मनोरिमे मानवाः । नृणन्ति नयन्ति सर्वं स्ववशमिति नराः । 'नॄ नये'। स्वकर्म नयन्ति प्राप्नुवन्तीति वा नराः । नरश्च । 'णीञ् प्रापणे'। [2]पूर्वः अकारान्तः । अपरः ऋकारान्तः । एतानि मनुष्यनामानि ॥ [3]पान्ति स्त्र्यादिकमिति पुमांसः । 'पा रक्षणे'। पञ्चभिः पृथिव्यादिभूतैर्जन्यन्त[4] इति पञ्चजनाः । 'जनी प्रादुर्भावे'। पुरि देहे शेत इति पुरुषः[5]। अथवा पुरन्ति प्राणिनामग्रे गच्छन्तीति पुरुषाः । 'पुर अग्रगमने'। पूरुषाश्च[6] । एतानि पुरुषनामानि ॥ १ ॥

[1] जाताः K_5, K_6. [2] पूर्वोक्तः W_2. [3] कुलं पातीति वा पुमान् D_2, K_5. [4] जायन्ते F_2, Pt_2. [5] I, K_6 add स्त्र्यादिकं पालयतीति वा पुरुषः, पूरुषोऽपि; D_2, I add 'पाल रक्षणे'; K_8 adds 'शीङ् स्वप्ने'. [6] F_2, Pt_2 add नयन्त इति नरः । 'णीञ् प्रापणे'.

(पा.) मनुष्याः—नराः । मनुष्यनामानि । जातिशब्दत्वात् स्त्रीलिङ्गा अपि भवन्ति । मनुषी । 'योपधप्रतिषेधे गवयहयमुकयमनुष्यमत्स्यानामप्रतिषेधः' (वा. ४. १. ६३) इति ङीष् । मानुषी । मर्त्या । मनुजा । मानवी ॥ स्युः—नरः । ऋदन्तोऽयम् । पुंसो नामानि । 'ब्रुवते स्म दूत्य उपसृत्य नरान् नरवत् प्रगल्भमतिगर्भगिरः' (शिशु. ९. ६२) इत्यादिप्रयोगान्नरशब्दः पुंसोऽपि नाम । 'पुंसः पुमानी मलिन . . . बुद्ध्या प्रमाणमपि चेच्छिरसा करोति ।' इत्यादितः पुमादिशब्दा मनुष्याणामपि नामानि भवन्ति । 'पुरुषावात्ममानवौ' (३. ३. २१८) इति मूलकारः स्वयमेव वक्ष्यति ॥ १ ॥

स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः ।
प्रतीपदर्शिनी वामा वनिता महिला तथा ॥ २ ॥

(वि.) स्त्रीति—स्त्यायति [1]संघातो भवति गर्भोऽस्यामिति स्त्री। 'स्त्यै [2]शब्द-संघातयोः'। यौति पुंसेति योषित्। योषा च। 'यु मिश्रणे'। योषितेति वा पाठः। पुंस इव बलमस्या न विद्यत इत्यबला। अल्पं बलमस्या इति वा। अल्पार्थे नञ्। नृणाति नयति स्ववशं पुरुषमिति नारी। 'नॄ नये'। सीमन्तः[3] केशवीथी अस्त्यस्याः सीमन्तिनी। [4]उह्यते भर्त्रेति वधूः। 'वह प्रापणे'। प्रतीपं वक्रं द्रष्टुं शीलमस्या इति [5]प्रतीपदर्शिनी। 'दृशिर् प्रेक्षणे'। वामत्वेन वक्रस्वभावत्वेन रम्यत्वेन वा वामा[6]। वनति प्राप्नोति पुरुषमिति वनिता। 'वन[7] संभक्तौ शब्दे च'। [8]अपत्यादिना मह्यत इति महिला। 'मह पूजायाम्'। एतानि [9]स्त्रीनामानि ॥ २ ॥

[1] घनीभवति D_2, J_2, W_2; संघीभवति K_5, K_6.　[2] 'स्त्यै ष्ट्यै शब्दसंघातयोः' K_5, K_6, Pt_2.　[3] सीमन्तं K_5, K_6, Pt_2.　[4] ऊह्यते K_5, K_6, Pt_2.　[5] प्रतीपं वक्रं यथा भवति तथा पश्यतीति I, J_2, W_2.　[6] वामं वक्रं पश्यति K_2, W_2.　[7] 'वन षण संभक्तौ' K_6, Pt_2.　[8] पत्यादिना J_2, W_2.　[9] 'स्त्रीलु' K_5.

(पा.) स्त्री योषित्। योषिताशब्दोऽप्यस्ति। 'स्त्री वधूर्योषिता रामा' इति त्रिकाण्डशेषः (पृ. १३, श्लो. ३००)। अबला योषा। जोषाशब्दोऽपि। जोषयति प्रीणयतीति जोषा। नारी—महिला तथा। महेलापि।

'अविरलरववारिवाहिनीयं प्रसभमिवाह्वयदाकुलं महेला।'

इति कर्पिणाभ्युदये (१०. ११)। नारीनामानि ॥ २ ॥

विशेषास्त्वङ्गना भीरुः कामिनी वामलोचना।
प्रमदा मानिनी कान्ता ललना च नितम्बिनी ॥ ३ ॥
सुन्दरी रमणी रामा कोपना सैव भामिनी।

(वि.) विशेषा इति—तद्विशेषान् प्रत्येकमाह[1]—प्रशस्तानि अङ्गान्यस्या इत्यङ्गना॥ भयं[2] शीलमस्या इति भीरुः[3]॥ कामयते पुमांसमत्यर्थमिति कामिनी। अतिशयेन कामोऽस्या इति वा। 'कमु कान्तौ'॥ वामे वल्गुनी[4] लोचने यस्याः सा वामलोचना। रमणीयलोचनस्त्रीनाम॥ प्रकृष्टो मदः [5]कामावेगोऽस्या अस्तीति प्रमदा॥ मानः प्रणयकोपोऽस्या अस्तीति मानिनी[6]॥ भाविनीति पाठे भावः शृङ्गारचेष्टा, सोऽस्या अस्तीति भाविनी॥ तापसादिनापि काम्यत[7] इति कान्ता॥ ललति विलसतीति ललना[8]। 'लल [9]विलासे'॥ पृथुर्नितम्बः कटिपश्चाद्भागोऽस्त्यस्या इति नितम्बिनी॥ [10]सुष्ठु आद्रियते पुंसेति सुन्दरी। 'दृङ् आदरे'॥ रमयति नायकमिति रमणी। 'रमु

क्रीडायाम्’। पुमान् यस्यां रमते विशेषतः[11] सा रमणीति वा ॥ रमते कामशास्त्रानुसारेण कलाभिरिति रामा। ‘रमु क्रीडायाम्’॥ एतानि स्त्रीविशेषनामानि ॥ सा कोपना चेत् कोपशीला यदि भवेद् भामिनीत्युच्यते। रमयन्ती भामयत्यवश्यं कुप्यतीति भामिनी। ‘भाम क्रोधे’। कोपनस्त्रिया नामनी ॥ ३ ॥

---

[1] विशेषा उच्यन्ते W_2. [2] भयशीला भीरुः I, K_6, W_2. [3] K_5, K_6 add ‘ञिभी भये’; W_2 adds भयशीलायाः स्त्रिया नाम. [4] रुचिरे F_2, Pt_2. [5] चेतोविकारः K_5, K_6. [6] प्रणयकलहवतीनाम J_2, W_2. [7] कम्यते K_5, K_6. [8] अतिरमणीयस्त्रीनाम W_2. [9] क्रीडायाम् Pt_2. [10] K_5, K_6 add रूपतः. [11] विशेषेण W_2.

(पा.) विशेषास्तु—रामा। वक्ष्यन्त इति शेषः। ते च शब्दाः सामान्येऽपि। तथा च हलायुधः (२. ३२६–७)—

‘रामा वामा वामनेत्रा पुरंध्री नारी भीरुर्भामिनी कामिनी च।
योषा योषिद् वासिता वर्णिनी स्त्री स्यात् सीमन्तिन्यङ्गना सुन्दरी च॥
अबला महिला ललना प्रमदा रमणी नितम्बिनी वनिता।
दयिता प्रतीपदर्शिन्युक्ता च वधूर्वशा युवतिः ॥’

इति। अङ्गना कल्याणाङ्ग्याः स्त्रिया नाम। भीरुर्भयशीलायाः। संज्ञापूर्वकविधेरनित्यत्वेन संबुद्धौ गुणस्यानित्यता। तेन ‘कुतस्त्यं भीरु यत्तेभ्यो द्रुह्यद्भ्योऽपि क्षमामहे’ इति भट्टिः (४. ३९)। ‘कम्पोत्तरं भीरु तवोपगूढम्’ इति कालिदासश्च (रघु. १३. २४)। कामिनी प्रियसंगमलालसायाः। वामलोचना रमणीयनयनायाः। प्रमदा यौवनादिमदवत्याः। मानिनी प्रणयकोपवत्याः। कान्ता स्पृहणीयायाः। ललना विलसनशीलायाः। नितम्बिनी घननितम्बायाः नामानि ॥ सुन्दरी मनोहरा। रमणी रामा क्रीडाशीला। कोपना—भामिनी। सैव कोपवती चेद् भामिनी स्यात्। क्रीडासमये कोपशीलाया नाम ॥ ३ ॥

वरारोहा मत्तकाशिन्युत्तमा वरवर्णिनी ॥ ४ ॥
कृताभिषेका महिषी भोगिन्योऽन्या नृपस्त्रियः।

(वि.) वरारोहेति—पुंसा आरुह्यत इति आरोहः नितम्बः, वरः श्रेष्ठः आरोहोऽस्या इति वरारोहा। मधुपानं[1] विनापि मत्तेव काशत इति मत्तकाशिनी। ‘काशृ दीप्तौ’। मत्तकासिनीति पाठे श्रोणीगौरवात् मत्तगजवत् मन्दं कसतीति मत्तकासिनी। ‘कस गतौ’। [2]रूपशीलादिभिरुत्कृष्टत्वाद्[3] उत्तमा। वरः श्रेष्ठो वर्णो रूपमस्या इति वरवर्णिनी। उत्तमस्त्रीनामानि ॥ मह्यते पूज्यत[1] इति महिषी। ‘मह पूजायाम्’।

नृपेण सहाभिषिक्तस्त्रीनाम ॥ भोगः संभोगो यास्विति भोगिन्यः। नृपस्य आभ्यो भोगोऽस्तीति वा। [5]नृपभोगस्त्रीनाम ॥ ४ ॥

---

[1] मद्यसेवया D_2, K_5, K_6. [2] °गुणादिभिः J_2, K_2, W_2. [3] J_2, K_2, K_6 add इतराभ्यः. [4] K_5, K_6 add सर्वैः. [5] °भोग्य° W_2.

(पा.) वरारोहा। घनश्रोणीनाम। मत्तकाशिनी। मत्तेन मदेन प्रकाशमानाया नाम। उत्तमा। असाधारणगुणाया नाम। वरवर्णिनी। प्रशस्तरूपवत्या नाम ॥ कृताभिषेका महिषी। राज्ञा सहाभिषिक्ताया नाम ॥ भोगिन्यो—नृपस्त्रियः। तदन्या राज्यो भोगिन्यः स्युः। अनुक्तम्—'पालाकली युद्धजिता'। युद्धे निर्जित्याहृता राज्ञी पालाकली स्यात् ॥ ४ ॥

पत्नी पाणिगृहीती च द्वितीया सहधर्मिणी ॥ ५ ॥
भार्या जायाथ पुंभूम्नि दाराः स्यात्तु कुटुम्बिनी।
पुरंध्री सुचरित्रा तु सती साध्वी पतिव्रता ॥ ६ ॥

(वि.) पत्नीति—पत्युरनया सह यज्ञसंयोगः संपद्यत इति पत्नी। पाणिर्गृहीतोऽस्या इति पाणिगृहीती। द्वितीयो धर्मभागोऽस्या अस्तीति द्वितीया[1]। पत्या[2] सह धर्मो दानयज्ञादिरस्या अस्तीति सहधर्मिणी। ब्राह्मादिमुख्यविवाहतो यस्या यज्ञाधिकारोऽस्ति तस्या नामानि ॥ भ्रियत इति भार्या। 'भृञ् [3]भरणे'। [4]जायतेऽपत्यमस्यामिति[5] जाया। जायतेऽस्यां पतिः पुत्ररूपेणेति वा। 'जनी प्रादुर्भावे'। दारयन्ति उद्वेजयन्ति पतीनिति दाराः। 'दॄ भये'। अयं शब्दः पुंस्येव भूम्नि च। अत्र अथशब्दस्य अथ भार्येत्यादौ अन्वयः। परिणीतस्त्रीनामानि ॥ कुटुम्बमस्या[6] अस्तीति कुटुम्बिनी[7]। पुरं पोष्यवर्गं [8]धरतीति पुरंध्री। 'धृञ्[9] धारणे'। कुटुम्बपोषकस्त्रीनामनी ॥ शोभनं चरित्रं यस्याः सा सुचरित्रा। दर्शनादेव पापं स्यति नाशयतीति सती[10]। 'षोऽन्तकर्मणि'। [11]साधुगुणयोगात् साध्वी। पतिसेवैव व्रतमस्याः पतिव्रता। सुनियतस्त्रीनामानि ॥ ५–६ ॥

---

[1] यज्ञाधिकारफलभागिनोर्जायापत्योरन्यतरत्वेन द्वितीया F_2, Pt_2. [2] Pt_2 adds भर्त्रा. [3] भरणपोषणयोः K_5, K_6. [4] पुत्रः K_2, W_2. [5] अस्याः K_5, K_6. [6] F_2, Pt_2 add पुत्रभृत्यादिकं. [7] पोष्यवर्गः कुटुम्बवत् K_6; कुटुम्बं तदस्याः I, J_2. [8] धत्ते K_5, K_6; दधाति J_2. [9] 'डुधाञ् धारणपोषणयोः' K_5, K_6. [10] सद्गुणाः सन्त्यस्याः K_5. [11] साधुगुणाः सन्त्यस्याः J_2. [12] K_2 adds सदैव.

(पा.) पत्नी पाणिगृहीती च। चशब्दो भङ्ग्यन्तराभिधानार्थः। तेन पाण्यत्ती करात्तीत्यपि। द्वितीया—दाराः। दाराः पुंस्येव भूम्न्येव। अग्निसाक्षिकतया परिणीतस्त्रीनामानि॥ 'शूद्री शूद्रस्य भार्या स्यात्' (२. ६. १३) इत्यौपचारिकः प्रयोगः। स्यात्तु—पुरंध्री। कुटुम्बपोषिकानामनी॥ सुचरित्रा—पतिव्रता। नियतस्त्रीनामानि। पतिवत्न्येकपत्न्यपि। एते च॥ ५–६॥

कृतसापत्निकाध्यूढाधिविन्नाथ स्वयंवरा।
पतिंवरा च वर्या च कुलस्त्री कुलपालिका॥ ७॥
कन्या कुमारी गौरी तु नग्निकानागतार्तवा।

(वि.) कृतेति—सपत्न्याः भावः सापत्न्यं सापत्नं च। कृतं सापत्नं यस्याः सा कृतसापत्निका। अधि स्वोपरि उह्यते अस्या इति अध्यूढा। 'वह प्रापणे'। अधि उपरि [1]विन्ना लब्धा यस्याः अधिविन्ना। 'विद्लृ लाभे'। पूर्वोढानामानि॥ स्वयं [2]वृणुते पतिमिति स्वयंवरा। 'वृञ् वरणे'। पतिं [3]वृणुत इति पतिंवरा। वरणं वरः, तत्र निपुणा वर्या। या स्वरुच्यैव पतिं [4]वृणुते तस्या नामानि॥ कुलेनाव्यभिचारेण रक्षिता स्त्री [5]कुलस्त्री। कुलं पालयतीति [6]कुलपालिका। 'पाल रक्षणे'। संतानसंपादयितृस्त्रीनामनी॥ कन्यते काम्यत इति कन्या। 'कनी दीप्तिकान्तिगतिषु'। कनति द्युतिमती भवतीति वा। कुत्सितो मारो मदनोऽस्या अस्तीति कुमारी। कुमारयति क्रीडयतीति वा। 'कुमार क्रीडायाम्'। अनूढनववर्षाधिकानामनी॥ मनसा विवाहं प्रति गुरते [7]प्रत्युद्यच्छतीति गौरी। 'गुरी उद्यमने'। नजते व्रीडतीति नग्निका। [8]'ओणजी व्रीडने'। अत्र नग्निकाशब्दो विरुद्धलक्षणया गौर्यां वर्तते। अनागतम् आर्तवं पुष्पमस्या इति अनागतार्तवा। अनूढसप्त[9]वर्षाधिकानामानि॥ ७॥

---

[1] विन्दति K_5, K_6; विदन्ति K_2, K_3. [2] वृणोति J_2. [3] K_5, K_6 add स्वयमेव. [4] वरयति, 'वर ईप्सायाम्' J_2. [5] कुले स्त्री I, K_2, K_5; कुलपालिका स्त्री J_2. [6] कुलस्य पालिका स्त्री W_2. [7] प्रत्युद्यतते F_2, Pt_2; प्रत्युद्यमवती W_2. [8] 'ओनजी लज्जी व्रीडने' W_2. [9] °नव° K_3, K_5.

(पा.) कृतसापत्निका—अधिविन्ना। या व्यूढा सती [1]कृतसापत्नका साधिविन्ना स्यात्। सापत्न्यदुःखिताया नाम॥ त्रीण्यपि सपत्नीनामानीति केचित्। कृतसापत्न्यिकेति पाठे स्त्रीप्रत्ययानन्तरं कप्। कृतसापत्न्यकेति पाठे तु कबनन्तरमपि स्त्रीप्रत्ययः॥ अथ स्वयंवरा—वर्या च। या कन्या स्वातन्त्र्येण पतिं वृणीते तस्या नामानि॥ कुलस्त्री

कुलपालिका। मातापितृप्रतिपादितकन्यकानामनी॥ कन्या—गौरी च। कन्यकानामानि॥ '[2]कुमारी कन्यका गौरी' इति वैजयन्ती (पृ. १७३, श्लो. ६)। नग्निकानागतार्तवा। अनागतप्रथमरजाः कन्या नग्निका स्यात्॥ ७॥

---

[1] कृतसापत्न्यका B_3.　[2] 'कुमारी कन्यका कन्या' इत्येव मुद्रितग्रन्थे.

स्यान्मध्यमा दृष्टरजास्तरुणी युवतिः समे॥ ८॥
समाः स्नुषाजनीवध्वश्चिरण्टी तु सुवासिनी।

(वि.) स्यादिति—कन्यायुवत्योर्मध्यमे वयसि तिष्ठतीति मध्यमा। दृष्टं रजोऽस्या इति दृष्टरजाः। दृष्टरजःस्त्रीनामनी॥ [1]कन्यावस्थां तरतीति तरुणी। 'तॄ प्लवनतरणयोः'। पुंसा [2]बाह्वङ्गादिना यौतीति युवतिः। 'यु मिश्रणे'। युवती वा। षोडशवर्षाधिकस्त्रीनामनी॥ [3]श्वशुरादिपादप्रक्षालनाय जलं स्नौतीति स्नुषा। 'ष्णु[4] प्रस्रवणे'। [5]जायते पुत्रोऽस्यामिति जनी। 'जनी प्रादुर्भावे'। पुत्रेण[6] उह्यते वधूः। 'वह प्रापणे'। पुत्रभार्यानामानि॥ चिरेणाटति पितृगेहाद् भर्तृगेहमिति चिरण्टी। चिरिणोति हिनस्त्यमङ्गलानीति[7] वा। 'चिरि[8] हिंसायाम्'। चरतीति चरण्टीत्येके। [9]सुष्ठु वसतीति सुवासिनी। 'वस निवासे'। स्वेषु वस्तुं शीलमस्या इति स्वासिनीति वा पाठः। सभर्तृकाया नामनी॥ ८॥

---

[1] कन्यादशां D_2, K_2, W_2.　[2] ब्राह्य° K_3.　[3] गृहव्यापाराय F_2, Pt_2.　[4] स्नु K_5, K_6, Pt_2.　[5] जन्यते D_2, K_5, K_6.　[6] पत्या D_2, K_2, K_6.　[7] वस्त्रादिपेषणादिषु सूक्ष्मप्राणिन इति K_5, K_6.　[8] च्चिरि ज्ञिरि° K_5, K_6.　[9] K_5, K_6 add पतिसमीपे.

(पा.) स्यात्—दृष्टरजाः। दृष्टप्रथमपुष्पा मध्यमा स्यात्। अनुक्तम्—'प्राप्तर्तुर्दिक्करी[1] राका'। प्राप्तर्तोर्नामनी। 'श्यामा स्त्रीव्यञ्जनैर्युता'। उत्पन्नकुचकलशादिः श्यामा स्यात्। तरुणी युवती समे। यौवनवत्या नामनी। पाक्षिकलादेशात् तलुनी॥ 'वधूटी वेकटी[2] तल्ली' (?)। एतानि च। समा—वध्वः। पुत्रपत्नीनामानि॥ चिरण्टी—सुवासिनी। स्त्रीनामनी॥ ८॥

---

[1] धक्करी B_3.　[2] वेकली B_3; 'युवतिस्तलुनी चरी' इति वैजयन्त्याम् (पृ. १७२).

इच्छावती कामुका स्याद् वृषस्यन्ती तु कामुकी॥ ९॥
कान्तार्थिनी तु या याति संकेतं साभिसारिका।

(वि.) इच्छावतीति—पुष्पादिषु इच्छा अस्त्यस्या इति इच्छावती। सुरतव्यतिरिक्तवस्तुनि कामोऽभिलाषोऽस्या अस्तीति [1]कामुका। 'कमु कान्तौ'। [2]सुरतादन्यत्र विषये इच्छावतीनामनी ॥ [3]वृषं रेतोऽधिकपुरुषम् आत्मन इच्छतीति वृषस्यन्ती। सुरतं कामयत इति कामुकी[4]। यूना सह [5]सुरताभिलाषिणीनामनी ॥ [6]अभिसारयते कान्तम् अभिसारिका। 'सृ गतौ'। कान्तमुद्दिश्य [7]संकेतस्थानगामिनीनाम[8] ॥ ९ ॥

---

[1] इन्द्रियार्थेषु कामोऽस्याः D_2, K_5, K_6. [2] सुतरामस्तीच्छा अस्याः इच्छावती, विषयेच्छावतीनाम W_2. [3] असकृद्बीजनिषेकसमर्थो वृषः शुक्लः, तं F_2, Pt_2. [4] कामः सुरताभिलाषो अस्या अस्तीति D_2, K_2, K_3. [5] सुरताभिलाषस्त्रीनाम W_2. [6] अभिसरति J_2. [7] संकेतन° J_2. [8] स्थल° W_2.

(प.) इच्छावती कामुका स्यात्। संभोगान्यविषयकेच्छावत्या नाम ॥ वृषस्यन्ती—कामुकी। संभोगेच्छावत्या नामनी ॥ कान्तार्थिनी—साभिसारिका। कान्तसंकेतगामिन्यभिसारिका स्यात् ॥ ९ ॥

पुंश्चली चर्षणी बन्धक्यसती कुलटेत्वरी ॥ १० ॥
स्वैरिणी पांसुला च स्यादशिश्वी शिशुना विना।

(वि.) पुंश्चलीति—पुमांसं प्रलोभ्य चलतीति[1] पुंश्चली। 'चल गतौ'। कामोद्दीपनात् पुमांसं [2]व्याकर्षतीति चर्षणी। 'कृष विलेखने'। ककारस्य चकारादेशः। [3]धर्षणीति वा पाठः। बध्नाति उदासीनमपि पुरुषं स्ववशं करोतीति बन्धकी। 'बन्ध बन्धने'। न सती असती। विटकुलमटतीति कुलटा[4]। 'अट गतौ'। एत्यसाधुजनस्थानं ताच्छील्येनेति [5]इत्वरी। 'इण् गतौ'। स्वैरं[6] स्वेच्छागमनमस्या अस्तीति स्वैरिणी। [7]पांसवो मलिना दोषा अस्याः सन्तीति पांसुला। व्यभिचारिणीनामानि ॥ शिशवो न सन्त्यस्या इत्यशिश्वी। शिशुरहितस्त्रीनाम ॥ १० ॥

---

[1] K_2, W_2, Pt_2 add गच्छति; पुंसः परिणेतुश्चलतीति वा Pt_2. [2] J_2, K_2, K_5 add दूरं. [3] कर्षणी I, J_2. [4] विलङ्घ्य कुलमटतीति वा, 'अट पट गतौ' D_2, K_6. [5] एतुमिच्छास्या अस्तीति वा D_2, K_5, K_6. [6] स्वैरगमनं I, K_2, K_3, W_2, Pt_2. [7] पांसु मलिनं दुश्चरितं I, K_5, K_6.

(पा.) पुंश्चली—पांसुला च स्यात्। व्यभिचारिण्या नामानि ॥ अनुक्तम्—'ऊर्मिला त्यक्तभर्तृका'। भर्तारं त्यक्तवत्या नाम ॥ अशिश्वी—विना। अनपत्या अशिश्वी स्यात्। '[1]नश्यत्प्रसूतिर्भिंदुः[2] स्यात्' इति हलायुधः (अ. मा. २. ३३३) ॥ १० ॥

---

[1] 'नश्यत्प्रसूतिः कथिता च भिन्दुः' इति मुद्रितग्रन्थे. [2] बिन्दुः B_3.

अवीरा निष्पतिसुता विश्वस्ताविधवे समे ॥ ११ ॥
आलिः सखी वयस्या च पतिवत्नी सभर्तृका ।

(वि.) अवीरेति—न विद्यते [1]वीरोऽस्या अवीरा । पतिपुत्ररहितस्त्रीनाम ॥ विश्वसिति विगतश्वसनेव तिष्ठति मृतप्रायत्वादिति विश्वस्ता । 'श्वस प्राणने' । विगतो धवः पतिर्यस्याः सा विधवा । मृतभर्तृकानामनी ॥ अलति मिथो भूषयत्यनुरूपसंवन्धेनेति[2] आलिः । 'अल[3] भूषणपर्याप्तिवारणेषु' । गुणादिना [4]समाना ख्यातिरस्या इति सखी । वयसा तुल्या[5] वयस्या । सहक्रीडन्त्या नामानि ॥ [6]पतिरस्या अस्तीति पतिवत्नी[7] । विवाहाप्तभर्तृमतीनाम ॥ ११ ॥

[1] Pt$_2$ adds वीरः पतिः पुत्रश्च.　[2] संबन्धिनीव F$_2$, Pt$_2$.　[3] 'अल भूषणे' K$_6$.　[4] समा I.　[5] D$_2$, W$_2$ add भवतीति.　[6] F$_2$, Pt$_2$ add जीवन्.　[7] F$_2$, Pt$_2$ add भर्त्रा सहिता सभर्तृका.

(पा.) अवीरा—सुता । पतिसुतरहिता अवीरा स्यात् । 'पतिपुत्रवती वीरा' इति नाममाला ॥ विश्वस्ता—समे । मृतभर्तृकानामनी । अनुक्तम्—'रण्डा च त्वरिकेत्यपि' । बालविधवानामनी ॥ आलिः—वयस्या च । सखीनामानि । 'सध्रीची सहचर्यपि' । एते च ॥ पतिवत्नी सभर्तृका । आयुष्मद्भर्तृकानामनी ॥ अनुक्तम्—'जीवतोका जीवसूः स्यात्' । जीवदपत्यानामनी ॥ 'किमिला बहुपुत्रिका' । बहुपुत्रवत्या नाम ॥ ११ ॥

वृद्धा पलिक्नी प्रज्ञा तु प्राज्ञी प्राज्ञा तु धीमती ॥ १२ ॥
शूद्री शूद्रस्य भार्या स्याच्छूद्रा तज्जातिरेव च ।

(वि.) वृद्धेति—गतवयस्का वृद्धा[1] । पलितरोमयोगात्[2] पलिक्नी । वृद्धस्त्रीनाम ॥ प्रकर्षेण जानातीति [3]प्राज्ञी । प्रज्ञा च । 'ज्ञा अवबोधने' । प्रकर्षेण लौकिकव्यवहाराद्यभिज्ञाया नामानि ॥ [4]प्रज्ञा अस्या अस्तीति प्राज्ञा । धीरस्या अस्तीति धीमती । प्रकृष्टधीमतीनामनी ॥ शूद्रस्य भार्या शूद्री । शूद्रभार्यानाम ॥ शूद्रजातौ भवा स्त्री शूद्रा[5] । शूद्रस्त्रीनाम ॥ १२ ॥

---

[1] वर्धते स्म वृद्धा, 'वृधु वृद्धौ' F$_2$.　[2] योगत्वात् W$_2$.　[3] प्रजानातीति D$_2$, K$_5$, K$_6$, W$_2$.　[3] प्रज्ञावतीति J$_2$.　[4] F$_2$, Pt$_2$ add प्रशस्ता.　[5] शूद्रजातिस्त्री D$_2$, K$_5$, W$_2$.

(पा.) वृद्धा पलिक्नी । वृद्धस्त्रीनामनी ॥ प्राज्ञी—धीमती । प्रज्ञावत्या नामानि ॥ शूद्री—भार्या स्यात् । शूद्रस्य भार्या शूद्री स्यात् ॥ शूद्रा तज्जातिरङ्गना । शूद्रजातिः स्त्री शूद्रा स्यात् ॥ १२ ॥

आभीरी तु महाशूद्री जातिपुंयोगयोः समा ॥ १३ ॥
अर्याणी स्वयमर्या स्यात् क्षत्रिया क्षत्रियाण्यपि ।

(वि.) आभीरीति—आभीरस्य गोपस्य भार्या तज्जातीया[1] वा आभीरी[2]। महाशूद्रस्य भार्या [1]तज्जातीया वा महाशूद्री । गोपालस्य भार्यायाः तज्जातिस्त्रिया वा नामनी ॥ अर्यकुले जाता अर्याणी । अर्या च । अर्यकुलप्रसूतानामनी ॥ [3]क्षत्रकुले जाता क्षत्रिया । क्षत्रियाणी च । [4]क्षत्रकुलप्रसूतानामनी ॥ १३ ॥

[1] तज्जातिस्त्री वा D_2, W_2. [2] महाशूद्री च, व्युत्पत्तिश्चैवम् D_2, K_5, K_6. [3] क्षत्रियकुले J_2, W_2. [4] क्षत्रिय° J_2.

(पा.) आभीरी—समा । महाशूद्रशब्द आभीरपर्यायः । तत्र [1]जातिपुंयोग[2]योरेकरूपता ॥ अर्याणी—अर्या स्यात् । अर्याया[3] नाम ॥ क्षत्रिया क्षत्रियाण्यपि । क्षत्रियाया नामनी ॥ १३ ॥

[1] ४. १. ६३. [2] ४. १. ४८. [3] आर्यायाः B_3.

उपाध्यायाप्युपाध्यायी स्यादाचार्यापि च स्वतः ॥ १४ ॥
आचार्यानी तु पुंयोगे स्यादर्यी क्षत्रियी तथा ।

(वि.) उपाध्यायेति—उपेत्य [1]अधीतेऽस्याः सकाशात् [2]सूदशास्त्रं गीतादिकं वेति उपाध्याया । उपाध्यायी च । ‘इङ् अध्ययने’। सूदशास्त्रं[3] गीतादिकं वा उपदेशिन्या नामनी ॥ [4]शिल्पोपदेशं स्वत एवाचरति आचार्या । ‘चर गतिभक्षणयोः’। स्वतः शिल्पोपदेशिनीनाम ॥ आचार्यस्य पत्नी आचार्यानी । आचार्यपत्नीनाम ॥ अर्यस्य सभ्यस्य पत्नी अर्यी । सभ्यस्य पत्नीनाम ॥ क्षत्रियस्य पत्नी क्षत्रियी । क्षत्रियपत्नीनाम ॥ १४ ॥

[1] अधीयते I, K_3, Pt_2. [2] सूप° J_2. [3] शास्त्रादिकं W_2. [4] मन्त्र° Pt_2.

(पा.) उपाध्यायाप्युपाध्यायी । उपाध्यायाया नामनी ॥ स्यात्—स्वतः । आचार्याया नाम ॥ आचार्यानी—क्षत्रियी तथा । आचार्यादिशब्दानां पूर्वं जातिलक्ष-

णाभिधानम् । इदानीं पुंयोगलक्षणाभिधानम् । स्वयमयोग्या चेदाचार्यस्य पत्नी आचार्यानी । 'आचार्यादणत्वं च' (वा. ४. १. ४९) इति णत्वं न । क्षुद्रा [1]चेदर्यस्य पत्नी [2]अर्यी । [3]अर्यो वैश्यजातिः पुरुषः । शूद्रकुलजा चेत् क्षत्रियस्य पत्नी क्षत्रियी ॥ १४ ॥

---

[1] आर्यस्य B_3. [2] आर्यी B_3. [3] आर्यः B_3.

उपाध्यायान्युपाध्यायी पोटा स्त्रीपुंसलक्षणा ॥ १५ ॥
वीरपत्नी वीरभार्या वीरमाता तु वीरसूः ।

(वि.) उपाध्यायानीति—उपाध्यायस्य पत्नी उपाध्यायानी । उपाध्यायी च । उपाध्यायपत्नीनामनी ॥ [1]स्त्रीपुंसलक्षणैः पुटति संश्लिष्यतीति पोटा । 'पुट संश्लेषणे' । [1]स्त्रीपुंसलक्षणवतीनाम ॥ वीरः पतिर्यस्याः सा वीरपत्नी । वीरस्य भार्या वीरभार्या । [2]वीरभार्यानामनी ॥ वीरस्य माता वीरमाता । वीरं सूयते[3] वीरसूः । 'षूङ् प्राणिप्रसवे' । वीरमातृनामनी ॥ १५ ॥

---

[1] °पुंसक° J_2. [2] वीरपत्नी° J_2. [3] सूते, 'षूङ् प्राणिगर्भविमोचने' F_2.

(पा.) उपाध्यायान्युपाध्यायी । मूर्खा चेदुपाध्यायस्य पत्नी उपाध्यायानी । उपाध्यायीत्यपि ॥ पोटा—लक्षणा । स्तनश्मश्रुमती स्त्री पोटा स्यात् । दास्यपि पोटा । 'पोटा वोटा तथा चेटी दासी स्यात् [2]कुटहारिका' इति हलायुधः (अ. मा. २. ३३७) ॥ वीरपत्नी वीरभार्या । वीरस्य पत्नी, वीरः पतिः यस्या इति वा वीरपत्नी । वीरभार्यानाम ॥ वीरमाता—वीरसूः । वीरजननीनामनी ॥ १५ ॥

---

[1] चेटिः B_3. [2] कुट्टहारिकेति मुद्रितग्रन्थे.

जातापत्या प्रजाता च प्रसूता च प्रसूतिका ॥ १६ ॥
स्त्री नग्निका कोटवी स्याद् दूतीसंचारिके समे ।

(वि.) जातापत्येति—[1]जातमपत्यमस्या जातापत्या[2] । प्रकर्षेण जायन्तेऽपत्यान्यस्याः प्रजाता । प्रसूयते[3] पुत्रान् प्रसूता । प्रसूतिका च । 'षूङ् प्राणिप्रसवे' । [4]जायमानापत्यानामानि ॥ नजते नग्निका । 'ओणजी व्रीडने' । कुटेन कौटिल्येन वेति यातीति कोटवी । 'वी [5]गतिप्रजनकान्त्यसनखादनेषु' । [6]बलादपेतवस्त्रानासनी ॥ दूयतेऽनया [7]पुमान् स्त्रीपक्षपातेनेति दूती । 'दूङ् परितापे' । संचारयति पुमांसं स्त्रियं[8] प्रापयतीति संचारिका । 'चर गतौ' । दौत्यकस्त्रीनामनी ॥ १६ ॥

[1] जायमानानि अपत्यानि D_2, J_2, K_5. [2] प्रजाता च D_2, W_2. [3] प्रसूते I.
[4] 'सन्तानमुगन्न स्त्री पेरु' D_2, K_6. [5] गत्यादिषु K_6. [6] बलादपि विगतवस्त्रस्त्रीनाम K_2.
[7] पुमान् वा स्त्री वा F_2, Pt_2. [8] स्त्रियः K_6; स्त्रियं प्रति J_2.

(पा.) जातापत्या—प्रसूतिका। प्रसूतिकानामानि ॥ स्त्री—कोट्टवी स्यात्। कोट्टं विदिशम्। कोटं कौटिल्यं वातीति कोटवीत्यपि। संयुक्तोऽसंयुक्तो वा टकारः। विवसनस्त्रीनामानि ॥ दूती—समे। दूतिरित्यप्यस्ति। 'त्वां कामिनो मदनदूतिमुदाहरन्ति' इति प्रयोगात् (विक्रमो. ४. २५)। दूतिकानामनी ॥ १६ ॥

कात्यायन्यर्धवृद्धा या काषायवसनाधवा ॥ १७ ॥
सैरन्ध्री परवेश्मस्था स्ववशा शिल्पकारिका ।

(वि.) कात्यायनीति—कत्यस्य ऋषेरपत्यमिव वर्तते [1]कात्यायनी। अर्धवृद्धायाः[2] काषायवसनायाः पतिरहितायाः परस्त्रियमुद्दिश्य प्रापणार्हाया वा नाम ॥ स्वकार्येण सह पर्यायप्रेरणं[3] धारयतीति सैरन्ध्री[4]। 'धृञ् धारणे'। दासीवन्मण्डनादिशिल्पकर्म कुर्वत्या असंबन्धिवेश्मस्थायाः स्ववशाया नाम ॥ १७ ॥

[1] कात्यायनस्य मुनेर्विधवापत्यमिव वर्तते K_5, K_6; कात्यायिनी J_2. [2] अर्धजरिताया (अर्धजरती Pt_2) विधवायाश्च K_6. [3] परंपरया K_2. [4] स्वैरं स्वच्छन्दं वर्तनं दधातीति, 'डुधाञ् धारणपोषणयोः' F_2, Pt_2.

(पा.) कात्यायनी—वसनाधवा। अर्धवृद्धा काषायवस्त्रा[1] विधवा चेत्युपाधित्रयविशिष्टा कात्यायनी स्यात्। सैरन्ध्री—शिल्पकारिका। परगृहस्थिता स्वाधीना [2]शिल्पकारिणी चेत्युपाधित्रयविशिष्टा सैरन्ध्री स्यात् ॥ १७ ॥

[1] कषाय° B_3. [2] शिल्पकरणाच्च B_3.

असिक्नी स्यादवृद्धा या प्रेष्यान्तःपुरचारिणी ॥ १८ ॥
वारस्त्री गणिका वेश्या रूपाजीवाथ सा जनैः ।
सत्कृता वारमुख्या स्यात् कुट्टनीशंभली समे ॥ १९ ॥

(वि.) असिक्नीति—[1]असितकेशयोगाद् असिक्नी। [2]अवृद्धायाः [3]स्त्र्यगारचारिण्या दास्या नाम ॥ वारस्य समूहस्य स्त्री वारस्त्री। वारं वारं राजसेवार्थमागता स्त्री वा। विटगणोऽस्या अस्तीति गणिका। गणयति धनिकानिति वा[4]। वेशे[5] भवा

वेश्या। रूपमेवाजीवो जीविका[6] अस्या इति रूपाजीवा। [7]वेश्यानामानि॥ वारे [8]राजादिसेवावसरे मुख्यत्वाद् वारमुख्या। [9]जनैरादृतगणिकानाम॥ विटस्य कुटुम्बमर्थहरणेन कुट्टयति नाशयतीति कुट्टनी। ‘कुट्ट [10]छेदनभर्त्सनयोः’। शं श्रेयः[11] भालयति हिनस्तीति शंभली। [12]‘भल भल्ल परिभाषणहिंसादानेषु’। विटवेश्ययोः संधानकारिणीनामनी॥ १८–१९॥

---

[1] °रोमत्वात् D_2, K_6. [2] अन्तःपुरस्थयुवतिदासीनाम K_5. [3] अन्तःपुर° F_2, Pt_2. [4] F_2, Pt_2 add ‘गण संख्याने’. [5] वेश्यावाटिकायां F_2, Pt_2. [6] जीवनं K_2. [7] वेशो नेपथ्यं तेन शोभते Pt_2. [8] वेश्यासमूहे F_2, Pt_2. [9] वेश्याजनैः I, K_3, K_5, W_2. [10] भेदन° K_6. [11] राजोद्भवं सुखं D_2, K_5, K_6. [12] ‘भल आभण्डने’ D_2.

(पा.) असिक्नी—चारिणी। अवृद्धा शरीरायासेन जीवितं कुर्वती स्त्र्यगारवासिनी चेत्युपाधित्रयविशिष्टा असिक्नी स्यात्॥ वारस्त्री—रूपाजीवा। वेश्यानामानि॥ ‘पश्यन्ती लञ्जिका पण्यशब्दाद्भार्याह्वया अपि’। एतानि च। अथ—वारमुख्या स्यात्। जनैरादृता वेश्या वारमुख्या स्यात्॥ कुट्टनी—समे। [1]लञ्जिकाविटयोः संघटनकारिणीनामनी। [2]‘चुन्दी संघटिका तथा’। एते च॥ १८–१९॥

---

[1] मिण्ठयोः B_3. [2] चण्डी B_3.

विप्रश्निका त्वीक्षणिका दैवज्ञाथ रजस्वला।
स्त्रीधर्मिण्यविरात्रेयी मलिनी पुष्पवत्यपि॥ २०॥
ऋतुमत्यप्युदक्यापि स्याद् रजः पुष्पमार्तवम्।

(वि.) विप्रश्निकेति—[1]शुभाशुभविषये विशेषतः प्रश्नोऽस्या इति विप्रश्निका। ईक्षणं[2] शुभाशुभदर्शनमस्या अस्तीति ईक्षणिका। ‘ईक्ष दर्शने’। दैवं शुभाशुभं जानाति दैवज्ञा। ‘ज्ञा अवबोधने’। जन्मान्तरशुभाशुभज्ञाया नामानि॥ आन्ध्रभाषायां ‘वेल्पुसानि पेल्लु’॥ रजोऽस्त्यस्या इति [3]रजस्वला। रजोरूपः स्त्रीधर्मोऽस्या अस्तीति स्त्रीधर्मिणी। अव्यतेऽस्मिन् काले [4]रक्षोभयादिति अविः। अवी वा। ‘अव रक्षणे’। अत्रेरपत्यमिव आत्रेयी[5]। मलिनमार्तवमस्या इति मलिनी। पुष्पमार्तवमस्याः पुष्पवती। ऋतुरस्या अस्तीति ऋतुमती। चतुर्थेऽहनि उदकमर्हतीति उदक्या। रजस्वलास्त्रीनामानि॥ रज्यते रजः। ‘रञ्ज रागे’। पुत्राख्यफलहेतुभूतत्वात् पुष्पम्। ऋतौ भवम् आर्तवम्। स्त्रीणां वयोधर्मेण प्रतिमासं प्रवृत्तरक्तनामानि॥ २०॥

[1] प्रश्नश्रवणोद्यतत्वात् K_5, K_6. [2] ईक्षते शुभाशुभमिति D_2, K_2, W_2. [3] रजोयोगात् D_2, K_5, K_6. [4] रक्षोभ्यः I, K_3, W_2. [5] अत्र वर्तते (कुक्षौ अस्या विद्यते, आपन्नगर्भा *Śābarabhāṣya*, VI. 1. 7) K_6.

(पा.) विप्रश्निका—दैवज्ञा। जन्मान्तरशुभाशुभज्ञानामानि ॥ स्त्रीधर्मिण्यविः। '[1]अवीरुदक्या च रजस्वला स्यात्' इति हलायुधः (अ. मा. २. ३३३)। आत्रेयी—उदक्यापि। रजस्वलानामानि ॥ स्याद् रजः—आर्तवम्। वयःस्त्रीणां प्रतिमासं प्रवृत्तरक्तनामानि ॥ २० ॥

[1] अविः B_3.

श्रद्धालुर्दोहदवती निष्कला विगतार्तवा ॥ २१ ॥
आपन्नसत्त्वा स्याद् गुर्विण्यन्तर्वत्नी च गर्भिणी ।

(वि.) श्रद्धालुरिति—पायसापूपादिषु श्रद्धा इच्छा अस्या अस्तीति श्रद्धालुः। दोहदोऽस्या अस्तीति दोहदवती। [1]गर्भिणीस्वभावाद् विविधविषयदोहदवतीनामनी ॥ [2]कलाभ्यो [3]रजोभ्यो निष्क्रान्ता निष्कला। विगतमार्तवमस्या इति विगतार्तवा। [4]निवृत्तरजःस्त्रीनामनी ॥ आपन्नं गृहीतं सत्त्वं [5]गर्भोऽनयेति आपन्नसत्त्वा। गुरु गर्भशरीरमस्त्यस्या इति गुर्विणी। उदरान्तर्गर्भोऽस्या अस्तीति अन्तर्वत्नी। गर्भोऽस्त्यस्या गर्भिणी। गर्भिणीनामानि ॥ २१ ॥

[1] गर्भस्वभावात् K_5, K_6, W_2. [2] निर्गतं कलं शुक्रमस्याः F_2, Pt_2. [3] रजोंऽशेभ्यः D_2, K_5, K_6. [4] निवृत्तरजसः स्त्रिया नाम K_5, W_2. [5] अस्याः D_2, K_6.

(पा.) श्रद्धालुर्दौहृदवती[1]। दौहृदवत्या नामनी। निष्कला विगतार्तवा। [2]नष्टार्तवानामनी। [3]गौरादित्वान्निष्कली विकली चेति धातुप्रदीपवचनाद् ईकारान्तोऽपि ॥ आपन्नसत्त्वा—गर्भिणी। गर्भिण्या नामानि ॥ २१ ॥

[1] दोहदवती B_3. [2] निवृत्त° A_1. [3] ४. १. ४१.

गणिकादेस्तु गाणिक्यं गार्भिणं यौवतं गणे ॥ २२ ॥
पुनर्भूर्दिधिषूरूढा द्विस्तस्या दिधिषुः पतिः ।

(वि.) गणिकादेरिति—गणिकादेर्गणे गाणिक्यादीनि वर्तन्ते। कथम्। गणिकानां समूहो गाणिक्यम्। वेश्यासमूहनाम ॥ गर्भिणीनां समूहो गार्भिणम्[1]।

गर्भिणीसमूहनाम ।। युवतीनां समूहो यौवतम् । युवतिसमूहनाम ।। प्रथममेकस्य जाया भूत्वा [2]पुनरन्यस्य जाया भवतीति पुनर्भूः । पुनरन्येन धृता पुनरन्येन धीयत इति वा दिधिषूः । 'धृञ् धारणे'। 'डुधाञ् धारणपोषणयोः'। द्विवारं विवाहसंस्कृताया नामनी ।। दिधिषूमात्मन इच्छतीति दिधिषुः । दिधिषूर्वा । तस्या द्वितीयपतिनाम ।। २२ ।।

---

[1] गार्भिण्यम् K₅, K₆. [2] पुनः पुनः K₃.

(पा.) गणिकादेस्तु—यौवतं गणे । गणिकानां समूहो गाणिक्यम् । गर्भिणीनां समूहो गार्भिणम् । युवतीनां समूहो यौवतम् । [1]भिक्षादिगणे पाठसामर्थ्यात् पुंवद्भावो न भवति । भाष्ये भिक्षादित्वप्रत्याख्यानाद् यौवनमिति व्यवस्थापितम् । भागवृत्त्या-मुदाहृतं च ।

'स्वरूपमिव नेपथ्यकलाकुशलयौवनम् ।
यस्य पुण्यवतः प्रेष्यं सफलं तस्य यौवनम् ।।'

पुनर्भूः—ऊढा द्विः । द्विवारं विवाहसंस्कृताया नामनी ।। तस्याः—पतिः । पुनर्भूभर्तृ-नाम ।। २२ ।।

---

[1] 'भिक्षादिभ्योऽण्' (४. २. ३८).

स तु द्विजोऽग्रेदिधिषूः सैव यस्य कुटुम्बिनी ।। २३ ।।
कानीनः कन्यकाजातः सुतोऽथ सुभगासुतः ।
सौभागिनेयः स्यात् पारस्त्रैणेयस्तु परस्त्रियाः ।। २४ ।।

(वि.) स त्विति—सा पुनर्भूरेव यस्य कुटुम्बिनी पुत्रपौत्रप्रतिष्ठिता, स द्विजः अग्रेदिधिषूरित्युच्यते । अग्रे पूर्वकाले प्रधानत्वेन दिधिषूः भार्यात्वेनास्येति [1]अग्रे-दिधिषूः । उकारान्तोऽप्यस्ति । यस्य सैव दिधिषूः कुटुम्बिनी तस्य द्विजस्य नाम ।। कन्यायाः [2]पुत्रः कानीनः । कन्यासुतनाम ।। सुभगायाः [3]पुत्रः सौभागिनेयः । [4]भाग्यवती-पुत्रनाम ।। परस्त्रियाः [5]पुत्रः पारस्त्रैणेयः । परस्त्रीपुत्रनाम ।। २३–४ ।।

---

[1] गृहरक्षणे अग्रणीभूता दिधिषूर्यस्य K₃, K₅, K₆. [2] सुतः K₃. [3] अपत्यं F₂, Pt₂; सुतः I, J₂, W₂. [4] सौभाग्य° W₂. [5] अपत्यं F₂, Pt₂.

(पा.) स तु—कुटुम्बिनी । 'कुटुम्बं तु सुतादिकम्' इति वैजयन्ती (पृ. १७७, श्लो. ५१) । यस्य द्विजस्य सैव दीधिषूरेव कुटुम्बिनी पत्नी स्यात् स द्विजोऽग्रेदिधिषूः[1] स्यात् । विधिनिषेधयोर्द्विजविषयत्वाद् द्विजग्रहणम् । कानीनः—सुतः । कन्याया उत्पन्नः

कानीनः स्यात्। अथ सुभगासुतः—स्यात्। सुभगायाः [2]पुत्रः सौभागिनेयः स्यात्। एवं दुर्भगाया दौर्भागिनेयः। पारस्त्रैणेयः—परस्त्रियाः। परस्त्रियाः पुत्रः पारस्त्रैणेयः स्यात्॥ २३–४॥

[1] अग्रेदिधिषुः B_3. [2] सुतः A_1.

पैतृष्वसेयः स्यात् पैतृष्वस्रीयश्च पितृष्वसुः।
सुतो मातृष्वसुश्चैवं द्वैमात्रेयो द्विमातृजः॥ २५॥

(वि.) पैतृष्वसेय इति—पितृष्वसुः पुत्रः पैतृष्वसेयः पैतृष्वस्रीयश्च। पितृसोदरीपुत्रनामनी॥ [1]एवं मातृष्वसेयः, मातृस्वस्रीयश्च। [2]मातृसोदरीपुत्रनामनी॥ द्वे मातरौ यस्य द्वैमात्रेयः। वैमात्रेयो [3]विमातृजः इति वा पाठः। विगता विभिन्ना वा माता विमाता, तस्या अपत्यं वैमात्रेयः। सपत्नीपुत्रनाम॥ २५॥

[1] D_2, I, Pt_2 add मातृष्वसुः पुत्रः. [2] मातुः J_2, W_2. [3] F_2, Pt_2 add विमातुर्जातः विमातृजः, द्वाभ्यां मातृभ्यां जायत इति द्विमातृजः.

(पा.) पैतृष्वसेयः—सुतः। पितृष्वसुः सुतः पैतृष्वसेयः पैतृष्वस्रीयश्च स्यात्। मातृष्वसुः—एवम्। मातृष्वसुरेवं सुतो मातृष्वसेयो मातृष्वस्रीयश्च स्यात्॥ [1]वैमात्रेयो विमातृजः। सपत्नीपुत्रनामनी[2]॥ २५॥

[1] द्वैमात्रेयः B_3. [2] सुत° A_1.

अथ बान्धकिनेयः स्याद् बन्धुलश्चासतीसुतः।
कौलटेयः कौलटेरो भिक्षुकी तु सती यदि॥ २६॥
तदा कौलटिनेयोऽस्याः कौलटेयोऽपि चात्मजः।

(वि.) अथेति—बन्धक्या अपत्यं पुमान् बान्धकिनेयः। [1]स्वकुलपरिणाहाय बन्धून् लाति [2]स्वकीयान् करोतीति बन्धुलः। 'ला आदाने'। असत्याः सुतः असतीसुतः। कुलटायाः पुत्रः[3] कौलटेयः। कौलटेरश्च। व्यभिचारिणीपुत्रनामानि॥ भिक्षार्थं कुलान्यटतीति कुलटा। तस्याः पुत्रः कौलटिनेयः। कौलटेयश्च। या भिक्षुकी सती तस्याः पुत्रस्य नामनी॥ २६॥

[1] F_2, Pt_2 add स्वनिन्दापरिहाराय वा. [2] स्वीयान् F_2, Pt_2. [3] अपत्यं W_2.

(पा.) अथ बान्धकिनेयः—कौलटेरः। [1]व्यभिचारिणीपुत्रनामानि ॥ भिक्षुकी—चात्मजः[2]। कुलान्यटति भिक्षार्थमिति सती भिक्षुक्यपि कुलटा। तस्याः सुतः कौलटिनेयः कौलटेयश्च स्यात्। न कौलटेरः ॥ २६ ॥

[1] वन्धकी° A_1.   [2] आत्मजे B_3.

आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी ॥ २७ ॥
आहुर्दुहितरं सर्वेऽपत्यं तोकं तयोः समे ।

(वि.) आत्मज इति—आत्मनो जायते [1]आत्मजः। 'जनी प्रादुर्भावे'। [2]कुलं तनोतीति तनयः। 'तनु विस्तारे'। माता एनं सूयत इति सूनुः। 'षूङ् प्राणिप्रसवे'। सौत्येनं माता सुतः। 'षु प्रसवैश्वर्ययोः'। पुन्नाम्नो नरकात् त्रायत इति पुत्रः। 'त्रैङ् पालने'। पुत्रनामानि ॥ अमी आत्मजादयः[3] स्त्रीप्रत्ययान्ता दुहितरमाहुः। आत्मजा, तनया, सूनुः, सुता, पुत्री इत्येषां व्युत्पत्तिः पूर्ववत्। दोग्धि धनहरणेन रिक्तीकरोति [4]पितराविति दुहिता। 'दुह प्रपूरणे'। दुहितृनामानि ॥ न पतत्यनेन पिता नरकमिति [5]अपत्यम्। 'पत्लृ गतौ'। तौति कुलमनेनेति तोकम्। तु इति सौत्रो धातुः गतिवृद्धिहिंसासु। स्तूयते बन्धुजनैरिति वा। 'ष्टुञ् स्तुतौ'। अपत्यनामनी ॥ तयोः पुत्रे दुहितरि च समे [6]समानलिङ्गे ॥ २७ ॥

[1] आत्मना K_6.   [2] F_2, Pt_2 add मुदं वा.   [3] F_2, Pt_2 add पञ्च.   [4] मातापितरौ D_2, K_5, K_6.   [5] नरकापतने साधु D_2, K_5, K_6.   [6] समाननामनी D_2, K_2, W_2.

(पा.) आत्मजः—पुत्रः। पुत्रनामानि। 'उद्वहो नन्दनो वत्सः पोतः क . . .'। एतानि च। [1]स्त्रियां—सर्वे। अमी आत्मजादयः स्त्रियः स्त्रीलिङ्गाः सन्तः दुहितरमाहुः। आत्मजा तनया। सूनोर्लक्षणाभावान्न स्त्रीत्वे विधिरिति सूनुशब्दः पुत्रवचन एव। सुता पुत्री। अनुक्तसंग्रहार्थं सर्वे इति। तेनोद्वहा नन्दना वत्सेत्यादि ॥ अपत्यं—तयोः समे। अपत्यतोकपदे तयोः पुत्रे दुहितरि च समे, नियतनपुंसके इति यावत्। 'तोकापत्ये नपुं स्त्री तु प्रसूतिः संततिः प्रजा' इति वैजयन्ती (पृ. १७६, श्लो. ४१) ॥ २७ ॥

[1] स्त्रियः B_3.

स्वजाते त्वौरसोरस्यौ तातस्तु जनकः पिता ॥ २८ ॥
जनयित्री प्रसूर्माता जननी भगिनी स्वसा ।

(वि.) स्वजात इति—उरसा निर्मितः औरसः उरस्यश्च। स्वस्मात् जाते स्वजाते। [1]स्वोत्पादितपुत्रनामानि ॥ द्विजातीनां क्षेत्रजादिसंभवात् ॥ तनोति कुलमिति तातः। 'तनु विस्तारे'। जनयति पुत्रमिति जनकः। 'जनी प्रादुर्भावे'। [2]पातीति पिता। 'पा रक्षणे'। पितृनामानि ॥ जनयत्यपत्यानीति जनयित्री। जननी च। 'जनी प्रादुर्भावे'। प्रसूते प्रजाः प्रसूः। 'षूङ् [3]गर्भविमोचने'। माति वर्तते [4]गर्भोऽस्यामिति माता। 'मा माने वर्तने च'। मातृनामानि ॥ भगः कल्याणं भ्रातृवात्सल्यमस्या अस्तीति भगिनी। सोदरायासं सुष्ठु अस्यति [5]हिंसतीति स्वसा। 'असु क्षेपणे'। [6]सोदरीनामनी ॥ २८ ॥

---

[1] उरसोत्पादित° I, K_3, K_6. [2] K_5, W_2 add पुत्रं. [3] 'षूङ् प्राणिप्रसवे' K_2, K_6, Pt_2. [4] K_5, K_6 add पूर्णः; परिपूर्णः K_3. [5] अपास्यति K_2, K_3, W_2. [6] सोदरस्त्री I, K_2, W_2.

(पा.) स्वजाते—औरसोरस्यौ। स्वजातसुतनामनी। आत्मजादयः शब्दाः कुण्डगोलकादिषु न वर्तन्त एव। तातस्तु—पिता। पितुर्नामानि। जनयित्री—जननी। मातुर्नामानि। भगिनी स्वसा। सोदर्या नामनी। 'तस्यामवन्ती ज्येष्ठायां कनिष्ठायां तु कन्यका'[1] ॥ २८ ॥

---

[1] कन्यसा इति वैजयन्त्याम् (पृ. १७५, श्लो. २७)। कन्यसी स्वसेति महाभारते (३. २३०. ८).

ननन्दा तु स्वसा पत्युर्नप्त्री पौत्री सुतात्मजा ॥ २९ ॥
भार्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परम् ।

(वि.) ननन्देति—न नन्दयति भ्रातृजायामिति ननन्दा। ननान्दा वा। ऋकारान्तस्त्रीलिङ्गोऽयम्। 'टुनदि समृद्धौ'। [1]पतिसोदरीनाम ॥ न पतति कुलमनयेति नप्त्री। 'पत्लृ गतौ'। पुत्रस्य पुत्र्या वा पुत्री पौत्री। पुत्रस्य दुहितृनामनी ॥ यतन्ते गृहकृत्येषु स्पर्धया [2]प्रयत्नं कारयन्तीति यातरः। 'यती प्रयत्ने'। [3]सोदरवर्गभार्याः परस्परं प्रति यातृनाम्नोच्यन्ते ॥ २९ ॥

---

[1] पत्युः K_3, W_2; पतिस्वसृनाम K_5; 'वदिनी पेरु' D_2, K_6. [2] संवन्धं K_6; स्वबन्धं K_2. [3] भर्तृ° K_5.

(पा.) ननान्दा—पत्युः। पत्युः स्वसा ननान्दा स्यात्। ननन्दाशब्दोऽपि। 'ननान्दा तु स्वसा पत्युर्ननन्देति प्रकीर्तिता' इति रत्नकोशः। नप्त्री—सुतात्मजा।

सुतस्य सुतायाश्चात्मजा नप्त्री पौत्री च स्यात्। [1]स्वस्रादित्वान्नप्ता चेति भागवृत्तिः। 'नप्ता नप्त्री च पौत्रिका' इति रभसकोशः। पुमांश्चेन्नप्तैव। 'नप्तारौ पौत्रदौहित्रौ' इति वैजयन्ती (पृ. १७६, श्लो. ४५)॥ भार्यास्तु—परस्परम्। सोदरवर्गस्य पत्न्यः परस्परं प्रतियातर इत्युच्यन्ते ॥ २९ ॥

[1] ४. १. १०; स्वस्रादिगणे नप्तृशब्दो न दृश्यते काशिकायां कौमुद्यां च.

प्रजावती भ्रातृजाया मातुलानी तु मातुली ॥ ३० ॥
पतिपत्न्योः प्रसूः श्वश्रूः श्वशुरस्तु पिता तयोः ।

(वि.) प्रजावतीति—देवरादयः प्रजाः सन्त्यस्या इति प्रजावती। भ्रातुर्जाया भ्रातृजाया। सोदरभार्यानामनी॥ मातुलस्य पत्नी मातुलानी। मातुली च। [1]मातृभ्रातृपत्नीनामनी॥ पत्युः भर्तुः पत्न्याः भार्यायाश्च प्रसूर्माता श्वश्रूरित्युच्यते। शं सुखम् अश्नुते स्वगृह इति श्वश्रूः[2]। 'अशू व्याप्तौ'। पत्युः पत्न्याश्च परस्परमातृनाम॥ शं सुखम् अश्नुते जामातरं स्नुषां च लब्ध्वा श्वशुरः। पतिपत्न्योः परस्परस्य पितृनाम॥ ३०॥

[1] मातुः भ्रातुः K_3; मातुः सोदरपत्नी W_2.　　[2] 'अत्तमामलपेरु' D_2; 'अत्तलपेरु' K_6; श्वशुरस्य पत्नी श्वश्रूः F_2, Pt_2.

(पा.) प्रजावती भ्रातृजाया। सोदरपत्नी प्रजावती स्यात्। मातुलानी—मातुली। [1]मातृसोदरपत्नीनामनी। पतिपत्न्योः—श्वश्रूः। पत्युः भार्यामाता भार्यायाः पतिमाता च श्वश्रूः स्यात्॥ श्वशुरस्तु—तयोः। पत्युर्भार्यापिता भार्यायाः पतिपिता च श्वशुरः स्यात्॥ ३०॥

[1] मातुल° A_1.

पितृभ्राता पितृव्यः स्यान्मातुर्भ्राता तु मातुलः ॥ ३१ ॥
स्यालाः स्युर्भ्रातरः पत्न्याः स्वामिनो देवृदेवरौ ।

(वि.) पितृभ्रातेति—पितुः भ्राता पितृव्यः। पितृसोदरनाम॥ मातुर्भ्राता मातुलः। [1]मातृसोदरनाम॥ [2]स्यामयन्ते [3]भगिनीपतिं [4]परिहासवचनं तद्वाक्यखण्डनमार्गेण भञ्जयन्तीति स्यालाः। 'स्यमु[5] वितर्के'। [6]पत्नीसोदरनाम॥ अपहासेन दीव्यति क्रीडतीति देवा। ऋकारान्तोऽयम्। देवरश्च। 'दिवु क्रीडादौ'। स्वामी पतिः, तस्य सोदरनामनी॥ ३१॥

[1] भ्रातृ° K_5. [2] श्यामयन्ते श्यालाः W_2. [3] स्वसृपतिं K_5. [4] विनोदसमये K_5; विनोदन° W_2. [5] श्यमु W_2. [6] भ्रातृ° K_5. [7] भ्रातृजायाभिः सह परिहासेन F_2, W_2.

(पा.) पितृभ्राता पितृव्यः स्यात्। पितुः [1]सोदरः पितृव्यः स्यात्। मातृभ्राता—मातुलः। मातुः [1]सोदरो मातुलः स्यात्। स्यालाः—पत्न्याः। [2]पत्नीसोदराः स्यालाः स्युः। स्त्रियश्चेत् स्यालिकाः। 'स्यालसालसलसूरसूरयः' इत्यूष्मभेदपाठाद् दन्त्यादिः। स्वामिनो देवृदेवरौ। स्वामी पतिः। तस्य सहोदरः देवा देवरश्च स्यात्। अनुक्तम्—'भावुको भगिनीपतिः'। भगिनीपतिर्भावुकः स्यात् ॥ ३१ ॥

[1] भ्राता A_1. [2] °भ्रातरः A_1.

स्वस्रीयो भागिनेयः स्याज्जामाता दुहितुः पतिः ॥ ३२ ॥
पितामहः पितृपिता तत्पिता प्रपितामहः ।

(वि.) स्वस्रीय इति—स्वसुरपत्यं[1] स्वस्रीयः। भगिन्या अपत्यं पुमान् भागिनेयः। सोदरीपुत्रनामनी ॥ [2]जायां मिमीते जामाता। 'माङ् [3]माने'। दुहितृपतिनाम ॥ पितुः पिता पितामहः। पितुः पितृनाम ॥ पितामहात् प्रगतः प्रपितामहः[4]। पितामहपितृनाम ॥ ३२ ॥

[1] F_2, Pt_2 add पुमान्. [2] जां जायां विवाहार्थं स्वदेहेन मिमीते K_6, W_2. [3] D_2, K_2 add शब्दे च. [4] पितामहस्य पिता F_2, Pt_2.

(पा.) स्वस्रीयो—स्यात्। स्वसुः सुतनामनी। जामाता—पतिः। सुतापतिनाम। पितामहः पितृपिता। पितुः पिता पितामहः स्यात्। तत्पिता प्रपितामहः। पितामहपिता प्रपितामहः स्यात् ॥ ३२ ॥

मातुर्मातामहाद्येवं सपिण्डास्तु सनाभयः ॥ ३३ ॥
समानोदर्यसोदर्यसगर्भ्यसहजाः समाः ।

(वि.) मातुरिति—[1]मातामहप्रमातामहशब्दावप्येवम्। समान एकः पिण्डः [2]पिण्डप्रदानं येषां ते सपिण्डाः। समानो नाभिर्मूलं[3] कूटस्थपुरुषो येषामिति सनाभयः। ये पितृकर्मणि[4] पिण्डभागित्वेन लेपभागित्वेन वा परस्परं मनः [5]संप्रविष्टास्तेषां नामनी ॥ तथा चोक्तम्[6]—

‘लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः ।
पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषम् ॥’

इति ॥ समाने उदरे शयितः समानोदर्यः । सोदर्यश्च । समाने गर्भे भवः [7]सगर्भ्यः । सह जायत इति सहजः । ‘जनी प्रादुर्भावे’ । एकोदरोत्पन्नानां नामानि ॥ ३३ ॥

---

[1] F_2, Pt_2 add मातुः पिता मातामहः । मातामहात् प्रकृष्टः प्रमातामहः. [2] पिण्डदानक्रिया D_2, K_2, K_6. [3] मूलकारणं Pt_2. [4] पित्र्य° K_2. [5] अनुप्रविष्टाः K_2, K_5, W_2. [6] मत्स्यपुराणे इति कुल्लूकः (म. स्मृ. ५. ६०). [7] सगर्भः K_5, K_6.

(पा.) मातुर्मातामहाद्येवम् । एवंप्रकारेण मातुःपिता मातामहः । मातामहपिता प्रमातामहश्च स्यात् । अनुक्तम्—‘पुत्रस्य [1]सूनुः पौत्रोऽस्य प्रपौत्रोऽस्य परंपरः’ । पुंत्रस्य पुत्रः पौत्रः । पौत्रस्य पुत्रः प्रपौत्रः । प्रपौत्रस्य पुत्रः परंपरः स्यात् । [2]सपिण्डाः—सनाभयः । नाभिसंबन्धिनां नामनी । समानोदर्य—समाः । एकोदरनामानि ॥ ३३ ॥

---

[1] पुत्रः B_3. [2] ‘सपिण्डता तु पुरुषे सप्तमे विनिवर्तते’ इति मनुः (५. ६०) B_3.

सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः ॥ ३४ ॥
ज्ञातेयं बन्धुता तेषां क्रमाद् भावसमूहयोः ।

(वि.) सगोत्र इति—समानं गोत्रं यस्य सगोत्रः । बन्धुरेव बान्धवः । अन्तरङ्गतया ज्ञायत इति ज्ञातिः । ‘ज्ञा अवबोधने’ । बध्नाति [1]प्रीतिमिति बन्धुः । ‘बन्ध बन्धने’ । स्वकीयत्वात्[2] स्वः । [3]स्वश्चासौ जनश्च स्वजनः । [4]बन्धुजननामानि ॥ [5]ज्ञातेर्भावो ज्ञातेयम् । बन्धुत्वनाम ॥ बन्धूनां समूहो बन्धुता । बन्धुसमूहनाम ॥ ३४ ॥

---

[1] J_2, K_5, K_6 add करोति. [2] स्वधनसंबन्धित्वात् F_2, Pt_2. [3] स्वकीयः D_2; स्वसंबन्धी जनः F_2, Pt_2. [4] स्वकीय° K_5. [5] ज्ञातीनां K_5, K_6.

(पा.) सगोत्र—स्वजनाः समाः । बन्धुनामानि । ज्ञातेयं—समूहयोः । तेषां ज्ञातीनां भावो ज्ञातेयम् । तेषां बन्धूनां समूहो बन्धुता । अनुक्तम्—‘पितरस्तु पितुर्वंश्या मातुर्मातामहाः कुले’ । पितृवंशे भवाः [1]सर्वे पितरः, मातृवंशे भवाः सर्वे मातामहाः [2]स्युः ॥ ३४ ॥

---

[1] B_3 omits सर्वे. [2] B_3 omits स्युः.

धवः प्रियः पतिर्भर्ता जारस्तूपपतिः समौ ॥ ३५ ॥
अमृते जारजः कुण्डो मृते भर्तरि गोलकः ।

(वि.) धव इति—धुनोति स्वतेजसा भार्यामिति धवः । 'धूञ् कम्पने'। तामेव [1]प्रीणयतीति प्रियः । 'प्रीञ् [2]तर्पणे कान्तौ च'। पाति [3]जायामिति पतिः । 'पा रक्षणे'। तामेव बिभर्तीति भर्ता। 'डुभृञ् [4]धारणपोषणयोः'। [5]पतिनामानि ॥ [6]जरयति [7]परस्त्रियं वयोहानिं धर्षणैः करोतीति जारः । 'जॄष् वयोहानौ'। [8]उपजातः पतिः उपपतिः । परस्त्रीगन्तृनामनी ॥ [9]कुण्ड्यते क्षेत्रिणः कुलमनेन कुण्डः । 'कुडि दाहे'। जाराज्जातः जारजः । भर्तर्यमृते जारजस्य नाम ॥ गुल्यते मात्रा [10]गोप्यत इति गोलकः । 'गुड रक्षणे'। भर्तरि मृते सति जारजस्य नाम ॥ ३५ ॥

[1] प्रीणाति F_2, Pt_2. [2] प्रीणने K_6, Pt_2; प्रीतौ W_2. [3] तामेव K_5.
[4] भरणे K_6. [5] भर्तृ° K_3. [6] जारयति D_2. [7] स्त्रिया: वयोमानहानिं W_2.
[8] उपमितः पत्या F_2, Pt_2. [9] कुण्डयति Pt_2. [10] अप्रकाशत्वेन Pt_2.

(पा.) धवः—भर्ता। पतिनामानि । पताविति केचिदिति शाकटायनः । पत्युः [1]समास इति काका निर्देशः । तेनानियमो गम्यते ।

> 'मृते प्रव्रजिते नष्टे क्लीबे च पतिते पतौ ।
> पतिना नीयमानायाः प्रतिशुक्रो न दुष्यति ॥'

इति सुभूतिटीकायामुक्तम् । जारः—समौ । परस्त्रीगन्तुर्नामनी । अमृते—कुण्डः । भर्तरि जीवति जाराज्जातः कुण्डः । मृते—गोलकः । भर्तरि मृते जाराज्जातः गोलकः ॥ ३५ ॥

[1] 'पतिः समास एव' इति पाणिनिसूत्रम् (१. ४. ८).

भ्रात्रीयो भ्रातृजो भ्रातृभगिन्यौ भ्रातरावुभौ ॥ ३६ ॥
मातापितरौ पितरौ मातरपितरौ प्रसूजनयितारौ ।
श्वश्रूश्वशुरौ श्वशुरौ पुत्रौ पुत्रश्च दुहिता च ॥ ३७ ॥
दम्पती जम्पती जायापती भार्यापती च तौ ।

(वि.) भ्रात्रीय इति—भ्रातुः [1]पुत्रो भ्रात्रीयः । [2]भ्रातृपुत्रनाम ॥ भ्राता च स्वसा[3] च भ्रातरौ । भ्रातृभगिन्योर्नाम ॥ माता च पिता च पितरौ । मातापितरौ ।

मातरपितरौ च। प्रसूश्च जनयिता च प्रसूजनयितारौ। प्रसूजनकयोर्नामानि ॥ श्वश्रूश्च श्वशुरश्च [4]श्वशुरौ। श्वश्रूश्वशुरयोर्नाम। पुत्रश्च दुहिता च पुत्रौ। पुत्रदुहित्रोर्नाम ॥ जाया च पतिश्च दम्पती। [5]जम्पती। जायापती। भार्या च पतिश्च भार्यापती। भार्यापत्योर्नामानि ॥ ३६-७ ॥

---

[1] अपत्यं Pt_2. [2] F_2, Pt_2 add भ्रातुर्जातो भ्रातृजः. [3] भगिनी Pt_2.
[4] Pt_2 adds श्वश्रूश्वशुरौ. [5] दमिति जमिति मान्तमव्ययद्वयं जायाशब्दवाचि Pt_2.

(पा.) [1]भ्रातृव्यो भ्रातृजः। भ्रातृसुतनामनी। भ्रातृभगिन्यौ—उभौ। भ्राता भगिनी चेत्युभौ सहवचने भ्रातरौ। मातापितरौ—जनयितारौ। जननीजनकौ सहवचने मातापितरौ पितरौ मातरपितरौ च स्याताम्। 'मातरपितराभ्यामित्यन्यः' इति भाषावृत्तिकारवचनान्मातरपितरशब्दोऽकारान्तोऽप्यस्ति। तेन मातरपितरयोरित्याद्यपि ॥ श्वश्रू—श्वशुरौ। श्वश्रूश्च श्वशुरश्चेत्युभौ सहवचने श्वशुरौ श्वश्रूश्वशुरौ च स्याताम्। पुत्रौ—दुहिता च। पुत्रश्च दुहिता चेत्युभौ सहवचने पुत्रौ स्याताम्। '[2]भ्रातृपुत्रस्वसृदुहितृभिः' इति शाकटायनमते (२. १. ८४) बहुवचनग्रहणात् सुतश्च दुहिता च सुतावित्यादि सिद्धम्। दम्पती—च तौ। भार्या पतिश्चेत्युभौ सहवचने दम्पत्यादिशब्दवाच्यौ भवतः। जाया च पतिश्चेति द्वन्द्वे जाशब्दस्य पक्षे जमादेशदमादेशौ। 'जं दं शब्दौ दारवाच्यावव्ययौ परिकीर्तितौ' इत्यभिधानात् प्रकृत्यन्तरे च। [3]राजदन्तादित्वात् सर्वत्र परनिपातः ॥ ३६-७ ॥

---

[1] भ्रात्रीयः B_3. [2] 'भ्रातृपुत्राः'—इति मुद्रितग्रन्थे. [3] 'राजदन्तादिषु परम्' (२. २. ३१).

गर्भाशयो जरायुः स्यादुल्बं च कललोऽस्त्रियाम् ॥ ३८ ॥
सूतिमासो वैजननो गर्भो भ्रूण इमौ समौ ।

(वि.) गर्भाशय इति—गर्भ आशेतेऽत्र गर्भाशयः। गर्भनिष्क्रमणानन्तरं जरां [1]जीर्णतामेतीति[2] जरायुः। 'इण् गतौ'। उलति गर्भमावृणोतीति उल्बम्। 'उल [3]संवरणे'। गर्भोपरिचर्मनाम॥ शुक्लशोणिते कलति मिथः संगच्छत इति कललः[4]। कलतिः कामधेनुः। शुक्लशोणितसंयोगनाम ॥ सूतेः प्रसवस्य मासः सूतिमासः। विजननं गर्भमोचनं, तदस्मिन्नस्तीति वैजननः[5]। सूतिकालमासनामनी ॥ [6]मातृभुक्तान्नरसं गिरतीति गर्भः। 'गॄ निगरणे'। भ्रियते कुक्षौ[7] मात्रेति भ्रूणः। 'भृञ् भरणे'। गर्भनामनी ॥ ३८ ॥

[1] जीर्णत्वं D_2, K_5, K_6. [2] K_5 adds प्राप्नोति. [3] आवरणे K_5; 'उल' सौत्रो धातुः D_2. [4] कलतः योगात् शुक्लशोणिते मिथः संगच्छेते अत्रेति, 'कल संख्याने' F_2, Pt_2. [5] विशिष्टजन (विजन W_2) संबन्धित्वात् D_2, K_5, K_6. [6] मात्रा भुक्तं K_5, K_6. [7] (कुक्षिमात्रेण K_5, K_6) भ्राम्यति कुक्षाविति वा, 'भ्रमु अनवस्थाने' Pt_2; भ्रूण्यते, 'भ्रूण आशाविशङ्कयोः' D_2.

(पा.) गर्भाशयो—कललोऽस्त्रियाम्। [1]गर्भपरिवेष्टिकचर्मनामानि। 'मावि'। 'कललो जरायुरुल्बः' इति रत्नकोशः। 'लोक एष तिमिरोल्बवेष्टितो गर्भवास इव वर्तते निशि।' इति कुमारसंभवः (८. ५६)। उल्बकललशब्दौ गर्भगोलनामनी इति केचित्॥ '[2]सुमेरोरुल्बभूतस्य जरायुश्च महीधराः' इति॥ सूतिमासो वैजननः। प्रसवमासनामनी॥ गर्भो—समौ। गर्भनामनी॥ ३८॥

[1] परिवेष्टन° B_3. [2] 'मेरुरुल्बमभूत्तस्य जरायुश्च महीधराः' इति टीकासर्वस्वे (पृ. २९३).

तृतीयप्रकृतिः षण्डः क्लीबः पण्डो नपुंसकम्॥ ३९॥
शिशुत्वं शैशवं बाल्यं तारुण्यं यौवनं समे।

(वि.) तृतीयेति—स्त्रीपुंसापेक्षया तृतीया [1]प्रकृतिः तृतीयः प्रकारः तृतीयप्रकृतिः। तृतीया प्रकृतिरिति वा पाठः। [2]स्वस्यापख्यातिनिवारणार्थं किमपि हिरण्यादिकं सनोति ददातीति षण्डः। 'षणु दाने'। सण्डश्च। [3]शण्ड इति वा पाठः। तदा शाम्यति [4]प्रजाविच्छेदेनेति शण्डः। 'शमु उपशमे[5]'। क्लीबतेऽधीरो भवतीति क्लीबः। 'क्लीबृ अधाष्टर्ये'। क्लाम्यति अप्रजत्वेनेति वा। 'क्लमु ग्लानौ'। पण्डते लज्जया प्रदेशान्तरं गच्छतीति पण्डः। 'पडि गतौ'। न स्त्रीपुंसौ [6]नपुंसकम्। नपुंसको वा[7]। शिशोर्भावः शिशुत्वम्। शैशवं च। बालस्य भावः बाल्यम्। अष्टवर्षात् पूर्ववयसः, अष्टवर्षादूर्ध्वं षोडशवयसश्च नामानि॥ तरुणस्य भावः तारुण्यम्। यूनो भावो यौवनम्। षोडशवर्षाधिकवयोनामनी॥ ३९॥

[1] F_2, Pt_2 add प्रथमा प्रकृतिः स्त्री, द्वितीया प्रकृतिः पुमान्. [2] नपुंसकाप्रख्यापकाय पुरुषाय K_5, K_6. [3] शण्ढ इति वा पाठः W_2. [4] अप्रजत्वेन D_2, K_5, K_6. [5] उपरमे I, K_2, W_2. [6] न पुमान् J_2, K_6. [7] नपुंसकशब्दः पुंलिङ्गोऽप्यस्ति, नपुंसकनामानि D_2, I, K_2, K_6, W_2.

(पा.) तृतीया—नपुंसके। नपुंसकनामानि। विशेषणसमासश्चेत् तृतीयप्रकृतिशब्दः स्त्रीलिङ्गः। षण्डपण्डशब्दौ रूपभेदात् पुंलिङ्गौ। तत्र [1]'शमेर्ढः' इति सिद्धः

शण्ढशब्दस्तालव्यादिष्टवर्गचतुर्थान्तश्च भवति[2]। संकरपाठात् क्लीबनपुंसकशब्दौ पुंलिङ्गावपि। 'अस्त्री नपुंसकं क्लीबं वाच्यलिङ्गमविक्रमे' इति रुद्रः। 'स नपुंसको भवेत्' इत्यमरभाष्यकारः॥ शिशुत्वं—बाल्यम्। बालत्वनामानि। 'अपि कैशोरकौमारे'। एते च॥ तारुण्यं—समे। षोडशवर्षाधिकवयोनामनी। [3]दृढादिपाठात् तरुणिमापि। प्रयोगश्च—'कथंचिन्नोत्पत्तिं तरुणिमनि मन्ये मृगदृशः' इति। [4]मनोज्ञादिपाठाद् यौवनिकापि। 'न गता यौवनिका निवर्तत' इति॥ ३९॥

---

[1] उ. १. १०४. [2] शाण्ड इति A₁. [3] ५. १. १२३. [4] ५. १. १३३.

स्यात् स्थाविरं तु वृद्धत्वं वृद्धसंघेऽपि वार्धकम्॥ ४०॥
पलितं जरसा शौक्ल्यं केशादौ विस्रसा जरा।

(वि.) स्यादिति—स्थविरस्य भावः स्थाविरम्। वृद्धस्य भावः वृद्धत्वम्। पञ्चाशद्वर्षाधिकवयोनामनी॥ वृद्धस्य भावः [1]समूहो वा वार्धकम्। वृद्धभावस्य वृद्धसमूहस्य च नाम॥ पलति [2]शौक्ल्येन शोभते शरीरसौन्दर्यमिति पलितम्। 'पल गतौ'। धातूनामनेकार्थत्वाद् अत्र शोभार्थः। जरसा केशादिशौक्ल्यनाम॥ विस्रंसते अधः पतति [3]शरीरमनयेति विस्रसा। 'स्रंसु [4]अवस्रंसने'। जरयति दन्तादिकमिति जरा। 'जॄष् वयोहानौ'। जीर्यन्तेऽनयाङ्गादीनीति वा। वयोहानिनामनी॥ ४०॥

---

[1] संघः D_2, K_2, W_2. [2] गच्छत्यनेन K_2, W_2. [3] अङ्गादिकं K_5, K_6.
[4] अधःपतने F_2, Pt_2; 'स्रंसु ध्वंसु भ्रंसु अवस्रंसने' K_3, K_6.

(पा.) स्यात् स्थाविरं—वार्धकम्। वृद्धत्वनामानि। वार्धकशब्दो वृद्धसंघेऽपि स्यात्। वार्धक्यशब्दो वृद्धभाव एव। 'वार्धक्ये तु समागते परिभवो जातो महान् विभ्रमः' इति। पलितं—केशादौ। जरसा कृतं केशादीनां शौक्ल्यं पलितं स्यात्। 'पलितं पाण्डुराः केशाः' इति शुक्लकेशेषु हलायुधः (अ. मा. २. ३७७)॥ विस्रसा जरा। चरमवयःकृतशरीरपरिपाकनामनी। 'स्थाविरं तु पात् स्त्री [1]विसंसया जरा' इति चरमवयसि वैजयन्ती (पृ. १७७, श्लो. ५४)॥ ४०॥

---

[1] विस्रसा B_3; विस्रंसजेति मुद्रितग्रन्थे (पृ. १७७).

स्यादुत्तानशया डिम्भा स्तनपा च स्तनंधयी॥ ४१॥
बालस्तु स्यान्माणवको वयस्थस्तरुणो युवा।

(वि.) स्यादिति—उत्ताना[1] शेत[2] इति उत्तानशया। 'शीङ् स्वप्ने'। [3]डयते गमनायेति डिम्भा। 'डीङ् विहायसा गतौ'। स्तनं पिबतीति स्तनपा। 'पा पाने'। स्तनं [4]धयतीति स्तनंधयी। 'धेट् पाने'। मानुषशिशुनामानि[5]॥ स्त्रीलिङ्गे निर्देशस्तु स्त्रीप्रत्ययप्रदर्शनार्थः॥ बलति स्वल्पायासेनापि श्वसितीति बालः। 'बल प्राणने'। मनोः कुत्सितं स्वल्पमपत्यं माणवकः। अप्रतिपूर्णषोडशवर्षवतो नामनी॥ 'आ षोडशाद् भवेद् बालस्ततस्तरुण उच्यते' इति मनुः[6]। [7]षोडशवर्षाधिके वयसि तिष्ठतीति वयस्थः। तरति [8]दुस्तरमपीति तरुणः। 'तॄ प्लवनतरणयोः' यौति स्त्रीबाह्याङ्गाद्यवयवैः मिश्रीभवतीति युवा। 'यु मिश्रणे'। परिपूर्णषोडशवर्षस्य अवृद्धस्य नामानि॥ ४१॥

[1] उत्तानं K_5, K_6. [2] संशेते D_2, W_2. [3] D_2, J_2, W_2 add उद्गच्छति. [4] W_2 adds पिबति. [5] Pt_2 adds सिंहादिवर्गे पोतसामान्ये पठितस्यापि डिम्भशब्दस्य पुनर्मनुष्यवर्गेऽभिधानं उत्तानशय एव मनुष्यशिशावस्य प्रवृत्तिः. [6] Attributed to Nārada in Apte's Dict. p. 1162. [7] यौवन° Pt_2. [8] दुष्करं D_2, J_2, K_6.

(पा.) स्यादुत्तानशयो डिम्भः। चरमवपुरधःकृत्य यः शेते तन्नाम। स्तनपश्च स्तनंधयः। स्तन्यपायिनो नामनी। 'त्रिषु जरावराः' इति [1]वक्ष्यते। तेन त्रिलिङ्गाः। [2]धेर्धातोरनुबन्धप्रयोजनं स्तनंधयीति ङीप्[3]। बालः—माणवकः। 'बालो वटुर्माणवकः' इति तन्त्रान्तरम्। बालनामनी॥ वयस्थः—युवा। 'युवानः संस्कृतेऽपि' इति त्रिविक्रमवचनाद् अकारान्तो युवानशब्दोऽप्यस्ति। प्रयोगश्च—'स्फुटकुसुममरन्दानश्नुवानैर्युवानैः' इति। पूर्णवयसो नामानि॥ ४१॥

[1] श्लो. ४९. [2] धेट् धातोः B_3. [3] 'टिड्ढाणञ्—' (४. १. १५).

प्रवयाः स्थविरो वृद्धो जीनो जीर्णो जरन्नपि॥ ४२॥
वर्षीयान् दशमी ज्यायान् पूर्वजस्त्वग्रियोऽग्रजः।

(वि.) प्रवया इति—प्रगतं यौवनाख्यं वयो यस्य प्रवयाः। बहुकालं तिष्ठतीति स्थविरः। 'ष्ठा गतिनिवृत्तौ'। वयसा वर्धते वृद्धः। 'वृधु वृद्धौ'। जिनाति [1]वयसो हीयत इति जीनः। 'ज्या वयोहानौ'। जीर्यत इति जीर्णः। जरंश्च। 'जॄष् वयोहानौ'। [2]अतीतयौवनस्य वृद्धस्य नामानि॥ अतिशयेन वृद्धो वर्षीयान्। नवतेरूर्ध्वं दशमोऽवस्थाविशेषोऽस्यास्तीति [3]दशमी। अतिशयेन वृद्धो ज्यायान्। वृद्धतमनामानि॥ [4]पूर्वस्मिन् काले जातः पूर्वजः। अग्रे भवः[5] अग्रियः। अग्रे जातः अग्रजः। जन्मतो ज्येष्ठभ्रातृनामानि॥ ४२॥

[1] वयोहानिमाप्नोति D_2, K_5, K_6. [2] W_2 omits two lines. [3] वर्षशतादुपरि दशमो वर्षोऽस्यास्तीति K_6. [4] पूर्वजाग्रजशब्दौ व्यक्तयोगौ J_2, W_2. [5] जातः K_5, K_6.

(पा.) प्रवयाः—जरन्नपि। प्रगतवयसो नामानि। जिन इति ह्रस्वादिरपि। 'जिनः स्यादतिवृद्धे च बुद्धे चार्हति जित्वरे' इति केचित्[1]। वर्षीयान्—ज्यायान्। अतिवृद्धनामानि। पूर्वजः—अग्रजः। ज्येष्ठनामानि॥ ४२॥

[1] विश्वप्रकाशे दृश्यते (पृ. ८५, श्लो. १).

जघन्यजे स्युः कनिष्ठयवीयोऽवरजानुजाः॥ ४३॥
अमांसो दुर्बलश्छातो बलवान् मांसलोंऽसलः।

(वि.) जघन्यज इति—जघन्ये पश्चात्काले जातः[1] जघन्यजः। [2]अतिशयेनाल्पः कनिष्ठः[3]। अतिशयेन [4]युवा यवीयान्। [5]अवरस्मिन् काले जातोऽवरजः। अनु पश्चाज्जातः अनुजः। जन्मतः कनिष्ठभ्रातृनामानि॥ न विद्यतेऽल्पत्वात् [6]मांसमस्य अमांसः[7]। [8]दुष्टं बलमस्य दुर्बलः। वातादिदोषेण [9]छिन्नमांसत्वात् छातः। 'छो छेदने'। [10]कृशदेहनामानि॥ [11]बलमस्यास्तीति बलवान्। बहुमांसोऽस्यास्तीति मांसलः। पीनावंसौ स्तः अस्येति अंसलः। पीनदेहस्य नामानि॥ ४३॥

[1] भूतः K_6. [2] I, W_2 omit two lines. [3] अत्यल्पो वयसा F_2, Pt_2. [4] युवैव K_5, K_6. [5] अवरे पश्चात् D_2. [6] मांसादिकं W_2. [7] अल्पं मांसमस्य Pt_2. [8] दुर्निन्दितं Pt_2. [9] कृशत्वेन छिन्न इवास्थानात् F_2, Pt_2. [10] कृशस्य W_2. [11] F_2, Pt_2 add स्थौल्यं.

(पा.) जघन्यजे—अनुजाः। कनिष्ठनामानि॥ अमांसो—शातः[1]। कृशशरीरनामानि॥ बलवान्—अंसलः। स्थूलकायनामानि॥ ४३॥

[1] छातः B_3.

तुन्दिलस्तुन्दिकस्तुन्दी बृहत्कुक्षिः पिचिण्डिलः॥ ४४॥
अवटीटोऽवनाटश्चावभ्रटो नतनासिके।

(वि.) तुन्दिल इति—[1]पीनं तुन्दमस्यास्तीति तुन्दिलः। तुन्दिकः[2]। तुन्दी च। बृहत् कुक्षिरस्येति [3]बृहत्कुक्षिः। पीनः पिचिण्डः कुक्षिरस्यास्तीति पिचिण्डिलः। [4]पीवर-

जठरस्य नामानि ॥ [5]अवनता नासिकास्येति अवटीटः । अवनाटः । अवभ्रटश्च । नता नासिकास्येति नतनासिकः । अस्थिभङ्गवशादीषन्निम्ननासिकस्य नामानि ॥ ४४ ॥

[1] तुन्दिपिचण्डशब्दौ कुक्षिपर्यायौ, तद्योगात् Pt$_2$. [2] अत्र द्वितीयं नाम तुन्दिभ इति वा पाठः W$_2$. [3] बृहन् D$_2$. [4] पीन° K$_2$, K$_3$, W$_2$. [5] K$_5$, K$_6$ add अस्थिभङ्गवशात्.

(पा.) तुन्दिलः—पिचण्डिलः । बृहज्जठरनामानि ॥ अवटीटो—नतनासिके । नम्रनासिकनामानि ॥ अवटीटादयो नतायां नासिकायामपि । तत्र स्त्रीलिङ्गा एव । नासिकानमनेऽपि । तत्र नपुंसकलिङ्गा एव ॥ ४४ ॥

केशवः केशिकः केशी वलिनो वलिभः समौ ॥ ४५ ॥
विकलाङ्गस्तु पोगण्डः खर्वो ह्रस्वश्च वामनः ।

(वि.) केशव इति—प्रशस्ताः केशाः सन्त्यस्य केशवः । केशिकः । केशी च । प्रशस्तकेशस्य नामानि ॥ वलयोऽस्य सन्तीति वलिनः । वलिभश्च । त्वक्संकोचात् कुक्ष्यादौ रेखावतो नामानि ॥ [1]विकलान्यङ्गान्यस्य विकलाङ्गः । अपकृष्टो गण्यत इति [2]पोगण्डः । 'गण संख्याने' । [3]विकलाङ्गस्य नामनी ॥ खर्वति विकलाङ्गस्यापेक्षया श्रेष्ठत्वेन दृश्यत इति खर्वः । '[4]खर्व दर्पे' । ह्रसतीति ह्रस्वः । 'ह्रस शब्देऽल्पत्वे च' । [5]वामत्वमस्यास्तीति वामनः । नीचकायस्य नामानि ॥ ४५ ॥

[1] W$_2$ omits one line. [2] ऋत्विग्वरणादौ अपवार्यते अनर्हत्वात् K$_6$, W$_2$. [3] अङ्गहीनस्य नाम W$_2$. [4] 'कर्व खर्व गर्व दर्पे' K$_6$, Pt$_2$. [5] वार्धकेऽपि वामः शरीरफल्गुता अस्ति K$_5$, K$_6$.

(पा.) केशवः—केशी । दीर्घकेशस्य नामानि । अनुक्तम्—'रोमशो लोमशः समौ' । भल्लुकवत्प्रवृद्धरोम्णो नामनी ॥ वलिनो—समौ । वलिभिः संवृतदेहस्य नामनी ॥ विकलाङ्गः—पोगण्डः । हीनाङ्गनाम ॥ खर्वो—वामनः । स्वल्पवर्ष्मणो नामानि ॥ ४५ ॥

खरणाः स्यात् खरणसो विग्रस्तु गतनासिके ॥ ४६ ॥
खुरणाः स्यात् खुरणसः प्रज्ञुः प्रगतजानुकः ।

(वि.) खरणा इति—खरस्य गर्दभस्येव नासिकास्येति खरणाः । सकारान्तोऽयम् । खरस्येव तीक्ष्णनासिकास्येति खरणसः । अकारान्तोऽयम् । [1]तीक्ष्णाग्रनासिकस्य

नामनी ॥ विगता [2]छेदनादिना नासिका यस्य विग्रः । विख्य इति वा पाठः, विखुरिति [3]वा । छिन्ननासिकस्य नाम ॥ खुराकारा नासिकास्येति खुरणाः । सकारान्तोऽयम् । खुरणसश्च । अकारान्तः । गोखुरवत् विकटनासिकस्य नामनी ॥ प्रगते विरले जानुनी यस्य प्रज्ञुः । प्रगतजानुकश्च । वातादिदोषेण विरलजानुकस्य नामनी ॥ ४६ ॥

---

[1] W_2 adds यत्नतः.　[2] छेदनात् W_2.　[3] विख इति वा पाठः K_5, K_6.

(पा.) खरणाः—खरणसः । तीक्ष्णाग्रनासिकस्य नामनी ॥ [1]विग्रो विगतनासिकः । भिन्ननासिकस्य नामनी ।

'विशब्दादपि खुख्रग्राः स्युर्मतान्तरचोदिताः ।
विखुर्विख्रस्तथा विग्रो नासाया विगमात् पुनः ॥'

इति दुर्गसिंहः । तेन विखुः, विख्रोऽपि ॥ खुरणाः—खुरणसः । गोखुरसमनसो नामनी ॥ प्रज्ञुः—प्रगतजानुकः । प्रगतजानुकस्य नाम । प्रज्ञोऽपि स्यात् ।

'प्रसंभ्यां जानुनो ज्ञुज्ञौ स्यातामूर्ध्वाद्विभाषया ।
प्रगते जानुनी यस्य स प्रज्ञुः प्रज्ञ इत्यपि ॥'

इति दुर्गसिंहः ॥ ४६ ॥

---

[1] विग्रस्तु B_3.

ऊर्ध्वज्ञुरूर्ध्वजानुः स्यात् संज्ञुः संहतजानुकः ॥ ४७ ॥
स्यादेडे बधिरः कुब्जे गडुलः कुकरे कुणिः ।

(वि.) ऊर्ध्वज्ञुरिति—[1]ऊर्ध्वे गते जानुनी यस्य ऊर्ध्वज्ञुः । [2]उपवेशनादिवशात् शिरःपर्यन्तमुन्नतजानुकस्य नाम ॥ [3]संहते जानुनी यस्य संज्ञुः । गमनवशात् परस्परं ताड्यमानजानुकस्य नामनी ॥ श्रुतिहीनतया [4]भारतादिश्रवणहीनतया मेषसदृशत्वाद् एड इव एडः । [5]बध्यते वातादिना श्रवणमस्येति बधिरः । '[6]बन्ध बन्धने' । अशृण्वतो नामनी ॥ कुत्सितम् [7]उब्जतीति कुब्जः । 'उब्ज आर्जवे' । कुत्सितो जनः कुब्जो वा । उरसि पृष्ठभागे वा गडुः [8]मांसग्रन्थिरस्येति गडुलः । वातादिना उरसि पृष्ठभागे वा स्थौल्यान्वितस्य नामनी ॥ कुत्सितः करोऽस्य कुकरः । कुण्यते कुत्सित इति [9]कुणिः । 'कुण शब्दोपकरणयोः' । जन्मतः प्रभृति कुत्सितकरस्य नामनी ॥ ४७ ॥

---

[1] ऊर्ध्वे D_2, K_5, K_6.　[2] उपवेशादि° I.　[3] D_2, I, W_2 add संबद्धे.
[4] रामायणादिश्रवणेऽपि एडका(डा D_2, K_3, K_6)ख्यपशुवन्निष्फलत्वात् D_2, K_2, K_3, K_6.

[5] बाध्यते K_3. [6] ‘बधि संयमने’ K_3, K_6. [7] उब्जमार्जवमस्येति D_2,K_3, W_2. [8] स्थौल्यं D_2, I, K_2. [9] कुत्सितः पाणिरस्येति वा D_2, W_2.

(पा.) ऊर्ध्वज्ञुः—स्यात् । उन्नतजानोर्नाम । उद्धितस्यापि । संज्ञुः—जानुकः । परस्परसंदष्टजानोर्नाम ॥ स्यादेडे बधिरः । श्रुतिपाटवशून्यनामनी ॥ कुब्जे गडुलः । कुब्जनामनी ॥ कुकरे कुणिः । कुत्सितकरनामनी ॥ ‘करपाददेहविकला निसर्गतः कूणिपङ्गुपोगण्डाः’ । इति नाममालापाठात् कूणिरपि[1] ॥ ४७ ॥

[1] A_1 adds अस्ति; ‘सोट्टचेति बांडु’.

पृश्निरल्पतनौ श्रोणः पङ्गौ मुण्डस्तु मुण्डिते ॥ ४८ ॥
वलिरः केकरे खोडे खञ्जस्त्रिषु जरावराः ।

(वि.) पृश्निरिति—शिरसि प्रांशुभिः स्पृश्यत इति पृश्निः । ‘स्पृश संस्पर्शने’ । अल्पा तनुर्यस्य अल्पतनुः । अत्यल्पशरीरस्य नामनी ॥ श्रोणति संहतो भवतीति [1]श्रोणः । ‘श्रोणृ संघाते’ । मन्दं [2]पनति गच्छतीति पङ्गुः । ‘पन गतौ’ । कुटिलजङ्घाद्यवयववशात् जङ्घाभावमापन्नस्य नामनी ॥ मुण्ड्यते क्षुरेण शिरोऽस्येति मुण्डः । मुण्डितश्च । ‘मुडि खण्डने’ । क्षुरेण वापितकेशस्य नामनी ॥ वलते विषयग्रहणवेलायाम् अपाङ्गदेशं प्रतीति वलिर्गोलकम् । तद्योगाद् वलिरं नेत्रम् । तद्योगात् पुरुषोऽपि वलिरः । ‘वल संवरणे संचरणे च’ । के [3]शिरःसमीपेऽक्षिसंचारं[4] करोतीति केकरः[5] । दृष्टिं तिर्यगाकृष्य पश्यतो नामनी ॥ [6]खोडति हतगतिर्भवतीति खोडः । ‘खोडृ गतिप्रतिघाते’ । खञ्जति गतिवैकल्यं प्राप्नोतीति खञ्जः । ‘खजि गतिवैकल्ये’ । भग्नचरणस्य नामनी ॥ त्रिषु । जराशब्दः पूर्वोक्तोऽवधिर्येषां[7] ते जरावराः । उत्तानशयादयः खञ्जशब्दान्ताः सर्वे शब्दा अभिधेयानुसारेण त्रिषु लिङ्गेषु वर्तन्त इत्यर्थः ॥ ४८ ॥

[1] कुटिलजङ्घत्वात् D_2, K_2, W_2. [2] D_2, J_2, K_6 add उपवेशे (ने K_2, K_5, W_2) नैव. [3] शिरसि D_2, K_5, K_6. [4] चक्षुः D_2, I, K_3, K_5, K_6. [5] D_2, J_2 add ‘डुकृञ् करणे’. [6] खुडति, ‘खुड संवरणे’ K_5, K_6, W_2. [7] तस्मादवराः J_2.

(पा.) पृश्निरल्पतनौ । [1]पृष्ठिरल्पतनाविति [2]व्याख्यानान्तरपाठः । [3]स्वल्पशरीरनाम ॥ श्रोणः पङ्गौ । पङ्गोर्नाम । ‘[4]पिच्चुकुंटिवांडु’ ॥ मुण्डस्तु मुण्डिते । छिन्नकरचरणादेर्नाम । क्षुरेण[5] वापितकेशस्यापि[6] नाम ॥ [7]वलिरः केकरे । ‘टेरे वलिरकेकरौ’ इति रभसकोशपाठात ह्रस्वेकारः[8] । तिर्यगाकृष्य पश्यतो नामनी । ‘मेल्लकंटुवांडु’ ॥

खोडे खञ्जः। भग्नचरणस्य नाम। 'कुंटिवांडु'[9] ॥ त्रिषु जरावराः। जराशब्दादवराः[10] खञ्जशब्दान्ताः शब्दाः सर्वे [11]संकीर्णलिङ्गा भवन्ति ॥ अनुक्तम्—सिरालः ....॥ ४८ ॥

[1] वृष्टिरिति B₃. [2] व्याख्यान्तरे B₃. [3] संकुचितकरादेर्नाम A₁. [4] B₃ omits. [5] B₃ omits. [6] च B₃. [7] वलीरः B₃. [8] B₃ adds अपि. [9] B₃ omits. [10] शब्दादयः A₁. [11] त्रिलिङ्गाः B₃.

जडुलः कालकः पिप्लुस्तिलकस्तिलकालकः ॥ ४९ ॥
अनामयं स्यादारोग्यं चिकित्सा रुक्प्रतिक्रिया ।

(वि.) जडुल इति—[1]जडन्ति जडीभवन्ति [2]रोमाण्यत्रेति जडुलः। 'जड शून्ये'[3]। [4]कालयति कृष्णयति स्वप्रदेशमिति कालकः। [5]निजवर्णेन परिप्लवते व्याप्नोतीति पिप्लुः। 'प्लुङ् गतौ'। तिल इव तिष्ठतीति [6]तिलकः। तिल[7] इव कालवर्णत्वात् तिलकालकः। देहोपरि कृष्णवर्णबिन्दुसदृशत्वक्प्रदेशनामानि ॥ आमयस्य व्याधे-[8]रभावोऽनामयम्। अरोगस्य भावः आरोग्यम। रोगाभावनामनी ॥ चिकित्सन्त्यनया चिकित्सा। 'कित निवासे रोगापनयने च'। रुजः प्रतिक्रिया रुक्प्रतिक्रिया। व्याधिप्रतिक्रियानामनी ॥ ४९ ॥

[1] जटुल इति पाठे, जटन्ति संघीभवन्ति रोमाण्यत्र, 'जट संघाते' F₂, Pt₂. [2] J₂ adds रोगेणेति. [3] संघाते D₂; घनत्वे Pt₂. [4] कालवर्णत्वात् J₂, K₂, K₆. [5] निजवर्णं प्लवते K₅, K₆; नीच° W₂. [6] तिलप्रकृतित्वात् D₂, K₅, K₆. [7] कृष्ण (वर्ण K₅) तिलवत् D₂, K₆, W₂. [8] J₂ adds कालेन.

(पा.) जडुलः—तिलकालकः। तिलाकारसूक्ष्मत्वग्बिन्दुनामानि[1] ॥अनामयं—आरोग्यम्। [2]रोगाभावनाम ॥ स्वास्थ्यं पाटवमित्यपि। एते द्वे[3] च ॥ चिकित्सा—प्रतिक्रिया। रोगस्य [4]प्रतिकारश्चिकित्सा[5] स्यात् ॥ ४९ ॥

[1] A₁ adds कृष्ण°. [2] आरोग्यनाम A₁. [3] B₃ omits. [4] प्रतीकारः B₃. [5] A₁ omits.

भेषजौषधभैषज्यान्यगदो जायुरित्यपि ॥ ५० ॥
स्त्री रुग् रुजा चोपतापरोगव्याधिगदामयाः ।

(वि.) भेषजमिति—भिषज्यन्ते चिकित्सन्त्यनेनेति भेषजम्। 'भिषज् चिकित्सायाम्'। ओषं दाहं धयति नाशयतीति औषधम्[1]। 'धेट् पाने'। भेषजमेव भैषज्यम्। अविद्यमानो गदोऽनेनेति[2] अगदः। जयति रोगान् जायुः। 'जि जये'[3]। रोगहरद्रव्यनामानि॥ रुज्यते [4]भज्यते प्राण्यनयेति रुक्। रुजा। रोगश्च। 'रुजो भङ्गे'। उपतप्यते प्राण्यनेनेति उपतापः। 'तप संतापे'। विविधा आधयो मनःपीडा यस्मिन् सः [5]व्याधिः। [6]गदन्त्यनेनेति गदः। 'गद व्यक्तायां वाचि'। आमीनाति आ मोक्षात् पीडयतीति आमयः। 'मीञ् हिंसायाम्'। व्याधिमात्रनामानि॥ ५०॥

[1] ओषध्या भवं F_2, Pt_2. [2] अस्मिन्निति K_5, K_6. [3] 'जि अभिभवे' I, J_2, W_2. [4] भक्ष्यते D_2, K_6. [5] व्याधीयतेऽपथ्येन शरीरे विशेषेण धीयते D_2, K_6. [6] धैर्यवन्तं (धैर्यहरणात् I; °रहितं D_2, J_2) गदयति प्रलापयति K_2, K_6.

(पा.) भेषजौषध—जायुरित्यपि। औषधनामानि॥ स्त्री रुक्—गदामयाः। [1]व्याधेर्नामानि॥ ५०॥

[1] रोगस्य B_3.

पुमान् यक्ष्मा क्षयः शोषः प्रतिश्यायस्तु पीनसः॥ ५१॥
स्त्री क्षुत् क्षुतं क्षवः पुंसि कासस्तु क्षवथुः पुमान्।

(वि.) पुमानिति—यक्ष्यते [1]रोगराजव्यपदेशात् यक्ष्मा। नान्तः[2] पुमान्। 'यक्ष पूजायाम्'। [3]क्षीयतेऽत्यर्थमनेन क्षयः। 'क्षि क्षये'। शुष्यत्यनेन[4] प्राणीति शोषः। 'शुष शोषणे'। रोगराजनामानि॥ प्रतिक्षणं श्यापयति[5] श्लेष्मजलं स्रावयतीति[6] प्रतिश्यायः। 'श्यैङ् गतौ'। पीनं [7]प्रवृद्धमप्यङ्गं स्यति व्यथयतीति पीनसः। 'षोऽन्तकर्मणि'। श्लेष्मध्वनिकारिरोगनामनी[8]॥ पुनः पुनः [9]क्षौतीति क्षुत्। क्षुतं क्षवश्च। 'टुक्षु शब्दे'। [10]पीनसेन नासायां पुनःपुनरागच्छतो ध्वनेर्नामानि॥ कासते भिन्नकांस्यवत् कुत्सितं ध्वनतीति कासः। 'कासृ शब्दकुत्सायाम्[11]'। क्षौति भिन्नकांस्यवत् क्षवथुः। पुमान्। कासरोगनामनी॥ ५१॥

[1] रोगेषु F_2, Pt_2. [2] नकारान्तः पुंलिङ्गः K_6. [3] क्षीयन्ते F_2, Pt_2. [4] शुष्यन्तेऽनेन F_2, Pt_2. [5] श्यायते D_2, K_5, K_6. [6] प्रापयति Pt_2. [7] मस्तकरूपं K_2, K_5, W_2. [8] विकारि° J_2. [9] क्षवणं Pt_2. [10] पीनसे सति W_2. [11] कुत्सने K_3, K_6.

(पा.) क्षयः[1] शोषश्च यक्ष्मा च। [2]यक्ष्माशब्दः अदन्तश्च भवति। 'यक्ष्मा यक्ष्मः क्षयः शोषः' इति वैजयन्ती (पृ. १८३, श्लो. १२४)। राजशब्दपूर्वकोऽपि भवति[3]। 'राजयक्ष्मेव रोगाणां [4]समूहः स महीभृताम्' इति माघः (शिशु. २. ९६)। क्षयरोगनामानि ॥ प्रतिश्यायस्तु पीनसः। विहिता[5] नासानेनेति व्युत्पत्त्या दन्त्यान्तः। पीनं श्यतीति व्युत्पत्त्या तालव्यान्तश्च। नासारोगनामनी। 'पडिशमु'[6]॥ स्त्री क्षुत्—पुंसि। क्षुतनामानि। 'तुम्मु'॥ कासस्तु—पुमान्। [7]कासरोगनामनी। 'दग्गु'॥ ५१॥

---

[1] पुमान् यक्ष्मा क्षयः शोषः B_3.
[2] A_1 omits.
[3] B_3 omits.
[4] B_3 omits the second *pāda*.
[5] अपिहिता A_1.
[6] 'पडिशं' B_3.
[7] B_3 omits °रोग°.

शोफस्तु श्वयथुः शोथः पादस्फोटो विपादिका ॥ ५२ ॥
किलाससिध्मे कच्छ्वां तु पाम पामा विचर्चिका।

(वि.) शोफ इति—शवति[1] अभिवृद्ध्या आसन्नप्रदेशमभिसर्पतीति[2] शोफः। 'शव गतौ'। श्वयति [3]वर्धते श्वयथुः। 'टुओश्वि गतिवृद्ध्योः'। शोथश्च। शोष इति पाठे शुष्यत्यनेन म्रियते[4] शोषः। शोफरोगनामानि ॥ पादाः [5]स्फुटन्त्यनेन पादस्फोटः। 'स्फुट[6] विकसने'। [7]विपद्यन्ते म्रियन्तेऽनयेति विपादिका[8]। 'पद्लृ गतौ'। पादशब्दः पाणिशब्दस्याप्युपलक्षणम्। के शिरसि कं[9] वा लसति श्लिष्यति किलासम्। 'लस श्लेषणक्रीडनयोः'। केलयति सुसाध्यत्वात् भिषजं प्रेरयति वा। 'किल क्षेपे'। सिध्यति भेषजेनाशु गच्छतीति सिध्मम्[10]। 'षिधु गत्याम्'। कण्ठादौ[11] चित्रत्वग्गतरोगनामनी[12] ॥ स्वस्थानात् त्वचं कषतीति कच्छूः। 'कष हिंसायाम्'। शरीराङ्गसौष्ठवं पिबति नाशयतीति पाम। पामा च। पामाशब्दः नकारान्तपुंलिङ्गः आकारान्तस्त्रीलिङ्गो वा। त्वचं विचर्चयति[13] स्रावेण लिम्पतीति विचर्चिका। 'चर्च अध्ययने'। धातूनामनेकार्थत्वाद् अत्र चर्चधातोः लेपनार्थो ग्राह्यः। श्रोण्यादौ सूक्ष्मसान्द्रपिटकावृतरोगनामानि ॥ ५२ ॥

---

[1] शफति D_2.
[2] गच्छति K_5.
[3] वर्धयति K_5, K_6.
[4] मीयते W_2.
[5] स्फोटयति D_2, K_6.
[6] 'स्फुट भेदने' D_2, K_6.
[7] पाणीनामपि D_2, W_2.
[8] विपाटिकेति पाठे विपस्यन्ते अनया, 'पट गतौ' K_6.
[9] कण्ठादौ K_5; कर्णादौ W_2.
[10] सिध्मलं K_5, K_6; सिध्म F_2, Pt_2.
[11] कर्णादौ W_2.
[12] आन्ध्रभाषायां 'सिब्बेमु पेल्लु' K_5.
[13] विचर्चेति K_5, K_6.

(पा.) शोफस्तु—शोथः[1]। शोफनामानि। पाद—विपादिका। पादस्फुटितनामनी। 'पिटिके'॥ किलाससिध्मे। नान्तोऽपि भवति[2]। 'सिहुल्लिका तु त्वक्पुष्पं

किलासं सिध्मसिध्मनी'। इति रभसः। चर्मपुष्पनामनी। 'शिब्बमु'॥ कच्छ्वां—विचर्चिका[3]। [4]प्रथमो नान्तः स्त्रीलिङ्गः। द्वितीयः (पामा) आकारान्तः स्त्रीलिङ्गः[5]। कच्छूनामानि। 'मूंगतिंटि'॥ ५२॥

[1] शोष: B$_3$. [2] B$_3$ adds सिध्मशब्दः. [3] B$_3$ adds पामपामे इति पाठे पाम च पामा चेति द्वन्द्वः. [4] आद्य: B$_3$. [5] द्वावपि स्त्रीलिङ्गौ B$_3$.

कण्डूः खर्जूश्च कण्डूया विस्फोटः पिटकस्त्रिषु॥ ५३॥
व्रणोऽस्त्रियामीर्ममरुः क्लीबे नाडीव्रणः पुमान्।

(वि.) कण्डूरिति—कण्ड्यते नखैरिति कण्डूः। कण्डूया च। 'कडि [1]भेदने'। खर्जति व्यथयतीति खर्जूः। 'खर्ज व्यथने'। कण्डूंतिनामानि॥ परिपक्वदशायां[3] विस्फोटतीति[4] विस्फोटः। '[5]स्फुटिर् विशरणे'। पिटति संश्लिष्यतीति पिटकः। 'पिट संश्लेषणे'। पेटक इति वा पाठः। देहे तत्र तत्र जायमानसूक्ष्मव्रणनामानि[6]॥ व्रणयतीति व्रणः। 'व्रण गात्रसंचूर्णने'। ईर्तेऽभिवृद्ध्या समीपमङ्गमभिसर्पतीति ईर्मम्। 'ईर गतौ कम्पने च'। इयर्ति वृद्धिम् अरुः। 'ऋ गतौ'। अरुःशब्दः वपुःशब्दवत् सान्तो नपुंसकलिङ्गश्च। व्रणनामानि॥ नाडीयुक्तो[7] व्रणः नाडीव्रणः। पुमान्। स्रवत्पूयनाडिव्रणनाम॥ ५३॥

[1] K$_3$, K$_6$ add खण्ड. [2] खर्जयति F$_2$, Pt$_2$. [3] अवस्थायां K$_5$, K$_6$. [4] विस्फुटति Pt$_2$. [5] 'स्फुट भेदने' F$_2$, Pt$_2$. [6] 'पोक्कलपेल्लु' K$_3$, K$_5$, K$_6$. [7] नाडीवान् D$_2$, K$_2$, W$_2$.

(पा.) कण्डूः—कण्डूया। कण्डूतिनामानि। 'दूल'। धातुत्वविज्ञानात् कण्डू कण्डवः। प्रातिपदिकत्वविज्ञानात् कण्ड्वौ कण्ड्वः॥ विस्फोटः—त्रिषु। [1]औष्ण-जायमानस्फोटनामनी। 'बोब्बलु'॥ व्रणो—अरुः क्लीबे। व्रणनामानि॥ नाडीव्रणः पुमान्। [2]सिराव्रणनाम॥ ५३॥

[1] औष्ण्य° B$_3$. [2] नाडि° B$_3$.

कोठो मण्डलकं कुष्ठश्वित्रे दुर्नामकार्शसी॥ ५४॥
आनाहस्तु निबन्धः स्याद् ग्रहणीरुक् प्रवाहिका।

(वि.) कोठ इति—कुण्ठितः व्याधितोऽनेन कारितः[1] कोठः। 'कुठ प्रतिघाते'। मण्डलाकृतित्वात्[2] मण्डलकम्। मण्डलाकृतिकुष्ठभेदनामनी[3]॥ कुत्सितं[4] तिष्ठत्यङ्गे[5] कुष्ठम्। 'ष्ठा गतिनिवृत्तौ'। श्वेतते[6] त्वगनेनेति श्वित्रम्। 'श्विता वर्णे'। श्वेतकुष्ठनामानि॥ पापरोगत्वेन प्रसिद्धतया दुष्टं नामास्येति दुर्नामकम्। अरिवत् प्राणिनं श्यति तनूकरोतीति अर्शः। 'शो तनूकरणे'। इयर्त्युद्गच्छतीत्यर्शो वा। 'ऋ गतौ'। गुदादौ प्ररूढमांसाङ्कुरनामनी[7]॥ आनह्यते विण्मूत्रमनेन आनाहः। 'णह बन्धने'। विण्मूत्रं निबध्नातीति निबन्धः। 'बन्ध बन्धने'। विण्मूत्रविष्टम्भनामनी॥ [8]भुक्तमन्नादिकं गृह्णातीति[9] ग्रहणी। 'ग्रह उपादाने'। ग्रहणी चासौ रुक् च ग्रहणीरुक्। द्रवमलं प्रवहति प्रवाहिका। 'वह प्रापणे'। ग्रहणीरोगनामनी॥ ५४॥

---

[1] कावितः, 'कु शब्दे' K_5, W_2. [2] आकृतित्वेन F_2, Pt_2. [3] आन्ध्रभाषायां 'चुलुगुकुपेरु' K_3. [4] कुत्सिते तिष्ठति F_2, Pt_2. [5] अङ्गे K_6. [6] D_2, K_6 add विशिष्टं भवति. [7] मूलव्याधि° K_3. [8] Pt_2 adds दीपनाग्निमान्द्यकरत्वेन. [9] स्थापयति J_2, Pt_2.

(पा.) कोठो मण्डलकम्। मण्डलाकारकुष्ठभेदनामनी। 'कुप्पतोन्नु'। 'कोठः कुष्ठं च मण्डलम्' इति वैजयन्ती (पृ. १८३, श्लो. १२४)॥ कुष्ठश्वित्रे। [1]श्वेतकुष्ठनामनी॥ दुर्नामकार्शसी। [2]मूलरोगनामनी॥ आनाहस्तु—स्यात्। मलबन्धनाम॥ ग्रहणी—प्रवाहिका। अतिसारनामनी। '[3]नातिभेदस्त्वतीसारो[4] ग्रहणी स्त्री प्रवाहिका'। इति वैजयन्ती (पृ. १८३, श्लो. १२९)॥ ५४॥

---

[1] A_1 omits श्वेत. [2] A_1 adds सान्तोऽयम्. [3] नातिभेदाः A_1; नातिभिन्न इति मुद्रितग्रन्थे. [4] अतिसारः A_1.

प्रच्छर्दिका वमिश्च स्त्री पुमांस्तु वमथुः समाः॥ ५५॥
व्याधिभेदा विद्रधिः स्त्री ज्वरमेहभगंदराः।

(वि.) प्रच्छर्दिकेति—प्रच्छर्दत्यनया[1] प्रच्छर्दिका। 'छर्द वमने'। भुक्तमन्नं वमत्यनयेति वमिः। वमथुश्च। 'टुवमु उद्गिरणे'। छर्दिरोगनामानि॥ विद्राति कुत्सितं गच्छत्याहारादिकमनयेति विद्रधिः। 'द्रा कुत्सायां गतौ'। विविधो द्रवो धीयतेऽस्मिन्निति वा। 'डुधाञ् धारणपोषणयोः'। तदुक्तम्—

'दोषा अस्थिगता धातून् दूषयित्वा त्वगादिकान्।
जनयन्ति दृढं शोषं वृत्तं वाप्यथवायतम्।

सा विद्रधिरिति ख्याता दुश्चिकित्सा महारुजा ॥’

इति। [2]ज्वरयतीति ज्वरः। ‘ज्वर रोगे’। [3]मेहति भृशं मूत्रयत्यनेन मेहः। ‘मिह सेचने’। भगं [4]गुदसमीपदेशं [5]दारयतीति भगंदरः। ‘दॄ विदारणे’। एतानि प्रत्येकं व्याधिभेदनामानि ॥ ५५ ॥

[1] प्रच्छर्दनहेतुत्वात् K_3, K_6; W_2 adds छर्दिश्च. [2] ज्वरति K_3. [3] मेहयति K_3, W_2. [4] गुदादुपरिभागं K_5, K_6; गुदोपरि W_2. [5] D_2, K_5, K_6 add विशरणेन; स्रवणेन W_2.

(पा.) प्रच्छर्दिका—वमथुः समाः। वमननामानि ॥ अनुक्तम्—‘गलगण्डो गण्डमाला’। [1]गण्डमालरोगनामनी। गण्डमाला ग्रन्थिनामेति प्राञ्चः ॥ रोहिणी ना गलाङ्कुरः। गलाङ्कुराख्यरोगनाम। उपजिह्विकेति केचित्। ‘[2]गलचुलिक’॥ कुरण्डो वृद्धिरण्डस्य[3]। वृषणाभिवृद्धिः कुरण्डः स्यात्। ‘[4]बुड्ढगोंदु’। केशघ्नं त्विन्द्रलुप्तकम्। यूकदंशरोगनामनी। ‘पेनु गोरिगिनव्याधि’॥ ‘उच्छ्वासरोगो यौकः स्यात्’। उच्छ्वासनिरोधनाम। ‘ऊपिलिचिक्किनव्याधि’। ‘अथ [5]मारिर्मसूरिका’। मसूरिकारोगनामनी। ‘गालेम्म’। व्याधिभेदाः। वक्ष्यन्त इति शेषः। विद्रधिः। विद्रधिरित्यन्तर्व्रणः। [6]वर्गचतुर्थान्तः। ज्वरमेहभगंदराः। ज्वरस्तापः। मेहः शुक्लोत्सर्गः। भगंदरो राजव्रणः। व्याधिभेदनामानि ॥ ५५ ॥

[1] गण्डमाला B_3. [2] B_3 omits. [3] A_1 adds अण्डशब्दः पादपूरणार्थः. [4] B_3 omits. [5] मारी A_1. [6] A_1 adds विद्रं भिदां दधातीति व्युत्पत्त्या.

अश्मरी मूत्रकृच्छ्रं स्यात् पूर्वं शुक्रावधेस्त्रिषु ॥ ५६ ॥
रोगहार्यगदंकारो भिषग्वैद्यौ चिकित्सके।

(वि.) अश्मरीति—शुक्लमूत्रादिकमेव घनीभूतत्वेन अश्मवदवस्थानात् अश्मरीत्युच्यते। [1]मूत्रद्वारे शुक्लात्मानमश्मानं राति ददातीति अश्मरी[2]। [3]मूत्रविसर्गकाले [4]कृच्छ्रं कष्टमस्येति मूत्रकृच्छ्रम्। अश्मर्याख्यरोगनामनी ॥ [5]इतः परं शुक्लं तेज इति (श्लो. ६२) वक्ष्यमाणशुक्लशब्दावधेः पूर्वं रोगहार्यादिशब्दा अभिधेयानुसारेण त्रिषु लिङ्गेषु वर्तन्त इत्यर्थः ॥ रोगं हरतीति[6] रोगहारी[7]। अगदमरोगं [8]करोति प्राणिनमिति अगदंकारः। एतौ शब्दौ वैद्यचिकित्सायाम् औषधे च वर्तेते। [9]भिषज्यति चिकित्सां करोतीति भिषक्। ‘भिषज् चिकित्सायाम्’। [10]विद्यामायुर्वेदम् अधीते वेत्ति वा वैद्यः। ‘विद ज्ञाने’। [11]चिकित्सते चिकित्सकः। वैद्यनामानि ॥ ५६ ॥

[1] द्वारं W_2.
[2] W_2 adds 'रा दाने'; K_3 omits 4 lines.
[3] विस्रवण° F_2, Pt_2.
[4] कष्टं करोति D_2, K_5, K_6.
[5] D_2, K_6, W_2 add पूर्वे शुक्लावधेस्त्रिषु.
[6] Pt_2 adds ताच्छील्येन.
[7] K_5, Pt_2 add 'हृञ् हरणे'.
[8] नीरोगीक्रियतेऽनेन D_2, K_2, K_6.
[9] भिषज्यं D_2, K_5, K_6.
[10] आयुर्विद्यां K_6.
[11] चिकित्सां करोति D_2, K_2, K_6.

(पा.) अश्मरी मूत्रकृच्छ्रं च। अश्मरी मेढ्रान्तः शिलाबन्धः। मूत्रकृच्छ्रं मुहुर्मुहुः [1]मूत्रस्रवणम्। एते व्याधिभेदाः। चशब्दः [2]साकल्यतः समुच्चयार्थः। पूर्वे—त्रिषु। [3]शुक्रशब्दात् पूर्वे रोगहार्यादयः शब्दाः [4]त्रिलिङ्गा भवन्ति।

'पतिर्वैद्यः सुतो वैद्यो वैद्याहं किं बहूदितैः।
गृहस्थूणं च नो वैद्यं रोगश्च न जहाति नः॥'

इति। रोगहारी—चिकित्सके[5]। वैद्यनामानि॥ ५६॥

---

[1] स्रवन्मूत्रम् A_1.
[2] B_3 adds अनुक्तसमुच्चयार्थः, अनुक्ताः वैद्यशास्त्रे द्रष्टव्याः.
[3] शुक्र° A_1.
[4] संकीर्णलिङ्गाः A_1.
[5] वैद्यचिकित्सकौ B_3.

वार्तो निरामयः कल्य उल्लाघो निर्गतो गदात्॥ ५७॥
ग्लानग्लास्नू आमयावी विकृतो व्याधितोऽपटुः।
आतुरोऽभ्यमितोऽभ्यान्तः समौ पामनकच्छुरौ॥ ५८॥

(वि.) वार्त इति—वृत्तिः [1]पुनर्जीवनमस्यास्तीति वार्तः। निर्गत आमयादिति निरामयः। पुनः कलासु[2] विद्यासु साधुर्भवतीति कल्यः। अनेन रोग उल्लङ्घ्यते स्म उल्लाघः। 'लघि[3] गतौ'। उल्लाघते समर्थो भवतीति वा। 'लाघृ सामर्थ्ये'। रोगाद्विमुक्तस्य नामानि॥ ग्लायति स्म[4] ग्लानः। ग्लास्नुश्च। 'ग्लै हर्षक्षये'। रोगेण क्षीणस्य नामनी॥ आमयोऽस्यास्तीति आमयावी। कार्श्यादिना [6]पूर्वावस्थापेक्षया विरुद्धः विकृतः। व्याधिः[7] संजातोऽस्य व्याधितः। पाटवाभावाद्[8] अपटुः। आतुरः संभ्रमोऽस्यास्तीति आतुरः। 'तुर त्वरणे'। अभितः सर्वतो रोगेणाम्यते[10] अभ्यमितः। अभ्यान्तश्च। 'अम रोगे'। रोगग्रस्तनामानि॥ [11]पामाख्यरोगोऽस्यास्तीति पामनः। कच्छूरस्यास्तीति कच्छुरः। विचर्चिकारोगवतो नामनी॥ ५७–८॥

---

[1] पुनः वृत्तिर्जीवनम् K_6.
[2] सकलासु Pt_2; स्वकलासु K_3.
[3] 'रघि लघि गत्याक्षेपे', अत्र द्वितीयो धातुः K_3, K_6.
[4] इति K_3, W_2.
[5] 'ग्लै म्लै हर्षक्षये' K_6.
[6] अन्यथाज्ञा (जा W_2) तत्वात् D_2, K_2, K_6.
[7] W_2 adds 'तदस्य संजातं तारकादिभ्य

इतच्’. [8] क्षयात् K_5; न पटुः F_2, Pt_2. [9] शनैः शनैः रोगमातरतीति वा K_5, K_6.
[10] अमति Pt_2. [11] पामा Pt_2.

(पा.) वार्तो—निर्गतो गदात् । रोगान्निर्मुक्तनामानि ॥ ग्लानग्लास्नू—अभ्यान्तः । रोगिनामानि ॥ समौ पामनकच्छुरौ । कच्छुररोगिनामनी ॥ ५७–८ ॥

दर्द्रुणो दर्द्रुरोगी स्यादर्शोरोगयुतोऽर्शसः ।
वातकी वातरोगी स्यात् सातिसारोऽतिसारकी ॥ ५९ ॥
स्युः क्लिन्नाक्षे चुल्लचिल्लपिल्लाः क्लिन्नेऽक्ष्णि चाप्यमी ।

(वि.) दर्द्रुण इति—दीर्यन्तेऽनया चर्म [1]दर्द्रुः । सा अस्यास्तीति दर्द्रुणः । दर्द्रुरोगिणो नाम ॥ [2]अर्शांसि सन्त्यस्य अर्शसः । अर्शोरोगयुतस्य नाम ॥ [3]वातरोगोऽस्यास्तीति वातकी । वातरोगिणो[4] नाम ॥ अतिसार्यतेऽनेनेत्यतिसारः । तेन सह वर्तत इति सातिसारः । अतिसाररोगोऽस्यास्तीति अतिसारकी । अतिसाररोगिणो नामनी ॥ क्लिन्नमक्षि यस्य सः क्लिन्नाक्षः । चुल्लः चिल्लः पिल्लश्च क्लिन्नाक्षस्य नामानि । क्लिन्नं दूषिकास्राावि यदक्षि तस्मिन्नक्ष्णि मुख्यवृत्त्या अमी पिल्लादयः शब्दा वर्तन्ते ॥ क्लिन्नाक्षिनामानि ॥ ५९ ॥

[1] दरिद्रयति Pt_2. [2] अर्शः F_2, Pt_2. [3] वातसंज्ञकः F_2, Pt_2. [4] रोगवतः K_5, W_2.

(पा.) [1]दर्द्रुणो [2]दर्द्रुरोगी स्यात् । [3]दर्द्रुरोगिनाम । तद्व्युत्पत्तिद्वारा[4] दर्द्रूः । ‘दद्दु’ ॥ अर्शोरोगयुतोऽर्शसः । मूलरोगिणो नाम ॥ वातकी वातरोगी स्यात् । वातव्याधिमतो नाम ॥ सातिसारोऽतिसारकी । ग्रहणिरोगिणो नाम ॥ स्युः क्लिन्नाक्षे—चिल्लाः[5] । क्लिद्यन्नेत्रवतो[6] नामानि । ‘मुरुगिनकन्नुलवांडु’ । क्लिन्नेऽक्ष्णि चाप्यमी । [7]स्रवज्जलस्य चक्षुषो नामान्यपि पिल्लादयो भवन्ति । चुल्लमक्षि देवदत्तस्य । चुल्ला दृग् देवदत्तस्य । त्रिष्वित्यधिकारात् त्रिलिङ्गता ॥ ५९ ॥

[1] दद्रुणः B_3. [2] दद्रु° B_3. [3] दद्रुरोगि° B_3. [4] B_3 omits.
[5] चुल्लचिल्लपिल्लाः A_1. [6] क्लिद्यन्नेत्रस्य पुरुषस्य A_1. [7] पिल्लादयः क्लिद्यतो नेत्रस्य च नामानि B_3.

उन्मत्त उन्मादवति श्लेष्मलः श्लेष्मणः कफी ॥ ६० ॥
न्युब्जो भुग्ने रुजा वृद्धनाभौ तुण्डिभतुण्डिलौ ।

(वि.) उन्मत्त इति—[1]उन्माद्यतीति उन्मत्तः। उन्मादोऽस्यास्तीति वा। 'मदी[2] हर्षे'। उन्मादरोगवतो नाम ॥ [3]श्लेष्मास्यास्तीति श्लेष्मलः। श्लेष्मणश्च। कफोऽस्यास्तीति कफी। क्षुभितश्लेष्मवतो नामानि ॥ न्युब्जति[4] वक्रीभवतीति न्युब्जः। 'उब्ज आर्जवे'। वातादिरोगेण रुजा भुग्नदेहस्य नाम ॥ वृद्धो नाभिरस्येति वृद्धनाभिः। तुण्डिरुन्नतनाभिः तद्योगात् तुण्डिलः। तुण्डिभश्च। दीर्घनाभेर्नामनी ॥ ६० ॥

---

[1] W_2 omits two lines. [2] 'मदी हर्षग्लपनयोः' F_2, Pt_2. [3] K_3 omits six lines. [4] न्युब्जम् अनार्जवं भुग्नत्वं तदस्यास्तीति D_2, K_5, K_6. [5] तुण्डवद् वृद्धा नाभिरस्यास्तीति I, K_6, W_2.

(पा.) उन्मत्त उन्मादवति। उन्मादिनो नाम ॥ [1]ग्रहिकस्तु पिशाचकी। [2]पिशाचाविष्टनामनी ॥ श्लेष्मलः—कफी। श्लेष्मरोगिणो नामानि ॥ न्युब्जो—रुजा। [3]रुजा रोगेण भुग्ने न्युब्जशब्दः स्यात्। 'गूनिवांडु'॥ वृद्धनाभौ [4]तुन्दिलतुन्दिभौ। रोगेण प्रवृद्धनाभेर्नामनी[5]। 'वेक्किनबोड्डुवांडु[6]'। तद्व्युत्पत्तिद्वारा तुन्दिः रोगाभिवृद्धनाभिः ॥ ६० ॥

---

[1] ग्रहिलः A_1. [2] पिशाचेनाभिहतस्य A_1. [3] भुग्ननाम A_1. [4] तुण्डिलतुण्डिभौ B_3. [5] °नाभिकस्य° B_3. [6] B_3 omits.

किलासी सिध्मलोऽन्धोऽदृङ्मूर्च्छाले मूर्तमूर्च्छितौ ॥ ६१ ॥
शुक्रं तेजोरेतसी च बीजवीर्येन्द्रियाणि च।

(वि.) किलासीति—किलासाख्यरोगोऽस्यास्तीति किलासी। सिध्ममस्यास्तीति सिध्मलः। [1]पूर्वोक्तसिध्मरोगवतो नामनी ॥ अन्धयति दृष्टिमुपसंहरतीति [2]अन्धः। 'अन्ध दृष्ट्युपघाते'। न विद्यते दृक् दृष्टिरस्य अदृक्। अन्धस्य[3] नामनी ॥ मूर्च्छास्यास्तीति मूर्च्छालः। मूर्च्छति[4] स्म मूर्तः। मूर्च्छास्य संजाता मूर्च्छितः। मूर्च्छारोगवतो नामानि ॥ स्त्रीसंदर्शनादिना शोकति स्रवतीति शुक्रम्। 'शुक गतौ'। तेजयति स्रवणानन्तरं देहं तनूकरोति तेजः। 'तिज निशातने'। रीयते[5] भगादाविति रेतः। 'रीङ् स्रवणे'। वीयते क्षिप्यते योन्यादाविति [6]बीजम्। 'वी गत्यादौ'। अत्र असनं क्षेपणम्। बीजति रोहति पुरुषोऽनेनेति वा। 'बीज रोहणे'। वीरेऽक्लीबे साधु वीर्यम। इन्द्रस्य [7]पुरुषस्येदम् इन्द्रियम्। रेतसो नामानि ॥ ६१ ॥

---

[1] कर्णादौ चित्रत्वग्गतरोगिणः W_2. [2] अन्ध्यते विकलीक्रियत इत्यन्धम्, चक्षुः, तद्योगाद् अन्धः F_2, Pt_2. [3] दृष्टिरहितस्य W_2. [4] W_2 adds मोहं प्राप्नोति.

[5] रिणाति स्रवति, ‘ री गतौ ’ Pt_2. [6] विशेषेण जायते, ‘ जनी प्रादुर्भावे ’ F_2, Pt_2. [7] आत्मनः F_2, Pt_2.

(पा.) किलासी सिध्मलः। सिहुल्लिकारोगिणो नामनी। ‘[1]शिव्वं बद्दिवांडु’। अर्शआदित्वात् (५. २. १२७) किलाससिध्मशब्दौ धर्मिण्यपि स्याताम्।

‘सुखं दुःखं मलं छिद्रं किलासं सिध्ममर्मरौ।
रभसः पलितं श्वित्रमेतेऽपि त्रिषु धर्मिणि ॥’

इति वैजयन्ती (पृ. २१३, श्लो. १४४)। अन्धोऽदृक्। दृष्टिरहितस्य[2] नामनी। अनुक्तम्—जनुषान्धः स्वजात्यान्धः। जात्या [3]अन्धः जनुषान्धः स्यात्। ‘काणः स्यादेकलोचनः’। एकदृक् काणः स्यात्। मूर्च्छाले—मूर्च्छितौ। मूर्च्छावतो नामानि ॥ शुक्लं – इन्द्रियाणि च। अन्त्यधातुनामानि ॥ ६१ ॥

[1] B_3 omits. [2] अन्धकनाभ A_1. [3] अन्धकः A_1.

मायुः पित्तं कफः श्लेष्मा स्त्रियां तु त्वगसृग्धरा ॥ ६२ ॥
पिशितं तरसं मांसं पललं क्रव्यमामिषम्।

(वि.) मायुरिति—मिनोति शिरोभ्रमणेन भुवि [1]क्षेपयतीति मायुः। ‘डुमिञ् प्रक्षेपणे’। पुमानयम्। पतति स्रंसते द्रवत्वात् पित्तम्। ‘पत्ऌ गतौ’। पित्तनामनी ॥ के शिरसि फलति [3]निक्षिप्यते कफः। ‘फल [4]निष्पत्तौ’। [5]श्लिष्यते हृदयादौ श्लेष्म। ‘श्लिष आलिङ्गने’। श्लेष्मणो नामानि ॥ त्वचति मांसं [6]वेष्टयतीति त्वक्। ‘त्वच संवरणे’। असृजं रक्तं धारयतीति [7]असृग्धरा। ‘धृञ् धारणे’। त्वचो नामनी ॥ पिंशति [8]शरीरावयवो भवतीति पिशितम्। ‘पिश अवयवे’। तरन्ति कार्श्यमनेनेति तरसम्[9]। मन्यते [10]पुष्टिकृदिदमिति मांसम्। ‘मन ज्ञाने’। पाल्यते देहमनेनेति पललम्। ‘पाल रक्षणे’। क्लव्यतेऽस्मादिति क्रव्यम्। ‘क्लव भये’। क्रूयते ताडनादिना निर्गच्छतीति वा क्रव्यम्। ‘क्रुङ् गतौ’। आमिष्यते ताडनादिना ईषद् आमिषम्[11]। ‘मिष स्पर्धायाम्’। मांसनामानि ॥ ६२ ॥

[1] क्षिपति K_6; K_3 omits four lines. [2] ‘पित्तमुपेल्लु’ Pt_2. [3] निष्पद्यते W_2. [4] ‘ञिफला विशरणे’ K_6. [5] श्लिष्यति कण्ठं W_2. [6] आ (W_2) वृणोति K_3, K_6. [7] वृणोतीति असृग्वरा F_2, Pt_2. [8] अवयव(त्ता W_2) त्वात् K_5. [9] I, W_2, Pt_2 add ‘तॄ प्लवनतरणयोः’. [10] बलकरमिति F_2, Pt_2. [11] अमति रोगयति, ‘अम रोगे’ F_2, Pt_2.

(पा.) मायुः पित्तम्। पित्तनाम ॥ कफः श्लेष्मा। [1]श्लेष्मणो नाम ॥ स्त्रियां—असृग्धरा। त्वचो नामनी। स्त्रियामिति विशेषविधिर्मायवादिषु[2] स्त्रीत्वबाधनार्थः। तथा चोक्तम्—'[3]स्त्रियां मायुर्नरि श्लेष्मा बलासः खेटकः कफः' इति। अथवा त्वक्छब्दस्य प्रकृत्यन्तरबोधनार्थः। 'त्वदवेष्टितमस्थिपञ्जरं यदि कायं समुपैषि योषिताम्'। इति [4]त्वद् दान्तः। पिशितं—आमिषम्। मांसनामानि ॥ ६२ ॥

---

[1] B_3 omits.　[2] मायोः B_3.　[3] पित्तमिति वैजयन्त्याम्। 'पित्तं मायुर्नरि श्लेष्मा बलासः खेटकः कफः' इति मुद्रितग्रन्थे (पृ. १८३).　[4] B_3 adds त्वचशब्दो दान्तः.

उत्तप्तं शुष्कमांसं स्यात् तद्वल्लूरं त्रिलिङ्गकम् ॥ ६३ ॥
रुधिरेऽसृग्लोहितास्ररक्तक्षतजशोणितम्।

(वि.) उत्तप्तमिति—[1]उत्तप्यते शोष्यत आतपेनेति उत्तप्तम्। 'तप संतापे'। शुष्यते शुष्कम्। शुष्कं च तद् मांसं च शुष्कमांसम्। 'शुष शोषणे'। वल्यते शोषणार्थमिति वल्लूरम्। 'वल संवरणे'। बलं लुनातीति वा। 'लूञ् छेदने'। ववयोरभेदः। लवणादिना पुनः पुनः लिप्तशुष्कमांसनामानि[2] ॥ स्रोतांसि[3] रुणद्धीति रुधिरम्। 'रुधिर् आवरणे'। अस्यते त्वग्भेदेनेति असृक्। 'असु क्षेपणे'। न [4]सृजति वा। 'सृज विसर्गे'। लोहितवर्णत्वात् लोहितम्। [5]असति त्वग्भेदे[6] निर्गच्छति अस्रम्। 'अस गतिदीप्त्यादानेषु'। रज्यत इति रक्तम्। 'रञ्ज रागे'। क्षतात् घातात् जायते क्षतजम्। शोणतीति शोणितम्[7]। 'शोणृ वर्णगत्योः। रक्तनामानि ॥ ६३ ॥

---

[1] ऊर्ध्वं तप्यते अग्निना आतपेन वा Pt_2; तदेवोत्तप्तं वल्लूरमुच्यते I, K_6, W_2.　[2] 'उप्पुंगण्डलु' K_5.　[3] रुध्यते त्वचा K_2, F_2, Pt_2.　[4] सृज्यते K_5, K_6.　[5] असते D_2, K_2, K_6.　[6] K_5, K_6 add सति.　[7] शोणितवर्णत्वात् F_2, Pt_2.

(पा.) उत्तप्तं—मांसं स्यात्। शुष्कक्रव्यमुत्तप्तं स्यात् तन्नपुंसकमेव। [1]वल्लूरं [2]त्रिलिङ्गकम्। 'वल्लूरामहरदहो भिल्ले धावति शशो यदा क्षायः (?)' इति मल्लूरेति वा ॥ रुधिरे—शोणितम्। रक्तनामानि ॥ अस्र आस्र इत्युभयरूपं तन्त्रोपात्तम्। सकृदुच्चारितं बहूपकारकं तन्त्रम्[3]। 'अस्र आस्रश्च पुंलिङ्गौ क्लेशे क्ली रुधिरेऽश्रुणि'। इति वैजयन्ती (पृ. २३०, श्लो. ७) ॥ ६३ ॥

---

[1] A_1 adds इत्येतत्.　[2] तत् शुष्कमांसं वल्लूरं स्यात्, तच्च त्रिलिङ्गकं भवति B_3.
[3] 'यत् सकृत्कृतं बहूनामुपकरोति तत् तन्त्रमित्युच्यते। तथा बहूनां ब्राह्मणानां मध्ये कृतः प्रदीपः' (शाबरभाष्यम् ११. १. १).

वुक्काग्रमांसं हृदयं हृद् मेदस्तु वपा वसा ॥ ६४ ॥
पश्चाद्ग्रीवासिरा मन्या नाडी तु धमनिः सिरा ।

(वि.) बुक्केति—बुक्क्यते स्वादुरस इति बुक्का । 'बुक्क भषणे'। वृक्केति पाठे वृक्यते स्वादुतरमिति शब्द्यते वृक्का । 'वृक[1] आदाने'। नकारान्तः । आकारान्त[2] इति केचित् । अग्रं च तन्मांसं च अग्रमांसम् । श्रेष्ठमांसनामनी ॥ ह्रियते हृदयम् । हृच्च । 'हृञ् हरणे'। पद्माकारजीवाधारनामनी[3] ॥ [4]मेद्यतीति मेदः । 'ञिमिदा स्नेहने'। सान्तोऽयम् । पूर्वोक्तहृदयाच्छादकस्य नाम ॥ उप्यत इति वपा । 'डुवप् बीजतन्तुसंताने'। नाभिसमीपदेशस्थितमांसस्नेहनाम ॥ वासयति मांसं स्नेहयति वसा । 'वस निवासे'। 'वस स्नेहमोहच्छेदापहरणेषु' इति वा धातुः । सर्वदेहस्थितमांसस्नेहनाम ॥ मन्यत इति मन्या । 'मन ज्ञाने'। अक्षरसाम्यात् निर्वचनम् । ग्रीवायाः पश्चिमभागस्थितसिराया नाम ॥ अन्तःसुषिरत्वात् नडाख्यतृणवत् तिष्ठतीति नाडी । [5]अग्निबोधनधमनीसाम्यात् धमनिः । धमनी वा । सिनोति कायं बध्नातीति सिरा । 'षिञ् बन्धने'। सरन्ध्रसिरानामानि ॥ ६४ ॥

---

[1] 'वृक्क भाषणे' K_5, K_6.
[2] अकारान्त: K_2, K_3; D_2, K_5 add वृकेति केचित् पठन्ति.
[3] 'गुन्दिकायपेरु' K_3.
[4] मेद्यते K_6; मिद्यते Pt_2.
[5] बोधक° K_5, K_6.

(पा.) वृक्काग्रमांसं—हृत् । जुक्काग्रमांसमिति पाठान्तरम् । वृक्का नान्तः । श्रेष्ठमांसनामनी । 'अग्रमांसमु वृक्युलु'। [1]मेदस्तु—वसा । वसानामानि । अनुक्तम्—द्वावस्थिस्नेहमज्जानौ[2] । मज्जनामनी ॥ पश्चाद्ग्रीवासिरा[3] मन्या । ग्रीवायाः पश्चाद्भागे वर्तमाना [3]सिरा मन्या स्यात् । 'पेडतलनरमु[4]' ॥ नाडी—शिरा । वंशधमन्याकारसिरानामानि । 'बोलुनरालु'। सिरेत्यपि स्यात् । 'शिञो[5] बहुलमन्यत्रापीति शिरा । "षिञ् बन्धने" इत्यतः सिरा वा' इति सुभूतिटीका ॥ ६४ ॥

---

[1] B_3 adds हृदयं हृत्—हृदयनामनी.
[2] मज्जासौ, मज्जानामानि A_1.
[3] शिरा A_1.
[4] B_3 omits.
[5] शीङो भद्रादय इति A_1; उ. २. २५.

तिलकं क्लोम मस्तिष्कं गोर्दं किट्टं मलोऽस्त्रियाम् ॥ ६५ ॥
अन्त्रं पूरीतद् गुल्मस्तु प्लीहा पुंस्यथ वस्नसा ।
स्नायुः स्त्रियां कालखण्डयकृती तु समे इमे ॥ ६६ ॥

(वि.) तिलकमिति—[1]तिलतीति तिलकम्। 'तिल स्नेहने'। क्लाम्यति [2]म्लायतीति क्लोम। 'क्लमु ग्लाने'। नान्तोऽयम्। उदरे दक्षिणभागस्थितलोहितमांसखण्डनामनी॥ [3]मस्तमिष्यतीति[4] मस्तिष्कम्। 'इष गतौ'। शिरःकपालेन गुर्द्यते गोर्दम्। 'गुर्द परिवेष्टने'। मस्तकस्थमज्जानामनी॥ केटति निर्गच्छतीति किट्टम्। 'किट गतौ'। [5]मलते धारयति देहं मलः। 'मल मल्ल धारणे'। [6]तदुक्तम्—

'वसा शुक्रमसृङ्मज्जा मूत्रविट् घ्राणकर्णविट्।
श्लेष्माश्रुदूषिकास्वेदा द्वादशैते मला नृणाम्॥'

इति। एते वसादिसर्वमलानां सामान्यनामनी॥ अम्यते संभज्यते भुक्तान्नादिकमनेनेति अन्त्रम्। 'अम गत्यादिषु'। आन्त्रमिति वा पाठः। पुरीं देहं तनोतीति पुरीतत्[7]। 'तनु विस्तारे'। आन्त्रनामनी॥ गुड्यते [8]प्रकोपनाद् [9]रक्ष्यत इति गुल्मः। 'गुड रक्षायाम्'। प्लेहते कदाचिद् उद्रिक्तः प्रदेशान्तरं गच्छतीति प्लीहा। नान्तोऽयम्। 'प्लिह गतौ'। हृदि [10]वामभागस्थितपीतवर्णमांसदलनामनी॥ वस्ते छादयति देहं वस्नसा। 'वस आच्छादने'। हस्ताद्यङ्गं स्नायति वेष्टयतीति [11]स्नायुः। 'ष्णै वेष्टने'। त्वगन्तरस्थतन्त्वाभानां नामनी॥ [12]कालवर्णं च तन्मांसखण्डं च कालखण्डम्। क्लोम्ना द्वितीयमात्मानं करोतीति यकृत्। क्लोम्ना सह यौतीति वा। 'यु मिश्रणे'। पूर्वोक्तक्लोमाधःस्थितमांसदलनामनी॥ ६५–६॥

---

[1] D_2, K_5, K_6 add वसासङ्गित्वात्. [2] ग्लायति I. [3] मस्तकं J_2, K_6. [4] D_2, K_5, K_6 add प्राप्नोति. [5] मल्यते K_6. [6] तथा चोक्तानि मलानि D_2, I, K_3, K_6, W_2. [7] अन्नरसादिना पूर्यत इति, 'पूरी आप्यायने' D_2, I, K_5. [8] प्रकोपनाद्यैः K_5, K_6. [9] रक्षणे Pt_2. [10] °स्थ° W_2. [11] स्नाति सदार्द्रीभवति, 'ष्णा शौचे' Pt_2. [12] खण्डं मांसखण्डं Pt_2.

(पा.) तिलकं क्लोम। नान्तोऽयम्[1]। क्लोमनामनी। 'वलमैपार्श्वमंदुण्डे . . . गु'[2]॥ मस्तिष्कं गोर्दम्। मस्तकस्थमज्जनाम[3]। 'तलमेदड्डु'॥ किट्टं मलोऽस्त्रियाम्। मलसामान्यनाम। तथा च—(म. स्मृ. ५. १३५)

'वसा शुक्लमसृङ्मज्जा मूत्रविट् घ्राणकर्णविट्।
श्लेष्माश्रुदूषिकाः स्वेदो द्वादशैते मला नृणाम्॥'

इति केचित्॥ अन्त्रं पुरीतत्। [4]अन्त्रनामनी। 'पेगुलु'॥ गुल्मस्तु प्लीहा। नान्तोऽसौ पुंसि। वामभागस्थमांसगोलनामनी॥ पुंसीति केषांचित् पुरीतदादिविशेषणम्। तेन पुरीततः, गुल्माः, प्लीहानः इत्यादि॥ अथ वस्नसा—स्त्रियाम्। 'नखारुस्तु स्नसा स्नावः [5]स्नायुना सन्धिबन्धनम्' इति स्नायुशब्दः स्त्रीनपुंसक इति केचित्। त्वगन्तर-

स्थिततन्तुनिभसिरानामनी। 'नरमुल'। कालखण्ड—समे इमे। [6]क्लोमा[7]धःस्थितमांसखण्डविशेषनामनी। 'काळेजमु'। 'कालेजं कालखण्डकम्' इति रभसकोशः ॥ ६५–६ ॥

---

[1] असौ A_1.
[2] B_3 omits.
[3] मज्जा B_3.
[4] पुरीतन्नाम B_3.
[5] स्नायुर्ना, स्नायुशब्दः पुंलिङ्ग इति केचित् B_3.
[6] A_1 adds बन्धुजीवकनिभ°.
[7] क्लोमगः A_1.

सृणिका स्यन्दिनी लाला दूषिका नेत्रयोर्मलम्।
मूत्रं प्रस्राव उच्चारावस्करौ शमलं शकृत् ॥ ६७ ॥
गूथं पुरीषं वर्चस्कमस्त्री विष्ठाविशौ स्त्रियौ।

(वि.) सृणिकेति—सरति स्रवतीति सृणिका। 'सृ गतौ'। स्यन्दत इति स्यन्दिनी। 'स्यन्दू प्रस्रवणे'। विरुद्धलक्षणया ललति[1] लाला। 'लल विलासे'। सृक्किण्योः स्रवज्जलनामानि ॥ नेत्रे दूषयतीति दूषिका[2]। नेत्रमलनाम ॥ मूत्रयतीति मूत्रम्। 'मूत्र प्रस्रवणे'। प्रस्रवतीति प्रस्रावः। 'स्रु स्रवणे'। मूत्रनामनी ॥ उच्चार्यते गुदात् त्यज्यत इति उच्चारः। 'चर गतौ'। [3]अव अधः क्रियत इति अवस्करः। 'डुकृञ् करणे'। शाम्यति किंचिद्गते सति स्वयमेव शमलम्। 'शमु [4]उपरमे'। विरेचितुमनेन शक्यत[5] इति शकृत्। 'शक्लृ शक्तौ'। पिपर्त्यान्त्रं पूरयति पुरीषम्। 'पॄ पालनपूरणयोः'। अनुदिनं गूयत उत्सृज्यत इति गूथम्। 'गु पुरीषोत्सर्गे'। वर्च एव वर्चस्कम्। वितिष्ठते नाभेरध इति विष्ठा। 'ष्ठा गतिनिवृत्तौ'। नाभेरधोभागं विशतीति विट्[6]। 'विश प्रवेशने'। विष्ठानामानि ॥ ६७ ॥

---

[1] I, K_5, K_6 add विलसति.
[2] F_2, Pt_2 add 'दुष वैकृत्ये'.
[3] K_6 adds हेयत्वात्.
[4] उपशमने K_5, K_6.
[5] शक्नोति F_2, Pt_2.
[6] वेवेष्टि 'विष्लृ व्याप्तौ' J_2.

(पा.) सृणिका—लाला। [1]दन्तान्तर्गतोदकनामानि। 'चोल्लु'। शृणिका स्यन्दिनीति पाठान्तरम्।

'नानाजनशृणिकार्द्रे वेश्यामुखपतद्ग्रहे।
अधरग्रहसंप्रीतिः सुधियः कस्य जायते ॥'

इति प्रयोगात् ॥ दूषिका—मलम्। चक्षुषोर्मलं दूषिका स्यात्।

'दूषीकापटलनिरुद्धलोचनान्ता
दुर्गन्धा बहलमलोपलिप्तगात्राः।'

इति सोमजातप्रयोगात् दीर्घेकारः।

'[2]कः [3]कीदृगत्रिमुनिलोचनदूषिकायां
पीयूषदीधितिरिति प्रथितोऽनुरागः ॥'

इति अनर्घराघवप्रयोगात् (२. ८३) ह्रस्वेकारश्च[4]। 'नासामलं तु सिंहाणम्[5]'। नासिकाया मलं[6] सिंहाणं स्यात्। 'चिविडि'। 'पिञ्जूषः कर्णयोर्मलम्'। श्रोत्रमलं पिञ्जूषः स्यात्। 'चेविगुलिवि'। मूत्रं प्रस्रावः। आत्मजलनामनी। 'एकाङ्गुलं कायजलम्'। एते द्वे च ॥ उच्चारावस्करौ—विष्ठाविशौ स्त्रियौ[7]। विष्ठानामानि ॥ शकृत् तवर्गप्रथमान्तः[8]। गूथं तवर्गद्वितीयान्तम्। पुरीषं मूर्धन्यान्तम्। विट्शब्दो मूर्धन्यान्तश्च[9] भवति। 'वेवेष्टीति विट् विशतीति वा' इति सुभूतिटीका। अनुक्तम्—'चिरिका तूषिता[10] विष्ठा'। [11]चिरंतनविट् चिरिका स्यात् ॥ ६७ ॥

---

[1] वक्त्रद्रव° B_3.　[2] आः A_1.　[3] अत्र B_3.　[4] A_1 adds स्यात्.
[5] सिंघाणः A_1, B_3; शिङ्घाण इति मुद्रितवैजयन्त्याम् (पृ. १८०).　[6] नासिकामलं B_3.
[7] स्त्रियाम् A_1.　[8] प्रथमान्तम् B_3.　[9] B_3 adds तालव्यान्तश्च.　[10] तुषिता A_1.
[11] अतिचिरंतन° A_1.

स्यात्कर्परः कपालोऽस्त्री कीकसं कुल्यमस्थि च ॥ ६८ ॥
स्याच्छरीरास्थ्नि कङ्कालः पृष्ठास्थ्नि तु कशेरुका ।

(वि.) स्यादिति—भारधारणाय[1] कल्पते[2] समर्थो भवतीति कर्परः। 'कृपू सामर्थ्ये'। [3]कं शिरः पालयतीति कपालम्। 'पाल रक्षणे'। शिरोगतास्थिशकलनामनी ॥ की इति ध्वनिं जनयन् कसति चलतीति कीकसम्। 'कस गतौ'। कोलति संस्त्यायतीति कुल्यम्। 'कुल संस्त्याने'। कुले शरीरे साधु वा। मांसभक्षणसमये अस्यतेऽपास्यत[4] इत्यस्थि। 'असु क्षेपणे'। अस्थिमात्रनामानि ॥ कं कुत्सितं कालयतीति कङ्कालः[5]। 'कल किल क्षेपे'। शरीरास्थिनिकुरुम्बनाम ॥ कश्यते भारस्थापनेन क्लिश्यते कशेरुका[6]। 'कश[7] गतिशासनयोः'। पृष्ठास्थिनाम ॥ ६८ ॥

---

[1] धारणे I, K_6, W_2.　[2] कर्पते D_2, K_5, W_2.　[3] I adds काठिन्यात्.
[4] त्यज्यते F_2, Pt_2.　[5] कं जलं स्वाभ्यन्तरेण कालयति प्रेरयति F_2, Pt_2.　[6] को वायुः शेतेऽत्र F_2, Pt_2.　[7] कश कस D_2, K_5, K_6.

(पा.) स्यात् कर्परः—अस्त्री। कपालास्थिनामनी। 'चिप्पयमुक'। 'कर्परः स्यात् कपाले च शस्त्रभेदकटाहयोः (श्लो. १३७), 'खर्परस्तस्करे धूर्ते भिक्षापात्रकपालयोः' (श्लो. १३८) इति विश्वप्रकाशिकापाठात् (पृ. १३६) कर्परखर्परशब्दौ स्याताम्।

कीकसं—अस्थि च। शल्यनामनी॥ शरीरास्थि तु कङ्कालः। कायस्यास्थि कङ्कालः स्यात्। शरीरास्थि त्विति प्रथमान्तनिर्देशः साहचर्यार्थः। तेन—'कङ्कालोऽस्त्री तनोरस्थि करङ्कोऽप्यस्थिपञ्जरम्' इति वैजयन्ती (पृ. १८२, श्लो. ११४)॥ पृष्ठास्थि—कशेरुका। तनोश्चरमभागे स्थितमस्थि कशेरुका स्यात्। 'वेन्नेमुक'। अस्याप्युन्नेयः पूर्वन्यायः। 'पृष्ठस्यास्थि कशेर्वना' इति वैजयन्ती (पृ. १८२, श्लो. ११५)॥ ६८॥

शिरोऽस्थनि करोटिः स्त्री पार्श्वास्थनि तु पर्शुका॥ ६९॥
अङ्गं प्रतीकोऽवयवोऽपघनोऽथ कलेबरम्।
गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः॥ ७०॥
कायो देहः क्लीबपुंसोः स्त्रियां मूर्तिस्तनुस्तनूः।

(वि.) शिरोऽस्थनीति—प्रवेशसमये के शिरसि नासादारुणा रुट्यते करोटिः। 'रुट प्रतिघाते'। कं वायुं रोटते वा। 'रुट दीप्तौ प्रतिघाते च'। शिरोऽस्थिनाम॥ स्पृश्यते शयनादिनेति पर्शुका। 'स्पृश संस्पर्शने'। पार्श्वास्थिनाम[1]॥ अङ्गति चलति अङ्गम्। 'अगि गतौ'। प्रत्येत्यन्योन्यं[2] प्रतीकः। 'इण् गतौ'। अवयौति [3]मिथो मिश्रीभवति अवयवः। 'यु मिश्रणे'। अपहन्यतेऽन्योन्यमिति[4] अपघनः। 'हन हिंसागत्योः'। हस्ताद्यवयवनामानि॥ आदानाद्युपयोगितया कले करे बरं वरं कलेबरम्। रलयोर्वबयोश्चाभेदः। कल्यते आद्रियत[5] इति वा। 'कल संख्याने'। गाते गच्छतीति[6] गात्रम्। 'गाङ् गतौ'। उप्यते प्राक्कर्मभिरिति वपुः। 'डुवप् बीजसंताने[7]'। उप्यते जनकेनेति वा। सान्तोऽयम्। संहन्यते हस्तादिना [8]संघट्यते संहननम्। 'हन हिंसागत्योः'। शीर्यते कालक्रमेणेति शरीरम्। 'शॄ हिंसायाम्'। मलानि वर्षतीति[9] वर्ष्म। 'वृषु सेचने'। नान्तोऽयम्। विशेषेणात्मना[10] गृह्यत इति विग्रहः। 'ग्रह उपादाने'। चीयतेऽवयवैरिति कायः। 'चिञ् चयने'। दिह्यतेऽन्नरसेनेति देहः। 'दिह उपचये'। मूर्च्छति समुच्छ्रितो[11] भवतीति मूर्तिः। 'मूर्च्छा मोहसमुच्छ्राययोः'। तन्यते [12]आहारेणेति तनुः। तनूश्च। 'तनु विस्तारे'। शरीरनामानि॥ ६९–७०॥

---

[1] 'जङ्घास्थनि नलं प्रोक्तं नलकं च द्वयोरुभौ' इत्यधिकः पाठः F_2, Pt_2. [2] F_2, Pt_2 add आभिमुख्येन. [3] अन्योन्यं K_5, K_6. [4] मिथः D_2, K_2, W_2. [5] D_2, K_5, K_6 add संसारिणा. [6] K_2, K_5 add अनेन. [7] D_2, K_6 add तन्तु°. [8] संबध्यते F_2, Pt_2. [9] वृष्यते Pt_2. [10] स्वकर्मवशात् परिगृह्यते D_2, K_5, K_6, W_2. [11] समुच्छ्रीयते K_2, K_5, K_6. [12] अन्नरसेन D_2, W_2.

(पा.) शिरोऽस्थनि—स्त्री। शिरसः शल्यं करोटिः स्यात्॥ पार्श्वास्थनि—पर्शुका। पक्षस्थितमस्थि पर्शुका स्यात्। 'वरियमुक[1]'॥ अङ्गं—अपघनः। शरीराद्यवयवानां नामानि। अङ्गापघनशब्दौ अवयविन्यपि स्याताम्। 'अङ्गं वपुर्वर्ष्म पुरं च पिण्डं क्षेत्रं च गात्रं[2] च घनश्च मूर्तिः' इति हलायुधः (अ. मा. २. ३५५)॥ अथ कलेबरं—तनूः। शरीरनामानि। गात्रशब्दोऽङ्गेऽपि[3] स्यात्। 'गात्राण्यङ्गानि चास्यांशाः प्रतीकापघनावपि[4]' इति वैजयन्ती (पृ. १७७, श्लो. ५५)॥ ६९–७०॥

---

[1] B_3 omits. [2] गात्रापघनौ A_1, B_3. [3] अवयवेऽपि B_3. [4] °घनाविति A_1.

पादाग्रे प्रपदं पादः पदङ्घ्रिश्चरणोऽस्त्रियाम्॥ ७१॥
तद्ग्रन्थी घुटिके गुल्फौ पुमान् पार्ष्णिस्तयोरधः।

(वि.) पादाग्र इति—पादस्याग्रं पादाग्रम्। पदस्य[1] प्रारंम्भः प्रपदम्। पादाग्रभागनामनी॥ पद्यते गच्छत्यनेनेति पादः। पच्च। 'पद गतौ'। अङ्घति [2]गच्छत्यनेन अङ्घ्रिः। 'अघि[3] गतौ'। चरत्यनेन चरणः। 'चर गतिभक्षणयोः'। पादनामानि॥ घोटते परिवर्तते [4]घुटिका। 'घुट परिवर्तने'। अभिघाताद् गुल्यते रक्ष्यत इति गुल्फः। 'गुड रक्षायाम्'। पादोपरिस्थितग्रन्थिनामनी॥ पृष्यते स्नेह्यते[5] नवनीतादिना पार्ष्णिः। 'पृषु [6]स्नेहने'। गुल्फयोरधोभागनाम॥ ७१॥

---

[1] पादप्रारम्भभागत्वात् K_2, K_6, W_2. [2] K_3, K_6 add वेगेन. [3] 'अघि लघि गत्याक्षेपे' K_5, K_6. [4] परितो वृत्तत्वात् D_2, K_5, K_6. [5] स्निह्यते K_6.
[6] 'पृषु सेचनहिंसाक्लेशनेषु' D_2.

(पा.) पादाग्रं प्रपदम्। अग्रपादनाम॥ पादः—चरणोऽस्त्रियाम्। पादनामानि॥ तद्ग्रन्थी—गुल्फौ। '[1]पदग्रन्थौ द्वयोर्गुल्फः' इति [2]द्विलिङ्गतायां रभसकोशः। पार्ष्ण्युपरिस्थितवृत्तपदग्रन्थिनामनी[3]॥ पुमान्—तयोरधः। पदग्रन्थ्योरधोभागः पार्ष्णिः स्यात्। स पुंलिङ्गः। 'मडुम[4]'। 'पार्ष्ण्यैव प्रोषितासुं [5]दनुसुतमवतात् कुर्वती पार्वतीव' इति प्रयोगात् स्त्रीलिङ्गोऽप्यस्ति॥ ७१॥

---

[1] चरण° A_1. [2] स्त्रीपुंलिङ्ग° A_1. [3] °पद्° B_3. [4] B_3 omits.
[5] दिति° B_3.

जङ्घा तु प्रसृता जानूरुपर्वाष्ठीवदस्त्रियाम्॥ ७२॥
सक्थि क्लीबे पुमानूरुस्तत्संधिः पुंसि वङ्क्षणः।

(वि.) जङ्घेति—जङ्घन्यते कशादिना [1]हन्यत इति जङ्घा[2]। 'हन हिंसागत्योः'। [3]प्रसरतीति प्रसृता। 'सृ गतौ'। गुल्फोपरि जानुपर्यन्तमास्थितस्य नामनी॥ जङ्घोरुसंधिभागे जायत इति जानु। 'जनी प्रादुर्भावे'। ऊर्वोः पर्व ऊरुपर्व। नान्तोऽयम्। स्थूलमस्थि विद्यतेऽत्रेति अष्ठीवत्। जङ्घोरुसंधिभागनामानि॥ सजते संगच्छत इति सक्थि। 'षञ्ज सङ्गे'। अयं क्लीबे वर्तते। ऊर्णूयते वस्त्रेणेति[4] ऊरुः। 'ऊर्णुञ् आच्छादने'। अयं पुमान्। ऊरुनामनी॥ वङ्क्ते उपवेशसमये किंचित्कुटिलमापद्यत इति वङ्क्षणः। 'वकि कौटिल्ये'। ऊरुसंधिभागनाम॥ ७२॥

[1] शस्यते D_2, K_6. [2] जायते, 'जनी प्रादुर्भावे' F_2, Pt_2. [3] K_6, W_2 add स्वयं. [4] वस्त्रादिना D_2, K_5, K_6.

(पा.) जङ्घा—प्रसृता। जङ्घानामनी। '[1]वट्टुकालु'। प्रसृतास्थाने जङ्घिनीशब्दं पठन्ति केचित्। जानूरु—अस्त्रियाम्। जङ्घोरुमध्यग्रन्थिनामानि। 'मोकालु[1]'। अत्रास्त्रियामिति विशेषविधिं केचिज्जानुशब्देन योजयन्ति। सक्थि—पुमानूरुः। [2]ऊरुनामनी॥ तत्संधिः—वङ्क्षणः। [2]ऊरुसंधिः वङ्क्षणः स्यात्। '[3]गज्जु'॥ ७२॥

[1] B_3 omits. [2] ऊर्वोः A_1. [3] 'ग्रज्जु' A_1.

गुदं त्वपानं पायुर्ना वस्तिर्नाभेरधो द्वयोः॥ ७३॥
कटो ना श्रोणिफलकं कटिः श्रोणिः ककुद्मती।

(वि.) गुदमिति—[1]गूयते पुरीषमुत्सृज्यतेऽनेनेति गुदम्। 'गु पुरीषोत्सर्गे'। अपानित्यधोवायुम् उत्सृजति[2] अपानम्। 'अन प्राणने'। पाति [3]मलोत्सर्जनेनेति पायुः। 'पा रक्षणे'। [4]पुरीषोत्सर्गस्थाननामानि॥ वसति [5]मूत्रादिकमस्मिन्निति वस्तिः। 'वस निवासे'। नाभेरधोभागनाम[6]॥ [7]कट्यते [8]आव्रियते वस्त्रादिनेति कटः[9]। 'कटे वर्षावरणयोः'। फलकाकृतिः श्रोणिः श्रोणिफलकम्[10]। श्रोणिफलकस्य नाम॥ कट्यते कटिः। कटी वा। [11]श्रोणति संगच्छते मेखलादिनेति श्रोणिः। 'श्रोणृ संघाते'। श्रोणी वा। ककुदिव [12]श्रोणिपार्श्वस्थस्थूलांशोऽस्या अस्तीति ककुद्मती। काञ्चीबन्धनस्थाननामानि॥ ७३॥

[1] गुवति . . . उत्सृजति F_2, Pt_2. [2] D_2, W add अनेन. [3] मलनिरोधपरिहरणेन J_2, K_5, K_6. [4] अपानद्वारनामानि W_2. [5] पक्वान्नादिकं D_2, K_5, K_6. [6] नाभेरधःस्थितमूत्रपुटकनाम W_2. [7] कटति आवृणोति W_2, Pt_2. [8] आर्द्रीक्रियते K_6. [9] K_5, K_6 add कटिश्च. [10] श्रोणिरेव फलकमिव W_2. [11] श्रोण्यते (संहन्यते W_2) आहन्यते K_5, K_6. [12] मांसलतया ककुदाकारत्वात् F_2, Pt_2.

(पा.) गुदं—पायुर्ना। मलद्वारनामानि॥ वस्तिः—द्वयोः। नाभेरधोभागो वस्तिः स्यात्। [1]मूत्राशयः। कटो ना—ककुद्मती। कटिनामानि। कटिश्रोणिफलकानि केषांचिद् भिन्नपर्यायाणि। गजगण्डकटी कटाविति[2] स्वयमेव [3]वक्ष्यति (३. ३. ३४)॥ ७३॥

[1] B_3 omits, but adds द्विलिङ्गकः.

[2] इति भेदः A_1.

[3] B_3 omits last two lines.

पश्चान्नितम्बः स्त्रीकट्याः क्लीबे तु जघनं पुरः॥ ७४॥
कूपकौ तु नितम्बस्थौ द्वयहीने कुकुन्दरे।

(वि.) पश्चादिति—सुरतकाले[1] नितरां ताम्यतीति नितम्बः। 'तमु ग्लानौ'। स्त्रीकट्याः बाह्यभागनाम॥ हन्यते ताड्यते पुरुषेण सुरतसमय इति जघनम्। 'हन हिंसागत्योः'। स्त्रीकट्याः पुरोभागनाम, न तु पुरुषस्य॥ कु ईषत् कुं नितम्बभूमिं दृणीत इति कुकुन्दरे। 'दॄ विदारणे'। द्विवचनमेतत्। [2]ईषत्कूपसदृशनितम्बस्थलनिम्ननाम॥ ७४॥

[1] संमर्देन F_2, Pt_2.

[2] श्वभ्र° K_5, K_6.

(पा.) पश्चात्—स्त्रीकट्याः। [1]स्त्रीकटीचरमभागः नितम्बः स्यात्। [2]स्त्रीकटिग्रहणं रूढिप्रदर्शनार्थम्। तेन 'त्यागेन सह [3]प्रथिमानमाजगाम नितम्बभागः' इति चन्द्रापीडवर्णने (काद. पृ. १५२) बाणप्रयोगः। क्लीबे—पुरः। स्त्रीकट्याः पुरोभागो जघनं स्यात्। कटिमात्रेऽपि[4] स्यात्। 'काञ्चीपदं कलत्रं जघनं श्रोणी[5] ककुद्मती ज्ञेया' इति हलायुधः (अ. मा. २. ३५७)॥ कूपकौ—कुकुन्दरे। नितम्बाश्रयौ कूपकौ [6]कुकुन्दरे स्याताम्। 'पिरुन्दुलमीदिवुन्नगुंटलु'। स नपुंसकः॥ ७४॥

[1] °कटि° B_3.

[2] स्त्रीग्रहणं B_3.

[3] 'प्रथितमानमाततान' इति मुद्रितग्रन्थे.

[4] कटिनामन्यपि A_1.

[5] श्रोणिः A_1.

[6] A_1 adds कुशब्दद्वयादि°.

स्त्रियां स्फिचौ कटिप्रोथावुपस्थो वक्ष्यमाणयोः॥ ७५॥
भगं योनिर्द्वयोः शिश्नो मेढ्रो मेहनशेफसी।

(वि.) स्त्रियामिति—स्फायेते वर्धेते स्फिचौ। 'स्फायी वृद्धौ'। कट्याः प्रोथौ मांसपिण्डौ कटिप्रोथौ[1]। [2]कटिस्थस्थूलांशनाम॥ उप समीपे शिश्नस्य[3] कदाचित्तिष्ठतीति

उपस्थः । 'ष्ठा गतिनिवृत्तौ'। वक्ष्यमाणयोः योनिमेहनशब्दयोः[4] सामान्यनाम ॥ भज्यते [5]पुरुषैरिति भगः। 'भज सेवायाम्'। यौति शिश्नेनेति योनिः। 'यु मिश्रणे'। स्त्रीगुह्यस्थाननामनी ॥ शिनोति वृश्चति[6] रेतसा भगमिति शिश्नः। 'शिञ् [7]निशाने'। निशानं संघर्षणम्। रेतसा मेहति भगं मेंढ्रः। मेहनं च। 'मिह सेचने'। कदाचित् भगे शेते शेफः[8]। 'शीङ् स्वप्ने'। सकारान्तनपुंसकलिङ्गोऽयम्। शेप इति वा पाठः। शिश्ननामानि ॥ ७५ ॥

[1] W_2 adds प्रोथते उद्भिद्यते प्रोथः. [2] श्रोणिककुन्नाम K_5. [3] K_5 adds यदा; W_2 adds भगस्य वा. [4] °शिश्नयोः W_2. [5] कामुकैः D_2, K_5, K_6. [6] वर्षति W_2. [7] निशातने K_5, K_6. [8] रेतसः स्रावेण शेते Pt_2.

(पा.) स्त्रियां—कटिप्रोथौ। कटिस्थलस्थूलांशनामनी । 'मुड्ढि'। स्फिजौ स्फिचौ संदिग्धचजकारान्तौ । उपस्थो वक्ष्यमाणयोः । [1]वक्ष्यमाणयोः (श्लो. ७६) [2]स्त्रीपुरुषव्यञ्जनयोरुपस्थशब्दः। भगं—द्वयोः। स्त्रीव्यञ्जननामनी ॥ शिश्नो—शेफसी। पुरुषव्यञ्जननामानि[3] ॥ ७५ ॥

[1] A_1 adds उपरि. [2] °पुंव्यञ्जन° A_1. [3] A_1 adds 'पोलिङ्गवाङ्गलं च कामलता'। एतानि च.

मुष्कोऽण्डकोशो वृषणः पृष्ठवंशाधरे त्रिकम् ॥ ७६ ॥
पिचण्डकुक्षी जठरोदरं तुन्दं स्तनौ कुचौ ।

(वि.) मुष्क इति—मुष्णाति गोपायति शुक्रमिति[1] मुष्कः। 'मुष स्तेये'। अण्डयोः कोशोऽण्डकोशः। अण्डकोशाविति वा पाठः। तदा अण्ड इति कोश इति द्वे नामनी। वर्षति रेत इति वृषणः। 'वृषु सेचने'। वृषणनामानि ॥ त्रयाणाम् ऊरुद्वयपृष्ठास्थ्नां समाहारः त्रिकम्। पृष्ठवंशाधोभागस्य साण्डद्वयशिश्नस्य वा नाम ॥ पचत्यन्नं स्वगताग्निनेति[2] पिचण्डः। 'डुपचष् पाके'। कुष्यते [3]बहिष्क्रियते मलमस्मादिति कुक्षिः। 'कुष निष्कर्षे'। जन्यते गर्भोऽस्मिन्निति जठरम्। 'जनी प्रादुर्भावे'। उदियर्ति[4] गर्भोऽस्मादिति[5] उदरम्। 'ऋ गतौ'। तुद्यतेऽजीर्णादिनेति तुन्दम्। 'तुद व्यथने'। [6]उदरनामानि ॥ स्तनति बाल आभ्यामिति [7]स्तनौ। 'स्तन शब्दे'। कुच्यते नखैः पुरुषेण[8] लिख्यत[9] इति कुचः। 'कुच संपर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु'। स्तननामनी ॥ ७६ ॥

[1] रेतः F_2, Pt_2. [2] D_2, K_3, K_5 add °द्वारेण. [3] निष्कृष्यते D_2, K_3, K_6. [4] W_2 adds वृद्धिं गच्छति. [5] गर्भाद् वृद्धिं गच्छतीति वा D_2, K_3, K_5. [6] कुक्षि°

D_2, W_2. [7] बालेन कुचपानकाले स्तन्यत इति स्तनौ K_3, K_5, K_6, W_2. [8] कामिना Pt_2. [9] विलिख्यते W_2.

(पा.) मुष्को—वृषणः। मुष्कनामानि। 'अण्डयोः कोशोऽण्डकोशः' इति सुभूतिटीकाव्युत्पत्त्या एकनाम। 'अस्त्रियां मुष्ककोशाण्डाः' इति पाठान्नामद्वयम्। अनुक्तम्—भगमध्यगुडो मणिः। [1]स्त्रीव्यञ्जनमध्यगोलो मणिः स्यात्। पृष्ठवंशाधरे त्रिकम्। कशेरुकायाश्चाधोभागः त्रिकं स्यात्। '[2]वेन्नेमुककिदुं गुद'॥ पिचण्डकुक्षी—तुन्दम्। कुक्षिनामानि॥ स्तनौ कुचौ। उरोजनामनी। 'उरोरुहौ वक्षसिजौ' इत्येते द्वे च॥७६॥

---

[1] °व्यञ्जनस्य A_1. [2] B_3 omits.

चूचुकं तु कुचाग्रं स्यान्न ना क्रोडं भुजान्तरम् ॥ ७७ ॥
उरो वत्सं च वक्षश्च पृष्ठं तु चरमं तनोः ।

(वि.) चूचुकमिति—चूचु इति कायति [1]स्तनपाने चूचुकम्। 'कै [2]शब्दे'। कुचयोरग्रं कुचाग्रम्। कुचाग्रनाम॥ क्रोडति घनीभवतीति क्रोडम्। स्त्रीनपुंसके। 'क्रोड घनत्वे'। भुजयोरन्तरं भुजान्तरम्। भुजमध्यनाम॥ ऊर्णूयते वस्त्रेणेति उरः। सान्तोऽयम्। 'ऊर्णुञ् आच्छादने'। वस्यते वस्त्रेण छाद्यते वत्सम्। 'वस आच्छादने'। सुरतकाले वक्ष्यते प्रतिहन्यते वक्षः। 'वक्ष[3] रोषे संघाते च'। सान्तोऽयम्। उरोनामानि॥ पृष्यते केशोदकैरिति पृष्ठम्। 'पृषु सेचने'। तनोः पश्चाद्भागनाम॥ ७७॥

---

[1] बालेन पीयमानं F_2, Pt_2; K_5 adds शब्दं करोति. [2] 'कै गै रै शब्दे' K_5.
[3] 'वक्ष प्रतिघाते' D_2, K_5, K_6.

(पा.) चूचुकं तु—स्यात्। स्तनमुखनाम। 'चूचुको ना कुचाननम्' इति रत्नकोशः। 'चनुमुक्कु[1]'। न ना—वक्षश्च। बाह्वोरन्तरनामानि। 'लोम्मु[1]'॥ पृष्ठं तु—तनोः। [2]देहस्य पश्चाद्भागः पृष्ठं स्यात्। 'लिम्पु[1]'॥ ७७॥

---

[1] B_3 omits. [2] तनोः B_3.

स्कन्धो भुजशिरोंऽसोऽस्त्री संधी तस्यैव जत्रुणी ॥ ७८ ॥
बाहुमूले उभे कक्षौ पार्श्वमस्त्री तयोरधः ।

(वि.) स्कन्ध इति—स्कन्द्यते भारेण शुष्यते [1]स्कन्धः। 'स्कन्दिर् गति-शोषणयोः'। भुजस्य शिरोऽग्रं भुजशिरः। अम्यते भारेण रुज्यते अंसः। 'अम रोगे'। बाहुशिरोनामानि ॥ [2]जायते बाहुरस्मादिति [3]जत्रु। 'जनी प्रादुर्भावे'। स्कन्धांसयोर्मध्यभागनाम ॥ बाह्वोर्मूले बाहुमूले। कष्येते स्वेदेन[1] कक्षौ। 'कष [5]हिंसायाम्'। बाहुमूलनाम ॥ [6]पर्शूनां समूहः पार्श्वम्। कक्षयोरधोभागनाम ॥ ७८ ॥

[1] कं शिरो दधातीति, 'डुधाञ् धारणपोषणयोः' F_2, Pt_2.
[2] K_5, K_6 add कर्णांसयोर्मध्ये.
[3] अंसकक्षयोः संधिरनेन जायते W_2.
[4] स्वेदजलादिना पच्यते (पीड्यते D_2) K_3, K_6; जलूकादिभिः K_5; यूकादिभिः W_2.
[5] गतिहिंसनयोः K_5.
[6] पर्शुकानां D_2, K_2.

(पा.) स्कन्धो—अंसोऽस्त्री। भुजमस्तकनामानि। '[1]मूपुलु'॥ संधी—जत्रुणी। अंसस्य [2]सन्धी [3]जत्रुणी स्याताम्। 'मेढकिंदि [1]अड्ढयेमुकलु'॥ बाहुमूले—कक्षौ। बाह्वोर्मूले द्वे कक्षौ स्याताम्। [4]स्त्रीलिङ्गकक्षाशब्दोऽप्यस्ति। 'स्कन्धस्याधः कक्षा लतिका श्रवणस्य पालिराख्याता' इति स्त्रीकाण्डे गोपालितः॥ पार्श्वमस्त्री तयोरधः। कक्षयोरधोभागः [5]पार्श्वं स्यात्। 'बरि'॥ ७८ ॥

[1] B_3 omits.
[2] संधिः A_1.
[3] जत्रुणि A_1.
[4] A_1 adds आदन्त°.
[5] पार्श्वश्च B_3.

मध्यमं चावलग्नं च मध्योऽस्त्री द्वौ परौ द्वयोः ॥ ७९ ॥
भुजबाहू प्रवेष्टो दोः स्यात् कपोणिस्तु कूर्परः।

(वि.) मध्यममिति—मध्ये भवं मध्यं मध्यमं च। अवलगति संनसति [1]कृशत्वाद् अवलग्नम्। 'लगे सङ्गे'। [2]शरीरमध्यप्रदेशनामानि ॥ परौ द्वौ भुजबाहुशब्दौ द्वयोः स्त्रीपुंलिङ्गयोर्वर्तेते। भुज्यतेऽन्नादिकमनेन भुजः। 'भुज पालनाभ्यवहारयोः'। बाहते [3]वस्तूपादानाय [4]प्रयत्नं करोतीति [5]बाहुः। 'बाहृ प्रयत्ने'। प्रवेष्टयति वस्त्रादिकं मध्ये प्रवेष्टः[6]। 'वेष्ट वेष्टने'। [7]दाम्यत्यनेनेति दोः। 'दमु उपशमे'। दोःशब्दः सकारान्तः पुंलिङ्गः। नपुंसकेऽप्यस्ति। कथं? 'दक्षिणं दोर्निशाचरः' इति कालिदासप्रयोगात्[8] (रघु. १५. २३)। बाहुनामानि ॥ कं [9]कर्म बाहुप्रसरणादिकं पुणति करोतीति कपोणिः। 'पुण कर्मणि शुभे'। कफोणिरिति वा पाठः। [10]कुरति हठादाकर्षणेन ध्वनति कूर्परः। 'कुर शब्दे'। बाहुमध्यग्रन्थिनामनी ॥ ७९ ॥

[1] K_5, K_6 add अति°.
[2] मध्यत्वात् मध्यमं, मध्यं च D_2, K_3.
[3] वस्त्रोपादानाय W_2.
[4] प्रयतते K_5.
[5] बाधत इति वा F_2, Pt_2.
[6] प्रवेष्टयतेऽनेन

Pt_2.　[7] D_2, K_5, K_6 add कर्मणा; दम्यतेऽनेन Pt_2.　[8] K_6 adds न स्त्रियां वर्तते.
[9] सुखं Pt_2.　[10] कूरति, 'कुर कूर शब्दे' K_6.

(पा.) मध्यमं—मध्योऽस्त्री। मध्यनामानि ॥ चकारौ अस्त्रीशब्दाकर्षणार्थौ। मध्यमं, मध्यमः। अवलग्नं, अवलग्नः। अतिकृशत्वादवलगतीत्यवलग्नम्। पृषोदरादित्वात् वलग्नं विलग्नमिति त्रैरूप्यं वदन्ति[1] ॥ द्वौ परौ—प्रवेष्टौ दोः। भुजनामानि ॥ द्वौ पराविति प्रत्यासन्नयोर्भुजबाह्वोरेव ग्रहणम्। भुजेन भुजया, बाहुना वाह्वा। [2]वाहशब्दोऽप्यस्ति। 'कल्लोललीलासुरवैरिबाहाः' इति [3]साहित्यकल्पवल्लीप्रयोगात्। दोःशब्दस्यान्त्यपाठौ[4]ऽसंकरार्थः। 'दोर्न स्त्री करपोणिर्ना हरणः करणः[5] प्लवः' इति वैजयन्ती (पृ. १७८, श्लो. ७१)। दोषौ दोषः। दोःषी दोंषि। 'दोष्णो बलान्मन्त्रबलं गरीयः' इति। 'पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्' इत्यादिना (६. १. ६३) दोषन्नादेशः। पृथगेको दोषाशब्दोऽप्यस्ति। 'दोर्दोषा च भुजो बाहुः' इति धनंजयः ॥ स्यात् कफोणिः—कूर्परः। कूर्परनामनी। 'मोचेय्य'। '[6]कफोणिकूर्परौ तुल्यौ कफणिश्चापि दृश्यते' इति रभसकोशद्वन्द्वनिर्देशात् पुंलिङ्गः। 'कफोणिः कूर्परः पुमान्' इति गोपालितनिघण्टोस्त्रिकाण्डनिर्देशात् स्त्रीलिङ्गः ॥ ७९ ॥

[1] A_1 adds वलग्नं वलग्नः, विलग्नं विलग्नः.　[2] A_1 adds पृथगेकः.　[3] साहिती A_1.　[4] °निपातः A_1.　[5] करपल्लवः A_1.　[6] कपोणिः A_1.

अस्योपरि प्रगण्डः स्यात् प्रकोष्ठस्तस्य चाप्यधः ॥ ८० ॥
मणिबन्धादाकनिष्ठं करस्य करभो बहिः।

(वि.) अस्येति—प्रगण्यते सुवृत्ततया[1] श्लाघ्यते प्रगण्डः। 'गण संख्याने'। कपोणेरुपरिभागनाम ॥ प्रकुष्यते प्रावरणाद् बहिः [2]निःसार्यते प्रकोष्ठः। 'कुष निष्कर्षे'। [3]प्रगण्डाधोभागनाम ॥ करे मुष्टिकृते[4] भातीति[5] करभः। 'भा दीप्तौ'। मणिबन्धो हस्तग्रन्थिः। तस्मादारभ्य [6]आकनिष्ठं स्थितस्य करबहिःप्रदेशस्य नाम ॥ ८० ॥

[1] सुव्यक्ततया K_5, K_6.　[2] प्रकृष्यते K_6, Pt_2.　[3] कूर्पर° W_2.　[4] मुष्टीकृते W_2.　[5] विभासते, 'भासृ दीप्तौ' K_6.　[6] सर्वाङ्गुलिसहितस्य बाह्याग्रभागनाम W_2.

(पा.) अस्योपरि—स्यात्। कफणेरुपरिभागः प्रगण्डः स्यात् ॥ प्रकोष्ठः—चाप्यधः। [1]कफोणेरधोभागः प्रकोष्ठः स्यात् ॥ मणिबन्धात्—करभो बहिः। मणिबन्ध[2] इति कङ्कणबन्धस्थानम्। तस्मादारभ्य कनिष्ठाङ्गुलिपर्यन्तं करस्य बहिर्भागः करभः स्यात्।

'क्व प्रस्थितासि करभोरु घने निशीथे
प्राणेश्वरो[3] वसति यत्र [4]मनःप्रियो मे ।'

इत्यमरुकः[5] ॥ (अ. श. श्लो. ७१) ॥ ८० ॥

[1] कपोणेः A_1. [2] मणिबन्धात् कंकणबन्धस्थानात् B_3. [3] प्राणाधिकः B_3. [4] जनः B_3. [5] इत्यमरुकम् A_1.

पञ्चशाखः शयः पाणिस्तर्जनी स्यात् प्रदेशिनी ॥ ८१ ॥
अङ्गुल्यः करशाखाः स्युः पुंस्यङ्गुष्ठः प्रदेशिनी ।
मध्यमानामिका चापि कनिष्ठा चेति ताः क्रमात् ॥ ८२ ॥

(वि.) पञ्चशाख इति—[1]पञ्च शाखा[2] इवाङ्गुल्योऽस्य सन्तीति पञ्चशाखः। स्वकीयं[3] [4]धनं शेते तिष्ठत्यत्रेति शयः । 'शीङ् स्वप्ने' । पणति व्यवहरत्यनेनेति पाणिः । 'पण व्यवहारे स्तुतौ च'। मणिबन्धादारभ्य सर्वाङ्गुलिसहितस्य बाह्याग्रभागस्य नामानि ॥ तर्जयत्यनया पुत्रादिकमिति तर्जनी । 'तर्ज [5]भर्त्सने' । प्रदिशति चोरादिकं निर्दिशत्यनया प्रदेशिनी । 'दिश अतिसर्जने' । अङ्गुष्ठसमीपाङ्गुलेर्नाम ॥ स्वयमङ्गितया अन्यमङ्गं लाति स्वीकरोतीति अङ्गुलिः[6] । अङ्गुलीत्यप्यस्ति । 'ला आदाने' । करस्य शाखा इव तिष्ठन्तीति करशाखाः । अङ्गुलिनामनी ॥ अङ्गौ अङ्गे तिष्ठतीत्यङ्गुष्ठः । प्रदिशति चोरादिकं प्रदेशिनी । [7]मध्ये भवा मध्यमा । नास्ति प्रसिद्धनामास्या अनामिका । अतिशयेन अल्पा कनिष्ठा[8] । एतानि स्थूलाङ्गुलिमारभ्य यथाक्रममङ्गुलीनां [9]प्रत्येकनामानि ॥ ८१–२ ॥

[1] W_2 omits 3 lines. [2] अङ्गुलीरूपा F_2, Pt_2. [3] स्वं K_5. [4] वस्तु D_2, K_3, K_6. [5] 'तर्ज भर्ज संतर्जने' F_2, Pt_2. [6] अङ्गति अन्योन्यमित्यङ्गुलिः 'अगि गतौ' F_2, Pt_2. [7] मध्यम (स्थ K_5) त्वात् D_2, K_2, K_6. [8] इतराभ्योऽल्पत्वात् कनिष्ठिका D_2, K_6. [9] प्रत्येकं D_2, W_2.

(पा.) पञ्चशाखः—पाणिः । पाणिनामानि ॥ तर्जनी—प्रदेशिनी । तर्जनीनामनी । '[1]जुट्टुलप्रेलु' ॥ अनुक्तम्—समानावङ्गुलाङ्गुष्ठौ । अङ्गुष्ठनामनी । 'बोट्टनप्रेलु[1]' । अङ्गुल्यः करशाखाः स्युः । अङ्गुलिनामनी ॥ पुंस्यङ्गुष्ठः—ताः क्रमात् । [2]ता अङ्गुल्यः क्रमादङ्गुष्ठादिसंज्ञाः स्युः[3] ॥ ८१–२ ॥

[1] B_3 omits. [2] अङ्गुष्ठादयोऽङ्गुलिक्रमसंज्ञाः A_1. [3] A_1 adds पादशब्दपूर्वाश्चेत् पादाङ्गुलिसंज्ञाः स्युः.

पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियाम् ।
प्रादेशतालगोकर्णास्तर्जन्यादियुते तते ॥ ८३ ॥
अङ्गुष्ठे सकनिष्ठे स्याद् वितस्तिर्द्वादशाङ्गुलः ।

(वि.) पुनर्भव इति—[1]पुनःपुनर्भवतीति पुनर्भवः । 'भू सत्तायाम्' । करे रोहतीति करेरुहः । 'रुह बीजजन्मनि प्रादुर्भावे च' । न विद्यते खमाकाशोऽस्य[2] नखः । खमाकाशं[3] न राति न ददातीति नखरः[4] । 'रा दाने' । नखनामानि ॥ [5]प्रदिश्यते परिमीयते प्रादेशः । 'दिश अतिसर्जने' । तलति प्रतिष्ठते[6] परिमेयमस्मिन्निति तालः । 'तल प्रतिष्ठायाम्' । गोकर्णाकृतिरत्रास्तीति[7] गोकर्णः । एतानि क्रमेण तर्जन्यादियुतेऽङ्गुष्ठे वितते सति यावदन्तरं भवति तस्य नामानि ॥ वितस्यते[8] हस्तापेक्षया उपक्षीयत इति वितस्तिः । 'तसु उपक्षये' । कनिष्ठेऽङ्गुष्ठे तते सति यावदन्तरं भवति तस्य नाम ॥ द्वादशाङ्गुलयः प्रमाणमस्य द्वादशाङ्गुलः । द्वादशाङ्गुलो वा वितस्तिः । द्वादशाङ्गुलिप्रमाणस्य नामनी ॥ ८३ ॥

[1] F_2, Pt_2 add छिन्नोऽपि. [2] °शं W_2. [3] इन्द्रियं स्पर्शज्ञापकं Pt_2. [4] नखशब्दो नखैकदेशेऽपि । सोऽस्यास्तीति नखरः Pt_2. [5] W_2 adds अङ्गुष्ठे. [6] : प्रतितिष्ठति D_2, K_3, K_6. [7] आकृतित्वात् W_2. [8] W_2 omits two lines.

(पा.) पुनर्भवः—नखरोऽस्त्रियाम्[1] । नखनामानि । [2]स नखः प्रवृद्धश्चेत् स्मराङ्कुशः ।

'पुनर्भवः पाणिरुहो महाराजः [3]पुनर्नवः ।
खरूरः[4] करजश्चाथ स प्रवृद्धः स्मराङ्कुशः ॥'

इति वैजयन्ती (पृ. १७९, श्लो. ७६) ॥ प्रादेश—तते । अङ्गुष्ठे तर्जन्या सह वितते[5] प्रादेशः स्यात् । मध्यमया सह [6]विस्तृतेऽङ्गुष्ठे तालः स्यात् । अनामिकया सह[7] विततेऽङ्गुष्ठे गोकर्णः स्यात् ॥ अङ्गुष्ठे—द्वादशाङ्गुलः । कनिष्ठिकया[8] सह [5]विततेऽङ्गुष्ठे वितस्तिः स्यात् । क्तिन्नन्तत्वात् (३. ३. ९४) स्त्रीलिङ्गः । 'स्त्रियां वितस्तिः कनीयस्या' । इति रत्नकोशः । स एव द्वादशाङ्गुलः । 'जान' ॥ ८३ ॥

[1] A_1 adds नखरोऽप्ययम् इति क्वचित् पाठः. [2] B_3 omits the sentence. [3] पुनर्नखः A_1. [4] खरूलः इति मुद्रितग्रन्थे. [5] विततोऽङ्गुष्ठः A_1. [6] विस्तृतोऽङ्गुष्ठः A_1. [7] प्रसारितोऽङ्गुष्ठः A_1. [8] कनिष्ठया B_3.

पाणौ चपेटप्रतलप्रहस्ता विस्तृताङ्गुलौ ॥ ८४ ॥
द्वौ संहतौ संहतलप्रतलौ वामदक्षिणौ ।

(वि.) पाणाविति—विस्तृताङ्गुलौ पाणौ चपेटादित्रयं वर्तते। चप्यते [1]पुत्रादिः सान्त्व्यतेऽनेनेति चपेटः। 'चप सान्त्वने'। प्रसृतं[2] तलमत्रास्तीति प्रतलः। प्रसृतो हस्तः प्रहस्तः[3]। विस्तृताङ्गुलिपाणिनामानि ॥ संहतं संघट्टं लातीति संहतलः[4]। 'ला आदाने'। सिंहतल इति वा पाठः। तदा सिंहस्य पादद्वयतलवत् तिष्ठतीति सिंहतलः। [5]प्रतते तलेऽत्रेति प्रतलः। [6]वामदक्षिणयोः पाण्योर्मिलितयोः विस्तृताङ्गुल्योर्नामनी ॥ ८४ ॥

[1] हीनः D_2, K_6. [2] प्रतीतं K_2, K_3, K_5, W_2. [3] K_5, K_6 add विरुद्धलक्षणया प्रसार्यत इति प्रसृतिः। प्रसृत इति वा पाठः। निकुब्जपाणिनाम. [4] संहतल इति पाठे संहते तले यत्र संहतलः K_5, K_6, W_2. [5] प्रतीते K_5; प्रवितते D_2, K_6. [6] निविडसंयोगविस्तृताङ्गुलिपाणिद्वयनामनी K_3, K_6, W_2.

(पा.) पाणौ—विस्तृताङ्गुलौ। वितताङ्गुलौ पाणौ [1]चपेटः स्यात्। 'चपेटश्चर्पटस्तालः[2]' इति वैजयन्ती (पृ. १७९, श्लो. ७७)। प्रतलश्च प्रहस्तश्च स्यात्। 'प्रहस्तः प्रतलस्तलः' इति वैजयन्ती (पृ. १७९, श्लो. ७७) ॥ द्वौ संहतौ—वामदक्षिणौ। वामदक्षिणौ प्रतलौ द्वौ संहतौ चेत् संहतलः स्यात् ॥ ८४ ॥

[1] चपेटप्रतलप्रहस्तशब्दाः स्युः B_3. [2] चर्पटस्तथा A_1, B_3.

पाणिर्निकुब्जः प्रसृतिस्तौ युतावञ्जलिः पुमान् ॥ ८५ ॥
प्रकोष्ठे विस्तृतकरे हस्तो मुष्ट्या तु बद्धया।
स रत्निः स्यादरत्निस्तु निष्कनिष्ठेन मुष्टिना ॥ ८६ ॥

(वि.) पाणिरिति—कुब्जितः पाणिः प्रसृतिरित्युच्यते। प्रसार्यते विरुद्धलक्षणया संकुच्यत इति प्रसृतिः। नितरां कुब्जा प्रकृतिरस्य निकुब्जः[1]। अञ्ज्यते परप्रणामो व्यक्तीक्रियतेऽनेनेति [2]अञ्जलिः। 'अञ्जू [3]व्यक्तिम्रक्षणकान्तिगतिषु'। [4]संयुक्तप्रसृतिद्वयनाम ॥ कूपोणेरधः प्रकोष्ठः तत्र विस्तृतकरे सति हस्त इत्युच्यते। हन्यतेंऽशुकादिरनेन हस्तः। 'हन हिंसागत्योः'। विस्तृतकरप्रकोष्ठनाम ॥ बद्धया मुष्ट्या उपलक्षितः स हस्तः [5]रत्निरित्युच्यते। रमन्ते व्यवहारिणोऽनेनेति रत्निः। 'रमु क्रीडायाम्'। निष्कनिष्ठेन निर्गतकनिष्ठाङ्गुलिना मुष्टिना उपलक्षितो हस्तोऽरत्निरित्युच्यते। ऋच्छति [6]मानसंज्ञामित्यरत्निः। 'ऋ गतौ'। निष्कनिष्ठमुष्टिहस्तनाम ॥ ८५–६ ॥

[1] W_2 adds ह्रस्वविकृतिपाणिनाम. [2] व्यज्यते मक्तिरनेन F_2, Pt_2. [3] °श्लक्ष्ण° Pt_2; °ग्रहण° K_3, K_6. [4] °प्रसृत° K_5, K_6. [5] D_2 adds रत्न्या सहवर्तत इति सरत्निः, बद्धमुष्टिहस्तनाम. [6] न विद्यते रत्निर्मुष्टिरत्रेति D_2, W_2.

(पा.) पाणिः—प्रसृतः। प्रसृतिरिति क्वचित् पाठः। ईषदावर्जितः पाणिः प्रसृतः स्यात्। 'चेर[1]'। 'प्रसृते तु द्रवाधारे गण्डूषश्चुलुकस्तथा[2]'। इति प्रसृतविशेष एव ॥ तौ युतौ—पुमान्। प्रसृतौ द्वौ संगतौ चेत् अञ्जलिः स्यात्। स संनिवेशविशेषाद् बहुविधः।

'पिबत्यञ्जलिना तोयं देवाय रचितोऽञ्जलिः।
पिदधात्यात्मनो वक्त्रं केलिष्वञ्जलिना वधूः ॥'

इत्यादि ॥ प्रकोष्ठे—हस्तः। [3]विस्तृतकरे प्रकोष्ठे हस्तः स्यात्। 'मूर'। हस्तः करमात्रेऽपि स्यात्। 'पाणिः करः शयो हस्तः'। इति नाममाला। मुष्ट्या—रत्निः स्यात्। [4]मुष्टिरङ्गुलिकुञ्चनम्। [5]हस्तो बद्धया मुष्ट्योपलक्षितश्चेत् स रत्निः स्यात्। अरत्निस्तु—मुष्टिना। स एव निष्क्रान्तकनिष्ठेन मुष्टिनोपलक्षितश्चेद् अरत्निः स्यात्। तौ द्वौ च स्त्रीपुंसलिङ्गौ[6] ॥ ८५–६ ॥

---

[1] B_3 omits. [2] अपि च A_1; चुलुकश्चुलः इति मुद्रितवैजयन्त्याम् (पृ. १७९, श्लो. ७८). [3] विततः करो यस्य प्रकोष्ठः स्यात्, तस्मिन् हस्तः स्यात् A_1. [4] मुष्टिरिति A_1. [5] A_1 adds पुरो वक्ष्यमाणः. [6] A_1 adds अत्र विशेषानभिधानमेव तदभिधानम्.

व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगन्तरम्।
ऊर्ध्वविस्तृतदोःपाणिनृमाने पौरुषं त्रिषु ॥ ८७ ॥
कण्ठो गलोऽथ ग्रीवायां शिरोधिः कंधरेत्यपि।

(वि.) व्याम इति—सकरयोः पाणिसहितयोः तिर्यक् ततयोःतिर्यक् प्रसारितयोर्बाह्वोरन्तरं व्याम इत्युच्यते। व्यामीयते [1]रज्ज्वादिकमनेनेति व्यामः। 'माङ् माने'। तिर्यक्प्रसारितबाह्वन्तरपरिमाणनाम[2] ॥ ऊर्ध्वं विस्तृतः प्रसारितः ऊर्ध्वविस्तृतः, दोःसहितः पाणिः दोःपाणिः यस्य, स चासौ ना च, तस्य पुरुषस्य माने पौरुषमिति शब्दो वर्तते। पुरुषस्येदं मानं पौरुषम्[3]। त्रिषु, त्रिषु लिङ्गेषु वर्तते ॥ कणति ध्वनति कण्ठः। 'कण शब्दे'। गलति ग्रासमनेन गलः। 'गल अदने[4]'। ग्रीवाभागनामनी ॥ ग्रासं[5] गिरतीति ग्रीवा। 'गॄ निगरणे'। शिरो धीयतेऽस्यामिति शिरोधिः। 'डुधाञ् धारणपोषणयोः'। कं शिरो धारयतीति कंधरा। 'धृञ् धारणे'। ग्रीवानामानि ॥ ८७ ॥

[1] D$_2$, K$_3$, K$_6$, W$_2$ add विक्रय°. [2] 'बार पेरु' K$_3$, K$_6$. [3] विस्तृतदोःपाणिनृमाननाम K$_5$. [4] D$_2$, K$_5$ add स्रवणे च; गिल D$_2$, W$_2$. [5] गिरत्यनया अन्नादिकं F$_2$, Pt$_2$.

(पा.) व्यामो—तिर्यगन्तरम् । साचीकृतयोर्भुजयोर्मध्यं[1] व्यामः स्यात् । 'बार[2]' । व्यायामोऽपि स्यात् । 'न्यग्रोधो व्यायामो व्यामश्च भुजौ प्रसारितौ तिर्यक्' । इति वैजयन्ती (पृ. १७९, श्लो. ८२) ॥ उर्ध्वविस्तृत—पौरुषं त्रिषु । ऊर्ध्वमुद्धृतभुजकरस्य पुरुषस्य प्रमाणं पौरुषं स्यात् । तच्च त्रिलिङ्गम्[3] । पौरुषी[4] गङ्गा । 'पुरुषहस्तिभ्यामण् च' (५ २. ३८) इति चकाराद् द्वयसजादयोऽपि स्युः । पुरुषद्वयसी, पुरुषदघ्नी, पुरुषमात्री गङ्गा । 'द्विगोर्नित्यम्' (वा . ५ . २. ३७) इति संख्यापूर्वश्चेल्लुक् । द्विपुरुषी गङ्गा । कण्ठो गलो—कंधरेत्यपि । ग्रीवानामानि । अथशब्दो लिङ्गान्तरज्ञापनार्थः । 'विश्राणमायतिमतीमवृथा[5] शिरोधिम्' इति माघः (शिशु. ५. ६५) ॥ ८७ ॥

[1] A$_1$ adds उभयोः. [2] 'भार' A$_1$. [3] A$_1$ adds त्रिष्वित्यनेन त्रिविधः. [4] B$_3$ omits two words. [5] आयत° A$_1$.

कम्बुग्रीवा त्रिरेखा सावटुर्घाटा कृकाटिका ॥ ८८ ॥
वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम् ।

(वि.) कम्बुग्रीवेति—कम्बुवत्[1] शङ्खवत् [2]त्रिरेखासहितत्वात् कम्बुग्रीवा । रेखात्रयसहितग्रीवानाम ॥ न वटति[3] न वेष्टते अवटुः । 'वट वेष्टने[4]' । शरीरमस्तकयोः संधिं घटयति[5] घाटा । 'घट चेष्टायाम्' । कृकं शिरोग्रीवम् अटति व्याप्नोतीति कृकाटिका । 'अट गतौ' । ग्रीवायाः पश्चाद्भागनामानि ॥ उच्यतेऽनेनेति वक्त्रम । 'वच परिभाषणे' । अस्यते क्षिप्यते नवनीतादिरस्मिन्निति[6] आस्यम् । 'असु क्षेपणे' । वदन्त्यनेन वदनम् । 'वद व्यक्तायां वाचि' । तुड्यते हिंस्यते[8] खाद्यमनेनेति तुण्डम् । 'तुडि तोडने[9]' । अनिति श्वसित्यनेनेति आननम् । 'अन प्राणने' । [10]लपत्यनेन लपनम् । 'लप व्यक्तायां वाचि' । खन्यते भक्ष्यतेऽनेनेति[11] मुखम् । 'खनु अवदारणे' । मुदितानि खानीन्द्रियाण्यस्मिन्निति वा । एतानि मुखस्य वा दन्तात्मकस्य मुखान्तरालस्य वा नामानि ॥ ८८ ॥

[1] कम्बुतुल्या ग्रीवा F$_2$, Pt$_2$. [2] रेखात्रय° K$_5$. [3] वटयति वेष्टयति K$_6$, W$_2$. [4] परिवेष्टने K$_6$. [5] घटते Pt$_2$; घाटयति, 'घट संघाते' K$_2$. [6] °आदिकमनेन K$_3$. [7] उद्यते K$_2$, K$_5$, W$_2$. [8] खाद्यते K$_5$, K$_6$. [9] तोडनं दारणं हिंसनं च W$_2$. [10] लप्यते K$_2$, W$_2$. [11] D$_2$, K$_5$, K$_6$ add खाद्यं.

(पा.) कम्बुग्रीवा त्रिरेखा सा। रेखात्रयाङ्किता ग्रीवा कम्बुग्रीवेति कथ्यते। अवटुः—कृकाटिका। [1]शिरःपश्चाद्वर्तनामानि। 'पेडतल'। सावटुरित्यकारपूर्वपदव्यवहितः। 'घाटाप्यवटुरक्लीबे' इति वैजयन्ती (पृ. १८०, श्लो. ८५)॥ वक्त्रास्ये—लपनं मुखम्। मुखनामानि।

'को विष्वणन् मुह्यति[2] नक्तमास्ये'। तदुपलक्षितसमुदायेऽपि प्रपञ्चितम्। 'अम्भोजमिव वक्त्रं ते तव वक्त्रमिवाम्बुजम्'। इति॥ ८८॥

[1] शिरसः A₁. [2] महयति A₁.

क्लीबे घ्राणं गन्धवहा घोणा नासा च नासिका॥ ८९॥
ओष्ठाधरौ तु रदनच्छदौ दशनवाससी।

(वि.) क्लीब इति—जिघ्रति अनेनेति घ्राणम्। 'घ्रा गन्धोपादाने'। गन्धं वहतीति गन्धवहा। 'वह प्रापणे'। घुणति[1] भ्रमति गन्धग्रहणाय घोणा। 'घुण[2] भ्रमणे'। नासते[3] शब्दायते नासा। नासिका च। 'णासृ [4]शब्दे'। नासिकानामानि॥ उष्यते उष्णाहारेण दह्यते ओष्ठः। 'उष[5] दाहे'। अधोभवत्वात्[6] अधरः। रदनाः छाद्यन्तेऽनेन रदनच्छदः। 'छद अपवारणे'। दशनाच्छादकत्वेन वासःसाम्याद् दशनवासः[7]। दशनं वस्यते वा। 'वस आच्छादने'। ओष्ठद्वयनामानि॥ ८९॥

[1] गन्धाभिमुखेन भ्रमति K_5, K_6. [2] D_2, K_6 add घूर्ण. [3] नसते कौटिल्यं प्रतिपद्यते घ्राणसमये K_2, K_5, K_6, W_2. [4] 'णस कौटिल्ये' K_6. [5] Pt_2 adds प्लुष. [6] राति K_6. [7] दशनानां वास इवाच्छादकत्वात् D_2, K_2, W_2.

(पा.) क्लीबे घ्राणं—च नासिका। नासिकानामानि। नासानासिकाशब्दयोः [1]प्रत्ययभेदाद् भेदपाठः। वैजयन्त्यामपि तथैव पठितम्[2] (पृ. १८०, श्लो. ९१)

'क्लीबे[3] [4]नकुटकं घ्राणं घोणा नासा विघूणिका[5]।
शिङ्घाणी[6] नासिका चाथ धमनौ नासिकापुटौ॥'

ओष्ठाधरे—दशनवाससी। ओष्ठ इति उपरितनदन्तवासः[7], अधर इत्यधस्तनदन्तवासः। तौ[8] द्वावपि रदनच्छदौ दन्तवाससी च स्याताम्। ओष्ठाधरौ तु रदनच्छदौ दशनवाससी इति केचित् पठन्ति। तत्पाठे सर्वाणि पर्यायपदानि। 'अधरो दन्तच्छद ओष्ठ उच्यते दन्तवासश्च' इति हलायुधः (अ. मा. २. ३६९)॥ ८९॥

[1] ‘गुरोश्च हलः’ (३. ३. १०३) इति अकारप्रत्ययः; नासेः ‘ण्वुल्तृचौ’ (३. १. १३३) इति ण्वुल्प्रत्ययः. [2] B_3 omits. [3] वक्रो इति मुद्रितग्रन्थे. [4] नक्कुटकं A_1, B_3. [5] विकूणिका A_1, B_3. [6] शिङ्घिनी B_3; शिघिणी A_1. [7] B_3 omits °तन°. [8] ओष्ठाधरौ A_1.

अधस्ताच्चिबुकं गण्डौ कपोलौ तत्परो हनुः ॥ ९० ॥
रदना दशना दन्ता रदास्तालु तु काकुदम् ।

(वि.) अधस्तादिति—चीयते त्वङ्मांसास्थ्यादिभिरिति चिबुकम् । ‘चिञ् चयने’ । [1]चीव्यते वा । ‘चीवृ आदानसंवरणयोः’ । अधरोष्ठादधःस्थिताङ्गस्य नाम ॥ गण्डति वदनस्य एकदेशो भवति गण्डः । ‘गडि वदनैकदेशे’ । कम्पते भक्षणसमये चलतीति कपोलः । ‘कपि [2]चलने’ । चिबुकस्य वामदक्षिणभागयोरूर्ध्वभागनामनी ॥ हन्ति [3]चणकादिकमिति हनुः । ‘हन हिंसागत्योः’ । पूर्वोक्तयोः कपोलयोः पश्चाद्भागनाम ॥ रद्यन्ते [4]भक्ष्याणि एभिरिति रदनाः । रदाश्च । ‘रद विलेखने’ । [5]दशन्ति स्त्र्यधरमेभिरिति दशनाः । ‘दंश दशने’ । दम्यते [6]भक्ष्यमेभिरिति दन्ताः । ‘दमु [7]उपशमे’ । दन्तनामानि ॥ तलति [8]प्रतितिष्ठति [9]दग्धशेषमत्रेति तालु । ‘तल प्रतिष्ठायाम्’ । काकुं ध्वनिविशेषं ददातीति काकुदम् । ‘[10]दाण् दाने’ । तालुनामनी ॥ ९० ॥

[1] Pt_2 adds चीवति. [2] Pt_2 adds किंचित्. [3] भक्ष्यं F_2, Pt_2. [4] रद्यते स्त्र्यधरः D_2, K_2, K_5. [5] दश्यते खाद्यं (D_2, K_5) स्त्र्यधरः K_6, W_2. [6] खाद्यं K_3, K_5, K_6. [7] उपशमने D_2, K_2, K_5, K_6; K_5, K_8 add रदन्ति उत्पादयन्ति रदाः. [8] प्रतिष्ठते Pt_2. [9] पिष्टादिकं K_5, K_6, W_2. [10] ‘डुदाञ् दाने’ W_2.

(पा.) अधस्ताच्चिबुकम् । संनिधिसामर्थ्याद् ओष्ठस्याधोभागश्चिबुकं स्यात् । ‘ओष्ठस्याधस्तु चिबुकं [1]चीबुकं चुबुकं च तत्’ इति वैजयन्ती (पृ. १८०, श्लो. ८७) ॥ गण्डौ कपोलौ । गण्डस्थलनामनी । चिबुकसव्यापसव्यभागनामनी । तत्परो हनुः । तयोरुपरिभागो हनुः स्यात् । केषांचिद् गण्ड एव हनुः । ‘गण्डो गल्लः कपोलश्च हनुस्तुल्यार्थवाचकाः’ इति हलायुधः (अ. मा. २. ३६७) ॥ रदनाः—रदाः । दन्तनामानि ॥ अनुक्तम्—‘राजदन्ता मध्यदन्ताः’ । [2]मध्यमदन्ता राजदन्ताः स्युः । ‘दंष्ट्रा [3]दाढाश्च पार्श्वयोः’ । तेषां पार्श्वस्थदन्ता दंष्ट्रा [3]दाढाश्चेत्युच्यन्ते । तालु—काकुदम् । [4]तालुनो नाम । ‘दवडलु[5]’ ॥ ९० ॥

[1] चवुकमिति मुद्रितग्रन्थे. [2] मध्य° B_3. [3] दाडाः A_1, B_3. [4] तालुनोः A_1. [5] B_3 omits.

रसज्ञा रसना जिह्वा प्रान्तावोष्ठस्य सृक्किणी ॥ ९१ ॥
ललाटमलिकं गोधिरूर्ध्वे दृग्भ्यां भ्रुवौ स्त्रियौ ।

(वि.) रसज्ञेति—रसं जानातीति रसज्ञा। 'ज्ञा अवबोधने'। रस्यतेऽनया रसो रसना। 'रस आस्वादने'। ह्वयति [1]रसवद्वस्तु जिह्वा। 'ह्वेञ् स्पर्धायां शब्दे च'। जिह्वानामानि ॥ लालां सृजतीति सृक्किणी। सृक्कं, सृक्कि, सृक्कणी सृक्किणीति बहवः पाठाः। 'सृज विसर्गे'। ओष्ठप्रान्तनाम[2] ॥ ललन्तश्चलन्तोऽटन्त्यलका अत्रेति [3]ललाटम्। 'अट[4] गतौ'। [5]अल्यते तिलकेनेति अलिकम्। 'अल भूषणादौ'। गुध्यते उष्णीषेणेति [6]गोधिः। 'गुध परिवेष्टने'। ललाटनामानि ॥ ऊर्ध्वमधश्च भ्रमतीति [7]भ्रूः। 'भ्रमु [8]चलने'। दृग्भ्यामूर्ध्वभागनाम ॥ ९१ ॥

[1] विषयलम्पटं D_2, K_2, K_6. [2] प्रान्तस्य D_2, K_6. [3] ललति तिलकादिरत्राटतीति K_5, K_6, W_2. [4] K_5, K_6 add पट. [5] F_2, Pt_2 add भूष्यते. [6] गावौ नेत्रे धीयेतेऽस्मिन्निति F_2, Pt_2. [7] भ्रमत इति भ्रुवौ Pt_2. [8] अनवस्थाने F_2, Pt_2.

(पा.) रसज्ञा—जिह्वा। जिह्वानामानि। प्रान्तावोष्ठस्य सृक्किणी। ओष्ठस्य प्रान्तौ सृक्किणी स्याताम्। 'शेलिवेलु'। ललाटं—गोधिः। 'भालो निटालं निटलम्'। एतानि च ॥ ऊर्ध्वे दृग्भ्यां—स्त्रियाम्। दृग्भ्यामुपरिगतरोमलेखे भ्रुवौ स्याताम्। हे भ्रूः। 'नेयङुवङ्स्थानावस्त्री[1]' (१. ४. ४) इति नदीसंज्ञा[2] न भवति।

'अलभ्यशोकाभिभवेयमाकृतिर्विमानना सुभ्रु कुतः पितुर्गृहे'।

(कु. सं. ५. ४३) इत्यत्र बहुव्रीहिवशाद् भवति। संबुद्धौ तु नदीभावं ब्रुवते सौगतोत्तमाः। 'श्लेष्मातकभ्रुवस्तद्वद्दरुणं सुतनोरपि[3]' इति ॥ ९१ ॥

[1] स्थानाविति B_3. [2] नदीभावः A_1. [3] सुतनोरिति A_1.

कूर्चमस्त्री भ्रुवोर्मध्यं तारकाक्ष्णः कनीनिका ॥ ९२ ॥
लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी ।
दृग्दृष्टी चास्रु नेत्राम्बु रोदनं चास्त्रमस्रु च ॥ ९३ ॥

(वि.) कूर्चमिति—कोचति भ्रूरोमाणि [1]प्रतिष्टभ्नाति कूर्चम्। 'कुच सम्पर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु'। भ्रूमध्यनाम ॥ [2]तारयति तम इति तारका। 'तॄ प्लवनतरणयोः'। कनति प्रकाशयति सर्वं कनीनिका। 'कनी[3] दीप्तिकान्तिगतिषु'।

अक्ष्णोर्मध्यगतनीलतारकानामनी ॥ लोच्यतेऽनेनेति लोचनम् । 'लोचृ दर्शने'। नीयते[4] आलोकमनेनेति नयनम् । नेत्रं च । 'णीञ् प्रापणे'। ईक्ष्यतेऽनेनेति ईक्षणम् । 'ईक्ष दर्शने'। चष्टे [5]आचष्टे वस्तुस्वरूपं चक्षुः । सान्तः । 'चक्षिङ् व्यक्तायां वाचि'। अक्ष्णोति याति दूरमिति अक्षि । 'अक्षू व्याप्तौ'। इकारान्तनपुंसकलिङ्गमिदम् । [6]पश्यन्त्यनया दृक् । दृष्टिश्च । 'दृशिर् प्रेक्षणे'। नेत्रनामानि ॥ अश्नुते [7]कपोलमिति अश्रु । 'अशू व्याप्तौ'। रुद्यतेऽनेन रोदनम् । 'रुदिर् अश्रुविमोचने'। अस्यते क्षिप्यतेऽस्रम् । अस्रु च । 'असु क्षेपणे'। नेत्राम्बुनामानि ॥ ९२–३ ॥

[1] कुटिलानि करोति F_2, Pt_2. [2] तारयतेऽनेन W_2. [3] 'कन दीप्तौ' Pt_2. [4] K_2, K_3, W_2 add जायमाने दृश्यते. [5] वक्ति F_2, Pt_2. [6] दृश्यतेऽनया D_2, K_2, W_2. [7] कपोलादौ W_2.

(पा.) कूर्चमस्त्री—मध्यम् । भ्रूमध्यं कूर्चं स्यात् । तारका—कनीनिका । अक्षिमध्यनामनी । 'नक्षत्रे चाक्षिमध्ये च तारकं तारकापि [1]च' इति शाश्वतः (अने. स. पृ. ३७, श्लो. ४२०) ॥ लोचनं—दृग्दृष्टी च[2] । नेत्रनामानि ॥ अश्रु—चास्रमस्रु च । नेत्रजलनामानि ॥ अनुक्तम्—'वल्लु लोचनलोम्नि स्यात्'। [3]नेत्रलोम्नि वल्लुशब्दः स्यात् । 'वर्तनी लोचनच्छदे'। नेत्रपत्रे[4] वर्तनी स्यात् । 'कनुरेप्प' ॥ ९२–३ ॥

[1] यथा for अपि च in the printed text. [2] A_1 adds अत्र विभाषैकवद्भावः. [3] नेत्रलोम वल्लु स्यात् A_1. [4] नेत्रपत्रं A_1.

अपाङ्गौ नेत्रयोरन्तौ कटाक्षोऽपाङ्गदर्शने ।
कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः ॥ ९४ ॥
उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम् ।

(वि.) अपाङ्गाविति—अङ्गात् नासिकाख्याद्[1] अपकृष्टौ अपाङ्गौ । नेत्राञ्चलनाम ॥ कटे [2]नेत्रबाह्याङ्गेऽक्षिदर्शनमस्य कटाक्षः । अपाङ्गदर्शननाम ॥ [3]कीर्यतेऽत्र शब्द इति कर्णः । 'कॄ विक्षेपे'। शब्दस्य [4]ग्रहोऽनेनेति शब्दग्रहः । श्रूयतेऽनेन शब्द इति श्रोत्रम् । श्रुतिः । श्रवणम् । श्रवश्च । सान्तोऽयम् । 'श्रु श्रवणे'। कर्णनामानि ॥ उत्तमं च तदङ्गं च उत्तमाङ्गम् । शीर्यते जरापरिपाकादिनेति शिरः । सान्तः । शीर्षं च । 'शॄ हिंसायाम्'। मूर्च्छति गर्वादुन्नतो भवतीति मूर्धा । 'मूर्च्छा मोहसमुच्छ्राययोः'। मस्यति कठिनत्वेन परिणमतीति मस्तकः । '[5]मसी परिणामे'। शिरोनामानि ॥ ९४ ॥

[1] नासिकायाः F$_2$, Pt$_2$. [2] अन्ते K$_2$; अङ्के K$_5$, K$_6$; °देशे, अक्ष्णोतीति Pt$_2$. [3] करोति शब्दग्रहणं, 'डुकृञ् करणे' Pt$_2$. [4] Pt$_2$ adds गृह्यतेऽनेन. [5] मस्तः, मस्त एव मस्तकः Pt$_2$.

(पा.) अपाङ्गौ नेत्रयोरन्तौ। [1]नेत्रान्तौ अपाङ्गौ भवतः। 'कडकन्नु'। कटाक्षोऽपाङ्गदर्शने। नेत्रान्तवीक्षणं कटाक्षः स्यात्। 'कटाक्षः केकरापाङ्गौ' इति केषांचिदपाङ्गमात्रार्थः। अपाङ्गवीक्षितं काक्षः। कटाक्षोऽक्षिविकूणनमिति[2] केषांचिदपाङ्गदर्शनार्थः। कर्णशब्दग्रहौ—श्रवः। [3]श्रवः सान्तः। कर्णनामानि। श्रुतिशब्दव्यवधानं श्रवणशब्दस्य[4] लिङ्गव्यभिचारसूचनार्थम्। 'आस्येषु[5] जिह्वा हृदयेषु हस्तानंसेषु[6] शूराः श्रवणान् पृषत्कैः'। इति राघवपाण्डवीयम् (द्विसं. १६. २६) ॥ उत्तमाङ्गं—मस्तकोऽस्त्रियाम्। शिरोनामानि ॥ ९४ ॥

[1] नेत्रान्तोऽपाङ्गः स्यात् A$_1$. [2] विकूणनेति A$_1$. [3] A$_1$ omits. [4] शब्दे A$_1$. [5] अन्येषु A$_1$, B$_3$. [6] अङ्केषु A$_1$; केशेषु B$_3$.

चिकुरः कुन्तलो वालः कचः केशः शिरोरुहः ॥ ९५ ॥
तद्वृन्दे कैशिकं कैश्यमलकाश्चूर्णकुन्तलाः।

(वि.) चिकुर इति—चीयत[1] एकत्र चिकुरः। 'चिञ् चयने'। दैर्घ्यात् कुन्ताकारं लातीति कुन्तलः। 'ला आदाने'। वल्यते [2]पुष्पादिना वालः। 'वल संवरणे'। कच्यते वध्यते कचः। 'कच बन्धने'। के शिरसि शेते वर्तते केशः[3]। शिरसि रोहतीति शिरोरुहः। 'रुह बीजजन्मनि प्रादुर्भावे च'। [4]शिरोरुहनामानि ॥ केशानां समूहः कैशिकम्। कैश्यं च। केशवृन्दनामनी ॥ अल्यन्त इत्यलकाः। 'अल भूषणादौ'। चूर्णाः कुटिलाः कुन्तलाः चूर्णकुन्तलाः। चूर्णयोग्यकुन्तलनाम ॥ ९५ ॥

[1] चिन्वन् वर्धमानः कुर्यते छिद्यत इति वा F$_2$, Pt$_2$. [2] वस्त्रादिना Pt$_2$. [3] D$_2$, W$_2$, Pt$_2$ add 'शीङ् स्वप्ने'. [4] केशनामानि K$_3$, W$_2$.

(पा.) चिकुरः—शिरोरुहः। शिरःकेशनामानि। चिकुरशब्दः [1]ककारमध्यो हकारमध्यश्च स्यात्। 'कुन्तला मूर्धजाः प्रस्थाश्चिकुराश्चिहुराः कचाः' इति [2]श्रीभोजः ॥ तद्वृन्दे—कैश्यम्। केशसमूहनामनी ॥ अलकाश्चूर्णकुन्तलाः। कुटिलकेशनामनी। 'स्वभाववक्राण्यलकानि तासाम्' इति [3]भारविः ॥ ९५ ॥

[1] कवर्ग° A_1. [2] A_1 omits श्री. [3] कस्यचित् प्रयोगः इति टीकासर्वस्वे (पृ. ३५७); quoted by Malli. Apte's Dict. p. 232.

ते ललाटे भ्रमरकाः काकपक्षः शिखण्डकः ॥ ९६ ॥
कबरी केशवेशोऽथ धम्मिल्लः संयताः कचाः ।

(वि.) त इति—[1]भ्रमरप्रतिकृतिर्येषामस्तीति भ्रमरकाः । ललाटस्थालकनाम ॥ कार्ष्ण्यचाञ्चल्याभ्यां[2] काकपक्षसाम्यात्[3] काकपक्षः । शिरसि खण्डतया[4] वर्तत इति शिखण्डकः । बालशिखानामनी ॥ कं शिरो वृणोतीति कबरी । 'वृञ् वरणे' । केशानां संनिवेशः[5] केशवेशः । 'विश प्रवेशने' । केशरचनाविशेषनामनी ॥ संयताः बद्धाः केशाः धम्मिल्ल इत्युच्यते । धमित्यव्ययम्, मूर्धाधः ऊर्ध्वं वा मिल्यते धम्मिल्लः[6] । 'मिल श्लेषणे' । दृढसंयतकचनाम ॥ ९६ ॥

[1] प्रकृतिः W_2; भ्रमराकृतित्वात् F_2, Pt_2. [2] चञ्चलाभ्यां K_5, K_6. [3] सादृश्यात् Pt_2. [4] खण्डत्वेन वर्तमानत्वात् Pt_2. [5] समूहनिवेशः W_2; केशा विशन्त्यस्मिन्निति F_2, Pt_2. [6] धम्मल्ल इति वा पाठः । तदा ऊर्ध्वं मल्यत इति धम्मल्लः, 'मल मल्ल धारणे' D_2, K_2, K_6.

(पा.) ते ललाटे भ्रमरकाः । ललाटश्रितकुटिलकेशाः भ्रमरकाः स्युः । [1]भ्रमरालकाश्च स्युः । 'ते ललाटे भ्रमरकाः कुरुलाः[2] भ्रमरालकाः' इति वैजयन्ती (पृ. १८१, श्लो. ९९) ॥ काकपक्षः शिखण्डकः । [3]बालकचूलिकानामनी । 'चिप्पकुंपट्लु' ॥ कबरी केशवेशः । संकुचितबद्धकेशविन्यासः कबरी स्यात् । 'कोप्पु' । अथ धम्मिल्लः—कचाः । संयताः[4] केशा धम्मिल्लः स्यात् । अनुक्तम्—'तुरुम्बो माल्यादिगर्भः' । स्रगादिगर्भकेशविन्यासस्तुरुम्बः स्यात् ॥ ९६ ॥

[1] B_3 omits. [2] कुरलाः A_1, B_3. [3] चूलिक° A_1. [4] संबद्ध° A_1.

शिखा चूडा केशपाशी व्रतिनस्तु जटा सटा ॥ ९७ ॥
वेणिप्रवेणी शीर्षण्यशिरस्यौ विशदे कचे ।

(वि.) शिखेति—शाखते व्याप्नोतीति शिखा । 'शाखृ व्याप्तौ' । शेते शिरसि वा । 'शीङ् स्वप्ने' । चुल्यते[1] चाल्यते वायुनेति चूडा । 'चुड [2]संवरणे समुच्छ्राये च' । [3]केशपाशोऽत्रास्तीति केशपाशी । शिखानामानि ॥ [4]जटति संघीभवतीति जटा । 'जट[5] संघाते' । सटतीति सटा । 'षट अवयवे' । व्रतिशिखानामनी ॥ वेति

निर्मलत्वेन शोभत इति वेणिः। वेणी वा। प्रवेणिश्च। प्रवेणी वा। 'वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु'। वेणतीति वा। 'वेणृ गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु'। शिरसि भवः [6]शीर्षण्यः। शिरस्यश्च। निर्मलकचनामानि ॥ ९७ ॥

---

[1] D_2, K_5, W_2 add इतस्ततः. [2] अपनये K_3, K_6; आच्छादने Pt_2. [3] F_2, Pt_2 add केशसमूहः. [4] W_2 omits two lines. [5] K_5, K_6, Pt_2 add झट. [6] शिरस्यः, शीर्षे भवः शीर्षण्यः K_3.

(पा.) शिखा—केशपाशी। शिखानामानि ॥ व्रतिनस्तु—सटा। जटानामनी ॥ तुशब्दस्थाने साशब्दं केचिदभिषेचयन्ति[1] ॥ वेणिः प्रवेणिः। सर्पाकारतया संबद्धस्त्रीजटानामानि ॥ स्त्रीत्वाभिव्यक्त्यर्थं [2]वेणिप्रवेणीति केचित् पठन्ति ॥ शीर्षण्यशिरस्यौ—कचे। स्नानादिसंस्कारवत्केशनामनी ॥ ९७ ॥

---

[1] पठन्ति B_3. [2] वेणी° A_1.

पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे ॥ ९८ ॥
तनूरुहं रोम लोम तद्वृद्धौ श्मश्रु पुंमुखे।

(वि.) पाश इति—पाशः पक्षः हस्तः—एते शब्दाः कचपर्यायात् परे वर्तमाना बाहुल्यार्था भवन्ति। यथा—केशपाशः, केशपक्षः, केशहस्तः, चिकुरपाशः, चिकुरपक्षः, चिकुरहस्तः इत्यादि। पाश्यत इति पाशः। 'पश बन्धे'। पक्ष्यते परिगृह्यते पक्षः। 'पक्ष परिग्रहे'। हस्यते[1] हस्तः। तन्वां रोहतीति तनूरुहम्। तनुरुहं वा। [2]रोहतीति रोम। लोम च। नान्तावेतौ[3]। तनूरुहकेशनामानि ॥ पुंमुखं श्रयते श्मश्रु[4]। 'श्रिञ् सेवायाम्'। पुंमुखे वृद्धिंगतरोमनाम ॥ ९८ ॥

---

[1] श्लिष्यते Pt_2. [2] K_3, K_5 add तन्वां. [3] रोमलोमशब्दौ K_3.
[4] श्मन् शब्दो मुखवाची। श्मनि मुखे श्रियते Pt_2.

(पा.) पाशः—कचात्परे। [1]कचपर्यायात्परे पाशपक्षहस्तशब्दाः विकीर्णकैश्यार्थाः। 'चतुरमवकिरन्त्याः केशपाशं कराग्रैः' इति। तनूरुहं—लोम। [2]वपुर्लोमनामानि ॥ तद्वृद्धं—पुंमुखे। पुरुषस्य[3] मुखे प्रवृद्धं रोम[4] श्मश्रु स्यात्। 'गड्डं [5]मीसालु'। 'श्मश्रुश्वशुरश्वश्रूशिंशपा[5]' इति वर्णनिर्देशनायां [6]द्वितालव्येषु पठितम् ॥ ९८ ॥

[1] वाचकात् B_3. [2] B_3 omits वपुः. [3] पुंसः B_3. [4] लोम B_3. [5] B_3 omits. [6] द्विधा तालव्येषु पठितः A_1.

आकल्पवेषौ नेपथ्यं प्रतिकर्म प्रसाधनम् ॥ ९९ ॥
दशैते त्रिष्वलंकर्तालंकरिष्णुश्च मण्डितः ।
प्रसाधितोऽलंकृतश्च भूषितश्च परिष्कृतः ॥ १०० ॥

(वि.) आकल्प इति—[1]आकल्प्यते शरीरशोभा अनेनेत्याकल्पः । 'कृपू [2]सामर्थ्ये'। वेवेष्टि [3]शोभामिति वेषः । 'विष्लृ व्याप्तौ'। वेश इति वा पाठः । नेत्रयोः पथ्यं नेपथ्यम् । वस्त्रालंकारमाल्यादिकृतशोभातिशयनामानि ॥ प्रत्यङ्गं क्रियते प्रतिकर्म। प्रतिगतम् अङ्गप्राप्तं कर्म वा । [4]प्रसाध्यतेऽङ्गमनेन प्रसाधनम् । 'साध[5] संसिद्धौ'। एते तिलकपत्ररचनादेर्नामनी ॥ आकल्पादिप्रसाधनान्तानि नैसर्गिकाङ्गशोभातिरिक्तकृत्रिमाङ्गशोभाया नामानीति केचित् ॥ दशैते त्रिषु । अलंकर्ता अलंकरिष्णुरित्यादयः रोचिष्णवन्ता दशपर्यायाः त्रिषु लिङ्गेषु वर्तन्ते । अलंकरोतीति अलंकर्ता । अलंकर्तुं शीलमस्यास्तीति अलंकरिष्णुः । अलंकारकर्तुर्नामनी[6] । मण्ड्यते भूष्यते स्म मण्डितः । 'मडि भूषायाम्'। प्रसाध्यते स्म प्रसाधितः । 'साध संसिद्धौ'। अलंक्रियते स्म अलंकृतः । भूष्यते स्म भूषितः[7] । परिष्क्रियतेऽलंक्रियते स्म परिष्कृतः । अलंकारकृतशोभावतो नामानि ॥ ९९–१०० ॥

[1] आ समन्तात् D_2, F_2, Pt_2. [2] 'क्लृप क्लृप्तौ' K_5, K_6. [3] तत्तदङ्गमिति F_2, Pt_2. [4] Pt_2 adds अलंक्रियते. [5] D_2, K_5, W_2, Pt_2 add राध. [6] कर्तृ W_2. [7] 'भूष अलंकारे' D_2, Pt_2; अलंकरणे W_2.

(पा.) आकल्पवेषो—प्रसाधनम् । अलंकरणनामानि ॥ मज्जनानुलेपनमाल्यवस्त्राभरणैस्तत् पञ्चविधम् । 'द्वेषरहितमपि सद्वेष'मिति [1]कुमारचरिते वेषः । 'गृहमात्रे[2] च नेपथ्ये वेशो वेश्यागृहेऽपि च'। इति रभसकोशपाठात् वेशः ॥ दशैते त्रिषु । अलंकर्तेत्यादिरोचिष्णवन्ताः दश पर्यायाः त्रिषु लिङ्गेषु भवन्ति ॥ ९९–१०० ॥

[1] कुमारचलितालंकारे A_1. [2] नेपथ्यगृहमात्रे A_1.

विभ्राड् भ्राजिष्णुरोचिष्णू भूषणं स्यादलंक्रिया ।
अलंकारस्त्वाभरणं परिष्कारो विभूषणम् ॥ १०१ ॥
मण्डनं चाथ मुकुटं किरीटं पुंनपुंसकम् ।

(वि.) विभ्राडिति—विशेषेण [1]भ्राजते विभ्राट्। भ्राजितुं शीलमस्यास्तीति भ्राजिष्णुः। 'भ्राजृ दीप्तौ'। विशेषेण रोचते रोचिष्णुः। 'रुच दीप्तौ'। भूषितत्वेन शोभमानस्य नामानि ॥ भूषा भूषणम्[2]। अलंकरणम् अलंक्रिया। अलंकरणव्यापारनामनी ॥ अलंक्रियतेऽनेन अलंकारः। आ समन्तात् भ्रियते आभरणम्। 'भृञ् भरणे'। परिष्क्रियतेऽनेन परिष्कारः[3]। विशेषेण [4]भूष्यतेऽनेन विभूषणम्। 'भूष अलंकारे'। मण्ड्यतेऽनेनेति मण्डनम्। 'मडि [5]भूषायाम्'। मकुटादिभूषणमात्रस्य नामानि ॥ मुखे ललाटोपरि कुट्यते बध्यते [6]मुकुटम। 'कुट कौटिल्ये'। मकुटमिति वा पाठः। कीर्यते ललाटोपरि क्षिप्यते किरीटम्। 'कॄ विक्षेपे'। [7]किरीटनामनी ॥ १०१ ॥

---

[1] F$_2$, Pt$_2$ add ताच्छील्येन.
[2] K$_2$, K$_6$ add भाति, 'भा दीप्तौ'.
[3] F$_2$, Pt$_2$ add 'डुकृञ् करणे'.
[4] भाति K$_5$, K$_6$.
[5] हर्षे च D$_2$; K$_3$, K$_6$ add व्याप्तौ.
[6] मङ्क्यतेऽनेन मकुटम्। 'मकि मण्डने' F$_2$, Pt$_2$.
[7] मुकुट° K$_3$, W$_2$.

(पा.) विभ्राट्—रोचिष्णुः। अलंकृतत्वेन शोभमानस्य नामानि ॥ भूषणं—अलंक्रिया। भूषणव्यापारनामनी ॥ अलंकारः—मण्डनं च। हाराद्यलंकारनामानि ॥ अथ मकुटं पुंनपुंसकम्। मुकुटं किरीटं पुंनपुंसकमिति क्वचित् पाठः। मकुटनामानि ॥ पुंनपुंसकशब्द उभयविशेषणम्। 'मौलिः कोटीर उष्णीषं[1] किरीटं मकुटोऽस्त्रियाम्' इति वैजयन्ती (पृ. १६९, श्लो. १३५) ॥ १०१ ॥

---

[1] उष्णीषकिरीटमकुटा अस्त्रियः A$_1$.

चूडामणिः शिरोरत्नं तरलो हारमध्यगः ॥ १०२ ॥
वालपाश्या पारितथ्या पत्रपाश्या ललाटिका ।

(वि.) चूडामणिरिति—चूडायां मणिः चूडामणिः। शिरसि रत्नं शिरोरत्नम्। शिरोमणिनामनी ॥ प्रभया तमस्तरति लङ्घयतीति तरलः। 'तॄ प्लवनतरणयोः' ॥ [1]हारमध्यगतरत्ननाम ॥ वालपाशे केशपाशे [2]साध्वी वालपाश्या। केशपाशस्य परितः सर्वतः तथा भवति शोभते पारितथ्या। [3]केशपाशशोभार्थं स्थूलमुक्तामयवलयनामनी ॥ पत्राकारे[4] ललाटे पश्यत इति पत्रपाश्या। 'पश बन्धने'। ललाटे भवा [5]भूषा ललाटिका। फाललम्बिप्रालम्बमुक्तापीडनामनी[6] ॥ १०२ ॥

---

[1] हारगतरत्ननामनी W$_2$.
[2] साधुः D$_2$, K$_3$, K$_6$, W$_2$.
[3] केशपाशोपरि K$_5$.
[4] W$_2$ adds वालालंकारे.
[5] अलंकारः D$_2$, K$_6$.
[6] °माला° K$_2$, K$_3$.

(पा.) चूडामणिः शिरोरत्नम् । चूडामणिनामनी ॥ तरलो—मध्यगः । हारमध्यमणिः तरलः स्यात् । 'हारमध्यस्थितं[1] रत्नं तरलं नायकं विदुः' इति हलायुधः (अ. मा. २. ४०९) ॥ वालपाश्या—पारितथ्या । केशालंकारनामनी ॥ पत्रपाश्या ललाटिका । ललाटालंकारनामनी ॥ १०२ ॥

[1] मध्यगत° A_1.

कर्णिका तालपत्रं स्यात् कुण्डलं कर्णवेष्टनम् ॥ १०३ ॥
ग्रैवेयकं कण्ठभूषा लम्बनं स्याल्ललन्तिका ।

(त्रि.) कर्णिकेति—[1]कर्णस्यालंकारः कर्णिका । तालस्य पत्रं तालपत्रम् । कर्णपत्र[2]नामनी ॥ [3]कुण्डवद् वृत्तत्वात् कुण्डलम् । कुण्डव्युत्पत्तिर्यथा—कुण्डयते नैरन्तर्येण दह्यते कुण्डम् । 'कुडि दाहे' । कर्णभूषणनाम ॥ कर्णौ वेष्टते कर्णवेष्टनम् । 'वेष्ट वेष्टने' । स्त्रीपुरुषयोः कर्णभूषणनामनी ॥ ग्रीवायां भवोऽलंकारो ग्रैवेयकम् । कण्ठस्य भूषा कण्ठभूषा । कण्ठभूषणनामनी ॥ लम्वते लम्वनम् । लम्बमानं वा । 'लवि अवस्रंसने' । ललति विलसति ललन्तिका । 'लल विलासे' । हैमपट्टादिग्रैवेय[4]काण्डलम्बिमणिविद्रुमादिकृतत्रिसरादिमण्डननामनी ॥ १०३ ॥

[1] कर्णयोः F_2, Pt_2.
[2] पत्रिका W_2.
[3] गार्हपत्याग्निकुण्डवत् D_2, K_2, K_6.
[4] °कान्त °D_2, K_3, K_5, W_2.

(पा.) कर्णिका—स्यात् । कर्णपत्रनामनी । 'चौलाकु' ॥ कर्णपूरताटङ्कादयस्तद्विशेषाः । 'कर्णपूरस्तु पुष्पाद्यैस्ताडङ्को[1] दन्तकादिभिः' इति वैजयन्ती (पृ. १६९, श्लो. १३४) ॥ कुण्डलं कर्णवेष्टनम् । कुण्डलनाम ॥ ग्रैवेयकं कण्ठभूषा । कण्ठाभरणं [2]सर्वं ग्रैवेयकं स्यात् । 'ग्रीवालंकरणं सर्वं ग्रैवेयकमितीष्यते[3]' इति हलायुधः (अ. मा. २. ४०३) । 'कुलकुक्षिग्रीवाभ्यः श्वास्यलंकारेषु' (४. २. ९६) इत्यलंकारार्थे ढकञ् । 'ग्रीवाभ्योऽण् च' इति [4]ढञ् (४. ३. ५७) अर्थान्तरे । 'ग्रीवाबन्धनरज्जौ तु ग्रैवं ग्रैवेयमित्यपि' इति वैजयन्ती[5] ॥ लम्बनं—ललन्तिका । [6]लम्बननामनी ॥ १०३ ॥

[1] ताटङ्कः A_1.
[2] A_1 adds अपि.
[3] इति स्मृतम् A_1, B_3.
[4] अण्ढञौ B_3.
[5] मुद्रितग्रन्थे न दृश्यते.
[6] लम्बमाना B_3.

स्वर्णैः प्रालम्बिकाथोरःसूत्रिका मौक्तिकैः कृता ॥ १०४ ॥
हारो मुक्तावली देवच्छन्दोऽसौ शतयष्टिकः ।

(वि.) स्वर्णैरिति—स्वर्णैः कृता ललन्तिका प्रालम्बिकेत्युच्यते। प्रकर्षेण आलम्बते प्रालम्बिका । 'लवि [1]शब्देऽवस्रंसने च'। दोराद्याकृत्या स्वर्णकृतग्रीवावलम्बिललन्तिकानाम ॥ सीव्यतेऽनेन मुक्तादिकमिति सूत्रिका । 'षिवु तन्तुसंताने'। उरसि सूत्रिका उरःसूत्रिका। पूर्वोक्तस्यैव मुक्तामयस्य नाम ॥ ह्रियते चित्तमनेन हारः । 'हृञ् हरणे'। मुक्तानाम् आवली मुक्तावली[2] । [3]मुक्ताहारनाम ॥ [4]देवानामपि चित्तं चन्दयति आह्लादयतीति देवच्छन्दः । 'चदि आह्लादने'। शतसरहारनाम ॥ १०४ ॥

[1] लम्बने K_2, K_5, W_2. [2] मुक्तावलिः इति वा पाठः W_2. [3] मुक्तावली D_2, K_6, W_2. [4] देवानपि F_2, Pt_2.

(पा.) स्वर्णैः प्रालम्बिका। [1]हेमलम्बनं प्रालम्बिका स्यात्। अथोरःसूत्रिका—कृता। मुक्तामणिभिः कृता[2] उरःसूत्रिका स्यात् । हारो मुक्तावली। हारनामनी ॥ 'हारा मुक्तावली हारः' इति स्त्रीलिङ्गपुंल्लिङ्गयो रभसः। देवच्छन्दो—शतयष्टिकः[3]। शतयष्टिहारः[4] देवच्छन्दः स्यात् ॥ १०४ ॥

[1] स्वर्णमयलम्बमानानाम B_3. [2] कृतलम्बनं A_1. [3] शतयष्टिका A_1, B_3. [4] शतयष्टेः A_1.

हारभेदा यष्टिभेदाद् गुच्छगुच्छार्धगोस्तनाः ॥ १०५ ॥
अर्धहारो माणवक एकावल्येकयष्टिका ।
सैव नक्षत्रमाला स्यात् सप्तविंशतिमौक्तिकैः ॥ १०६ ॥

(वि.) हारभेदा इति—यष्टिसंख्याभेदात् गुच्छादयो हारभेदा भवन्ति। दैर्घ्यात् गुह्यस्थानं छादयतीति [1]गुच्छः। गूहति सारैः संवृणोतीति वा। द्वात्रिंशत्सरहारनाम ॥ गुच्छस्य [2]अर्धः [3]गुच्छार्धः । षोडशसरहारनाम ॥ गोस्तन इव[4] [5]नाभेरधोवर्तमानत्वाद् गोस्तनः । चत्वारिंशत्सरहारनाम ॥ देवच्छन्दस्यार्धत्वाद् [6]अर्धहारः[7]। सरैरितरेभ्योऽल्पत्वात् माणवकः[8] । विंशतिसरहारनाम[9] ॥ नक्षत्रपङ्क्तिरिव संख्यया राजत इति नक्षत्रमाला । सप्तविंशतिस्थूलमौक्तिककृतहारनाम ॥ १०५–६ ॥

[1] गुत्स इति वा पाठः Pt_2; D_2, W_2 add 'छद अपवारणे'. [2] अर्धं K_5, K_6, W_2. [3] अर्धगुच्छः K_3. [4] °वत् D_2, K_5, K_6. [5] अधस्तात् K_5.

[6] हारस्यार्धं W_2. [7] K_3, W_2 add पञ्चाशत्सरहारनाम. [8] माया लक्ष्म्या नवकोऽभिनवः माणवकः Pt_2. [9] Pt_2 adds भूषणानां मध्ये एकैव आवलते एकावली, 'वल संवरणे संचलने च'.

(पा.) हारभेदाः—माणवकः । गुच्छादयः शतादूनयष्टिकहारभेदाः । तथा चोक्तम्[1]—

'देवच्छन्दः शतं साष्टमिन्द्रच्छन्दः[2] सहस्रकम् ।
तस्यार्धं विजयच्छन्दो हारस्त्वष्टोत्तरं शतम् ॥
[3]अर्धं रश्मिकलापोऽस्य द्वादशस्त्वर्धमाणवः ।
द्विर्द्वादशोऽर्धे गुच्छोऽथ पञ्च हारः फलं लता[4] ॥
अर्धहारश्चतुःषष्टिर्गुच्छमाणवमन्दराः ।
अपि गोस्तनगोपुच्छावर्धमर्धं यथोत्तरम् ॥'

इति । एकावल्येकयष्टिका । [5]एकयष्टिर्हार एकावली स्यात् । सैव नक्षत्रमाला—मौक्तिका । सप्तविंशतिसंख्यैर्मौक्तिकैः[6] कृता एकावली नक्षत्रमाला स्यात् । अनुक्तम्—'मणिभिर्मणिसोपानश्चाटुकारश्च कानकैः[7]' । हैमैर्मणिभिः कृता एकावली [7]मणिसोपानश्चाटुकारश्च स्यात् ॥ १०५–६ ॥

---

[1] वैजयन्ती पृ. १७०, श्लो. १३८–४१. [2] चन्द्रच्छन्दः A_1. [3] अर्धरश्मि° A_1, B_3. [4] तलौ A_1. [5] एकयष्टिमती हारा A_1. [6] A_1 omits. [7] °सोपानं B_3.

आवापकः पारिहार्यः कटको वलयोऽस्त्रियाम् ।
केयूरमङ्गदं तुल्ये अङ्गुलीयकमूर्मिका ॥ १०७ ॥
साक्षराङ्गुलिमुद्रा सा कङ्कणं करभूषणम् ।

(वि.) आवापक इति—आ उप्यते क्षिप्यते मणिबन्धोपरीति आवापकः । 'डुवप् बीजतन्तुसंताने' । परितो [1]हरन्त्यनेनेति परिहारो हस्तः[2], तत्र वर्तत[3] इति पारिहार्यः । कटत्यावृणोति[4] हस्तमिति कटकम् । 'कटे वर्षावरणयोः' । वलते[5] हस्तमिति वलयः । 'वल संवरणे [6]संचरणे च' । मणिबन्धोपरिविहितालंकरणनामानि । के भुजशिरःसमीपे यौति तिष्ठतीति केयूरम्[7] । 'यु मिश्रणे' । अङ्गं भुजप्रदेशं घाताद् दयतेऽङ्गदम् । 'देङ् रक्षणे' । बाहुमूलादधोधार्यालंकारनामनी ॥ अङ्गुलीषु [8]भवम् अङ्गुलीयकम् । अङ्गुलेरुपरि ऊर्मिवद् वर्तते ऊर्मिका । अङ्गुलीभूषणस्य नामनी ॥ [9]मुद्रा विश्वासस्थानं, तद्योग्यान्यक्षराणि सन्त्यत्रेति अङ्गुलिमुद्रा । अक्षरचिह्नि-

तोर्मिकानाम ॥ कङ्कते मणिबन्धोपरि सरतीति [10]कङ्कणम् । 'ककि[11] गतौ' । करभूषणनाम ॥ १०७ ॥

---

[1] व्यवहरति K_5, K_6. [2] D_2 adds 'हृञ् हरणे'. [3] भवः F_2, Pt_2. [4] K_2, K_3, K_6, W_2 add प्रभया. [5] K_3 omits 4 lincs. [6] K_6, W_2 omit. [7] कंयूरः D_2, W_2. [8] वर्तते K_2, K_5. [9] मोदयतीति मुद्रा, 'मुद हर्षे', अङ्गुलीसंबन्धिनी मुद्रा F_2, Pt_2. [10] Pt_2 adds कमिति क्वणति, 'क्वण शब्दे'. [11] 'कक लौल्ये' D_2, W_2, Pt_2.

(पा.) आवापकं[1] पारिहार्यं[2] कटकं वलयोऽस्त्रियाम् । कटकनामानि । 'कडियमु[3]' ; केयूरमङ्गदं तुल्ये । [4]वामाङ्गदनामनी । 'बाहुपुलि[5]' । अङ्गुलीयकमूर्मिका । अङ्गुल्याभरणनामनी । साक्षराङ्गुलिमुद्रा सा । अक्षराङ्कितमङ्गुल्या[6]भरणमङ्गुलिमुद्रा स्यात् । कङ्कणं करभूषणम् । मुक्ताप्रवालादिभिः प्रोतं प्रकोष्ठाभरणं कङ्कणं स्यात् । 'चेकट्टम्[5]' । 'कङ्कणं हस्तसूत्रं च विदुः प्रतिसरं बुधाः' इति हलायुधः (अ. मा. २. ४०३) ॥ १०७ ॥

---

[1] आवापकः B_3. [2] पारिहार्यः B_3. [3] B_3 omits. [4] केयूरनाम B_3. [5] B_3 omits. [6] अक्षराङ्किता सा B_3.

स्त्रीकट्यां मेखला काञ्ची सप्तकी रशना तथा ॥ १०८ ॥
क्लीबे सारसनं चाथ पुंस्कट्यां शृङ्खलं त्रिषु ।

(वि.) स्त्रीकट्यामिति—मीयते प्रक्षिप्यते कट्यामिति मेखला । 'डुमिञ् प्रक्षेपणे' । कच्यते कट्यां बध्यते काञ्ची । 'कचि[1] दीप्तिबन्धनयोः' । कट्यां सपति समवैति सप्तकी । 'षप समवाये' । रशन्ति कामयन्ते एनामिति रशना । 'रश कान्तौ[2]' । [3]सारं सनोतीति सारसनम् । 'षणु दाने' । सारशनमिति वा पाठः । स्त्रीकटिभूषण[4]नामानि ॥ शृङ्गैः [5]श्रेष्ठमणिभिः खलतीति शृङ्खलम् । 'खल संचये[6]' । पुरुषकटिभूषणनाम ॥ १०८ ॥

---

[1] 'कच' K_3. [2] सौत्रो धातुः K_5; अश्नोति कटिमिति, 'अशू व्याप्तौ' F_2, Pt_2. [3] D_2, K_5, K_6 add स्थैर्यं. [4] °हेमसूत्र° W_2. [5] प्रधान° Pt_2. [6] संचलने K_5, K_6, Pt_2.

(पा.) स्त्रीकट्यां—सारसनं च। सारशनं चेति पाठः। मेखलानामानि[1]। पुंस्कट्यां शृङ्खलं त्रिषु। पुंस्कटीभूषणनाम। सा स्त्रीकट्यां काञ्च्यादिशब्दवाच्या, पुंस्कट्यां शृङ्खलशब्दवाच्या[2] ॥ १०८ ॥

[1] स्त्रीकटीभूषणनामानि B_3; ‘तांडववि’ A_1; ‘वोड्डाणमु’ B_3.

[2] B_3 adds ‘गोवमेलताडु’.

पादाङ्गदं तुलाकोटिर्मञ्जीरो नूपुरोऽस्त्रियाम् ॥ १०९ ॥
हंसकः पादकटकः किंकिणी क्षुद्रघण्टिका ।

(वि.) पादाङ्गदमिति—पादेऽङ्गदमिव पादाङ्गदम्। तुलति आकुटति चेति तुलाकोटिः। ‘तुल उन्माने’ इति प्रथमो धातुः। ‘कुट बन्धने’, ‘कुट कौटिल्ये’ इति वा द्वितीयो धातुः। मञ्जु [1]मनोहरम् ईरयति ध्वनतीति मञ्जीरः। ‘ईर [2]क्षेपे’। नूयत इति नूपुरम्। ‘णु स्तुतौ[3]’। हंसवत् कायतीति हंसकः। ‘कै शब्दे’। पादस्य कटकः[4] पादकटकः। पादाङ्गदनामानि ॥ किंचित् क्वणतीति किंकिणी[5]। ‘क्वण शब्दे’। क्षुद्रा अल्पा घण्टा अस्या इति क्षुद्रघण्टिका। [6]बालकपादभूषणनामनी ॥ १०९ ॥

[1] रुच्यं D_2, K_6.

[2] ध्वनौ K_5, K_6.

[3] स्तवे K_2, K_6.

[4] कटकं D_2, K_3.

[5] अल्पघण्टानाम K_2, K_3, W_2.

[6] ‘चिन्नघण्टुलपेरु’ D_2.

(पा.) पादाङ्गदं—नूपुरोऽस्त्रियाम्। [1]चरणाभरणनामानि। ‘कालि अंडे’॥ मञ्जीरशब्दसाहचर्यात् तुलाकोटिशब्दः पुंलिङ्गः। ‘शिञ्जिनी ना तुलाकोटिः’ इति वैजयन्ती (पृ. १७०, श्लो. १४५)॥ हंसकः पादकटकः। पादवलयनामनी। ‘[2]कालिकडियमु’॥ किङ्किणी क्षुद्रघण्टिका। स्वल्पघण्टिकानाम। ‘गज्जेलु’॥ किङ्कणं क्षुद्रघण्टिका इति क्वचित् पाठः[3] ॥ १०९ ॥

[1] रणच्चरणा° A_1.

[2] B_3 omits.

[3] A_1 adds ‘चिन्नघण्टुलपेरु’.

त्वक्फलक्रिमिरोमाणि वस्त्रयोनिर्दश त्रिषु ॥ ११० ॥
वाल्कं क्षौमादि फालं तु कार्पासं बादरं च तत् ।

(वि.) त्वगिति [1]त्वक् फलं कृमिः रोम च त्वक्फलकृमिरोमाणि। एतानि वस्त्रयोनयः[2]। वस्त्रोत्पादनस्थाननामानि ॥ दश त्रिषु। वस्त्रयोनिवाल्ककार्पासफालबादरकौशेयराङ्कवानाहतनिष्प्रवाणितन्त्रकमित्येते शब्दाः त्रिषु लिङ्गेषु वर्तन्त इत्यर्थः।

वल्कक्रुततन्तुनिर्मितं वाल्कम्। क्षुमायाः[3] अतस्या विकारः क्षौमम्। फलस्य विकारः फालम्। कार्पासीफलतन्तुनिर्मितं कार्पासम्। बदराफलनिर्मितं [4]वादरम्। फलनिर्मितवस्त्रनामनी ॥ ११० ॥

---

[1] K$_3$ omits 4 lines. [2] W$_2$ adds वस्त्राणामाच्छादनानां योनिः उपादानं. [3] क्षुमा अतसी, तस्याः तन्त्वादिनिर्मितं K$_5$, K$_6$. [4] बदरायाः फलं Pt$_2$.

(पा.) त्वक्फल—वस्त्रयोनिः। त्वगिति वल्कम्। फलं कार्पासम्। क्रिमिरिति कीटः। रोमेति मेषादेर्लोम। एतानि चत्वार्यपि [1]वस्त्रयोनयः॥ दश त्रिषु। इतःपरं वक्ष्यमाणकार्पासवादरकौशेयराङ्कवानाहतनिष्प्रवाणितन्त्रकोद्गमनीयपत्त्रोर्णमहाधनानीत्येतानि दश शब्दाः त्रिलिङ्गाः। 'धौतयुग्मं तूद्गमनीयकम्' इति वैजयन्ती (पृ. १६८, श्लो. १२०)। वाच्यलिङ्गमध्यपाठेनोद्गमनीयं प्रधौतवस्त्रयुगमिति गोपालितक्लीबकाण्डमध्यपाठः प्रक्षिप्तः। वाल्कं क्षौमादि। [2]वक्ष्यमाणवस्त्रजातौ[3] वल्काज्जायमानं वासः क्षौमनेत्रादि[4]। फालं तु—वादरं च तत्। फलाज्जायमानं कार्पासम्। तद्[5] बादरं च स्यात्॥ ११० ॥

---

[1] वस्त्रकारणम् B$_3$. [2] A$_1$ adds उपरि. [3] वस्त्रजातिषु क्षौमादि वल्कं B$_3$. [4] B$_3$ omits. [5] तदेव A$_1$.

कौशेयं कृमिकोशोत्थं राङ्कवं मृगरोमजम् ॥ १११ ॥
अनाहतं निष्प्रवाणि तन्त्रकं च नवाम्बरे।

(वि.) कौशेयमिति—[1]कृमिकोशस्येदं कौशेयम्। कृमिकोशगतमृदुतन्तुनिर्मितवस्त्रनाम ॥ रङ्क्वाख्यमृगरोमविकारः[2] राङ्कवम्। मृगरोमभिर्जातं मृगरोमजम्। मृगरोमकृतवस्त्रनाम ॥ आहताः क्षालनभोगच्छेदाः। तद्रहितत्वाद् अनाहतम्। न हन्यत इत्यनाहतम्। निर्गता प्रवाणी तन्तुवायशलाकास्मात् निष्प्रवाणि[3]। तन्त्रात् तन्तुवायशलाकादेरचिरादपहृतं तन्त्रकम्। नवं च तदम्बरं च नवाम्बरम्। नूतनवस्त्रनामानि ॥ १११ ॥

---

[1] क्रिमि° K$_5$, K$_6$. [2] °मयं K$_2$, K$_3$. [3] नितरां प्रोयते सीव्यते तन्तुजालमत्रेति K$_5$.

(पा.) कौशेयं कृमिकोशोत्थम्। कीटकुलायजातं[1] कौशेयं स्यात्। 'दसलि[2]'। राङ्कवं मृगरोमजम्। मेषादिलोम्नः[3] उत्पद्यमानं राङ्कवं स्यात्। 'मृगमेषाद्याः पशवः,

रूढ्या तल्लोमजमपि कम्बलादिकं राङ्कवम्’ इति गोवर्धनः। अनाहतं—नवाम्बरे। नूतनवस्त्रनामानि। ‘अहतं तु नवाम्बरम्[4]’ इति हलायुधः (अ. मा. २. ३९५)। ‘अहतं निष्प्रवाणिः स्यात्’ इति वैजयन्ती (पृ. १६८, श्लो. १२०)॥ १११॥

[1] °कुलायाज्जातं B_3. [2] B_3 omits. [3] A_1 adds सकाशात्. [4] ‘अहतं स्यान्नवं वासः’ इति मुद्रितग्रन्थे.

तत् स्यादुद्गमनीयं यद् धौतयोर्वस्त्रयोर्युगम्॥ ११२॥
पत्त्रोर्णं धौतकौशेयं बहुमूल्यं महाधनम्।

(वि.) तत्स्यादिति—उद्गम्यते [1]परिधानार्थमिति उद्गमनीयम्। [2]धौतवस्त्रयुगलनाम॥ वटादिपत्त्रेषु क्रिमिलालोर्णाभवं पत्त्रोर्णम्[3]। क्षालितकौशेयनाम॥ बहु मूल्यमस्यास्तीति बहुमूल्यम। महद् धनं मूल्यमस्य महाधनम्[4]। बहुमूल्यवस्तुनो नामनी॥ ११२॥

[1] Pt_2 adds धौतं प्रक्षालितं यद्वस्त्रयुग्मं, उत्तरासङ्गार्थं च. [2] क्षालित° F_2. [3] F_2, Pt_2 add पत्त्रैः पटादिभिः ऊर्णायत इति, ‘ऊर्णुञ् आच्छादने’. [4] महाधनमत्रास्ति Pt_2.

(पा.) तत्स्यादुद्गमनीयं—युगम्। मङ्गलवस्त्रमुद्गमनीयं स्यात्। अत्र युगग्रहणं प्रायिकाभिप्रायमिति [1]क्षीरस्वामी (पृ. १५७, श्लो. ११२)। धौतशब्देनात्र मङ्गलत्वं लक्ष्यते। ‘[2]गृहीतपत्युद्गमनीयवस्त्रा’ इति कुमारसंभवे (७. ११)॥ पत्त्रोर्णं धौतकौशेयम्। प्रक्षालितक्रिमिकोशजं पत्त्रोर्णं स्यात्॥ बहुमूल्यं महाधनम्। अधिकमूल्यार्हं वस्त्रं महाधनं स्यात्॥ ११२॥

[1] ‘युगमविवक्षितम्’ इत्येव मुद्रितग्रन्थे (पृ. १५७). [2] ‘गृहीतवत्युद्गमनीयवस्त्रम्’ इति तारकाख्याने B_3.

क्षौमं दुकूलं स्याद् द्वे तु निवीतं प्रावृतं त्रिषु॥ ११३॥
स्त्रियां बहुत्वे वस्त्रस्य दशाः स्युर्वस्त्रयोर्द्वयोः।
दैर्घ्यमायाम आनाहः परिणाहो विशालता॥ ११४॥
पटच्चरं जीर्णवस्त्रं समौ नक्तककर्पटौ।

(वि.) क्षौममिति—क्षुमया अतसीविशेषेण निर्मितं [1]क्षौमम्। दुकूलं रूढम्। प्रावारोत्तरासङ्गरूपेण द्विधा कूल्यत इति दुकूलम्। 'कूल आवरणे'। दुकूलनामनी॥ निवीयते स्म निवीतम्। 'वेञ् संवरणे'। प्राव्रियते स्म प्रावृतम्। 'वृञ् आवरणे'। प्रच्छादितपटनामनी॥ दश्यन्ते कण्टकादिभिः त्रुट्यन्ते दशाः। 'दंश दशने'। वस्यन्ते शिष्टैरिति वस्तयः। 'वस आच्छादने'। वस्त्रप्रान्तनामनी॥ [2]आयम्यते [3]आयामः। 'यम उपरमे'। आनह्यते आनाहः। 'णह बन्धने'। पटादिदैर्ध्यनामनी॥ परिणह्यते परिणाहः। विशालस्य भावः विशालता। विस्तारस्य नामनी॥ पूर्वं पटभूतं पटच्चरम्। पटदिति चरति स्फुटतीति वा। [4]जीर्णवस्त्रनाम॥ नजते [5]लज्जते नक्तकः। 'णज[6] व्रीडे'। लज्जायै कल्पते कर्पटः। 'कृपू सामर्थ्ये'। शिथिलतन्तुसंयोगवस्त्रनामनी॥ ११३–१४॥

[1] Pt$_2$ adds क्षूयते शोभनमिति, 'टुक्षु शब्दे'. [2] F$_2$, Pt$_2$ add दीर्घस्य भावः दैर्घ्यम्. [3] D$_2$ adds अनेन; हस्तादिना Pt$_2$. [4] F$_2$, Pt$_2$ add जीर्णं च तत् वस्त्रं च. [5] लज्जां जनयति D$_2$, K$_3$, K$_6$. [6] 'ओनजी व्रीडे' D$_2$, K$_6$.

(पा.) क्षौमं दुकूलं स्यात्। [1]दुकूलनामनी। 'पटावलि[2]'। द्वे तु—त्रिषु। आवृतवस्त्रनामनी। 'कप्पडमु'॥ स्त्रियां बहुत्वे—वस्त्रयोर्द्वयोः। [3]उपवीतोचितवस्त्रखण्डनामनी। 'बद्धे'॥ स्त्रियामिति रूढ्यपेक्षया स्त्रीलिङ्गनिर्देशः। वस्तय इति सामानाधिकरण्याद् बहुवचनम्[4]। 'वस्तिस्त्वक्ली भूम्नि दशा न षण्' इति वैजयन्ती (पृ. १६९, श्लो. १३१)। अनुक्तम्—'समौ त्वञ्चलपल्लवौ'। चेलान्तनामनी। 'चरंगु'॥ दैर्घ्यम्—आनाहः। दीर्घतानामानि। 'निडुपु'॥ परिणाहो विशालता। वैपुल्यनामनी[5]। 'वेडलुपु'॥ पटच्चरं जीर्णवस्त्रम्। जरद्वस्त्रनामनी॥ समौ नक्तककर्पटौ। मलिनवस्त्रनामनी॥ ११३–१४॥

[1] A$_1$ adds °वस्त्र°. [2] B$_3$ omits. [3] अपरकर्मोपवीतनाम A$_1$. [4] A$_1$ adds °प्रयोगः. [5] वैशाल्य° B$_3$.

वस्त्रमाच्छादनं वासश्चेलं वसनमंशुकम्॥ ११५॥
सुचेलकः पटोऽस्त्री ना वराशिः स्थूलशाटकः।

(वि.) वस्त्रमिति—वस्यतेऽनेनाङ्गमिति वस्त्रम्। 'वस आच्छादने'। वासश्च। सान्तोऽयम्। वसनं च। आच्छाद्यते देहोऽनेनेति आच्छादनम्। 'छद अपवारणे'। चिल्यतेऽनेनेति चेलम्। 'चिल वसने'। अंशुभिः छाद्यमानैस्तन्तुभिः

[1]कायतीति अंशुकम्। ‘कै शब्दे’। वस्त्रनामानि॥ शोभनश्चासौ चेलकश्च सुचेलकः। [2]पटयति देहं वेष्टयति पटः। ‘पट ग्रन्थे’। सुवस्त्रनाम॥ भृशमङ्गं वृणोतीति वराशिः। वरं श्रेष्ठं वरणं वा अश्नुत इति वा। [3]स्थूलशाटीनाम॥ ११५॥

[1] D_2, K_2, K_6 add चिरिचिरिति. [2] पटति वायुना, ‘पट गतौ’ Pt_2. [3] F_2, Pt_2 add स्थूलश्चासौ शाटकश्च स्थूलशाटकः; °वस्त्र° K_5.

(पा.) वस्त्रम्—वासश्चेलम्। [1]गौरादित्वात् (४. १. ४१) चेलीति सुभूतिटीका। वसनमंशुकम्। वस्त्रनामानि॥ सुचेलकः—अस्त्री स्यात्। सूक्ष्मवस्त्रनाम॥ ‘अंशुकं सूक्ष्मवस्त्रे स्याद् वस्त्रमात्रोत्तरीययोः’ इति विश्वप्रकाशिकापाठाद्[2] (पृ. १२, श्लो. १२३) अंशुकशब्दः सुचेलेऽपि स्यात्। ‘सिक् स्त्री पटोऽस्त्री सिचयो वासो वसनमंशुकम्’ इति वैजयन्तीपाठात् (पृ. १६८, श्लो. ११६) पटशब्दो [3]वस्त्रसामान्येऽपि स्यात्॥ वराशिः स्थूलशाटकः। स्थूलवस्त्रनाम। ‘[4]दोड्डुकोक’॥ ‘शार्दूलशम्बर[5]वराशिशलाटुशाटी’ इत्याद्यूष्मभेदपाठात् तालव्यः॥ ११५॥

[1] चेली गौरादिरिति A_1. [2] वचनात् B_3. [3] वस्त्रनामनि A_1. [4] B_3 omits. [5] शम्बल° A_1.

निचोलः प्रच्छदपटः समौ रल्लककम्बलौ॥ ११६॥
अन्तरीयोपसंव्यानपरिधानान्यधोंऽशुके।

(वि.) निचोल इति—निचोल्यते आच्छाद्यते[1] निचोलः। ‘चुल[2] आवरणे’। प्रच्छाद्यतेऽनेनेति प्रच्छदः। स चासौ पटश्च प्रच्छदपटः। शय्यादौ प्रच्छदपटनाम॥ रमन्तेऽस्मिन्निति रल्लकः। ‘रमु क्रीडायाम्’। काम्यते शीतालुभिरिति[3] कम्बलः। ‘कमु कान्तौ’। कम्बलनामनी॥ [4]जानुनाभ्योरन्तरे भवम्[5] अन्तरीयम्। उपसंवीयतेऽनेनेति उपसंव्यानम्। ‘व्येञ् संवरणे’। परिधीयतेऽनेनेति परिधानम्। [6]अधोंऽशुकनामानि॥ ११६॥

[1] F_2, Pt_2 add शय्यादिकं. [2] समुच्छ्राये W_2; अपवारणे K_5. [3] उपवेशनाय K_5, K_6. [4] नाभेरन्तरे भवं Pt_2. [5] K_5 adds वस्त्रं. [6] F_2, Pt_2 add अधःस्थितम् अंशुकम् अधोंऽशुकम्.

(पा.) निचोलः प्रच्छदपटः। [1]वस्त्वन्तराच्छादकवस्त्रनामनी। ‘गलिशेन’। ‘येन वस्त्वन्तराच्छाद्यते। स्यूतेन वास्यूतेन वा’ इति सुभूतिटीका। समौ—कम्बलौ।

रोमशाटिनामनी ॥ अनुक्तम्—'[2]झाटिः स्त्री कम्बलो महान्'। दीर्घायतकम्बलनाम। 'झाटिकम्बळी[3]' ॥ अन्तरीयो—अधोंऽशुके। अधःप्रावृतवस्त्रनामानि ॥ ११६ ॥

[1] B_3 omits वस्त्वन्तर°.　[2] झाटी B_3.　[3] B_3 omits.

द्वौ प्रावारोत्तरासङ्गौ समौ बृहतिका तथा ॥ ११७ ॥
संव्यानमुत्तरीयं च चोलः कूर्पासकोऽस्त्रियाम्।

(वि.) द्वाविति—[1]प्रव्रियतेऽनेनेति प्रावारः। 'वृञ् वरणे'। उत्तरे ऊर्ध्वाङ्गे आसज्यत इति उत्तरासङ्गः। 'षञ्ज सङ्गे'। [2]वर्हति बृहतिका। 'बृह वृद्धौ'। संवीयतेऽनेनेति संव्यानम्। 'व्येञ् संवरणे'। उत्तरे ऊर्ध्वाङ्गे भवम् उत्तरीयम्। उत्तरीयवस्त्रनामानि ॥ चोलयति आच्छादयतीति चोलः। 'चुल [3]आवरणे'। कूर्परे कफोणौ अस्यत इति कूर्पासकः[4]। 'असु क्षेपणे'। कूर्पासकनामनी ॥ ११७ ॥

[1] प्राव्रियते D_2, K_6; W_2 omits 3 lines.　[2] वर्हते K_5, K_6.　[3] आच्छादने Pt_2.
[4] कुर्पासः K_5, K_6.

(पा.) द्वौ प्रावारो—उत्तरीयं च। [1]उपरिप्रावरणनामानि ॥ अनुक्तम्—'जोटिशाटी द्विखण्डकः'। द्विखण्डकवस्त्रनाम। 'दुप्पटि'। 'पटी [2]स्यूतं पटयुगम्'। स्यूतं पटयुगं पटी स्यात्। 'पच्चडमु' ॥ चोलः—अस्त्रियाम्। कञ्चुकनामनी। 'अरचट्ट[3]' ॥ ११७ ॥

[1] बहिर्वस्त्रनामानि A_1.　[2] स्यूतांशुकयुगं A_1.　[3] A_1 adds स्त्रीकञ्चुकमिति च.

नीशारः स्यात् प्रावरणे हिमानिलनिवारणे ॥ ११८ ॥
अर्धोरुकं वरस्त्रीणां स्याच्चण्डातकमंशुकम्।

(वि.) नीशार इति—हिमानिलनिवारणे शीतवायुनिवारके प्रावरणे नीशारशब्दो वर्तते। निशीर्यते निवार्यते शीताद्यनेन नीशारः। 'शॄ हिंसायाम्'। शीता[1]निलवारणवस्त्रनाम ॥ [2]वरस्त्रीणामर्धोरुकम् ऊर्वोरर्धाच्छादकमंशु[3]कं चण्डातकमित्युच्यते। चण्डं [4]गुह्यस्थानम् अतति संवृणोतीति चण्डातकम्। 'अत सातत्यगमने'। वेश्यानामर्धोरुच्छादकांशुकनाम ॥ ११८ ॥

[1] °निवारण° K_5, W_2.　[2] वार° K_3.　[3] °छादनक° W_2.　[4] भगं K_6.

(पा.) निशारः—निवारणे। [1]शीतवातनिवारकमाच्छादनं निशारः स्यात्। 'गौरिवाकृतनीशारः प्रायेण शिशिरीकृतः' इति प्रयोगात् नीशारो दीर्घादिश्च[2]॥ अर्धोरुकं—अंशुकम्। उत्तमस्त्रीणामर्धोरुकं वस्त्रं चण्डातकं स्यात्। 'चल्लडमु'॥

'आधूयमानजघनस्थलपीड्यमान-
मर्धोरुकं त्रुटति पुत्र तवेक्षणेन।'

इति प्रयोगादर्धोरुकशब्दस्यापि तत्पर्यायत्वम्॥ ११८॥

---

[1] °वातादि° B_3. [2] °आदिरपि B_3.

स्यात् त्रिष्वाप्रपदीनं तत् प्राप्नोत्याप्रपदं हि यत्॥ ११९॥
अस्त्री वितानमुल्लोचो दूष्याद्यं वस्त्रवेश्मनि।

(वि.) स्यादिति—आप्रपदं पादाग्रपर्यन्तं प्राप्नोतीति[1] आप्रपदीनम्। वरस्त्रीणां पादाग्रलम्बिवस्त्रनाम॥ ऊर्ध्वदेशे वितन्यते वितानम्। 'तनु विस्तारे'। उपरि लोच्यते उल्लोचः[2]। 'लोचृ दर्शने'। गृहान्तरे उपरिबद्धचित्रांशुकनाम॥ दूष्यते स्वतो बहिर्देशो-[3]ऽनेनेति दूष्यम्। 'दुष वैकृत्ये'। आद्यशब्देन पटवासादयो गृह्यन्ते। वस्त्रवेश्मनाम॥ ११९॥

---

[1] W_2 adds व्याप्नोति. [2] उल्लोच्यते उद्ग्रीवेण D_2, K_2, W_2. [3] बहिर्देशगमनेन K_5, K_6, W_2.

(पा.) स्यात् त्रिषु—आप्रपदं हि यत्। [1]पादाग्रमभिव्याप्य वर्तमानं वस्त्रमाप्रपदीनं स्यात्। अविशेषाभिधानादितरविषयमपि[2] स्यात्।

'मुक्तामयं सारसनावलम्बि
भाति स्म दामाप्रपदीनमस्य।'

इति माघः (शिशु. ३. १०)। अनुक्तम्—'रेचको हस्तिकर्णः स्यात्'। [3]गजकर्णाकारपादकञ्चुकनामनी। '[4]ताब्लिगोणमु'। 'कौपीनं मलमल्लकः'। कौपीननामनी॥

'शिलं किमनलं भवेदनलमौदरं बाधितुं
पयः प्रसृतिपूरकं किमु न धारकं सारसम्।
अयत्नमलमल्लकः[5] पथि पटच्चरं कच्चरं
भजन्ति हि मुधा[6] बुधा अहह[7] कुक्षितः कुक्षितः'॥ (वै. प. श्लो. १)

अस्त्री—उल्लोचः। विताननामनी। 'मेलुकट्टु'। 'चन्द्रोदयश्चन्द्रातपश्चन्द्रा च [8]कदरश्च सः।' एतानि च। दूष्याद्यं वस्त्रवेश्मनि। दूष्यस्थूलादीनि वस्त्रगृहनामानि। 'दूष्यं स्थुलं[9] पटकुटी गुणलयनी केणिका[10] तुल्याः' इति वैजयन्त्याम् (पृ. १६९, श्लो. १२५) अभेदेनोक्तम् ॥ ११९ ॥

---

[1] °अप्यतीत्य A_1. [2] अन्यत्रापि B_3. [3] कर्णिका° A_1. [4] B_3 omits. [5] मलमल्लकं B_3. [6] मुदा A_1. [7] अहनि A_1. [8] कदकं A_1. [9] स्थूलं A_1. [10] श्रेणिका A_1.

प्रतिसीरा जवनिका स्यात् तिरस्करिणी च सा ॥ १२० ॥
परिकर्माङ्गसंस्कारः स्यान्मार्ष्टिर्मार्जना मृजा।

(वि.) प्रतिसीरेति—प्रतिसीयते प्रतिबध्यते प्रतिसीरा। 'षिञ् बन्धने'। जवते [1]प्रतिसरति जवनिका[2]। 'जुङ्गतौ[3]'। तिरस्क्रियतेऽनया तिरस्करिणी। इतरान् तिरस्करोतीति वा। [4]जवनिकानामानि ॥ मलमार्जनक्रिया परिकर्म। मालिन्यपरिमार्जनार्थं कर्म परिकर्म। अङ्गानि संस्क्रियन्तेऽनेनेति अङ्गसंस्कारः। मलापकर्षणव्यापारनामनी ॥ मृज्यते मलमनया मार्ष्टिः। मृजा च। मार्जना च। 'मृजष् शुद्धौ'। शोभालंकारयोः स्नानादिकृतनिर्मलत्वनामानि[5] ॥ १२० ॥

---

[1] प्रसरति K_3, K_5, W_2. [2] Pt_2 adds यवनिकेति पाठे युवन्ति जना अत्रेति, 'यु मिश्रणे'. [3] जुः सौत्रो धातुः D_2. [4] तिरस्करिणी° K_3. [5] निर्मलीकरणस्य F_2.

(पा.) प्रतिसीरा—तिरस्करिणी च सा। यवनिकानामानि। 'तेरचीर'। 'अपटी स्यात्[1] काण्डपटः'। एते द्वे च। अनुक्तम्—'[2]पर्यस्तिः स्यात् परिकरः पर्यङ्कश्चावसक्थिका[3]'। परिकरनामानि। 'नडिकेट्टु'॥ 'अञ्चलं त्वंशुकान्ते स्यात्'। वस्त्रान्तनाम ॥ 'नीवी सारसनश्च यः'। नीवीनामनी। परिकर्माङ्गसंस्कारः। अङ्गस्य स्नानोद्वर्तनादिसंस्कारः परिकर्म स्यात् ॥ स्यान्मार्ष्टिः—मृजा। तैलाद्युपलेपननामानि। 'निमुरुट[4]' ॥ १२० ॥

---

[1] ना A_1. [2] पर्यष्टिका A_1, B_3. [3] वसष्टिका A_1. [4] B_3 omits.

उद्वर्तनोत्सादने द्वे समे आप्लाव आप्लवः ॥ १२१ ॥

स्नानं चर्चा तु चार्चिक्यं स्थासकोऽथ प्रबोधनम् ।
अनुबोधः पत्रलेखा पत्राङ्गुलिरिमे समे ॥ १२२ ॥

(वि.) उद्वर्तनमिति—उद्वर्त्यतेऽनेनाङ्गमिति उद्वर्तनम्। 'वृतु वर्तने'। उत्साद्यते शरीरमलमनेन उत्सादनम्[1]। मलापकर्षणद्रव्यनामनी ॥ आप्लवति शरीरमलमनेनेति आप्लावः। आप्लवश्च। 'प्लुङ् गतौ'। स्नात्यनेन स्नानम्। 'ष्णा शौचे'। स्नाननामानि ॥ चर्च्यते भृत्याद्यङ्गमिति चर्चा। 'चर्च अध्ययने'। चर्चिकायां[2] साधु चार्चिक्यम्। चिरं तिष्ठतीति स्थासकः। 'ष्ठा गतिनिवृत्तौ'। गजाद्यङ्गकृतपाणिप्रतिबिम्बनामानि ॥ प्रबोध्यते [3]गन्धादिकमनेनेति प्रबोधनम[4]। अनुबुध्यतेऽनेनेति अनुबोधः। 'बुध अवगमने'। कुङ्कुमादिगन्धाभिव्यञ्जकतैलादिकनामनी[5] ॥ पत्राकारा लेखा पत्रलेखा। पत्राद्याकृतिलेखने अङ्गुल्याकृतिरपि कपोलादौ भवतीति पत्राङ्गुलिः। पत्ररेखानामनी ॥ १२१–२ ॥

---

[1] K_5 adds 'षद्लृ विशरणे'. [2] D_2, K_5, K_6 add चर्चने. [3] F_2, Pt_2 add कुङ्कुमादि. [4] अनुबोधश्च K_5, K_6. [5] अभिरञ्जक° W_2.

(पा.) उद्वर्तन—द्वे समे। क्लीबे। अङ्गलिप्ततैलाद्यपाकरणनामनी ॥ आप्लावः—स्नानम्। स्नाननामानि। 'मज्जनं चाभिषेकश्च'। एते द्वे च ॥ चर्चा तु—स्थासकः। हस्तन्यस्तकुङ्कुमादिच्छटानामानि ॥ अनुक्तम्—'अङ्गरागोऽनुलेपनम्'। उपलेपननामनी। '[1]मेयिपूंत' ॥ अथ प्रबोधनमनुबोधः। अव्यक्तापूर्वसौरभव्यक्तीकरणनामनी ॥ पत्रलेखा—इमे समे। स्तनकपोलादौ [2]कस्तूरिकादिविरच्यमानभक्तिविशेषनामनी ॥ 'पत्रवल्ली पत्रभङ्गः'। एते द्वे च ॥ १२१–२ ॥

---

[1] B_3 omits. [2] आदिभिः B_3.

तमालपत्रतिलकचित्रकाणि विशेषकम् ।
द्वितीयं च तुरीयं च न स्त्रियामथ कुङ्कुमम् ॥ १२३ ॥
काश्मीरजन्माग्निशिखं वरं बाह्लीकपीतने ।
रक्तसंकोचपिशुने धीरं लोहितचन्दनम् ॥ १२४ ॥

(वि.) तमालपत्रमिति—तमालपत्राकृतित्वात्[1] तमालपत्रम्। तिलति स्निह्यतीति तिलकम्। 'तिल स्नेहने'। चित्रयतीति चित्रकम्। 'चित्र चित्रीकरणे[2]'। विशिनष्टि

[3]शोभादिना विशेषकम् । 'शिष्लृ विशेषणे' । तिलकनामानि ॥ अत्र द्वितीयं पदं तिलकं तुरीयं चतुर्थं पदं विशेषकं च न स्त्रियाम् । पुंनपुंसकयोर्वर्तते इत्यर्थः ॥ शुष्कदशायां कुम् इति कौति शब्दं करोतीति कुङ्कुमम् । 'कु शब्दे' । काश्मीरदेशे[4] जन्मास्यास्तीति काश्मीरजन्म । अग्निवर्णा शिखा केसरा अस्येति अग्निशिखम् । व्रियते सेव्यते जनैरिति वरम् । 'वृञ् [5]संभक्तौ' । वाह्लीकदेशे भवं वाह्लीकम् । पीतयति [6]वस्त्रमिति पीतनम् । [7]रक्तवर्णं [8]संकोचमत्र रक्तसंकोचम् । गन्धेन सूचयतीति पिशुनम् । गन्धस्य सूचकत्वाद्वा । दधाति धीयते वा धीरम् । 'डुधाञ् धारणपोषणयोः' । स्थिरमिति पाठे स्थिरगन्धत्वात् स्थिरम् । लोहितवर्णोऽत्रास्तीति लोहितम् । चन्दयतीति चन्दनम् । लोहितमिव चन्दनं लोहितचन्दनम् । कुङ्कुमाख्यगन्धद्रव्यनामानि ॥ १२३–४ ॥

[1] °साम्यात् D_2, K_3, K_6. [2] वैचित्र्यकरणे K_5, W_2. [3] शोभां K_5, K_6. [4] °राख्य° K_2, K_5. [5] वरणे W_2. [6] चन्दनादिकं F_2, Pt_2. [7] रक्तं संकोचपिशुनमिति वा पाठः F_2, Pt_2. [8] आत्मनः संकोचं पिंशति सूचयतीति संकोचपिशुनम् F_2, Pt_2.

(पा.) तमालपत्र—विशेषकम् । तिलकनामानि । द्वितीयं—न स्त्रियाम् । अत्र द्वितीयतुरीयौ[1] तिलकविशेषकशब्दौ पुंनपुंसकलिङ्गौ[2] ॥ अथ कुङ्कुमं—लोहितचन्दने । कुङ्कुमनामानि । 'प्रियङ्गु घुसृणं वर्णम्' । एतानि त्रीणि च ॥ १२३–४ ॥

[1] B_3 omits. [2] अस्त्रियौ B_3.

राक्षा लाक्षा जतु क्लीबे यावोऽलक्तो द्रुमामयः ।
लवङ्गं देवकुसुमं श्रीसंज्ञमथ जायकम् ॥ १२५ ॥
कालीयकं च कालानुसार्यं चाथ समार्थकम् ।
वंशकागुरुराजार्हलोहक्रिमिजजोङ्गकम् ॥ १२६ ॥

(वि.) राक्षेति—[1]व्रणिनं रक्षतीति राक्षा । 'रक्ष पालने' । कुङ्कुमवत् लक्ष्यते लाक्षा । जायते [2]वृक्षेष्वेव जतु । 'जनी प्रादुर्भावे' । क्लीबे वर्तते । यौति वस्त्रादिनेति [3]यावः । 'यु मिश्रणे' । अलति पादम् [4]अलक्तः । 'अल भूषणादौ' । द्रुमस्य आमयो द्रुमामयः । लाक्षानामानि ॥ लूयते छिद्यते लवङ्गम् । 'लूञ् छेदने' । देवकुसुमद्युतियोगाद् देवकुसुमम्[5] । श्रियो संज्ञास्य[6] श्रीसंज्ञम् । लवङ्गनामानि ॥ जयति गन्धान्तरमिति जायकम् । [7]कालवर्णोऽस्यास्तीति कालेयकम् । कालीयकमिति वा पाठः । कालवर्णमनुसरतीति कालानुसार्यम् । कृष्णवर्णगन्धद्रव्यविशेषनामानि ॥ वंशवत् लघुत्वात् [8]वंशकम् । न गुरु अगुरु । राज्ञामर्हं राजार्हम् । लोहवर्णोऽत्रास्तीति लोहम्[9] ।

क्रिमिभिर्जन्यते[10] कृमिजम्। ‘जनी प्रादुर्भावे’। [11]जोङ्गपर्वते भवं जोङ्गकम्। अगुरुनामानि ॥ १२५–६ ॥

---

[1] व्रणिन: W_2.
[2] द्रुमेष्विति K_2, K_3.
[3] कालेन यातीति K_5, K_6.
[4] अलक्तक: D_2, K_6, W_2; अलति पादादिकम् अल:, अनक्ति वस्त्रादिकम् अक्त: । अलश्चासावक्तश्च Pt_2.
[5] देवानां प्रियं कुसुमं F_2, Pt_2.
[6] D_2, K_2, W_2 add नामानि.
[7] कालवर्णेन अनुसार्यं Pt_2.
[8] वन्यते याच्यते F_2, Pt_2.
[9] लोहवर्णत्वात् F_2, Pt_2.
[10] जम्यते, ‘जमु अदने’ D_2, W_2, Pt_2.
[11] जोङ्गकाख्यगिरिभवं F_2, Pt_2.

(पा.) लाक्षा राक्षा—द्रुमामयः। जतुनो नामानि। ‘[1]लक्क’॥ लवङ्गं—श्रीसंज्ञम्। लवङ्गनामानि॥ अथ जायकं—कालानुसार्यं च। [2]कालीयकाख्यगन्ध-[3]द्रव्यनामानि। कालेयकमिति कालीयकमिति चोभयथा पाठः। ‘कालीयकं च कालेयं वर्णकं कान्तिदायकम्’ इति व्याडिः॥ अथ समार्थकं—क्रिमिजजोङ्गकम्। अगरुनामानि॥ ‘[4]वनमायः काकतुण्डः’। एते द्वे च॥ १२५–६॥

[1] B_3 omits.
[2] कालेयाख्य° A_1.
[3] गन्धकाष्ठ° B_3.
[4] वनामल: A_1.

कालागुर्वगुरु स्यात् तन्मङ्गल्यं मल्लिगन्धि यत्।
यक्षधूपः सर्जरसो रालसर्वरसावपि ॥ १२७ ॥
बहुरूपोऽप्यथ वृकधूपकृत्रिमधूपके।

(वि.) कालागुर्विति—कालवर्णं च तदगुरु च कालागुरु। कालागुर्वेव [1]अगुरु। [2]कालागरुनामनी॥ यत् कालागुरु मल्लिकागन्धि तन्मङ्गल्यमित्युच्यते। [3]मङ्गले साधु मङ्गल्यम्। मल्लिकापुष्पपरिमलोऽत्र मल्लिगन्धि। श्वेतागरुनामनी॥ यक्षप्रियो धूपो यक्षधूपः[4]। सर्जवृक्षस्य [5]रसः सर्जरसः। राति प्रीतिं ददातीति [6]रालः। ‘रा दाने’। सर्वो रसो गन्धोऽत्र सर्वरसः। बहुविधं रूपं [7]स्वभावोऽस्य बहुरूपः। सर्जरसनामानि॥ वृणोति विश्वमिति वृकः सूर्यः, तत्प्रियो धूपः [8]वृकधूपः। [9]कृत्रिमश्चासौ धूपश्च कृत्रिमधूपः। दशाङ्गधूपनामनी॥ १२७॥

[1] अगर्विति पाठे अगे पर्वते रूयते अगरु। ‘रु शब्दे’ D_2, K_2, K_3, W_2.
[2] कृष्ण° K_2, K_3, W_2.
[3] मङ्गलयोग्यं K_5, K_6.
[4] यक्षान् धूपायति, ‘धूप संतापे’ K_3, K_5, K_6.
[5] निर्यास: K_5, K_6, W_2.
[6] अराल इति पाठे अर्यते प्रीत्या अराल: । ‘ऋ गतौ’ Pt_2.
[7] W_2 adds गन्धः.
[8] वृकस्य भानो: K_2, K_5, K_6, W_2.
[9] F_2, W_2 add कृत्या (करणेन Pt_2) निर्मितः कृत्रिमः.

(पा.) कालागर्वगरु[1] स्यात्। [2]कृष्णमगरु अगरु स्यात्। तद् मङ्गल्या मल्लिगन्धियत्। मल्लिकाकुसुमवासनागरु मङ्गल्या[3] स्यात् ॥ यक्षधूपः—बहुरूपोऽपि । सर्जरसनामानि ॥ [4]अरालेत्यपि पदभङ्गः। 'अरालः सर्जजे[5] वक्रे' इति रभसकोशः॥ अथ वृकधूप—धूपकौ । दशाङ्गादिधूपनामानि ॥ १२७ ॥

---

[1] अगुरु B_3. [2] कृष्णागुरुनामानि B_3. [3] मङ्गल्यम् B_3. [4] A_1 adds सर्वरस°. [5] सर्जुजे A_1.

तुरुष्कः पिण्डकः सिल्हो यावनोऽप्यथ पायसः ॥ १२८ ॥
श्रीवासो वृक्षधूपोऽपि श्रीवेष्टसरलद्रवौ ।

(वि.) तुरुष्क इति—तुरुष्कदेशे भवः तुरुष्कः। [1]पिण्डाकारत्वात् पिण्डकः। सिल्यते उच्छीयते सिल्हः। 'षिल उञ्छे[2]'। यवनदेशे तुरुष्कदेशे भवो यावनः। सल्लकीत्वगादिना संपादितस्य धूपस्य नामानि॥ [3]देवदारुपयसो विकारः पायसः। [4]श्रियो वासः श्रीवासः। वृक्षाज्जातो धूपः [5]वृक्षधूपः। श्रिया वेष्टयते श्रीवेष्टः। 'वेष्ट वेष्टने'। सरलस्य[6] देवदारुणो[7] द्रवः निर्यासः सरलद्रवः। देवदारुनिर्यासकृतधूपनामानि ॥१२८॥

---

[1] पिण्डीक्रियते K_2, K_5, W_2. [2] उञ्छः उच्चयनं (Pt_2) अवदानं W_2. [3] Pt_2 adds सरल°. [4] Pt_2 adds सौभाग्यहेतुत्वेन. [5] वृकधूप इति पाठे वृकस्य भानोर्धूपः D_2, W_2. [6] K_3, W_2 add °वृक्ष°. [7] F_2, Pt_2 omit.

(पा.) तुरुष्कः—यावनोऽपि। यवनदेश्यधूपद्रव्यनामानि। '[1]चिल्लमङ्गि'॥ अथ पायसः—श्रीवेष्टसरलद्रवौ। [2]सरलद्रवाख्यधूपद्रव्यनामानि। [3]भाषायां 'पालमङ्गि' ॥ १२८ ॥

---

[1] A_1 adds आन्ध्रभाषया. [2] सरलधूप° A_1. [3] B_3 omits.

मृगनाभिर्मृगमदः कस्तूरी चाथ कोलकम् ॥ १२९ ॥
कक्कोलकं कोशफलमथ कर्पूरमस्त्रियाम् ।
घनसारश्चन्द्रसंज्ञः सिताभ्रो हिमवालुका ॥ १३० ॥

(वि.) मृगनाभिरिति—मृगनाभिभवत्वाद्[1] मृगनाभिः। मृगस्य मदो मृगमदः॥ कस्तूरी मृगविशेषः, तत्संबन्धित्वात् कस्तूरी। [2]कस्तूरिकानामानि॥ कोलं वदरीफलं,

तत्सदृशत्वात् कोलकम्। ककन्तेऽत्रेति कक्कोलकम्। 'कक लौल्ये'। तक्कोलकमिति वा पाठः। कोशे शिम्ब्यां फलानि बीजान्यस्य कोशफलम्। [3]तक्कोलनामानि ।। कल्पते सुखाय कर्पूरम्[4]। 'कृपू सामर्थ्ये'। घनसारः वर्षोपलः तस्येव शैत्यमस्यास्तीति [5]घनसारः। [6]चन्द्रस्य संज्ञा नामान्यस्य सन्तीति चन्द्रसंज्ञः। सिताभ्रवत् शौक्ल्ययोगात् सिताभ्रः। हिमा च सा वालुका च हिमवालुका। कर्पूरनामानि ।। १२९–३० ।।

---

[1] °नाभ्यां भवति K_2, K_6, W_2. [2] कस्तूरी° D_2, K_2, K_5, W_2. [3] कक्कोल° W_2. [4] कर्पूरः D_2, K_2, K_6. [5] शीतलत्वेन घनतुल्यसारत्वात् F_2, Pt_2. [6] Pt_2 adds आह्लादकत्वेन.

(पा.) मृगनाभिः—कस्तूरी च। कस्तूरीनामानि ।। कस्तूरीशब्दः तन्मृगेऽपि स्यात्। 'शिवेव स्याद् गन्धमृगः कस्तूरी [1]मृगपालिका' इति वैजयन्ती (पृ. ६७, श्लो. ३५)। [2]तन्मृगाण्डेऽपि स्यात्। 'अण्डौ[3] तु तस्याः कस्तूरी राजार्हं शितिचन्दनम्'। इति वैजयन्ती (पृ. ६८, श्लो. ३६)। अथ कोलकं—कोशफलम्। कर्कोलनामानि। कर्कोलस्थाने [4]कक्कोलतक्कोलशब्दौ पठन्ति ।। अथ कर्पूरं—हिमवालुका। कर्पूरनामानि ।। 'स्फटिका[5] रेणुसारश्च'। एते द्वे च ।। १२९–३० ।।

---

[1] मृगनाभिका A_1, B_3. [2] अस्थन्यपि A_1. [3] अस्थ्नौ A_1. [4] कङ्कोल° A_1. [5] स्फटिकः A_1, B_3.

गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियाम्।
तैलपर्णिकगोशीर्षे हरिचन्दनमस्त्रियाम् ।। १३१ ।।

(वि.) गन्धसार इति—गन्धेन सारो गन्धसारः। मलयशैले जातः मलयजः। 'जनी प्रादुर्भावे'। भद्रा श्रीः शोभात्रास्तीति भद्रश्रीः। चन्दयतीति चन्दनः। 'चदि आह्लादने'। चन्दननामानि ।। मलयैकदेशे तैलपर्णाख्यगिरौ[1] भवं तैलपर्णिकम्। [2]गोशीर्षाकारपर्वते[3] भवं गोशीर्षम्। हरिवर्णं चन्दनं हरिचन्दनम्। पीतवर्णचन्दननामानि ।। १३१ ।।

---

[1] °शैले D_2, K_3, K_5; °पर्णिकशैले W_2. [2] K_3 omits आकार. [3] मलयशृङ्गे F_2, Pt_2.

(पा.) गन्धसारो—चन्दनोऽस्त्रियाम्। चन्दननामानि ।। 'श्रीखण्डश्च [1]पटीरश्च'। एते द्वे च। तैलपर्णिक—हरिचन्दनमस्त्रियाम्। पीतवर्णचन्दननामानि ।। १३१ ।।

---

[1] पाटीरः A_1.

तिलपर्णी तु पत्राङ्गं रञ्जनं रक्तचन्दनम् ।
कुचन्दनं चाथ जातीकोशजातीफले समे ॥ १३२ ॥

(वि.) तिलपर्णीति—तिलपर्णाख्यनद्यां भवा[1] [2]तिलपर्णी । पत्रम् अङ्गं प्रयोजनमस्येति [3]पत्राङ्गम् । रञ्जयतीति रञ्जनम् । 'रञ्ज रागे' । रक्तं च तत् चन्दनं च रक्तचन्दनम् । कौ भुवि जातं चन्दनं कुचन्दनम्[4] । लोहितचन्दननामानि ॥ जात्याः लताविशेषस्य कोशं जातीकोशम् । जात्याः फलं जातीफलम् । [5]जातीफलनामनी ॥ १३२ ॥

---

[1] भवति W_2. [2] तिलस्येव पर्णान्यस्य F_2, Pt_2. [3] पत्रे मकरिकापत्रे अङ्गति F_2, Pt_2. [4] निर्गन्धत्वेन कुत्सितं चन्दनं Pt_2. [5] 'जाजिकायपेल्लु' K_3.

(पा.) तिलपर्णी तु—कुचन्दनं च । [1]रक्तचन्दननामानि ॥ अथ जातीकोश—समे । जातीफलनामनी । 'जाजिकाय' ॥ १३२ ॥

---

[1] B_3 adds कुचन्दनं च पत्राङ्ग इति रभसः.

कर्पूरागरुकस्तूरीकक्कोलैर्यक्षकर्दमः ।
गात्रानुलेपनी वर्तिर्वर्णकं स्याद्विलेपनम् ॥ १३३ ॥
चूर्णानि वासयोगाः स्युर्भावितं वासितं त्रिषु ।

(वि.) कर्पूरेति—यक्षाणां कर्दमवत् [1]सुलभत्वाद् यक्षकर्दमः । कर्पूरागरुकस्तूरीतक्कोलैः [2]मिश्रीकृतसुगन्धद्रव्यनाम[3] ॥ गात्रमनुलिप्यतेऽनया गात्रानुलेपनी[4] । 'लिप उपदेहे' । [5]वर्तते गात्रमनया वर्तिः । सुगन्धिवर्तिनामनी ॥ वर्णयति देहं [6]वर्णकम् । 'वर्ण स्तुतौ' । विलिप्यते गात्रमनेनेति विलेपनम्[7] । 'लिप उपदेहे' । चन्दनादिलेपनामनी ॥ चूर्ण्यन्त इति चूर्णानि । 'चूर्ण पेषणे' । वासाय सुरभीकरणाय युज्यन्त इति वासयोगाः । 'युजिर् योगे' । [8]सर्ववासनायोगनाम ॥ भाव्यते [9]कस्तूर्यादिनेति भावितम् । 'भुवो अवकल्कने' । वास्यते सुगन्धेन वासितम् । 'वस स्नेहमोहच्छेदापहरणेषु' । सुगन्धवासितद्रव्यनामनी ॥ १३३ ॥

---

[1] आर्द्रत्वात् कर्दमतुल्यत्वाच्च F_2, Pt_2. [2] मिश्रित° W_2. [3] सुगन्धि° D_2, K_2. [4] °लेपिनी K_5. [5] K_3 omits five lines; वर्त्यते श्लक्ष्णीक्रियते, 'वृतु वर्तने' F_2, Pt_2. [6] वर्णान्तरं करोति F_2, Pt_2. [7] विलिख्यतेऽनेन विलेखनम् इति वा पाठः W_2. [8] वासन° K_2, K_5. [9] सुरभिद्रव्यैः Pt_2.

(पा.) कर्पूरागरु—यक्षकर्दमः। कर्पूरादिचतुष्टयसिद्धः कर्दमो यक्षकर्दमः स्यात्।

'कर्पूरागरुकस्तूरीकक्कोलघुसृणानि च।
एकीकृतमिदं सर्वं यक्षकर्दममिष्यते॥'

इति ([1]व्याडिः)

'कर्पूरागरुकस्तूरी कुङ्कुमं चन्दनं तथा।
महासुगन्धमित्युक्तं नामतो यक्षकर्दमः॥'

इति (ध. नि. ७. २५)। अत्र कक्कोलस्थाने कुङ्कुमचन्दने भवतः[2]। गात्रानुलेपनी वर्तिः। अनुलेपनतूलिकानाम॥ वर्णकं स्याद् विलेपनम्। अनुलेपनद्रव्यनाम॥ अनुक्तम्—'उपला तु दृषत्पुत्री'। कस्तूर्यादिघर्षणोपलनाम॥ चूर्णानि वासयोगाः स्युः। गन्धयुक्ता वक्ष्यमाणवासनयोगाश्चूर्णशब्दवाच्याः। 'अलकेषु चमूरेणुश्चूर्णप्रतिनिधिः[3] कृतः' इति (रघु. ४. ५४)। बहुवचनेन[4] ते बहुविधाः।

'चन्दनं कुङ्कुमं तुल्यं वरार्धमभिधीयते।
त्रिभागकुङ्कुमं यच्च तदुक्तं नाट्यपुष्पकम्॥
त्रिसुगन्धमिति ख्यातं त्वगिलापत्रकैस्त्रिभिः।
[5]चातुर्जातं तदेव स्यान्नागकेसरसंयुतैः॥
सर्वगन्धमिदं सिन्धुकक्कोलागरुसिह्लकम्॥'

इत्यादि॥ भावितं वासितं त्रिषु। गन्धग्राहितस्य वस्तुनो नामनी॥ १३३॥

---

[1] व्याडिरिति टीकासर्वस्वे (पृ. ३८५). [2] स्याताम् A_1. [3] प्रतिनिधी° A_1. [4] A_1 adds ग्रहण°. [5] चतुर्जातम् B_3.

संस्कारो गन्धमाल्याद्यैर्यः स्यात् तदधिवासनम्॥ १३४॥
माल्यं मालास्रजौ मूर्ध्नि केशमध्ये तु गर्भकः।

(वि.) संस्कार इति—गन्धमाल्यधूपाद्यैः वस्त्रताम्बूलादीनां यः संस्कारः तदधिवासनमित्युच्यते। अधि अधिकं वास्यतेऽधिवासनम्। गन्धपुष्पादिकृतसंस्कारनाम॥ मल्यते धार्यत इति माल्यम्। 'मल मल्ल धारणे'। मालैव वा। मल्यते केशेषु माला। सृज्यते रच्यते क्रमबन्धेन स्रक्। 'सृज विसर्गे'। [1]तन्तुबद्धकुसुमकलापनामानि॥ [2]गर्भे अन्तः क्रियत इति गर्भकः। केशमध्यस्थमाल्यनाम॥ १३४॥

---

[1] °बन्ध° K_2, K_5. [2] Pt_2 adds केशमध्ये प्रच्छन्नत्वेन स्थितत्वात्.

(पा.) संस्कारो—अधिवासनम् । गन्धमाल्यादिभिः क्रियमाणो वस्त्रकेशादिसंस्कारो यस्तदधिवासनं [1]स्यात् । तदिति विधेयप्राधान्येन नपुंसकलिङ्गनिर्देशः । अधिवासना च स्यात् । 'संस्कारो [2]गन्धमाल्याद्यैरपुमानधिवासनम्[3]' इति वैजयन्ती (पृ. १७१, श्लो. १५६) ॥ माल्यं—मूर्ध्नि । शिरसि निक्षिप्तमालानामानि । '[4]स्रग्माला माल्यमाख्यातम्[5]' इति हलायुधः (अ. मा. २. ३९७) ॥ केशमध्ये—गर्भकः । शिरोरुहान्तरनिक्षिप्तः सरो गर्भकः स्यात् ॥ १३४ ॥

[1] इत्युच्यते A_1.　[2] °धूपाद्यैः इति मुद्रितग्रन्थे.　[3] न पुमान् B_3.　[4] स्रड्माला A_1, B_3.　[5] A_1, B_3 add इति सामान्ये.

प्रभ्रष्टकं शिखालम्बि पुरोन्यस्तं ललामकम् ॥ १३५ ॥
प्रालम्बमृजुलम्बि स्यात् कण्ठाद्वैकक्षकं तु तत् ।
यत् तिर्यक् क्षिप्तमुरसि शिखास्वापीडशेखरौ ॥ १३६ ॥

(वि.) प्रभ्रष्टकमिति—केशमध्यात् प्रभ्रष्टं प्रभ्रष्टकम् । [1]शिखालम्बिमाल्यनाम ॥ ललाटे ललतीति ललामकम् । 'लल विलासे' । मुक्ताजालवद्भासमानललाटपरिरचितमाल्यनाम ॥ प्रालम्बत इति प्रालम्बम् । 'लबि [2]लम्बने' । कण्ठादार्जवेनोरसि [3]लम्बमानमाल्यनाम ॥ कक्षाद् विगतं विकक्षं, उरःस्थलं पृष्ठभागश्च । तत्र वर्तमानं वैकक्षकम् । यज्ञोपवीतवद् उरसि तिर्यक्क्षिप्तमाल्यनाम[4] ॥ आपीड्यते दृढबन्धेन आपीडः । 'पीड अवगाहने' । शिखरं शिरोऽग्रं, तस्यायमिति शेखरः । शिङ्खति[5] धारणस्थानाद् अपसर्पतीति वा शेखरः । 'शिखि गतौ' । विवाहादौ [6]ललाटयोग्यकुसुमदामनामनी ॥ १३५–६ ॥

[1] °मध्यप्रभ्रष्टत्वात् K_3, K_5, K_6.　[2] आलम्बने K_3, K_6.　[3] ऋजुलम्बिमालानाम K_2, K_3.　[4] °विक्षित° W_2.　[5] शेते W_2; शेरते K_2; W_2 adds 'शीङ् स्वप्ने.'　[6] K_3 adds °धृत°.

(पा.) प्रभ्रष्टकं शिखालम्बि । शिखायां [1]लम्बमानं माल्यं प्रभ्रष्टकं स्यात् । '[2]जारुदण्ड' ॥ पुरो—ललामकम् । पुरोभागे विन्यस्तत्रिमूलकुड्मलस्रग् ललामकं स्यात् । '[2]सूसकमु' ॥ प्रालम्बं—कण्ठात् । गलादवक्रतया [3]लम्बमानमाल्यं प्रालम्बं स्यात् । 'नेवळ्मु' ॥ [4]वैकक्षकं—क्षिप्तमुरसि । उत्तरीयवद्[5] वक्षसि निक्षिप्तस्रग् वैकक्षकं[4] स्यात् ॥ शिखासु—शेखरौ । शिरःपुरःक्षिप्तशुभिकास्रजो नाम[6] । '[7]वाशिकदण्ड' ॥ १३५–६ ॥

[1] भ्रश्यमानतया निक्षिप्तं A_1. [2] B_3 omits. [3] लम्बनमाल्यं A_1. [4] वैकक्ष्यकं A_1. [5] उत्तरीयतया A_1. [6] आपीडः शेखरश्चेत्युच्यते A_1. [7] वासिक° B_3.

रचना स्यात् परिस्पन्द आभोगः परिपूर्णता ।
उपधानं तूपबर्हः शय्यायां शयनीयवत् ॥ १३७ ॥
शयनं मञ्चपर्यङ्कपल्यङ्काः खट्वया समाः ।

(वि.) रचनेति—रच्यते रचना । 'रच प्रतियत्ने' । परितः स्पन्दः शरीरव्यापारः परिस्पन्दः । 'स्पदि किंचिच्चलने' । [1]माल्यादिविविधरचनानामनी ॥ आभुज्यतेऽनेन[2] आभोगः । 'भुज पालनाभ्यवहारयोः' । [3]रचनापरिपूर्णतानाम ॥ उपधीयते शिरोऽत्र उपधानम् । 'डुधाञ् धारणपोषणयोः' । उपबृह्यत उन्नम्यते शिरोऽत्रेति [4]उपबर्हः । 'बृहि वृद्धौ' । [5]तूलगर्भितवस्त्रादिरचितशिरोऽवस्थानस्थाप्यनामनी ॥ शेतेऽ[6]त्र शय्या । शयनीयं च । शयनं च । 'शीङ् स्वप्ने' । शय्यानामानि ॥ [7]मञ्च्यते धार्यते [8]नरोऽनेन मञ्चः । 'मचि धारणोच्छ्रायपूजनेषु' । परितोऽङ्क्यते [9]उपभोगादिना लक्ष्यत इति पर्यङ्कः । 'अकि लक्षणे' । पल्यङ्कश्च । रलयोरभेदात् । [10]खट्यते काङ्क्ष्यते खट्वा । 'खट काङ्क्षायाम्' । खट्वानामानि ॥ १३७ ॥

[1] माल्यानां K_2, W_2. [2] K_5, K_6 omit. [3] Pt_2 adds वस्तुनो गुणादेर्वा परिपूर्णता समग्रत्वं. [4] उपबर्हणं D_2, K_6. [5] माला K_5, K_6. [6] अस्यामिति F_2, Pt_2. [7] मञ्चते D_2. [8] शिरः K_5. [9] भूष्यते K_3, K_5, K_6. [10] खटन्त्येनां K_5, K_6.

(पा.) रचना—परिस्पन्दः[1] । माल्यादिनिर्माणनामनी ॥ 'प्रतियत्नः परिस्पन्दः पुमांसौ रचना स्त्रियाम्' इति [2]केषांचिद्रचना माल्यादिनिर्माणम् ।

'[3]श्रन्थनं ग्रन्थनं गुम्फः संदर्भो रचना [4]न ना ।
परिवारः परिजनः[5] परिस्पन्दः परिग्रहः ।
तथोपकरणं प्रोक्तं परिबर्हः परिच्छदः ॥'

परिस्पन्दो दर्पणाद्युपकरणमिति केचित् ॥ आभोगः परिपूर्णता । पूर्णत्वनाम ॥ उपधानं तूपबर्हः[6] । शिरःपरिबर्हनामनी । 'तलगाड' । अनुक्तम्—'गभोलिः स्त्री स्तवरकः[7] प्रग्रीवो मत्तवारणः' । मत्तवारणनामानि । 'वोरुगु' ॥ शय्यायां—शयनम् । [8]शयनक्रियानामानि । शयनशब्द उत्तरपर्यायलिङ्गसापेक्षोऽपि स्यात् । 'शय्यायां शयनं

न स्त्री निद्रासुरतयोर्न पुम्' इति वैजयन्ती (पृ. २६३, श्लो. ८५)॥ मञ्चपर्यङ्क—समाः। मञ्चनामानि ॥ १३७ ॥

[1] परिस्यन्दः A_1.　[2] माल्यादिनिर्माणमिति केचित् B_3.　[3] श्रथनं A_1, B_3.
[4] मता A_1, B_3.　[5] परिकरः A_1.　[6] उपबर्हम् A_1.　[7] स्तबरकः A_1.
[8] शय्यानामानि A_1.

गेन्दुकः कन्दुको दीपः प्रदीपः पीठमासनम् ॥ १३८ ॥
समुद्गकः संपुटकः प्रतिग्राहः पतद्ग्रहः ।

(वि.) गेन्दुक इति—[1]गगने इन्दुरिव भातीति गेन्दुकः। कं शिरो दुनोतीति कन्दुकः। 'टुदु [2]उपतापे'। कन्दुकनामनी॥ दीप्यत इति दीपः। प्रदीपश्च। 'दीपी दीप्तौ'। दीपनामनी ॥ पिठ्यते संश्लिष्यत इति पीठम्[3]। 'पिठ हिंसासंक्लेशनयोः'। आस्तेऽत्रेत्यासनम्। 'आस उपवेशने'। पीठनामनी॥ सम्यगुद्गच्छतीति समुद्गकः। 'गम्लृ गतौ'। संपुट्यते पिधानेन संपुटकः। 'पुट संश्लेषणे'। कस्तूर्याद्यावपनार्थं निर्मितकरण्डादेर्नामनी ॥ [4]प्रतिगृह्णातीति प्रतिग्राहः। पतत्ताम्बूलादिकं गृह्णातीति पतद्ग्रहः। 'ग्रह उपादाने'। चर्वितताम्बूलनिक्षेपार्थं निर्मितपात्रनामनी ॥ १३८ ॥

[1] W_2 adds के.　[2] परितापे K_6.　[3] पीठ्यते, 'पीठ संश्लेषणे' Pt_2.
[4] F_2, Pt_2 add चर्वितं ताम्बूलादिकं.

(पा.) [1]गेन्दुकः कन्दुकः। कन्दुकनामनी। 'चेण्डु बन्दु'। अनुक्तम्—'क्रीडादुरो [2]गिरियकः'। 'अच्चनगायलु'। दीपः प्रदीपः। दीपनामनी ॥

'दीपो गृहमणिर्वर्तिर्दीपवृक्षः[3] शिखातरुः।
वर्तिर्दशा दीपवल्ली दीपिकाञ्जनकज्जले ॥'

इत्यन्यत्र साङ्गाभिधानम् ॥ पीठमासनम्। पीठनामनी ॥ समुद्गकः संपुटकः। [4]आभरणादिपेटिकानामनी ॥ प्रतिग्राहः पतद्ग्रहः। कलाचिकानामनी। 'पडिगेमु' ॥ १३८ ॥

[1] गण्डुकः A_1.　[2] गिरीयकः B_3.　[3] वर्ती A_1.　[4] भूषणादि° B_3.

प्रसाधनी कङ्कतिका पिष्टातः पटवासकः ॥ १३९ ॥
दर्पणे मुकुरादर्शौ व्यजनं तालवृन्तकम् ।

इति मनुष्यवर्गः

(त्रि.) प्रसाधनीति—प्रसाध्यन्ते [1]केशा अनयेति प्रसाधनी । ‘[2]साध संसिद्धौ’। केशेषु[3] कङ्कते कङ्कतिका । ‘ककि गतौ’। केशविशोधकस्य[4] दन्तमयस्य[5] नामनी ।। पिष्टभावम् अततीति पिष्टातः । ‘अत सातत्यगमने’। [6]पटं वासयतीति पटवासः । [7]हरितालादिचूर्णनामनी ।। चालनीनामनी इति केचित् ।। दृप्यतेऽनेन सुवेषाभिमानादिति[8] दर्पणः । ‘दृप दृप्तौ’। मङ्क्यतेऽनेन मुकुरः । ‘मकि मण्डने’। मकुर इति वा पाठः । आदृश्यते [9]रूपमत्रेत्यादर्शः । ‘दृशिर् प्रेक्षणे’। दर्पणनामानि ।। व्यज्यते श्रमोऽपनीयतेऽनेनेति व्यजनम् । ‘अज गतिक्षेपणयोः’। तालवृन्तवद् वृन्तमस्येति तालवृन्तकम् । व्यजननामनी ।। १३९ ।।

इति श्रीलिङ्गयसूरिविरचितायाममरकोशपदविवृतौ मनुष्यवर्गः

---

[1] °ते केशः W₂; K₂ adds शोध्यन्ते. [2] D₂, K₆, Pt₂ add राध. [3] केशान्, ‘कक लौल्ये’ K₅, K₆. [4] शोधनकस्य W₂. [5] दन्तादि° W₂. [6] पटे वास्यते K₅, K₆; पटा वास्यन्तेऽनेन Pt₂. [7] वस्त्रादिवासनाद्रव्यस्य W₂. [8] रूपाभिमानेन D₂, K₆, W₂. [9] अस्मिन्नात्मनः प्रतिबिम्बं Pt₂.

(पा.) प्रसाधनी कङ्कतिका । केशसंस्कारकारिणीनामनी । ‘दूवेन[1]’ ।। पिष्टातः पटवासकः । धूलिगुलुच्छनामनी । ‘बुक्कापिण्डि’ ।। ‘धूलिगुच्छः समाख्यातः [2]पांशुचामरमित्यपि’। एते द्वे च ।। दर्पणो—आदर्शौ । आदर्शनामानि । ‘संमुखीनात्मदर्शाब्दाः’। एतानि त्रीणि च ।। व्यजनं तालवृन्तकम् । व्यजननामनी ।। वीजनं जलार्द्रा चेत्येते च । ‘आलावर्तं तु वस्त्रव्यजनम्’। प्रान्तस्यूतवस्त्रव्यजननाम । ‘आलपट्टि’ ।। ‘आलावर्तं[3] तु वस्त्रेण’ इति वैजयन्ती (पृ. १७१, श्लो. १५९) ।। १३९ ।।

इति [4]श्रीवत्सनृसिंहसूरिसुतमल्लिनाथसुधीविरचितेऽमरपदपारिजाते मनुष्यवर्गः

---

[1] B₃ omits. [2] हंसचामरम् B₃. [3] आलावर्तः इति मुद्रितग्रन्थे. [4] °नरसिंह° A₁.

७. ब्रह्मवर्गः

संततिर्गोत्रजननकुलान्यभिजनान्वयौ ।
वंशोऽन्ववायः संतानो वर्णाः स्युर्ब्राह्मणादयः ॥ १ ॥

(वि.) इदानीं सर्ववर्णानां संकीर्णजातीनां सामान्यसंततेर्नामानि प्रथममाह—संततिरिति। संतन्यतेऽनया संततिः। 'तनु विस्तारे'। गूयते शब्द्यते[1] गार्ग्यो वसिष्ठ इति गोत्रम्। '[2]गुङ् अव्यक्ते शब्दे'। जन्यते उत्तरोत्तरमनेनेति जननम्। 'जनी प्रादुर्भावे'। कुल्यतेऽनेन बन्धुवर्ग इति कुलम्। 'कुल संस्त्याने बन्धुषु च'। अभिजन्यतेऽनेनेति[3] अभिजनः[4]। अन्वीयते संबध्यतेऽनेनेति अन्वयः। 'इण् गतौ'। वन्यते याच्यते वंशः। 'वनु याचने'। अन्वीयते पूर्वः परश्चेति अन्ववायः। 'इण् गतौ'। संतन्यते संतानः। 'तनु विस्तारे'। वंशनामानि ॥ वर्ण्यन्ते कपिलारुणपीतकृष्णवर्णैर्निरूप्यन्त[5] इति वर्णाः[6]। 'वर्ण स्तुतौ'। ब्राह्मणक्षत्रियवैश्यशूद्राणां [7]सामान्यनाम ॥ १ ॥

[1] संवेद्यन्ते W_2. [2] 'गु शब्दे' K_2, K_3, K_6. [3] K_5, K_6 add नैरन्तर्येण. [4] D_2, K_2, W_2 add 'जनी प्रादुर्भावे'. [5] D_2, K_6 add यथाक्रमं. [6] K_2, W_2, Pt_2 add:

'कपिलाश्चारुणाः पीताः कृष्णाश्चेति पृथक्पृथक्।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चेति विवक्षिताः ॥'

इति विष्णुपुराणे. [7] W_2 adds चतुर्विधानां.

(पा.) [1]कलकण्ठकण्ठनिनदप्रमदाभि-
मुदितान्तरङ्गमुरगेन्द्रविभूषम्।
भवभीतिभञ्जनमुमारुचिराङ्गं
कलधौतशैलनिलयं कलयामि ॥

संततिः—संतानः। [2]संततिनामानि ॥ वर्णाः—ब्राह्मणादयः। ब्राह्मणक्षत्रियवैश्यशूद्राश्चेत्येते चत्वारो वर्णशब्दवाच्याः ॥ १ ॥

[1] B_3 omits the verse. [2] विद्यया वा धनेन वा ख्यातवर्णपुरुषापत्यसन्ताननामानि A_1.

विप्रक्षत्रियविट्शूद्राश्चातुर्वर्ण्यमिति स्मृतम्।
राजबीजी राजवंश्यो बीज्यस्तु कुलसंभवः ॥ २ ॥

(वि.) विप्रेति—चत्वारो वर्णा एव चातुर्वर्ण्यम्। विप्रक्षत्रियविट्शूद्राणां चतुर्विधानां नाम ॥ राज्ञो बीजमस्येति राजबीजी। राजवंशे भवो राजवंश्यः। [1]राजभूतमातापितृजन्यनामनी ॥ बीजे कुले भवो बीज्यः। कुले संभवोऽस्य कुलसंभवः। सत्कुलसंभवनाम ॥ २ ॥

[1] राजमाता° W_2.

(पा.) विप्रक्षत्रिय—स्मृतम् । त एव चत्वारो वर्णाश्चातुर्वर्ण्यमित्युच्यते ।

> 'ब्रह्मक्षत्रियविट्शूद्रा इति वर्णाश्चतुष्टये ।
> उपवर्णास्तु संकीर्णा विवर्णास्त्वन्त्यजातयः ॥'

इति वैजयन्ती (पृ. ७२, श्लो. २) ॥ राजबीजी राजवंश्यः । राज्ञां कुले जातो राजबीजी स्यात् ॥ बीज्यस्तु कुलसंभवः । [1]कुले उत्पन्नो बीज्यः स्यात् । सूर्यबीज्यो [2]रामः । सोमबीज्यो युधिष्ठिरः ॥ २ ॥

[1] A_1 adds यस्य कस्यचित्. [2] दाशरथिः B_3.

माहाकुलकुलीनार्यसभ्यसज्जनसाधवः ।
ब्रह्मचारी गृही वानप्रस्थो भिक्षुश्चतुष्टये ॥ ३ ॥
आश्रमोऽस्त्री द्विजात्यग्रजन्मभूदेवबाडवाः ।
विप्रश्च ब्राह्मणोऽसौ षट्कर्मा यागादिभिर्युतः ॥ ४ ॥

(वि.) माहाकुलेति—महाकुलस्य सूर्यवंशादेरपत्यं [1]माहाकुलः । कुलस्यापत्यं कुलीनः । [2]निषिद्धकर्मकर्तृभ्य आराद् दूरात् यातीति आर्यः । सभायां साधुः सभ्यः । संश्चासौ जनश्चेति सज्जनः । [3]साध्नोति धर्ममिति साधुः । 'साध[4] संसिद्धौ' । सद्वंशजनामानि ॥ ब्रह्म वेदः, [5]तदध्ययननियमं चरतीति ब्रह्मचारी[6] । गृहमस्यास्तीति [7]गृही । प्रतिष्ठतेऽस्मिन्निति प्रस्थः । वने प्रस्थो वनप्रस्थः । तत्र भवः वानप्रस्थः[8] । भिक्षते याचते भिक्षुः । 'भिक्ष भिक्षायाम्' । अत्र चतुष्टये चतुर्णां समूहे प्रत्येकमाश्रमशब्दो वर्तते ॥ आश्राम्यन्त्यस्मिन्निति आश्रमः । 'श्रमु तपसि खेदे च' । द्वे जाती जन्मनी यस्य [9]मातृगायत्रीरूपेणेति द्विजातिः । [10]अग्रे क्षत्रियादिभ्यो जन्म यस्य अग्रजन्मा । भुवि दीव्यते ब्रह्मवर्चसा भूदेवः । 'दिवु क्रीडादौ' । बाडव और्वोऽग्निरिव प्रायेणातृप्त इति बाडवः । विशेषेण पापेभ्य आत्मानं परं च पातीति विप्रः । 'पा रक्षणे' । ब्रह्मणोऽपत्यं ब्राह्मणः । ब्रह्मणि परब्रह्मणि निष्ठावत्त्वाद्वा । ब्राह्मणनामानि ॥ असौ ब्राह्मणः यागादिभिर्युतश्चेत् षट्कर्मेत्युच्यते । यजनयाजनाध्ययनाध्यापनदानप्रतिग्रहलक्षणानि षट्कर्माणि । तानि अस्य सन्तीति षट्कर्मा । [11]यागादिषट्कर्मयुतब्राह्मणनाम ॥ ३–४ ॥

---

[1] महाकुल इति पाठे महत् कुलमस्येति विग्रहः D_2, K_5; महाकुले भूतः F_2, Pt_2.
[2] पापकर्मभ्यः Pt_2. [3] साधयति D_2, K_6. [4] K_5, K_6, Pt_2 add राध;
[5] तदध्ययनार्थं व्रतमपि ब्रह्म Pt_2. [6] Pt_2 adds स चतुर्विधः । गायत्रीब्रह्मचारी,

प्राजापत्यब्रह्मचारी, वैदिकब्रह्मचारी, नैष्ठिकब्रह्मचारी च. [7] F₂ adds गृहाः भार्या. [8] वनप्रस्थे वनैकदेशे Pt₂. [9] देहोत्पत्त्युपनयनादिलक्षणे Pt₂. [10] ब्रह्मणो मुखे Pt₂. [11] Pt₂ adds:

'यजनं याजनं दानं विशिष्टाच्च प्रतिग्रहः।
अध्यापनं चाध्ययनं विप्रकर्म प्रकीर्तितम्॥' इति स्मृतिः.

(पा.) महाकुल—साधवः। एतानि सत्कुलप्रसूतनामानि। अनुक्तम्—'दौष्कुलेयो दुष्कुलीनः'। [1]असत्कुलप्रसूतनामनी॥ ब्रह्मचारी—आश्रमोऽस्त्री। मुञ्जमेखलादियुतो वेदाध्यायी ब्रह्मचर्यव्रतस्थितः ब्रह्मचारी। धर्मार्थकामस्थितः पञ्चमहायज्ञकारी[2] गृहस्थः स्यात्। भूमिशय्याजिनधारणवनवासवन्याहारादिलक्षणो वानप्रस्थः स्यात्। गृहीतकाषायवस्त्रदण्डो भिक्षाशी सर्वभूतसमो [3]ध्यानपरो भिक्षुः स्यात्। एते चत्वार आश्रमशब्दवाच्याः॥ द्विजात्यग्रजन्म—ब्राह्मणः। ब्राह्मणनामानि। 'एतशा[4] मुखजो मैत्रः सूत्रकण्ठश्च माहनः'। इत्येतानि पञ्च च॥ असौ षट्कर्मा—युतः। [5]यजनादिषट्कर्मयुक्तो ब्राह्मणः षट्कर्मा स्यात्।

'यजनं याजनं दानं विशिष्टश्च प्रतिग्रहः।
अध्यापनं चाध्ययनं विप्रकर्म प्रकीर्तितम्॥
स्नानं संध्याजपो होमो [6]देवतानां च पूजनम्।
आतिथ्यं वैश्वदेवं च षट् कर्माणि दिने दिने।
जातिमात्रोपजीवी तु विप्रः स्याद् ब्राह्मणब्रुवः॥'

[7]जातिमात्रमुपजीव्य जीवति यो ब्राह्मणः स ब्राह्मणब्रुवः स्यात्॥ ३–४॥

---

[1] दुष्कुल° B₃. [2] यज्ञकृत् B₃. [3] A₁ adds अध्ययन°. [4] एतशः A₁. [5] यजनादिभिः षट्कर्मभिर्युतः A₁. [6] स्वाध्यायः पितृतर्पणं B₃. [7] A₁ adds उचितकर्माणि परित्यज्य.

विद्वान् विपश्चिद् दोषज्ञः सन् सुधीः कोविदो बुधः।
धीरो मनीषी ज्ञः प्राज्ञः संख्यावान् पण्डितः कविः॥५॥
धीमान् सूरिः कृती कृष्टिर्लब्धवर्णो विचक्षणः।
दूरदर्शी दीर्घदर्शी श्रोत्रियच्छान्दसौ समौ॥ ६॥

(वि.) विद्वानिति—वेत्ति [1]सर्वमिति विद्वान्। 'विद ज्ञाने'। सान्तः[2]। विशेषेण पश्यन्[3] चेततीति विपश्चित्। 'चिती संज्ञाने'। दोषं पापादि जानातीति

दोषज्ञः। ‘ज्ञा अवबोधने’। पापं स्यतीति सन्। ‘षोऽन्तकर्मणि’। शोभना धीर्यस्य [4]सुधीः। प्रशस्तम् ओकं स्थानं [5]वेत्तीति कोविदः। ‘विद ज्ञाने’। अत्र प्रथमाक्षरलोपः। सर्वं बुध्यतीति बुधः। ‘बुध अवगमने’। प्रशस्तां धियं रातीति धीरः। ‘रा दाने आदाने च’। विशिष्टा[6] मनीषा धीरस्त्यस्य मनीषी। जानातीति ज्ञः। प्रकर्षेण जानातीति प्रज्ञः, प्रज्ञ एव प्राज्ञः। ‘ज्ञा अवबोधने’। संख्या विचारणास्यास्तीति संख्यावान्। पण्डते शीघ्रं जानातीति पण्डितः। ‘पडि गतौ’। सर्वे गत्यर्था ज्ञानार्थाः। कवते चातुर्येण वर्णयतीति कविः। ‘कुङ्[7] शब्दे’। प्रशस्ता धीरस्यास्तीति धीमान्। सुवति [8]सदुपदेशेन प्रयोजयतीति सूरिः। ‘षू प्रेरणे’। कृतं[9] संस्कृतं[10] सूक्त्यादिकमस्यास्तीति कृती। कर्षति निष्कर्षतीति कृष्टिः। ‘कृष विलेखने’। लब्धो [11]वर्णः प्रसिद्धिरनेनेति लब्धवर्णः। विचष्टे विशेषेणाचष्टे विचक्षणः। ‘चक्षिङ् व्यक्तायां वाचि’। दूरादप्रत्यक्षमपि ऊहेन पश्यतीति दूरदर्शी। ‘दृशिर् प्रेक्षणे’। दीर्घदर्शी[12] च। विदुषो नामानि॥ श्रुताध्ययनसंपन्नः श्रोत्रियः[13]। छन्दो वेदम् अधीते वेत्ति वा छान्दसः। वेदाध्येतृनामनी[14]॥॥ ५–६॥

[1] D₂, K₆, W₂ omit. [2] K₅ adds अयं. [3] D₂, K₆ add गहनार्थं. [4] शोभनं ध्यायति Pt₂. [5] किं नाम न वेत्ति Pt₂. [6] प्रशस्ता W₂. [7] ‘कबृ वर्णने’ K₂, Pt₂. [8] प्रेरयति सत्कर्मणि F₂, Pt₂. [9] कृतं ज्ञानमनेन Pt₂. [10] सत्कृतं D₂, K₃, W₂. [11] वर्णानां K₂, K₃, K₅. [12] दीर्घं पश्यतीति F₂, Pt₂. [13] श्रुतमधीते F₂, Pt₂. [14] ज्ञातृ° W₂.

(पा.) विद्वान्। विदुषी सभा। उणादिप्रत्ययान्तविदुषशब्दात् टापि विदुषा सभा। विपश्चिद्दोषज्ञः—धीमान् सूरिः। सूरिः सूरी विचक्षण इत्यभिधानात् इदन्तः [1]इन्नन्तश्च स्यात्। कृती—दीर्घदर्शी। विद्वन्नामानि॥ श्रोत्रियच्छान्दसौ समौ। श्रोत्रियनामनी॥ अनुक्तम्—‘मीमांसको जैमिनीये’। जैमिनीयनाम। ‘वेदान्ती ब्रह्मवादिनि’। ब्रह्मवादिनाम॥ ‘नैयायिकस्त्वाक्षपादः’। अक्षपादशास्त्रज्ञनामनी॥ ‘चार्वाकलौकायतिकौ’। बौद्धविशेषस्य नामनी॥ ‘सत्कार्ये सांख्यकापिलौ’। सत्कार्यवादिनो नामनी॥ ‘वैशेषिकस्तार्किकः स्यात्’। वैशेषिकस्य नामनी॥ ‘सौगतः शून्यवादिनि’। शून्यवादिनो नाम॥ ५–६॥

[1] नान्तश्च A₁; ‘दूरदृक् कोविदः सूरी’ इति रभस इति भा. दी. (पृ. २८९).

उपाध्यायोऽध्यापकोऽथ स निषेकादिकृद् गुरुः।
मन्त्रव्याख्याकृदाचार्य आदेष्टा त्वध्वरे व्रती॥ ७॥
यष्टा च यजमानश्च स सोमवति दीक्षितः।

(वि.) उपाध्याय इति—[1]उपेत्याधीयतेऽस्मादित्युपाध्यायः। ‘इङ् अध्ययने’। अध्यापयतीत्यध्यापकः। [2]उपाध्यायनामनी॥ गृणाति गायत्र्यादिकं मन्त्रमुपदिशति गुरुः। ‘गृ शब्दे’। [3]निषेकादिकर्मकारिणो नाम॥ आचिनोति शिष्यबुद्धिवृद्धिं करोतीत्याचार्यः[4]। ‘चिञ् चयने’। मन्त्रब्राह्मणात्मकवेदं कल्पसूत्राद्युपेतमध्याप्य[5] तदर्थं व्याख्यातुर्द्विजस्य नाम॥ तथा च मनुः (२. १४०)—

‘उपनीय तु यः पूर्वं वेदमध्यापयेद् द्विजः।
साङ्गं च सरहस्यं च तमाचार्यं विदुर्बुधाः॥’

आदिशतीत्यादेष्टा। ‘दिश अतिसर्जने’। ब्रह्मचारिणो व्रतमस्यास्तीति व्रती। [6]यजते यष्टा, यजमानश्च। ‘यज देवपूजासंगतिकरणयजनदानेषु’। अध्वरे यजमानत्वेन स्वामित्वेन ऋत्विगाद्यादेष्टृनाम॥ [7]दीक्षालक्षणसंस्कारोऽस्य संजातो दीक्षितः। सोमरसवत्यध्वरे तस्यैव यष्टुर्नाम॥ ७॥

---

[1] अधीते वेत्ति वा W_2.　[2] अध्यापक° K_6.　[3] निषेको गर्भाधानविधिः D_2.
[4] आचारं ग्राहयति F_2, Pt_2.　[5] उदित° K_5, K_6.　[6] याजयति K_2, K_5, K_6.
[7] दीक्षास्य संजाता F_2, Pt_2.

(पा.) उपाध्यायोऽध्यापकः स्यात्। [1]उपाध्यायनाम। स निषेकादिकृद् गुरुः। गर्भाधानादिकर्मकर्ता गुरुः स्यात्॥ मन्त्रव्याख्याकृदाचार्यः। वेदव्याख्यानकर्ता आचार्यः स्यात्॥ आदेष्टा—यजमानश्च। अध्वरे व्रती [2]आदेष्टा यष्टा यजमानश्च स्यात्॥ स सोमवति दीक्षितः। सोमवत्यध्वरे स व्रती दीक्षितः स्यात्॥ ७॥

---

[1] अध्यापक° B_3.　[2] A_1 adds ऋदन्तोऽयम्.

इज्याशीलो यायजूको यज्वा तु विधिनेष्टवान्॥ ८॥
स गीर्पतीष्ट्या स्थपतिः सोमपीथी तु सोमपाः।
सर्ववेदाः स येनेष्टो यागः सर्वस्वदक्षिणः॥ ९॥

(वि.) इज्याशील इति—यजनमिज्या, तदेव शीलं यस्य इज्याशीलः। पौनःपुन्येन यजते यायजूकः। ‘यज देवपूजादौ’। इज्याशीलवतो नाम॥ [1]यजते यज्वा। तस्यैव यजमानस्य नाम॥ विधिनेति अर्थवादप्राप्त्यर्थम्[2]॥ वाजपेययागं बृहस्पति[3]सवनसमापनाङ्गेन स्थापयतीति स्थपतिः। ‘ष्ठा गतिनिवृत्तौ’। बृहस्पतिसवनकर्तृयज्वनो नाम॥ सोमपीथः सोमपानमस्यास्तीति सोमपीथी[4]। सोमं पिबतीति सोमपाः। ‘पा

पाने’। सोमप इति अकारान्तः पुंलिङ्गः। सोमपाशब्दस्तु छन्दोविषयः, न तु शब्दशास्त्रविषय इति मन्तव्यम्। [5]इष्टावशिष्टसोमपानकृतो[6] नामनी॥ सर्वस्वदक्षिणः सर्वद्रव्यदक्षिणो यागः येन यजमानेनेष्टः स सर्ववेदा इत्युच्यते। ऋत्विगादिः अस्मात् सर्वस्वं विन्दति लभते सर्ववेदाः। सान्तोऽयम्। ‘विद्लृ लाभे’। [7]विश्वजिदादियागकर्तृनाम॥ ८–९॥

---

[1] यजति K_2, K_6. [2] पूरणार्थं K_3, W_2. [3] समापक° D_2, K_3, W_2. [4] सोमपीतीति पाठे सोमं पीतमनेनेति विग्रहः K_2, Pt_2. [5] इष्ट्वा K_2, K_3, W_2. [6] सोमपस्य K_5; °कृन्नाम K_2, K_3. [7] यज्ञ° K_3.

(पा.) इज्याशीलो यायजूकः। यजनशीलो यायजूकः स्यात्। यज्वा—इष्टवान्। [1]ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादि[2] विध्यर्थाभिप्रेता सन् यजनशीलो यज्वा स्यात्। स गीष्पतीष्ट्या स्थपतिः। बृहस्पतिसवेनेष्टवान् यज्वा स्थपतिः स्यात्॥ सोमपीती—सोमपाः। [3]कृतसोमपानो यज्वा सोमपाः[4] स्यात्॥ सर्ववेदाः स—सर्वस्वदक्षिणः। सर्वस्वं दक्षिणा यस्य स तथोक्तो [5]विश्वजित्प्रभृतियागो येनेष्टः स यज्वा सर्ववेदाः स्यात्। सान्तोऽसौ॥ ८–९॥

---

[1] B_3 adds विधिना. [2] इत्यादिना इष्टवान् B_3. [3] सोमपानकृतो नामनी B_3. [4] A_1 adds सोमपायीति केचित्. [5] विश्वजितादिः B_3.

अनूचानः प्रवचने साङ्गेऽधीती गुरोस्तु यः।
लब्धानुज्ञः समावृत्तः सुत्वा त्वभिषवे कृते॥ १०॥

(वि.) अनूचान इति—साङ्गवेदमधीत्य अनु पश्चात् तमेवोक्तवानिति अनूचानः[1]। [2]साङ्गे [3]प्रवचने साङ्गवेदेऽधीती यस्तस्य नाम॥ गुरुकुलात् गृहं प्रति समावर्तते स्म समावृत्तः। ‘वृतु वर्तने’। उद्वाहे सति गुरोर्लब्धानुज्ञस्य नाम॥ सुनोति सोममिति सुत्वा। ‘षुञ् अभिषवे’। नान्तोऽयम्। [4]अभिषवकर्तुर्यजमानस्य नाम॥ १०॥

---

[1] K_2, Pt_2 add ‘वच परिभाषणे’. [2] शिक्षाद्यङ्गषट्के F_2, Pt_2. [3] प्रवचनो वेदः K_2; अत्र कर्मणि सप्तमी D_2, K_5, W_2. [4] D_2 adds अभिषवोऽवभृथस्नानं.

(पा.) अनूचानः—साङ्गेऽधीती। साङ्गवेदाध्येता अनूचानः स्यात्। ‘गणिश्च सः’। इति कोशान्तरपाठाद्[1] गणिरपि स्यात्। गुरोस्तु—समावृत्तः। वेदाध्ययनानन्तरं

गृही भवेति गुर्वनुज्ञातः[2] समावृत्तः स्यात्। सुत्वा तु—कृते। अभिषवकरणानन्तरं सुत्वा स्यात्। नान्तः। 'सुत्वा त्वभिषवादूर्ध्वम्' इति वैजयन्ती (पृ. ८९, श्लो. ७५) ॥ १० ॥

---

[1] पाठविशेषात् A_1; युगी गणिरिति वैजयन्ती (पृ. ८९, श्लो. ८२).

[2] अनुज्ञासंपन्नः A_1.

छात्रान्तेवासिनौ शिष्ये शैक्षाः प्राथमकल्पिकाः।
एकब्रह्मव्रताचारा मिथः सब्रह्मचारिणः ॥ ११ ॥
सतीर्थ्यास्त्वेकगुरवश्चितवानग्निमग्निचित्।

(वि.) छात्र इति—[1]गुरोरसच्चरित्रं[2] छादयतीति छात्रः। 'छद अपवारणे'। गुरोरन्ते निकटे [3]निवसतीति अन्तेवासी[4]। गुरोः छिद्रं [5]शिनोति तनूकरोतीति शिष्यः। 'शिञ्[6] निशाने'। [7]शिष्यनामानि ॥ शिक्षायां वर्तमानाः शैक्षाः। प्रथमे वयसि शिक्षायै कल्प्यन्ते प्राथमकल्पिकाः[8]। प्रथमाभ्यासार्थमुपपन्नशिष्यनामनी ॥ समानं ब्रह्मव्रतं चरन्तीति [9]सब्रह्मचारिणः। 'चर गतिभक्षणयोः'। गुरोरेककालमेकवेदाध्ययनं ये कुर्वन्ति तेषामन्योन्यस्य नाम ॥ विद्यापारं तरन्त्यनेन तीर्थं[10] गुरुः। समाने तीर्थे गुरुकुले भवा वर्तमानाः [11]सतीर्थ्याः। एको गुरुः येषां ते एकगुरवः। एकगुरूणां शिष्याणामन्योन्यस्य नामनी ॥ अग्निं चितवान् अग्निचित्। 'चिञ् चयने'। स्थण्डिलप्रतिष्ठापनेनाग्निसंस्कर्तुर्नाम ॥ ११ ॥

---

[1] गुरुकृतं K_3.

[2] चरितं W_2.

[3] W_2 omits नि; वासी K_5.

[4] D_2, Pt_2 add 'वस निवसने'.

[5] श्यति W_2.

[6] 'शो तनूकरणे' K_6.

[7] शासनीयाः शिष्याः Pt_2.

[8] प्रथमः कल्पः आद्यारम्भः प्रयोजनं येषां ते Pt_2.

[9] W_2 adds तुल्यवेदाः तुल्यव्रताः तुल्याचाराः.

[10] पावनहेतुत्वात्तीर्थमिव तीर्थं गुरुः F_2, Pt_2.

[11] सतीर्थाः K_3.

(पा.) छात्रान्तेवासिनौ शिष्ये। शिष्यनामानि। '[1]मोकः प्राड्डुपनेदिवान्'। एतानि त्रीणि च। शैक्षाः प्राथमकल्पिकाः। शिक्षापाठकनामनी। शिक्षेति प्रथमपाठ्यो ग्रन्थः। 'शिक्षा प्रथमकल्पिका' इति [2]हलायुधः (अ. मा. २. २४५)। एकब्रह्म—सब्रह्मचारिणः। वेदाध्ययनार्थमेकं[3] व्रतमाचरन्तोऽन्योन्यं सब्रह्मचारिणः स्युः। सतीर्थ्याश्चैकगुरवः। एकगुरुकाः सतीर्थ्याः स्युः। चशब्दात् सब्रह्मचारिणोऽपि स्युः ॥ चितवान्—अग्निचित्। गृहीतश्रौताग्निकोऽग्निचित् स्यात् ॥ ११ ॥

---

[1] मौर्ख्यः A_1.

[2] शैक्षः प्राथमकल्पिकः इति मुद्रितग्रन्थे.

[3] एकव्रताचारं A_1.

पारंपर्योपदेशे स्यादैतिह्यमितिहाव्ययम् ॥ १२ ॥
उपज्ञा ज्ञानमाद्यं स्याज्ज्ञात्वारम्भ उपक्रमः ।
यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः ॥ १३ ॥

(वि.) पारंपर्येति—इत्येवं किमु पारंपर्यमस्तीति इतिहा। इतिहैव ऐतिह्यम्। इतिहा अव्ययमित्यत्रापि संबध्यते। पारंपर्योपदेशस्य नामनी ॥ [1]उपज्ञायत इत्युपज्ञा। 'ज्ञा अवबोधने'। [2]उद्योगाद्यज्ञाननाम ॥ उपक्रमणम् उपक्रमः। ममेदं कार्यमिति ज्ञात्वा प्रारम्भनाम ॥ [3]यजनं यज्ञः। सूयतेऽभिषूयते सोमोऽत्रेति सवः। 'षुञ् अभिषवे'। अध्वानं वैदिकमार्गं रातीति अध्वरः। 'रा दाने'। यजनं यागः। सप्तभिर्गायत्र्यादिभिः छन्दोभिस्तन्यत इति सप्ततन्तुः। 'तनु विस्तारे'। मह्यन्तेऽत्र देवा मखः। 'मह पूजायाम्'। मखन्ते वा। 'मख गतौ'। क्रियते [4]त्रैवर्णिकैरिति क्रतुः। 'डुकृञ् करणे'। यज्ञनामानि ॥ १२–१३ ॥

[1] उपज्ञानं D_2, K_5, W_2.
[2] उद्योगाद् आद्य° W_2.
[3] यजते, 'यज देवपूजासंगतिकरणदानेषु' Pt_2.
[4] ब्राह्मणादिभिः Pt_2.

(पा.) पारंपर्योपदेशः—इतिहाव्ययम्। पारंपर्योपदेशनामनी। पारंपर्यं गुरुक्रमः। 'आम्नायः संप्रदायः स्यात् [1]पारंपर्यं गुरुक्रमः' इति हलायुधः (अ. मा. २. २४७) ॥ उपज्ञा—आद्यं स्यात्। [2]प्रथमं जातं ज्ञानमुपज्ञा स्यात्। विनोपदेशं स्वयमेव प्रथमं ज्ञानमुपज्ञा यथा वाल्मीकेः श्लोकनिर्माणज्ञानमिति सुभूतिटीका। ज्ञात्वा—उपक्रमः। [3]ज्ञानसमनन्तरारम्भ उपक्रमः स्यात् ॥ यज्ञः—मखः क्रतुः। यज्ञनामानि ॥ १२–१३ ॥

[1] पारंपर्यः A_1.
[2] प्रथमज्ञानं A_1.
[3] फलज्ञान° A_1.

पाठो होमश्चातिथीनां सपर्या तर्पणं बलिः ।
एते पञ्च महायज्ञा ब्रह्मयज्ञादिनामकाः ॥ १४ ॥

(वि.) पाठ इति—पाठो वेदपाठः। होमो वैश्वदेवादिः। अतिथीनां पूजा सपर्या। तर्पणं पितृतर्पणं। बलिर्बलिहरणम्। एते पञ्च [1]महाफलयज्ञत्वात् महायज्ञाः[2]। क्रमेण ब्रह्मयज्ञदेवयज्ञमनुष्ययज्ञपितृयज्ञभूतयज्ञाः भवन्ति ॥ १४ ॥

[1] W_2 adds यजमान°.
[2] तथा च मनुः (३. ७०)—

अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥ W_2.

(पा.) पाठो होमः—ब्रह्मयज्ञादिनामकाः। पाठादयः समुदायेन पञ्चमहायज्ञनामानि। प्रत्येकं ब्रह्मयज्ञादिनामानि।

'स्वाध्यायः स्याद्ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्॥'

इति ॥ १४ ॥

समज्या परिषद् गोष्ठी सभासमितिसंसदः।
आस्थानी क्लीबमास्थानं स्त्रीनपुंसकयोः सदः ॥ १५ ॥

(वि.) समज्येति—समजन्ति[1] अत्र समज्या। '[2]अज गतौ'। [3]परिषीदन्त्यत्र परिषत्। 'षद्लृ विशरणगत्यवसादनेषु'। गावो नानाविधा वाचोऽत्र तिष्ठन्तीति गोष्ठी। 'ष्ठा गतिनिवृत्तौ'। सह भान्त्यत्र सभा। 'भा दीप्तौ'। संयन्ति [4]संगच्छन्तेऽत्र समितिः। 'इण् गतौ'। संसीदन्त्यस्यामिति संसत्। 'षद्लृ गतौ'। आस्थातुं योग्या आस्थानी। आ समन्तात् तिष्ठन्त्यत्र आस्थानम्। क्लीबे वर्तते। सीदन्त्यत्र सदः। सान्तः। क्लीबे। स्त्रीत्वे सदाः इति रूपभेदः। सभानामानि ॥ १५ ॥

[1] F_2, Pt_2 add मेलन्ति. [2] Pt_2 adds 'गतिक्षेपणयोः'. [3] परितः D_2, K_5. [4] संगम्यते W_2.

(पा.) समज्या [1]परिषद्—स्त्रीनपुंसकयोः सदः। सभानामानि। आस्थानादीनि पदानि राजसभानामानीति केचित्। रभसकोशे तथैव भेदः प्रदर्शितः। 'आस्थानं सद आस्थानी पर्षत्परिषदौ समे' इति ॥ १५ ॥

[1] परिषदित्यत्र 'सदिरप्रतेः' (८. ३. ६६) इति षत्वम् B_3.

प्राग्वंशः प्राग्घविर्गेहात् सदस्या विधिदर्शिनः।
सभासदः सभास्ताराः सभ्याः सामाजिकाश्च ते ॥ १६ ॥

(वि.) प्राग्वंश इति—यत्र गृहे हव्यादिकं स्थाप्यते ततः पूर्वं यजमानसदस्यादीनां वासाय कल्पितं गृहं प्राग्वंश इत्युच्यते। वन्यते [1]सेव्यत इति वंशः। 'वन षण संभक्तौ'। प्राग् अग्रे वंशः प्राग्वंशः। हविर्गृहात् पूर्वं त्रेताग्नेः पत्न्याश्च निर्मितगृहनाम ॥ पत्नीशालैवेति केचित् ॥ सदसि साधवः सदस्याः। विधिं विधिविहितं[2] पश्यन्तीति विधिदर्शिनः। 'दृशिर् प्रेक्षणे'। यजमानादिभिः क्रियमाणक्रियाकलापदर्शिनां नामनी ॥

सभायां सीदन्ति तिष्ठन्तीति सभासदः। सभां सभास्थलं[3] स्तृणन्ति आच्छादयन्ति सभास्ताराः। 'स्तॄञ् आच्छादने'। सभायां साधवः सभ्याः। समाजं समूहं समवयन्ति क्षीरनीरवदेकीभवन्तीति सामाजिकाः। व्यवहारद्रष्टॄणां नामानि ॥ १६ ॥

[1] आश्रीयते F_2, Pt_2. [2] हितं D_2. [3] भूमिं K_3; भुवं K_2; स्थानं W_2.

(पा.) प्राग्वंशः प्राग्घविर्गेहात्। हविर्गृहात्[1] पूर्वस्थितसभागृहं प्राग्वंशः स्यात्। सदस्या विधिदर्शिनः। यागविधिपरीक्षाधिकारिणः[2] सदस्याः स्युः ॥ सभासदः—सामाजिकाश्च ते। सभायां तिष्ठतां नामानि ॥ १६ ॥

[1] गेहात् B_3. [2] B_3 adds ऋत्विग्विशेषाः.

अध्वर्यूद्गातृहोतारो यजुःसामर्ग्विदः क्रमात्।
आग्नीध्राद्या धनैर्वार्या ऋत्विजो याजकाश्च ते ॥ १७ ॥

(वि.) अध्वर्युरिति—अध्वरं [1]अध्वरदेशं यातीत्यध्वर्युः। 'या प्रापणे'। यजुर्वेदविदो नाम ॥ उद्गायति देवतां स्तौतीति उद्गाता। 'गै [2]गाने'। ऋकारान्तः। सामवेदविदो नाम ॥ होमं करोतीति होता। जुहोतीति वा। 'हु दानादानयोः'। ऋग्वेदविदो नाम ॥ यज्ञस्वामिना धनैर्वार्याः आग्नीध्रादयः षोडश याजकऋत्विक्शब्दवाच्याः। ते च ब्रह्मा, उद्गाता, होता, अध्वर्युः, ब्राह्मणाच्छंसी, प्रस्तोता, मैत्रावरुणः, प्रतिप्रस्थाता, पोता, प्रतिहर्ता, अच्छावाकः, नेष्टा, आग्नीध्रः, सुब्रह्मण्यः, ग्रावस्तुत्, उन्नेता चेति। अग्निम् इन्धे अग्नीत्[3]। 'ञिइन्धी दीप्तौ'। अग्नीधः शरणं अग्नीध्रम्। तत्र वर्तमानः[4] आग्नीध्रः। धनैर्हेतुभिर्व्रियन्ते धनैर्वार्याः। ऋतौ वसन्तादौ याजयति यजमानं ऋत्विक्। यजन्तीति याजकाः। 'यज देवपूजादौ'। दक्षिणाभिर्वृतऋत्विङ्[5]नामानि ॥ १७ ॥

[1] F_2, Pt_2 omit. [2] 'गै शब्दे' D_2, K_6. [3] K_3 adds अग्निपुष्टा. [4] भवः K_2, W_2. [5] W_2 adds °वर्ग°.

(पा.) अध्वर्युः—क्रमात्। यजुःसामर्चां[1] वेत्तारः [2]क्रमेणाध्वर्यूद्गातृहोतारः[3] [4]स्युः। 'अध्वर्यूद्गातृहोतारः ब्रह्मा चेति[5] महर्त्विजः' इति वैजयन्ती (पृ. ८९, श्लो. ७९) ॥ आग्नीध्राद्याः—याजकाश्च ते। दक्षिणादानेन वरीतुं योग्या आग्नीध्रादय ऋत्विग्याजकवाच्याः ॥ १७ ॥

[1] °सामर्ग्वेदिनः B_3. [2] क्रमात् B_3. [3] होतृपदवाच्याः B_3. [4] ऋत्विक्पर्यायात् प्राक्कथनं ऋत्विग्विशेषताज्ञापनार्थम् A_1. [5] चैव B_3.

वेदिः परिष्कृता भूमिः समे स्थण्डिलचत्वरे ।
चषालो यूपकटकः कुम्बा सुगहना वृतिः ॥ १८ ॥

(वि.) वेदिरिति—विन्दन्त्यस्यां देवाः [1]पूजादिकमिति वेदिः । 'विद्लृ लाभे'। [2]परिष्कृतभूमेर्नाम ॥ तिष्ठन्त्यस्मिन् अग्नय इति स्थण्डिलम् । 'ष्ठा गतिनिवृत्तौ'। चतन्ते[3] यागफलमत्रेति चत्वरम् । '[4]चते याचने'। यागार्थं[5] [6]संस्कारितस्थाननामनी ॥ [7]चष्यते यूपाग्रे प्रक्षिप्यते चषालः । 'चष भक्षणे'। धातूनामनेकार्थत्वात् क्षेपणार्थः । यूपस्याग्रे कृतः कटकः कटकाकारः यूपकटकः । यूपकटकनाम ॥ कुम्बयति आच्छादयति यज्ञवाटं कुम्वा । 'कुबि आच्छादने'। यज्ञवाटं परितः क्षिप्तसुगहनवृतिनाम[8] ॥ १८ ॥

[1] पूजां K_3.
[2] संस्कृत° W_2.
[3] W_2 adds याचन्ते.
[4] 'चते चदे याचने' D_2, K_5, K_6.
[5] स्थण्डिलनामानि K_5; अग्निपालनार्थं K_6.
[6] संस्कृत° K_2, K_3, W_2.
[7] F_2, Pt_2 add कटकाकृतित्वेन.
[8] यज्ञवाटवृतिनाम K_5.

(पा.) वेदिः—भूमिः । यागार्थं संस्कृता भूमिः वेदिः स्यात् । समे—चत्वरे । शय्यार्थं संस्कृतभूनामनी ॥ चषालो यूपकटकः । यूपमूलस्थितलोहकटकश्चषालः स्यात्[1] ।

'यूपमङ्गुलिमिवोदनीनमद् भूचषालतुलिताङ्गलीयकम् ।'

इति । कुम्वा—वृतिः । अतिगहनयूपवृतिः कुम्बा स्यात् ॥ १८ ॥

[1] B_3 adds राजसूये समाचारोऽयम्.

यूपाग्रं तर्म निर्मन्थ्यदारुणि त्वरणिर्द्वयोः ।
दक्षिणाग्निर्गार्हपत्याहवनीयौ त्रयोऽग्नयः ॥ १९ ॥

(वि.) यूपाग्रमिति—तरति चषालमिति तर्म । 'तॄ प्लवनतरणयोः'। तीक्ष्णयूपाग्रनाम ॥ इयर्ति [1]अग्निरस्मादिति अरणिः । अग्निनिर्मन्थनदारुनाम ॥ वेद्या दक्षिणतो वर्तते [2]दक्षिणाग्निः । गृहपतिना इतराग्निभ्यां पूर्वं संस्कृतोऽग्निः गार्हपत्यः । आ कर्मसमाप्तेः [3]आहुतयो हूयन्तेऽत्र आहवनीयः । 'हु दानादानयोः'। त्रयाणामग्नीनां पृथङ्नामानि ॥ १९ ॥

[1] अस्यां F_2, Pt_2.
[2] D_2, Pt_2 add अग्निः; Pt_2 adds दक्षिणाग्नित्रयं पृथक् स्वनामप्रसिद्धेऽग्नित्रये वर्तते.
[3] होतव्यः F_2, Pt_2.

(पा.) यूपाग्रं तर्म । यूपस्याग्रं तर्म स्यात् । अनुक्तम्—'यूपमध्यं समाधानम्'। यूपस्य मध्यभागः समाधानं स्यात् । निर्मन्थ्यदारुणि—द्वयोः । [1]अग्न्यर्थमानीतनूतनकाष्ठमरणिः स्यात् ॥ दक्षिणाग्नि—त्रयोऽग्नयः । दक्षिणाग्निगार्हपत्याहवनीयाः त्रयो[2] यागाग्नयः[3] । तत्र[4] दक्षिणकुण्डाग्निर्दक्षिणाग्निः । उत्तरकुण्डाग्निर्गार्हपत्यः । पूर्वकुण्डाग्निराहवनीयः ।

'पूर्वेणाहवनीयः स्याद् दक्षिणाग्निस्तु दक्षिणः ।
उत्तरो गार्हपत्यस्तु ॥'

इति निगमाभिधानम् ॥ १९ ॥

[1] अग्निमन्थनकाष्ठम् B_3. [2] श्रौताग्नय: B_3. [3] B_3 adds स्युः. [4] B_3 omits three lines.

अग्नित्रयमिदं त्रेता प्रणीतः संस्कृतोऽनलः ।
समूह्यः परिचाय्योपचाय्यावग्नौ प्रयोगिणः ॥ २० ॥

(वि.) अग्नित्रयमिति—इदं श्रौताग्नित्रयमेकोक्त्या त्रेतेत्युच्यते । एक एवौपासनाग्निः अग्नित्रयरूपं[1] प्राप्त इति त्रेता । अग्नित्रयसमुदायनाम ॥ प्रणीयते संस्क्रियते प्रणीतः । संस्कृताग्निनाम ॥ समूह्यतेऽग्निरनेन समूह्यः । परिचीयते परिचाय्यः । उपचीयते उपचाय्यः । 'चिञ् चयने' । अग्निचिद्विशेष्यनामानि ॥ २० ॥

[1] अत्र रूपत्रयं W_2.

(पा.) अग्नित्रयं—त्रेता । उक्ताग्नित्रयमेकोक्त्या त्रेता स्यात् । 'त्रेता स्त्री सर्वपातता' इति निगमाभिधानम् । प्रणीतः—अनलः । संस्कारवानग्निः प्रणीतः स्यात् ॥ समूह्यः—प्रयोगिणः । समूह्यपरिचाय्योपचाय्यशब्दा [1]अग्नौ प्रयुज्यन्ते । समूह्योऽग्निः, [2]समूहोऽन्यः । परिचाय्योऽग्निः, परिचेयोऽन्यः । उपचाय्योऽग्निः, उपचेयोऽन्यः ॥ २० ॥

[1] अग्न्यर्थे प्रयोगिणः A_1. [2] संमूह्यः B_3.

यो गार्हपत्यादानीय दक्षिणाग्निः प्रणीयते ।
तस्मिन्नानाय्योऽथाग्नायी स्वाहा च हुतभुक्प्रिया ॥ २१ ॥

(वि.) य इति—आनीयते संस्क्रियते आनाय्यः। 'णीञ् प्रापणे'। गार्हपत्यादानीय दक्षिणाग्नौ संस्कृताग्निनाम ॥ अग्नेः स्त्री [1]अग्नायी। अग्निना सुष्ठु आहूयते स्वाहा। 'हु दानादानयोः'। हुतभुजः प्रिया हुतभुक्प्रिया। अग्निपत्नीनामानि ॥ २१ ॥

[1] आग्नेयी K_6.

(पा.) यो गार्हपत्यादानीय—आनाय्यः। गार्हपत्यादाहृत्य यो दक्षिणाग्निरारोप्यते स आनाय्यः स्यात्। गार्हपत्यग्रहणमितरयोनिर्व्युदासार्थम्। 'वैश्यकुलाद्वित्तवतो भ्राष्ट्राद् गार्हपत्याद्वा' इति तद्योनिविकल्पात्[1]। अथाग्नेयी[2]—हुतभुक्प्रिया। अग्निभार्यानामानि ॥ २१ ॥

[1] बहुविकल्पः A_1.   [2] अग्नायी B_3.

ऋक्सामिधेनी धाय्या च या स्यादग्निसमिन्धने ।
गायत्रीप्रमुखं छन्दो हव्यपाके चरुः पुमान् ॥ २२ ॥

(वि.) ऋगिति—अग्निसमिन्धने अग्निप्रज्वलने या ऋक् तस्यां सामिधेनीद्वयं वर्तते। समिधामियम् आधानी सामिधेनी। धीयते समिदनयेति धाय्या। 'डुधाञ् धारणपोषणयोः'। अग्निप्रकाशने विहितऋङ्नामनी ॥ गायन्तं त्रायत इति गायत्री। 'त्रैङ् पालने'। गायत्रीप्रमुखं गायत्र्याद्यं छन्द इत्युच्यते। चन्दयत्याह्लादयति गद्यपद्यग्रन्थादत्यर्थमिति छन्दः। 'चदि आह्लादने'। गायत्री, उष्णिक्, अनुष्टुप्, बृहती, पङ्क्तिः, त्रिष्टुप्, जगती, अतिजगती, शक्करीत्यादयः छन्दांसि। गायत्र्यादिछन्दोनाम ॥ हव्यस्य पाकः हव्यपाकः। चर्यते भक्ष्यते चरुः। 'चर गतिभक्षणयोः'। हव्यपाकनाम ॥ २२ ॥

[1] अग्निं समिन्धे सामिधेनी D_2, K_6.

(पा.) ऋक्सामिधेनी—अग्निसमिन्धने। [1]अग्निप्रज्वालने या ऋक् पठिता सा सामिधेनी धाय्या च[2] स्यात्। गायत्रीप्रमुखं छन्दः। पिङ्गलाद्युपदिष्टा गायत्रीप्रभृतयः छन्दःशब्दवाच्याः। गायत्री। उष्णिक् हान्तः। अजादिपाठादाकारान्तोऽपि स्यात्। उष्णिहा। अनुष्टुप्, भकारान्तः। बृहती। पङ्क्तिः। जगती[3] ॥ हव्यपाके चरुः पुमान्। हव्यपाक इति [4]स्थाल्यादिः। तस्मिन् चरुशब्दः स्यात्। 'चरुं पक्त्वाग्निं प्रज्वाल्य परिस्तीर्य तेषु चरुं निधायाभिघार्या' इत्यादिवचनैर्हव्येऽपि स्यात् ॥ २२ ॥

[1] अग्निसमिन्धनमग्निप्रज्वालनम्। तत्र येयम् A_1. [2] °शब्दवाच्या A_1. [3] A_1 adds अतिजगती. [4] A_1 adds हव्याधारः (प्रसिद्धश्च स्थाल्यां चरुशब्दः आ च हिमवतः आ च कुमारीभ्यः प्रयुज्यमानो दृष्टः। *Śābarabhāṣya* 10. 1. 35)

आमिक्षा सा शृतोष्णे या क्षीरे स्याद्दधियोगतः।
धवित्रं व्यजनं तद्यद्रचितं मृगचर्मणा ॥ २३ ॥

(वि.) आमिक्षेति—आमीयते [1]क्षिप्यते दध्यत्रेति आमिक्षा। 'डुमिञ् प्रक्षेपणे'। पक्वोष्णक्षीरे दधियोगतः काप्यवस्था भवति तस्या नाम ॥ धूयते कम्प्यतेऽग्निरनेनेति धवित्रम्[2]। मृगचर्मरचितव्यजननाम ॥ २३ ॥

[1] आकीर्यते K_2. [2] यागे अग्निप्रज्वलनाय मृगचर्मणा रचितं यद् व्यजनं तद् धवित्रमित्युच्यते F_2, Pt_2.

(पा.) आमिक्षा—दधियोगतः। कथितोष्णक्षीरे दध्नो योगाद्यदुद्भूतं तदामिक्षा स्यात् ॥ धवित्रं—मृगचर्मणा। द्रव्योष्णप्रशमनार्थं [1]कृष्णाजिनकृतं व्यजनं धवित्रं यात् ॥ २३ ॥

[1] रचितकृष्णाजिन° A_1.

पृषदाज्यं सदध्याज्ये परमान्नं तु पायसम्।
हव्यकव्ये दैवपैत्रे अन्ने पात्रं स्रुवादिकम् ॥ २४ ॥

(वि.) पृषदाज्यमिति—पृषद्भिर्दधिबिन्दुभिः अन्वितमाज्यं पृषदाज्यम्। दधियुक्ताज्यनाम[1] ॥ परमम् अन्नं परमान्नम्। पयसि क्षीरे पक्वं [2]पायसम्। पायसनामनी ॥ हूयते हव्यम्। देवताहान्ननाम ॥ कूयते स्तूयते पितृभिरिति कव्यम्। 'कु शब्दे'। पितृयोग्यान्ननाम ॥ पिबन्त्यस्मादिति पात्रम्। 'पा पाने'। पातीति वा। 'पा रक्षणे'। स्रुवादिपात्रनाम[3] ॥ २४ ॥

[1] W_2 adds °द्रव्य°. [2] पयसा संस्कृतं Pt_2. [3] पात्रस्य स्रुवादेः K_5; K_3, K_5 add स्रवति घृतादिकमिति स्रुवः.

(पा.) पृषदाज्यं सदध्याज्ये। दधिमिश्रिताज्यं[1] पृषदाज्यं स्यात्। परमान्नं तु पायसम्। क्षीरपक्वान्ननामनी। लवणव्यञ्जनान्यनुलेपनमिति ते द्वे नपुंसके। 'क्षैरेयी

पायसं स्मृतम्' इति शब्दस्वभावात् स्त्रीलिङ्गता ॥ हव्यकव्ये—अन्ने। [2]देवपित्रर्थेऽन्ने क्रमेण[3] हव्यकव्ये स्याताम्। पात्रं स्रुवादिकम्। स्रुवप्रमुखं [4]पात्रमित्युच्यते। 'पात्रं स्रुवादौ कुण्डादौ योग्येऽतीव द्वयान्तरे' इति जयकोशः ॥ २४ ॥

[1] °मिश्रिताज्यं A_1.   [2] दैव° A_1.   [3] क्रमात् B_3.   [4] पात्रशब्दव्यवहर्तव्यमित्यर्थः A_1.

ध्रुवोपभृज्जुहूर्ना तु स्रुवो भेदाः स्रुचः स्त्रियः।
उपाकृतः पशुरसौ योऽभिमन्त्र्य क्रतौ हतः ॥ २५ ॥

(वि.) ध्रुवेति—ध्रुवादयः स्रुचो भेदाः, ते च स्त्रियः स्त्रीलिङ्गाः। स्रुवस्तु ना पुंलिङ्गः। ध्रुवतीति[1] ध्रुवा। 'ध्रुव[2] स्थैर्ये'। उपभ्रियते होमार्थमिति उपभृत्। 'भृञ् भरणे'। हूयतेऽनया जुहूः। 'हु दानादानयोः[3]'। स्रवत्यस्माद् [4]आज्यादिकमिति स्रुवः। 'स्रु स्रवणे'। स्रुवभेदनामानि ॥ स्रवतीति स्रुक्। स्रुवादीनां साधारणनाम ॥ [5]उपाकरणेन उपस्पर्शनेन संस्कृतः उपाकृतः। यद्वा उपामन्त्र्य क्रियते हन्यते उपाकृतः। 'कृञ् हिंसायाम्'। [6]हननार्थं यूपे बद्धपशुनाम ॥ २५ ॥

[1] K_3, K_5, K_6 add स्थैर्येणास्ते; तिष्ठतीति W_2.   [2] 'ध्रुव गतिस्थैर्ययोः' D_2, K_5.   [3] दानादनयोः F_2, Pt_2.   [4] अन्नादिकं W_2.   [5] W_2 adds समन्त्रकः.   [6] K_5, W_2 add अभिमन्त्र्य.

(पा.) ध्रुवोपभृत्—स्रुचः स्त्रियः। [1]पात्रविशेषनामानि। अत्र ना त्विति विशेषविधिः परापरसाहचर्यज्ञापनार्थम्[2] ॥ उपाकृतः—क्रतौ हतः। यागेऽभिमन्त्र्य निहतः पशुरुपाकृतः स्यात् ॥ २५ ॥

[1] पात्रभेद° A_1.   [2] °सहचर्या° A_1.

परंपराकं शसनं प्रोक्षणं च वधार्थकम्।
वाच्यलिङ्गाः प्रमीतोपसंपन्नप्रोक्षिता हते ॥ २६ ॥

(वि.) परंपराकमिति—परंपरां प्राणिनां संज्ञपनम् अकति परंपराकम्। 'अक [1]अग कुटिलायां गतौ'। [2]शसतीति शसनम्। 'शसु हिंसायाम्'। [3]प्रकर्षेण उक्षति प्रोक्षणम्[4]। 'उक्ष सेचने'। क्रतौ पशुवधनामानि ॥ [5]प्रकर्षेण मीयते प्रमीतः। 'मीञ् हिंसायाम्'। [6]उपसंपद्यते हननार्थम् उपसंपन्नः। '[7]पद गतौ'। [8]प्रोक्षणम् इतः प्रोक्षितः। एते शब्दाः वाच्यलिङ्गा विशेष्यनिघ्नाः। क्रतौ हतपशुनामानि ॥ २६ ॥

[1] F_2, Pt_2 omit. [2] शस्यते Pt_2. [3] प्रोक्षति W_2. [4] K_2, K_5, W_2 add उपसर्गवशात् हननार्थः. [5] प्रमीयते स्म K_2, K_5, W_2. [6] K_5 adds समीपतः. [7] पद्‌ल K_5, K_6. [8] K_2, W_2 add हननं.

(पा.) परंपराकं—वधार्थकम्। परंपराकादीनि पशुवधार्थकानि। अनुक्तम्—'व्यञ्जनं पशुसंस्कारः'। पशोः पर्यग्निकरणादिसंस्कारो व्यञ्जनं स्यात्॥ 'सामिकं त्वभिमन्त्रणम्'। पश्वभिमन्त्रणं सामिकं स्यात्। वाच्यलिङ्गाः—हते। प्रमीतादयो [1]विशेष्यनिघ्नाः[2]। यागे हतपशुनामानि॥ २६॥

[1] वाच्यलिङ्गाः A_1. [2] A_1 adds इत्यर्थः.

सांनाय्यं हविरग्नौ तु हुतं त्रिषु वषट्कृतम्।
दीक्षान्तोऽवभृथो यज्ञस्तत्कर्मार्हं तु यज्ञियम्॥ २७॥
त्रिष्वथ क्रतुकर्मेष्टं पूर्तं खातादिकर्मणि।

(वि.) सांनाय्यमिति—संनीयते सांनाय्यम्। 'णीञ् प्रापणे'। अग्नौ हूयते हविः। 'हु दानादानयोः'। हविषो[1] नामनी॥ वषट् क्रियत[2] इति वषट्कृतम्। अग्नौ हुतहविर्नाम॥ दीक्षाख्यस्य कर्मणोऽन्तः दीक्षान्तः। अवभ्रियते परिपूर्यतेऽनेन दीक्षाव्रतमिति अवभृथः। 'भृञ् भरणे'। यागसमाप्तौ जलविहितवारुणेष्टिनाम॥ यज्ञार्हं यज्ञियम्[3]। यज्ञयोग्यद्रव्यनाम॥ अयं शब्दः त्रिषु लिङ्गेषु वर्तते॥ इज्यते इष्टम्। 'यज देवपूजादौ'। तथा च स्मृतिः—

'एकाग्निकर्म हवनं त्रेतायां यच्च हूयते।
अन्तर्वेद्यां च यद्दानमिष्टं तदभिधीयते॥'

क्रतुकर्मनाम। पिपर्ति पालयति[4] पूर्तम्। 'पॄ पालनपूरणयोः'।

'वापीकूपतटाकादि देवतायतनानि च।
अन्नप्रदानमारामः पूर्तमार्याः प्रचक्षते॥'

खातादिकर्मनाम॥ २७॥

[1] हविःशेषनाम K_5, K_6. [2] W_2 adds अग्नौ. [3] यज्ञकर्म अर्हति W_2. [4] K_5, W_2 add पशुदेवब्राह्मणानिति.

(पा.) सांनाय्यं हविः। होतव्यद्रव्यनामनी॥ अग्नौ तु—वषट्कृतम्। अग्नौ हुतद्रव्यनाम॥ दीक्षान्तो—यज्ञे। यागदीक्षाया अन्तोऽवभृथः स्यात्। तत्कर्मार्हे—

यज्ञियम् त्रिषु । यज्ञकर्मार्हे यज्ञियं स्यात् । तत् त्रिलिङ्गम् । यज्ञियो देशः[1] । अथ क्रतुकर्मेष्टम् । क्रतोः कर्म इष्टं स्यात् ।। पूर्तं—कर्मणि । खातादिकर्म[2] पूर्तं स्यात् ।

[3] ‘वापीकूपतटाकानि[4] देवतायतनानि च ।
अन्नप्रदानमारामः पूर्तमित्यभिधीयते ।।’

इति ।। २७ ।।

---

[1] A_1 adds यज्ञियमहः.

[2] °कर्मणि B_3.

[3] म. स्मृ. ४. २२६ (Apte's Dict. p. 1041); आधुनिकमुद्रितग्रन्थे न दृश्यते.

[4] तटाकादि B_3.

अमृतं विघसो यज्ञशेषभोजनशेषयोः ।। २८ ।।
त्यागो विहायितं दानमुत्सर्जनविसर्जने ।
विश्राणनं वितरणं स्पर्शनं प्रतिपादनम् ।। २९ ।।
प्रादेशनं निर्वपणमपवर्जनमंहतिः ।

(वि.) अमृतमिति—न म्रियन्तेऽनेनेत्यमृतम् । ‘मृङ् प्राणत्यागे’ । यज्ञशेषनाम ।। विशेषेणाद्यते विघसः । ‘अद भक्षणे’ । [1]भोजनशेषनाम ।। त्यज्यते त्यागः । ‘त्यज हानौ’ । विहीयते विहायितम् । विहापितमिति वा पाठः । ‘ओहाक् त्यागे’ । दीयते दानम् । ‘डुदाञ् दाने’ । उत्सृज्यते उत्सर्जनम् । ‘सृज विसर्गे’ । विसृज्यते विसर्जनम् । विश्राण्यते[2] विश्राणनम् । ‘श्रण दाने’ । वितार्यते वितरणम् । ‘तॄ प्लवनतरणयोः’ । स्पृश्यते[3] स्पर्शनम् । ‘स्पृश [4]स्पर्शने’ । प्रतिपाद्यते प्रतिपादनम् । ‘पद[5] गतौ’ । ‘[6]प्रादिश्यते प्रादेशनम् । ‘दिश अतिसर्जने’ । निर्वाप्यते निर्वपणम् । ‘डुवप् बीजतन्तुसन्ताने’ । अपवृज्यतेऽपवर्जनम् । ‘वृजी वर्जने’ । अपसर्जनमिति वा पाठः । हन्ति पापमनया अंहतिः । ‘हन हिंसागत्योः’ । अंहत इति वा । ‘अहि गतौ’ । [7]दाननामानि ।। २८–९ ।।

---

[1] भोज्य° K_5.

[2] विश्रायते K_6, Pt_2.

[3] K_2, K_3 add दीयते.

[4] संस्पर्शने K_2, K_3, K_5.

[5] ‘पद्लृ गतौ’ K_5, K_6.

[6] प्रदिश्यते K_5, K_6.

[7] त्यागनामानि K_2, K_3, W_2.

(पा.) अमृतं विघसो—भोजनशेषयोः । यज्ञद्रव्यशेषोऽमृतं स्यात् । भोजनद्रव्यशेषो विघसः स्यात् ।। त्यागो विहायितं—अपवर्जनमंहतिः । एतानि [1]दाननामानि ।। २८–९ ।।

---

[1] त्यागनामानि B_3.

मृतार्थं तदहे दानं त्रिषु स्यादौर्ध्वदेहिकम् ॥ ३० ॥
पितृदानं निवापः स्याच्छ्राद्धं तत्कर्म शास्त्रतः ।
अन्वाहार्यं मासिकोंऽशोऽष्टमोऽह्नः कुतपोऽस्त्रियाम् ॥ ३१ ॥

(वि.) मृतार्थमिति—देहादूर्ध्वम्[1] ऊर्ध्वदेहः, ऊर्ध्वदेहे [2]भवम् और्ध्वदेहिकम् । और्ध्वदैहिकमिति वा पाठः । मृतमुद्दिश्य मृताहे पिण्डादिदाननाम ॥ [3]निवाप्यते निवापः । 'डुवप् बीजसन्ताने'। उपसर्गवशात् पितृदानार्थं पितृत्वमापन्नमुद्दिश्य यद्दीयते तस्य नाम ॥ श्रद्धया भक्त्या दीयते श्राद्धम् । [4]मन्वादिस्मृत्युक्तनियमोपेतपितृकर्मनाम ॥ पिण्डपितृयज्ञमनु पश्चात् आहार्यते[5]ऽन्वाहार्यम् । मासि मासि क्रियत इति मासिकम् । अमावास्याश्राद्धनाम ॥ सूर्योऽस्मिन् काले कुं भुवं रश्मिभिस्तपतीति कुतपः[6] । 'तप संतापे' । तथा च पुराणे—

'कुं यत्र गोपतिर्गोभिः कार्त्स्न्येन तपति क्षणे ।
स कालः कुतपो नाम श्राद्धं तत्र विधीयते ॥'

इति । अह्नोऽष्टमांशनाम ॥ ३०-१ ॥

[1] देहादूर्ध्वं F_2, Pt_2. [2] विहितं K_5, K_6. [3] न्युप्यते D_2, K_2. [4] °शास्त्रोक्त° K_5. [5] क्रियते K_5, K_6; W_2 adds दीयते. [6] Pt_2 adds पञ्चदशांशकृतस्याह्नः द्विघटिकात्मकः अष्टमो भागः कुतप इत्युच्यते.

(पा.) मृतार्थं तदहर्दानं—और्ध्वदैहिकम् । मृतेभ्यः [1]क्रियमाणपिण्डजलादिदानमहर्दानं[2] स्यात्, और्ध्वदैहिकं च स्यात् । त्रिषु स्यादित्यनेन द्वितीयं त्रिलिङ्गम् । और्ध्वदेहिकमिति वा पाठः । और्ध्वदेहिकं देहि[3] ॥ पितृदानं निवापः स्यात् । पितॄनुद्दिश्य [4]क्रियमाणहिरण्यादिदानं निवापः स्यात् ॥ श्राद्धं—शास्त्रतः । पात्रकालनियमैः शास्त्र[5]चोदितपितृभोजनकर्म श्राद्धं स्यात् ॥ अन्वाहार्यं मासिके । मासश्राद्धनाम ॥

'दशाहे श्राद्धमाग्नेयं साज्यमेकादशेऽहनि ।
संप्रेषणं[6] द्वादशेऽह्नि मासि प्राप्ते तु मासिकम् ॥'

इति ॥ अंशोऽष्टमो—कुतपोऽस्त्रियाम् । अह्नः[7] पञ्चदशांशस्याष्टमांशः कुतपः स्यात् । श्राद्धकालः ।

'दिवसस्याष्टमे भागे यदा मन्दायते रविः ।
स कालः कुतपो नाम[8] पितॄणां दत्तमक्षयम् ॥'

इति [9]निगमाभिधानम् ॥ ३०-१ ॥

[1] क्रियमाणं B_3.　[2] तत्पिण्ड° B_3.　[3] A_1 adds 'ऊर्ध्वाद्दमदेहान्मवचोर्ध्वस्यैकेषाम्' इति शाकटायनमताद् (३. १. ६५) मगागमो भवति.　[4] क्रियमाणम् B_3.
[5] चोदितं B_3.　[6] संप्रेषणी B_3.　[7] अहः पञ्चदशान् कृत्वा तत्राष्टमांशः A_1.
[8] तत्र B_3.　[9] शातातपस्मृताविति शब्द. द्रु. (पृ. १४०).

पर्येषणा परीष्टिश्चान्वेषणा च गवेषणा ।
सनिस्त्वध्येषणा याच्ञाभिशस्तिर्याचनार्थना ॥ ३२ ॥

(वि.) पर्येषणेति—[1]पर्येष्यतेऽनया पर्येषणा । 'इष[2] गतौ' । परीष्टिश्च[3] । अन्विष्यतेऽनया अन्वेषणा । [4]गवेष्यते गवेषणा । 'गवेष मार्गणे' । श्राद्धब्राह्मणान्वेषणनामानि[5] ॥ सन्यतेऽस्मिन्निति सनिः । 'षणु[6] दाने' । अध्येष्यतेऽध्येषणा । 'इष गतौ' । श्राद्धे प्रार्थनानामनी ॥ याचनं याच्ञा, याचना[7] च । 'टुयाचृ याच्ञायाम्' । अभिशस्यते प्रार्थ्यतेऽभिशस्तिः । 'शंसु स्तुतौ' । अर्थ्यतेऽर्थना । 'अर्थ उपयाच्ञायाम्' । प्रार्थनायाः [8]साधारणनामानि ॥ ३२ ॥

[1] पर्येष्यते K_2, K_6.　[2] ईष K_3, K_6.　[3] W_2 adds श्राद्धे द्विजशुश्रूषानामनी.
[4] गवेषणं Pt_2.　[5] चत्वार एकार्थ इति केचित् W_2.　[6] 'षण संभक्तौ' K_3, K_6.
[7] याच्यते K_5.　[8] W_2 adds सर्व°.

(पा.) पर्येषणा—गवेषणा । [1]आमन्त्रणार्थमन्वेषणनामानि । सनिस्त्वध्येषणा । श्राद्धे प्रार्थनानामनी ॥ याच्ञा—याचनार्थना । याच्ञानामानि ॥ ३२ ॥

[1] B_3 adds श्राद्धे ब्राह्मणानाम्.

षट् तु त्रिष्वर्घ्यमर्घार्थे पाद्यं पादाय वारिणि ।
क्रमादातिथ्यातिथेये अतिथ्यर्थेऽत्र साधुनि ॥ ३३ ॥

(वि.) षडिति—षट् त्रिषु, अर्घ्यपाद्यातिथ्यातिथेयावेशिकागन्तुशब्दाः षट् त्रिषु लिङ्गेषु वर्तन्ते । अर्घार्थं वारि अर्घ्यम् । अर्घार्थवारिनाम ॥ पादाय पादयोग्यं वारि पाद्यम् । [1]पादार्हवारिनाम ॥ अतिथिभ्यः परिकल्पितः आतिथ्यः । [2]अतिथ्यर्थस्यासनादेर्नाम ॥ अतिथिषु साधुः आतिथेयः । [3]अतिथौ साध्वन्नपानादेर्नाम ॥ ३३ ॥

[1] पादार्थ° K_5, K_6.　[2] आतिथ्यस्य W_2.　[3] अतिथियोग्य° K_5.

(पा.) षट् तु त्रिषु। ऊर्ध्वं वक्ष्यमाणाः शब्दाः षट् त्रिलिङ्गाः ।। अर्घ्यमर्घार्थे। अक्षतदूर्वादिकमर्घ्यं स्यात् ।। पाद्यं—वारिणि। पादार्थमुदकं पाद्यं स्यात् ।। क्रमादातिथ्य—साधुनि। अतिथ्यर्थातिथियोग्यावातिथ्यातिथेयशब्दौ क्रमेणापि स्याताम्। अतिथिसत्कारे[1] तु तौ द्वौ[2] स्याताम्। '[3]आतिथेयं तथातिथ्यमातिथेयी च कथ्यते' इति हलायुधः (अ. मा. २. २०४) ।। ३३ ।।

[1] सत्कारार्थे A_1. [2] द्वावपि B_3. [3] A_1 adds 'पथ्यतिथिवसतिस्वपतेर्ढञ्' इति वा ढञ्.

स्युरावेशिक आगन्तुरतिथिर्ना गृहागते।
पूजा नमस्यापचितिः सपर्यार्चार्हणाः समाः ।। ३४ ।।

(वि.) स्युरिति—[1]अवेशेऽध्वक्रमे वर्तमानः आवेशिकः। आगच्छति[2] दूरादध्वगमनेन आगन्तुः। नास्ति तिथिरस्य अतिथिः। अतिथिनामानि ।। पूजनं पूजा। 'पूज पूजायाम्'। [3]नमनं नमस्या। 'णम प्रह्वत्वे शब्दे च'। अपचायनम् अपचितिः। 'चायृ पूजानिशामनयोः'। परेणोत्तमेन सह वर्तते सपरः, सपरे साध्वी सपर्या। अर्च्यते अर्चा। 'अर्च पूजायाम्'। [4]अर्हतीति अर्हणा। 'अर्ह पूजायाम्'। पूजानामानि ।। ३४ ।।

[1] आवेशेऽध्वग्रामे भवः K_2, K_3. [2] आगम्यते K_5, K_6. [3] W_2 omits 3 lines.
[4] अर्हणं Pt_2.

(पा.) स्युरावेशिक—गृहागते। [1]अतिथिनामानि ।। 'आगन्तुरतिथिर्द्वयोः' इति केषांचित् स्त्रीलिङ्गोऽपि। 'अत्रभवतास्मद्गृहेष्वतिथ्या[2] भूयताम्' इत्याश्चर्यपदमञ्जरी ।। पूजा नमस्या—अर्हणाः समाः। [3]पूजानामानि ।। ३४ ।।

[1] अभ्यागतस्य B_3. [2] A_1 adds अतिथिना भूयतां. [3] सत्कारनामानि B_3.

वरिवस्या तु शुश्रूषा परिचर्याप्युपासना।
व्रज्याटाट्या पर्यटनं चर्या त्वीर्यापथस्थितिः ।। ३५ ।।

(वि.) वरिवस्येति—वरिवसनं वरिवस्या[1]। श्रोतुमिच्छा शुश्रूषा। 'श्रु श्रवणे'। [2]परिचरणं परिचर्या। 'चर गतिभक्षणयोः'। उप समीपे आसनम्[3] उपासना। 'आस उपवेशने'। गुरोः शिष्यकृतानुकूलव्यापारनाम ।। व्रजनं व्रज्या। 'व्रज गतौ'।

पुनः पुनः अटनम् अटाट्या[4]। 'अट गतौ'। परितोऽटनं पर्यटनम्। पर्यटननामानि ॥ चरणं चर्या। 'चर गतिभक्षणयोः'। ईरणम् ईर्या[5]। 'ईर गतौ'। ईर्यायाः पन्था ईर्यापथः ध्यानाद्युपायः, तस्मिन् स्थितिः ईर्यापथस्थितिः। सन्मार्गस्थितिनामनी ॥ ३५ ॥

[1] K_5, K_6 add 'वस निवासे'.
[2] परिचरतीति D_2, K_2, W_2.
[3] आस्यते उपासनम् K_3, K_5.
[4] K_5 adds अट्या च.
[5] ईर्यते ज्ञायते K_3, K_5.

(पा.) वरिवस्या तु—उपासनम्। अपिशब्दादुपासनापि स्यात्। 'वरिवस्या तु शुश्रूषा सेवा भक्तिरुपासना' इति वैजयन्ती (पृ. ८६, श्लो. ३८)। सेवानामानि ॥ व्रज्या—पर्यटनम्। [1]भिक्षार्थभ्रमणनामानि[2] ॥ चर्या—ईर्यापथस्थितिः। गतिस्थितिनिषद्याशयनेषु समाहितत्वनामानि ॥ ३५ ॥

[1] भिक्षार्थं B_3.
[2] पर्यटन° B_3.

उपस्पर्शस्त्वाचमनमथ मौनमभाषणम्।
आनुपूर्वी स्त्रियां वावृत्परिपाटी अनुक्रमः ॥ ३६ ॥
पर्यायश्चातिपातस्तु स्यात्पर्यय उपात्ययः।

(वि.) उपस्पर्श इति—उपस्पृश्यतेऽङ्गान्यत्र उपस्पर्शः। 'स्पृश [1]स्पर्शने'। आचम्यते उदकमत्र आचमनम्। 'चमु [2]अदने'। आचमननामनी ॥ मुनेर्भावो मौनम्। न भाषणम् अभाषणम्। 'भाष व्यक्तायां वाचि'। व्रतादावभाषणनाम ॥ पूर्वमनुक्रम्य तिष्ठत्यनुपूर्वम्। तस्य भावः [3]आनुपूर्वी। आवर्तनम् आवृत्[4]। परि पटतीति परिपाटिः। 'पट गतौ'। [5]अनुक्रम्यतेऽनुक्रमः। 'क्रमु पादविक्षेपे'। परितः एति[6] पर्यायः। 'इण् गतौ'। क्रमनामानि ॥ अतिक्रम्य [7]पततीति अतिपातः। प्राप्तं परित्यज्यायनं पर्ययः। 'अय गतौ'। उप समीपस्थमतिक्रम्यायनम्[8] उपात्ययः। 'इण् गतौ'। क्रमोल्लङ्घननामानि ॥ ३६ ॥

[1] संस्पर्शने K_3, W_2.
[2] भक्षणे K_3, K_5, W_2.
[3] अनुगता पूर्वं K_5, K_6; अनुपूर्वस्य भावः आनुपूर्व्यं W_2; आ अनुपूर्वभावः D_2.
[4] आवर्तत इति, 'वृतु वर्तने' K_3, K_5, W_2.
[5] क्रामति W_2.
[6] अयते, 'अय गतौ' D_2, K_2.
[7] पतनं K_2, K_3.
[8] K_3 adds गमनं.

(पा.) उपस्पर्शः—आचमनम्। आचमननाम ॥ अथ मौनमभाषणम्। [1]मौननाम ॥ आनुपूर्वी—पर्यायश्च। अनुक्रमनामानि। आनुपूर्वीसाहचर्याद् आवृत्परि-

पाटीशब्दौ स्त्रीलिङ्गौ। आनुपूर्वीशब्दोऽपि वावचनात् पक्षे नपुंसकः। 'स्त्रीनपुंसकयोर्भावक्रिययोः ष्यञ् क्वचिच्च वुञ्' इति लिङ्गसंग्रहे वक्ष्यति (३. ५. ३९)। आनुपूर्वी, आनुपूर्व्यं वा॥ अतिपातस्तु—उपात्ययः। [2]अतिक्रमननामानि॥ ३६॥

[1] अभाषण° A_1.   [2] उल्लङ्घन° B_3.

नियमो व्रतमस्त्री तच्चोपवासादि पुण्यकम्॥ ३७॥
औपवस्तं तूपवासो विवेकः पृथगात्मता।

(वि.) नियम इति—नियम्यत इति नियमः। 'यम उपरमे'। व्रत्यतेऽन्नादिकमत्रेति व्रतम्। 'व्रती[1] वर्जने'। पुण्यहेतुत्वात् पुण्यकम्। उपवासादिव्रतनामनी॥ उपवस्तेऽग्निसमीपे[2] उपवस्तम्। तदस्य प्राप्तमिति औपवस्तम्। उप समीपे वसनं वर्तनम् उपवासः। यजमानस्य [3]अग्निसमीपस्थितिरूपोपवासनामनी[4]॥ विविच्यते विवेकः। 'विचिर् पृथग्भावे'।। पृथगात्मतानाम॥ ३७॥

[1] 'वृतु वर्तने' K_5, W_2.   [2] वासोऽस्य W_2.   [3] स्थितिक° K_3.   [4] °वास° K_5, K_6.

(पा.) नियमो—अस्त्री। व्रतनामनी॥ तच्च—पुण्यकम्। तद्व्रतमुपवासादि पुण्यकर्म पुण्यकम्। देहशोषणं तत्॥ औपवस्तं तूपवासः। उपवासनामनी। 'उपवासः पुमान् वा स्यादौपवस्तं च कीर्तितम्' इत्यमरमाला॥ विवेकः पृथगात्मता। देहात्मादिभेदज्ञाननाम॥ ३७॥

स्याद् ब्रह्मवर्चसं वृत्ताध्ययनर्द्धिरथाञ्जलिः॥ ३८॥
पाठे ब्रह्माञ्जलिः पाठे विप्रुषो ब्रह्मबिन्दवः।
ध्यानयोगासने ब्रह्मासनं कल्पे विधिक्रमौ॥ ३९॥

(वि.) स्यादिति—ब्रह्मणो[1] वर्चः[2] ब्रह्मवर्चसम्। वृत्तस्य[3] अध्ययनस्य वा समृद्धिनाम॥ ब्रह्मणे वेदायाञ्जलिः ब्रह्माञ्जलिः। वेदपाठसमये अध्ययनाङ्गभूताञ्जलिनाम॥ ब्रह्मणि[4] बिन्दवः ब्रह्मबिन्दवः। वेदपाठे सति गुर्वाद्यास्यनिर्गतजलकणनाम॥ ब्रह्मणे आसनं ब्रह्मासनम्। ध्यानयोगोपकारकासननाम॥ कल्प्यतेऽनेन कल्पः। विधीयतेऽनेन विधिः। 'विध विधाने'। क्रम्यतेऽनेनेति क्रमः। व्रीहिभिर्यजेतेत्येवमादि विनियोगनामानि॥ ३८–९॥

[1] F_2, Pt_2 add तपःस्वाध्यायादेः. [2] तेजः Pt_2. [3] ब्राह्मणस्य तपःस्वाध्यायादेः समृद्धिनाम W_2. [4] D_2, Pt_2 add वेदपाठे.

(पा.) स्याद् ब्रह्मवर्चसं—ऋद्धिः। वृत्ताध्ययनयोरभिवृद्धिर्ब्रह्मवर्चसं स्यात्॥ अथाञ्जलिः—ब्रह्माञ्जलिः। वेदपाठे[1] रचिताञ्जलिः[2] ब्रह्माञ्जलिः स्यात्॥ पाठे—ब्रह्मविन्दवः। श्रुतिपठनसमये वक्त्रान्निर्यन्तो विन्दवो ब्रह्मविन्दवः स्युः॥ ध्यानयोगासने ब्रह्मासनम्। 'योगः संनहनोपायध्यानसंगतियुक्तिषु' इति वक्ष्यति (३. ३. २२)। ध्यानोपायभूतपद्मस्वस्तिकाद्यासनं ब्रह्मासनं स्यात्॥ कल्पे [3]विधिक्रमौ[4]। कर्तव्यत्वेन शास्त्रचोदितार्थनामानि॥ ३८–९॥

[1] A_1 adds यः. [2] A_1 adds सः. [3] विधिः B_3. [4] क्रमः B_3.

मुख्यः स्यात् प्रथमः कल्पोऽनुकल्पस्तु ततोऽधमः।
संस्कारपूर्वं ग्रहणं स्यादुपाकरणं श्रुतेः॥ ४०॥

(वि.) मुख्य इति—मुखमिव प्रधानत्वात् मुख्यः। [1]प्रथम आद्यः कल्पः विधिः। [2]मुख्यशास्त्रार्थनाम॥ अनु पश्चात् कल्प्यतेऽनुकल्पः। [3]गौणशास्त्रार्थनाम॥ उपाक्रियते स्वीक्रियते श्रुतिरनेनेति उपाकरणम्। श्रुतेर्वेदस्य [4]संस्कारपूर्वकग्रहणनाम॥ ४०॥

[1] प्रथमश्चासौ कल्पश्च प्रथमकल्पः D_2, K_5, K_6. [2] °विधि° K_3, W_2. [3] गौणविधिनाम W_2. [4] संस्कारः उपनयः तत्पूर्वकं Pt_2.

(पा.) मुख्यः—कल्पः। मुख्यार्थः प्रथमः[1] कल्पः स्यात्। अनुकल्पस्ततोऽधमः। तस्मादधमोऽनुकल्पः स्यात्। व्रीहिभिर्यजेत। तदलाभे नीवारैर्वा[2] इत्युदाहरणम्। संस्कारपूर्वग्रहणं—श्रुतेः। श्रुतेः संस्कारपूर्वकं[3] ग्रहणम् उपाकरणं स्यात्। उपाकर्म च[4] प्रसिद्धम्[5]॥ ४०॥

[1] प्रथमकल्पः A_1. [2] A_1 adds यजनीयम्. [3] पूर्वकग्रहणं A_1. [4] नाम A_1. [5] B_3 omits.

समे तु पादग्रहणमभिवादनमित्युभे।
भिक्षुः परिव्राट् कर्मन्दी पाराशर्यपि मस्करी॥ ४१॥

(वि.) समे इति—पादयोः ग्रहणं पादग्रहणम्। 'ग्रह उपादाने'। अभिवाद्यते आशीर्वादः [1]क्रियतेऽनेन अभिवादनम्। 'वदि अभिवादनस्तुत्योः'। नमस्कारनामनी ॥ अपराह्णे ग्रामं प्रविश्य भिक्षते भिक्षुः। 'भिक्ष [2]भिक्षायाम्'। परित्यज्य सर्वं व्रजतीति परिव्राट्। 'व्रज गतौ'। जकारान्तोऽयम्[3]। [4]कर्मन्दऋषिप्रोक्तसूत्रमधीत इति कर्मन्दी। पाराशर्यप्रोक्तसूत्रमधीते पाराशरी[5]। मस्करो वेणुदण्डः, सोऽस्यास्तीति मस्करी। माकरणशीलः काम्यकर्मप्रतिषेधपरो[6] वा। संन्यासिनामानि ॥ ४१ ॥

[1] कार्यते K₅. [2] याच्ञायाम् K₃, K₆. [3] K₅ adds शब्दः. [4] कर्मन्देन D₂, K₅, K₆. [5] पराशरेण कृतं सूत्रमधीते पराशरी D₂. [6] °प्रतिषेधन° K₂, W₂.

(पा.) समे तु—अभिवादनमित्युभे। [1]पादौ संस्पृश्याभिवादननामनी ॥ भिक्षुः परिव्राट्—मस्करी। [2]चतुर्थाश्रमिनामानि ॥ ४१ ॥

[1] पादप्रणामनाम B₃. [2] सन्यासिनामानि B₃.

तपस्वी तापसः पारिकाङ्क्षी वाचंयमो मुनिः।
तपःक्लेशसहो दान्तो वर्णिनो ब्रह्मचारिणः ॥ ४२ ॥

(वि.) तपस्वीति—तपोऽस्यास्तीति तपस्वी। तापसश्च। परिकाङ्क्षते तपसः[1] फलमिति पारिकाङ्क्षी। '[2]काक्षि काङ्क्षायाम्'। वाचं यच्छतीति वाचंयमः[3]। 'यम उपरमे'। मन्यते मुनिः[4]। 'मन ज्ञाने'। [5]मुनिनामानि ॥ दाम्यति इन्द्रियेभ्य इति दान्तः। 'दमु [6]उपशमे'। तपःक्लेशसहस्य नाम ॥ वर्णाः स्तुतय एषां सन्तीति वर्णिनः। ब्रह्मचारिनाम ॥ ४२ ॥

[1] परं ब्रह्मज्ञानं F₂, Pt₂. [2] 'काङ्क्ष इच्छायां' K₂, K₃, W₂. [3] वाचि (नि W₂) यमोऽस्तीति वा D₂, K₆. [4] मौनेनास्ते K₅, K₆. [5] D₂ omits three lines. [6] उपरमे K₆; उपशमने K₂, K₅.

(पा.) तपस्वी—पारिकाङ्क्षी। तपस्विनामानि। 'तपोधनः प्रव्रजितः सुखी च स्यादनाथकी'। एतानि चत्वारि च ॥ वाचंयमो मुनिः। मौनव्रतिनामनी ॥ तपःक्लेशसहो दान्तः। धूमपानादितपःक्लेशसहिष्णुर्दान्तः[1] स्यात् ॥ वर्णिनो ब्रह्मचारिणः। ब्रह्मचर्यव्रतस्था ब्रह्मचारिणः स्युः।

'ब्रह्मचारी भवेद्वर्णी गृहस्थः स्नातकस्तथा।

वैखानसो वनप्रस्थः[2] कर्मसंन्यासिको यतिः ॥'
इति हलायुधः (अ. मा. २. २३९) ॥ ४२ ॥

---

[1] क्लेशसहः B_3.　　[2] वानप्रस्थ इति मुद्रितग्रन्थे.

ऋषयः सत्यवचसः स्नातकस्त्वाप्लुतो व्रती ।
ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते ॥ ४३ ॥

(वि.) ऋषय इति—ऋषति तपस इति ऋषिः[1]। 'ऋषी गतौ'। सत्यं वचो येषां ते सत्यवचसः। ऋषिनामनी ॥ व्रतरूपेण[2] स्नातीति स्नातकः। 'ष्णा शौचे'। आप्लवत इति आप्लुतः। 'प्लुङ् गतौ'। आप्लुतव्रतिनाम ॥ यतम् इन्द्रियसंयमो येषामस्तीति यतिनः[3]। यच्छन्ति उपरमन्ति [4]विषयेभ्य इति यतयः। 'यम उपरमे'। निर्जितेन्द्रियग्रामस्य[5] गृहस्थादेर्नामनी ॥ ४३ ॥

---

[1] इयर्ति वने, 'ऋ गतौ' K_2, K_3.　　[2] व्रतार्थं F_2, Pt_2.　　[3] यतनमस्यास्तीति यती K_2, K_5, K_6, W_2.　　[4] इन्द्रियेभ्यः Pt_2.　　[5] समूहस्य K_3, W_2.

(पा.) ऋषयः सत्यवचसः। सत्यव्रतिनां नामनी ॥ स्नातकः—व्रती[1] स्नानव्रतिनाम ॥ ये निर्जितेन्द्रियग्रामाः—यतयश्च ते। [2]जितेन्द्रियनामनी ॥ ४३ ॥

---

[1] A_1 adds व्रतिरिति पाठोऽसाधीयान्.　　[2] निर्जित° B_3.

यः स्थण्डिले व्रतवशाच्छेते स्थण्डिलशाय्यसौ ।
स्थाण्डिलश्चाथ विरजस्तमसः स्युर्द्वयातिगाः ॥ ४४ ॥

(वि.) य इति—[1]स्थण्डिले शेते स्थण्डिलशायी। स्थाण्डिलश्च। व्रतवशेन[2] स्थण्डिलशयितृनामनी ॥ विगते रजस्तमसी येभ्य इति विरजस्तमसः। द्वयं रजस्तमोरूपगुणद्वयम् अतिगच्छन्ति अतिक्राम्यन्तीति द्वयातिगाः। [3]विगतरजस्तमोगुणानां नामनी ॥ ४४ ॥

---

[1] W_2 omits two lines.　　[2] °वशात् K_5, K_6.　　[3] वीत° K_5.

(पा.) यः स्थण्डिले—स्थाण्डिलश्च। व्रतवशात् स्थण्डिले यः शेते तन्नामनी ॥ अथ विरजस्तमसः—द्वयातिगाः। [1]रजोगुणधर्मो रागः। तमोगुणधर्मो द्वेषश्चेति द्वाभ्यां विमुक्ता द्वयातिगाः स्युः ॥ अनुक्तम्—'मूलिको वृक्षमूलस्थः'। तरुमूलनिवासी[2] मूलिकः

स्यात् ॥ 'क्षीराहारस्तु लोचकः'। क्षीराहारनियतो लोचकः स्यात् ॥ 'और्वव्रती जलाहारः'। जलाहारनियत और्वव्रती स्यात् ॥ 'खपुटः पाणिपात्रकः'। यः पाणिपात्रे भुङ्क्ते स[3] खपुटः स्यात् ॥ ४४ ॥

---

[1] रजोगुणस्तमोगुणश्चेति द्वाभ्यां B_3. [2] °मूलस्थः A_1. [3] तन्नाम उक्तः A_1.

पवित्रः प्रयतः पूतः पाषण्डाः सर्वलिङ्गिनः ।
पालाशो दण्ड आषाढो व्रते राम्भस्तु वैणवः ॥ ४५ ॥

(वि.) पवित्र इति—परम् आत्मानं च पुनातीति [1]पवित्रः। पूतश्च। 'पूञ् पवने'। प्रयच्छति विषयेभ्य उपरमतीति प्रयतः। 'यम उपरमे'। परपावनहेतुभूतपुरुषनामानि ॥ पाशान्[2] संसृतिबन्धहेतुभूतानि असच्छास्त्राणि अणन्ति वदन्तीति पाषण्डाः। 'अण शब्दे'। सर्वेषामाश्रमाणां लिङ्गानि भजन्त इति सर्वलिङ्गिनः[3]। [4]वेदमार्गबाह्यानुवर्तिनां नामनी ॥ पलाशस्य विकारः पालाशः। आषाढः प्रयोजनमस्य आषाढः। पलाशदण्डनाम ॥ रम्भस्य वेणोः संबन्धी राम्भः। वेणोः संबन्धी वैणवः। व्रते व्रतविषये वेणुदण्डनाम ॥ ४५ ॥

---

[1] पूयतेऽनेन F_2, Pt_2. [2] पापानि असंस्कृतहेतुभूतानि K_5, K_6. [3] सर्वलिङ्गानि वेदविरुद्धचिह्नानि सन्ति एषां D_2, K_5; कमण्डलुजटादीनि K_3, W_2. [4] वेदबाह्यमार्ग° K_5, W_2.

(पा.) पवित्रं—पूतः। शुचेर्नामानि ॥ पाषण्डाः—सर्वलिङ्गिनः। षण्णवतिबाह्यलिङ्गिनः पाषण्डाः स्युः ॥ पालाशो दण्ड—राम्भस्तु वैणवः। व्रते राम्भ इत्यत्र 'रो रि' (८. ३. १४) इति रेफलोपः[1]। व्रतेः पालाशो दण्ड आषाढः स्यात्। व्रतेर्वेणुदण्डो राम्भः स्यात् ॥ ४५ ॥

---

[1] अथवा व्रते इति सप्तम्यन्तं ब्रह्मचर्ये.

अस्त्री कमण्डलुः कुण्डी व्रतिनामासनं बृसी ।
अजिनं चर्म कृत्तिः स्त्री भैक्षं भिक्षाकदम्बकम् ॥ ४६ ॥

(वि.) अस्त्रीति—कमुदकम्[1] अण्डे मध्ये लातीति कमण्डलुः। 'ला आदाने'। कुण्डवद् वृत्तत्वात् कुण्डी। कमण्डलुनामनी ॥ [2]व्रतिनः सीदन्त्यस्यामिति [3]बृसी। दर्भादिकृतव्रत्यासननाम ॥ अज्यते मूत्रसमयेऽन्यत्र क्षिप्यते अजिनम्। 'अज गति-

क्षेपणयोः'। [4]मेखलादिना सह चरति चर्म। 'चर गतिभक्षणयोः'। कृत्यते कृत्तिः। 'कृती छेदने'। [5]अजिननामानि॥ भिक्षाणां समूहो भैक्षम्। भिक्षाकदम्बनाम॥ ४६॥

[1] जलं Pt_2.　[2] ब्रुवन्तः, 'ब्रूञ् व्यक्तायां वाचि' 'षद्लृ विशरणगत्यवसादनेषु' F_2, Pt_2.　[3] वृषीति वा पाठः D_2, Pt_2.　[4] चरति कटिप्रदेशं F_2, Pt_2.　[5] चर्म° K_2, K_3, W_2.

(पा.) अस्त्री कमण्डलुः कुण्डी। कुण्डिकानामनी॥ व्रतिनामासनं बृसी। नियमिनामासनं बृसी स्यात्। 'वसितसिबृसिमांसीति' दन्त्यान्तेषु चन्द्रगोमिः। 'कपिकच्छ्वां वृषा प्रोक्ता व्रतिनामासने बृषी' इति मूर्धन्यान्तेषु विश्वप्रकाशिका (पृ. १७१, श्लो. २)॥ अजिनं चर्म—स्त्री। [1]कृष्णाजिननामानि। अनुक्तम्—'मौञ्जी तु मेखला क्षोणी'। मुञ्जमेखला क्षोणी स्यात्। 'धटिनी सूत्रमेखला'। तन्तुकृतमेखला धटिनी स्यात्। 'योगपट्टस्तु पर्यङ्कस्तस्मिन् पर्यस्तिका स्त्रियाम्'। योगपट्टनामानि॥ भैक्षं भिक्षाकदम्बकम्। भिक्षाशब्दोऽत्र भिक्षितान्नवचनः। 'भिक्षा तु भिक्षितान्ने[2] च याच्ञायां भृतिसेवयोः' इति वैजयन्ती (पृ. २२२, श्लो. २६)। भिक्षासमूहो भैक्षं स्यात्॥ ४६॥

[1] चर्मनामानि B_3.　[2] °अन्नादौ इति मुद्रितग्रन्थे.

स्वाध्यायः स्याज्जपः सुत्याभिषवः सवनं च सा।
सर्वैनसामपध्वंसि जप्यं त्रिष्वघमर्षणम्॥ ४७॥

(वि.) स्वाध्याय इति—स्ववेदाध्ययनं स्वाध्यायः। जपनं जपः। 'जप व्यक्तायां वाचि'। जाप इति वा पाठः। ब्रह्मयज्ञस्वाध्यायनाम॥ सोमलतामस्यां सुन्वन्तीति सुत्या। अभिषुण्वन्ति अभिषवः। सवनं च। 'षुञ् अभिषवे'। सोमाभिषवानुष्ठानविधिनामानि॥ अघं मृष्यते नाश्यतेऽनेन अघमर्षणम्। 'मृषु[1] सहने'। जले जप्यस्य [2]ऋतं चेत्यादिसूक्तस्य नाम॥ ४७॥

[1] 'मृष हिंसायाम्' K_5, K_6, Pt_2.　[2] ऋग्वेदः (१०. १९०).

(पा.) स्वाध्यायः स्याज्जपः। 'बाहुलकाद् घञ्। जापः' इति रक्षितवचनाज्जापोऽपि स्यात्। स्वाध्यायनामनी॥ सुत्याभिषवः—च सा। स्नाननामानि। सोमपाननामान्यपि स्युः। सर्वैनसामपध्वंसि—अघमर्षणम्। [1]जप्यं गायत्र्यादि। सर्वपापापनोदकं जप्यमघमर्षणं स्यात्। तत् त्रिलिङ्गम्। अघमर्षणो मन्त्रः। अघमर्षणी ऋक्[2]॥ ४७॥

[1] A_1 adds शूद्रस्य वैदिकमन्त्रं प्रत्यनधिकारादित्यनेन.　[2] ऋगित्यादि B_3.

दर्शश्च पौर्णमासश्च यागौ पक्षान्तयोः पृथक् ।
शरीरसाधनापेक्षं नित्यं यत्कर्म तद्यमः ॥ ४८ ॥
नियमस्तु स यत्कर्म नित्यमागन्तुसाधनम् ।

(वि.) दर्श इति—दर्शेऽमावास्यायां [1]हितो यागो दर्शः । कृष्णपक्षान्तदिनयागनाम ॥ [2]पौर्णमास्यां विहितो यागः पौर्णमासः । शुक्लपक्षान्तदिनयागनाम ॥ यम्यते चित्तमनेन यमः । 'यम उपरमे' । शरीरेन्द्रियमात्रसाधनापेक्षस्य अहिंसास्तेयादिनित्यानुष्ठेयकर्मणो[3] नाम ॥ नियम्यते पुरुषोऽनेनेति नियमः[4] । मृज्जलाद्यागन्तुसाधनस्य नित्यस्य तपःशौचसंतोषादेर्नाम ॥ ४८ ॥

[1] विहितः D_2, K_3, W_2. [2] पूर्णिमायां D_2, K_2. [3] अनुष्ठेयकनित्यकर्म K_5. [4] नित्यं यम्यते पुरुषोऽत्र D_2.

(पा.) दर्शश्च [1]पूर्णमासश्च—पक्षान्तयोः पृथक् । पक्षान्तयागौ दर्शपूर्णमासौ स्याताम् ॥ शरीरसाधनापेक्षं—तद्यमः । शरीरैकसाधनं नित्यकर्म यमः स्यात् । अहिंसादि ।

'अहिंसा सत्यमस्तेयं ब्रह्मचर्यमसंग्रहः ।
यमः[2] स्यात्' ।

इति वैजयन्ती (पृ. १००, श्लो. २०९) ॥ नियमस्तु—आगन्तुसाधनम् । आगन्तुसाधनं नित्यकर्म नियमः स्यात्[3] । 'नियमाः शौचसन्तोषतपआदयः' इति वैजयन्ती (पृ. १००, श्लो. २०९) ॥ ४८ ॥

[1] पौर्णमासः A_1. [2] यमाः स्युः इति मुद्रितग्रन्थे. [3] A_1 adds शौचादयो नियमाः.

उपवीतं यज्ञसूत्रं प्रोद्धृते दक्षिणे करे ॥ ४९ ॥
प्राचीनावीतमन्यस्मिन्निवीतं कण्ठलम्बितम् ।
अङ्गुल्यग्रे तीर्थं दैवं स्वल्पाङ्गुल्योर्मूले कायम् ॥ ५० ॥

(वि.) उपवीतमिति—[1]उपवीयते संव्रियते वामस्कन्धोऽनेनेति उपवीतम् । 'वी गत्यादौ,' 'वृञ् संवरणे' । वामभुजोपरि दक्षिणभुजादधोवर्तमानस्य यज्ञसूत्रस्य नाम ॥ आवीयते आवीतम् । प्राचीनं च तदावीतं च [2]प्राचीनावीतम् । दक्षिणभुजोपरि वामभुजादधोवर्तमानस्य यज्ञसूत्रस्य नाम ॥ नियतं वीयते निवीतम् । कण्ठलम्बितयज्ञसूत्रनाम ॥

तीर्यते पापमनेनेति तीर्थम्[3]। देवानामिदं दैवम्। अङ्गुल्यग्ररूपदेवतीर्थनाम[4]॥ कः प्रजापतिः देवतास्य [5]कायम्। वामदक्षिणकरसंबन्धिकनिष्ठाङ्गुल्योर्मूलरूपप्रजापतितीर्थनाम ॥ ४९–५० ॥

---

[1] K_3 omits five lines.　[2] वामकक्षान्तात् प्राग् आवीयते K_5.　[3] F_2, Pt_2 add 'तॄ प्लवनतरणयोः'.　[4] दैव° D_2, W_2.　[5] के ब्रह्मणि कीर्यते K_3; काय ब्रह्मणे हविरनेन कीर्यते K_5.

(पा.) उपवीतं यज्ञसूत्रं—दक्षिणे करे। यज्ञसूत्रं नाम ब्रह्मसूत्रम्। 'यज्ञसूत्रं ब्रह्मसूत्रं त्रिसूत्रं सूत्रमित्यपि' इति [1]वैजयन्ती। तदेव दक्षिणहस्तोद्धृतं चेद् उपवीतं स्यात्। प्राचीनावीतमन्यस्मिन्। वामहस्तोद्धृतं चेत् प्राचीनावीतं स्यात्॥ निवीतं कण्ठलम्बितम्। कण्ठलम्बितं चेत् निवीतं स्यात्। अङ्गुल्यग्रे तीर्थं दैवम्। अङ्गुलीनामग्रे दैवं तीर्थं स्यात्। [2]तद्दैवततर्पणस्थानं[3] भवति॥ स्वल्पाङ्गुल्योर्मूले कायम्। तथा कनिष्ठिकानामिकयोर्मूले प्राजापत्यतीर्थं स्यात्॥ ४९–५० ॥

---

[1] 'द्विजायनी ब्रह्मसूत्रं सूत्रं यज्ञोपवीतकम्' इत्येव मुद्रितग्रन्थे (पृ. ८४, श्लो. २०).
[2] A_1 adds तन्निमित्तात्.　[3] दैव° A_1.

मध्येऽङ्गुष्ठाङ्गुल्योः पित्र्यं मूले त्वङ्गुष्ठस्य ब्राह्मम्।
स्याद्ब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्यमित्यपि ॥ ५१ ॥

(वि.) मध्य इति—पितॄणामिदं पित्र्यम्। तर्जन्यङ्गुष्ठमध्यरूपपितृतीर्थनाम॥ ब्रह्मण इदं ब्राह्मम्। अङ्गुष्ठमूलरूपब्रह्मतीर्थनाम॥ ब्रह्मणो भावो ब्रह्मभूयम्। ब्रह्मत्वं च। [1]ब्रह्मणः सायुज्यं[2] ब्रह्मसायुज्यम्। हिरण्यगर्भब्रह्मपदप्राप्तिनाम[3]॥ ५१ ॥

---

[1] ब्रह्मणा K_5, K_6.　[2] Pt_2 adds सयुक् संबन्धी, तस्य भावः सायुज्यम्.
[3] K_2 omits; ब्रह्माप्ति° D_2.

(पा.) मध्ये—पित्र्यम्। अङ्गुष्ठतर्जन्योर्मध्ये [1]पित्र्यं तीर्थं स्यात्। मूले—ब्राह्मम्। अङ्गुष्ठमूले ब्रह्मतीर्थं स्यात्॥ स्याद् ब्रह्मभूयं—ब्रह्मसायुज्यमित्यपि। ब्रह्मैकीभावनामानि ॥ ५१ ॥

---

[1] पित्र्यतीर्थं A_1.

देवभूयादिकं तद्वत् कृच्छ्रं सांतपनादिकम् ।
संन्यासवत्यनशने पुमान् प्रायोऽथ वीरहा ॥ ५२ ॥
नष्टाग्निः कुहना लोभान्मिथ्येर्यापथकल्पना ।

(वि.) देवेति—एवं देवभूयं देवत्वम् । देवसायुज्यम् । आदिग्रहणात् राजसूयं राजत्वम् राजसायुज्यम् । इन्द्रभूयम् इन्द्रत्वम् इन्द्रसायुज्यमित्यादि ॥ कृन्तति पापमिति [1]कृच्छ्रम् । 'कृती छेदने' । सांतपनप्राजापत्यादिकृच्छ्रनाम ॥ प्रकृष्टमेति पुण्यलोकमनेनेति प्रायः[2] । 'इण् गतौ' । सर्वसङ्गपरित्यागवदनशनदीक्षानाम ॥ वीरहन्तुः समत्वात् वीरहा[3] । [4]नष्टत्रेताग्नेर्नाम ॥ कुहयते कुहना । 'कुह विस्मापने' । लोभान्मिथ्यापथकल्पनायाः चर्याया नाम ॥ ५२ ॥

---

[1] Pt_2 adds :

त्र्यहं सायं त्र्यहं प्रातस्त्र्यहमद्यादयाचितम् ।
त्र्यहं परं च नाश्नीयात् [5]कृच्छ्रं सांतपनं स्मृतम् ॥ इति मनुः (११. २११).

[2] प्रैति उपरम्यते K_5, K_6, W_2.

[3] वीरम् अग्निं हतवान्, 'हन हिंसागत्योः' F_2, Pt_2.

[4] स्वेच्छयोत्सृष्ट° K_2, K_5, W_2.

[5] प्राजापत्यं चरन् द्विजः इति मुद्रितग्रन्थे (पृ. ३८४); 'गोमूत्रम्' इत्यादि (श्लो. २१२) तु सांतपनम्.

(पा.) देवभूयादिकं तद्वत् । तथा देवभूयदेवत्वदेवसायुज्यानि देवैकीभावनामानि ॥ कृच्छ्रं सांतपनादिकम् । सांतपनादिव्रतं कृच्छ्रं स्यात् ।

> 'गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
> एकरात्रोपवासश्च कृच्छ्रं सांतपनं स्मृतम् ॥'

इति (मनु. ११. २१२) ॥ संन्यासवत्यनशने—प्रायः । संन्यासः स्यात् क्रियात्यागः । [1]तत्पूर्वकमनशनव्रतं प्रायः स्यात् । अकारान्तः । 'प्रायोपवेशनमतिर्नृपतिर्बभूव' इति (रघु. ८. ९४) ॥ अथ वीरहा नष्टाग्निः । नष्टाग्निर्वीरहा स्यात् । 'वीरहा वा एष देवानां भवति योऽग्निमुद्वासयते' इति श्रुतेः ([2]तै. सं. १. ५. २) । वीरहणौ, वीरहणः । 'सौ च' (६. ४. १३) इत्यादिनियमात् [3]दीर्घो न भवति ॥ कुहना—ईर्यापथकल्पना । अर्थलिप्सयासद्भूतचर्यापथकल्पना कुहना स्यात् । 'कुहनायतिनं कुरुप्रवीरं स्वसरि न्यस्तदृशं जगाद शौरिः' । इति प्रयोगः ॥ ५२ ॥

---

[1] संन्यास° A_1.

[2] Apte's Dict. p. 1487.

[3] B_3 omits.

व्रात्यः संस्कारहीनः स्यादस्वाध्यायो निराकृतिः ॥ ५३ ॥
धर्मध्वजी लिङ्गवृत्तिरवकीर्णी क्षतव्रतः ।

(वि.) व्रात्य इति—व्रातं स्तोममर्हतीति व्रात्यः । काले उपनयनादिसंस्कारहीनस्य नाम ॥ न विद्यते स्वाध्यायो यस्य अस्वाध्यायः । [1]निराक्रियत इति निराकृतिः । [2]गृहीतस्वाध्यायत्यागिनो नाम ॥ धर्मस्येव ध्वजः चिह्नं यस्य धर्मध्वजी । लिङ्गधारणमेव[3] वृत्तिर्जीवनं यस्य लिङ्गवृत्तिः । मिथ्यानुष्ठानलक्षणजीवतो नामनी ॥ अव[4] व्रतान्तरे कीर्णं रेतोऽस्य अवकीर्णी । 'कॄ विक्षेपे' । क्षतं खण्डितं व्रतमस्य क्षतव्रतः । नष्टब्रह्मचर्यव्रतस्य नामनी ॥ ५३ ॥

[1] K_2 adds स्वाध्यायविद्भिः. [2] K_2 adds तपः. [3] F_2, Pt_2 add चिह्न°. [4] W_2 adds अवान्तरे.

(पा.) व्रात्यः—हीनः स्यात् । उपनयनं विना कृतविवाहो विप्रो व्रात्यः स्यात् ।

'कुर्वन्त्यनुपनीता ये विवाहं ब्राह्मणादयः ।
व्रात्या व्राताश्च ते सर्वे ॥'

इति वैजयन्ती (पृ. ७६, श्लो. ५९) ॥ अस्वाध्यायो निराकृतिः । वेदाभ्यासशून्यो निराकृतिः स्यात् । अनुक्तम्—'अजपस्त्वसदध्येता' । असत्पाठकोऽजपः स्यात् ॥ 'शाखारण्डोऽन्यशाखया' । अन्यशाखापाठकः शाखारण्डः स्यात् ॥ धर्मध्वजी लिङ्गवृत्तिः । लिङ्गं जटाधारणादिकं यस्य वृत्तिः स धर्मध्वजी स्यात् । [1]वर्णिलिङ्ग्यपि स्यात् । 'वर्णिलिङ्गी लिङ्गवृत्तिः' इति वैजयन्ती (पृ. ८३, श्लो ९) ॥ अवकीर्णी क्षतव्रतः । क्षतब्रह्मचारिव्रतोऽवकीर्णी[2] स्यात् । आरूढच्युतः । पतितः ॥ ५३ ॥

[1] वर्णी लिङ्गी A_1. [2] अवकीर्णः A_1.

सुप्ते यस्मिन्नस्तमेति सुप्ते यस्मिन्नुदेति च ॥ ५४ ॥
अंशुमानभिनिर्मुक्ताभ्युदितौ च यथाक्रमम् ।
परिवेत्तानुजोऽनूढे ज्येष्ठे दारपरिग्रहात् ॥ ५५ ॥

(वि.) सुप्त इति—यं सुप्तमभि[1] सूर्यो निर्मुञ्चति अस्तमेति सोऽभिनिर्मुक्तः। सूर्यास्तमयकाले सुप्तस्य नाम ॥ यं सुप्तमभि[1] सूर्य उदेति उदयं गच्छति सोऽभ्युदितः। सूर्योदयकाले सुप्तस्य नाम ॥ ज्येष्ठं [2]परिवर्ज्य वधूं विन्दति परिवेत्ता[3]। ज्येष्ठेऽकृतविवाहे सति कृतदारसंग्रहस्य[4] नाम ॥ ५४–५ ॥

[1] अभिभूय Pt_2.
[2] परित्यज्य F_2, Pt_2.
[3] D_2, W_2, Pt_2 add 'विद्लृ लाभे'.
[4] परिग्रह° K_3.

(पा.) सुप्ते यस्मिन्—यथाक्रमम्। यस्मिन् [1]पुरुषे सुप्ते सति अंशुमानस्तमेति यस्मिन् पुंसि[2] सुप्ते सति सूर्योऽभ्युदेति तौ नरौ[3] यथाक्रमम् अभिनिर्मुक्ताभ्युदिताविति फलितार्थः। सूर्यास्तमयसूर्योदयसमयशायिनोर्नामनी[4] ॥ परिवेत्ता—दारपरिग्रहात्। ज्येष्ठस्य विवाहेऽसति सति ऊढः कनिष्ठः परिवेत्ता स्यात्। ऋदन्तः ॥ ५४–५ ॥

[1] पुंसि B_3.
[2] नरे A_1.
[3] B_3 omits.
[4] °समययोः शायिनौ क्रमेणाभिनिर्मुक्ताभ्युदितावित्यर्थः A_1.

परिवित्तिस्तु तज्ज्यायान् विवाहोपयमौ समौ ।
तथा परिणयोद्वाहोपयामाः पाणिपीडनम् ॥ ५६ ॥

(वि.) परिवित्तिरिति—श्राद्धादौ परिवर्ज्य[1] विन्दति परिवित्तिः। पूर्वोक्तस्यैव[2] ज्येष्ठभ्रातृनाम ॥ विशेषेण वहति वधूमिति [3]विवाहः। 'वह प्रापणे'। उपयमनम् उपयमः। परिणीयते[4] वधूरिति परिणयः। 'णीञ् प्रापणे'। उद्वहनम्[5] उद्वाहः। 'वह प्रापणे'। उपयमनम्[6] उपयामः। 'यम उपरमे'। वधूपाणेः वरपाणिना पीडनं ग्रहणमत्रेति पाणिपीडनम्। विवाहनामानि ॥ ५६ ॥

[1] परिवर्ज्यते K_5, K_6, W_2.
[2] पूर्वोक्तज्येष्ठ° K_6; ज्यायसः K_5.
[3] विवहति K_2, K_6.
[4] परिणयनँ F_2, Pt_2.
[5] उद्वहति K_5, K_6, W_2.
[6] उपयमवत् W_2; अप्प्रत्यये, घञि च (३. ३. ६३).

(पा.) परिवित्तिस्तु तज्ज्यायान्। कनिष्ठस्य विवाहे सति ज्यष्ठोऽनूढः परिवित्तिः स्यात्। परिवित्तोऽपि स्यात्। 'परिवित्तिस्तु तज्ज्यायान् परिवित्तः [1]कुरी च सः' इति

वैजयन्ती (पृ. ८६, श्लो. ४३) ॥ विवाहोपयमौ समौ । विवाहनामनी ॥ तथा परिणयो—पाणिपीडनम् । इति पुस्तकान्तरपाठात् परिणयादयोऽपि स्युः[2] ॥ ५६ ॥

[1] कुलीति च A_1, B_3.   [2] B_3 omits.

व्यवायो ग्राम्यधर्मो मैथुनं निधुवनं रतम् ।
त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैः ॥ ५७ ॥
सबलैस्तैश्चतुर्भद्रं जन्याः स्निग्धा वरस्य ये ।

इति ब्रह्मवर्गः

(वि.) व्यवाय इति—व्यवायनं[1] व्यवायः । 'इण् गतौ' । ग्राम्यो धर्मः ग्राम्यधर्मः[2] । मिथुनस्येदं मैथुनम् । निधूयन्ते कम्पन्तेऽङ्गान्यस्मिन्निति[3] निधुवनम् । 'धूञ् कम्पने' । [4]रमन्तेऽस्मिन्निति रतम् । 'रमु क्रीडायाम्' । मैथुननामानि ॥ [5]त्रिभिर्धर्मार्थकामैरुपलक्षितो वर्गः त्रिवर्गः । धर्मार्थकामसमूहनाम[6] ॥ चतुर्भिरुपलक्षितो[7] वर्गः चतुर्वर्गः । मोक्षसहितस्य पूर्वोक्तस्य वर्गत्रयस्य नाम ॥ चतुर्णां भद्राणां समाहारः चतुर्भद्रम् । अतिनिर्बन्धेन वर्तमानानां धर्मार्थकाममोक्षाणां नाम ॥ जनिं वधूं वरं [8]प्रापयन्तीति जन्याः । वरस्य सुहृदां नाम ॥ ५७ ॥

इति श्रीलिङ्गयसूरिविरचितायाममरकोशपदविवृतौ ब्रह्मवर्गः

[1] व्यवयति K_6; व्यवैति K_5, W_2.   [2] ग्राम्याणां पामराणां F_2, Pt_2.   [3] गात्राण्यत्र W_2.   [4] रमणं Pt_2.   [5] त्रयाणां वर्गः W_2, Pt_2.   [6] पुरुषार्थत्रयस्य W_2.   [7] चतुर्णां वर्गः W_2, Pt_2.   [8] नयन्तीति Pt_2.

(पा.) व्यवायो ग्राम्यधर्मः—निधुवनं रतम् । 'स्त्रियां क्तिन्' (३. ३. ९४) इति रतिरपि स्यात्[1] । 'ग्राम्यधर्मः कामकेली रतिर्निधुवनं रतम्' इति वैजयन्ती (पृ. १७२, श्लो. १७०) । 'सौ रमेः क्तः' इति [2]सुरतमपि स्यात् । 'सुरतं मोहनं प्रोक्तं मणितं रतकूजितम्' इति हलायुधः (अ. मा. २. ४१४) । संगमनामानि ॥ अनुक्तम्—'चुम्बनं रदनोच्छिष्टम्' । अधरग्रहणनाम ॥ 'मणितं रतिकूजितम्' । गलरवनामनी ॥ त्रिवर्गो धर्मकामार्थैः । धर्मकामार्थास्त्रयो मिलित्वा त्रिवर्गः स्यात् । चतुर्वर्गः समोक्षकैः ।

मोक्षसहितास्ते [3]त्रयश्चतुर्वर्गः स्यात्। सबलैस्तैश्चतुर्भद्रम्। बलयुक्तास्ते चत्वारश्चतुर्भद्रं स्यात्॥ जन्याः—वरस्य ये। वरस्य वयस्या जन्याः स्युः। नवोढायाश्च ज्ञातिभृत्या जन्याः स्युः। 'ज्ञातिभृत्या नवोढाया जन्याः स्निग्धा वरस्य च' इति वैजयन्ती (पृ. २३२, श्लो. ३३)॥ ५७॥

इति [4]श्रीवत्सनृसिंहसूरिसुतमल्लिनाथसुधीविरचितेऽमरपदपारिजाते ब्रह्मवर्गः

---

[1] B_3 omits. [2] सुष्ठु रतं सुरतम्। 'सौ रमेः क्तो दमे पूर्वपदस्य च दीर्घः' उणादि ७०२। 'रमेः सुपूर्वाद्दमे वाच्ये क्तः स्यात्। . . . सूरत उपशान्तो दयालुश्च'। इति कौमुदी॥ (पृ. ५३९). [3] B_3 omits. [4] °नरसिंह° A_1.

---

८. क्षत्रवर्गः

मूर्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट्।
राज्ञि राट्पार्थिवक्ष्माभृन्नृपभूपमहीक्षितः॥ १॥

(वि.) मूर्धेति[1]—मूर्ध्नि प्रायेणाभिषिच्यते मूर्धाभिषिक्तः। राज्ञः क्षत्रियस्यापत्यं पुमान् राजन्यः। ब्रह्मणो बाह्वोर्जातः बाहुजः। क्षतात् त्रायते क्षत्रः, तस्यापत्यं क्षत्रियः। विराजते विराट्। 'राजृ दीप्तौ'। क्षत्रियनामानि॥ प्रजा रञ्जयतीति राजा। 'रञ्ज रागे'। राजतीति वा। 'राजृ दीप्तौ'। राजते राट्। पृथिव्या ईश्वरः पार्थिवः। [2]क्ष्मां विभर्तीति क्ष्माभृत्। 'भृञ् भरणे'। नॄन् पातीति नृपः। भुवं पातीति भूपः। 'पा रक्षणे'। महीं क्षियति अधिवसति महीक्षित्। 'क्षि निवासगत्योः'। राजनामानि॥ १॥

---

[1] W_2 adds अथ क्षत्रियवर्गः प्रारभ्यते; Pt_2 adds राज्यारोपणकाले. [2] W_2 adds भुवं.

(पा.) मूर्धाभिषिक्तो—क्षत्रियो विराट्। राजन्य[1]शब्दप्रकृतिभूतराजशब्दोऽपि पर्यायपाती। 'राजा मृगाङ्के क्षत्रिये नृपे' (३. ३. १११) इति वक्ष्यति। तथैव क्षत्रिय[1]शब्दप्रकृतिभूतक्षत्रशब्दः। 'क्षत्रियस्तु विराट् क्षत्रराजन्यद्विजलिङ्गिनः' इति

रभसकोशः। क्षत्रियजातिनामानि ॥ राज्ञि राट्—भूपमहीक्षितः। राज्ञो नामानि। ‘भूशक्रो नरदेवश्च’। [2]एते द्वे च ॥ १ ॥

[1] °शब्दस्य A_1.　[2] इत्येते च B_3.

राजा तु प्रणताशेषसामन्तः स्यादधीश्वरः।
चक्रवर्ती सार्वभौमो नृपोऽन्यो मण्डलेश्वरः ॥ २ ॥

(त्रि.) राजेति—संसक्तः समन्तात् संलग्नोऽन्तो यस्याः सा समन्ता स्वविषयादनन्तरा भूमिः। समन्ताया इमे सामन्ताः। प्रणता अशेषाः सामन्ता यस्य। अधि सामन्तानामुपरि ईष्टे अधीश्वरः। ‘ईश ऐश्वर्ये’। प्रणताशेषसामन्तराजनाम ॥ चक्रं[1] राष्ट्रं स्वामित्वेन वर्तयतीति चक्रवर्ती। ‘वृतु वर्तने’। सर्वस्या भूमेरीश्वरः सार्वभौमः। चक्रवर्तिनामनी ॥ अन्यो नृपो मण्डलेश्वर इत्युच्यते। मण्डलस्य ईश्वरः मण्डलेश्वरः। एकदेशाधिपतिनाम ॥ २ ॥

[1] चक्रे वर्तते D_2, K_2.

(पा.) राजा तु—स्यादधीश्वरः। ‘सामन्ता राज्यसंधिस्थाः’ इति वैजयन्ती (पृ. १०५, श्लो. १८)। प्रणमदखिलसामन्तराजोऽधीश्वरः स्यात्। दुर्योधनादिः ॥ चक्रवर्ती सार्वभौमः। सकलभूमीश्वरनामनी। कार्तवीर्यादिः ॥ नृपो—मण्डलेश्वरः। अधीश्वरसार्वभौमाभ्यामन्यो राजा मण्डलेश्वरः स्यात्। द्रुपदादिः ॥ २ ॥

येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः।
शास्ति यश्चाज्ञया राज्ञः स सम्राडथ राजकम् ॥ ३ ॥
राजन्यकं च नृपतिक्षत्रियाणां गणे क्रमात्।

(वि.) येनेति—राजसु मध्ये सम्यक् राजत इति सम्राट्। [1]राजसूययागकृतः स्वाज्ञयाशेषनृपशासितुर्मण्डलेश्वरस्य नाम ॥ राज्ञां गणो राजकम्। नृपतिसमूहनाम ॥ क्षत्रियाणां समूहो राजन्यकम्। [2]क्षत्रियसमूहनाम ॥ ३ ॥

[1] येन राज्ञा राजसूयनाम्ना यागेनेष्टं, यो राजा मण्डलस्य हिमवत्सेतुमध्ये सहस्रयोजनपरिमाणस्य भूमण्डलस्य (द्वादशराजमण्डलस्य) ईश्वरः पालयिता, यश्च राज्ञः हिमवत्समुद्राभ्यन्तरवर्तिनो नृपान् शास्ति, एते त्रयः सम्राट्छब्दवाच्या इति केचित् Pt_2.　[2] राजसमूह° K_5, K_6.

(पा.) येनेष्टं—स सम्राट्। येन राजसूययागः कृतः, यो मण्डलस्याधिपः, [1]यश्च स्वाज्ञया राज्ञः शास्ति स सम्राट् स्यात्। युधिष्ठिरादिः॥ अथ राजकं—गणे क्रमात्। राज्ञां कदम्बकं राजकं स्यात्[2]। क्षत्रियाणां समूहः राजन्यकं स्यात्[3] ॥ ३ ॥

[1] यस्याज्ञया A_1. [2] A_1 adds नृपतिसमूहनाम. [3] A_1 adds क्षत्रियसमूहनाम.

मन्त्री धीसचिवोऽमात्योऽन्ये कर्मसचिवास्ततः ॥ ४ ॥
महामात्राः प्रधानानि पुरोधास्तु पुरोहितः ।

(वि.) मन्त्रीति—मन्त्रो गुप्तवादः [1]कर्तव्यावधारणं वा अस्यास्तीति मन्त्री। धियं सचति समवैति धीसचिवः। 'षच समवाये'। अमा[2] राज्ञः समीपे वर्तत इति अमात्यः। बुद्धिप्रदातृनामानि॥ कर्म सचन्ति कर्मसचिवाः। बुद्धिप्रदातुरितरस्य मन्त्रिणो नाम॥ महती[3] मात्रा सेना परिच्छदः येषां ते महामात्राः। प्रदधति प्रकर्षेण राज्यं धारयन्ति प्रधानानि। मुख्यामात्यनामानि॥ शान्तिकपौष्टिकादिकर्मसु पुरो धीयत इति पुरोधाः। सान्तोऽयम्। पुरोहितश्च। 'डुधाञ् धारणपोषणयोः'। पुरोहितनामनी ॥ ४ ॥

[1] इतिकर्तव्यताधारणं F_2, Pt_2. [2] अमाशब्दः सहार्थे निपातः, अमा मन्त्रेण सह वर्तत इति Pt_2. [3] महानतिमात्रः D_2, Pt_2.

(पा.) मन्त्री—अमात्यः। 'मन्त्री सहायः सचिवौ' इति वक्ष्यति (३. ३. २०६)। बुद्धिसहायवान् मन्त्री, अमात्यश्च स्यात्। अन्ये कर्मसचिवास्ततः—प्रधानानि। 'महामात्रः [1]प्रधानः स्यात्' इति पुंस्काण्डे गोपालितः। अन्यकर्मसहाया महामात्राः प्रधानानि चेत्युच्यन्ते॥ पुरोधास्तु पुरोहितः। राजाचार्यनामनी। 'सौवस्तिक इति प्रोक्तो [2]राजाचार्यः पुरोहितः' इति हलायुधः (अ. मा २. २७१) ॥ ४ ॥

[1] प्रधानं B_3. [2] प्रोक्तः पुरोधाश्च इति मुद्रितग्रन्थे.

द्रष्टरि व्यवहाराणां प्राड्विवाकाक्षदर्शकौ ॥ ५ ॥
प्रतीहारो द्वारपालद्वाःस्थद्वाःस्थितदर्शकाः ।

(वि.) द्रष्टरीति—अर्थिप्रत्यर्थिनौ[1] पृच्छतीति प्राट्। विशिष्टं वचनमस्येति विवाकः[2]। प्राट् चासौ विवाकश्च प्राड्विवाकः। [3]अक्षं व्यवहारं पश्यतीति अक्षदर्शकः।

[4]व्यवहारद्रष्टृब्राह्मणनामनी ॥ प्रतिह्रियते निवार्यते नूतनो[5] जनोऽनेन प्रतीहारः[6]। द्वारं पालयतीति द्वारपालः। 'पाल रक्षणे'। द्वारि तिष्ठतीति द्वाःस्थः[7]। द्वारि स्थितं कार्यार्थिनं राज्ञे दर्शयति[8] द्वाःस्थितदर्शकः[9]। 'दृशिर् प्रेक्षणे'। द्वारपालकनामानि ॥ ५ ॥

[1] धर्माधर्मौ F₂, Pt₂.　[2] विवक्तीति F₂, Pt₂.　[3] अक्षान् व्यवहारान् F₂, Pt₂.　[4] निर्णेतृनामानि W₂.　[5] प्रतिहरति नूतनजनान् Pt₂.　[6] प्रतिहारः D₂, K₅, K₆.　[7] द्वास्थः K₅, K₆, Pt₂; D₂, Pt₂ add 'ष्ठा गतिनिवृत्तौ'.　[8] K₃, K₅, W₂ add निवेदयति.　[9] द्वास्थितः, दर्शक इति द्वे नामनी इति केचित् Pt₂.

(पा.) द्रष्टरि व्यवहाराणां—अक्षदर्शकौ। 'न्यायोऽक्षो व्यवहारश्च' इति वैजयन्ती (पृ. १२४, श्लो. १५)। राजद्वारायतन्यायद्रष्टरि[1] प्राड्विवाकाक्षदर्शकशब्दौ[2] स्याताम्[3] ॥ प्रतीहारे—[4]द्वाःस्थितदर्शकाः। दौवारिकनामानि। 'दौवारिको वेत्रधरः'। एते द्वे च ॥ ५ ॥

[1] द्रष्टारौ A₁.　[2] °दर्शकौ A₁.　[3] इत्युच्येते A₁.　[4] द्वास्थद्वास्थितदर्शकाः इति क्वचित् पाठः A₁.

रक्षिवर्गस्त्वनीकस्थोऽथाध्यक्षाधिकृतौ समौ ॥ ६ ॥
स्थायुकोऽधिकृतो ग्रामे गोपो ग्रामेषु भूरिषु ।

(वि.) रक्षिवर्ग इति—[1]रक्षिणां वर्गः रक्षिवर्गः। अनीकेन[2] तिष्ठतीति अनीकस्थः। अङ्गरक्षकव्रातस्य नामनी ॥ अधि उपरि अक्ष्णोतीति अध्यक्षः। 'अक्षू व्याप्तौ'। अधिक्रियते[3] उपरि नियुज्यते स्म अधिकृतः। 'डुकृञ् करणे'। अधिकारिनामनी ॥ ग्रामे स्थातुं शीलमस्येति स्थायुकः[4]। एकग्रामाधिकारिणो नाम ॥ गोपायति स्वाधिष्ठितान् ग्रामानिति गोपः। 'गुपू रक्षणे'। बहुग्रामाधिकारिणो नाम ॥ ६ ॥

[1] D₂, K₆, W₂ add ग्रामे स्थातॄणां　[2] F₂, Pt₂ add वृन्देन.　[3] अधिकारं करोति K₅, K₆, W₂.　[4] W₂ adds 'ष्ठा गतिनिवृत्तौ'.

(पा.) रक्षिवर्गस्त्वनीकस्थः। अङ्गरक्षिणां वर्गोऽनीकस्थः स्यात्। 'रक्षिवर्गस्तु यो राज्ञां सोऽनीकस्थोऽभिधीयते' इत्यमरमाला। अनुक्तम्—'आरक्षाः पुररक्षिणः'। पुररक्षका आरक्षाः स्युः ॥ अथाध्यक्षाधिकृतौ समौ। अधिकारसामान्यनामनी। अधिकार-

विशेषोऽपि वक्ष्यते। [1]स्थायुको—ग्रामे। एकग्रामाधिकारी स्थायुकः[1] स्यात्। गोपो—भूरिषु। अनेकग्रामाधिकारी गोपः स्यात्॥ ६॥

[1] स्थायिकः A_1, B_3.

भौरिकः कनकाध्यक्षो रूप्याध्यक्षस्तु नैष्किकः ॥ ७ ॥
अन्तःपुरे त्वधिकृतः स्यादन्तर्वंशिको जनः ।

(वि.) भौरिक इति—भूरिद्रव्ये [1]कनके नियुक्तो भौरिकः। कनकस्याध्यक्षः। सुवर्णाधिकृतस्य नामनी॥ प्रशस्तं रूपमत्रेति रूप्यम्। रूप्ये[2]ऽध्यक्षो रूप्याध्यक्षः। निष्काणामधिकृतो नैष्किकः। निष्के हेम्नि नियुक्तो वा। राजमुद्राङ्करूप्याध्यक्षनामनी॥ अन्तः अभ्यन्तरो वंशो गृहम्। तस्मिन् नियुक्तः अन्तर्वंशिकः[3]। वंशस्य कुलस्य अन्तः अन्तर्वंशं स्त्रियः, ताः सन्त्यस्येति वा। अधिकरोतीति अधिकृतः। अन्तःपुराधिकृत[4]नाम॥ ७॥

[1] कनकाख्ये K_2, K_3. [2] रूप्यस्य D_2, K_5. [3] अन्तर्वंशः कुलस्त्री, सा संविधीयत्वेन अस्यास्तीति K_5, K_6. [4] अधिकारि° K_2, K_6.

(पा.) भौरिकः कनकाध्यक्षः। [1]हेमभाण्डाराधिकारी भौरिकः स्यात्। रूप्याध्यक्षः—नैष्किकः। टङ्काधिकारी नैष्किकः स्यात्। '[2]स्याद्धट्टे विकर्मिकः'। आपणाधिकारी विकर्मिकः स्यात्। 'पुर्यामध्यक्षो दण्डपाशिकः'। पट्टणाधिकारी दण्डपाशिकः स्यात्॥ अन्तःपुरे—अन्तर्वंशिको जनः। शुद्धान्ताधिकार्यन्तर्वंशिकः स्यात्॥ ७॥

[1] °भण्डार° A_1 [2] हट्टे विकर्मिकः स्यात् B_3.

सौविदल्लाः कञ्चुकिनः स्थापत्याः सौविदाश्च ते ॥ ८ ॥
षण्डो वर्षवरस्तुल्यौ सेवकार्थ्यनुजीविनः ।

(वि.) सौविदल्ला इति—सुष्ठु वेत्तीति सुवित्। सकलसारज्ञः। तं नरं लान्ति वल्लभत्वे स्वीकुर्वन्ति सुविदल्लाः स्त्रियः, तासां रक्षकत्वेन वर्तमानाः सौविदल्लाः। कञ्चुकाः सन्ति[1] येषामिति कञ्चुकिनः। राजस्त्रीणां [2]सतीत्वं स्थापयन्ति स्थापत्याः। शोभनं विदन्तीति सुविदः स्त्रियः, तासु पालकत्वेन वर्तन्त इति सौविदाः। राजस्त्रीरक्षणाधिकृतानां नामानि॥ सनोतीति षण्डः[3]। 'षणु दाने'। वर्ष रेतःसेकं वृणोतीति

वर्षवरः[4] । 'वृञ् वरणे'। नपुंसकसौविदल्लनामनी ॥ [5]सेवां कुर्वन्तीति सेवकाः। 'षेवृ सेवने'। अर्थः [6]सेवाप्रयोजनं येषां ते अर्थिनः । प्रभुमनुजीवन्तीति अनुजीविनः। मन्त्रिप्रभृति राजोपचारिणां नामानि ॥ ८ ॥

---

[1] F$_2$, Pt$_2$ add विनीतवेषार्थं. [2] व्यवस्थां D$_2$, Pt$_2$. [3] शाम्यति शिश्नाभावात् Pt$_2$. [4] K$_3$, K$_5$ add धृष्णोतीति धर्षम् । 'धृष शक्तिप्रतिबन्धे'। धर्षं शक्तिप्रबन्धकं वरं रेतोऽस्य धर्षवरः। वर्षधर इति पाठे वर्षाणि वत्सरान् वृथा धारयतीति वर्षधरः। घर्षवरः, वर्षवरः, वर्षधर इति पाठत्रयम्. [5] सेवन्ते F$_2$, Pt$_2$. [6] सेवैव K$_5$, K$_6$.

(पा.) सौविदल्लाः कञ्चुकिनः—ते। महिषीसंरक्षकनामानि। 'सावासुलु' शण्ढो[1] वर्षवरस्तुल्यौ। [2]पुंस्त्वरहितसौविदनामनी। '[3]बाट्टायी'। 'होढः पव्रजनीनश्च'। एते द्वे च। 'चवुनिनव्वल'॥ सेवकार्थ्यनुजीविनः। सेवकनामानि। दुर्योधनस्य कर्णादय इव। अनुक्तम्—'सपक्षाः सामवायिकाः'। सामवायिकनाम। पाण्डवानां विराटादय इव ॥ ८ ॥

---

[1] शण्ढः B$_3$. [2] शण्डनामनी B$_3$. [3] B$_3$ omits.

विषयानन्तरो राजा शत्रुर्मित्रमतः परम् ॥ ९ ॥
उदासीनः परतरः पार्ष्णिग्राहस्तु पृष्ठतः ।

(वि.) विषयेति—[1]शातयति नाशनं कृत्वा तदाधिपत्यं करोतीति शत्रुः। 'शद्लृ शातने'। स्वदेशसमीपराजनाम ॥ मेद्यति स्निह्यतीति मित्रम्। 'ञिमिदा स्नेहने'। शत्रुदेशानन्तरराजनाम ॥ [2]ऊर्ध्वमासीन इव वर्तते उदासीनः। मित्रदेशस्य[3] समीपदेशस्थराजनाम ॥ पार्ष्णिं[4] पृष्ठभागं गृह्णातीति पार्ष्णिग्राहः। विजिगीषुर्भूत्वा प्राच्यशत्रून् यदा प्रतियाति[5] तदा प्रतीच्यशत्रुनाम[6] ॥ ९ ॥

---

[1] शातनं K$_5$, K$_6$. [2] उदास्ते 'आस उपवेशने' D$_2$. [3] मित्रदेशशत्रुदेशानन्तरराजनाम K$_3$. [4] K$_5$, K$_6$ add इव. [5] यास्यति K$_6$. [6] D$_2$, K$_6$ add एवं सर्वत्रोह्यम्.

(पा.) विषयानन्तरो—शत्रुः। विजिगीषोर्भूम्यनन्तरो राजशत्रुः। मित्रमतःपरम्। [1]अतोऽप्युपरिस्थितो राजमित्रम्। उदासीनः परतरः। ततोऽप्युपरिस्थितो राजा उदासीनः। पार्ष्णिग्राहः—पृष्ठतः। पृष्ठभागस्थो[2] राजा पार्ष्णिग्राहः। इत्ययं तत्तन्मण्डलविभागः ॥ ९ ॥

---

[1] ततः परस्थितः B$_3$. [2] स्थितः B$_3$.

रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः ॥ १० ॥
द्विड्विपक्षाहितामित्रदस्युशात्रवशात्रवः ।
अभिघातिपरारातिप्रत्यर्थिपरिपन्थिनः ॥ ११ ॥

(वि.) रिपाविति—रपति प्रकाशयत्यपकीर्तिं रिपुः। रेपयति वेष्टयतीति वा। 'रप व्यक्तायां वाचि' 'रेपृ गतौ'। वीरस्य कर्म वैरम्। तदस्यास्तीति वैरी। समानपतित्वमस्यास्तीति सपत्नः[1]। इयर्तीति अरिः। 'ऋ गतौ'। द्वेष्टीति द्विषन्। 'द्विष अप्रीतौ'। द्विट्, द्वेषणश्च। दुष्टं हृदयं यस्य दुर्हृत्। विरुद्धः पक्षोऽस्य विपक्षः। हितादन्यः अहितः[2]। न मित्रं अमित्रः। दस्यति उपक्षयं करोतीति दस्युः। 'दसु उपक्षये'। शातयतीति [3]शत्रुः। 'शद्लृ शातने'। शत्रुरेव शात्रवः। अभिमुखं हन्तीति अभिघाती। 'हन हिंसागत्योः'। अभियातिरिति पाठे अभि अभिमुखं यातीति। अभिमानीति पाठे अभिमन्यते [4]शत्रुरित्येवेति। प्रियते उद्युङ्क्ते हन्तुमिति परः। 'पृङ् व्यायामे'। इयर्तीति अरातिः। 'ऋ गतौ'। प्रतिकूलमर्थयते प्रत्यर्थी। 'अर्थ उपयाच्ञायाम्'। परिपन्थयति विरोधं करोति [5]परिपन्थी। 'पथि गतौ'। शत्रुनामानि ॥ १०–११ ॥

---

[1] सपत्नीव दुःखहेतुत्वात् F_2, Pt_2. [2] न हितः Pt_2. [3] शत्रुशब्दः पूर्वोक्तः (श्लो. ९) W_2. [4] प्रतिपक्षं D_2, K_5, K_6; अभियायीति वा पाठः K_5, K_6. [5] K_6 adds उपसर्गाद्विरोधार्थः.

(पा.) रिपौ वैरि—परिपन्थिनः। शत्रुनामानि।
'असुहृत्प्रत्यवस्थातृप्रत्यनीकजिघांसवः।
प्रतिपक्षोऽप्यसहनः ॥'

एतानि षट् च ॥ १०–११ ॥

स्निग्धो वयस्यः सवया अथ मित्रं सखा सुहृत् ।
सख्यं साप्तपदीनं स्यादनुरोधोऽनुवर्तनम् ॥ १२ ॥

(वि.) स्निग्ध इति—स्निह्यति स्निग्धः। 'ष्णिह प्रीतौ'। वयसा तुल्यो वयस्यः। समानं वयो यस्य सवयाः। स्वयंकृताभिनवमित्रनामानि। मेद्यतीति मित्रम्। 'ञिमिदा स्नेहने'। शोभनं हृदयमस्य सुहृत्। समानं प्रभुत्वं ख्याति प्रकथयतीति

[1]सखा। 'ख्या प्रकथने'। मित्रमात्रनामानि ॥ सख्युर्भावः सख्यम्। सप्तभिः पदैः प्राप्यते साप्तपदीनम्। सख्यनामनी ॥ [2]अनुरुध्यते अनुरोधः। 'रुधिर् आवरणे'। [3]अनुवर्तननाम ॥ १२ ॥

[1] समानः ख्यातः Pt_2. [2] अनुरोधनं F_2, Pt_2. [3] F_2, Pt_2 add अनुकूलं वर्तनम् अनुवर्तनम्.

(पा.) स्निग्धो वयस्यः सवयाः। तुल्यवयोमित्रनामानि। अथ मित्रं—सुहृत्। मित्रनामानि ॥ सखिशब्दादन्यः सखशब्दोऽप्यस्ति। 'सखा सहायः सचिवः। सखः' ॥ इति सज्जनः। मित्रशब्दादन्यो मित्रयुशब्दोऽप्यस्ति। 'मित्रं सगन्धो मित्रयुः सुहृत्' इति धनंजयः। सख्यं साप्तपदीनं स्यात्। सख्यं नाम सखित्वम्। 'साप्तपदीनं सख्यम्' इति पाणिनीयम्[1] (५. २. २२)। लक्षणया तद्युक्तोऽपि[2] साप्तपदीनः स्यात्। 'सखा साप्तपदीनः स्यात्' इति वैजयन्ती[3]। (पृ. ९८, श्लो. १८७) ॥ अनुरोधोऽनुवर्तनम्। सख्यकरणनामनी ॥ १२ ॥

[1] सूत्रम् B_3. [2] B_3 omits. [3] मुद्रितग्रन्थे तु 'सख्यं सातपदीनं स्यात्' इत्येव.

यथार्हवर्णः प्रणिधिरपसर्पश्चरः स्पशः।
चारश्च गूढपुरुषश्चाप्तः प्रत्ययितस्त्रिषु ॥ १३ ॥

(वि.) यथेति—[1]यथार्हं यथायोग्यो वर्णः प्रकारोऽस्यास्तीति यथार्हवर्णः। परेषु स्वामिना प्रकर्षेण निधीयते[2] प्रणिधिः। 'डुधाञ् धारणपोषणयोः'। [3]अपच्छन्नः सन् सर्पति चरतीति अपसर्पः। 'सृप्लृ गतौ'। चरतीति चरः। 'चर गतौ'। स्पशति बाधते परानिति स्पशः। तालव्यान्तो रेफशून्यश्चायं शब्दः। 'स्पश बाधनस्पर्शनयोः'। चरति जानाति परबलमिति चारः[4]। 'चर गतौ'। गूढश्चासौ पुरुषश्च गूढपुरुषः। चारनामानि ॥ आप्नोति रहस्यमित्याप्तः। 'आप्लृ प्राप्तौ'। प्रत्ययो विश्वासोऽस्य संजातः प्रत्ययितः। अयं शब्दः त्रिषु लिङ्गेषु वर्तते। आप्तनामनी ॥ १३ ॥

[1] यथार्हो योग्यः F_2, Pt_2. [2] D_2, Pt_2 add ज्ञेयमस्मिन्. [3] अपकृष्टं F_2, Pt_2.
[4] Pt_2 adds गत्यर्थत्वात् ज्ञानार्थत्वम्.

(पा.) यथार्थवर्णः। 'नृपतेर्नेतुरिवायथार्थवर्णाः' इति माघप्रयोगात् (शिशु. २०. २३) अयथार्थवर्णोऽपि स्यात्। प्रणिधिः—गूढपुरुषश्च। गूढचारिनामानि। आप्तप्रत्ययितौ समौ। आप्तनामनी ॥ १३ ॥

सांवत्सरो ज्यौतिषिको दैवज्ञगणकावपि ।
स्युर्मौहूर्तिकमौहूर्तज्ञानिकार्तान्तिका अपि ॥ १४ ॥
तान्त्रिको ज्ञातसिद्धान्तः सत्री गृहपतिः समौ ।

(वि.) सांवत्सर इति—संवत्सरं कालमधीते वेत्ति वा सांवत्सरः[1] । ज्योतींषि [2]ग्रहनक्षत्राणि वेत्तीति ज्यौतिषिकः । दैवं शुभाशुभं जानाति दैवज्ञः । 'ज्ञा अवबोधने'। [3]दिनानि गणयतीति गणकः । 'गण संख्याने'। मुहूर्तं कालं वेत्तीति मौहूर्तिको मौहूर्तश्च। कालज्ञानमस्यास्तीति ज्ञानी। [4]कृतान्तो दैवम् । तद्वेत्तीति कार्तान्तिकः । ज्यौतिषिकनामानि[5]॥ तन्यतेऽनेन [6]मतधर्म इति तन्त्रम् । तद्वेत्तीति तान्त्रिकः । ज्ञातः सिद्धान्तोऽनेनेति ज्ञातसिद्धान्तः । ज्ञातशैवादिसिद्धान्तस्य नामनी ॥ सीदन्त्यत्रेति सत्रम् गृहम् । [7]तदस्यास्तीति सत्री । [8]गृहपतिव्याजेनावस्थितचारनामनी ॥ १४ ॥

---

[1] W_2 adds सांवत्सरिकः. [2] नक्षत्रादीनि K_5. [3] कालं F_2, Pt_2. [4] कृतान्तं सूर्यादिसिद्धान्तं D_2, K_6. [5] ज्योतिषिक° K_5. [6] D_2, K_5, K_6 add पाशुपतादि. [7] Pt_2 adds सदा दानं च. [8] गृहस्य पतिः, सदा दानादिकर्तृगृहपतिनाम F_2, Pt_2.

(पा.) सांवत्सरो ज्यौतिषिको—कार्तान्तिका अपि । [1]ज्यौतिषिकनामानि ॥ तान्त्रिको ज्ञातसिद्धान्तः । सिद्धान्तवेत्ता[2] [3]ज्यौतिषिकस्तान्त्रिकः स्यात् ॥ सत्री गृहपतिः समौ । भिन्नपुंव्यञ्जनवेत्र[ष]धरनामनी । 'हग्गडि' ॥ १४ ॥

---

[1] ज्योतिषिक° B_3. [2] B_3 adds नामनी. [3] B_3 omits.

लिपिकारोऽक्षरचणोऽक्षरचुञ्चुश्च लेखके ॥ १५ ॥
लिखिताक्षरविन्यासे लिपिर्लिबिरुभे स्त्रियौ ।

(वि.) लिपिकार इति— लिपिं करोतीति लिपिकारः । लिपिंकरो लिपिकरो वा। अक्षरैर्वित्तः अक्षरचणः । अक्षरचुञ्चुश्च । लिखतीति लेखकः । 'लिख अक्षरविन्यासे'। लेखकनामानि ॥ लिप्यतेऽनया पत्रं लिपिः। लिबिश्च । 'लिप उपदेहे'। लिखिताक्षरविन्यासनामनी ॥ १५ ॥

---

[1] लिपी लिबी वा Pt_2.

(पा.) लिपिकारोऽक्षरचणो—लेखके। [1]लेखकनामानि। 'कायस्थः करणश्च स्यात्'। एते द्वे च॥ लिखिताक्षरविन्यासे—उभे स्त्रियौ[2]। लिखितवर्णानां विन्यासे लिपिलिविशब्दौ स्याताम्॥ अनुक्तम्—'लेखस्थानं ग्रन्थकुटी'। करणशालानामनी॥ 'लेखिनी कलमः पुमान्'। लेखिनीनाम[3]। 'बलपमु'। 'मेलामन्दो मषिघटी'। कज्जलपात्रनाम। 'मेला [4]मषिरुभे स्त्रियाम्'। मषीनाम। 'मस्नि'॥ १५॥

[1] A_1 adds अक्षरेण वित्तनामनी। 'तेन वित्तश्चुञ्चुप्चणपौ' इति चणप्चुञ्चुपौ.
[2] स्त्रियाम् A_1.　[3] कलमनाम A_1.　[4] मषी B_3.

स्यात्संदेशहरो दूतो दूत्यं तद्भावकर्मणी॥ १६॥
अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिक इत्यपि।

(वि.) स्यादिति—संदेशम् आज्ञां हरतीति संदेशहरः[1]। 'हृञ् हरणे'। दूयतेऽनेन पर इति दूतः। 'दूङ् परितापे'। दूतनामनी॥ दूतस्य भावः कर्म वा दूत्यम्। दौत्यं वा। दूतत्वस्य दूतकर्मणश्च नाम॥ अध्वानं गच्छतीति अध्वनीनः। अध्वगः। अध्वन्यः। पन्थानं [2]गच्छतीति पान्थः। पथिकः। अत्र पान्थशब्दः सतताध्वगनामधेयमिति वदन्ति। पथिकनामानि॥ १६॥

[1] संदेशहारः K_6.　[2] D_2 adds नित्यं.

(पा.) स्यात् संदेशहरो दूतः। आज्ञाहरनामनी। 'मणिहरुंडु'। 'वार्तिकः शासनहरः'। एते द्वे च॥ दूत्यं तद्भावकर्मणी। दूतस्य भावः कर्म चेति द्वे दूत्यं स्यात्। ब्राह्मणादिपाठाद् [1]दौत्यमपि॥ अध्वनीनोऽध्वगो—पथिक इत्यपि। [2]मार्गिकनामानि। 'तेरुवरुलु[3]'॥ १६॥

[1] A_1 adds स्यात्.　[2] मार्गि° B_3.　[3] B_3 omits.

स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च॥ १७॥
राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि च।

(वि.) स्वामीति—महत् स्वं विद्यतेऽस्येति स्वामी। [1]अमात्यः। [2]सुहृत्। एतौ शब्दौ पूर्वं व्युत्पन्नौ (२. ८. ४, १२)। कूयते उत्कृष्ट इति कोशः। 'कु शब्दे'। भाण्डागारम्। राजते राष्ट्रम्। दुःखेन गम्यत इति दुर्गम्। बलति प्राणितीति बलम्।

'बल प्राणने'। सुहृदत्र त्रिविधः। सहजः सुहृत्, कृत्रिमसुहृत्, प्राकृतसुहृच्च। एते सप्त राज्याङ्गानीत्युच्यन्ते। प्रकृतयश्च राज्याङ्गानि। पौराणां श्रेणयश्च राज्याङ्गानि। प्रक्रियते राज्यमाभिरिति प्रकृतयः। रजकस्वर्णकारादिजातयः परस्परं श्रयन्ते श्रेणयः। 'श्रिञ् सेवायाम्'॥ १७॥

---

[1] Pt$_2$ adds अमा समीपे भवः [2] Pt$_2$ adds शोभनं हृदयमस्येति.

(पा.) स्वाम्यमात्य—राज्याङ्गानि। स्वाम्यादीन्यप्यष्टौ राज्याङ्गानि। समष्ट्या तु राज्यमेव।

'स्वाम्यमात्यश्च राष्ट्रं च दुर्गं कोशो बलं सुहृत्।
परस्परोपकारीदं सप्ताङ्गं राज्यमुच्यते॥'

इति (काम. नीति. ४. १.)॥ प्रकृतयः—श्रेणयोऽपि च। पौरश्रेणयः प्रकृतयः स्युः। अपिशब्दात् स्वाम्यादयोऽपि प्रकृतयः।

अमात्यराष्ट्रदुर्गाणि बलं कोशश्च पञ्चमः।
एताः प्रकृतयस्तज्ज्ञैर्विजिगीषोरुदाहृताः॥
तासां षष्ठं भवेन्मित्रं सप्तमः पृथिवीपतिः।
सप्तप्रकृतिकं राज्यमित्युवाच प्रजापतिः॥

इति [1]बृहस्पतिः॥ १७॥

---

[1] मुद्रितबृहस्पतिस्मृतौ न दृश्यते.

संधिर्ना विग्रहो यानमासनं द्वैधमाश्रयः॥ १८॥
षड्गुणाः शक्तयस्तिस्रः प्रभावोत्साहमन्त्रजाः।

(वि.) संधिरिति—संधीयते एकीक्रियतेऽनेनेति संधिः[1]। अन्योन्यं विगृह्यते विरुध्यते विग्रहः। 'ग्रह उपादाने'। हीनं प्रति यातीति यानम्। कालप्रतीक्षां कुर्वन् आस्यत इति आसनम्। 'आस उपवेशने'। स्वकीयेषु द्विधा भावो द्वैधम्। बलिनमाश्रयत इति आश्रयः। एते षड्गुणा इत्युच्यन्ते। शक्यन्ते जेतुं शत्रवोऽमूभिरिति शक्तयः। 'शक्लृ शक्तौ'। प्रभवति अनेन प्रभावः। उदधिकं विक्रमेण सहते[3] उत्साहः। 'षह मर्षणे'। बुद्ध्या मन्यते मन्त्रः। एतेभ्यो जाताः तिस्रः शक्तयः इत्युच्यन्ते॥ १८॥

---

[1] F$_2$, W$_2$ add 'डुधाञ् धारणपोषणयोः'. [2] D$_2$ adds 'श्रिञ् सेवायां.' [3] K$_5$ adds अनेनेति.

(पा.) संधिर्ना विग्रहो—षड्गुणाः। संध्यादयः षट् षड्गुणाः स्युः। 'दिक्संख्ये संज्ञायाम्' (२. १. ५०) इति समासः[1]। षाड्गुण्यमपि स्यात्। स्वार्थे ष्यञ्। तत्र संधिर्नाम पणबन्धः। स च कोशदण्डभूमिप्रधानकारणत्वेन त्रिविधः। विग्रहो नामापकारकरणतश्च प्रकाशयुद्धं कूटयुद्धं तूष्णींयुद्धमिति त्रिविधम्। तत्स्वरूपं त्वन्यत्र द्रष्टव्यम्[2]॥ यानं स्वोपचयेन परव्यसनेन[3] च स्यात्। अनुरक्तप्रकृतिकस्य यात्रा। तच्च विगृह्ययानं संधाययानं प्रसंगयानं निग्रहयानं[4] संभूययानमिति पञ्चविधम्॥ आसनं नाम देशकालबलाद्यपेक्षया दुर्गादिस्थितिः। तदपि संधायासनप्रसङ्गासनादिभेदेन पञ्चविधम्। द्वैधं नाम बलवदुभयमध्यस्थितस्य व्यापारः। स चोभयप्रवचनेन नात्मार्पणमन्यतरेण संधिरन्यतरेण विग्रह इति त्रिविधः। आश्रयो नाम हीनेन धर्मविजयिनः समाश्रयणम्। शक्तयः तिस्रः—मन्त्रजाः। प्रभावजोत्साहजमन्त्रजाश्चेति शक्तयस्तिस्रः। 'स प्रभावः प्रतापश्च यत्तेजः कोशदण्डजम्'॥ एतदुक्तशक्तित्रये प्रभावशक्तिं वक्ष्यति। शेषशक्ती स्पष्टे। 'भाण्डारः कोश इत्युक्तो बलं दण्ड इतीरितम्'। कोशदण्डाभ्यां यज्जातं तत्तेजः प्रभावः स्यात्। स एव प्रतापः॥ १८॥

---

[1] A_1 adds कर्मधारयः.　[2] A_1 adds सूर्यसिद्धान्तव्याख्यानचोलपराजीयपरिश्रमशालिनां सुगमम्.　[3] व्यसनेनापि A_1.　[4] उपेक्ष्ययानं A_1.

क्षयः स्थानं च वृद्धिश्च त्रिवर्गो नीतिवेदिनाम्॥ १९॥
स प्रतापः प्रभावश्च यत्तेजः कोशदण्डजम्।

(वि.) क्षय इति—क्षीयते पर इति क्षयः। 'क्षि क्षये'। समत्वेनात्र तिष्ठतीति स्थानम्। वर्धते स्वयमिति[1] वृद्धिः। 'वृधु वृद्धौ'। नीतिवेदिनां एते त्रयः त्रिवर्ग इत्युच्यते। त्रयाणां क्षयस्थानवृद्धीनां वर्गस्त्रिवर्गः। प्रतपति[2] शत्रुरनेनेति प्रतापः। 'तप संतापे'। प्रभवत्यनेन शासितुं जगदिति प्रभावः। कोशदण्डाभ्यामुत्पन्नस्य तेजसो नाम॥ अत्र कोशो हिरण्यवृद्धिः। दण्डः शक्तिबाहुल्यात् [3]शरीरदण्डः॥ १९॥

---

[1] स्वम् W_2.　[2] अवमानकर्तृत्वेन K_5, K_6.　[3] शरीरादिक° K_5, W_2.

(पा.) क्षयः स्थानं—नीतिवेदिनाम्। परापेक्षया स्वशक्तीनां क्षीणता क्षयः। समता स्थानम्। अधिकता वृद्धिः। एते [1]त्रयस्त्रिवर्गः स्यात्। स प्रतापः—कोशदण्डजम्। कोशदण्डाभ्यां जातस्य तेजसो नाम॥ १९॥

---

[1] B_3 adds क्षयस्थानवृद्धयः.

सामदाने भेददण्डावित्युपायचतुष्टयम् ॥ २० ॥
साहसं तु दमो दण्डः साम सान्त्वमथो समौ ।
भेदोपजापावुपधा धर्माद्यैर्यत्परीक्षणम् ॥ २१ ॥

(वि.) सामदान इति—साम, दानं, भेदः, दण्डः एते चत्वार उपायभेदा इत्युच्यन्ते। उपैति वाञ्छितमनेन प्राप्नोतीति उपायः। 'इण् गतौ'। सहो बलं, [1]तत्र भवं साहसम्। दाम्यति दौष्ट्यमनेनेति दमः। दण्डश्च। 'दमु उपशमने'। दण्डोपायनामनी॥ वैरं स्यतीति साम। 'षोऽन्तकर्मणि'। सान्त्वयत्यनेनेति सान्त्वम्। 'सान्त्व सामप्रयोगे'। सामोपायनामनी॥ भिद्यते सहसानेनेति भेदः। 'भिदिर् विदारणे'। उपांशु जपनम् उपजापः। 'जप[2] व्यक्तायां वाचि'। भेदोपायनामनी॥ उपधीयते [3]चित्तविकारोऽनयेति उपधा। धर्मकामभयार्थाद्यैः पुरोहितादीनामभिप्रायपरीक्षाप्रकारनाम॥ २०–१॥

[1] तदनुसारित्वात् D_2, K_6; अतिसरति K_5. [2] K_3, K_6 add जल्प.
[3] शुद्धिज्ञानमत्र Pt_2; चित्ताधिकारः W_2.

(पा.) सामदाने—उपायचतुष्टयम्। सामदानभेददण्डाश्चत्वार उपायाः स्युः। मायोपेक्षेन्द्रजालानीत्येतैस्त्रिभिर्युक्ताश्चेत् सप्तोपायाः। साम नान्तः। दानं च भेदश्च दण्डश्चेति चतुष्टयम्। 'मायोपेक्षेन्द्रजालं च सप्तोपायाः प्रकीर्तिताः।' इति नीतिगजाङ्कुशः॥ साहसं तु—दण्डः। दण्डनामानि॥ साम सान्त्वम्। सामोपायनाम॥ अथो समौ—उपजापौ। भेदनामनी॥ उपधा—परीक्षणम्। धर्मार्थकामभयैर्या परीक्षा सा उपधा स्यात्। 'धर्मार्थकामभयेषु व्याजेन परचित्तपरीक्षणं उपधा' इति सोमदेवनीतिः। अनुक्तम्—'तन्त्रं स्वराष्ट्रचिन्ता स्यात्'। [1]स्वराष्ट्रचिन्तनं तन्त्रं स्यात्। 'आवापः परचिन्तनम्'[2]। परराष्ट्रचिन्तनम् आवापः स्यात्॥ २०–१॥

[1] स्वीयराष्ट्र° A_1. [2] परिचिन्तनम् A_1; वैजयन्त्याम् अरिचिन्तनम् (पृ. १०५, श्लो. १४).

पञ्च त्रिष्वषडक्षीणो यस्तृतीयाद्यगोचरः।
विविक्तविजनच्छन्ननिःशलाकास्तथा रहः॥ २२॥
रहश्चोपांशु चालिङ्गे रहस्यं तद्भवे त्रिषु।

(वि.) पञ्चेति—वक्ष्यमाणा अषडक्षीणविविक्तविजनच्छन्ननिःशलाकशब्दाः पञ्च त्रिषु लिङ्गेषु अभिधेयानुसारेण वर्तन्ते। [1]अविद्यमानानि षट् अक्षीणि श्रोत्राण्यत्र[2] अषडक्षीणः। तृतीयपुरुषाद्यगोचरमन्त्रनाम॥ विविच्यते[3] कार्याकार्यमत्रेति विविक्तः। 'विचिर् पृथग्भावे'। विगता[4] अनुपयोगिनो जना अत्र विजनः। छाद्यते गोप्यते छन्नः। 'छद अपवारणे'। निर्गताः शलाका[5] मन्त्रभेदका अस्मादिति[6] निःशलाकः। रह्यन्तेऽनुपयोगिनो जना अत्रेति रहः। सान्तोऽयम् नपुंसकलिङ्गः। 'रह त्यागे'। रहश्च। उपांशु वाक्यं जातमस्मिन्निति उपांशु। एते द्वे पदे अलिङ्गे। अव्यय इत्यर्थः। [7]मन्त्रालोचनस्थाननामानि॥ रहसि भवं रहस्यम्। रहसि संजातमन्त्रनाम॥ २२॥

[1] न विद्यन्ते F_2, Pt_2. [2] श्रोत्रादीन्द्रियाणि F_2, Pt_2. [3] D_2, W_2 add पृथक् नीयते. [4] विविक्ताः K_5, K_6. [5] शारिका अपि D_2, Pt_2. [6] अस्मिन् W_2. [7] आलापन° W_2.

(पा.) पञ्च त्रिषु—तृतीयाद्यगोचरः। [1]यस्तृतीयादिजनागोचरः सोऽषडक्षीणः स्यात्। स पञ्च त्रिष्वित्यधिकारात् त्रिलिङ्गः। अषडक्षीणो मन्त्रः। अषडक्षीणा क्रीडा इत्यादि॥ विविक्तविजन—[2]उपांशु चालिङ्गे। एकान्तनामानि॥ पञ्च त्रिष्वित्यनेन विविक्तादयः पञ्च सत्वार्थे त्रिलिङ्गा भवन्ति। असत्वे नपुंसकलिङ्गा एव। विविक्तं वदति, विजनं रमते, छन्नं तिष्ठतीत्यादि। उपांशुरहसोरलिङ्गत्वमव्ययत्वं चापि॥ रहस्यं तद्भवे त्रिषु। रहसि भवं [3]रहस्यं स्यात्। [4]भवार्थे यत्प्रत्ययः। रहस्यं रहोऽपि स्यात्। 'उपांश्वव्ययमेकान्तं रहस्यं विजनं रहः' इति वैजयन्ती[5] (पृ. २८६, श्लो. ३२)। 'रहोऽनुरंहसोपांशु रहस्यं च भिनत्ति कः' इति धनंजयः॥ २२॥

[1] A_1 adds न विद्यन्ते षडक्षीण्यत्रेति व्युत्पत्त्या. [2] तथा मिथः। रहश्च इति पाठान्तरम् B_3. [3] A_1 adds यत् तत्. [4] 'दिगादिभ्यो यत्' (४. ३. ५४) इति यत्प्रत्ययः B_3. [5] 'रहस्येऽर्थे उपांशु स्यादश्रुतोच्चारणेऽपि च' इति मुद्रितग्रन्थे.

समौ विस्रम्भविश्वासौ भ्रेषो भ्रंशो यथोचितात्॥ २३॥
अभ्रेषन्यायकल्पास्तु देशरूपं समञ्जसम्।

(वि.) समाविति—विस्रम्भणं[1] विस्रम्भः। 'स्रम्भु [2]विश्वासे'। विश्वसित्यनेनेति विश्वासः। 'श्वस प्राणने'। विश्वासनामनी॥ भ्रेषते धर्माच्चलतीति भ्रेषः। 'भ्रेषृ चलने'। यथोचितधर्मभ्रंशनाम॥ न भ्रेषोऽभ्रेषः। नियतमीयते न्यायः। 'इण् गतौ'। यथोचितसंकल्पनं [3]कल्पः। 'कृपू [4]सामर्थ्ये।' दिश्यमानस्योचितस्य

रूपं देशरूपम्। [5]संमतमञ्जसा सत्यमत्रेति समञ्जसम्। यथोचितधर्मादभ्रंशस्य नामानि ॥ २३ ॥

[1] विस्रभ्यतेऽनेन D_2, K_6. [2] D_2 adds प्रमादे च. [3] कल्प्यते यथोचितं D_2, W_2. [4] 'क्लृप क्लृप्तौ' K_3, K_6. [5] सम्यक् K_6.

(पा.) समौ विस्रम्भविश्वासौ। प्रत्ययनामनी। 'नम्मिके'। भ्रेषो भ्रंशो यथोचितात्। यथोचितभ्रंशो भ्रेषः स्यात्। अभ्रेषन्याय—समञ्जसम्। [1]न्यायनामानि ॥ २३ ॥

[1] समञ्जस° B_3.

युक्तमौपयिकं लभ्यं भजमानाभिनीतवत् ॥ २४ ॥
न्याय्यं च त्रिषु षट् संप्रधारणा तु समर्थनम्।

(वि.) युक्तमिति—अभ्रेषेण[1] युज्यत इति युक्तम्। 'युजिर् योगे'। उपायजम् औपयिकम्। उपाय एव औपयिकं वा। लब्धुमर्हं[2] लभ्यम्। न्यायं[3] भजते भजमानम्। 'भज सेवायाम्'। अभिनीयते स्म अभिनीतम्[4]। वतिरत्र पादपूरणार्थः। न्यायादनपेतं न्याय्यम्। अभ्रष्टस्य नामानि॥ त्रिषु षट्। पूर्वोक्ताः युक्तादिन्याय्यान्ताः शब्दाः त्रिषु लिङ्गेषु वर्तन्ते॥ संप्रधार्यते इदमेव श्रेय इति निश्चीयतेऽनयेति संप्रधारणा। इदमेव [5]श्रय इति समर्थनानाम ॥ २४ ॥

[1] न्यायेन F_2, Pt_2. [2] योग्यं Pt_2; अर्हति K_3. [3] अभ्रेषं K_5, K_6. [4] D_2, W_2 add 'णीञ् प्रापणे'. [5] श्रेयसे K_6.

(पा.) युक्तमौपयिकं—न्याय्यं च त्रिषु षट्। न्यायादनपेतार्थनामानि। [1]अर्शआदिभ्योऽजन्तश्चेत् समञ्जसशब्दोऽपि न्यायवचनः। 'समञ्जसं समाख्यातं विश्वस्तोचितयोरपि' इति विजयकोशः॥ संप्रधारणा तु समर्थनम्[2]। समर्थननाम ॥ २४ ॥

[1] अर्शआद्यजन्तः (५. २. १२७) B_3. [2] समर्थना B_3.

अववादस्तु निर्देशो निदेशः शासनं च सः ॥ २५ ॥
शिष्टिश्चाज्ञा च संस्था तु मर्यादा धारणा स्थितिः।

(वि.) अववाद इति—अवनतान् भटादीन् प्रति वदनम् [1]अववादः। 'वद व्यक्तायां वाचि'। [2]अपवाद इति वा पाठः। निःशेषेण कार्यस्य देशनं उपदेशनं [3]निर्देशः। नियतं देशनं निदेशः। 'दिश अतिसर्जने'। [4]शास्त्यनेनेति शासनम्। शिष्टिश्च। 'शासु अनुशिष्टौ'। आज्ञापनम् [5]आज्ञा। 'ज्ञा अवबोधने'। आज्ञानामानि॥ संतिष्ठतेऽनया संस्था[6]। मर्येति सीमार्थेऽव्ययम्। तत्र दीयत इति मर्यादा। 'दा दाने'। धार्यतेऽनया धारणा। तिष्ठन्त्यस्यामिति स्थितिः। मर्यादानामानि॥ २५॥

[1] अपवादः K_5, K_6.　[2] अपवदनमपवादः Pt_2.　[3] निर्दिश्यते आदिश्यते (Pt_2) उपदिश्यते (D_2 omits) K_2, K_3, K_6.　[4] शास्यते F_2, Pt_2.　[5] आ ज्ञायतेऽनया K_5, K_6.　[6] D_2, K_6, Pt_2 add 'ष्ठा गतिनिवृत्तौ'.

(पा.) अववादस्तु निर्देशो—आज्ञा च। [1]आज्ञानामानि। संस्था तु मर्यादा—स्थितिः। मर्यादानामानि॥ २५॥

[1] शासन° B_3.

आगोऽपराधो मन्तुश्च समे तूद्दानबन्धने॥ २६॥
द्विपाद्यो द्विगुणो दण्डो भागधेयः करो बलिः।

(वि.) आग इति—आ अगति कुटिलं गच्छतीत्यागः। '[1]अग कुटिलायां गतौ'। सान्तनपुंसकलिङ्गम्। अपराध्यतेऽनेनेति अपराधः। 'राध [2]संसिद्धौ'। मन्यते कष्टमिति मन्तुः। 'मन ज्ञाने'। अपराधनामानि॥ उद्दीयते [3]बध्यतेऽस्मिन्निति उद्दानम्। 'दोऽवखण्डने'। 'देङ् रक्षणे' वा। बध्यतेऽस्मिन्निति बन्धनम्। 'बन्ध बन्धने'। बन्धननामनी॥ द्वौ पादौ प्रमाणमस्य द्विपाद्यः। द्विगुणदण्डनाम॥ [4]भाग एव भागधेयः। कीर्यते [5]विभज्य क्षिप्यते श्रेणिभिरिति करः। 'कॄ विक्षेपे'। बलति राजादिरनेनेति बलिः। 'बल प्राणने'। [6]राज्ञो देयस्य [7]क्षेत्रादिफलभागस्य नामानि॥ २६॥

[1] अक अग° K_5, K_6.　[2] हिंसायां Pt_2.　[3] खण्ड्यते Pt_2.　[4] W_2 adds अंशः.　[5] प्रत्येकं Pt_2.　[6] राज्ञे W_2.　[7] अधिप° K_5, K_6.

(पा.) आगोऽपराधो मन्तुश्च। अपराधनामानि। '[1]शतमागांसि सोढाहे' इति माघप्रयोगात् (शिशु. २. १०८) आगः सान्तः। समे तूद्दानबन्धने। बन्धननामनी॥ [2]द्विपाद्यं द्विगुणो दण्डः। [3]उचितदण्डाद् द्विगुणदण्डो द्विपाद्यं[2] स्यात्। अनेन[4] प्रकारेण

त्रिगुणो दण्डस्त्रिपाद्यं, चतुर्गुणदण्डश्चतुष्पाद्यमित्यादि ॥ भागधेयः—बलिः । राजभागनामानि । ‘[5]कारराजस्वषड्भागाः’ । एतानि त्रीणि च ॥ २६ ॥

[1] ‘सहिष्ये शतमागांसि’ इति मुद्रितग्रन्थे. [2] द्विपाद्यः B_3. [3] यथोचित° A_1. [4] एवं त्रिपाद्यचतुष्पाद्यादि B_3. [5] कारसिद्धाय° A_1.

घट्टादिदेयं शुल्कोऽस्त्री प्राभृतं तु प्रदेशनम् ॥ २७ ॥
उपायनमुपग्राह्यमुपहारस्तथोपदा ।

(वि.) घट्टेति—शलन्ति सुखेन[1] गच्छन्त्यत्रेति शुल्कम् । ‘शल आशुगमने’ । शुल्क्यत इति वा । ‘शुल्क अतिसर्जने’ । [2]अरण्यानीनदीतरणादौ देयद्रव्यनाम ॥ प्रकर्षेण भ्रियते प्राभृतम् । ‘भृञ् भरणे’ । प्रदिश्यते [3]समर्प्यते राज्ञे प्रदेशनम् । ‘दिश अतिसर्जने’ । राज्ञः समीपमयतेऽनेनेति[4] उपायनम् । ‘अय गतौ’ । उपगृह्यते नृपादिना[5] उपग्राह्यम् । उपह्रियते समीपमिति उपहारः । उपदीयते राज्ञे इत्युपदा । ‘डुदाञ् दाने’ । एतानि नृपादीन् द्रष्टुकामेन दीयमानपुष्पस्तबकादिप्रियद्रव्यनामानि ॥ २७ ॥

[1] आशु गच्छति D_2, K_2, W_2. [2] वन° K_5. [3] दीयते Pt_2. [4] K_5, K_6 add अनिवारितः. [5] राज्ञा F_2, Pt_2; D_2 adds ‘ग्रह उपादाने’.

(पा.) घट्टादिदेयं शुल्कोऽस्त्री । घट्टादिदेशे दीयमानं धनं शुल्कं स्यात्[1] । ‘पथि देये शुल्कमस्त्री जामात्रा [2]यच्च दीयते’ इति तालव्यादिषु वैजयन्ती (पृ. २३७, श्लो. ८९) ॥ प्राभृतं तु—उपहारस्तथोपदा । राजानुसरणार्थमानीतार्थनामानि । ‘कानिकेलु’ । करदः । एतच्च ॥ २७ ॥

[1] A_1 adds पुंनपुंसकम्. [2] यश्च A_1.

यौतकादि तु यद्देयं सुदायो हरणं च तत् ॥ २८ ॥
तत्कालस्तु तदात्वं स्यादुत्तरः काल आयतिः ।

(वि.) यौतकादीति—युतयोः संगतयोः स्त्रीपुंसयोर्विवाहे दत्तं यौतकम् । सुष्ठु दीयत[1] इति सुदायः । ‘डुदाञ् दाने’ । स्त्रिया स्वातन्त्र्येण ह्रियत इति [2]हरणम् । स्त्रीधननामानि ॥ [3]तदा तस्मिन् काले भवतीति तदात्वम् । प्रकृतकालनाम ॥ एष्यतीति [4]आयतिः । उत्तरकालनाम ॥ २८ ॥

[1] D_2, K_5, K_6 add पत्यनुमत्या. [2] W_2 adds कन्यादाने धनं दत्तं यौतकं च तदिति निघण्टुः. [3] स चासौ कालश्च तत्कालः F_2, Pt_2. [4] D_2, Pt_2 add 'इण् गतौ'.

(पा.) यौतकादि—हरणं च तत्। 'कन्यादाने तु[1] यद्दत्तं यौतकं यौतुकं च तत्' इति वैजयन्ती (पृ. ८७, श्लो. ५५)। यौतकादिदेयवस्तु [2]सुदायो हरणं च स्यात्। अनुक्तम्—'लञ्चा[3] उत्कोच आमिषम्'। लञ्चानामानि। 'लंचमु'। तत्कालस्तु तदात्वं स्यात्। तत्कालनाम[4]॥ उत्तरः—आयतिः। उत्तरकाल आयतिः स्यात्॥ २८॥

[1] धनं A_1. [2] दायः A_1; स दाय इति वा पाठः B_3. [3] लञ्चः A_1; लम्चा B_3. [4] A_1 adds अनेन प्रकारेणेदं कालोद्यत्वम्; एवमिदं B_3.

सांदृष्टिकं फलं सद्य उदर्कः फलमुत्तरम्॥ २९॥
अदृष्टं वह्नितोयादि दृष्टं स्वपरचक्रजम्।

(वि.) सांदृष्टिकमिति—संदृष्टं [1]नृपादिदर्शनं प्रयोजनमस्य सांदृष्टिकम्। सद्यःफलनाम॥ अभिलाषाधिक्यात् [2]उदर्च्यते स्तूयत इति उदर्कः। 'अर्च पूजायाम्'। उत्तरफलनाम॥ न दृष्टम् अदृष्टम्[3]। महीभुजामग्नितोयादिजातभयनाम॥ सर्वैर्दृश्यत इति दृष्टम्। 'दृशिर् प्रेक्षणे'। आत्मनः शत्रोश्च सैन्यजातभयनाम[4]॥ २९॥

[1] प्रत्यक्षप्रयोजनं F_2, Pt_2. [2] उदृच्यते, 'ऋच स्तुतौ' K_5, K_6. [3] दैवकृतत्वात् D_2, Pt_2. [4] स्वपरयोः चक्राभ्यां सैन्याभ्यां जातं स्वपरचक्रजम् Pt_2.

(पा.) सांदृष्टिकं—सद्यः। सद्यःफलं सांदृष्टिकं स्यात्। उदर्कः—उत्तरम्। उत्तरकालफलमुदर्कः स्यात्। उत्तरकालोऽप्युदर्कः स्यात्। 'उदर्क उत्तरे काले यच्च स्यात् फलमुत्तरम्' इति वैजयन्ती (पृ. २४०, श्लो. १२)॥ अदृष्टं वह्नितोयादि। अनलजलादि[1] दैवकृतमदृष्टं स्यात्॥ दृष्टं स्वपरचक्रजम्। स्वचक्रपरचक्रभूतमनुष्यकृतं[2] दृष्टं स्यात्॥ २९॥

[1] तोयादि A_1. [2] °चक्राभ्यां वृत्तमनुक्तं A_1.

महीभुजामहिभयं स्वपक्षप्रभवं भयम्॥ ३०॥
प्रक्रिया त्वधिकारः स्याच्चामरं तु प्रकीर्णकम्।

(वि.) महीभुजामिति—अहेरिव[1] भयम् अहिभयम्। राज्ञां [2]स्वपक्षप्रभवभयनाम। [3]प्रकर्षेण क्रियत इति प्रक्रिया। कर्मविशेषमधिकृत्य कर्तृभिः क्रियत इत्यधिकारः। अधिकारनामनी ॥ [4]चमरमृगसंबन्धि चामरम्। प्रकीर्यते राजसमीपे इतस्ततो विक्षिप्यते प्रकीर्णकम्। 'कॄ विक्षेपे'। चामरनामनी ॥ ३० ॥

[1] D_2 adds गृहस्थितात्.
[2] W_2 adds राजपुत्रादि.
[3] प्रक्रियते K_2.
[4] चमर्या इदं K_2.

(पा.) महीभुजामहिभयं—भयम्। पुत्रदायादप्रभृतिस्वपक्षैः कृतं भयम् अहिभयं स्यात् ॥ प्रक्रिया—अधिकारः स्यात्। अधिकारनाम। '[1]पणिहमु' ॥ चामरं—प्रकीर्णकम्। चामरनामनी। 'चमरं चामरे[2] प्राहुः' इति विश्वप्रकाशिका (पृ. १३५, श्लो. १२०)। 'चामरा चामरं रोमगुच्छकं[3] चावचूलकम्[4]' इति त्रिकाण्डशेषः (पृ. १७, श्लो ४०६) ॥ ३० ॥

[1] B_3 omits.
[2] चामर A_1, B_3.
[3] °गुत्सकं B_3.
[4] फालचूलिकम् A_1.

नृपासनं तु यद्भद्रासनं सिंहासनं तु तत् ॥ ३१ ॥
हैमं छत्रं त्वातपत्रं राज्ञस्तु नृपलक्ष्म तत्।

(वि.) नृपासनमिति—भद्रं च तदासनं च भद्रासनम्। नृपासननाम ॥ [1]सिंहप्रतिकृतियुक्तमासनं सिंहासनम्। राज्ञः सुवर्णमयभद्रासननाम ॥ छाद्यते पुरुषोऽनेनेति छत्रम्। 'छद अपवारणे'। आतपात् त्रायते पुरुषमिति आतपत्रम्। 'त्रैङ् पालने'। छत्रमात्रनामनी ॥ नृपाणां लक्ष्म नृपलक्ष्म। [2]राजयोग्यच्छत्रनाम ॥ ३१ ॥

[1] सिंहाकृतियुक्तं F_2, Pt_2.
[2] W_2 adds °श्वेतातपत्र°.

(पा.) नृपासनं यत्तद् भद्रासनम्। नृपस्यासनं भद्रासनं स्यात्। सिंहासनं—हैमम्। तदेव[1] हेममयं चेत् सिंहासनं स्यात्। छत्रं त्वातपत्रम्। छत्रनामनी। आतपवारणोष्णवारणादयः शब्दा अपि स्युः।

'कमलातपवारणं [2]तथा शशिशुभ्रं बिभरांबभूव तत्।'

इति राघवपाण्डवीयम् (द्विसं. ४. २८)। 'हंसमण्डलद्युतिजिष्णु जिष्णुरभृतोष्णवारणम्' इति माघः (शिशु. १३. २१) ॥ राज्ञस्तु नृपलक्ष्म तत्। राज्ञस्तु तच्छत्रं [3]नृपलक्षणं स्यात् ॥ ३१ ॥

[1] A_1 adds नृपासनं.　[2] तदा इति मुद्रितग्रन्थे.　[3] नृपलक्ष्म B_3.

भद्रकुम्भः पूर्णकुम्भो भृङ्गारः कनकालुका ॥ ३२ ॥
निवेशः शिबिरं षण्ढे सज्जनं तूपरक्षणम् ।

(वि.) भद्रकुम्भ इति—भद्रश्चासौ कुम्भश्च भद्रकुम्भः। पूर्णश्चासौ कुम्भश्च पूर्णकुम्भः। [1]राजद्वारनिक्षिप्तपूर्णकलशनामनी ॥ भ्रियते पूर्यते जलमत्रेति भृङ्गारः[2]। कनकमयी चासौ [3]आलुश्च कनकालुका। हेमगलन्तिकानामनी ॥ निविशते[4] संनिवेशाविशेषेण स्थाप्यत इति निवेशः। 'विश प्रवेशने'। शेरतेऽत्र शिबिरम्। 'शीङ् स्वप्ने'। [5]स्कन्धावारनामनी ॥ सत् [6]स्वास्थ्यं जन्यतेऽनेनेति सज्जनम्। 'जनी प्रादुर्भावे'। अनेन किंचिद्रक्षणं भवतीति [7]उपरक्षणम्। शिबिररक्षणार्थं परितः कृतस्य [8]वृतिप्रभृतिकस्य नामनी ॥ ३२ ॥

[1] D_2 adds राज्ञः सुवर्णमय°.　[2] 'डुभृञ् धारणपोषणयोः' K_6.　[3] आलुका W_2, Pt_2.　[4] निविश्यत इति F_2, Pt_2.　[5] सैन्यावास° W_2; सेनाधार° K_5, K_6.　[6] सौष्ठयादिकं W_2.　[7] उपरक्ष्यते Pt_2.　[8] भृतकस्य W_2.

(पा.) भद्रकुम्भः पूर्णकुम्भः। पूर्णकुम्भनामनी ॥ भृङ्गारः कनकालुका। [1]कनककरीरनामनी। 'पशिंडिगरिगे'[2] ॥ निवेशः शिबिरं षण्डे। सेनानिवेशनामनी। '[2]पाशेमु' ॥ सज्जनं तूपरक्षणम्[3]। वेत्रधरैः[4] [5]कृतजनसंबाधराहित्यनामनी। 'भराभरि'[2] ॥ ३२ ॥

[1] कानक° A_1.　[2] B_3 omits.　[3] उपलक्षणम् A_1.　[4] °धरकृत° B_3.　[5] °प्रहरकादिनाम B_3.

हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयम् ॥ ३३ ॥
दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः ।
मतङ्गजो गजो नागः कुञ्जरो वारणः करी ॥ ३४ ॥
इभः स्तम्बेरमः पद्मी यूथनाथस्तु यूथपः ।

(वि.) हस्तीति—सेनाया अङ्गं सेनाङ्गम् । हस्त्यश्वरथपदातिचतुष्टयस्य नाम ॥ स्थूलौ दन्तौ स्तः अस्येति दन्ती। दन्तावलश्च । हस्तः शुण्डास्यास्तीति हस्ती। द्वौ रदावस्य स्त इति द्विरदः । अनेकेन तुण्डेन[1] वक्त्रेण च पिबतीति अनेकपः । द्वाभ्यां पिबतीति द्विपः[2]। [3]मतङ्गाख्यराजर्षेर्जातो मतङ्गजः। 'जनी प्रादुर्भावे'। गजति माद्यतीति गजः। 'गज [4]शब्दे मदे च'। नगे गिरौ भवः नागः। कुञ्जौ कुम्भाधोगर्तावस्यास्तीति कुञ्जरः। कुञ्जे रमत इति वा। अरीन्[5] वारयतीति वारणः। 'वृञ् वरणे'। करोऽस्यास्तीति करी। एति मदमिति इभः। 'इण् गतौ'। स्तम्बे नदीकुञ्जे[6] रमत इति स्तम्बेरमः। 'रमु क्रीडायाम्' । पद्मं बिन्दुजालं[7], तदस्यास्तीति पद्मी । [8]गजनामानि ॥ यूथं गजसमूहं पातीति यूथपः । [9]गजयूथमुख्यनाम ॥ ३३–४ ॥

[1] हस्तेन F_2, Pt_2. [2] 'पा पाने' D_2, Pt_2. [3] मतङ्गाद्दषेः F_2, Pt_2. [4] मदवैकृत्ये K_5, K_6. [5] परबलं F_2, Pt_2. [6] तृणगुल्मे Pt_2. [7] जालकं W_2. [8] नाग° K_2, K_3. [9] करि° K_2, K_5, W_2.

(पा.) हस्त्यश्वरथपादातं—चतुष्टयम् । हस्त्यश्वरथपदातिचतुष्टयं[1] सेनाङ्गं स्यात् । 'तुरंगरथपत्तीभं सेनाङ्गमभिधीयते' इति ध्वनिमञ्जरी ॥ दन्ती दन्तावलो हस्ती—स्तम्बेरमः पद्मी । गजनामानि ॥

'[2]वेतण्डो [3]मदवृन्दः स्यात् कुक्षीवान् षष्टिहायनः ।
सिन्धुरः [4]सामजः कुम्भी शुण्डालश्च मतङ्गजः[5] ॥'

एतानि च ॥ यूथनाथस्तु यूथपः । नायकगजनामनी ॥ ३३–४ ॥

[1] पदातिनां A_1; पदातीनां B_3. [2] वेदण्डः B_3. [3] मदवृद्धः A_1. [4] सामतः A_1. [5] मतङ्गमः A_1.

मदोत्कटो मदकलः कलभः करिशावकः ॥ ३५ ॥
प्रभिन्नो गर्जितो मत्तः समावुद्वान्तनिर्मदौ ।

(वि.) मदोत्कट इति—मदेन[1] उत्कटस्तीव्रो मदोत्कटः । मदेन[2] कलो मनोज्ञो मदकलः । [3]अतिमदगजनामनी ॥ कलो भाति, कमुदकमन्यतो लभते वा कलभः । 'डुलभष् प्राप्तौ'। [4]करिशिशुनाम ॥ प्रकर्षेण भिन्न इव प्रभिन्नः[5]। गर्जो गर्जनमस्य संजात इति गर्जितः । 'गर्ज शब्दे'। माद्यतीति मत्तः । 'मदि हर्षग्लेपनयोः'। मत्तगजनामानि ॥ मदमुद्वमतीति उद्वान्तः । 'टुवमु उद्गिरणे'। निर्गतो मदोऽस्मादिति निर्मदः । गतमदगजनामनी ॥ ३५ ॥

[1] गजमदेन W_2.　[2] W_2 adds दानाम्बुना.　[3] मदोत्कट° W_2.　[4] °शावक° W_2.
[5] 'भिदिर् विदारणे' D_2.

(पा.) मदोत्कटो मदकलः। यस्मिन् वयस्युद्भिन्नकटस्तस्मिन् वयसि वर्तमानो गजो मदकलः स्यात्। 'लग्नो मदकलो मत्तः प्रभिन्नोऽपि[1]' इति वैजयन्त्यां (पृ. १०९, श्लो. ६८) मत्तपर्यायेषु[2] पठितः॥ कलभः करिशावकः। [3]करिशिशुः कलभः स्यात्। 'पिळ्ळयेनुगु[4]'। [5]वयोलक्षणङीपि प्राप्ते शाबोऽपि कलभी॥ प्रभिन्नो—मत्तः। मत्तगजनामानि॥ समावुद्वान्तनिर्मदौ। निर्गतमदस्य गजस्य नामनी। 'मदमुलिडिचिन येनगु'॥ अनुक्तम्—'राजवाह्यस्त्वौपवाह्यः'। राजवाहनगज औपवाह्यः स्यात्। 'संनाह्यः समरोचितः'। युद्धोचितगजः संनाह्यः स्यात्॥ ३५॥

[1] B_3 omits.　[2] पर्याये A_1.　[3] करिणः A_1.　[4] B_3 omits.
[5] (४. १. २०).

हास्तिकं गजता वृन्दे करिणी धेनुका वशा॥ ३६॥
गण्डः कटो मदो दानं वमथुः करशीकरः।

(वि.) हास्तिकमिति—हस्तिनां समूहो हास्तिकम्। गजानां समूहो गजता। [1]गजवृन्दनामनी॥ धयत्येनां करिपोतक[2] इति धेनुका। 'धेट् पाने'। वष्टि कामयते गजमिति वशा। 'वश कान्तौ'। [3]करिणीनामानि॥ गण्ड्यते हन्यत इति गण्डः। 'गडि वदनैकदेशे'। कटति मदं वर्षतीति कटः। 'कटे वर्षावरणयोः'। गजगण्डस्थलनामनी॥ माद्यतेऽनेनेति मदः। 'मदि हर्षग्लपनयोः'। द्यति हस्तिनमस्योद्गमेन[4] पीडयतीति दानम्। 'दोऽवखण्डने'। वम्यत उद्गीर्यत इति वमथुः। 'टुवमु उद्गिरणे'। करिकरशीकरनाम॥ ३६॥

[1] °समूह° W_2.　[2] गजशिशुः Pt_2.　[3] करोऽस्या अस्तीति करिणी Pt_2.
[4] उद्गमने W_2.

(पा.) हास्तिकं गजता वृन्दे। [1]गजसमूहनामनी। करिणी धेनुका वशा। स्त्रीगजनामानि॥ गण्डः कटः। [2]गजगल्लनामनी॥ मदो दानम्। मदजलनाम॥ वमथुः करशीकरः। करिहस्ताग्रबिन्दुर्वमथुः स्यात्। अनुक्तम्—'शुण्डा स्त्रियां करो हस्तः'। करिकरनामनी॥ ३६॥

[1] करि° A_1.　[2] गण्डस्थल° B_3.

कुम्भौ तु पिण्डौ शिरसस्तयोर्मध्ये विदुः पुमान् ॥ ३७ ॥
अवग्रहो ललाटं स्यादीषिका त्वक्षिकूटकम् ।

(वि.) कुम्भाविति—कुम्भाकृतियोगात् कुम्भौ । गजशिरोऽवयवभूतमांसपिण्डनाम ॥ [1]वेत्त्यस्मादङ्कुशमिति विदुः । 'विद ज्ञाने' । कुम्भमध्यनाम । अङ्कुशेनावगृह्यत इति अवग्रहः[2] । गजललाटदेशनाम ॥ ईषावल्लाङ्गलदण्डवद्[3] दैर्घ्यात् ईषिका[4] । गजाक्ष्णोरुपरिकूपरूपनतस्थाननाम ॥ ३७ ॥

[1] अस्मिन् अङ्कुशघातं F₂, Pt₂. [2] D₂, Pt₂ add 'ग्रह उपादाने'.
[3] लाङ्गलिकेव F₂, Pt₂. [4] Pt₂ adds अक्षिकूटकम् अक्षिगोलकम्.

(पा.) कुम्भौ तु—शिरसः[1] । शिरसः पिण्डौ कुम्भौ स्याताम् । तयोर्मध्ये विदुः पुमान् । कुम्भमध्यभागो[2] विदुः स्यात् । तवर्गतृतीयान्तः । टवर्गतृतीयान्तोऽपि स्यात् । 'तयोर्मध्यं विदुर्विड्डः' इति वर्णनिर्देशना । अनुक्तम्—'आरक्षः कुम्भयोरधः' । [3]कुम्भयोरधोभाग आरक्षः स्यात् ॥ अवग्रहो ललाटं स्यात् । [4]करटिनिटिलमवग्रहः स्यात् ॥ इषीका त्वक्षिकूटकम् । गजभ्रूभङ्ग इषीका स्यात् । ह्रस्वप्रथमो दीर्घद्वितीयश्च ॥ ३७ ॥

[1] शिरः पिण्डौ A₁. [2] कुम्भयोर्मध्ये A₁. [3] कुम्भस्थलयोः A₁. [4] करि° A₁.

अपाङ्गदेशो निर्याणं कर्णमूलं तु चूलिका ॥ ३८ ॥
अधः कुम्भस्य वाहित्थं प्रतिमानमधोऽस्य यत् ।

(वि.) अपाङ्गेति—निर्याति नेत्रजलमस्मादिति निर्याणम् । 'या प्रापणे' । गजस्य अपाङ्गदेशनाम ॥ [1]चुल्यतेऽङ्कुशेन प्रेर्यते चूलिका[2] । 'चुल प्रेरणे' । मदवाहिनि[3] स्थाने तिष्ठतीति वाहित्थम् । कुम्भस्याधोभागनाम ॥ प्रतिमीयतेऽनेन प्रतिमानम् । 'डुमिञ् प्रक्षेपणे' । दन्तकुम्भमध्यनाम ॥ ३८ ॥

[1] चोद्यते, 'चुद प्रेरणे' K₂, K₃, K₆. [2] K₆, W₂ add गजकर्णमूलदेशनाम.
[3] वाहस्थानसमीपे K₅, K₆.

(पा.) अपाङ्गदेशो निर्याणम् । गजापाङ्गप्रदेशो निर्याणं स्यात् । कर्णमूलं तु चूलिका । गजश्रुतिमूलं चूलिका स्यात् । चूलिकास्थाने [1]पिप्पलीशब्दं केचित् पठन्ति ॥

अधः कुम्भस्य वाहित्थम्। कुम्भशब्देनात्र वातकुम्भाभिधानरूढस्वल्पललाटकुटिर्विवक्षिता। '[2]पिन्ननुदिटिबुड्डनु'। तस्याधोभागो वाहित्थं स्यात्। 'वाहित्थं वातकुम्भाधः' इति भागुरिः॥ प्रतिमानमधोऽस्य च। तस्याप्यधोभूतं दन्तान्तरालं प्रतिमानं स्यात्। 'प्रतिमानं प्रतिच्छायागजदन्तान्तरालयोः' इति रुद्रः॥ ३८॥

[1] पिप्पल° B_3.		[2] B_3 omits.

आसनं स्कन्धदेशः स्यात् पद्मकं बिन्दुजालकम्॥ ३९॥
पक्षभागः पार्श्वभागो दन्तभागस्तु योऽग्रतः।

(वि.) आसनमिति—आस्यते[1] हस्तिपकादिनात्रेत्यासनम्[2]। 'आस उपवेशने'। हस्तिनः[3] स्कन्धदेशनाम॥ पद्मवर्णसाम्यात् पद्मकम्। गजसिध्मनाम॥ पक्षयोर्भागः पक्षभागः। पक्षश्चासौ भागश्चेति वा। [4]गजपार्श्वभागनाम॥ दन्तवान् भागो दन्तभागः। गजपुरोभागनाम॥ ३९॥

[1] W_2 adds उपविश्यते.		[2] अस्मिन् W_2.		[3] गजस्कन्धप्रदेशनाम W_2.
[4] करि° K_2, K_3, W_2.

(पा.) आसनं स्कन्धदेशः स्यात्। गजस्कन्धप्रदेश आसनं स्यात्॥ पद्मकं बिन्दुजालकम्। गजमुखबिन्दुजालकं[1] पद्मकं स्यात्॥ पक्षभागः पार्श्वभागः। गजानां पार्श्वभागः पक्षभागः[2] स्यात्॥ दन्तभागस्तु योऽग्रतः। गजानामग्रभागो[3] दन्तभागः स्यात्॥ ३९॥

[1] जालं A_1.		[2] पक्षः A_1.		[3] पुरोभागः B_3.

द्वौ पूर्वपश्चाज्जङ्घादिदेशौ गात्रावरे क्रमात्॥ ४०॥
तोत्रं वैणुकमालानं बन्धस्तम्भेऽथ शृङ्खला।
अन्दुको निगडोऽस्त्री स्यादङ्कुशोऽस्त्री सृणिः स्त्रियाम्॥४१॥

(वि.) द्वाविति—गात्रस्य प्रधानाङ्गत्वाद् गात्रम्। गात्रस्याप्रधानाङ्गत्वाद् अवरम्[1]। एतौ क्रमात् पूर्वपश्चाज्जङ्घादिदेशयोर्नामनी॥ तुद्यते गजोऽनेनेति तोत्रम। 'तुद व्यथने'। वेणुना[2] निर्वृत्तं वैणुकम्[3]। गजप्रतोदनामनी॥ आलायते बध्यते गजोऽस्मिन्निति आलानम्। 'ला आदाने'। गजबन्धनस्तम्भनाम॥ शृणाति [4]बन्धनेन

पीडयति गजमिति शृङ्खला। ‘शॄ हिंसायाम्’। अन्दति बध्नातीति अन्दुकः। ‘[5]अदि बन्धने’। निगलति[6] पीडयतीति निगडः। डलयोरभेदात्। ‘गल [7]आदाने’। शृङ्खलनामानि॥ अङ्क्यते[8] गम्यतेऽनेन अङ्कुशः। ‘अकि लक्षणे’। सरत्यनयेति सृणिः[9]। ‘सृ गतौ’। अङ्कुशनामनी॥ ४०–१॥

---

[1] अपरमिति वा पाठः K_5, K_6. [2] वेणुयष्टित्वात् D_2, W_2. [3] वेणुकं K_5, W_2. [4] वन्धयति K_3. [5] अति अदि W_2. [6] निगलयति K_5, K_6. [7] ‘गल अदने’ D_2, W_2. [8] अकति गच्छति, ‘अक कुटिलायां गतौ’ K_3, K_6. [9] D_2, W_2 add सृणिशब्दः द्वयोः स्त्रीपुंलिङ्गयोर्वर्तते।‘सृणिं शिताग्रम्’ (शिशु. ५. ५) इति तु माघस्य प्रमादः सृणेः स्त्रीत्वात् इति भानुजीदीक्षितः (पृ. ३२०).

(पा.) द्वौ पूर्वपश्चात्—क्रमात्। गजानां पूर्वजङ्घादिप्रदेशो [1]गात्रं स्यात्। तेषां पश्चाज्जङ्घादिप्रदेशोऽवरा[2] स्यात्। गात्रावरे इति रूपसामान्येन स्त्रीनपुंसकलिङ्गे। ‘द्वौ पूर्वपश्चाज्जङ्घादिदेशौ गात्रावरे[3] न ना’ इति रभसकोशः। तोत्रं [4]वैणुकम्। गजभीषणार्थं कृतार्धचन्द्राकारायोमुखवेणुदण्डनामनी। ‘[5]आरागोला’। आलानं बन्धस्तम्भे। [6]गजबन्धनार्थं स्तम्भ आलानं स्यात्॥ अथ शृङ्खले—निगलोऽस्त्री स्यात्। [7]शृङ्खलानामानि। ‘संकल[5]’। ‘निगडः पादबन्धश्च हिञ्जीरः शृङ्खलोऽन्दुकः’ इति हलायुधपाठात् (अ. मा. २. ६८) शृङ्खलः पुंलिङ्गः। ‘अन्दुको निगलो न स्त्री भिदुरं शृङ्खला त्रयी’ इति वैजयन्त्यां (पृ. ११०, श्लो. ८३) त्रिलिङ्गतोक्ता॥ अनुक्तम्—‘कलापकः कण्ठबन्धः’। ग्रीवानिगलः कलापकः स्यात्। ‘त्रिपदी पादबन्धनम्’। पादशृङ्खला त्रिपदी स्यात्॥ अङ्कुशो—सृणिर्द्वयोः। अङ्कुशनामनी। सृणिर्दन्त्यादिः॥ ४०–१॥

---

[1] गात्रा B_3. [2] अपरा A_1. [3] गात्रापरे A_1. [4] वेणुकं B_3. [5] B_3 omits. [6] बन्धस्तम्भनाम B_3. [7] शृङ्खल° B_3.

दूष्या कक्ष्या वरत्रा च कल्पना सज्जना समे।
प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथो द्वयोः॥ ४२॥
वीतं त्वसारं हस्त्यश्वं वारी तु गजबन्धनी।

(वि.) दूष्येति—दूष्यते[1] गजस्यौद्धत्यभङ्गः क्रियतेऽनयेति दूष्या। ‘दुष वैकृत्ये’। कक्षायां [2]गजपार्श्वभागे वर्तमाना[3] कक्ष्या। व्रियते [4]गजमध्यमनयेति वरत्रा।

'वृञ् वरणे'। गजमध्यबन्धनाय निर्मितचर्मरज्जुनामानि ॥ कल्प्यते कल्पना। 'कृपू सामर्थ्ये'। सज्यते विरच्यते सज्जना[5]। गजशृङ्गारनामनी। [शृङ्गारः अलंकरणम्]। [6]सज्जीकरणस्येति केचित् ॥ प्रकर्षेण चित्रवर्णत्वेन वयन्त्येनामिति प्रवेणी। 'वेञ् तन्तुसंताने'। आस्तीर्यते गजपृष्ठमनेन आस्तरणम्। 'स्तॄञ् आच्छादने'। वर्ण्यते चित्रवर्णत्वेन वर्णः। 'वर्ण स्तुतौ'। परिंस्तोम्यते[7] गजपृष्ठे परिकीर्यते परिस्तोमः। 'स्तोम श्लाघायाम्'। कुथ्यते गजोपरि संश्लिष्यते कुथः। 'कुथ संश्लेषणे'। [8]गजोपरिस्थचित्रकम्बलनामानि ॥ वेति स्म विगतं बलमस्येति वीतम्[9]। निःसत्त्वहस्त्यश्वनाम ॥ [10]गजपलायनं वार्यतेऽनयेति वारी। 'वृञ् वरणे'। गजग्रहणाय कृतस्य गर्तादेर्नाम[11] ॥ ४२ ॥

---

[1] दूयते, 'दूञ् परितापे' F_2, Pt_2; चूष्या चूषा इति च पाठौ. [2] मध्य° D_2, Pt_2. [3] भवा K_6, Pt_2. [4] मध्यभागः D_2, K_5, K_6. [5] Pt_2 adds 'षस्ज गतौ'. [6] K_3 omits two lines. [7] परिस्तूयते K_5. [8] °स्थित° W_2. [9] D_2, Pt_2 add 'वी गत्यादिषु'. [10] गजः F_2, Pt_2. [11] K_3, K_6 add गजप्रकरणं समाप्तम्.

(पा.) [1]चूषा कक्ष्या वरत्रा स्यात्। गजमध्यबद्धस्थूलचर्मरज्जुनामानि[2]। 'येनुगनडिमिदोड्ढम्रोकु'॥ कल्पना सज्जना समे। गजसज्जीकरणाय [3]बद्धदीर्घचर्मरज्जुनामनी। 'प्रनम्रेकु'। क्रियाशब्दत्वात् कल्पितः सज्जितो गजः ॥ अनुक्तम्—'[4]तिर्यग्दन्तप्रहारो यः परिणामः स दन्तिनाम्'। गजानां तिर्यक्प्रसारितदन्तप्रहारः परिणामः स्यात्। क्रियाशब्दत्वात् परिणतो गजः ॥ प्रवेण्यास्तरणं—कुथो द्वयोः। [5]रत्नकम्बलनामानि ॥ अनुक्तम्—'पिधानं[6] हस्तिकम्बलः'। गजकम्बलः पिधानं[6] स्यात् ॥ 'निर्वाणं हस्तिमज्जनम्'। [7]गजमज्जनं निर्वाणं स्यात् ॥ 'शारिर्ना हस्तिपर्याणम्'। गजपल्याणं शारिः स्यात् ॥ 'शृङ्गारो हस्तिमण्डनम्'। गजालंकारः शृङ्गारः स्यात् ॥ वीतं त्वसारहस्त्यश्वम्। असारं करितुरगं वीतं स्यात्। पादकर्माङ्कुशवारणे[8] [9]मिलित्वा वीतं स्यात्।

'पादकर्म[10] यतं तेषां यातमङ्कुशवारणम्।
वीतं तदुभयं यच्च निःसारं[11] हयकुञ्जरम् ॥'

इति वैजयन्ती (पृ. १११, श्लो. ८९) ॥ वारी तु गजबन्धनी। करिग्रहणभूमिनाम ॥ 'गजग्रहणभूमौ स्त्री [12]वारिः स्यात् सलिले नपुम्' इति वैजयन्ती (पृ. २३६, श्लो. ८२) ॥ अनुक्तम्—'अवपातस्तु पाताय [13]गर्तश्छन्नतृणादिना'। गजानां [14]ग्रहणाय कृतो गर्तोऽवपातः[15] स्यात्। 'ओंदामु' ॥ ४२ ॥

[1] दूष्या B_3.
[2] B_3 omits.
[3] A_1 adds परिणिनंसुर्गजः.
[4] तिर्यग्दन्तप्रहारस्तु गजः परिणतो मतः इति हलायुधः (२. ६५).
[5] A_1 adds एतानि पञ्च.
[6] विधानं A_1.
[7] गजानां A_1.
[8] चारणे A_1.
[9] A_1 adds द्वे.
[10] °कर्मयुतं प्रोक्तं A_1.
[11] निःसारहय° A_1.
[12] वारी B_3.
[13] पुष्करिणीकृतः B_3.
[14] निपातनाय B_3.
[15] निपातः A_1.

घोटके वीतितुरगतुरंगाश्वतुरंगमाः ॥ ४३ ॥
वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः ।

(वि.) घोटक इति—भूमौ [1]घोटते परिवर्तते घोटकः। 'घुट परिवर्तने'। वेति शीघ्रं गच्छतीति वीतिः। 'वी गत्यादौ'। पीतिरिति वा पाठः। तुरं त्वरितं[2] गच्छतीति तुरगः। तुरंगः। तुरंगमश्च ॥ अश्नुते [3]गमनेनेत्यश्वः। 'अशू व्याप्तौ'। वजतीति वाजी। 'वज[4] गतौ'। वहति नरमिति वाहः। 'वह प्रापणे'। अर्वति क्षिप्रं गच्छतीत्यर्वा। 'अर्व [5]गतौ'। नकारान्तोऽयम्। गन्ध्यते कशादिना [6]ताड्यते गन्धर्वः। 'गन्ध अर्दने'। हयतीति[7] हयः। 'हय गतिकान्त्योः[8]'। सिन्धुदेशे भवः सैन्धवः। सपति [9]जवादिधर्मेण समवैतीति सप्तिः। 'षप समवाये'। अश्वनामानि ॥ ४३ ॥

[1] घुटति K_5, K_6, Pt_2.
[2] शीघ्रं D_2, W_2.
[3] जवेन गच्छति K_2, K_3, K_6.
[4] वज व्रज K_5, K_6.
[5] क्षिप्रगतौ K_3, K_6.
[6] पीड्यते F_2, Pt_2.
[7] K_3, Pt_2 add गच्छति.
[8] गतौ F_2, W_2.
[9] सेनादि Pt_2.

(पा.) घोटके पीतितुरग—सैन्धवसप्तयः। पीतिशब्द इकारान्तः। 'पाने स्त्री पीतिरश्वे ना' इति रुद्रः। अर्वेति शब्दो नकारन्तः। 'अर्वा[1] च कुत्सिते वाहे वृषा कर्णमहेन्द्रयोः' इति विश्वप्रकाशिका (पृ. ९४, श्लो. ११७) ॥ अश्वनामानि ॥

'कुदरः स्वाम्युपकारकः स्थौरी पाकलो जुहूराणश्च ।
धाराटः खुड्गाहः[2] प्रकीर्णकः शालिहोत्री च ॥'

एतानि च ॥ ४३ ॥

[1] 'अर्धा च कुक्षिते' इति मुद्रितग्रन्थे.
[2] खेकोशः A_1; खेंकोलः B_3.

आजानेयाः कुलीनाः स्युर्विनीताः साधुवाहिनः ॥ ४४ ॥
वनायुजाः पारसीकाः काम्बोजा बाह्लिका हयाः ।

(वि.) आजानेया इति—अजेन गतिक्षेपेण[1] आनेया आजानेयाः। कुलीनाश्वनाम ॥ विनीयन्त[2] इति विनीताः[3]। 'णीञ् प्रापणे'। सुशीलाश्वनाम ॥ वनायुदेशे भवा वनायुजाः। पारसीकदेशे भवाः पारसीकाः। [4]कम्बोजेषु भवाः काम्बोजाः। [5]बह्लिकदेशे भवाः बाह्लिकाः। एतानि तत्तद्देशजाश्वनामानि ॥ ४४ ॥

---

[1] जवेन Pt_2. [2] K_2, K_6, W_2 add साधु. [3] साधुवहनशीलाः साधुवाहिनः D_2, F_2. [4] काम्बोज° F_2, Pt_2. [5] बल्हिक° Pt_2.

(पा.) आजानेयाः कुलीनाः स्युः। जात्याश्वाः कुलीनाः स्युः। विनीताः साधुवाहिनः। सम्यग्वाहनशीला[1] विनीताः स्युः। तदन्ये शूलकाः[2] स्युः। '[3]शूलको दुर्विनीतोऽश्वः' इति हलायुधः (अ. मा. २. २८५) ॥ वानायुजाः [4]पारशीकाः। भिन्नदेशत्वाद् भिन्नार्थकाः। वानायुजशब्दो[5] ह्रस्वादिश्च स्यात्। 'वानायुजः पारशीको वनायुजः' इति रत्नकोशः। [6]काम्बोजा बाह्लिका हयाः। बाह्लिकशब्दो दीर्घमध्यश्च स्यात्। 'बाह्लीकं बाह्लिकं धीरहिङ्गुनोर्नाश्वदेशयोः' इति त्रिकाण्डशेषः[7] ॥ ४४ ॥

---

[1] A_1 adds अश्वाः. [2] शूकलाः A_1, B_3. [3] शूकलः B_3. [4] पारसीकाः A_1. [5] वानायुजा इति दीर्घादिश्च B_3. [6] काम्भोजा A_1. [7] ३. ३. श्लो. ५९५.

ययुरश्वोऽश्वमेधीयो जवनस्तु जवाधिकः ॥ ४५ ॥
पृष्ठ्यः स्थौरी सितः कर्को रथ्यो वोढा रथस्य यः।

(वि.) ययुरिति—[1]उत्सृष्टो दिशं[2] यातीति ययुः। 'या प्रापणे'। अश्वमेधाय हितोऽश्वमेधीयः। अश्वमेधीयाश्वनाम ॥ [3]जवते शीघ्रं गच्छतीति जवनः। 'जु गतौ'। जवाधिकाश्वनाम ॥ पृष्ठेन वोढुं क्षमः पृष्ठ्यः। [4]स्थूलस्य पृष्ठभागस्येदं स्थौरम्। रलयोरभेदः। स्थौरं बलमस्यास्तीति स्थौरी। अतिभरवहनसमर्थाश्वनामनी। सितस्य वर्णान्तरं क्रियत इति [5]कर्कः। 'डुकृञ् करणे'। सिताश्वनाम ॥ रथं वहतीति रथ्यः। रथवोढुरश्वस्य नाम ॥ ४५ ॥

---

[1] विसृष्टः F_2, Pt_2. [2] दिशि दिशि W_2; देशे देशे Pt_2. [3] जवति Pt_2. [4] स्थूराया अश्वजङ्घाया इदं D_2, K_5, K_6. [5] करोति कौतुकं F_2, Pt_2.

(पा.) ययुरश्वोऽश्वमेधीयः। अश्वमेधाश्वो ययुः स्यात्। अश्वमात्रेऽपि[1] ययुः स्यात्। 'ययुरश्वोऽश्वमेधाश्वे' इति वैजयन्ती (पृ. २१८, श्लो. ४८) ॥ जवनस्तु जवाधिकः।

जवाधिकोऽश्वो जवनः स्यात् ॥ पृष्ठ्यः स्थौरी। पृष्ठवहनशीलाश्वनामनी। 'स्थौरं पशूनां पृष्ठवाह्यां तद्योगादिनिः' इति [2]सुभूतिटीकावचनात् स्थौरं[3] पृष्ठवाह्यम्[3]। 'वन्नेमोपु'॥ सितः कर्कः। श्वेतवर्णाश्वः कर्कः स्यात्। अनुक्तम्—'कृष्णवर्णस्तु हेमः स्यात्'। नीलवर्णाश्वो हेमः स्यात्। 'शोणाङ्गः शोण एव हि'। शोणवर्णाश्वः शोणः स्यात्। 'हरितः पीतवर्णाश्वः'। [4]पीतवर्णस्तुरंगः हरितः स्यात्। 'हलाहः चित्रवर्णकः'। चित्रवर्णाश्वो हलाहः स्यात्। 'इन्द्रायुधस्तु नीलाक्षः'। नीलेक्षणोऽश्व इन्द्रायुधः स्यात्। 'मल्लिकाक्षः सितेक्षणः'। शुभ्रनेत्रोऽश्वो मल्लिकाक्षः स्यात्। 'श्रीवृक्षकी स तुरगः श्रीवृक्षो यस्य लाञ्छनम्'। श्रीवृक्षलाञ्छनोऽश्वः श्रीवृक्षकी स्यात्। 'श्रीवृक्षकी पुरुषकोन्नमिताग्रकायः' इति माघः (शिशु. ५. ५६)॥ रथ्यो वोढा रथस्य यः। रथवहनशीलोऽश्वो रथ्यः स्यात्॥ ४५॥

---

[1] मात्रमपि A_1.

[2] टीकाकार° A_1.

[3] B_3 omits.

[4] पीतवर्णाश्वः B_3.

बालः किशोरो वाम्यश्वा बडवा बाडवं गणे॥ ४६॥
त्रिष्वाश्वीनं यदश्वेन दिनेनैकेन गम्यते।

(वि.) बाल इति—कश्यते [1]कशया किशोरः। 'कश गतिशासनयोः[2]। बालाश्वनाम॥ वमति गर्भमिति वामी। 'टुवमु उद्गिरणे'। अश्वजातिस्त्री अश्वा। वलत इति बडवा[3]। 'वल संवरणे संचरणे च'। अश्वस्त्रीनामानि॥ बडवानां समूहो बाडवम्। अश्वासमूहनाम॥ अश्वेनैकेन दिनेन गम्यत इति आश्वीनम्[4]। यो [5]मार्गोऽश्वेनैकदिनेनैव गम्यते तस्य नाम॥ ४६॥

---

[1] केशेन W_2.

[2] शातनयोः W_2, Pt_2.

[3] बाडते आप्लवते बाडबा, 'बाडृ आप्लाव्ये' D_2, K_6.

[4] आश्विनं K_6.

[5] यद्वर्त्म F_2, Pt_2.

(पा.) बालः किशोरः। बालोऽश्वः किशोरः स्यात्॥ वाम्यश्वा बडवा। [1]स्त्रीतुरगनामानि॥ अश्वेत्यत्राजादित्वाद् ङीष् न भवति। अन्यत्र ङीष्। घोटी हयी तुरगी अर्वती। 'अर्वणस्त्रसावनञः' (६. ४. १२७) इति तृ [2]इत्यन्तादेशः॥ बाडवं गणे। बडवानां समूहो बाडवं स्यात्[3]॥ त्रिष्वाश्वीनं—एकेन गम्यते। अश्वस्यैकदिनवर्त्म आश्वीनं स्यात्॥ ४६॥

---

[1] अश्वस्त्री° A_1.

[2] त्रादेशः A_1.

[3] B_3 adds अश्वासमूहनाम.

कश्यं तु मध्यमश्वानां ह्रेषा ह्लेषा च निस्वनः ॥ ४७ ॥
निगालस्तु गलोद्देशे वृन्दे त्वाश्वीयमाश्ववत् ।

(वि.) कश्यमिति—कशामर्हतीति कश्यम् । अश्वमध्यनाम ॥ ह्रेषणं[1] ह्रेषा ह्लेषा च । 'ह्रेषृ ह्लेषृ अव्यक्ते शब्दे'। अश्वनिस्वननाम ॥ निगलत्यनेन कवलमिति निगालः । 'गल अदने'। अश्वगलदेशनाम ॥ अश्वानां वृन्दम्[2] आश्वीयम्[3] । आश्वं च । अश्वसमूहनामनी ॥ ४७ ॥

[1] ह्रेषते D_2, K_2, W_2. [2] समूहः W_2. [3] अश्वीयम् W_2.

(पा.) कश्यं तु मध्यमश्वानाम् । अश्वमध्यमं[1] कश्यं स्यात् ॥ ह्रेषा ह्लेषा च निस्वने । अश्वनिस्वननामनी ॥ निगालस्तु गलोद्देशे[2] । अश्वगलप्रदेशो निगालः स्यात् ॥ वृन्दे [3]त्वश्वीयमाश्ववत् । अश्वसमूहनामनी ॥ ४७ ॥

[1] मध्यम् A_1. [2] गलोद्देश: B_3. [3] आश्वीयम् B_3.

आस्कन्दितं धोरितकं रेचितं वल्गितं प्लुतम् ॥ ४८ ॥
गतयोऽमूः पञ्च धारा घोणा तु प्रोथमस्त्रियाम् ।

(वि.) आस्कन्दितमिति—आस्कन्दति चतुरं गच्छतीति आस्कन्दितम्[1] । 'स्कन्दिर् गतिशोषणयोः'। धोरणम् अतिवेगेन धावनं धोरितकम्[2] । 'धोर्ऋ गतिचातुर्ये'। धुर्याणां वेगेन सह किंचिद्वर्वितसहितं गमनं रेचितमित्युच्यते । रेचनं रेचितम् । 'रिचिर् विरेचने[3]'। वल्गतीति वल्गितम् । 'वल्ग गतौ'। वलितमिति पाठे वलते वलितम् । 'वल संवरणे संचलने च'। प्लवत इति प्लुतम् । 'प्लुङ् गतौ'। अश्वानाम् अमूः पञ्च गतयो धारा भवन्ति । धार्यन्ते तुरगैरिति धाराः ॥ घोणते श्वासेन चलतीति घोणा । 'घुण भ्रमणे'। प्रोथतीति[4] प्रोथः । 'प्रोथृ पर्याप्तौ'। अश्वनासानामनी ॥ ४८ ॥

[1] आस्कन्दनं F_2, Pt_2. [2] चातुर्येणाधोरणं Pt_2. [3] पृथग्भावे Pt_2; रिच्यते विरिच्यते W_2. [4] W_2 adds वलतीति.

(पा.) आस्कन्दितं धौरितकं—पञ्च धाराः । कोपात् सर्वपदैरुत्प्लुत्योत्प्लुत्य गमनमास्कन्दितम् । कङ्कशिखिक्रोडनकुलगतैः सदृशं धौरितकम्[1] । पद्भिर्वल्गनं वल्गितम् ।

अवक्रद्रुता गतिस्तु रेचितम्। पक्षिमृगसाम्येन लङ्घनं प्लुतम् । [2]स्कन्दितादीनि पञ्च धाराशब्दवाच्यानि ।। घोणा तु—अस्त्रियाम्। अश्वानां नासिका [3]प्रोथं स्यात् ।। ४८ ।।

[1] घोरितकम् B_3. [2] आस्कन्दित° B_3. [3] प्रोथः A_1.

कविका तु खलीनोऽस्त्री शफं क्लीबे खुरः पुमान् ।। ४९ ।।
पुच्छोऽस्त्री लूमलाङ्गूले वालहस्तश्च वालधिः ।

(वि.) कविकेति—कवते भक्षणसमये शब्दायत[1] इति कविका। 'कुङ् शब्दे'। खलति चलतीति खलीनः। 'खल [2]चलने'। अश्वस्य मुखनियन्त्रिकानामनी ।। शायते [3]भुवा ताडनादिना शफम्। 'शो तनूकरणे'। खुरति भुवमिति खुरः। 'खुर विलेखने[4]'। पशुचरणाग्रनामनी ।। पूयन्ते [5]दंशादयोऽनेनेति पुच्छः। 'पूयी [6]विशरणे'। लूयन्ते रोमाण्यत्रेति लूम। नकारान्तः। 'लूञ् छेदने'। लङ्गति चलतीति लाङ्गूलम्। 'लगि [7]गतौ'। वालसमूहयोगात् वालहस्तः। वाला धीयन्तेऽस्मिन्निति वालधिः[8]। पशुपुच्छनामानि ।। ४९ ।।

[1] चलति K_2, K_6. [2] संचये च K_3, K_6. [3] भुवं K_3, K_6. [4] छेदने Pt_2. [5] उत्सारयति दंशादीन् F_2, Pt_2. [6] अपवारणे K_6. [7] चलने K_5, K_6. [8] D_2, Pt_2 add 'डुधाञ् धारणपोषणयोः'.

(पा.) कविका—खलीनोऽस्त्री। अश्वमुखनिक्षिप्तायोयन्त्रनामनी ।। अनुक्तम्—'पल्याणं स्यात् पल्ययनम्'। अश्वपल्याणनाम। 'पल्लमु'। 'वागा। वल्गावक्षेपणी कुशा'। वागानामानि। 'वागे'।। 'केशकारः केशरचकः'। अश्वक्षुरकनामनी ।। 'बोक्काणस्तु प्ररोहकः'। बोक्काणनामनी। 'बोक्केन'।। शफं—पुमान्। केषांचिन्मते शफशब्दोऽपि पुंलिङ्गः। 'खुरः शफः शको विष्ठा यासस्तु यवसः शरिः' इति वैजयन्ती (पृ. ७१, श्लो. ७४)। खुरनामानि।। पुच्छोऽस्त्री लूम। नान्तम्। लाङ्गूले—वालधिः। अश्वादिवालगुच्छनामानि ।। अनुक्तम्—'आवर्तो रोमजः पुंसि'। रोम्णामवस्थानविशेषनाम। 'नुडि'।। ४९ ।।

त्रिषूपावृत्तलुठितौ परावृत्ते मुहुर्भुवि ।। ५० ।।
याने चक्रिणि युद्धार्थे शताङ्गः स्यन्दनो रथः ।

(वि.) त्रिष्विति—उपावर्तते स्म भुवि जाड्यपरिहाराय उपावृत्तः। 'वृतु वर्तने'। लुठति भुवि परिवर्तते[1] स्म लुठितः। 'लुठ [2]प्रतिघाते'। भुवि मुहुः

परावृत्ताश्वनामानि ॥ अश्वप्रकरणं समाप्तम् ॥ शतम् अङ्गानि यस्य शताङ्गः। स्यन्दते यातीति[3] स्यन्दनः। 'स्यन्दू प्रस्रवणे'। रमन्तेऽत्र धन्विनः[4] रथः। 'रमु क्रीडायाम्'। रथनामानि ॥ ५० ॥

---

[1] परावर्तते K_5.
[2] परिवर्तने K_5.
[3] D_2 adds यात्यनेन यानम्, चक्रमस्यास्तीति तस्मिन् चक्रिणि.
[4] ध्वनिना K_6.

(पा.) त्रिषूपावृत्त—मुहुर्भुवि। मुहुर्भूतले परावृत्तेऽश्वे [1]उपावृत्तलुठितशव्दौ स्याताम्। तौ च त्रिलिङ्गौ ॥ याने चक्रिणि—स्यन्दनो रथः। [2]चक्रयानं रथः। युद्धार्थे तस्मिन् रथे [3]शताङ्गस्यन्दनशब्दौ स्याताम्। 'चङ्कुरो मूलविभुजः'। एते द्वे च ॥ ५० ॥

---

[1] अपावृत्त° A_1.
[2] चक्रियानम् A_1.
[3] शताङ्गादिशब्दौ B'_3.

असौ पुष्यरथश्चक्रयानं न समराय यत् ॥ ५१ ॥
कण्ठीरथः प्रवहणं डयनं च समं त्रयम्।

(वि.) असाविति—पुष्ये[1] उत्सवादौ विहितशुभकाले उपयोगी रथः [2]पुष्यरथः। यच्चक्रवद्यानं समराय न भवति यात्रादावेव तस्य रथस्य नाम ॥ कण्ठेषु[3] मनुष्यस्कन्धेषु उह्यमानो रथः कण्ठीरथः। कर्णीरथ इति वा पाठः। प्रवहति नरश्रेष्ठमिति[4] प्रवहणम्। 'वह प्रापणे'। डयते विहायसि गच्छत्यत्रस्थ इति डयनम्। 'डीङ् विहायसा गतौ'। विमानाख्ययाननामानि ॥ ५१ ॥

---

[1] पुष्ययात्रादौ W_2.
[2] पुण्परथः W_2.
[3] कर्णीषु W_2.
[4] D_2, K_5, K_6 add अनेन.

(पा.) असौ पुष्यरथः—समराय यत्। न समरायेति प्रतिषेधात् क्रीडार्थं [1]चक्रयानं पुष्यरथः स्यात् ॥ कर्णीरथः प्रवहणं—समं त्रयम्। [2]मनुष्यस्कन्धवाह्ययाननामानि ॥ 'कर्णीरथस्थां रघुवीरपत्नीम्' इति कालिदासः (रघु. १४. १३) ॥ ५१ ॥

---

[1] चक्रियानं A_1.
[2] बालकादिक्रीडाशकटनामानि A_1.

क्लीबेऽनः शकटोऽस्त्री स्याद् गन्त्री कम्बलिवाह्यकम् ॥५२॥
शिबिका याप्ययानं स्याद् डोला प्रेङ्खादिका स्त्रियाम्।

(वि.) क्लीब इति—अनिति [1]अक्षेण चीत्करोतीति अनः । 'अन प्राणने'। सान्तोऽयं नपुंसकलिङ्गः । शक्नोति भारं वोढुं शकटः । 'शक्लृ शक्तौ' । शकटनामनी ॥ गच्छतीति गन्त्री । 'गम्लृ सृप्लृ गतौ'। [2]कं सुखकरं बलं येषां ते कम्बलिनः बलीवर्दाः, तैर्वाह्यते कम्बलिवाह्यकम् । अल्पशकटनामनी ॥ शिवा[3] मङ्गलदायिका । शिवैव शिबिका । [4]याप्यो नेतव्यो राजादिः, तस्य यानं याप्ययानम् । आन्दोलिकानामनी ॥ डोल्यते इतस्तत उत्क्षिप्यते डोला । 'डुल उत्क्षेपे' । दोलेति वा पाठः । [5]प्रेङ्ख्यते इतस्ततः प्रेङ्खा[6] । 'इखि गतौ' । डोलानामनी ॥ ५२ ॥

[1] अक्षे W_2.
[2] कम्बलः सास्ना तद्योगात् कम्बलिनो वलीवर्दाः F_2, Pt_2.
[3] नृपाणां श्रेयस्करी D_2, K_2, K_6.
[4] याप्यैरधमैर्यायते F_2, Pt_2.
[5] प्रेङ्खते K_5, K_6.
[6] आदिना शयनखट्वा-वाह्यादिदोला इति भानुजीदीक्षितः (पृ. ३२५).

(पा.) क्लीबेऽनः । सान्तोऽयम् । शकटोऽस्त्री स्यात् । शकटनामनी ॥ 'लघ्वी वेसरयुक्तश्च'। [1]एते द्वे च । 'विलङ्घ्य[2] लघ्वीं करभौ बभञ्जतुः' । (शिशु. १२. २४)। [3]'प्रचोदितं वेसरयुक्तमध्वनि'। (शिशु. १२. १९) इति प्रयोगात् संज्ञाशब्दत्वादलघुश्चेदपि लघ्वी, अवेसरयुक्तं चेदपि वेसरयुक्तम् ॥ गन्त्री कम्बलिवाह्यकम् । कम्बलिभिर्वृषैः । करीषशकटनामनी । गन्त्रीशब्दः स्त्रीलिङ्गः । 'गन्त्री स्त्री कूबरं न स्त्री रथे कम्बलिवाह्यके' इति वैजयन्ती (पृ. ११४, श्लो. १२७) । शिबिका याप्ययानं स्यात् । आन्दोलिकानामनी ॥ डोला प्रेङ्खादिका स्त्रियाम् । डोलानामनी । डोला प्रेङ्खः पुमान् प्रेङ्खा निश्रेणिराधिरोहणी' इति रत्नकोशः ॥ ५२ ॥

[1] लघ्वीवेसरयुक्तशब्दावपि A_1.
[2] विभज्य A_1.
[3] 'प्रणोदितं वेसरयुग्यमध्वनि' इति मुद्रितग्रन्थे (पृ. २९४).

उभौ तु द्वैपवैयाघ्रौ द्वीपिचर्मावृते रथे ॥ ५३ ॥
पाण्डुकम्बलसंवीतः स्यन्दनः पाण्डुकम्बली ।

(वि.) उभाविति—द्वीपिचर्मणा[1] आवृतो रथः द्वैपः । व्याघ्रचर्मणा आवृतो वैयाघ्रः । शार्दूलचर्मावृतयाननामनी ॥ पाण्डुकम्बलसंवृतो रथः पाण्डुकम्बली[2] । श्वेतकम्बलावृतरथनाम ॥ ५३ ॥

[1] चर्मवृतः Pt_2.
[2] F_2, Pt_2 add नान्तः.

(पा.) उभौ तु द्वैपवैयाघ्रौ—आवृते रथे। द्वैपवैयाघ्रशब्दौ द्वीपिचर्मार्थकौ। 'द्वैपवैयाघ्रादञ्' इति (४. २. १२) ताभ्यामावृते रथेऽपि द्वैपवैयाघ्रशब्दौ स्याताम्॥ पाण्डुकम्बल—पाण्डुकम्बली। श्वेतकम्बलेन संवीतो रथः पाण्डुकम्बली स्यात्॥ ५३॥

रथे काम्बलवास्त्राद्याः कम्बलादिभिरावृते॥ ५४॥
त्रिषु द्वैपादयो रथ्या रथकट्या रथव्रजे।

(वि.) रथ इति—कम्बलेनावृतः[1] काम्बलः। वस्त्रेणावृतो[1] वास्त्रः। एवमादीनि कम्बलाद्यावृतरथनामानि॥ पूर्वोक्ता द्वैपादयः पञ्च शब्दाः त्रिषु लिङ्गेषु वर्तन्ते॥ रथानां समूहो रथ्या। रथकट्या च। रथव्रजनामनी॥ ५४॥

[1] F$_2$, Pt$_2$ add रथः.

(पा.) रथे काम्बलवास्त्राद्याः—आवृते। कम्बलवस्त्रादिभिरावृते रथे काम्बलवास्त्राद्याः शब्दाः स्युः॥ त्रिषु द्वैपादयः। [1]द्वैपादिशब्दास्त्रिलिङ्गाः द्वैपी रथ्या वैयाघ्री रथ्या। 'परिवृतो रथः' (४. २. १०) इति नियमात् द्वैपी पेटीति न भवति॥ रथ्या रथकट्या रथव्रजे। रथसमूहनामनी॥ ५४॥

[1] B$_3$ adds पञ्च.

धूः स्त्री क्लीबे यानमुखं स्याद् रथाङ्गमपस्करः॥ ५५॥
चक्रं रथाङ्गं तस्यान्ते नेमिः स्त्री स्यात् प्रधिः पुमान्।

(वि.) धूरिति—धूर्वति हिनस्तीति धूः। 'धुर्वी हिंसायाम्'। यानमुखनाम॥ अपकीर्यते तत्तदुचितस्थाने निक्षिप्यते अपस्करः[1]। अवस्कर इति वा पाठः। रथावयवनाम॥ करोति रथगमनमिति चक्रम्। 'डुकृञ् करणे'। रथस्याङ्गं रथाङ्गम्। रथचक्रनाम॥ गमनसमये [2]नमतीति नेमिः[3]। 'णमु प्रह्वत्वे शब्दे च'। चक्रस्य प्रान्ते प्रधीयते क्षिप्यते प्रधिः[4]। चक्रान्ते सर्वतोनिहितलोहवलयनामनी॥ ५५॥

[1] D$_2$, Pt$_2$ add 'कॄ विक्षेपे'. [2] D$_2$, Pt$_2$ add शब्दायते. [3] नयतीति वा, 'नियो मिः' (उ. ४. ४४) K$_2$. [4] 'डुधाञ् धारणपोषणयोः' Pt$_2$.

(पा.) धूः स्त्री क्लीबे यानमुखम्। 'धूः स्त्री धुर्वी यानमुखम्' इति वैजयन्त्यनुसारिपाठः (पृ. ११४, श्लो. १३०)। रथनासिकानामानि॥ स्याद्रथाङ्गमपस्करः।

धूःप्रभृति रथावयवः सर्वोऽपि अपस्करः स्यात् ॥ चक्रं रथाङ्गम् । रथचरणनामनी । '[1]बण्डिकल्लु' । अत्र रथाङ्गमिति संज्ञा । 'अरि चक्रं रथपदं रथाङ्गं केशवायुधम्' इति वैजयन्ती (पृ. ११५, श्लो. १३४) ॥ तस्यान्ते नेमिः—प्रधिः पुमान् । [2]चक्रान्तनामनी । 'बण्डिकम्मि' ॥ ५५ ॥

---

[1] B_3 omits. [2] चक्रस्यान्तस्य° B_3.

पिण्डिका नाभिरक्षाग्रकीलके तु द्वयोरणिः ॥ ५६ ॥
रथगुप्तिर्वरूथो ना कूबरस्तु युगंधरः ।

(वि.) पिण्डिकेति—पिण्ड्यन्ते [1]नैरन्तर्येण निखन्यन्ते अरा अस्यामिति पिण्डिका । 'पिडि संघाते' । नभ्यते हिंस्यतेऽक्षेणेति नाभिः । 'णभ हिंसायाम्' । चक्रनाभिनाम ॥ अणति शब्दायत इत्यणिः । 'अण शब्दे' । अक्षस्य नाभिक्षेप्यस्य काष्ठस्यान्ते [2]रन्ध्रक्षिप्तकीलकनाम ॥ रथोऽनेन गुप्यते रथगुप्तिः । 'गुपू रक्षणे' । व्रियते रथोऽनेनेति वरूथः । 'वृञ् वरणे' । [3]रथस्य द्वीपिचर्मादिगुप्तेर्नामनी ॥ [4]कुवते शब्दायते कूबरः । 'कूङ् शब्दे' । युगं धारयतीति युगंधरः[5] । युगमध्यप्रदेशधारकस्य रथावयवस्य नामनी ॥ ५६ ॥

---

[1] सर्वाण्यग्राण्यस्यामिति F_2, Pt_2. [2] निक्षिप्त° W_2. [3] K_2, W_2 add द्वीपिचर्मावृतरथस्य. [4] कवते, 'कुङ् शब्दे' K_3, K_6. [5] K_3, Pt_2 add 'धृञ् धारणे'.

(पा.) पिण्डिका नाभिः । चक्रमध्यरन्ध्रनामनी ॥ अक्षाग्रकीलके—अणिः । अक्षो नाम कर्षचक्रं, [1]तस्याग्रस्थः कीलोऽणिः स्यात्[2] । आणिश्च[3] स्यात् । 'सीमाश्रयक्षाग्रकीलेषु स्यादाणिरणिवद् द्वयोः' इति रुद्रः ॥ रथगुप्तिर्वरूथो ना । चक्ररन्ध्रकीलितायःकुम्भनामनी । 'नेम्मुलु' ॥ 'रथो वरूथस्य हयस्य वाजी गजः [4]करेणोः पथिकः पदातेः' इत्यत्र वरूथशब्दोऽर्शआद्यजन्तः (५. २. १२७) ॥ कूबरस्तु युगंधरः । चक्ररन्ध्रप्रविष्टदीर्घदारुनामनी । 'इरुनु[5]' ॥ ५६ ॥

---

[1] अग्रस्थकीलके B_3. [2] A_1 adds 'अच्चुकोनच्चिल'. [3] आणिरिति दीर्घादिश्च B_3. [4] करिणः A_1. [5] 'यिरनु' A_1.

अनुकर्षो दार्वधःस्थं प्रासङ्गो ना युगान्तरम् ॥ ५७ ॥
सर्वं स्याद् वाहनं यानं युग्यं पत्रं च धोरणम् ।

(वि.) अनुकर्ष इति—अक्षम् [1]अनुकृष्यत इति अनुकर्षः। 'कृष विलेखने'। अक्षाधःक्षिप्तदारुनाम ॥ प्रासज्यते बलीवर्दकण्ठेष्विति प्रासङ्गः। 'षञ्ज सङ्गे'। द्वितीययुगनाम ॥ यान्त्यनेनेति यानम्। 'या प्रापणे'। युगं [2]वहतीति युग्यम्। पतन्त्यनेनेति पत्रम्। 'पत्ऌ गतौ'। धोरति चातुर्येण गच्छत्यनेनेति धोरणम्। 'धोर्ऋ गतिचातुर्ये'। सर्ववाहनमात्रनामानि ॥ [सर्वं हस्त्यश्वरथादि दोलान्तं वाहनमिति क्षीरस्वामी (पृ. १८७)] ॥ ५७ ॥

[1] K_5, K_6 add पश्चात्. [2] अर्हतीति W_2.

(पा.) अनुकर्षो दार्वधःस्थम्। [1]अधस्तनं धारणादारु अनुकर्षः स्यात्[2] ॥ प्रासङ्गो ना युगाद्युगः। युगो नाम यानाद्यङ्गम्। युगात् परस्थितयुगः प्रासङ्गः स्यात् ॥ अनुक्तम्—'शिविका याप्ययानं स्यात्'। याप्ययानं शिविका स्यात्। '[3]पल्लकी'। 'दोलाप्यान्दोलिका स्त्रियाम्'। डोला प्रेङ्खोलिका स्त्रियामिति पाठान्तरम्। आन्दोलनामनी। 'अंदलमु'। 'आन्दोलनं स्यादान्दोलो दोला स्याद्दोलिकापि च' इति वैजयन्ती (पृ. ११५, श्लो. १३७)। [4]दोलानामापि स्यात्। 'दोला हेलार्थरूपणम्[5]' इति वैजयन्ती (पृ. ११५, श्लो. १३६) ॥ सर्वं स्यात्—धोरणम्। उक्ता एते हस्त्यादयः सर्वेऽपि वाहनादिशब्दवाच्याः स्युः ॥ ५७ ॥

[1] अधःस्थ° B_3. [2] B_3 adds 'कोटिवींड'. [3] 'पल्लकि' A_1.
[4] डोलापि B_3. [5] रोहणम् A_1.

परंपरावाहनं यत् तद् वैनीतकमस्त्रियाम् ॥ ५८ ॥
आधोरणा हस्तिपका हस्त्यारोहा निषादिनः।

(वि.) परंपरेति—वोढृभिः परंपरया वाह्यत इति परंपरावाहनम्। विनीतानामश्वानामिदं वैनीतकम्। परंपरावाहननाम ॥ आधोर्यन्ते हस्तिनः एभिरिति आधोरणाः। 'धोर्ऋ गतिचातुर्ये'। [1]हस्तिनं पान्तीति हस्तिपकाः। 'पा रक्षणे'। [2]हस्तिन आरोहन्तीति हस्त्यारोहाः। हस्तिस्कन्धे निषीदन्तीति निषादिनः। 'षद्ऌ विशरणगत्यवसादनेषु'। गजशिक्षकनामानि ॥ ५८ ॥

[1] हस्तिनः F_2, Pt_2. [2] हस्तिषु K_5, K_6.

(पा.) परंपरावाहनं—वैनीतकमस्त्रियाम्। रथशिबिकादिपरंपरावाहनं वैनीतकं स्यात्। दीर्घद्वितीयः। आधोरणा—निषादिनः। गजसादिनामानि ॥ महामात्रा-

स्तत्प्रधानाः स्युः । 'तत्प्रधाना महामात्रा आरोहा गजजीवनाः' इति वैजयन्ती (पृ. १११, श्लो. ८८) ॥ ५८ ॥

नियन्ता प्राजिता यन्ता सूतः क्षत्ता च सारथिः ॥ ५९ ॥
सव्येष्ठदक्षिणस्थौ च संज्ञा रथकुटुम्बिनः ।

(वि.) नियन्तेति—अश्वादीन् नियच्छतीति नियन्ता । यन्ता च । 'यम उपरमे' । [1]प्राजति प्रेरयत्यश्वानिति प्राजिता । 'अज गतिक्षेपणयोः' । सुवत्यश्वानिति सूतः । 'षू प्रेरणे' । [2]क्षदति ताडयत्यश्वानिति क्षत्ता । 'क्षद गतिहिंसनयोः' । सारयति प्रेरयति अश्वानिति सारथिः । 'सृ गतौ' । कदाचित् सव्यभागगतानश्वान् प्रेरयितुं सव्यभागे तिष्ठतीति सव्येष्ठः । दक्षिणभागगतानश्वान् प्रेरयितुं कदाचित् दक्षिणभागे तिष्ठतीति दक्षिणस्थः[3] । 'ष्ठा गतिनिवृत्तौ' । रथकुटुम्बिनो नामानि ॥ ५९ ॥

[1] प्राजयति K_5, K_6, Pt_2. [2] क्षतति K_5. [3] W_2 adds दक्षिणस्थाश्वरथवाहकनाम; रथं कुटुम्बयितुं शीलमस्य । 'कुटुम्ब धारणे' । यद्वा रथ एव कुटुम्बम् । रथकुटुम्बमस्यास्ति । इनिः । इति भानुजीदीक्षितः (पृ. ३२८).

(पा.) नियन्ता प्राजिता यन्ता । एते ऋदन्ताः । सूतः क्षत्ता—रथकुटुम्बिनः । नियन्त्रादयोऽष्ट शब्दाः [1]रथकुटुम्बिसंज्ञाः स्युः । रथसारथिनामानि ॥ ५९ ॥

[1] °कुटुम्बिनः B_3.

रथिनः स्यन्दनारोहा अश्वारोहास्तु सादिनः ॥ ६० ॥
भटा योधाश्च योद्धारः सेनारक्षास्तु सैनिकाः ।

(वि.) रथिन इति—रथा एषां सन्तीति रथिनः । [1]स्यन्दनमारोहन्तीति स्यन्दनारोहाः । 'रुह बीजजन्मनि प्रादुर्भावे च' । ये रथमारुह्य युध्यन्ते तेषां नामनी । रथाधिष्ठितनामनी वा ॥ [2]सीदन्त्यवश्यं परबलं नाशयन्तीति सादिनः । 'षद्लृ विशरणादौ' । अश्वारोहनाम ॥ भटन्ति [3]परस्परं तिष्ठ तिष्ठेति भाषन्ते भटाः । 'भट परिभाषणे' । युध्यन्त इति योधाः । योद्धारश्च । 'युध संप्रहारे' । योद्धृपुरुषनामनी ॥ सेनां रक्षन्तीति सेनारक्षाः, सैनिकाश्च[4] । सेनारक्षकनामनी ॥ ६० ॥

[1] स्यन्दनान् F_2, Pt_2. [2] सादयन्ति W_2. [3] युद्धं काङ्क्षन्तीति Pt_2.
[4] D_2, K_2, Pt_2 add 'रक्ष पालने'.

(पा.) रथिनः स्यन्दनारोहाः । रथिकनामनी ॥ अश्वारोहास्तु सादिनः । अश्वारोहनामनी[1] ॥ ‘तुरंगिणोऽश्ववाहाश्च’ । एते द्वे च ॥ भटा योधाश्च योद्धारः । योधनामानि ॥ सेनारक्षास्तु सैनिकाः । [2]सेनारक्षकनामनी ॥ ६० ॥

[1] राहुत्तनामानि A_1, B_3. [2] °रक्षकनायकनामनी A_1.

सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते ॥ ६१ ॥
बलिनो ये सहस्रेण साहस्रास्ते सहस्रिणः ।

(वि.) सेनायामिति—सेनायां समवेता मिलिताः सैन्याः । सैनिकाश्च । सेनायां समूहत्वेन मिथो मिलितानां नामानि ॥ सहस्रेण सहस्रसंख्यावच्छिन्नेन बलेन बलिनः [1]साहस्राः । सहस्रिणश्च । ये सहस्रेण बलिनः तेषां नामनी ॥ ६१ ॥

[1] सहस्रं बलमस्तीति F_2, Pt_2.

(पा.) सेनायां समवेता—सैनिकाश्च ते । [1]कूटनायकनामनी ॥ बलिनो ये—सहस्रिणः । [2]सहस्राश्वानामुपरिस्थितसहस्रसंख्याकानां सादिनां नामनी ॥ ६१ ॥

[1] सेनायां मिलित्वा स्थितानां नामनी B_3. [2] सहस्रबलाधिकारिनामनी B_3

परिधिस्थः परिचरः सेनानीर्वाहिनीपतिः ॥ ६२ ॥
कञ्चुको वारवाणोऽस्त्री यत्तु मध्ये सकञ्चुकाः ।
बध्नन्ति तत्सारसनमधिकाङ्गोऽथ शीर्षकम् ॥ ६३ ॥
शीर्षण्यं च शिरस्त्रेऽथ तनुत्रं वर्म दंशनम् ।
उरश्छदः कङ्कटको जगरः कवचोऽस्त्रियाम् ॥ ६४ ॥

(वि.) परिधिस्थ इति—परिधौ सेनाप्रत्यन्ते[1] तिष्ठतीति परिधिस्थः । ‘ष्ठा गतिनिवृत्तौ’ । परितश्चरतीति परिचरः । ‘चर गतिभक्षणयोः’ । सेनाप्रत्यन्तरक्षिणो नामनी ॥ सेनां [2]नयतीति सेनानीः । ‘णीञ् प्रापणे’ । वाहिन्याः सेनायाः पतिः वाहिनीपतिः । [3]सेनापतिनामनी ॥ कच्यते बध्यते कञ्चुकः । ‘कचि दीप्तिबन्धनयोः’ । बाणान् वारयतीति वारवाणः । वबयोरैक्यात्[4] । ‘वृञ् आवरणे’ । देहरक्षणार्थं कृतस्य कूर्पासविशेषकस्य नामनी ॥ सारं [5]स्थिरत्वं कञ्चुकस्य सनोति ददातीति सारसनम् ।

'षणु दाने'। अङ्गादधिकम् अधिकाङ्गः। कञ्चुकोपरिबन्धनाय पट्टसूत्रादिकृतरज्जुनामनी ॥ [6]शीर्षमिव निर्मितं शीर्षकम्। [7]शिरसे हितं शीर्षण्यम्। शिरो घातात् त्रायत इति शिरस्त्रम्। 'त्रैङ् पालने'। [8]शिरस्त्रनामानि ॥ [9]तनुं त्रायते तनुत्रम्। वृणोति शरीरं वर्म। 'वृञ् वरणे'। [10]दंश्यतेऽनेनेति दंशनम्। 'दंश दंशने'। उरः छाद्यतेऽनेनेति उरश्छदः। 'छद अपवारणे'। कं वक्षः [11]कटतीति कङ्कटकः। 'कटे वर्षावरणयोः'। जागर्तीति [12]जगरः। 'जागृ निद्राक्षये'। कान्[13] बाणान् वञ्चयते[14] कवचः। 'वञ्चु प्रलम्भने'। उरस्त्राणनामानि ॥ ६२–४ ॥

---

[1] K_5, K_6 add देशे. [2] K_2, K_6 add नियुक्तः. [3] वाहिनी° K_6. [4] अभेदः K_3, K_5. [5] बलं F_2, Pt_2 [6] शीर्षं रक्षति F_2, Pt_2. [7] शिरसि वर्तमानं K_6. [8] शिरोरक्षक° K_3. [9] देहं W_2; वक्षःस्थलं K_6. [10] दश्यते बध्यते K_5, K_6. [11] K_5, K_6 add वृणोति. [12] अजगर इति वा पाठः D_2, K_6. [13] कं वातं Pt_2. [14] वञ्चयति K_5, K_6.

(पा.) परिधिस्थाः परिचराः। काटवद्वलयाकारेण स्थितानां भटानां नामनी ॥ सेनानीर्वाहिनीपतिः। सेनाधिपतिनामनी ॥ कञ्चुको वारवाणोऽस्त्री। [1]कार्पासकूर्पासकनामनी। 'झग' ॥ यत्तु मध्ये—अधिकाङ्गः। आमुक्तकञ्चुकैर्मध्यनिबद्धपट्टनामनी[2] ॥ अथ शीर्षकं—शिरस्त्रे। शिरस्त्राणनामनी ॥ अथ तनुत्रं वर्म दंशनं—कवचोऽस्त्रियाम्। 'अदंशयन्नरहितशौर्यदंशनाः' इति माघः (शिशु. १७. २१)। कवचनामानि। 'जूडु'। 'सूत्रकं स्यात् सूत्रमयं जालिका स्यादयोमयी' इति सूत्रकजालिके कवचविशेषे[3] ॥ ६२–४ ॥

---

[1] कञ्चुकनामनी B_3. [2] दशरथि° A_1. [3] °विशेषौ B_3.

आमुक्तः प्रतिमुक्तश्च पिनद्धश्चापिनद्धवत्।
संनद्धो वर्मितः सज्जो दंशितो व्यूढकङ्कटः ॥ ६५ ॥

(वि.) आमुक्त इति—आमुच्यते बध्यते आमुक्तः। प्रतिमुच्यते स्म प्रतिमुक्तः। 'मुच्लृ मोक्षणे'। अपिनह्यत इति पिनद्धः। अपिनद्धश्च। 'णह बन्धने'। 'युद्धार्थं वर्मादिनोपक्लृप्तशरीरस्य नामानि ॥ संनह्यते संनद्धः। वर्म संजातमस्य वर्मितः। सज्जति [1]सज्जः। 'षस्ज गतौ'। [2]दंशोऽस्य संजातो दंशितः। व्यूढः कङ्कटोऽनेन व्यूढकङ्कटः। उरस्त्राणयुक्तस्य नामानि ॥ ६५ ॥

---

[1] उरश्छदेन संगच्छते K_5, K_6. [2] Pt_2 adds दंशनं दंशः.

(पा.) आमुक्तः प्रतिमुक्तश्च—नद्धवत्। आमुक्तकवचनामानि। 'तोडगवड्ड-[1]जूड्डु'॥ संनद्धो वर्मितः—व्यूढकङ्कटः। व्यूढः कङ्कटो येन, तस्य नामानि। 'जूड-तोड्डुगुकुन्नपुरुषुनिपेल्लु'॥ ६५॥

[1] 'तोडिगिन जोड्डु' B_3.

त्रिष्वामुक्तादयो वर्मभृतां कावचिकं गणे।
पदातिपत्तिपदगपादातिकपदाजयः॥ ६६॥
पद्गश्च पदिकश्चाथ पादातं पत्तिसंहतिः।

(वि.) त्रिष्विति—आमुक्तादयो व्यूढकङ्कटान्ताः त्रिषु लिङ्गेषु वर्तन्ते॥ कवचिनां समूहः कावचिकम्। वर्मभृतां समूहनाम॥ [1]पादाभ्यामतति गच्छतीति पदातिः। 'अत सातत्यगमने'। [2]पतत्यरीन् प्रति पत्तिः। 'पत्लृ गतौ'। पदाभ्यां गच्छतीति पदगः। 'गम्लृ गतौ'। पादाभ्यामततीति पादातिकः[3]। पदाभ्यामजतीति पदाजिः। 'अज गतिक्षेपणयोः'। पद्भ्यां गच्छतीति पद्गः। पादाभ्यां चरतीति पदिकः। पदातिनामानि॥ पदातीनां समूहः पादातम्। पत्तीनां संहतिः पत्तिसंहतिः। पत्तिसमूहनाम॥ ६६॥

[1] पदाभ्यां W_2. [2] K_3 adds गच्छति; पद्यते D_2. [3] पदाभ्याम् अतिगच्छतीति पदातिगः K_5.

(पा.) त्रिष्वामुक्तादयः। [1]आमुक्तादयस्त्रिलिङ्गाः[2]। आमुक्तः कवचः। आमुक्तं कवचम्। संनद्धमनीकमित्यादि॥ वर्मभृतां कावचिकं गणे। कवचधारिणां[3] समूहः कावचिकं स्यात्॥ पदातिपत्ति—पद्गश्च पदिकश्च। [4]पादचारियोधनामानि। 'कालु-बलमु[5]'॥ अथ पादातं पत्तिसंहतिः। पद्भिरततां समूहः पादातं स्यात्।

'पादातिकः पदातिः पादातपदाजिपद्गपदिकाः स्युः।

इति रत्नकोशः॥ ६६॥

[1] A_1 adds पूर्वोक्ताः. [2] B_3 adds शब्दाः. [3] कवचवतां B_3. [4] A_1 adds पदाजिः पुंलिङ्गः. [5] B_3 omits.

शस्त्राजीवे काण्डपृष्ठायुधीयायुधिकाः समाः॥ ६७॥
कृतहस्तः सुप्रयोगविशिखः कृतपुङ्खवत्।

(वि.) शस्त्राजीव इति—शस्त्रेणाजीवतीति शस्त्राजीवः[1]। काण्डाः बाणाः पृष्ठे यस्य काण्डपृष्ठः। आयुधेन जीवतीति आयुधीयः। आयुधिकश्च। शस्त्राजीवकनामानि॥ कृतौ शिक्षितौ हस्तौ यस्य कृतहस्तः। सुष्ठु प्रयुज्यन्ते सुप्रयोगाः। तथाविधाः विशिखाः यस्य सुप्रयोगविशिखः। कृतः शिक्षितः[2] पुङ्खः शराभ्यासो येन कृतपुङ्खः। लब्धलक्ष्यनामानि॥ ६७॥

[1] D_2, K_2 add 'जीव प्राणधारणे'. [2] गृहीतः Pt_2; K_5 adds सु°; साधु W_2.

(पा.) शस्त्राजीवे काण्डपृष्ठ—समाः। शस्त्राण्युपजीव्य [1]जीवतो नामानि॥ कृतहस्तः—कृतपुङ्खवत्। [2]लक्ष्यभेदे [3]करप्रयोगिणो नामानि॥ ६७॥

[1] °जीवतां B_3. [2] लक्ष° A_1. [3] लक्ष्यवेधिनः B_3.

अपराद्धपृषत्कोऽसौ लक्ष्याद् यश्च्युतसायकः॥ ६८॥
धन्वी धनुष्मान् धानुष्को निषङ्ग्यस्त्री धनुर्धरः।

(वि.) अपराद्धेति—अपराद्धाः [1]अलब्धलक्ष्याः पृषत्का बाणा यस्य अपराद्धपृषत्कः। [2]लक्ष्यादन्यत्र च्युतसायकस्य नाम॥ धन्वा अस्यास्तीति धन्वी। धनुरस्यास्तीति धनुष्मान्। धनुः प्रहरणमस्य धानुष्कः। निषङ्गस्तूणोऽस्यास्तीति निषङ्गी। अस्त्राण्यस्य सन्तीति अस्त्री। धनुर्धारयतीति धनुर्धरः[3]। धनुर्धरनामानि॥ ६८॥

[1] अपलब्ध° K_5, K_6. [2] लक्ष्यच्युतबाणस्य° K_3. [3] D_2, W_2 add 'धृञ् धारणे'.

(पा.) अपराद्धपृषत्कोऽसौ—सायकः। तद्विपरीतस्य[1] नाम। धन्वी धनुष्मान्—धनुर्धरः। अर्शआदिपाठादुरसोऽपि स्यात्। धृतधनुषां नामानि॥ ६८॥

[1] लक्ष्याप्राप्तसायकस्य B_3.

स्यात् काण्डवांस्तु काण्डीरः शाक्तीकः शक्तिहेतिकः॥६९॥
याष्टीकपारश्वधिकौ यष्टिपर्श्वधहेतिकौ।

(वि.) स्यादिति—काण्डा बाणा अस्य सन्तीति काण्डवान्। काण्डीरश्च। बाणवतो नामनी॥ शक्तिः प्रहरणमस्य [1]शाक्तीकः। शक्तिः हेतिः आयुधं यस्य शक्तिहेतिकः। शक्त्याख्यायुधधरस्य[2] नामनी॥ यष्टिः प्रहरणमस्य याष्टीकः। लगुडायुध-

धरस्य नाम ॥ परश्वधः परशुः प्रहरणमस्य पारश्वधिकः । [3]परश्वधाख्यायुधधरस्य नाम ॥ ६९ ॥

[1] शाक्तिकः D_2, K_5, K_6. [2] °वतः W_2. [3] परश्वाख्य° K_3, K_6.

(पा.) स्यात् काण्डवांस्तु काण्डीरः। दण्डधारिनामनी। [1]अधिकशरधारिनामनी इति केचित् ॥ शाक्तीकः। दीर्घमध्यः। शक्तिहेतिकः। केवलशक्त्यायुधः पुरुषः [2]शाक्तीकः स्यात् । 'शक्तियष्ट्योरीकक्' (४. ४. ५९) इतीकक्प्रत्ययः ॥ याष्टीकपारश्वधिकौ—हेतिकौ । यष्टिधारी याष्टीकः स्यात्। इष्टियोगादैष्टिकः स्यात्। परशुहेतिकः पारश्वधिकः स्यात्। पारश्वधोऽपि भवति। 'परश्वधाद्वाण्' इति शाकटायनमतादण्[3] (शा. व्या. ३. २. ५८) ॥ ६९ ॥

[1] B_3 omits. [2] शाक्तिकः B_3. [3] अणि A_1.

नैस्त्रिंशिकोऽसिहेतिः स्यात् समौ प्रासिककौन्तिकौ ॥७०॥
चर्मी फलकपाणिः स्यात् पताकी वैजयन्तिकः ।

(वि.) नैस्त्रिंशिक इति—निस्त्रिंशः प्रहरणमस्य नैस्त्रिंशिकः। असिः हेतिर्यस्य असिहेतिः । खड्गायुधधरस्य नामनी ॥ प्रासः प्रहरणमस्य प्रासिकः। कुन्तः प्रहरणमस्य कौन्तिकः । [1]कुन्ताख्यायुधधरस्य नामनी ॥ चर्म फलकमस्यास्तीति चर्मी। [2]फलकं पाणौ यस्य फलकपाणिः । फलकपाणिनाम ॥ पताकास्यास्तीति पताकी। वैजयन्त्या ध्वजेन चरतीति वैजयन्तिकः। पताकां धृत्वा सेनामध्ये चरतो नामनी ॥ ७० ॥

[1] प्रास° W_2. [2] Pt_2 adds फलति विशीर्यते घातैरिति फलकम्, 'ञिफला विशरणे'.

(पा.) नैस्त्रिंशिकोऽसिहेतिः[1] स्यात्। [2]केवलखड्गायुधो नैस्त्रिंशिकः स्यात्। आसिकदैष्टिकादिशब्दा एवंविधाः ॥ समौ प्रासिककौन्तिकौ । [3]कुन्तधारिनामनी । 'यींटेवांड्डु[4]' ॥ चर्मी फलकपाणिः स्यात्। चर्मधरनामनी। 'हरिगेवांड्डु[4]' ॥ पताकी वैजयन्तिकः। [5]ध्वजधरनामनी। 'टेक्कं [4]बट्टवांड्डु'। अनुक्तम्—छायाकरश्छत्रधरः। धृतातपत्रनामनी ॥ ७० ॥

[1] असिर्हेतिः B_3. [2] खड्गायुधनाम B_3. [3] कुन्तभृन्नाम B_3. [4] B_3 omits.
[5] ध्वजधारि° A_1.

अनुप्लवः सहायश्चानुचरोऽभिचरः समाः ॥ ७१ ॥
पुरोगाग्रेसरप्रष्ठाग्रतःसरपुरःसराः ।
पुरोगमः पुरोगामी मन्दगामी तु मन्थरः ॥ ७२ ॥

(वि.) अनुप्लव इति—[1]अनु पश्चात् प्लवते गच्छतीति अनुप्लवः । 'प्लुङ् गतौ' । मुख्येन सह अयते गच्छतीति सहायः । 'अय गतौ' । अनु पश्चात् मुख्यस्य चरतीति अनुचरः । 'चर गतिभक्षणयोः' । मुख्यम् अभितश्चरतीति अभिचरः । अभिसर इति वा पाठः । मुख्यस्य पश्चाद्गामिनो नामानि ॥ पुरो गच्छतीति पुरोगः । 'गम्लृ गतौ' । अग्रे सरतीति अग्रेसरः । 'सृ गतौ' । प्रतिष्ठते [2]पुरो गच्छतीति प्रष्ठः । 'ष्ठा गतिनिवृत्तौ' । अग्रतः सरति गच्छतीति अग्रतःसरः । पुरः सरतीति पुरःसरः । 'सृ गतौ' । पुरो गच्छतीति पुरोगमः[3] । पुरोगामी च । नान्तः । यो मुख्यस्य पुरो[2] गच्छति तस्य नामानि ॥ मन्दं गच्छतीति मन्दगामी । 'गम्लृ गतौ' । मन्थति[4] गच्छन् संक्लिश्यते मन्थरः । 'मथि हिंसासंक्लेशनयोः' । मन्दगामिनामनी ॥ ७१-२ ॥

[1] K_5, K_6 add मुख्यस्य. [2] अग्रे W_2. [3] K_6 adds पुरोगश्च. [4] मश्नाति चरणाविति F_2, Pt_2.

(पा.) अनुप्लवः सहायश्च—[1]अभिचरः समाः । अनुसृत्य गच्छतां नामानि ॥ पुरोगाग्रेसर—पुरोगामी । पुरोभागे गच्छतां नामानि[2] ॥ मन्दगामी—मन्थरः । शनैर्गच्छतां नामनी ॥ ७१–२ ॥

[1] अभिसरः B_3. [2] अग्रेसर इत्यत्र अग्रे इति निपात्यते A_1.

जङ्घालोऽतिजवस्तुल्यौ जङ्घाकरिकजाङ्घिकौ ।
तरस्वी त्वरितो वेगी प्रजवी जवनो जवः ॥ ७३ ॥

(वि.) जङ्घाल इति—दीर्घे जङ्घे अस्य स्त इति जङ्घालः । अतिशयितो जवो वेगो यस्य अतिजवः । अतिवेगेन गच्छतो नामनी ॥ जङ्घे एव [1]कर्मकरौ यस्य जङ्घाकरिकः । जङ्घाभ्यां जीवतीति जाङ्घिकः । दूरं गत्वा तत आगत्य तत्रस्थवार्तां निवेदयितुर्नामनी ॥ तरः वेगोऽस्यास्तीति तरस्वी[2] । त्वरते स्म त्वरितः[3] । 'ञित्वरा संभ्रमे' । वेगोऽस्यास्तीति वेगी । प्रजवति प्रजवी[4] । जवनः । जवश्च । 'जुङ् गतौ' । वेगवतो नामानि ॥ ७३ ॥

[1] जीवनकर्यौ F_2, Pt_2. [2] D_2, Pt_2 add नान्तः. [3] त्वरास्य संजाता वा D_2, K_2. [4] प्रकृष्टो जवो यस्य F_2, Pt_2.

(पा.) जङ्घालोऽतिजवस्तुल्यौ। [1]अतिशीघ्रगामिनामनी॥ जङ्घाकरिकजाङ्घिकौ। धावतो[2] नामनी। 'पारटिवांडु'॥ तरस्वी त्वरितो—जवनो जवः। शीघ्रगामिनामानि॥ ७३॥

---

[1] अतिवेग° B_3.　[2] जङ्घाभ्यां जीवतः A_1.

जय्यो यः शक्यते जेतुं जेयो जेतव्यमात्रके।
जैत्रस्तु जेता यो गच्छत्यलं विद्विषतः प्रति॥ ७४॥
सोऽभ्यमित्र्योऽभ्यमित्रीयोऽप्यभ्यमित्रीण इत्यपि।

(वि.) जय्य इति—जेतुं शक्यते जय्यः। 'जि[1] जये'। सामाद्युपायैर्जेतुं शक्यस्य शत्रोर्नाम॥ जेतुं योग्यो जेयः। जेतव्यमात्रनाम॥ जेतृसंबन्धी भवति जैत्रः[2]। जयतीति जेता। जेतृनामनी॥ आभिमुख्येन [3]अमित्रं सुष्ठु[4] गच्छतीति अभ्यमित्र्यः। अभ्यमित्रीयः। अभ्यमित्रीणश्च॥ यः शत्रून् प्रति अलं गच्छति तस्य नामानि॥ ७४॥

---

[1] 'जि अभिभवे' D_2, W_3.　[2] जयतीति F_2, Pt_2.　[3] शत्रुं Pt_2.　[4] अलं F_2, Pt_2.

(पा.) जय्यो यः—जेतुम्। यो जेतुं शक्यः स[1] जय्यः स्यात्॥ जेयो जेतव्यमात्रके। जेतुं यो योग्यः स जेयः स्यात्॥ जैत्रस्तु जेता। [2]जेतुर्नामनी॥ यो गच्छत्यलं—अभ्यमित्रीण इत्यपि। यः शत्रून् प्रति चाञ्चल्यरहितः सन् गच्छति तस्य नामानि॥ ७४॥

---

[1] तस्य शत्रोर्नाम B_3.　[2] जयशीलस्य A_1.

ऊर्जस्वलः स्यादूर्जस्वी य ऊर्जातिशयान्वितः॥ ७५॥
स्यादुरस्वानुरसिलो रथिनो रथिको रथी।

(वि.) ऊर्जस्वल इति—ऊर्जो बलमस्यास्तीति[1] ऊर्जस्वलः। ऊर्जस्वी च। अतिबलवतो नामनी॥ [2]प्रशस्तमुरोऽस्यास्तीति उरस्वान्। उरसिलश्च। उरोबलान्वितस्य नामनी॥ रथोऽस्यास्तीति रथिकः। रथिनः। रथी च। रथिर इति वा पाठः। रथविद्याविशारदस्य नामानि॥ ७५॥

---

[1] तद्योगात् F_2, Pt_2.　[2] अतिबलं K_2, K_6, W_2.

(पा.) ऊर्जस्वलः स्यात्—[1]ऊर्जोऽतिशयान्वितः। ऊर्जो [2]नामोत्साहः। ऊर्ज इति पराक्रमश्च। तयोर्द्वयोरतिशयवानूर्जस्वल ऊर्जस्वी च स्यात्॥ स्यादुरस्वानुरसिलः। यः शत्रुभ्य उरो दत्त्वा स्वबलं रक्षति तस्य नामनी। अर्शआदिपाठादुरसश्च स्यात्। अकारान्तः। [3]रथिनो रथिको रथी। रथबलवतो नामानि। भूमार्थे प्रत्ययः॥ ७५॥

[1] ऊर्जातिशय° A_1. [2] B_3 omits. [3] रथिरः B_3.

कामंगाम्यनुकामीनो ह्यत्यन्तीनस्तथा भृशम्॥ ७६॥
शूरो वीरश्च विक्रान्तो जेता जिष्णुश्च जित्वरः।

(त्रि.) कामंगामीति—कामं यथेच्छं गच्छतीति कामंगामी। अनुकामं यथेष्टं गमिष्यतीति अनुकामीनः। युद्धादौ यथेष्टं गमिष्यतो नाम॥ युद्धादावत्यर्थं[1] गमिष्यतीति अत्यन्तीनः। युद्धे शत्रून् प्रत्यत्यर्थं [2]चरतो नाम॥ शूरयतीति शूरः। वीरयतीति वीरः। 'शूर वीर विक्रान्तौ'। विरुद्धान् राति हन्तीति वा वीरः। 'रा दाने छेदने च'। विक्रामतीति[3] विक्रान्तः। 'क्रमु पादविक्षेपे'। शूरनामानि। जयत्यरीनिति जेता। अरीन् जेतुं शीलमस्येति जिष्णुः। जित्वरश्च। 'जि जये'। 'जि अभिभवे' वा धातुः। [4]जयैकशीलस्य नामानि॥ ७६॥

[1] अत्यन्तं गच्छति F_2, Pt_2. [2] गच्छतः W_2. [3] Pt_2 adds स. [4] जयशीलस्य W_2.

(पा.) [1]कामंगाम्यनुगामीनः[2]। यथेष्टं गामी अनुगामीनः स्यात्। ह्यत्यन्तीनस्तथा भृशम्। भृशं गामी अत्यन्तीनः स्यात्। '[3]वोत्तिनडचिवांडु'॥ शूरो वीरश्च विक्रान्तः। शूरनामानि। 'शूरो वीरश्च विक्रान्तो भटश्चारभटो भवेत्[4]' इति पर्यायशेषे हलायुधः (अ. मा. २. १९९)। अनुक्तम्—'स्यादशूरस्तु हतकः'। शूरादन्यस्य नाम। जेता जिष्णुश्च जित्वरः। जयशीलनामानि। पूर्वं तद्धर्मे, इदानीं तच्छीले प्रत्ययः॥ ७६॥

[1] कामगामी B_3. [2] अनुकामीनः A_1. [3] B_3 omits. [4] मतः A_1, B_3.

सांयुगीनो रणे साधुः शस्त्राजीवादयस्त्रिषु॥ ७७॥
ध्वजिनी वाहिनी सेना पृतनानीकिनी चमूः।
वरूथिनी बलं सैन्यं चक्रं चानीकमस्त्रियाम्॥ ७८॥

(वि.) सांयुगीन इति—संयुगे रणे साधुः सांयुगीनः। युद्धप्रवीणनाम ॥ शस्त्राजीवादयः सांयुगीनान्ताः शब्दाः त्रिषु लिङ्गेषु वर्तन्ते ॥ ध्वजा अस्यां सन्तीति ध्वजिनी। वाहाः सन्त्यस्यामिति वाहिनी। इनेन प्रभुणा सह वर्तत इति सेना। प्रियते व्यायच्छति हन्तुमुद्युङ्क्ते परबलमिति पृतना। 'पृङ् व्यायामे[1]'। [2]अनीकोऽश्वादिसंघोऽस्यामस्तीति अनीकिनी। चमति हिनस्त्यरीनिति[3] चमूः। 'चमु [4]भक्षणे'। वरूथो रथगुप्तिरस्यामस्तीति वरूथिनी। बलति प्राणिति स्वपक्षोऽनेनेति बलम्। 'बल प्राणने'। सेनैव सैन्यम्। चकते हन्ति परबलमिति [5]चक्रम्। 'चक तृप्तौ प्रतिघाते च'। विभज्य न नीयत इत्यनीकम्। 'णीञ् प्रापणे'। हस्त्यादिचतुरङ्गबलसमूहनामानि[6] ॥ ७७–८ ॥

---

[1] D_2, K_5, K_6 add व्यायाम उद्योगः.
[2] अश्वादिकं W_2.
[3] पर(प्रति K_5) पक्षबलं K_2, K_6; K_5, W_2 add भञ्जयति.
[4] अदने Pt_2.
[5] Pt_2 adds करोति जयमिति वा.
[6] K_5 omits.

(पा.) सांयुगीनो रणे साधुः। रणकुशलः सांयुगीनः स्यात्। अनुक्तम्—'जितकाशी जिताहवः'। विजितरणो जितकाशी स्यात्। शस्त्राजीवादयस्त्रिषु। पूर्वोक्ताः शस्त्राजीवादयः शब्दास्त्रिलिङ्गाः। शस्त्राजीवाः प्रजाः। शस्त्राजीवं[1] कुलम्। इत्यादि। ध्वजिनी वाहिनी—अनीकमस्त्रियाम। सेनानामानि। 'पताकिनी च दण्डश्च'। एते द्वे च ॥ ७७–८ ॥

---

[1] शस्त्राजीवि A_1.

व्यूहस्तु बलविन्यासो भेदा दण्डादयो युधि।
प्रत्यासारो व्यूहपार्ष्णिः सैन्यपृष्ठे प्रतिग्रहः ॥ ७९ ॥
एकेभैकरथा त्र्यश्वा पत्तिः पञ्चपदातिका।

(वि.) व्यूह इति—व्यूह्यते समूहतया रच्यते व्यूहः। 'ऊह वितर्के'। बलस्य सैन्यस्य विन्यासः रचना। बलविन्यासप्रकारनाम ॥ बलस्य तिर्यगवस्थानं दण्डः। आदिग्रहणान्मण्डलशकटक्रौञ्चादयो गृह्यन्ते[1]। व्यूहभेदनामानि ॥ [2]भग्नानात्मीयाननुग्राहकतया प्रतिसरतीति प्रत्यासारः। 'सृ गतौ'। व्यूहस्य पार्ष्णिः पृष्ठभागः। व्यूहजघनभागस्य नाम ॥ [3]प्रतिगृह्यतेऽवष्टभ्यतेऽनेन प्रतिग्रहः। 'ग्रह उपादाने'। सैन्यस्य चरमस्थाने स्थितस्य राजवतो व्यूहस्य नाम ॥ एकेभा एकरथा त्र्यश्वा पञ्चपदातिका सेना पत्तिरित्युच्यते। [4]पद्यते पत्तिः। 'पद गतौ' ॥ ७९ ॥

[1] F$_2$, Pt$_2$ add यदाह कामन्दकः—(२०. ३५. ४२)

> ‘ तिर्यग्वृत्तिस्तु दण्डः स्याद्भोगोऽन्वावृत्तिरेव च ।
> मण्डलः सर्वतोवृत्तिः पृथग्वृत्तिरसंहतः ॥ ’ इति.

[2] W$_2$ adds जयाग्राहकतया. [3] प्रतिगृह्णाति Pt$_2$. [4] पतति गच्छतीति, ‘ पत्लृ गतौ ’ K$_3$, K$_6$, Pt$_2$.

(पा.) व्यूहस्तु बलविन्यासः। बलविन्यासः व्यूहः स्यात् ॥ भेदा दण्डादयो युधि ।

> ‘ तिर्यग्वृत्तिस्तु दण्डः स्याद् भोगोऽन्वावृत्तिरेव च ।
> मण्डलः[1] सर्वतोवृत्तिः पृथग्वृत्तिरसंहतः[2] ॥’

इति (कामन्दकीयनीतिसारः २०. ३५. ४२)। दण्डादयश्चत्वारो व्यूहभेदाः । चक्रगोमूत्रिकादयस्तदवान्तरभेदाः ॥ प्रत्यासारो व्यूहपार्ष्णिः । व्यूहात् पश्चाद्भागनिविष्टं व्यूहान्तरं प्रत्यासारः स्यात् ॥ सैन्यपृष्ठे प्रतिग्रहः । बलस्य [3]पृष्ठभागस्थराजबलं प्रतिग्रहः स्यात् । एकेभैकरथा—पञ्चपदातिका । एको गजः, एको रथः, त्रयस्तुरंगाः, पञ्चपदातयः, एते[4] सर्वे मिलित्वा पत्तिनामा सेनाभेदः ॥ ७९ ॥

[1] मण्डलं A$_1$. [2] असंहृतिः A$_1$. [3] °भागस्थस्य राज्ञः B$_3$. [4] B$_3$ omits एते सर्वे.

पत्त्यङ्गैस्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरम् ॥ ८० ॥
सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः ।
अनीकिनी दशानीकिन्यक्षौहिण्यथ संपदि ॥ ८१ ॥
संपत्तिः श्रीश्च लक्ष्मीश्च विपत्तौ विपदापदौ ।

(वि.) पत्त्यङ्गैरिति—त्रिगुणैः सर्वैः पत्त्यङ्गैर्यथोत्तरं उत्तरोत्तरस्य आख्या नामानि क्रमाद् भवन्ति । सेनाया मुखं सेनामुखम् ।

> इभानां च रथानां च त्रितयं नव वाजिनः ।
> सेनामुखं स्मृतं यत्र भटानां दश पञ्च च ॥ इति ।

गुड्यते रक्ष्यतेऽस्मात् गुल्मः । ‘गुड रक्षायाम्’ ।

नवेभानां रथानां च हयानां सप्तविंशतिः।
गुल्मः प्रोक्तो भटानां तु चत्वारिंशच्च पञ्च च॥ इति।

गण्यते संख्यायते गणः। 'गण संख्याने'।

एकाशीतितुरङ्गाणां रथेभाः सप्तविंशतिः।
गणः प्रोक्तो भटानां तु शतं त्रिंशच्च पञ्च च॥ इति।

वाहाः अश्वाः अस्यां सन्तीति वाहिनी।

एकाशीतिरथेभस्य भटाः पञ्च चतुःशतम्।
चत्वारिंशत् त्रयोऽश्वानां द्विशतं वाहिनी मता॥ इति।

पृतना पूर्वोक्ता (श्लो. ७८)—

चत्वारिंशत्त्रयो नागा द्विशतं च रथास्तथा।
पृतना सा सप्तशती हयानां विंशतिर्नव।
सहस्रं द्विशतं पञ्च दश पद्गा मनीषिभिः॥

चमूरप्युक्ता (श्लो. ७८)—

द्विसहस्रं शतं सप्ताशीतिर्वाजिकुलस्य च।
रथाश्वेभाः सप्तशती विंशतिर्नव यत्र सा॥
त्रिसहस्रं षट्शतकं चत्वारिंशच्च पञ्च च।
पदातीनां चमूर्ज्ञेया सैन्यसंख्याविचक्षणैः॥

अनीकिनी पूर्वोक्ता (श्लो. ७८)—

षट्सहस्रं पञ्चशतं षष्टिरेकं तु वाजिनाम्।
द्विसहस्रं शतं सप्ताशीतिर्गजरथस्य च॥
यत्रायुतं नवशतं त्रिंशत्पञ्चपदातयः।
अनीकिन्यभिधेया सा परिज्ञेया मनीषिभिः॥

दश अनीकिन्यो यस्यां सा दशानीकिनी। सैव अक्षौहिणीत्युच्यते। अक्षाणां रथानां समूहः संघोऽस्यामस्तीति अक्षौहिणी।

प्रयुतं नवसाहस्रं पञ्चाशत् त्रिशतं भटाः।
पञ्चाशत् षष्टिसाहस्रं षट्शतीर्दश वाजिनः॥
एकविंशतिसाहस्रं शतानामष्टसप्ततिः।
द्विरदाः स्यन्दना यत्र साक्षौहिण्युच्यते बुधैः॥ इति।

संपद्यते जनैरिति संपत्। संपत्तिश्च[1]। श्रयत[2] इति श्रीः। 'श्रिञ् सेवायाम्'। लक्ष्यत इति लक्ष्मीः। 'लक्ष दर्शनाङ्कनयोः'। संपन्नामानि ॥ विपद्यत इति विपत्। विपत्तिश्च। आपद्यते आपत्। 'पद गतौ' ॥ ८०–१ ॥

---

[1] K$_2$, W$_2$ add 'पद गतौ'. [2] श्रीयते जनैः F$_2$, Pt$_2$.

(पा.) पत्त्यङ्गैस्त्रिगुणैः सर्वैः—चमूः अनीकिनी। [1]पत्त्यङ्गानि त्रिगुणानि चेद् गुल्मः। गुल्माङ्गानि त्रिगुणानि चेद् गणः। गणाङ्गानि त्रिगुणानि चेद् वाहिनी। वाहिन्यङ्गानि त्रिगुणानि चेद् पृतना। पृतनाङ्गानि त्रिगुणानि चेच्चमूः। चम्वङ्गानि त्रिगुणानि चेदनीकिनी। गोबलीवर्दन्यायाद् वाहिनीशब्दस्य सामान्यविशेषवृत्तित्वम् ॥ दशानीकिन्यक्षौहिणी। तादृश्योऽनीकिन्यो दश[2] चेदक्षौहिणी स्यात्। [3]तादृगक्षौहिण्या गजाः २१८७०, रथाः २१८७०, अश्वाः ६५६१०, पदातयः १०९३५० ॥ अथ संपदि—लक्ष्मीश्च। संपदो नामानि। ऐश्वर्यपर्यायवाच्या[4] अपि स्यात्। 'विभूतिर्भूतिरैश्वर्यमणिमादिकसंपदोः' इति वैजयन्ती (पृ. २८०, श्लो. ३४) ॥ विपत्त्यां विपदापदौ। विपत्तिनामानि ॥ ८०–१ ॥

---

[1] प्रत्यङ्गानि A$_1$. [2] A$_1$ adds स्युः. [3] तादृग्विधायाः A$_1$. [4] वाच्यमपि A$_1$.

आयुधं तु प्रहरणं शस्त्रमस्त्रमथास्त्रियौ ॥ ८२ ॥
धनुश्चापौ धन्वशरासनकोदण्डकार्मुकम्।
इष्वासोऽप्यथ कर्णस्य कालपृष्ठं शरासनम् ॥ ८३ ॥

(वि.) आयुधमिति—आयुध्यन्तेऽनेनेति आयुधम्। 'युध [1]संप्रहारे'। प्रहरत्यनेनेति प्रहरणम्। 'हृञ् हरणे'। शस्यते हिंस्यतेऽनेनेति शस्त्रम्। 'शसु हिंसायाम्'। अस्यते देहादाविति अस्त्रम्। 'असु क्षेपणे'। आयुधमात्रनामानि ॥ धन्यते निषङ्गिभिरभ्यर्थ्यत इति धनुः। 'धन धान्ये'। सान्तोऽयम्। चपस्य वेणोरयं[2] विकारः चापः। धनुश्चापावस्त्रियां वर्तेते[3]। 'अश्रौषं धनुषम्' इति पुंलिङ्गप्रयोगोऽप्यस्ति। धन्यते धन्व। 'धन धान्ये[4]'। शरा अस्यन्तेऽनेनेति शरासनम्[5]। कूर्दते धन्वी अनेनेति कोदण्डम्। 'कुर्द क्रीडायाम्'। कर्मणि प्रभवतीति कार्मुकम्। इषवोऽस्यन्तेऽनेनेति इष्वासः। 'असु क्षेपणे'। धनुषो नामानि ॥ कालवर्णः पृष्ठे यस्य कालपृष्ठम्। कर्णस्य[6] धनुषो नाम ॥ ८२–३ ॥

---

[1] संप्रहरणे D$_2$, K$_2$. [2] वृक्षविशेषस्य वा F$_2$, Pt$_2$. [3] K$_5$, K$_6$, W$_2$ add पुंलिङ्गनपुंसकलिङ्गौ स्याताम्. [4] Pt$_2$ adds प्रार्थनायां च. [5] K$_2$, W$_2$ add 'असु क्षेपणे'. [6] कर्णशरासननाम K$_2$, K$_6$.

(पा.) आयुधं तु । आयुच्छब्दोऽप्यस्ति । ‘न क्ली हेतिः शस्त्रमस्त्रमायुच्छत्रुघ्नमायुधम्’ इति वैजयन्ती (पृ. ११७, श्लो. १५७)। प्रहरणं शस्त्रमस्त्रम्। आयुधनामानि ॥ अथास्त्रियां[1]—धनुश्चापौ[2] धन्व । नान्तः । शरासन—कार्मुकमिष्वासोऽपि । चापनामानि । ‘शार्ङ्गं नखमुचो[3] युध्मो [4]धर्मो ना तृणता स्त्रियाम्’ इत्येतानि पञ्च च । [5]सिंहावलोकन्यायादस्त्रस्य ग्रहणम् । अथ कर्णस्य—शरासनम् । [6]कर्णो नाम राधेयः, तस्य चापं कालपृष्ठं स्यात् ॥ ८२–३ ॥

---

[1] अस्त्रियौ A_1.　[2] धनुश्चापे B_3.　[3] नखमुखं A_1.　[4] धरः A_1.
[5] अवलोकन° A_1.　[6] कर्णस्य राधेयस्य शरासनं B_3.

कपिध्वजस्य गाण्डीवगाण्डिवौ पुंनपुंसकौ ।
कोटिरस्याटनी गोधे तले ज्याघातवारणे ॥ ८४ ॥
लस्तकस्तु धनुर्मध्यं मौर्वी ज्या शिञ्जिनी गुणः ।

(वि.) कपिध्वजस्येति—गाण्डीकृतं अश्लक्ष्णीकृतं पर्वस्थानमस्येति गाण्डीवः । गाण्डिवश्च ॥ इमौ द्वौ शब्दौ पुंनपुंसकयोर्वर्तेते । अर्जुनशरासननामनी ॥ अटति धनुषो नमनकालेऽधोगच्छतीति अटनी । अटनिरप्यस्ति । मौर्वीबन्धनस्थाननाम ॥ गुध्यति[1] प्रकोष्ठमिति गोधा । ‘गुध परिवेष्टने’ । तलति प्रतितिष्ठतीति तलम् । ‘तल प्रतिष्ठायाम्’ । ज्याघातवारणत्वग्विशेषनामनी ॥ लसति संश्लिष्यति[2] करे लस्तकः । ‘लस संश्लेषणक्रीडनयोः’ । धनुर्मध्यभागनाम ॥ मूर्वाख्यतृणविशेषजत्वात् मौर्वी[3] । जिनाति कालेन शिथिलीभवतीति ज्या । ‘ज्या वयोहानौ’ । शिञ्जतेऽव्यक्तं स्वनतीति शिञ्जिनी । ‘शिजि अव्यक्ते शब्दे’ । गुण्यते आकृष्यमाणतया अभ्यस्यते गुणः । ‘गुण अभ्यासे’ । मौर्वीनामानि ॥ ८४ ॥

---

[1] K_2, Pt_2 add परिवेष्टयति.　[2] श्लिष्यते धन्विकरेण K_5, K_6, W_2.　[3] मूर्वा वृक्षविशेषः, तद्विकारः F_2, Pt_2.

(पा.) कपिध्वजस्य—पुंनपुंसकौ[1] । कपिध्वजोऽर्जुनः[2]। तस्य चापं गाण्डीवो गाण्डिवश्च स्यात् ॥ कोटिरस्याटनिः[3] । चापस्य कोटिरटनिः स्यात् । ‘[4]विंटिकोप्पु’ । प्रयोगरूढ्या अस्येति निर्देशः ।

‘घनकार्मुककोटिघट्यमानो हिमधामा विगलत्सुधो विरेजे ।’

इति, 'शिरसि . . अटन्या ताड्यमानस्य शंभोः' इति च प्रयोगात् ।। गोधे तले ज्याघातवारणे । मौर्व्याघातवारणार्थं[5] मणिबन्धबद्धचर्मनामनी । गोधे तले इति रूपनामा स्यात् । स्त्रीनपुंसके स्याताम् । 'गोधा तला च न नरौ [6]हस्तघ्नज्यानिवारणे' इति वैजयन्ती (पृ. ११६, श्लो. १५५) । हस्तद्वयापेक्षया द्विवचनप्रयोगः ।। लस्तकस्तु धनुर्मध्यम् । चापस्य[7] मध्यं लस्तकः स्यात् ।। मौर्वी ज्या—गुणः । धनुर्गुणनामानि । नाली जीवा द्रुणा चापि । एतानि त्रीणि च ।। ८४ ।।

---

[1] नपुंसके A_1. [2] अर्जुनस्य चापः B_3. [3] अटनी B_3. [4] B_3 omits.
[5] निवारण° A_1. [6] 'हस्तघ्नो' इति मुद्रितग्रन्थे. [7] धनुर्मध्यं B_3.

स्यात्प्रत्यालीढमालीढमित्यादि स्थानपञ्चकम् ॥ ८५ ॥
लक्षं लक्ष्यं शरव्यं च शराभ्यास उपासनम् ।

(वि.) स्यादिति—प्रत्यालिह्यतेऽनेनेति प्रत्यालीढम् । आलीढं च । 'लिह आस्वादने'। आदिग्रहणेन समपादं वैशाखं मण्डलमिति त्रीणि भवन्ति । धनुःशास्त्रविहितस्थानपञ्चकस्य प्रत्येकं नामानि ।। लक्ष्यते दृश्यते वेध्यमिति[1] लक्षं, लक्ष्यं च । 'लक्ष दर्शनाङ्कनयोः'। शरैः वीयते संवीयते शरव्यम् । 'वेञ् संवरणे'। लक्ष्यनामानि ।। शराणाम् अभ्यासः शराभ्यासः । उपास्यन्ते पुनः पुनः शराः क्षिप्यन्तेऽत्रेति उपासनम्[2] । शराभ्यासनाम ।। ८५ ।।

---

[1] वध्यं K_2. [2] F_2, Pt_2 add 'असु क्षेपणे'.

(पा.) स्यात् प्रत्यालीढं—स्थानपञ्चकम् । वामपादप्रसारे दक्षिणसंकोचे प्रत्यालीढम् । दक्षिणजङ्घाप्रसारे वामसंकोचे चालीढम् । तुल्यपादयुगं समपदम् । वितस्त्यन्तरेण स्थिते पादद्वये विशाखः, मण्डलाकृतिपादद्वयं मण्डलमिति धनुर्वेदोक्तानि पञ्च [1]धनुर्धरस्थानानि स्युः । अनुक्तम्—'पूर्णं ज्याकृष्टिराकर्णात्'। [2]श्रुतिपर्यन्तज्याकर्षणं पूर्णं स्यात् । 'संधानं त्विषुयोजनम्'। [2]गुणस्य वक्त्रे बाणस्य संयोजनं संधानं स्यात् ।। लक्षं लक्ष्यं शरव्यं च । शरवेध्यनामानि । 'गुरि'। 'निमित्तं लक्षणं वेध्यम्'। एतानि त्रीणि च । शराभ्यास उपासनम् । बाणाभ्यास उपासनं स्यात्[3] । 'अभ्यासः कथ्यते योग्या श्रमस्थानं खलूरिका' इति हलायुधः (अ. मा. २. ३१५) ।। ८५ ।।

---

[1] धन्विनां स्थानकानि A_1. [2] B_3 omits the sentence. [3] A_1 adds इति शास्त्रपदे रामपदे योग्येऽभ्यासः कथ्यते.

पृषत्कबाणविशिखा अजिह्मगखगाशुगाः ॥ ८६ ॥
कलम्बमार्गणशराः पत्री रोप इषुर्द्वयोः ।

(वि.) पृषत्केति—रुधिरपृषद्भिः शत्रुं पर्षति वर्षतीति पृषत्कः । 'पृषु[1] सेचनहिंसाक्लेशनेषु'। वाणयति विरावयति शत्रुमिति बाणः। 'वण क्वण शब्दे'। विशीयते[2] तीक्ष्णं कर्तुं तनूक्रियते विशिखः। 'शिञ् निशातने'। अजिह्मं ऋजु यथा भवति तथा गच्छतीति अजिह्मगः। खे आकाशे गच्छतीति खगः। 'गम्लृ गतौ'। आशु गच्छतीति आशुगः। रणमध्ये कल्यते क्षिप्यते कलम्बः। 'कल किल क्षेपे'। वेध्यमेव मार्गयति अन्विष्यतीति[3] मार्गणः। 'मार्ग अन्वेषणे'। शृणातीति शरः। 'शॄ हिंसायाम्'। पत्रं पक्षोऽस्यास्तीति पत्री। नान्तः। रोपयति[1] मोहयति शत्रुमिति रोपः। 'रुप विमोहने'। इष्यति [5]वध्यं प्रति गच्छतीति इषुः। 'इष गतौ'। इषुशब्दः स्त्रीपुंलिङ्गयोर्वर्तते। बाणनामानि ॥ ८६ ॥

---

[1] 'पृष वृष सेचने' K_3, K_5, K_6.　[2] विशीर्यते K_5, K_6.　[3] अन्वेषते D_2.
[4] रोप्यते क्षिप्यते शत्रुदेहे, 'रुह बोजजन्मनि प्रादुर्भावे च', हकारस्य पकारादेशः K_5, K_6, W_2.
[5] वेध्यं W_2.

(पा.) प्रृषत्कबाणविशिखा—मार्गणशराः । ताल्व्यादिर्दन्त्यादिश्च भवति । 'चित्रपुङ्खः शरः सरः' इति त्रिकाण्डशेषः (२. ८. ४२७)। पत्री रोप इषुर्द्वयोः। शरनामानि।

> 'कङ्कपत्रो वत्सदन्त एषणो[1] रोपणः कणः।
> कादम्बश्च विपाठश्च[2] ॥'

एतानि सप्त च ॥ ८६ ॥

---

[1] सोमरोम पणः कणः A_1.　[2] विपाटश्च B_3.

प्रक्ष्वेडनास्तु नाराचाः पक्षो वाजस्त्रिषूत्तरे ॥ ८७ ॥
निरस्तः प्रहिते बाणे विषाक्ते दिग्धलिप्तकौ ।

(वि.) प्रक्ष्वेडना इति—प्रक्ष्वेडन्तेऽव्यक्तं ध्वनन्तीति प्रक्ष्वेडनाः। 'ञिक्ष्विडा[1] अव्यक्ते शब्दे'। नारं नरसमूहं प्रति अञ्चन्ति गच्छन्तीति[2] नाराचाः। 'अञ्चु गतिपूजनयोः'। एकवचनद्विवचने अपि स्तः। नाराचनामनी ॥ पक्षति [3]शरं गृह्णातीति पक्षः। 'पक्ष परिग्रहे'। [4]वजत्यनेन बाण इति वाजः। 'वज गतौ'। बाणपक्षनामनी ॥

उत्तरे वर्तमानाः चत्वारः शब्दास्त्रिषु लिङ्गेषु वर्तन्ते। निरस्यते प्रक्षिप्यतेऽस्मात् धनुष इति निरस्तः[5]। उत्सृष्टबाणनाम ॥ विषेण दिह्यते उपलिप्यते दिग्धम्। ‘दिह उपचये’। विषेण लिप्यते लिप्तकः। ‘लिप उपदेहे’। विषलिप्तबाणनामनी ॥ ८७ ॥

[1] जिक्ष्त्रिदा K_2. [2] K_5 adds शत्रुशीर्षादौ. [3] परिगृह्णाति बाणं D_2, K_6, W_2. [4] D_2, W_2 add आशु गच्छति. [5] K_6 adds वध्यं प्रति प्रहीयते प्रक्षिप्यते प्रहितः। ‘ओहाक् त्यागे’.

(पा.) प्रक्ष्वेडनास्तु नाराचाः। आयसबाणनामनी[1] ॥ पक्षो वाजः। [2]सायकपुङ्खाद्युपरिनिबद्धगृध्रादिगरुन्नामनी ॥ त्रिषूत्तरे निरस्तः—बाणे। [3]लक्षं प्रति प्रयुक्तो[4] बाणो निरस्तः स्यात् ॥ विषाक्ते दिग्धलिप्तकौ। विषेण[5] लिप्ते बाणे दिग्धलिप्तकशब्दौ स्याताम्। विशेषणत्वे[6] त्रिलिङ्गाः। इषुर्निरस्ता, इषुर्दिग्धा, इषुर्लिप्तेत्यादि। विशेष्यत्वे[7] पुंलिङ्गा एव। निरस्तो हन्त्येव। दिग्धो हन्त्येवेत्यादि ॥ ८७ ॥

[1] शर° B_3. [2] शरगरुन्नामनी B_3. [3] लक्ष्यं B_3. [4] प्रयुक्ते बाणे निरस्तशब्दः स्यात् A_1. [5] विषानुलिप्ते B_3. [6] विशेषणरूपे A_1. [7] विशेष्यरूपे A_1.

तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः ॥ ८८ ॥
तूण्यां खड्गे तु निस्त्रिंशचन्द्रहासासिरिष्टयः ।
कौक्षेयको मण्डलाग्रः करवालः कृपाणवत् ॥ ८९ ॥

(वि.) तूण इति—तूण्यते प्रपूर्यते शरैरिति तूणः। तूणीरश्च[1]। ‘तूण [2]पूरणे’। उपासज्यते[3] तनोः पृष्ठभागे उपासङ्गः। निषङ्गश्च। ‘षञ्ज सङ्गे’। इषवो धीयन्तेऽत्रेति इषुधिः। ‘डुधाञ् धारणपोषणयोः’। तूणीरनामानि ॥ खण्डयति शिरःकपालादिकमिति खड्गः। ‘[4]खडि भेदने’। दैर्घ्यात् त्रिंशदङ्गुलिपरिमाणतो[5] निष्क्रान्तो निस्त्रिंशः। चन्द्रवत् [6]हासः प्रभा यस्य चन्द्रहासः। अस्यते शत्रुशीर्षादौ[7] असिः। ‘असु क्षेपणे’। रिष्यति[8] रिपुं हन्तीति रिष्टिः। ‘रिष हिंसायाम्’। कुक्षौ चर्मनिर्मितकोशान्तरे भवो वर्तमानः कौक्षेयकः। मण्डलाकारोऽग्रभागोऽस्य मण्डलाग्रः। करे वलत इति करवालः। ‘वल संचलने’। करपाल इति वा पाठः[9]। कल्पते हनने समर्थो भवतीति कृपाणः। ‘कृपू सामर्थ्ये’। खड्गनामानि ॥ ८८–९ ॥

[1] W_2 adds तूणी च. [2] प्रपूरणे K_5, K_6. [3] उपासज्यन्तेऽत्र शराः F_2, Pt_2. [4] ‘खडि खण्ड छेदने’ K_3, K_6. [5] अङ्गुलिभ्यः F_2, Pt_2. [6] हसति प्रकाशते K_2, Pt_2. [7] कंधरादौ K_5. [8] रिष्यते हिंस्यतेऽनेन K_6, Pt_2. [9] Pt_2 adds करं पालयति.

(पा.) तूणोपसङ्गतूणीर—तूण्याम्। व्यासाङ्गीकारात् तूणाशब्दः स्त्रीलिङ्गः। 'आषाढा धिषणा तूणा' इति चन्द्रगोमिलिङ्गानुशासनम्। समासाङ्गीकारात् तूणशब्दः पुंलिङ्गः। 'तूणो निषङ्गस्तूणीरः' इति अमरमालापुंस्काण्डः। इषुधिर्द्वयोः। धियतिधातुसिद्धः इषुधिशब्द उभयलिङ्गः। दधातिधातुसिद्धः पुंलिङ्ग एव॥ तूण्याम्। तूणीशब्दस्य सप्तमी। शरधिनामानि। '[1]बत्तलिके'॥ खड्गे तु—असिरिष्टयः। 'तस्मान्निरपतद् भूरि शिलाशूलेष्टिमुद्गरम्' इति भट्टिप्रयोगादजादिश्च स्यात् (भ. का. १७. ४५)। कौक्षेयको—करवालः कृपाणवत्। खड्गनामानि।

'असिताङ्गो विशसनस्तरवारिश्च [2]हुंकृतः।
धर्मपालः[3] कठारश्च [4]शास्ता भद्रसुतोऽपि च॥'

एतानि च॥ ८८–९॥

---

[1] B_3 omits. [2] शिवंकरः B_3. [3] करवालः A_1. [4] वालः A_1.

त्सरुः खड्गादिमुष्टौ स्यान्मेखला तन्निबन्धनम्।
फलकोऽस्त्री फलं चर्म संग्राहो मुष्टिरस्य यः॥ ९०॥
द्रुघणे मुद्गरघनौ स्यादीली करवालिका।

(वि.) त्सरुरिति—मुष्टिना त्सरतीति त्सरुः। 'त्सर छद्मगतौ'। खड्गादिमुष्टिनाम॥ मीयते मुष्टेरुपरि क्षिप्यते मेखला। 'डुमिञ् प्रक्षेपणे'। त्सरुबन्धननाम॥ फलति परप्रहारैर्विशीर्यत इति [1]फलकः। फलं च। 'ञिफला विशरणे'। चर्मणा संबद्धत्वात् चर्म। परप्रहारपरिहारार्थं खड्गिभिर्धार्यमाणस्य [2]चर्मनद्धफलकस्य[3] नामानि॥ संगृह्यते पाणिनेति संग्राहः। फलकमुष्टिनाम॥ द्रोः वृक्षस्य घनः सारांशः द्रुघणः[4]। द्रुः [5]वृक्षादिकं हन्यतेऽनेनेति वा। 'हन हिंसागत्योः'। हन्यमानस्य[6] मुदं हर्षं गिरति नाशयतीति मुद्गरः। 'गॄ निगरणे'। हन्यतेऽनेनेति घनः। मुद्गराद्यायुधनामानि॥ ईड्यत इति ईली। 'ईड स्तुतौ'। स्वल्पकरवालसाम्यात् करवालिका। एकधारकरवालनामनी॥ ९०॥

---

[1] फलकं K_6, W_2. [2] °वन्धन° W_2. [3] D_2, W_2 add विस्तीर्णस्य.
[4] द्रुघनः W_2. [5] ललाटादिकं K_5, K_6. [6] K_5 adds रिपोः.

(पा.) त्सरुः खड्गादिमुष्टौ स्यात्। खड्गादीनां मुष्टिः त्सरुः स्यात्। मेखला तन्निबन्धनम्। खड्गादीनां निबन्धनं मेखला स्यात्। '[1]परजु'। अनुक्तम्—'प्रत्याकार-

स्तत्पिधानम्'। खड्गादीनामाच्छादकं प्रत्याकारः स्यात्। 'वोर'। फलको—चर्म। चर्मनामानि। 'हरिगे'। चर्मशब्दः केषांचिन्मते सामान्यवचनः। 'खेटकं फलकं चर्म' इति हलायुधः (अ. मा. २. ३०५)। केषांचिन्मते विशेषवचनः। 'फलं चर्ममयं चर्म फलकं खेटकं समम्' इति वैजयन्ती (पृ. १२०, श्लो. १९७)। [3]अड्डनकटिके विशेषवचने स्याताम्। 'कटिका स्यात् सूत्रमयी वेत्रादिकृतमण्डनम्। [3]अड्डनम्।' इति। 'केडेमु'॥ संग्रहो मुष्टिरस्य यः। फलकस्य मुष्टिः संग्रहः स्यात्। द्रुघणे मुद्गरघनौ। आयसगदानामानि। 'इनुपदुड्डु'॥ दारवी गदा भुसुण्डी स्यात्। 'भुसुण्डी[4] स्याद् दारुमयी वृत्तायःकीलसंचिता' इति वैजयन्ती (पृ. ११८, श्लो. १७०)॥ स्यादीली करवालिका। स्वल्पकरवालनामनी। 'करासूरिकत्ति'॥ ९०॥

[1] B_3 omits. [2] °वचनानि A_1. [3] अड्ढाण° A_1, B_3. [4] भुसुण्ठीति मुद्रितग्रन्थे; भुशुण्डी B_3.

भिन्दिपालः सृगस्तुल्यौ परिघः परिघातनः॥ ९१॥
द्वयोः कुठारः स्वधितिः परशुश्च परश्वधः।

(वि.) भिन्दिपाल इति—भिन्दतः[1] [2]पालयतीति भिन्दिपालः। 'पाल रक्षणे'। भिण्डिपाल इति वा पाठः। भिन्दिवाल इति पाठे भिन्दन्तं वलते संवृणोतीति भिन्दिवालः। 'वल संवरणे'। सृज्यते रिपुं प्रति सृगः। 'सृज विसर्गे'। हस्तक्षिप्यलगुडविशेषनामनी॥ परितो [3]हन्यतेऽनेनेति परिघः। 'हन हिंसागत्योः'। परितो घातयत्यनेनेति परिघातनः। परिघाख्यायुधनामनी॥ कुठान् वृक्षान् हन्तृत्वेन इयर्तीति कुठारः। 'ऋ गतौ'। स्वयं धियति छेद्यमाकाशे धारयतीति स्वधितिः। 'धि धारणे'। परान् शृणातीति परशुः। 'शॄ हिंसायाम्'। परान् श्यति नाशयतीति परश्वधः। 'शो तनूकरणे'। परशुनामानि॥ ९१॥

[1] भिन्दन्तं W_2. [2] K_5, K_6 add स्वधारकं. [3] परितो हन्ति K_5.

(पा.) भिन्दिपालः[1] सृगस्तुल्यौ। [2]द्वित्रचक्रखड्गनामनी। परिघः परिघातनः। परिघाख्यायुधविशेषनामनी। '[3]लौडि'। द्वयोः कुठारः—परश्वधः। परशुनामानि। कुठारः स्त्रीपुंसलिङ्गकः। स्वधित्यादयः पुंलिङ्गाः[4]। 'गण्ड गोड्ढलि'॥ ९१॥

[1] भिण्डिपालः A_1; भिन्दिवालः B_3. [2] लगुडविशेषनामनी B_3. [3] B_3 omits. [4] B_3 adds कुटारनामानि.

स्याच्छस्त्री चासिपुत्री च छुरिका चासिधेनुका ॥ ९२ ॥
वा पुंसि शल्यं शङ्कुर्ना सर्वला तोमरोऽस्त्रियाम् ।

(वि.) स्यादिति—शस्यतेऽनया शस्त्री । 'शसु हिंसायाम्' । सूक्ष्मत्वात् असेः खड्गस्य पुत्री असिपुत्री । छुरति [1]छेदयतीति छुरिका । 'छुर छेदने' । असिः धेनुरिव असिधेनुका । नीचखड्गनामानि ॥ शलत्याशुगच्छत्यन्तरिति शल्यम् । 'शल आशुगमने' । शङ्कते शत्रुरस्मादिति शङ्कुः । 'शकि शङ्कायाम्' । [2]दारुकृततीक्ष्णाग्रशूलनामनी ॥ सर्वं प्रतिपक्षं हन्तृत्वेन लाति स्वीकरोतीति सर्वला । 'ला आदाने' । शर्वलेति वा पाठः । स्तोम्यते प्रश्लाघ्यत इति तोमरम्[3] । ताम्यतेऽनेनेति वा । 'तमु ग्लानौ' । अयोऽग्रस्य वेणुदण्डस्य नामनी ॥ ९२ ॥

[1] K$_5$, W$_2$ add हिनस्ति.   [2] सूक्ष्म° K$_3$.   [3] K$_2$, K$_3$, K$_6$ add 'स्तोम श्लाघायाम्'.

(पा.) स्याच्छस्त्री—असिधेनुका । छुरिकानामानि । '[1]चूरकत्ति' । दीर्घा चेत् पत्रलता स्यात् । 'सातिदीर्घा [2]पत्रलता' इति वैजयन्ती (पृ. ११७, श्लो. १६४) ॥ वा पुंसि शल्यं शङ्कुर्ना । शल्यनामनी । क्षुद्रकुन्तनामनी इति केचित् ॥ [3]सर्वला तोमरोऽस्त्रियाम् । शक्तिनामनी ॥ ९२ ॥

[1] 'चूरिकत्ति' A$_1$.   [2] पत्रफलेति मुद्रितग्रन्थे.   [3] B$_3$ adds शर्वलेति पाठान्तरम्.

प्रासस्तु कुन्तः कोणस्तु स्त्रियः पाल्यश्रिकोटयः ॥ ९३ ॥
सर्वाभिसारः सर्वौघः सर्वसंनहनार्थकः ।

(वि.) प्रास इति—प्रास्यते क्षिप्यते शत्रुं[1] प्रति प्रासः । 'असु क्षेपणे' । कुणत्यनेनाहत इति कुन्तः । 'कुण[2] शब्दोपकरणयोः' । स्वल्पतोमरनामनी ॥ कुणत्युपकरोतीति कोणः । पालयति ग्राहकमिति पालिः । 'पाल रक्षणे' । [3]अश्नुतेऽग्रपर्यन्तम्[4] अश्रिः । 'अशू व्याप्तौ' । कोटयते रिपुं प्रपातयतीति कोटिः । 'कुट [5]छेदने' । शस्त्रधारानामानि ॥ सर्वेण सैन्येनाभिसरणं सर्वाभिसारः । 'सृ गतौ' । सर्वेषां सैनिकानाम् ओघः सर्वौघः । सर्वैः संनह्यतेऽत्र सर्वसंनहनम्[6] । 'णह बन्धने' । संनद्धसैन्यनामानि ॥ ९३ ॥

[1] शत्रुषु F$_2$, Pt$_2$.   [2] 'कुण शब्दे' K$_5$, K$_6$, Pt$_2$.   [3] अश्नाति, 'अश भोजने' Pt$_2$.   [4] K$_5$ adds आदिमारम्भ°.   [5] प्रपातने K$_3$, K$_6$; प्रतापने K$_5$.   [6] सर्वेषां संनहनम् F$_2$, Pt$_2$.

(पा.) प्रासस्तु कुन्तः । कुन्तायुधनामनी । 'कौंतमु[1]' ॥ कोणस्तु—पाल्यश्रिकोटयः । धाराया नामानि । चतुरश्रः पट्टः । चतुरश्रिर्मा भूदिति [2]नित्यसमासान्तविधिप्रयोजनम् । नो चेदश्रशब्दात् तत्सिद्धिः[3] । 'अणिरश्रिस्तथा कोटिरश्रः कोणश्च कथ्यते' इति हलायुधः (अ. मा. ४. ४२) ॥ सर्वाभिसारः—संनहनार्थकः । [4]सर्वाभिसारसर्वौघशब्दौ सर्वसेनासंनाहवाचकौ ॥ ९३ ॥

[1] B$_3$ omits. [2] B$_3$ omits नित्य. [3] न चाश्रिशब्दात् B$_3$. [4] सर्वसंनहननामनी B$_3$.

लोहाभिसारोऽस्त्रभृतां राज्ञां नीराजनाविधिः ॥ ९४ ॥
यत् सेनयाभिगमनमरौ तदभिषेणनम् ।

(वि.) लोहेति—लोहं शस्त्रम् अभिसार्यतेऽस्मिन्निति लोहाभिसारः । शस्त्रभृतां राज्ञां युद्धनिर्गमनाय यस्मिन् दिने शस्त्राणि निःसार्यन्ते तस्य नाम ॥ लोहाभिहार इति पाठे शस्त्राणां तत्समये पूजाविधिनाम ॥ सेनया सह आभिमुख्येनारिं[1] प्रति [2]यानम् अभिषेणनम् । रिपुमनादृत्य आभिमुख्येन अभिगमननाम ॥ ९४ ॥

[1] शत्रून् F$_2$, Pt$_2$. [2] गमनम् K$_2$, W$_2$, Pt$_2$.

(पा.) लोहाभिसारो—नीराजनाविधिः । धृतास्त्राणां राज्ञां[1] मङ्गलनीराज[2]नाविधिर्लोहाभिसारः स्यात् ॥ यत्सेनयाभिगमनं—अभिषेणनम् । सेनया[3] सममरीन् प्रति गमनमभिषेणनं स्यात् ॥ ९४ ॥

[1] नृपाणां A$_1$. [2] B$_3$ omits विधिः. [3] सेनयाभियानं B$_3$.

यात्रा व्रज्याभिनिर्याणं प्रस्थानं गमनं गमः ॥ ९५ ॥
स्यादासारः प्रसरणं प्रचक्रं चलितार्थकम् ।

(वि.) यात्रेति—यान्त्यस्यामिति यात्रा[1] । 'या प्रापणे' । व्रजनं[2] व्रज्या । 'व्रज गतौ' । अभिनिर्यान्ति अभिनिर्याणम्[3] । प्रस्थीयते प्रस्थानम् । 'ष्ठा गतिनिवृत्तौ' । गम्यते गमनम् । गमश्च । 'गम्लृ गतौ' । यात्रानामानि ॥ [4]आसरन्त्यस्मिन्निति आसारः । प्रसरन्त्यत्रेति प्रसरणम् । 'सृ गतौ' । सैन्यस्य सर्वतो व्याप्तिनामनी ॥ प्रचलितं चक्रं सैन्यं प्रचक्रम्[5] । प्रचलितसैन्यनाम ॥ ९५ ॥

[1] K$_5$ adds यानं यात्रेति वा. [2] व्रज्यते K$_5$, K$_6$, W$_2$. [3] आभिमुख्येन निर्याणं F$_2$, Pt$_2$. [4] आ समन्तात् F$_2$, Pt$_2$. [5] प्रकर्षेण आक्रामति Pt$_2$.

(पा.) यात्रा व्रज्या—गमनं गमः। प्रस्थाननामानि ॥ स्यादासारः प्रसरणम्। प्रसरणीशब्दोऽप्यस्ति। 'आसारस्तु प्रसरणी प्रचक्रं चलितार्थकम्' इति वैजयन्ती (पृ. १२०, श्लो. १०१)। [1]विसरणनामनी ॥ प्रचक्रं चलितार्थकम्। चलितार्थे प्रचक्रशब्दः स्यात्।

'[2]रभसप्रचक्रकुरुचक्रदुन्दुभिध्वनिभिर्जनस्य [3]बधिरीकृतश्रुतेः।'

इति माघः (शिशु. १३. ३) ॥ ९५ ॥

[1] प्रसरण° B_3.　[2] रभसप्रवृत्तेति मुद्रितग्रन्थे.　[3] वधिरे कृते A_1.

अहितान् प्रत्यभीतस्य रणे यानमभिक्रमः ॥ ९६ ॥
वैतालिका बोधकराश्चाक्रिका घाण्टिकार्थकाः।

(वि.) अहितानिति—आभिमुख्येन क्रमणम् अभिक्रमः। 'क्रमु पादविक्षेपे'। रिपुं प्रत्यभीतस्य गमननाम ॥ [1]विविधास्तालाः प्रयोजनमेषां ते वैतालिकाः। राज्ञां बोधं कुर्वन्तीति बोधकराः। [2]नृपबोधनार्थपाठकनामनी ॥ चक्रेण समूहेन चरन्तीति[3] चाक्रिकाः। घण्टानादेन जीवन्तीति घाण्टिकाः। धनार्थं ये घण्टानादं कुर्वन्ति तेषां नामनी ॥ ९६ ॥

[1] विगतस्तालो विताल: K_5, K_6.　[2] राज्ञः प्रबोधसमये घण्टावादिकनाम W_2.
[3] जीवन्ति K_5, K_6.

(पा.) अहितान् प्रति—यानमभिक्रमः। युद्धे शत्रूनभिमुखीकृत्याभीतस्य[1] यानमभिक्रमः स्यात्। अनुक्तम्—'सौप्तिकश्च प्रपातश्चावस्कन्दश्च समं त्रयम्'। सुप्ताद्युपरिपातनामानि। 'गग्गोलु' ॥ वैतालिका बोधकराः। वैतालिकनामनी ॥ चाक्रिका घाण्टिकार्थकाः। [2]घाण्टिकनामनी ॥ ९६ ॥

[1] अभीकस्य B_3.　[2] स्तावक° B_3; घण्टावादिक° A_1.

स्युर्मागधास्तु मगधा वन्दिनः स्तुतिपाठकाः ॥ ९७ ॥
संशप्तकास्तु समयात् संग्रामादनिवर्तिनः।

(वि.) स्युरिति—मगध्यन्ति [1]स्तुवन्ति मागधाः। मगधाश्च। 'मगध स्तुतौ'। वन्दन्ते [2]नमस्कुर्वन्ति [स्तोत्रपूर्वकमिति] वन्दिनः। 'वदि अभिवादनस्तुत्योः'। स्तुतिं स्तोत्रं

पठन्तीति स्तुतिपाठकाः । 'पठ व्यक्तायां वाचि'। स्तुतिपाठकनामानि ॥ संशप्तं सशपथं युध्यन्ते युद्धं कुर्वन्ति संशप्तकाः । समयं कृत्वा संग्रामाद् ये न निवर्तन्ते तेषां नाम ॥ ९७ ॥

[1] याचन्ते K_5; K_6 adds राजानं. [2] स्तुवन्ति, तच्छीलाः W_2.

(पा.) स्युर्मागधास्तु मगधाः । वंशक्रमागतस्तावकनामनी[1] । वन्दिनः स्तुतिपाठकाः । स्तुतिपाठकनामनी । चत्वार एकार्थ इति केचित् । संशप्तकास्तु—संग्रामादनिवर्तिनः । [2]अनिवर्तिसमयाद् युध्यमानाः संशप्तकाः स्युः । केषांचिन्मते 'शप [3]आक्रोशे' इति धातुसिद्धत्वात् तालव्यद्वितीयः । 'षप समवाये' इति धातुसिद्धत्वात् केषांचिन्मते[4] दन्त्यद्वितीयः ॥ ९७ ॥

[1] A_1 adds शब्दौ द्वौ चण्डपुत्रप्रभेदौ. [2] आनिवृत्त्य° B_3. [3] 'शप शापे' A_1.
[4] B_3 adds संसप्तक इति.

रेणुर्द्वयोः स्त्रियां धूलिः पांसुर्ना न द्वयो रजः ॥ ९८ ॥
चूर्णे क्षोदः समुत्पिञ्जपिञ्जलौ भृशमाकुले ।

(वि.) रेणुरिति—रियति[1] वायुवशात्[2] गच्छतीति रेणुः । 'रि गतौ'। रेणुशब्दः द्वयोः स्त्रीपुंलिङ्गयोर्वर्तते । धूयते कम्प्यते वायुनेति धूलिः । 'धूञ् कम्पने'। अयं स्त्रीलिङ्गः । पंसति[3] दृष्टिमिति पांसुः । 'पसि नाशने'। अयं पुंलिङ्गः । पांशुरिति वा पाठः । रज्यते वस्त्रादिकमनेनेति रजः । 'रञ्ज रागे'। दिशो रञ्जयतीति वा । सान्तं नपुंसकम् । धूलिनामानि ॥ चूर्ण्यत इति चूर्णः । 'चूर्ण प्रेरणे संकोचने च'। क्षुद्यते संपिष्यते क्षोदः । 'क्षुदिर् संपेषणे'। शर्करादिसहितरजोनामनी ॥ [4]समुत्पिञ्ज्यते भृशं समुत्पिञ्जः । पिञ्जलश्च । 'पिजि हिंसायाम्'। भृशमाकुलस्य सेनादेर्नामनी ॥ ९८ ॥

[1] रिणाति, 'री गतिरेषणयोः' K_5. [2] वशेन K_5. [3] पांसयति K_2, K_6; पंसयति W_2. [4] समुत्पिञ्जयति K_5, K_6.

(पा.) रेणुर्द्वयोः—[1]पांशुर्ना न द्वयो रजः । अकारान्तरजशब्दोऽप्यस्ति । 'शिरोवाचि शिरोऽदन्तो रजोवाचि रजस्तथा' इति विद्वत्कण्ठभूषणाभिधानम् । 'अर्थाः पादरजोपमा गिरिनदीवेगोपमं[2] यौवनम्' इति पुरातनप्रयोगः । धूलिनामानि ॥ [3]चूर्णः क्षोदः । क्षुण्णमृन्नामनी । 'पोडि[4]'॥ समुत्पिञ्ज—भृशमाकुले । अत्यन्तव्याकुलनामनी । 'मिगलासंदडि[4]' ॥ ९८ ॥

[1] पांसुः B_3. [2] वर्गोपमं A_1. [3] चूर्णे B_3. [4] B_3 omits.

पताका वैजयन्ती स्यात् केतनं ध्वजमस्त्रियाम् ॥ ९९ ॥
सा वीराशंसनं युद्धभूमिर्यातिभयप्रदा ।

(वि.) पताकेति—[1]पततीति पताका । 'पत्लृ गतौ' । विजयतां संबन्धिनी[2] वैजयन्ती । 'जी[3] अभिभवे' । केत्यते ज्ञायतेऽनेनायमसाविति केतनम् । 'कित ज्ञाने' । ध्वजतीति[4] ध्वजः । 'ध्वज गतौ' । ध्वजनामानि[5] ॥ वीरा भटा [6]आशंस्यन्तेऽत्रेति वीराशंसनम् । 'शसि इच्छायाम्', 'शसु हिंसायाम्', इति वा धातुः । अतिभयप्रदयुद्धभूमिकानाम ॥ ९९ ॥

---

[1] K$_5$ adds वायुना कम्पते. [2] विजेतुरियं D$_2$, K$_6$. [3] 'ओविजी भयचलनयोः' K$_6$. [4] ध्वजयति K$_6$. [5] केतन° D$_2$, K$_5$. [6] आशंसन्ते K$_2$, K$_6$; आशस्यन्ते K$_5$.

(पा.) पताका वैजयन्ती—ध्वजमस्त्रियाम् । ध्वजनामानि । पटाका नाम देवालयः । 'पटाकावास उच्छ्रितः' इति उणादिवृत्तिकारः[1] । कदली गजवैजयन्ती स्यात् । '[2]कदली गजवैजयन्त्यां च' इति हलायुधः (अ. मा. ५. १७) ॥ अनुक्तम्—'अस्योच्चूडावचूडौ द्वावूर्ध्वाधोमुखकूर्चकौ' । ध्वजस्योर्ध्वमुखकूर्चक उच्चूडः स्यात् अधोमुखकूर्चकोऽवचूडः स्यात्[3] ॥ सा वीराशंसनं—अतिभयप्रदा । अतिभीतिप्रदा[4] समितिर्वीराशंसनं स्यात् । युद्धभूमिमात्रं चेत् पञ्चकम् ।

'रुधिरारुणं कुसुमबाणचितं मदनस्य पञ्चकमिव[5] ज्वलति ।'

इति राघवपाण्डवीयम् (द्विसं. १२. १७) ॥ ९९ ॥

---

[1] वृत्तिः B$_3$. [2] कदली स्याद्वैजयन्ती गजस्य B$_3$. [3] A$_1$ adds उपर्यधश्च लम्बननामनी इत्यर्थः. [4] प्रदात्री A$_1$. [5] मिष° A$_1$; इति B$_3$.

अहं पूर्वमहं पूर्वमित्यहंपूर्विका स्त्रियाम् ॥ १०० ॥
आहोपुरुषिका दर्पाद् या स्यात् संभावनात्मनि ।
अहमहमिका तु सा स्यात् परस्परं यो भवत्यहंकारः ॥१०१॥

(वि.) अहमिति—अहं पूर्वमहं पूर्वमित्यनेकोक्तिरत्रास्तीति अहंपूर्विका । अहमन्येभ्यः पूर्वमिमां क्रियां करोमीति या धावनक्रिया तस्या नाम ॥ अहोपुरुषस्य

भावः आहोपुरुषिका। दर्पादात्मनि अहं पुरुष इति या संभावना तस्या नाम ॥ अहं [2]समर्थोऽहं समर्थ इति वचनमत्रास्तीति अहमहमिका। परस्परं वीराणां योऽहंकारः तस्य नाम ॥ १००–१ ॥

[1] अहो पुरुषोऽहमिति दर्पयुक्तस्य पुरुषस्य भावः F_2, Pt_2. [2] अहं अधिक इत्यहंकारोऽत्रास्तीति D_2.

(पा.) अहं पूर्वमहं—स्त्रियाम्। अहं पूर्वमहं पूर्वमित्यन्योन्यातिक्रमणम् अहंपूर्विका स्यात् ॥ अहोपुरुषिका—संभावनात्मनि। दर्पाद् यदात्मगौरवं तदहोपुरुषिका स्यात्। दीर्घादिश्च [1]स्यात्। 'पुरमथितुराहोपुरुषिका' इति [2]शंकराचार्यवचनम् (सौ. ल. ७) 'आहोपुरुषिकां पश्य मम सद्रत्नकान्तिभिः' इति भट्टिश्च (भ. का. ५. २७) ॥ अहमहमिका—भवत्यहंकारः। अन्योन्याहंकारकरणम् अहमहमिका स्यात् ॥ १००–१ ॥

[1] आदिरपि B_3. [2] B_3 omits शंकर.

द्रविणं तरः सहोबलशौर्याणि स्थाम शुष्मं च।
शक्तिः पराक्रमप्राणौ विक्रमस्त्वतिशक्तिता ॥ १०२ ॥
वीरपाणं तु तत्पानं वृत्ते भाविनि वा रणे।

(वि). द्रविणमिति—द्रवति शत्रुं प्रति अनेनेति द्रविणम्। 'द्रु गतिहिंसाकौटिल्येषु'। तरत्यापदमनेनेति तरः। 'तॄ प्लवनतरणयोः'। सहतेऽनेन [1]शत्रुमिति सहः। 'षह मर्षणे'। उभे अपि सान्ते। बलत्यनेनेति बलम्। 'बल प्राणने।' शूरस्य भावः शौर्यम्। तिष्ठति शत्रुमध्येऽनेनेति स्थाम। शुष्यति रिपुरनेनेति शुष्मम्। 'शुष शोषणे'। उभे नान्ते। शक्नोति शत्रून् हन्तुमनयेति शक्तिः। 'शक्लृ शक्तौ'। [2]परानाक्रमन्तेऽनेनेति पराक्रमः। 'क्रमु पादविक्षेपे'। प्राणिति जीवत्यनेनेति प्राणः। 'अन प्राणने'। सामर्थ्यनामानि ॥ विशेषेण क्रमतेऽनेन विक्रमः। अतिशक्तिताया नाम ॥ वीराणां [3]पानं [4]वीरपाणम्। [5]युद्धावसरे युद्धान्ते वा वीरैः कृतमद्यपाननाम ॥ १०२ ॥

[1] कष्टं K_6. [2] पराक्रामन्ति रिपुमनेन K_5. [3] मद्यपानं W_2. [4] K_5 adds वीरपानमिति वा. [5] युद्धारम्भे D_2.

(पा.) द्रविणं तरः—पराक्रमः प्राणः। शक्तिनामानि ॥ विक्रमस्त्वतिशक्तिता। अतिशक्तिनाम ॥ [1]वीरपानं तु—वा रणे। युद्धान्ते युद्धादौ वा[2] यद्गोष्ठीपानं तद्वीरपानं स्यात्। 'वा भावकरणयोः' (८. ४. १०) इति पाक्षिकणत्वाद् वीरपाणमपि स्यात्।

अनुक्तम्—'वीराणां यद्रणे नृत्तं तस्मिन् वीरजयन्तिका'। रणे[3] वीराणां नृत्तं वीरजयन्तिका स्यात् ॥ १०२ ॥

[1] वीरपाणं B_3.   [2] B_3 omits.   [3] युद्धे A_1.

युद्धमायोधनं जन्यं प्रधनं प्रविदारणम् ॥ १०३ ॥
मृधमास्कन्दनं संख्यं समीकं सांपरायिकम् ।
अस्त्रियां समरानीकरणाः कलहविग्रहौ ॥ १०४ ॥
संप्रहाराभिसंपातकलिसंस्फोटसंयुगाः ।
अभ्यामर्दसमाघातसंग्रामाभ्यागमाहवाः ॥ १०५ ॥
समुदायः स्त्रियः संयत्समित्याजिसमिद्युधः ।

(वि.) युद्धमिति—युध्यत [1]इति युद्धम्। 'युध संप्रहारे'। आभिमुख्येन योधनं [2]आयोधनम्। मत्सरादिना जन्यत इति जन्यम्। 'जनी प्रादुर्भावे'। प्रधनन्ति घ्नन्त्यत्रेति प्रधनम्। 'धन धान्ये'। प्रकर्षेण विदारणमत्रास्तीति [3]प्रविदारणम्। म्रियन्तेऽस्मिन्निति मृधम्। 'मृङ् प्राणत्यागे'। आस्कन्द्यत[4] इत्यास्कन्दनम्। 'स्कन्दिर् गतिशोषणयोः'। संख्यायन्ते षण्डादयः सुभटैरिति संख्यम्। 'चक्षिङ् व्यक्तायां वाचि'। उपसर्गवशात् अयं धातुः वर्जनार्थः। समीयते संगच्छतेऽत्रेति समीकम्। 'इण् गतौ'। संपरायः शत्रुमरणमत्र प्रयोजनं सांपरायिकम्[5]। मरेण सह वर्तत इति समरः। समियर्ति शत्रुणा संगच्छत इति वा। 'ऋ गतौ'। विभज्य न नीयन्तेऽत्रेति अनीकः। रणन्ति भेर्यादयोऽत्रेति रणः। 'रण शब्दे'। कलं विकलं हन्त्यत्रेति कलहः। 'हन हिंसागत्योः'। विगृह्णन्ति विग्रहः[6]। संप्रहरन्त्यन्योन्यमत्र संप्रहारः। अभि संपतन्ति वीरा अत्रेति अभिसंपातः। 'पत्ल गतौ'। कल्यन्ते बाणा अत्रेति कलिः। 'कल किल क्षेपे'। संस्फुटति मस्तकादिरत्रेति संस्फोटः। 'स्फुटिर् विशरणे'। संगता रथयुगा अत्रेति संयुगः। अभ्यामृद्नन्ति अन्योन्यमत्रेति अभ्यामर्दः। 'मृद क्षोदे'। समाघ्नन्त्यत्रेति समाघातः। 'हन हिंसागत्योः'। संग्रामयन्ति परस्परं प्रहरन्त्यत्रेति संग्रामः। 'संग्राम युद्धे'। आहूयन्ते वीरा वीरैरत्रेति आहवः। 'ह्वेञ् स्पर्धायां शब्दे च'। समुदायन्ते संकुलयुद्धदशायां मिलन्त्यत्रेति समुदायः। 'अय पय गतौ'। संयतन्ते नितान्तं प्रयत्नं कुर्वन्तीति संयत्। 'यती प्रयत्ने'। समीयन्ते संगच्छन्तेऽत्रेति समितिः। 'इण् गतौ'। समिच्च। अजन्ति क्षिपन्ति शस्त्राण्यत्रेति आजिः। 'अज गतिक्षेपणयोः'। युध्यन्ते[7] परस्परमिति युत्। 'युध संप्रहारे'। युद्धनामानि ॥ १०३–५ ॥

[1] W$_2$ adds अत्र. [2] आयुध्यत इति F$_2$, Pt$_2$. [3] प्रविद्दणन्ति K$_2$, W$_2$. [4] D$_2$, K$_5$, K$_6$ add प्रबलैर्दुर्बलाः. [5] संपरायन्तेऽस्मिन्निति सांपरायकं, 'अय गतौ' F$_2$, Pt$_2$. [6] विरुद्धं गृह्णन्त्यत्र K$_2$, Pt$_2$. [7] युद्धशब्दवत् युध्शब्दव्युत्पत्तिः K$_5$, K$_6$.

(पा.) युद्धमायोधनं जन्यं—आजिसमिद्युधः। युद्धनामानि ॥ १०३–५ ॥

नियुद्धं बाहुयुद्धं स्यात् तुमुलं रणसंकुले ॥ १०६ ॥
क्ष्वेडा तु सिंहनादः स्यात् करिणां घटना घटा।

(वि.) नियुद्धमिति—शस्त्रादिकमनादेयमिति[1] नियतं युद्धं नियुद्धम्। बाहुयुद्धनाम ॥ ताम्यन्ति सैनिका[2] अत्रेति तुमुलम्। 'तमु ग्लानौ'। रणसंकुलनाम[3] ॥ क्ष्वेड्यत इति क्ष्वेडा। 'क्ष्वेड़ु अव्यक्ते शब्दे'। सिंहानां नाद इव नादः सिंहनादः। योधानां सिंहनादनाम ॥ घाटयन्ति करिणोऽत्रेति घटा[4]। 'घट संघाते'। गजसमूहनाम ॥ १०६ ॥

[1] न धार्यमिति नियमोपेतं K$_5$, K$_6$, W$_2$. [2] सेनाङ्गानि D$_2$, K$_6$. [3] D$_2$ adds रणस्य संकुलं; Pt$_2$ adds 'तुमुलं व्याकुले रणे' इति त्रिकाण्डशेषः. [4] घट्यते करिभिरिति, घटन्ते करिण इति वा K$_5$.

(पा.) नियुद्धं बाहुयुद्धं स्यात्। बाहुयुद्धं [1]नियुद्धं स्यात्। तुमुलं रणसंकुले। संकीर्णयुद्धं तुमुलं स्यात्। 'एडबोव्व'॥ अनुक्तम्—'[2]वण्डालः शूरयोर्युद्धम्'। शूरयोरुभयोर्युद्धं वण्डालः[2] स्यात्। 'वैरारोहो महारणः'। महायुद्धं वैरारोहः स्यात्। क्ष्वेडा तु सिंहनादः स्यात्। [3]कुञ्जरादिभयार्थकवीरारावनाम ॥ करिणां घटना घटा। गजानां संघटना घटा स्यात् ॥ १०६ ॥

[1] बाहुयुद्धनामनी B$_3$. [2] वण्टालः A$_1$. [3] सिन्धुरभीकरणार्थं क्रियमाणविरावनाम A$_1$.

क्रन्दनं योधसंरावो बृंहितं करिगर्जितम् ॥ १०७ ॥
विस्फारो धनुषः स्वानः पटहाडम्बरौ समौ।

(वि.) क्रन्दनमिति—क्रन्दन्ति आक्रोशन्त्यत्रेति क्रन्दनम्। 'क्रदि आह्वाने रोदने च'। योद्धृसंरावनाम ॥ बृंहन्ति गजा अत्रेति बृंहितम्। 'बृहि शब्दे'। करिगर्जितनाम ॥ विस्फरति[1] शत्रुहृदयमनेनेति विस्फारः। 'स्फर स्फुरणे'। धनुः-

स्वाननाम ॥ वाद्यमुखचर्मपटो[2] हन्यतेऽत्रेति पटहः । 'हन हिंसागत्योः' । आडम्बयति शत्रुहृदयमिति आडम्बरः । 'डब डिबि क्षेपे' । [3]युद्धपटहस्य नामनी ॥ १०७ ॥

[1] विस्फुरति K_5, W_2.

[2] मुखगत° W_2.

[3] °आडम्बर° K_5, K_6.

(पा.) क्रन्दनं योधसंरावः । भटानां संरावः क्रन्दनं स्यात् । बृंहितं करिगर्जितम् । गजानां [1]गर्जितं बृंहितं स्यात् । विस्फारो धनुषः स्वानः । चापटंकारो विस्फारः स्यात्[2] । 'स्फुरतिस्फुलत्योर्निर्निविभ्यः' (८. ३. ७६) इति वा षत्वम् ॥ पटहाडम्बरौ समौ । [3]युद्धवाद्यध्वनिनामनी । 'पटहाडम्बरौ युद्धे [4]मङ्गले प्रियवादिका' इति वैजयन्ती (पृ. १४७, श्लो. १३८) । युद्धारम्भवाद्यध्वनिरर्धतूरः स्यात् । 'अर्धतूरो रणोद्यमे' इति वैजयन्ती (पृ. १४७, श्लो. १३९) ॥ १०७ ॥

[1] गर्जनं A_1; गर्जः B_3.

[2] A_1 adds 'स्फुरतिस्फुलत्योर्घञि' (६. १. ४७) इत्यात्वम्.

[3] युद्धमध्य° A_1.

[4] वाद्यध्वनिः A_1.

प्रसभं तु बलात्कारो हठोऽथ स्खलितं छलम् ॥ १०८ ॥
अजन्यं क्लीब उत्पात उपसर्गः समं त्रयम् ।

(वि.) प्रसभमिति—प्रगता सभा युक्तायुक्तचिन्ता[1] अत्रेति प्रसभम् । बलात् करोतीति बलात्कारः । हठतीति हठः । 'हठ [2]प्लुतिशठत्वयोः' । बलात्कारनामानि ॥ स्खलनं स्खलितम् । 'स्खल संचलने' । छयति छिनत्ति [3]कार्यमिति छलम् । 'छो छेदने' । युद्धधर्मविच्छेदननामनी ॥ जन्यत इति जन्यम् । न जन्यम् अजन्यम् । न जने साधु इति वा । उत्पतति अकस्मादायातीति उत्पातः । उपसृज्यते दैवेनेति उपसर्गः । 'सृज विसर्गे' । उत्पातनामानि ॥ १०८ ॥

[1] विचारः F_2, Pt_2.

[2] बलात्कारे K_6.

[3] धर्मानुसारमार्गं K_5.

(पा.) [1]प्रसभस्तु—हठः । अत्यन्तनिर्बन्धनामानि । 'क्लीबे तु प्रसभं हठः' इति गो(बो)पालितः । 'हृतोऽपि[2] चित्ते प्रसभं सुभाषितैः' इत्यलिङ्गे राघवपाण्डवीयम्[3] (द्विसं. १. ६) ॥ अथ स्खलितं छलम् । [4]युद्धमर्यादाविच्छेदननामनी ॥ अजन्यं—समं त्रयम् । प्राणिनां शुभाशुभसूचकभूतविकारनामानि ॥ १०८ ॥

[1] प्रसभं तु B_3.

[2] हृतेऽपि A_1, B_3.

[3] °पाण्डवीयकारः A_1.

[4] पश्चादागतनामानि A_1.

मूर्च्छा तु कश्मलं मोहोऽप्यवमर्दस्तु पीडनम् ॥ १०९ ॥
अभ्यवस्कन्दनं त्वभ्यासादनं विजयो जयः ।

(वि.) मूर्च्छेति—मूर्च्छत्यनया मूर्च्छा । 'मुर्च्छा मोहसमुच्छ्राययोः' । कशति[1] तनूकरोतीन्द्रियप्रचारमिति कश्मलम् । 'कश गतिशातनयोः' । मुह्यत्यनेनेति मोहः । 'मुह वैचित्त्ये' । मूर्च्छानामानि ॥ अवमृद्यत इति अवमर्दः । 'मृद [2]क्षोदे' । पीड्यत[3] इति पीडनम् । 'पीड अवगाहने' । [4]परपीडानामानि ॥ अभ्यवस्कन्द्यतेऽनेनेति अभ्यवस्कन्दनम् । 'स्कन्दिर् गतिशोषणयोः' । अभ्यासाद्यतेऽनेनेति अभ्यासादनम् । 'षद्लृ विशरणगत्यवसादनेषु' । बलादाक्रमणनामनी ॥ विशेषेण जयः विजयः[5] । जयतीति जयः । 'जि जये' । विजयनामनी ॥ १०९ ॥

[1] K_5 adds शातयति.
[2] मर्दने K_6.
[3] K_5, K_6 add अनेन.
[4] W_2 omits पर.
[5] विजयतेऽनेन K_5.

(पा.) मूर्च्छा तु कश्मलं मोहोऽपि । मूर्च्छानामानि ॥ अवमर्दस्तु पीडनम् । पीडननाम ॥ अभ्यवस्कन्दनं त्वभ्यासादनम् । [1]शत्रुकृतपुरादिनिर्बन्धननामनी । '[2]मुट्टिडे' ॥ विजयो जयः । जयनामनी ॥ १०९ ॥

[1] B_3 omits शत्रुकृत°.
[2] 'मुत्तिगे' A_1.

वैरशुद्धिः प्रतीकारो वैरनिर्यातनं च सा ॥ ११० ॥
प्रद्रावोद्द्रावसंद्रावसंदावा विद्रवो द्रवः ।
अपक्रमोऽपयानं च रणे भङ्गः पराजयः ॥ १११ ॥

(वि.) वैरशुद्धिरिति—वैरस्य शुद्धिः वैरशुद्धिः । प्रतिकरणं प्रतीकारः । [1]वैरं [2]निर्यास्यतेऽनेनेति वैरनिर्यातनम् । 'या प्रापणे' । प्रत्यपकारनामानि ॥ प्रद्रवणं प्रद्रावः । उद्द्रावः । संद्रावः । संदावः । विद्रवः । द्रवश्च । 'द्रु गतौ,' 'दु गतौ च' । अपक्रमणम् अपगमनम् अपक्रमः । अपयात्यनेनेति अपयानम् । 'क्रमु पादविक्षेपे' । 'या प्रापणे' । रणे पलायननामानि ॥ पराजयतेऽनेनेति पराजयः[3] । 'जि अभिभवे' । रणे शत्रुकृतभङ्गनाम ॥ ११०–११ ॥

[1] वैरस्य निर्यातनं F_2, Pt_2.
[2] W_2 adds निष्कास्यते.
[3] पराजयनं Pt_2.

(पा.) [1]वैरशुद्धिः—वैरनिर्यातनं च सा। वैरनिर्यापणनामानि ॥ 'पगसाधिंचुट[2]' ॥ प्रद्रावोद्द्राव—अपक्रमोऽपयानं च। रणात्पलायननामानि। विप्रयाणं पलायनम्। इत्येते द्वे च॥ रणे भङ्गः पराजयः। युद्धे यो भङ्गः स पराजयः स्यात् ॥ ११०–११ ॥

---

[1] °शुद्ध: A$_1$. [2] B$_3$ omits.

पराजितपराभूतौ त्रिषु नष्टतिरोहितौ।
प्रमापणं निबर्हणं निकारणं निशारणम् ॥ ११२ ॥
प्रवासनं परासनं निषूदनं निहिंसनम्।
निर्वासनं संज्ञपनं निर्ग्रन्थनमपासनम् ॥ ११३ ॥
निस्तर्हणं निहननं क्षणनं परिवर्जनम्।
निर्वापणं विशसनं मारणं प्रतिघातनम् ॥ ११४ ॥
उद्वासनप्रमथनक्रथनोज्जासनानि च।
आलम्भपिञ्जविशरघातोन्माथवधा अपि ॥ ११५ ॥

(वि.) पराजित इति—[1]पराजयं प्राप्तः पराजितः। पराभूयते शत्रुणा तिरस्क्रियते स्म पराभूतः। शत्रुणा रणे भग्नस्य नामनी ॥ नश्यते स्म, अदर्शनं प्राप्तो नष्टः। 'णश अदर्शने'। तिरोधीयतेऽन्तर्धीयते स्म तिरोहितः। 'डुधाञ् धारणपोषणयोः' तिरोऽदर्शनं हितः गतो वा। 'हि गतौ'। रणात् यत्र कुत्र वा पलायितस्य नामनी ॥ प्रमीयते प्रमापणम्[2]। 'मीञ् हिंसायाम्'। नितरां बर्हणं निबर्हणम्। 'बर्ह परिभाषणहिंसादानेषु'। नितरां क्रियत इति निकारणम्। 'कृञ् हिंसायाम्'। नितरां शीर्यत इति निशारणम्। 'शॄ हिंसायाम्'। प्रवास्यते प्रवासनम्[3]। उद्वास्यते उद्वासनम्। 'वस स्नेहमोहच्छेदापहरणेषु'। परास्यते परासनम्। 'असु क्षेपणे'। निषूद्यते निषूदनम्। 'षूद क्षरणे हिंसायां च'। नितरां हिंस्यते निहिंसनम्। 'हिसि हिंसायाम्'। निर्वाप्यते निर्वापणम्। 'ओवै शोषणे'। संज्ञायते संज्ञपनम्। 'ज्ञा अवबोधने'। निर्ग्रथ्यते निर्ग्रन्थनम्। 'ग्रथि कौटिल्ये'। अपास्यतेऽपासनम्। 'असु क्षेपणे'। निस्तृह्यते निस्तर्हणम्। 'तृहि हिंसायाम्'। नितरां हन्यते निहननम्। 'हन हिंसागत्योः'। क्षण्यते क्षणनम्। 'क्षणु हिंसायाम्'। परिवर्ज्यते[4] परिवर्जनम्। 'वृजी वर्जने'। प्रवासनशब्दवत् निर्वासनशब्दः। विशस्यते विशसनम्। 'शसु हिंसायाम्'। मार्यते मारणम्।

'मृङ् प्राणत्यागे'। प्रतिहन्यते प्रतिघातनम्। 'हन हिंसागत्योः'। उद्वास्यते उद्वासनम्। 'वस स्नेहमोहच्छेदापहरणेषु'। प्रमथ्यते प्रमथनम्। 'मथे [5]हिंसायाम्'। क्रथ्यते क्रथनम्। 'क्रथ हिंसायाम्'। उज्जास्यते उज्जासनम्। 'जसु हिंसायाम्'। आलभ्यते आलम्भः। 'डुलभष् प्राप्तौ'। पिञ्जनं पिञ्जः। 'पिजि[6] हिंसायाम्'। विशरणं विशरः। 'शॄ हिंसायाम्'। हननं घातः। उन्मथनम् उन्माथः। 'मथे हिंसायाम्'। हन्यते वधः। 'हन हिंसागत्योः'। अत्र केचन धातवः उपसर्गवशात् हिंसार्थाः। वधनामानि ॥ ११२–१५ ॥

[1] पराजीयते स्म F_2, Pt_2. [2] प्रकर्षेण मापनं D_2, Pt_2. [3] W_2 adds निर्वासनं च. [4] K_5, W_2 add शरीरात्. [5] 'मथे विलोडने' K_3, K_6. [6] हिंसाबलादाननिकेतेषु K_6, W_2.

(पा.) पराजितपराभूतौ। पराजयवतो नामनी ॥ त्रिषु नष्टतिरोहितौ। विलीनपुरुषनामनी। प्रमापणं निबर्हणं—उन्माथवधा अपि। मारणनामानि ॥ ११२–१५ ॥

स्यात् पञ्चता कालधर्मो दिष्टान्तः प्रलयोऽत्ययः ।
अन्तो नाशो द्वयोर्मृत्युर्मरणं निधनोऽस्त्रियाम् ॥ ११६ ॥

(वि.) स्यादिति—पञ्चानां [1]धातूनां भावः पञ्चता। कालस्य[2] धर्मः कालधर्मः। दिष्टस्य प्रारब्धकर्मणोऽन्तो दिष्टान्तः। प्रलीयतेऽत्रेति प्रलयः। 'ली श्लेषणे'। अत्येति गच्छतीति अत्ययः। 'इण् गतौ'। अन्त्यते बध्यते [3]अन्तः। 'अति बन्धने'। नश्यति [4]नाशः। 'णश अदर्शने'। मरणं मृत्युः। म्रियतेऽनेनेति मरणम्। 'मृङ् प्राणत्यागे'। निवृत्तो धनसंबन्धोऽत्र निधनम्। प्राणत्यागस्य नामानि ॥ ११६ ॥

[1] भूतानां W_2, Pt_2. [2] F_2, Pt_2 add यमस्य. [3] एति K_6. [4] नश्यते Pt_2.

(पा.) स्यात् पञ्चता—निधनोऽस्त्रियाम्। मरणनामानि[1]। '[2]हिंसा संस्था दीर्घनिद्रा भूमिलाभो निमीलनम्'। एतानि पञ्च च ॥ ११६ ॥

[1] B_3 adds प्रलयोऽस्त्री. [2] B_3 adds अरतिः काल इति पाठान्तरात्; एते द्वे च.

परासुप्राप्तपञ्चत्वपरेतप्रेतसंस्थिताः ।
मृतप्रमीतौ त्रिष्वेते चिता चित्या चितिः स्त्रियाम् ॥११७॥
कबन्धोऽस्त्री क्रियायुक्तमपमूर्धकलेबरम् ।

(वि.) परासुरिति—परागता असवः प्राणा यस्य परासुः । [1]प्राप्तं पञ्चत्वं येन प्राप्तपञ्चत्वः । परां दशामितः परेतः । 'इण् गतौ' । प्रकृष्टां दशामितः प्रेतः । संतिष्ठते [2]स्म संस्थितः । 'ष्ठा गतिनिवृत्तौ'। म्रियते स्म मृतः । 'मृङ् प्राणत्यागे' । प्रमीयते स्म प्रमीतः । 'मीङ् हिंसायाम्' । मृतस्य नामानि ॥ एते पूर्वोक्ताः परास्वादयः प्रमीतान्ताः[4] त्रिषु लिङ्गेषु वर्तन्ते ॥ चीयन्ते एकत्र काष्ठानि पुञ्जीक्रियन्ते चिता । चित्या । चितिश्च । 'चिञ् चयने' । प्रेतदहनार्थं बहिरुपकल्पितस्य काष्ठचयस्य नामानि ॥ [5]कं शिरोऽस्य बध्यतेऽत्रेति कबन्धः । 'बन्ध बन्धने'। नृत्तक्रियावतः शिरोविहीनस्य शरीरस्य नाम ॥ ११७ ॥

[1] प्राप्तः पञ्चभूतभावः K_6, W_2. [2] अत्र K_6; अस्मिन् W_2. [3] प्रमीनाति स्म F_2, Pt_2. [4] W_2 adds शब्दाः. [5] विरुद्धलक्षणया कस्य शिरसो बन्धोऽस्यास्तीति K_5, K_6, W_2.

(पा.) परासुप्राप्तपञ्चत्व—मृतप्रमीतौ त्रिष्वेते । मृतनामानि । चिता चित्या चितिः स्त्रियाम् । चितानामानि । अनुक्तम्—'कटः शवरथः [1]खाटिः' । चित्युपरिकटाद्यास्तरणनामानि ॥ कबन्धोऽस्त्री—अपमूर्धकलेबरम् । प्रायः सहस्रनाशे समरमुखे नृत्यति कबन्ध इति क्रियायुक्तमपगतशिरः[2] शरीरं कबन्धः स्यात् । अपगतशिरः[2] शरीरमात्रमपि कबन्धः स्यात् । 'रुण्डोऽशिराः कबन्धोऽस्त्री' इति वैजयन्ती (पृ. १२२, श्लो. २१६) ॥ ११७ ॥

[1] खाटः B_3. [2] गतशिरं B_3.

श्मशानं स्यात् पितृवनं कुणपः शवमस्त्रियाम् ॥ ११८ ॥
प्रग्रहोपग्रहौ बन्द्यां कारा स्याद् बन्धनालये ।

(वि.) श्मशानमिति—शवानां शयनं मशानम् । पृषोदरादिः । पितॄन् प्रेतान् वनति संभजतीति पितृवनम् । 'वन षण संभक्तौ' । प्रेतदाहप्रदेशनामनी ॥ [1]कुणं शब्दम् आश्रयत्वेन पातीति कुणपः । 'पा रक्षणे' । शवति यात्यस्मात् जीव इति शवम् । 'शव गतौ' । मृतशरीरनामनी ॥ प्रगृह्यते बलादिना गृध्यते[2] प्रग्रहः । उपग्रहश्च । 'ग्रह उपादाने' । बदति कारागृहे तिष्ठतीति बन्दी । 'बद स्थैर्ये' ।

कारागृहस्थनामानि ॥ कीर्यते क्षिप्यते राजपुत्रादिरत्रेति कारा । ‘कॄ विक्षेपे’। बन्धनालयनाम ॥ ११८ ॥

---

[1] कुणति, ‘कुण शब्दोपकरणयोः’ D_2, K_3. [2] बध्यते D_2, K_5, W_2.

(पा.) श्मशानं स्यात् पितृवनम्। प्रेतवासस्थलनामनी। शवानां शयनं श्मशानमिति व्युत्पत्त्या[1] श्मशानशब्दो द्वितालव्यः। ‘वनं पुरगामिश्रका . . .’ (८. ४. ४) इत्यादिसूत्रनियमेन पितृवनशब्दस्तवर्गान्त्यः। कुणपः शवमस्त्रियाम्। मृतशरीरनामनी ॥ प्रग्रहोपग्रहौ[2] बन्द्याम्। बन्दिनामानि। ‘चेर’। कारा स्याद्बन्धनालये। बन्दिगृहनाम। कारा सिंहावलोकनन्यायेन[3] बन्धननामापि स्यात्।

‘कारा[4] बन्धनगेहे स्यात् कारा बन्धनमुच्यते।’

इति शाश्वतः (पृ. २४, श्लो. २७२) ॥ ११८ ॥

---

[1] व्युत्पन्नत्वात् A_1. [2] अवग्रहः A_1. [3] अवलोकनक्रमेण A_1. [4] ‘कारा बन्धनशालायां कारा बन्धनमात्रके’ इति मुद्रितग्रन्थे.

पुंसि भूम्न्यसवः प्राणाश्चैवं जीवोऽसुधारणम् ॥ ११९ ॥
आयुर्जीवितकालो ना जीवातुर्जीवनौषधम् ।

इति क्षत्रियवर्गः

(वि.) पुंसीति—अस्यन्ते[1] शरीरादाविति असवः। ‘असु क्षेपणे’। प्राणिति[2] लोकोऽमीभिरिति प्राणाः। ‘अन प्राणने’। असुप्राणशब्दौ पुंसि भूम्नि च वर्तेते। प्राणनामनी ॥ जीवत्यनेनेति जीवः। ‘जीव प्राणधारणे’। असूनां धारणम् असुधारणम्। प्राणधारणनाम ॥ [3]एतीत्यायुः। ‘इण् गतौ’। सान्तोऽयं नपुंसकलिङ्गः। जीवितकालनाम ॥ जीवत्यनेनेति जीवातुः। जीवनस्य औषधम्। जीवनौषधनाम[4] ॥ ११९ ॥

इति श्रीलिङ्गयसूरिविरचितायाम् अमरकोशपदविवृतौ क्षत्रियवर्गः

---

[1] F_2, Pt_2 add क्षिप्यन्ते. [2] प्राणन्ति Pt_2. [3] एष्यति K_5, K_6. [4] जीवयतीति जीवनम्। जीवनं च तदौषधं च Pt_2.

(पा.) पुंसि भूम्नि—प्राणाश्चैवम्। प्राणनामनी। 'धारणमु'। भूमवचनं कैश्चिदनङ्गीकृतम्। 'जनादसोः समानतः'। इति नलोदयः (२. ३६) 'निघ्नुः (?) प्रियं प्राणमिवाभिमानम्' इति चन्द्रकाव्यम्। 'हृषीकमिन्द्रियं प्राणः प्राणा ना भूम्नि चासवः'। 'प्राणस्तु प्रणवे जीवे जीविते परमात्मनि' इति वैजयन्ती[1] (पृ. ९९, श्लो. २०३; पृ. २१७, श्लो. ३८)॥ जीवोऽसुधारणं—जीवितकालः। प्राणधारणनामानि। ना जीवातुर्जीवनौषधम्। जीवनौषधं जीवातुः स्यात् ॥ ११९॥

इति [2]श्रीवत्सनृसिंहसूरिसुतमल्लिनाथसुधीविरचितेऽमरपदपारिजाते क्षत्रियवर्गः

---

[1] प्राणो जीवो जीवायां कथ्यते A_1; जीवः प्राणे त्रयी ना तु जन्तौ B_3. [2] नरसिंह° A_1.

९. वैश्यवर्गः

ऊरव्या ऊरुजा अर्या वैश्या भूमिस्पृशो विशः।
आजीवो जीविका वार्ता वृत्तिर्वर्तनजीवने ॥ १ ॥

(वि.) अथ क्रमप्राप्तं वैश्यवर्गमुपक्रमते ऊरव्या इति—ब्रह्मण [1]ऊरुस्थाने भवा ऊरव्याः। [2]ऊरुजाश्च। अरणीयाधिकारित्वात् भञ्जकैरधिगम्यन्ते अर्याः[3]। 'ऋ गतौ'। विशोऽपत्यानि वैश्याः[4]। [5]भूमिं स्पृशन्ति लाङ्गलादिना भूमिस्पृशः[6]। विशन्ति आपणादिकं विशः। 'विश प्रवेशने'। वैश्यनामानि॥ [7]आजीवत्यनेनेति आजीवः। जीविका च। 'जीव प्राणधारणे'। वृत्तिः प्राणधारणा, सा अस्यामस्तीति वार्ता। वर्ततेऽनयेति वृत्तिः। वर्तनं च। 'वृतु वर्तने'। जीवन्त्यनेनेति जीवनम्। जीवननामानि॥ १॥

---

[1] ऊर्वोः Pt_2. [2] ऊर्वोर्जाताः D_2, Pt_2. [3] अरणीयाः Pt_2. [4] विश एव Pt_2. [5] Pt_2 adds क्षेत्रसंस्काराय. [6] K_6 adds 'स्पृश स्पर्शने'. [7] आजीवन्ति प्राणिनः D_2, Pt_2.

(पा.) ऊरव्या ऊरुजा—विशः। वैश्यनामानि ॥ आजीवो जीविका—जीवने। जीवननामानि। वृत्तिशब्दसाहचर्याद् वर्तनशब्दः स्त्रीलिङ्गोऽपि स्यात्। 'वर्तनी वृत्तिमार्गयोः' इति वैजयन्ती (पृ. २४८, श्लो. २१)॥ १॥

स्त्रियां कृषिः पाशुपाल्यं वाणिज्यं चेति वृत्तयः।
सेवा श्ववृत्तिरनृतं कृषिरुञ्छशिलं त्वृतम् ॥ २ ॥

(वि.) स्त्रियामिति—लाङ्गलादिना कर्षणं कृषिः। 'कृष विलेखने'। पशून् पालयतीति पशुपालः, तस्य कर्म पाशुपाल्यम्[1]। वणिजो भावः[2] वाणिज्यम्। इति शब्दात् कुसीदविजययज्ञप्रतिग्रहसेवाशुश्रूषादयो वृत्तयो भवन्ति। शुनो वर्तनमिव [3]कष्टत्वात् श्ववृत्तिः। सेवनं सेवा। 'षेवृ सेवने'। सेवावृत्तिनाम ॥ अनृतवत् पापहेतुत्वाद् अनृतम्। कृषिवृत्तिनाम ॥ उलूखलसमीपे पतत्तण्डुलकणानादाय जीवनम् उञ्छम्। उञ्छीयते उञ्छम्। 'उच्छि उञ्छे'। शिलनं शिलम्। 'शिल उञ्छे'। क्षेत्रे त्यक्तकणिकानादाय जीवनं शिलम्। उञ्छं च शिलं च उञ्छशिलम्। तदेव ऋतमित्युच्यते। अर्यते स्तूयत इति ऋतम्। 'ऋ शब्दे'। उञ्छवृत्तिनामानि ॥ २॥

[1] पशुपालस्य भावः K_2, K_5, K_6. [2] कर्म Pt_2. [3] F_2, Pt_2 add दैन्यादिना अपकृष्टत्वात्.

(पा.) स्त्रियां कृषिः—वृत्तयः। इतिशब्दः प्रकारवचनः। कृषिपाशुपाल्यवाणिज्यानीत्येवंप्रकाराः वृत्तयः॥ सेवा श्ववृत्तिः। सेवा परप्रेष्यता। सा गर्हितत्वात् श्ववृत्तिः। 'शुनो[1] वृत्तिः स्मृता सेवा गर्हिता सा द्विजन्मनाम्' इति मनुः (म. स्मृ. ४. ६)॥ अनृतं कृषिः[2]। सा कृषिः कृषिकर्म अनृतं स्यात्। उञ्छशिलं त्वृतम्। उञ्छो [3]धान्यांश आदानमिति लूनकेदारावशिष्टधान्यस्यादानम्। 'उञ्छः कणिशाद्यर्जनं [4]शिलम्' इति लूनकेदारावशिष्टकणिशार्जनम्।

'शिलं किमनलं भवेदनलमौदरं बाधितुं
पयः प्रसृतिपूरकं किमु न धारकं सारसम्।
अयत्नमलमल्लकः पथि पटच्चरं कच्चरं
[5]भजन्ति हिं मुधावुधा अहह कुक्षितः कुक्षितः ॥' (वै. प. श्लो. १)

तदुभयं मिलितं चेदुञ्छशिलं शिलोञ्छोऽपि स्यात्। 'यन्मतिधात्रीविलूने शिलोञ्छमिव कुर्वते कवयः' इति। एवंविधा वृत्तिः ऋतं स्यात्॥ २॥

[1] ‘सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेत्’ इति मुद्रितग्रन्थे (पृ. ११३). [2] B_3 adds प्रमृतं कृषिः । कृषिः प्रमृतं स्यात्. [3] उञ्छः कणशः स्वीकारः B_3. [4] शिलं केदारसक्तकणिशाद्यर्जनम् A_1; B_3 adds ‘उञ्छः कणश आदानं कणिशाद्यर्जनं शिलम्’. [5] भजन्ति हि मुधा वुधा° B_3.

द्वे याचितायाचितयोर्यथासङ्ख्यं मृतामृते ।
सत्यानृतं वणिग्भावः स्यादृणं पर्युदञ्चनम् ॥ ३ ॥
उद्धारोऽर्थप्रयोगस्तु कुसीदं वृद्धिजीविका ।

(वि.) द्वे इति—याच्ञादशायामतिकष्टत्वात् मरणसमदुःखतया [1]मृतवद्भवतीति मृतम् । याच्ञावृत्तिनाम ॥ याच्ञाया अभावाद् अमृतम् । अयाचितवृत्तिनाम ॥ सत्यं चानृतं च विद्येते अस्मिन्निति [2]सत्यानृतम् । वाणिज्यवृत्तिनाम ॥ कालान्तरेऽर्यते प्राप्यत इति ऋणम् । ‘ऋ[3] गतिप्रापणयोः’ । पर्युदञ्च्यते परिप्राप्यत इति पर्युदञ्चनम् । ‘अञ्चु गतिपूजनयोः’ । उद्ध्रियते गृह्यत इति उद्धारः । ‘हृञ् हरणे’ । ऋणनामानि ॥ अर्थस्य प्रयोगोऽर्थप्रयोगः । कुत्सितं सीदति कदाचिन्मूलधननाशे कुसीदम् । ‘षद्लृ विशरणगत्यवसादनेषु’ । वृद्धिरूपा जीविका वृद्धिजीविका । वृद्धिजीविकानामानि ॥ ३ ॥

[1] निर्जीववत् K_2, K_6, W_2. [2] किंचित् सत्यं किंचिदसत्यं F_2, Pt_2. [3] ‘ऋ गतौ’ वा धातुः K_3.

(पा.) द्वे याचिता—मृतामृते । याचितायाचितयोरिति भावे निष्ठा । याच्ञा वृत्तिः मृतं स्यात् । अयाच्ञावृत्तिरमृतं स्यात् । अनुक्तम्—‘पाशुपाल्यं जीववृत्तिः’ । पाशुपाल्यं गवाश्वादिपोषणम् । तदेव[1] जीववृत्तिः स्यात् ॥ सत्यानृतं वणिग्भावः । वणिग्भावो वाणिज्यम् । तत् सत्यानृतं स्यात् । स्यादृणं पर्युदञ्चनम् । ऋणनामनी । ‘अप्पु[1]’ ॥ उद्धारः । [2]अवृद्धिकमृणमुद्धारः स्यात् । ‘तदवृद्धिकमुद्धारः कुसीदं तु सवृद्धिकम्’ इति वैजयन्ती (पृ. १२३, श्लो. ४) ॥ अर्थप्रयोगस्तु—वृद्धिजीविका । वृद्धेर्नामानि[3] । ‘वड्डि’ । सा च [4]कालिकाद्यनेकभेदभिन्ना ।

‘सा[5] कायिकान्वहं देया प्रतिमासं तु कालिका ।
कारिका[6] तु स्वयं दृष्टा चक्रवृद्धिस्तु[7] वृद्धिजा ॥’

वृद्ध्या जीविका वृद्धिजीविका । सा अर्थप्रयोगः कुसीदं च स्यात् ॥ ३ ॥

[1] B_3 omits. [2] अवृद्धिकऋणं A_1. [3] नामधेयानि A_1. [4] सांकालिका A_1. [5] सांकालिका A_1, B_3. [6] कारिता B_3. [7] चक्रवृत्तिः B_3.

याच्ञयाप्तं याचितकं निमयादापमित्यकम् ॥ ४ ॥
उत्तमर्णाधमर्णौ द्वौ प्रयोक्तृग्राहकौ क्रमात् ।
कुसीदको वार्धुषिको वृद्ध्याजीवश्च वार्धुषिः ॥ ५ ॥

(वि.) याच्ञयेति—याच्ञया[1] आप्तं याचितकम्। याच्ञालब्धद्रव्यनाम ॥ अपमीयते दीयते अपमित्यकम्। तदेव आपमित्यकम्। ‘मेङ् प्रणिदाने’। निमयात् अर्थविनिमयात् प्राप्यद्रव्यनाम ॥ ऋणे [2]उत्कृष्टः उत्तमर्णः। वृद्ध्यर्थं धनप्रयोक्तृनाम। [3]ऋणेऽधमः अधमर्णः। धनग्राहकनाम ॥ कुसीदम् अल्पवृद्ध्या गृहीतं [4]बहुवृद्ध्यर्थं प्रयच्छतीति कुसीदकः। वृद्ध्या जीवतीति वार्धुषिकः। वार्धुषिश्च। गर्ह्यवृद्धिमाजीवतीति वृद्ध्याजीवः। अल्पवृद्ध्या अन्यहस्तादादाय अन्यस्य बहुवृद्ध्यर्थं प्रयोक्तुर्नामानि ॥ ४–५ ॥

[1] याचितेन D_2. [2] उत्तम: K_5. [3] ऋणेन W_2. [4] D_2, K_2, W_2 add धनं.

(पा.) याच्ञयाप्तं याचितकम्। निमयेन विना याच्ञयानीतं याचितकं स्यात्। ‘[1]कुदुवलेक्तेर्च्चिनदि’। निमयादापमित्यकम्। निमयादानीतम् आपमित्यकं [2]स्यात्। ‘कुदवयिच्चि तेच्चिनदि[1]’। उत्तमर्णाधमर्णौ—क्रमात्। प्रदाता प्रयोक्ता, ग्रहीता ग्राहकः[1]। तौ द्वौ यथाक्रमम् उत्तमर्णः[3] अधमर्णश्चेत्युच्येते ॥ कुसीदको वार्धुषिको—वार्धुषिः। वृद्ध्या जीवतो नामानि[4]। कुसीदश्च द्वैगुणिको वार्धुषी च प्रयोक्तरि। एतानि चत्वारि च ॥ ४–५ ॥

[1] B_3 omits. [2] A_1 adds स्ववस्तुन उत्तमर्णसमीपे निक्षेपो निमयः. [3] B_3 adds च. [4] B_3 adds ‘वृद्धेर्वृधुषिभावो वक्तव्यः’ (वा. ४. ४. ३०) इति वार्धुषिकः.

क्षेत्राजीवः कर्षकश्च कृषकश्च कृषीवलः ।
क्षेत्रं व्रैहेयशालेयं व्रीहिशाल्युद्भवोचितम् ॥ ६ ॥

(वि.) क्षेत्राजीव इति—क्षेत्रेणाजीवतीति क्षेत्राजीवः। ‘जीव प्राणधारणे’। [1]कर्षतीति कर्षकः। ‘कृष विलेखने’। कृषकश्च[2]। कृषिरस्यास्तीति कृषीवलः। कृषिकनामानि ॥ व्रीह्युद्भवोचितं क्षेत्रं व्रैहेयम्। शाल्युद्भवोचितं क्षेत्रं शालेयम् ॥ ६ ॥

[1] कृषिं करोति D_2, K_6, W_2. [2] कृषिकः K_5, K_6.

(पा.) क्षेत्राजीवः कर्षकश्च—कृषीवलः। [1]कृष्या जीवतो नामानि। क्षेत्रं व्रैहेयशालेयं—उद्भवोचितम्। व्रीहीणां शालीनां च भवने क्षेत्रे[2] व्रैहेयशालेये स्याताम्॥ ६॥

[1] A$_1$ adds वृत्तिभेदानुक्त्वा वैश्यवृत्तिभूतकृषिपाशुपाल्यवाणिज्यानि वक्ष्यति. [2] भवनक्षेत्रे A$_1$.

यव्यं यवक्यं षष्टिक्यं यवादिभवनं हि तत्।
तिल्यतैलीनवन्माषोमाणुभङ्गाद् द्विरूपता॥ ७॥

(वि.) यव्यमिति—[1]यवोद्भवोचितं क्षेत्रं यव्यम्। यवकाः शालिविशेषाः। तद्भवनोचितं क्षेत्रं यवक्यम्। षष्टिकानां[2] भवनोचितं क्षेत्रं षष्टिक्यम्। तिलभवनोचितं क्षेत्रं तिल्यम्। तैलीनं च। माषभवनोचितं क्षेत्रं माष्यम्। माषीणं च। उमानां अतसीनां भवनोचितं क्षेत्रम् उम्य। औमीनं च। अणूनां[3] भवनोचितं क्षेत्रम् अणव्यम्। आणवीनं च। [4]भङ्गानां भवनोचितं क्षेत्रं भङ्ग्यम्। भाङ्गीनं च॥ ७॥

[1] यवानां F$_2$, Pt$_2$. [2] D$_2$ adds षष्टिरात्रेण पक्वानां. [3] D$_2$ adds सर्षपादीनां. [4] तृणविशेषाणां D$_2$.

(पा.) यव्यं यवक्यं—भवनं हि यत्। यवयवकषष्टि[1]कभवनक्षेत्राणि यव्ययवक्यषष्टिक्यानि स्युः॥ तिल्यतैलीनवत्—द्विरूपता। तिलानां भवने क्षेत्रे तिल्यतैलीने स्याताम्। [2]तद्वत् माषाणां भवनक्षेत्रे माष्यमाषीणे स्याताम्। उमानां भवनक्षेत्रे उम्यौमीने[3], अणूनां भवनक्षेत्रेऽणव्याणवीने, भङ्गानां भवनक्षेत्रे भङ्ग्यभाङ्गीने च स्याताम्॥ ७॥

[1] षष्टिकानां. [2] A$_1$ adds द्विरूपतापि; तद्वन्माषादीनामपि द्विरूपता स्यात् B$_3$. [3] A$_1$ adds स्याताम्.

मौद्गीनकौद्रवीणादि शेषधान्योद्भवक्षमम्।
(शाकक्षेत्रादिके शाकशाकटं शाकशाकिनम्)
बीजाकृतं तूप्तकृष्टं सीत्यं कृष्टं च हल्यवत्॥ ८॥

(वि.) मौद्गीनमिति—मुद्गभवनोचितं क्षेत्रं मौद्गीनम्, कोद्रवभवनोचितं क्षेत्रं कौद्रवीणम्। आदिग्रहणात् मसूरभवनोचितं क्षेत्रं मासूरीणमित्यादयो गृह्यन्ते। एतानि

त्रैहेयादीनि कौद्रवीणान्तानि प्रत्येकं तत्तद्धान्योद्भवोचितक्षेत्रनामानि। तिल्यमाष्योम्याण-व्यभङ्ग्यानां तु प्रत्येकं द्वे द्वे नामनी भवतः। शाकभवनोचितं क्षेत्रं शाकशाकटं शाकशाकिनमिति च द्वे [1]नामनी भवतः॥ बीजावापेन सहैव क्रियते कृष्यते बीजाकृतम्। उप्तेन बीजेन सह कृष्टम् उप्तकृष्टम्। आदौ उप्तं पश्चात् कृष्टमिति वा। बीजावापेन सह कृष्यमाणक्षेत्रनामनी॥ सीतया[2] संगतं सीत्यम्। हलेन कृष्यते कृष्टम्। हलेन कृष्टं हल्यम्। हललिखितक्षेत्रनामानि॥ ८॥

[1] शाकभवनोचितक्षेत्रनामनी W_2. [2] Pt_2 adds लाङ्गलपद्धतिः.

(पा.) मौद्गीनकौद्रवीणादि—क्षमम्। मुद्गकोद्रवादिशेषधान्यानां भवनक्षेत्राणां मौद्गीनकौद्रवीणादीनि स्युः। अनुक्तम्—'इक्षुशाकटमिक्षूणां क्षेत्रमिक्षुवणं वनम्'। इक्षूणां क्षेत्रमिक्षुशाकटं स्यात्। इक्षूणां वनमिक्षुवणं स्यात्। 'प्रनिरन्तःशरेक्षुप्लक्षाम्र[1]...' (८. ४ ५) इत्यादिना णत्वम्॥ बीजाकृतं तूप्तकृष्टम्। पूर्वं बीजैरुप्तं [2]पश्चाल्लाङ्गलेन कृष्टं क्षेत्रं बीजाकृतं स्यात्। 'वित्तिप्राशिनदि'। सीत्यं कृष्टं च हल्यवत्। हलेनैकवारं कृष्टक्षेत्रनामानि॥ ८॥

[1] A_1 adds °कार्ष्यखदिरपीयूक्षाभ्योऽपीति. [2] A_1 adds पश्चाद्विशालमुखनिरीषयुक्त°.

त्रिगुणाकृतं तृतीयाकृतं त्रिहल्यं त्रिसीत्यमपि तस्मिन्।
द्विगुणाकृते तु तत् सर्वं द्विपूर्वं शम्बाकृतमपीह॥ ९॥

(वि.) त्रिगुणाकृतमिति—त्रिवारं कृष्टं त्रिगुणाकृतम्। तृतीयाकृतम्। त्रिहल्यम्। त्रिसीत्यं च। त्रिवारकृष्टक्षेत्रनामानि॥ द्विवारकृष्टक्षेत्रे पूर्वोक्तानि सर्वाणि नामान्यपि वर्तन्ते। इह द्विवारकृष्टक्षेत्रे न केवलं तावन्त्येव नामानि, किंतु शम्बाकृतम् इति नामापि वर्तते। शम्बम् अनुलोमेन प्रतिलोमेन च कृष्टं शम्बाकृतम्[1]। कथम्। द्विगुणाकृतम्। द्वितीयाकृतम्। द्विहल्यम्। द्विसीत्यम्। द्विवारकृष्टक्षेत्रनामानि॥ ९॥

[1] शम्बाकृतं हि सम्यक् कृष्ट्वा पुनस्तिर्यक् कृष्टमुच्यते D_2.

(पा.) त्रिगुणाकृतं—त्रिसीत्यमपि तस्मिन्। [1]त्रिवारकृष्टक्षेत्रनामानि॥ द्विगुणाकृते तु—शम्बाकृतमपीह। द्विवारं हलेन कृष्टे क्षेत्रे द्विगुणाकृतद्वितीयाकृतद्विहल्यद्विसीत्यानि स्युः। तत्र शम्बाकृतशब्दोऽपि स्यात्। 'सैरिभसंभाकृते च सीताम्' इति दन्त्यादिषु वर्णनिर्देशना॥ ९॥

[1] त्रिगुण° B_3.

द्रोणाढकादिवापादौ द्रौणिकाढकिकादयः ।
खारीवापस्तु खारीक उत्तमर्णादयस्त्रिषु ॥ १० ॥

(वि.) द्रोणेति—उप्यते धान्यादिकमस्मिन्निति वापः क्षेत्रम् । तस्मिन् द्रोणाढकप्रस्थादिपरिमितबीजावापपर्याप्तक्षेत्रे द्रौणिकम्, आढकिकम्, आदिग्रहणात् प्रास्थकिकादयः शब्दा वर्तन्ते । द्रोणपरिमितं बीजमत्र उप्यते द्रौणिकम्[1] । एवं [2]सर्वत्राप्युन्नेयम् । खारिपरिमितानि बीजान्यत्र उप्यन्ते खारीकः[3] । खारिपरिमितबीजावापपर्याप्तक्षेत्रनाम ॥ उत्तमर्णादयः खारीकान्ताः शब्दाः त्रिषु लिङ्गेषु वर्तन्ते ॥ १० ॥

---

[1] द्रोणस्य वापः F_2, Pt_2.
[2] D_2, W_2, Pt_2 add आढकस्य वापः आढकिकम्.
[3] खार्या वापः Pt_2.

(पा.) द्रोणाढकादि—आढकिकादयः । द्रोणस्य वापो द्रौणिकं क्षेत्रम् । द्रोणं पचति द्रोणिः । उखा द्रोणं संभवत्यवहरति वा । द्रौणिकः प्रसेवः । इति द्रोणाढकादीनां वापादिषु द्रौणिकाढकिकादिशब्दाः स्युः । वापो वपनस्थानम् । पाकस्तण्डुलादीनामन्नादिभावः । संभव आधारप्रमाणानतिरिक्ताधेयप्रमाणता । अवहरणमुपसंहारः ॥ खारीवापस्तु खारीकः । खार्या वापः खारीकः स्यात् । पाकादिषु खारिक इति ठगेव स्यात् ॥ उत्तमर्णादयस्त्रिषु । उत्तमर्णादिशब्दास्त्रिलिङ्गाः । उत्तमर्णं किराटकुलम् । किराटो वैश्यः । 'कोमटि'। अधमर्णं कुटिम्बिकुलम् । कुटिम्बिनः शूद्रकुमाराः । 'कांपुकोड्कु' ॥ १० ॥

पुंनपुंसकयोर्वप्रः केदारः क्षेत्रमस्य तु ।
कैदारकं स्यात् कैदार्यं क्षैत्रं कैदारिकं गणे ॥ ११ ॥

(वि.) पुमिति—उप्यते धान्यमत्र वप्रः । 'डुवप् बीजसंताने'। के जले हलेन दार्यत इति केदारः[1] । 'दॄ विदारणे'। क्षीयते हलेन लिख्यते क्षेत्रम् । 'क्षिणु हिंसायाम्'। क्षीयते धान्यैरस्मिन्निति वा । 'क्षि निवासगत्योः'। व्रीहिक्षेत्रनामानि ॥ केदाराणां समूहः कैदारकम् । कैदार्यम् कैदारिकम् । क्षेत्राणां समूहः क्षैत्रम् । केदारसमूहनामानि ॥ ११ ॥

---

[1] केन जलेन दीर्यत इति वा D_2.

(पा.) पुंनपुंसकयोर्वप्रः—क्षेत्रम् । व्रैहेयादिक्षेत्रनामानि । '[1]चेनुमडिमुदलैनदि' ॥ अस्य तु कैदारकं—कैदारिकं गणे । क्षेत्राणां[2] समूहनामानि ॥ ११ ॥

[1] B_3 omits. [2] जानर(?)शालेयादिक्षेत्रसमूह° A_1.

लोष्टानि लोष्टवः पुंसि कोटिशो लोष्टभेदनः ।
प्राजनं तोदनं तोत्रं खनित्रमवदारणम् ॥ १२ ॥

(वि.) लोष्टानीति—लोष्टयन्ते पृथगेव संहन्यन्ते लोष्टानि । लोष्टवश्च । 'लोष्ट संघाते' । द्वितीयं पदमुकारान्तम् । लेष्टव इति पाठे लिश्यत इति लेष्टुः । 'लिश गतौ' । मृत्पिण्डनामनी ॥ कोटिभिरश्रिभिः लोष्टानि श्यतीति कोटिशः । 'शो तनूकरणे' । [2]लोष्टभेदनदारुयन्त्रनाम ॥ प्राज्यते प्रेर्यतेऽनड्वाननेनेति प्राजनम् । 'अज गतिक्षेपणयोः' । तुद्यते बलीवर्दोऽनेनेति तोदनम् । तोत्रं च । 'तुद व्यथने' । अल्पशल्ययुक्तवेणुदण्डादेर्नामानि ॥ खन्यते [3]भूमिरनेनेति खनित्रम् । 'खनु अवदारणे' । अवदार्यते भूमिरनेनेति अवदारणम् । 'दॄ विदारणे' । कुद्दालादेर्नामनी ॥ १२ ॥

[1] लूयन्ते, 'लूञ् छेदने' F_2, Pt_2. [2] Pt_2 adds लोष्टानि भिनत्तीति. [3] भूः W_2.

(पा.) लोष्टानि लोष्टवः पुंसि । उकारान्तबहुवचनम् । लोष्टनामनी । 'बेड्डुलु[1]' । पुंसीति विशेषविधिर्लोष्टेषु संभाव्यः । 'लोष्टुः शण्डेऽपि लोष्टः[2] स्यात्' इति गो(बो)पालितः । कोटिशो लोष्टभेदनः । लोष्टानां संभेदकः[3] कोटिशः स्यात् । '[1]कोदरिपेल्लु पगलगोट्टिदि' । प्राजनं—तोत्रम् । [4]कण्टकवद्यष्टिनामानि । 'मुल्लुकोल[1]' । चर्मदण्डवाचकान्यपि स्युः ॥ खनित्रमवदारणम् । कुद्दालनामनी । 'गुद्दलि[1]' ॥ अनुक्तम्—'विशिखा तु खनित्री स्यात्' । विशालकुद्दालनामनी । 'सलिके [1]पार' ॥ १२ ॥

[1] B_3 omits. [2] लोष्टं A_1. [3] संभेदनः A_1. [4] कण्टकयष्टि° A_1.

दात्रं लवित्रमाबन्धो योत्रं योक्त्रमथो फलम् ।
निरीषं कुटकं फालः कृषको लाङ्गलं हलम् ॥ १३ ॥
गोदारणं च सीरोऽथ शम्या स्त्री युगकीलकः ।

(वि.) दात्रमिति—दाति भिनत्त्यनेन तृणमिति दात्रम्। 'दाप् लवने'। लुनन्त्यनेन लवित्रम्। 'लूञ् छेदने'। वक्रस्यायोमयस्य तृणादिलवनसाधनस्य[1] नामानि ॥ आबध्यतेऽनेन बलीवर्दकण्ठ इति आबन्धः। 'बधि संयमने'। यूयतेऽनेन बलीवर्दकण्ठ इति योत्रम्। 'युञ् [2]बन्धने'। युज्यतेऽनेन बलीवर्दकण्ठ इति योक्त्रम्। 'युजिर् योगे'। बलीवर्दादिकण्ठबन्धनार्थनिर्मितवल्कलादिकृतरज्जुनामानि ॥ फलतीति फलम्। 'ञिफला विशरणे'। निर्गता ईषास्मादिति निरीषम्। कुटति कुत्सितं सरतीति कुटकम्। 'कुट कौटिल्ये'। [3]फलति विशीर्यते भूमिरनेनेति फालः। 'ञिफला विशरणे'। कृषति भुवमिति कृषकः। 'कृष विलेखने'। लाङ्गलदण्डरहितस्य लोहमयफलकस्य नामानि ॥ लङ्गति भुवोऽन्तः प्रविश्य गच्छतीति लाङ्गलम्। 'लगि गतौ'। हलति विलिखति भुवमिति हलम्। 'हल विलेखने'। गौर्भूः दार्यतेऽनेन गोदारणम्। 'दॄ विदारणे'। सीयते युगेन सह बध्यते सीरः। 'षिञ् बन्धने'। ईषाफालाभ्यामन्वितस्य [4]कुटकस्य नामानि ॥ बलीवर्दादिदौष्ट्यं शमयतीति शम्या। 'शम उपशमने'। युगस्य कीलकः। युगकीलकनाम ॥ १३ ॥

[1] W_2 adds शस्त्रस्य. [2] 'यु मिश्रणे' F_2, Pt_2. [3] W_2 omits two lines. [4] कूटस्य K_5, K_6.

(पा.) दात्रं लवित्रम्। लवनसाधननामनी। 'कोडवलि'। आबन्धो—योक्त्रम्। योत्रनामानि। 'जोतिगे'॥ अथो [1]फले—[2]कृषकः। [3]फालनामानि। 'कुठु'। लाङ्गलं हलं—सीरः। [4]लाङ्गलनामानि। 'नागलि'। 'क्षेत्रमिव सरोवरं सारासिरावगाहितम्' इति श्लेषाद् दन्त्यादिः। 'जित्या हलिरुभे स्त्रियाम्'। इत्येते द्वे च ॥ अथ शम्या स्त्री युगकीलकः। [5]युगमध्यस्थः स्वल्पकीलः शम्या स्यात्। 'कुरुचकाण्डिकोडुसु'। 'हलमिव शम्याश्रयमाश्रममपश्यत्' इति श्लेषात् तालव्यादिः ॥ १३ ॥

[1] फलम् A_1. [2] B_3 adds त्यक्तदण्डे फले कूटकशब्दः स्यात्. [3] अयःकीलनामनी। 'कर्रु' B_3. [4] बलभद्रायुधनामानि A_1. [5] युगकीलकनाम B_3.

ईषा लाङ्गलदण्डः स्यात् सीता लाङ्गलपद्धतिः ॥ १४ ॥
पुंसि मेधिः खले दारु न्यस्तं यत् पशुबन्धने।
आशुर्व्रीहिः पाटलः स्याच्छितशूकयवौ समौ ॥ १५ ॥

(वि.) ईषेति—बलीवर्दाकृष्टा[1] ईषते गच्छतीति ईषा। 'ईष गतिहिंसादानेषु[2]'। लाङ्गलस्य दण्डः लाङ्गलदण्डः। युगहलयोः मध्यघटितदण्डस्य नामनी ॥

स्यति नाशयति कठिनामपि भुवमिति सीता। 'षोऽन्तकर्मणि'। लाङ्गलपद्धतिनाम ॥ मेधते बलीवर्दैः संगच्छते मेधिः। 'मेधृ संगमे'। [3]खलमध्यबलीवर्दबन्धनविषयस्य दारुणो नाम ॥ आशु पच्यत इति आशुः। अश्नुते वा। 'अशू व्याप्तौ'। [4]व्रीणाति देहमिति व्रीहिः। 'व्री भरणे'। आशुव्रीहिरित्येकं पदं वा। पाटलपुष्पवर्णत्वात् पाटलः। रक्तव्रीहिनामानि ॥ शितः तीक्ष्णः शूको यस्य शितशूकः। यूयते संबध्यते महाजनेनेति यवः। 'युञ् बन्धने'। यौति तुषेणेति वा। 'यु मिश्रणे'। यवनामनी ॥ १४–१५ ॥

[1] D_2, K_2, W_2 add सती. [2] दर्शनेषु K_5, K_6. [3] गल° K_6; खलबलीवर्द . . . न्यस्तदारुणः W_2. [4] वृणाति, 'वृञ् वरणे' Pt_2.

(पा.) ईषा लाङ्गलदण्डः स्यात्। लाङ्गलस्य दण्ड ईषा स्यात्। 'येंडिकोल'। 'ईषा मनीषा मञ्जूषा गण्डूषा सह [1]लिक्षया' इति मूर्धन्यान्तेषु चन्द्रगोमिः।

'ईशः प्रभौ शंकरे स्यादीशा लाङ्गलदण्डके[2]'।

इति तालव्यान्तेषु विश्वप्रकाशिका (पृ. १६८, श्लो. ९) ॥ सीता लाङ्गलपद्धतिः। [3]लाङ्गलेन कृष्टो मार्गः सीता स्यात्। 'चालु'। 'सीता लाङ्गलरेखा स्याद् व्योमगङ्गा च जानकी' इति दन्त्यादिषु रभसः ॥ पुंसि मेधिः—यत्पशुबन्धने। खलो नाम धान्यराशिकरणस्थानम्। तत्र पशुबन्धनार्थं निखातस्तम्भो मेधिः स्यात्। '"मेधृ संगमे"। मेध्यन्ते पशवोऽत्र मेधिः' इति सुभूतिटीकायां[4] व्युत्पत्त्या तवर्गचतुर्थान्तः। पुंसीति पदं मेधिखलशब्दोभयविशेषणम्। 'न[5] स्त्री मेधिः[6] खले पाली खलधानं पुनः खलः' इति वैजयन्ती (पृ. १२५, श्लो. ३१) ॥ आशुर्व्रीहिः पाटलः स्यात्। व्रीहिनामानि। 'पड्लु'। आशुशब्दः पर्यायवाचकः। 'व्रीहिराशुश्च पाटलः' इति रत्नमाला ॥ शितशूकयवौ समौ। शितशूकशब्दो ह्रस्वादिः। यवनामनी ॥ १४–१५ ॥

[1] रिक्षया A_1. [2] °दण्डिका A_1, B_3. [3] लाङ्गलमार्गः B_3. [4] °टीका व्युत्पत्त्या A_1. [5] न क्ली A_1. [6] मेथिरिति मुद्रितग्रन्थे.

तोक्मस्तु तत्र हरिते कलायस्तु सतीनकः।
हरेणुखण्डिकौ चास्मिन् कोरदूषस्तु कोद्रवः ॥ १६ ॥

(वि.) तोक्म इति—तुज्यते पशुभिः खाद्यत इति तोक्मः। 'तुज हिंसायाम्'। हरितवर्णयवनाम ॥ कं वातं लात्युपादत्त इति कलायः। 'ला आदाने'। सीदन्ति

वातप्रकृतयोऽनेनेति सतीनकः । 'षद्लृ विशरणगत्यवसादनेषु'। [1]ह्रियतेऽनेन पुरीषं कुक्षेरिति हरेणुः । 'हृञ् हरणे'। खण्ड्यतेऽद्यते नरैरिति खण्डिकः । 'खडि[2] भेदने'। कलायनामानि ॥ कोरमन्नं[3] दूषयतीति कोरदूषः । 'दुष वैकृत्ये'। केन बहूदकेन उद्यते क्लिद्यत[4] इति कोद्रवः । 'उन्दी क्लेदने'। कोद्रवाख्यधान्यनामनी ॥ १६ ॥

---

[1] D_2, K_6 add अपह्रियते.　[2] K_5, K_6 add खण्ड.　[3] रुधिरं Pt_2.
[4] सिच्यते K_6, Pt_2.

(पा.) तोक्मस्तु तत्र हरिते । आमयवस्तोक्मः स्यात् । 'पच्चियवलु' ॥ कलायस्तु सतीनकः । [1]खण्डिकौ चास्मिन् । [2]वृत्तचणकनामानि । 'लंकलु' ॥ कोरदूषस्तु कोद्रवः । कोद्रवनामनी[3] । 'आर्लु' ॥ १६ ॥

---

[1] हलेणुः A_1.　[2] चणकविशेष° B_3.　[3] B_3 adds धान्य°.

मङ्गल्यको मसूरोऽथ मकुष्ठकमयुष्ठकौ ।
वनमुद्गे सर्षपे तु द्वौ तुन्दुभकदम्बकौ ॥ १७ ॥

(वि.) मङ्गल्यक इति—मङ्गलमस्माद्भवतीति [1]मङ्गल्यकः । मस्यति परिणमति काले मसूरः । 'मसी परिणामे'। चणकभेदनामनी ॥ मङ्क्यते फलैरिति मकुष्ठकः । 'मकि मण्डने'। [2]मिनोति क्रिमीनिति मयुष्ठकः । 'डुमिञ् प्रक्षेपणे'। वनमुद्गनामानि ॥ कटुत्वेन [3]मुखं सरति व्याप्नोतीति सर्षपः । 'सृ गतौ'। तुदति व्यथयति मुखं तुन्दुभः । 'तुद व्यथने'। शुष्कदशायां कत् कुत्सितमम्बते कदम्बकः । 'अबि शब्दे'। सर्षपनामानि ॥ १७ ॥

---

[1] मङ्गले साधुः D_2.　[2] मीनाति 'मीञ् हिंसायाम्' K_3, K_6, W_2.　[3] देहं F_2, Pt_2.

(पा.) मङ्गल्यको मसूरः । चणकविशेषनामनी[1] । मसूरोऽथेति पाठे वैजयन्ती (पृ. १२६, श्लो. ४०) 'मसुरस्तु मसूरकः' इति । मसूराथेति पाठे—'[2]वेश्यायां व्रीहिभेदे च मसूरा मसुरा स्त्रियाम्' इति रभसकोशः ॥ अथ मकुष्ठकमयुष्ठकौ वनमुद्गे । वनमुद्गनामानि ॥ अनुक्तम्—'खण्डिरः पीतमुद्गः स्यात्'। हरितमुद्गनाम । 'कृष्णमुद्गस्तु शिम्बिकः[3]'। नीलमुद्गनाम ॥ सर्षपे तु—कदम्बकौ । सर्षपनामानि । 'आवालु' ॥१७॥

---

[1] A_1 adds 'चिरुसनग'.　[2] वैश्यायाम् A_1.　[3] शिम्बिका B_3.

सिद्धार्थस्त्वेष धवलो गोधूमः सुमनः समौ ।
स्याद् यावकस्तु कुल्माषः चणको हरिमन्थकः ॥ १८ ॥

(वि.) सिद्धार्थ इति—सिद्धोऽर्थः प्रयोजनमस्य सिद्धार्थः । श्वेतसर्षपनाम ॥ [1]आ समन्तात् गां भुवं शूकैर्धुनोतीति गोधूमः । 'धूञ् कम्पने' । शोभनं मन्यते सर्व एनमिति सुमनः । 'मन ज्ञाने' । अकारान्तोऽयम् । गोधूमनामनी ॥ यूयते पाकसमयेऽल्पाम्भसा युज्यत इति [2]यावकः । 'युञ् बन्धने' । कोलति पाकसमये स्थूलो भवति कुल्माषः[3] । 'कुल संस्त्याने' । कुलुत्थनामनी ॥ अर्धपक्वदशायामेव निकृत्तानां गोधूमानां नामेति केचित् । चण्यते भक्षणार्थं दीयत इति चणकः । 'चण [4]दाने' । हरिभिरश्वैः मथ्यते हरिमन्थकः । 'मथि विलोडने' । चणकनामनी ॥ १८ ॥

---

[1] अत्तुमुद्यतां K_5, W_2; गुध्यते परिवेष्टयते F_2, Pt_2. [2] यौतीति, 'यु मिश्रणे' F_2, Pt_2. [3] कुत्सितो माष: F_2, Pt_2. [4] श्रपणे K_3, K_6; 'चण विश्राणने' वा K_6.

(पा.) सिद्धार्थकस्तु धवलः । एष सर्षपो धवलश्चेत् सिद्धार्थकः स्यात् । 'तेल्लनि आवालु' । गोधूमः सुमनः समौ । 'गोधूमसुमनौ [1]समौ' इति रभसकोशपाठाद् अकारान्तः । गोधूमनामनी । स्याद्यावकस्तु कुल्माषः । गोधूमानन्तरपाठाद् गोधूमविशेषनामनी । 'यावके बलकुल्माषौ यवके तोयपर्णिका' इति यवविशेषे वैजयन्ती (पृ. १२७, श्लो. ९३) ॥ चणको हरिमन्थकः[2] । चणकनामनी ॥ ॥ १८ ॥

---

[1] A_1 adds म्लेच्छभोजनप्रवरोऽव्ययम् (?). [2] °मन्दक: A_1; °मन्धक: B_3.

द्वौ तिले तिलपेजश्च तिलपिञ्जश्च निष्फले ।
क्षवः क्षुताभिजननो राजिका कृष्णिकासुरी ॥ १९ ॥

(वि.) द्वाविति—निष्फलस्तिलः तिलपेजः । तिलपिञ्जश्च । [1]निष्फलतिलनामनी । क्षौत्यनेन क्षवः । 'टुक्षु शब्दे' । [2]क्षुतमभिजनयतीति क्षुताभिजननः । 'जनी प्रादुर्भावे' । राजते कृष्णवर्णपुष्पैरिति[3] राजिका । 'राजृ दीप्तौ' । कृष्णवर्णयोगात् कृष्णिका । कटुरसेन [4]असुरस्त्रीवदनिष्टकारिणीत्वात्[5] आसुरी । कृष्णसर्षपनामानि ॥ १९ ॥

---

[1] तैलरहित° D_2, W_2. [2] क्षुधं, क्षुधाभिजनन: W_2. [3] °सङ्घेन K_5, K_6. [4] असुरी K_5. [5] °कारित्वात् W_2.

(पा.) द्वौ तिले—तिलपिञ्जश्च निष्फले। निष्फले तिले तिलपेजतिलपिञ्जशब्दौ स्याताम्। 'पोल्लुनूपु'। अनुक्तम्—[1]'जालकश्चूलिकस्तिलः'। तिलनामानि॥ 'नव्वु'॥ 'जर्तिलोऽरण्यजस्तिलः'। अरण्यजातस्तिलो जर्तिलः स्यात्। क्षवः [2]क्षुताभिजननः—कृष्णिकासुरी। कृष्णसर्षपनामानि॥ १९॥

[1] तिल: काकरुह: A_1. [2] क्षुधाभिजनन: A_1.

स्त्रियौ कङ्गुप्रियङ्गू द्वे अतसी स्यादुमा क्षुमा।
मातुलानी तु भङ्गायां व्रीहिभेदस्त्वणुः पुमान्॥ २०॥

(वि.) स्त्रियाविति—केन [1]जलेन गच्छत्युद्गच्छतीति कङ्गुः। 'गम्लृ गतौ'। प्रियाण्यङ्गान्यस्याः प्रियङ्गुः। प्रियङ्ग्वाख्यधान्यनामनी॥ न [2]तस्यते न क्षीयत इति अतसी। 'तसु उपक्षये'। अवते शुष्कदशायां स्वनतीति [3]उमा। 'उङ् शब्दे'। क्षौतीति[4] क्षुमा। 'टुक्षु शब्दे'। अतसीनामानि॥ मा तोल्यते न उपमीयते उपयोगिधान्येनेति[5] मातुलानी। 'तुल उन्माने'। भज्यते वल्कलार्थमिति भङ्गा। 'भञ्जो आमर्दने'। शणविशेषस्य[6] नामनी॥ [7]अल्पधान्यत्वात् अणुः। व्रीहिभेदाल्पधान्यनाम॥ २०॥

[1] वृष्ट्युदकेन K_2, K_6, W_2. [2] तस्यति D_2. [3] D_2 ends here. [4] K_5, K_6 add शब्दायते. [5] वस्तुषु F_2, Pt_2. [6] भङ्गानाम K_6. [7] अणुत्वात् Pt_2.

(पा.) समौ कङ्गुप्रियङ्गू द्वौ। प्रियङ्ग्वाख्यधान्यजातिनामनी। 'कोर्रलु'॥ अतसी स्यादुमा क्षुमा। अतसीनामानि। मातुलानी तु भङ्गायाम्। भङ्गाख्यधान्यविशेषजातिनामनी। 'कुसुमुलु'। अनुक्तम्—'यावनालस्तु जोनालो जोन्नला बीजपुष्पिका'। जोनलनामानि। 'जोन्नलु'॥ 'समौ तु खल्वनिष्पावौ'। निष्पावनामनी। 'अनुमुलु'। 'वल्ला तुवरिकाढकी'। आढकीनामानि। 'कंदुलु'। 'राजमाषोऽलसान्द्रः स्यात्'। 'अलसंद'। 'माषो वृष्यः पचेलिमः'। माषनामानि। 'कुलुत्थिका बलकुलः'। कुलुत्थनामनी। 'उलुवलु'। 'व्रीहिभेदस्त्वणुः पुमान्'। व्रीहिविशेषोऽणुः स्यात्। 'कोरे'। 'ऊदरवित्तुलु'॥ २०॥

किंशारुः सस्यशूकं स्यात् कणिशं सस्यमञ्जरी।
धान्यं व्रीहिः स्तम्बकरिः स्तम्बो गुच्छस्तृणादिनः॥ २१॥

(वि.) किंशारुरिति—कुत्सितं शृणाति हस्तादिकमिति किंशारुः। 'शॄ हिंसायाम्'। [1]सस्यस्य शूकं तीक्ष्णाग्रम्। सस्यशूकनाम॥ कणा धान्यकणाः सन्त्यत्रेति कणिशम्। सस्यमञ्जरीनाम॥ दधाति देहमिति धान्यम्। 'डुधाञ् धारणपोषणयोः'। व्रीहिशब्दो व्युत्पन्नः[2] (श्लो॰ १५)। स्तम्बं गुच्छं करोतीति स्तम्बकरिः। धान्यनामानि॥ तिष्ठतीति स्तम्बः। गुध्यति परिवेष्टयति भुवमिति गुच्छः। 'गुध परिवेष्टने'। तृणादिस्तम्बनाम॥ २१॥

[1] शस्यस्य K_5. [2] K_2 adds व्रीणाति देहं, 'व्री भरणे'.

(पा.) किंशारुः सस्यशूकं स्यात्। धान्यस्य कण्टकः किंशारुः स्यात्। पुंलिङ्गः। पुमानिति [1]पूर्वोत्तरान्वयः॥ कणिशं सस्यमञ्जरी। धान्यमञ्जरी कणिशं स्यात्॥ धान्यं व्रीहिः स्तम्बकरिः। धान्यनामानि। धान्यध्वनिरर्थेत्यादिवक्ष्यमाणवचनाद्, व्रीहिस्तम्बकरिशब्दौ पुंलिङ्गौ॥ स्तम्बो गुच्छस्तृणादिनः। तृणादीनां गुच्छः स्तम्बः स्यात्॥ 'परिघंट'॥ २१॥

[1] शब्दस्तुलासूत्रादिवदुभयपर्यायभागी A_1.

नाली नाल च काण्डोऽस्य पलालोऽस्त्री स निष्फलः।
कडङ्गरो बुसं क्लीबे धान्यत्वचि पुमांस्तुषः॥ २२॥

(वि.) नालीति—[1]नलति बध्नातीति नाली। नालं च। '[2]णल बन्धने'। तृणशलाकानामानि॥ पलति उच्चैर्गच्छतीति पलालः। 'पल गतौ'। निष्फलनाडीनाम॥ कटति खलमावृणोति कट्। तदेवाङ्गं रूपं[3] यस्य सः कडंगरः। 'कटे वर्षावरणयोः'। बुस्यते उत्सृज्यत इति बुसम्। 'बुस उत्सर्गे'। खले पशुपादघट्टितस्य क्षोदस्य नामनी॥ तुष्यतेऽग्निरनेनेति तुषः। 'तुष तुष्टौ'। धान्यत्वङ्नाम॥ २२॥

[1] नल्यते K_5, K_6. [2] गन्धने बन्धने च K_6. [3] K_2 adds आवरणं.

(पा.) नाली नालं च काण्डोऽस्य। अस्य [1]तृणादिनो दण्डनामानि। पलालोऽस्त्री स निष्फलः। विफलस्तृणादिकाण्डः पलालः स्यात्। '[2]यन्नुलु दाडिपोयिनदण्डमु'। 'मोडु'॥ कडङ्गरो बुसं क्लीबे। पलालादिक्षोदस्य नामनी। 'पोल्लुकुलु'। धान्यत्वचि पुमांस्तुषः। धान्यस्य त्वक् तुषः स्यात्। 'उमुक'। अनुक्तम्—'कञ्जूकः कण्डनं चेति तण्डुलस्य मले द्वयम्'। तण्डुलमलनामनी। 'तवुडु'॥ २२॥

[1] तृणादिकाण्ड° B_3. [2] B_3 omits.

शूकोऽस्त्री श्लक्ष्णतीक्ष्णाग्रे शमी शिम्बा त्रिषूत्तरे ।
ऋद्धमावसितं धान्यं पूतं तु बहुलीकृतम् ॥ २३ ॥

(वि.) शूक इति—श्यति स्वापगमनेन धान्यं तनूकरोतीति शूकः। 'शो तनूकरणे'। श्लक्ष्णतीक्ष्णाग्रधान्यकण्टकनाम ॥ शाम्यति सस्यवृद्धिरस्यां सत्यामिति शमी। 'शमु उपशमने'। शिनोति तनूकरोति स्वगतबीजद्वारेण कफं पित्तं चेति शिम्बा। 'शिञ् [1]निशाने'। मुद्गादित्वङ्नाम ॥ [2]उत्तरे बहुलीकृतान्ताः शब्दाः त्रिषु लिङ्गेषु वर्तन्ते ॥ अवैगुण्येन संपन्नं फलम् ऋद्धम्। 'ऋधु वृद्धौ'। श्रिया शोभया आवस्यते आवसितम्। 'वस आच्छादने'। सुक्षेत्रादिगुणैः संपूर्णधान्यनाम ॥ बुसापकरणेन शुद्धत्वात् पूतम्। 'पूञ् पवने'। बहुमूल्यं लातीति बहुलम्। तथा कृतं बहुलीकृतम्। 'ला आदाने'। निर्बुसीकृतधान्यनामनी ॥ २३ ॥

[1] निशातने K_3, K_6. [2] K_5, K_6 add त्रिषूत्तरे.

(पा.) शूकोऽस्त्री—तीक्ष्णाग्रे। यस्याग्रं श्लक्ष्णं तीक्ष्णं च स्यात् तच्छूकं स्यात्। 'मुल्लु'॥ शमी शिम्बा। मुद्गादित्वङ्नामनी। '[1]चिप्पजून्नलमिदि नूगु'॥ त्रिषूत्तरे। इत उपरि वक्ष्यमाणा ऋद्धादयश्चत्वारः शब्दास्त्रिलिङ्गाः। ऋद्धो जोनलः। ऋद्धा राजिका॥ ऋद्धमावसितं धान्यम्। अनडुद्भिरावसितं धान्यं ऋद्धं स्यात्। '[1]नुरिचिनकोलुचु'॥ पूतं तु बहुलीकृतम्। वायुना निस्तुषं [2]कृतं धान्यं पूतं स्यात्। 'तूरुपत्तिनरोल्पु'॥ २३ ॥

[1] B_3 omits. [2] A_1 adds.

माषादयः शमीधान्ये शूकधान्ये यवादयः ।
शालयः कलमाद्याश्च षष्टिकाद्याश्च पुंस्यमी ॥ २४ ॥

(वि.) माषादय इति—मष्यते वातोऽनेनेति माषः। 'मष हिंसायाम्'। शमीसहितं धान्यं शमीधान्यम्। माषादयः शमीधान्ये वर्तन्ते। आदिशब्देन [1]मुद्गादयो गृह्यन्ते। यवादयो यवगोधूमरक्तशाल्यादयः शूकधान्येषु वर्तन्ते॥ शाल्यन्ते श्लाघ्यन्ते जनैरिति शालयः। 'शाडृ श्लाघायाम्'। कल्यन्त इति कलमाः। 'कड घसने'।

षष्टिरात्रेण पच्यन्ते षष्टिकाः। कलमाद्याः षष्टिकाद्याश्च शालय इत्युच्यन्ते। पुंस्यमी। अमी माषयवशालिकलमषष्टिकशब्दाः पुंसि वर्तन्ते ॥ २४ ॥

[1] 'माषो मुद्गो राजमाषः कुलत्थश्चणकस्तिलः।
काकाण्डश्चीवर इति शमीधान्यगणः स्मृतः ॥
इति रत्नकोषः' इति भानुजीदीक्षितः (पृ. ३५६).

(पा.) माषादयः शमीधान्ये। शमीसहितं धान्यं शमीधान्यम्। [1]तस्मिन् माषादयः स्युः। माषादयः शमीधान्यानीत्यर्थः ॥ शूकधान्ये यवादयः। शूकसहितं धान्यं शूकधान्यम्। तस्मिन्[2] यवादयः स्युः। यवादयः शूकधान्यानीत्यर्थः ॥ शालयः—षष्टिकाद्याश्च। [3]कलमप्रभृतयो व्रीहयश्च षष्टिकाद्याः[4] षष्टिसंख्याकदिवसपचेलिमा व्रीहयश्च[5] शालयः स्युः ॥ पुंस्यमी। सामान्यविशेषनामभिरते पुंलिङ्गाः। कलमान् वप। षष्टिकान् वप। शालीन् वप ॥ २४ ॥

[1] अस्मिन् A_1. [2] अत्र A_1. [3] A_1 adds कलमाद्याश्च. [4] षष्टिकप्रभृतयश्च B_3. [5] प्रमुखाः A_1.

तृणधान्यानि नीवाराः स्त्री गवेधुर्गवेधुका।
अयोऽग्रं मुसलोऽस्त्री स्यादुदूखलमुलूखलम् ॥ २५ ॥

(वि.) तृणेति—नितरां व्रियन्ते नीवाराः। 'वृञ् [1]वरणे'। तृणधान्यनाम ॥ गवि [2]अकृष्टभूमावेधते गवेधुः। गवेधुका च। 'एध वृद्धौ'। वनगोधूमनामनी ॥ अयोऽग्रेऽस्य अयोऽग्रम्। मुस्यते धान्यमनेनेति मुसलः। 'मुस खण्डने'। येन धान्यादिकं[3] भिद्यते तस्य नामनी ॥ उद् ऊर्ध्वं खमाकाशमस्येति उदूखलम्। उलूखलं च। धान्यखण्डनार्थमाधारभूतस्य दार्वादेर्नामनी ॥ २५ ॥

[1] K_5, K_6 add 'वृङ् संभक्तौ' इति वा धातुः. [2] आकृष्ट° W_2; अम्भसि Pt_2. [3] K_5 adds तुषादिकं; W_2 adds षष्टयादिकं.

(पा.) तृणधान्यानि नीवाराः। तृणधान्यनाम। '[1]निव्वरिलु'। तृणधान्यशब्दः पर्यायवचनश्चाधिकारवचनश्च स्यात्। स्त्री गवेधुर्गवेधिका। अरण्यगोधूमनामनी। 'वट्टुवड्लु'॥ अनुक्तम्—'श्यामाकस्तु स्मयाकः स्यात्'। श्यामाकनामनी ॥ 'चाम'॥ 'गर्मुद्गर्मुटिका[2] समे'। गर्मुन्नामनी। 'बरगु'॥ अयोऽग्रं मुसलोऽस्त्री

स्यात्। 'मुसलो दन्त्यमध्यो मूर्धन्यमध्यश्च स्यात्' इति वर्णनिर्देशनामवचनाद् मुषलोऽपि स्यात् । मुसलनामनी। 'रोंकलि'॥ 'उदूखलमुलूखलम'। अवहननस्थानगर्तवच्छिलानामनी[3]। [4]'रोलु'॥ २५॥

---

[1] 'निव्वरुलु दूसपरि' A_1.　[2] गर्वटिका A_1.　[3] शिलागर्त° A_1.　[4] 'कोलु' A_1.

प्रस्फोटनं शूर्पमस्त्री चालनी तितउः पुमान्।
स्यूतप्रसेवौ कण्डोलपिटौ कटकिलिञ्जकौ ॥ २६ ॥

(वि.) प्रस्फोटनमिति—प्रस्फोट्यते तुषादिरनेन बहिष्क्रियत इति प्रस्फोटनम्। 'स्फुटिर् विशरणे'। शीर्यते विशीर्यते तुषादिरनेन शूर्पम्। 'शॄ हिंसायाम्'। शूर्पनामनी॥ चाल्यतेऽनया पिष्टमिति चालनी। 'चल कम्पने'। तनोत्यधस्तात् पिष्टसारमिति तितउः। 'तनु विस्तारे'। क्षुद्रच्छिद्रोपेतस्य शूर्पविशेषस्य नामनी॥ सीव्यते वेणुदलैरिति स्यूतः। स्योन इति वा पाठः। प्रसेवश्च। 'षिवु तन्तुसंताने'। वेणुदलनिर्मितस्य [1]तिर्यग्वृत्तपात्रस्य नामनी॥ कण्ड्यते मूषकैरिति कण्डोलः। 'कडि भेदने'। पिट्यते वेणुदलैरिति पिटः[2]। 'पिट शब्दसंघातयोः'। वेणुदलादिनिर्मितस्य वर्तुलोन्नतस्य धान्यवापनसाधनस्य [3]नामनी॥ [4]कटत्यङ्गणदेशमिति कटः। 'कटे वर्षावरणयोः'। किल्यते धान्यमस्मिन्निति किलिञ्जकः। '[5]किल क्षेपे'। व्रीह्यादिप्रसारणार्थं वेणुदलनिर्मितास्तरणनामनी॥ २६॥

---

[1] W_2 adds वर्तुलोत्पन्नस्य.　[2] पेटः K_3, K_6.　[3] धान्यकरण्ड° W_2.
[4] W_2 adds आवृणोति.　[5] 'कल किल क्षेपे' K_5, K_6.

(पा.) प्रस्फोटनं शूर्पमस्त्री। 'सुशॄभ्यां निच्च' (उ. ३. २५) इति [1]शृणातेः पप्रत्यये उरपरत्वदीर्घत्वानि। केचित्तु सर्तेर्दन्त्यादिसूर्पमिच्छन्तीति पुरुषोत्तमवचनात् तालव्यादिश्च दन्त्यादिश्च स्यात्। तण्डुलादिवैतुष्यसाधननामनी। 'चाट'॥ चालनी तितउः पुमान्। 'तनोतेर्डउः सन्वच्च' (उ. ४. ५१) इति निर्देशसामर्थ्याद् गुणाभावः[2]। तितऊ तितवः इत्यादि। 'चालनं तितउ प्रोक्तम्' इति रत्नकोशमते तितउनी तितऊनि। चालननामनी। 'जल्लेड'। स्यूतप्रसेवौ। बिलकनामनी'। 'संजि'। 'स्यूनः[3] स्यूतः प्रसेवकः' इति रभसकोशपाठात् [3]स्यूनशब्दोऽपि स्यात्॥ कण्डोलपिटौ। वेण्वादिकृतपिटकस्य नामनी। 'गंप्प'॥ कटकिलिञ्जकौ। वेण्वादिकृतकटकस्य नामनी। 'चाप'॥ २६॥

---

[1] बाष्पादय इति शृणोतेः A_1.　[2] एङभावः A_1.　[3] स्योनः B_3.

समानौ रसवत्यां तु पाकस्थानमहानसे ।
पौरोगवस्तदध्यक्षः सूपकारास्तु वल्लवाः ॥ २७ ॥
आरालिका आन्धसिकाः सूदा औदनिका गुणाः ।

(वि.) समानाविति—अनेकरसयोगात् [1]रसवती । पाकस्य स्थानं पाकस्थानम् । अनोवत् शकटवदुपकारत्वादनः पाकस्थानम् । महच्च तदनश्च महानसम् । [2]पाकवेश्मनामानि ॥ पुरः गौर्जलमत्रास्तीति पुरोगुः पाकस्थानम् । तस्यायमध्यक्षः पौरोगवः । पाकस्थानाध्यक्षनाम ॥ सूपं व्यञ्जनं कुर्वन्तीति सूपकाराः । ‘डुकृञ् करणे’ । वल्लन्ति भोक्तुः [3]प्रीतिमुत्पादयन्तीति वल्लवाः । ‘वल्ल प्रीतौ’ । सूपशाकव्यञ्जनादिपाचकस्य नाम ॥ अरालमन्नं[1] प्रयोजनमेषामिति आरालिकाः । अन्धोऽन्नं [5]प्रयोजनमेषामिति आन्धसिकाः । ओदनः प्रयोजनमेषां ते औदनिकाः । सूदयन्ति हिङ्गुमरीचादिगताल्पप्राणिन इति सूदाः । ‘षूद क्षरणे[6]’ । गुणयन्ति पुनः पुनः पाकमावर्तयन्तीति गुणाः । ‘गुण अभ्यासे’ । भक्तादिकारिणां नामानि ॥ २७ ॥

---

[1] रसः संस्क्रियमाणोऽस्यामस्तीति F_2, Pt_2. [2] °देश° W_2. [3] प्रेमापादयन्ति K_5, K_6. [4] कुटिलं चरन्तीति F_2, Pt_2. [5] तत् साधनं शिल्पमेषां Pt_2. [6] K_6, W_2 add हिंसायां च.

(पा.) समानौ रसवत्यां तु—महानसे । [1]पाकस्थाननामानि । ‘बाणसेल्लु[2]’ । पौरोगवस्तदध्यक्षः । महानसाधिकारी पौरोगवः स्यात् ॥ सूपकारस्तु—औदनिका गुणाः । पाचकनामानि । इमे त्रिष्वित्यनेन त्रिलिङ्गाः ।

‘कान्ता चेयं गुणा चेयं प्रेष्या चेयं ममैकिका[3]’ ॥ २७ ॥

---

[1] रसवती° A_1. [2] ‘बाणसिल्लु’ A_1; ‘वंटयल्लु’ B_3. [3] एकका A_1.

आपूपिकः कान्दविको भक्ष्यकार इमे त्रिषु ॥ २८ ॥
अश्मन्तमुद्धानमधिश्रयणी चुल्लिरन्तिका ।

(वि.) आपूपिक इति—अपूपः [1]प्रयोजनमस्य आपूपिकः । [2]कन्दौ संस्कृतं कान्दवम् । तत् [3]पण्यमस्येति कान्दविकः । भक्ष्यं करोतीति [4]भक्ष्यकारः । मोदकादिकारिणां नामानि ॥ इमे त्रिषु । इमे पौरोगवाद्याः भक्ष्यकारान्ताः शब्दाः त्रिषु लिङ्गेषु वर्तन्ते ॥ अश्नुते स्थालीमूलमिति अश्मन्तम् । ‘अशू व्याप्तौ’ । अश्मनोऽपि अन्तोऽत्रेति

वा। उद्धीयतेऽग्निरनेनेति उद्धानम्। ‘डुधाञ् धारणपोषणयोः’। उद्वानमिति पाठे उद्वयन्ते ज्वाला अत्रेति। ‘वेञ् तन्तुसंताने’। अधिश्रीयतेऽनयेति अधिश्रयणी। ‘श्रीञ् पाके’। [5]चोद्यते निरस्यतेऽग्निरस्यामिति चुल्ली। ‘चुद प्रेरणे’। ‘चुल्ल भावकरणे’ इति वा धातुः। पुनः पुनः अन्तो नाशोऽस्यामस्तीति अन्तिका। [6]चुल्लीनामानि ॥ २८ ॥

---

[1] अर्थसाधनं K_2, K_5.　[2] कन्दोः K_5, K_6.　[3] प्रयोजनं K_5, W_2.
[4] भक्षकारः F_2, Pt_2.　[5] चुद्यते K_2; चुल्लयते F_2, Pt_2.　[6] चुल्लि° W_2.

(पा.) आपूपिकः—भक्ष्यकारः। सुभूतिटीकायां कान्दुकः कान्दविकः भक्ष्यंकार इति मुमागमश्चोक्तः। भक्ष्यपाचकनामानि। अनुक्तम्—‘शाककारः कटम्बकः’। शाकपाचकः कटम्बकः स्यात् ॥ इमे त्रिषु। इमे पौरोगवाद्याः भक्ष्यकारान्ताः शब्दाः त्रिषु लिङ्गेषु स्युः ॥ अश्मन्तं—चुल्लिरन्तिका। चुल्लीनामानि ॥ ‘प्रोय्य’ ॥ २८ ॥

अङ्गारधानिकाङ्गारशकट्यपि हसन्त्यपि ॥ २९ ॥
हसन्यप्यथ न स्त्री स्यादङ्गारोऽलातमुल्मुकम्।
क्लीबेऽम्बरीषं भ्राष्ट्रो ना कन्दुर्वा स्वेदनी स्त्रियाम् ॥ ३० ॥

(वि.) अङ्गार इति—अङ्गारा धीयन्तेऽस्यामिति अङ्गारधानिका[1]। अङ्गाराणां शकटी अङ्गारशकटी। अङ्गारप्रकाशेन हसति चकास्ते[2] हसन्ती। हसनी च। ‘हसे हसने’। अङ्गाराहरणार्थं निर्मितस्य अयःशकटस्य नामानि ॥ अङ्गति इतस्ततो गच्छतीति अङ्गारः। ‘अगि गतौ’। अयं पुंनपुंसकयोर्वर्तते। अतिक्रान्तकाष्ठदशस्य अप्राप्तभस्मावस्थस्य इन्धनस्य नाम ॥ दहनभयात्[3] न लान्ति एतन्न स्वीकुर्वन्तीति अलातम्। ‘ला आदाने’। [4]स्फुलिङ्गैरुलति उल्मुकम्। ‘उल आवरणे’। अग्नियुक्तकाष्ठनामनी ॥ [5]अम्बते भृज्यमानलाजादिभिरिति अम्बरीषम्। ‘अबि शब्दे’। भृज्यते लाजादिरत्रेति भ्राष्ट्रः। ‘भ्रस्ज पाके’। लाजादिकरणार्थं कृतस्य घटकपालस्य नामनी ॥ [6]स्कन्दयति स्वगततापेन अपूपादिकं शोषयतीति कन्दुः। ‘स्कन्दिर् गतिशोषणयोः’। [7]स्वेद्यतेऽग्नितापेनेति स्वेदनी। ‘ञिष्विदा गात्रप्रक्षरणे’। अपूपादिपचनार्थं निर्मितस्यायोमयस्य पात्रस्य नामनी ॥ २९–३० ॥

---

[1] K_5, W_2 add ‘डुधाञ् धारणपोषणयोः’.　[2] चकास्ति W_2.　[3] दहनतया K_5.
[4] विस्फुलिङ्गैः K_5.　[5] अम्भ्यते W_2.　[6] स्कन्दति F_2, Pt_2.　[7] स्विद्यते K_5; स्वेदयति W_2.

(पा.) अङ्गारधानिका—हसन्यपि। [1]अग्निष्ठाननामानि। 'कुंप्पटि'। अथ न स्त्री स्यादङ्गारः। 'हरनयनेङ्गारितो मदनः' इति प्राकृतरूपस्यापि ग्रहणम्। 'इङ्गारो दृश्यते क्वापि' इति रभसकोशपाठात् प्रयोगार्ह एव। 'वितेनुरिङ्गालमिवायशः परे' इति नैषधः (१.९)॥ [2]अलातमुल्मुकम्। अङ्गारनामानि। 'निप्पु'। अनुक्तम्—अग्निचित् कालिका। 'बोग्गु'। अथ स्याद्रक्षा भसितभस्मनी। भस्मनामानि॥ क्लीबेऽम्बरीषं भ्राष्ट्रो ना। भर्जनपात्रनामनी। 'मङ्गलमु'। अम्बरीषशब्दस्य भ्राष्ट्रशब्दसाहचर्यं केचिदिच्छन्ति॥ कन्दुर्ना स्वेदिनी स्त्रियाम्। अयोनिर्मितपात्रनामनी। 'पेनमु'। कन्दुशब्दस्य स्वेदनीशब्दसाहचर्यं केचिदिच्छन्ति॥ २९-३०॥

---

[1] अङ्गारधानी° B_3. [2] अलात उ° B_3.

अलिंजरः स्यान्मणिकः कर्कर्यालुर्गलन्तिका।
पिठरः स्थाल्युखा कुण्डं कलशस्तु त्रिषु द्वयोः॥ ३१॥
घटः कुटनिपावस्त्री शरावो वर्धमानकः।

(वि.) अलिंजर इति—अलं शीघ्रं जीर्यते अलिंजरः। 'जॄष् झॄष् वयोहानौ'। मणति गम्भीरं ध्वनतीति मणिकः। 'मण शब्दे'। महाकुम्भनामनी॥ किरति जलधारामिति कर्करी। 'कॄ विक्षेपे'। आ ईषदुदकं लातीति[1] आलुः। 'ला आदाने'। गलति ईषदुदकमिति गलन्तिका। 'गल [2]क्षरणे'॥ गलन्तिकानामानि॥ पिठ्यते बह्वन्नमत्र संश्लिष्यते पिठरः। 'पिठ हिंसाक्लेशनयोः'। स्थलन्ति तण्डुलादयोऽस्यामिति [3]स्थाली। 'ष्ठल [4]प्रतिष्ठायाम्'। ओखति भोजनस्थानं गच्छतीति उखा। 'उख गतौ'। कुण्ड्यन्ते तण्डुला अत्र पच्यन्त इति कुण्डम्। 'कुडि दाहे'। कुण्डनामानि॥ कमुदकं लातीति कलशः। 'ला आदाने'। घटते जलाहरणक्रियायामिति घटः। 'घट चेष्टायाम्'। घटशब्दः स्त्रीपुंलिङ्गयोर्वर्तते। कुटति स्वनति[5] पूर्यमाणोऽम्भसेति कुटः। 'कुट शब्दे'। नितरां पिबति जलमस्मादिति निपः। 'पा पाने'। इमौ पुंनपुंसकयोर्वर्तेते। उदकघटनामानि॥ शरं शीर्यमाणं पतदुदकादिकम् अवतीति शरावः। 'अव रक्षणे'। शरावशब्दः पुंनपुंसकयोर्वर्तते। वर्ध्यते छिद्यते महतः कर्मण इति वर्धमानकः। 'वर्ध छेदनपूरणयोः'। वर्धतेऽनेन उदकादिकमिति वा। 'वृधु वृद्धौ'। मृण्मयपतद्ग्रहनामनी॥ ३१॥

---

[1] K_5, K_6 add स्वीकरोति. [2] 'गल अदने स्रवणे च' W_2. [3] तिष्ठन्ति पदार्था अस्मिन्निति, 'ष्ठा गतिनिवृत्तौ' F_2, Pt_2. [4] स्थाने K_5, K_6. [5] K_5 adds शब्दं करोति.

(पा.) अलिंजरः स्यान्मणिकः। आवपननामनी[1]। 'निराडुमुंत्तकलु'। भाषान्तरे 'केलपेसरु'॥ [2]कर्कर्यालूर्गलन्तिका। करकनामानि। '[3]गरगे'। 'वर्धनी तु गलन्त्यालूः[4] कर्करी करकोऽपि च' इति वैजयन्ती (पृ. १६३, श्लो. ५७)। अनुक्तम्—'करंको नारिकेलस्य'। स एव करकः नालिकेरसंबन्धी चेत् करंकः स्यात्। 'टंकायकमण्डलमु[5]'। कृत्तिः [6]करकवर्तिका। स एव करकः चर्मसंबन्धी चेत् करकवर्तिका[6] स्यात्। 'करवतिगे' 'तोलुगिण्डि'॥ पिठरः—कुण्डम्। पचनपात्रनामानि। 'वण्टकुण्डलु'॥ कलशस्तु—घटः कुटनिपौ[7]। घटनामानि। 'रड्डुव'॥ अस्त्री शरावो वर्धमानकः। शरावनामानि। '[8]मूकुडु'। [9]शरावं तालव्यादि। शालाजिरशब्दोऽपि तद्वदेव॥ ३१॥

---

[1] महाकुम्भ° B_3.　[2] आलुः B_3.　[3] 'गरग' B_3.　[4] आलुरित्येव मुद्रितग्रन्थे.　[5] B_3 omits 'कमण्डलमु'.　[6] °पात्रिका B_3; पत्रिका A_1.　[7] कुटो निपः B_3.　[8] A_1 adds श्रव.　[9] शरावः B_3.

ऋजीषं पिष्टपचनं कंसोऽस्त्री पानभाजनम्॥ ३२॥
कुतूः कृत्तेः स्नेहपात्रं सैवाल्पा कुतुपः पुमान्।
सर्वमावपनं भाण्डं पात्रामत्रं च भाजनम्॥ ३३॥

(वि.) ऋजीषमिति—अर्जयत्यपूपादिकमिति [1]ऋजीषम्। 'अर्ज अर्जने'। ऋचीषमिति वा पाठः। पिष्टं पच्यतेऽस्मिन्निति पिष्टपचनम्[2]। पिष्टपचनसाधनस्य नामनी॥ काम्यतेऽस्मिन्निःसृतं[3] पानं कंसः। 'कमु कान्तौ'। पानस्य भाजनं पानभाजनम्। भोजनकाले चोष्याद्याहाराधारस्य कांस्यादिसाधनस्य नामनी॥ कुत्सितं शुद्धिरहितं चर्म तन्यतेऽत्र कुतूः। 'तनु विस्तारे'। कृत्तिनिर्मितस्नेहपात्रनाम॥ अल्पा कुतूः कुतुपः। अल्पकुतूनाम॥ आ समन्तात् [4]उप्यते न्यस्यते धान्यादिकमस्मिन्निति आवपनम्। आङ्पूर्वो वपिः न्यसने[5]। [6]भन्दयति आधेयस्य कल्याणं करोतीति भाण्डः। 'भदि कल्याणे सुखे च'। सर्वपात्राणां साधारणनामनी॥ पाति[7] [8]मृगादन्नादिकमिति पात्रम्। 'पा रक्षणे'। अमति संभजति, भुङ्क्ते निर्दुष्टमन्नमत्रेति अमत्रम्। 'अम गत्यादिषु'। भज्यते [9]भोक्तृणेति भाजनम्। 'भज सेवायाम्'। भोजनपात्रनामानि॥ ३२-३॥

---

[1] ऋज्यते पिष्टपाकादि, 'ऋजि भर्जने' W_2; K_5 adds इन्धनत्वात्.　[2] W_2 adds 'डुपचष् पाके'.　[3] पानार्थं F_2, Pt_2.　[4] आवपन्ति K_5, K_6.　[5] 'डुवप् बीजसंताने' K_6.　[6] भण्डयति K_5.　[7] K_6 adds पालयति.　[8] मृगादिसंसर्गात् K_5, W_2.　[9] आधेयेन Pt_2.

(पा.) ऋजीषं पिष्टपचनम्। पिष्टानां[1] पचनपात्रमृजीषं स्यात्। 'शिरीषं पुरीषं करीषम् ऋजीषं तरीषम्' इति दीर्घमध्येषु सरस्वतीकण्ठालंकारः। '[2]पिष्टपचनं त्वृजिषम्' इति नाममाला। 'बाणरि[3]'॥ कंसोऽस्त्री पानभाजनम्। पानपात्रनामनी। 'गिण्डि'। रूढशब्दत्वात् हेमरजतादिनिर्मितमपि कंसमेव। स्वार्थे ष्यञि प्राप्ते कांस्यमपि स्यात्। 'कांस्यं कंसोऽस्त्रियां पानपात्रे तैजस आढके' इति वैजयन्ती (पृ. २३०, श्लो. ११)। कुतूः—स्नेहपात्रम्। चर्ममयं स्नेहपात्रं कुतूः स्यात्। '[4]नूनेशिद्धे'। सैवाल्पा—पुमान्। अल्पा सैव कुतूः कुतुपः स्यात्। 'तळिगे'॥ अनुक्तम्—'काचपात्रं तु कुन्नारम्'। काचपात्रनामनी। 'पिंगाळिगिने'। 'अथ मृद्भाण्डमुष्ट्रिका'। मृत्पात्रनाम। 'मंटिकुंड'। सर्वमावपन भाण्डम्। अलिञ्जराद्यावपनान्तं सर्वं भाण्डं स्यात्॥ पात्रामत्रं च भाजनम्। कांस्यपात्रनामानि। 'कंचमु'। चशब्दाद्[5] भाण्डपर्यायोऽपि स्यात्॥ ३२–३॥

---

[1] पिष्टस्य B_3. [2] पिष्टि° A_1. [3] B_3 omits. [4] 'नूनेसिद्धे' A_1. [5] चकारात् B_3.

दर्वी कम्बिः खजाका च स्यात्तर्दूर्दारुहस्तकः।
अस्त्री शाकं हरितकं शिग्रुरस्य तु नालिका॥ ३४॥
कडम्बश्च कलम्बश्च वेषवार उपस्करः।

(वि.) दर्वीति—दृणाति पाक्यमन्नमनयेति दर्वी। 'दॄ विदारणे'। दर्विरिति वा पाठः। [1]कम्यते उष्णान्नस्पर्शपरिहारायेति कम्बिः। 'कमु कान्तौ'। खजति मथ्नाति अन्नमनयेति खजाका। 'खज मन्थे'। कांस्यदर्वीनामानि॥ उष्णपायसादिकं तनोत्यनया तर्दूः। 'तनु विस्तारे'। तरत्यनया उष्णभयमिति वा। 'तॄ प्लवनतरणयोः'। दारुमयहस्तवद्विशालदर्वीनाम॥ शक्यते भोक्तुमनेनेति शाकम्। 'शक्लृ शक्तौ'। प्रायेण हरितवर्णत्वात् हरितकम्। शिनोति तनूकरोत्यरुचिमिति शिग्रुः। 'शिञ् निशातने'। शाकमात्रनामानि॥ कड्यते त्वचमुत्सृज्य[2] भक्ष्यते कडम्बः। कलम्बश्च। 'कड [3]घसने'। शाकनालनामानि॥ वेषं[4] पच्यमानशाकव्याप्तं[5] वृणोतीति वेषवारः। 'वृञ् वरणे'। उपस्क्रियते[6] संस्क्रियते शाकमनेनेति उपस्करः। 'डुकृञ् करणे'। मरीचिहिङ्ग्वादिसंस्कारनामनी॥ ३४॥

---

[1] काम्यते K_5, W_2. [2] भुज्यते F_2, Pt_2. [3] अदने Pt_2. [4] वेशं Pt_2; वेसं W_2. [5] व्याप्तिं F_2, W_2. [6] उपस्करोति Pt_2.

(पा.) दर्विः कम्बिः—दारुहस्तकः। तड्डूनामानि। 'तेड्डु'। तड्डूशब्दस्य खजूकाशब्दसाहचर्यमपि केचिदिच्छन्ति। केचिद्दारुहस्तकशब्दसाहचर्यमिच्छन्ति। 'तड्डूर्द्वयोः खजूका स्यात्' इति नाममाला॥ अस्त्री शाकं—शिग्रुः। शाकनामानि। अस्त्रीशब्देन शाकः पुंनपुंसकः। हरितकं रूपभेदात् नपुंसकम्। शिग्रुशब्दोऽनभिधानात् स्त्रीपुंलिङ्गयोरन्यतरः। 'शाकोऽस्त्री हरितकं शिग्रुः [1]स्त्री' इति वैजयन्ती (पृ. १६६, श्लो. ९०)। 'पुंलिङ्गः शाकमात्रे स्यात्। शिग्रुः शोभाञ्जनेऽपि च' इति रभसकोशः॥ अस्य तु—कदम्बश्च कलम्बश्च। अस्य तु नाडिकेति शाकस्य वल्कलम्। सा नाडिका कदम्बश्च कलम्बश्च स्यात्। 'वंडे [2]कूर कुतुचिन नार'॥ वेशवार उपस्करः। [3]संस्कारनामनी। वेसवारप्रसभसेतुसिनीवालीति [4]दन्त्यसकारेषु वर्णनिर्देशना॥ ३४॥

[1] अस्त्री A_1.   [2] B_3 omits.   [3] संभार° A_1.   [4] दन्त्यवत्सु B_3.

तिन्त्रिणीकं च चुक्रं च वृक्षाम्लमथ वेल्लजम्॥ ३५॥
मरीचं कोलकं कृष्णमूषणं धर्मपत्तनम्।

(वि.) तिन्त्रिणीकमिति—ताडयति वातमाहन्तीति [1]तिन्त्रिणीकम्। 'तड आघाते'। तिन्त्रिणीवृक्षजातत्वाद्वा। चुक्रयति व्यथयति दन्तानिति चुक्रम्[2]। 'चुक्र व्यथने'। तिन्त्रिणीवृक्षस्याम्लं वृक्षाम्लम्। तिन्त्रिणीफलनामानि॥ वेल्ले समुद्रवेलातटे प्रायेण जायते वेल्लजम्[3]। [4]जिह्वा म्रियते इव व्यथतेऽनेनेति मरीचम्। 'मृङ् प्राणत्यागे'। कुडत्यल्पीभवतीति कोलकम्[5]। 'कुड अल्पीभावे'। कृष्णवर्णफलत्वात् कृष्णम्। ऊषति तापयतीति ऊषणम्। 'ऊष [6]दाहे'। धर्मपत्तनाख्यस्थानविशेषे भवं धर्मपत्तनम्। मरिचनामानि॥ ३५॥

[1] तिन्तिडीकं W_3.   [2] चकति तर्पयति, 'चक तृप्तौ' F_2, Pt_2.   [3] K_3, W_2 add 'जनी प्रादुर्भावे'.   [4] जिह्वाग्रं Pt_2.   [5] कोलति सङ्घीभवति, 'कुल संघाते' Pt_2. [6] रुजायां K_5, K_6.

(पा.) तिन्त्रिणीकं—वृक्षाम्लम्। तिन्त्रिणीफलनामानि। 'चिन्तपण्डु'। अथ वेल्लजं मरिचम्। ह्रस्वदीर्घोभयेकारः। 'मरीचं मरिचं कोलम्' इति रभसकोशः। अनुक्तम्—

> 'कोलकं कृष्णमुषणमूषणं धर्मपत्तनम्।
> श्यामं च।'

मरिचनामानि। 'मिरियालु'॥ ३५॥

जीरको जीरणोऽजाजी कणा कृष्णे तु जीरके ॥ ३६ ॥
सुषवी कारवी पृथ्वी पृथुः कालोपकुञ्चिका ।

(वि.) जीरक इति—जीर्यतेऽन्नमनेनेति जीरकः । जीरणश्च । जरण[1] इति वा पाठः । 'जॄष् वयोहानौ' । अजं स्वाभाविकमग्निम्[2] अजत्याक्षिपतीति अजाजी । 'अज गतिक्षेपणयोः' । कणाः सन्त्यस्यामिति[3] कणा । जीरकनामानि ॥ सुष्ठु सवति मन्दमग्निं प्रेरयतीति सुषवी । 'षू प्रेरणे' । कारुवदग्निप्रदीपनकर्मणि नैपुण्यात्[4] कारवी । [5]बृहत्कणयोगात् पृथ्वी । पृथुश्च । [6]कालवर्णत्वात् काला । उपकुञ्चयति वातादिकमल्पीकरोतीति उपकुञ्चिका । 'कुञ्च गतिकौटिल्याल्पीभावयोः' । कृष्णजीरकनामानि ॥ ३६ ॥

[1] जरयति W_2. [2] मन्दाग्निं W_2, Pt_2. [3] अस्याः Pt_2. [4] निपुणत्वात् W_2, Pt_2. [5] करण° K_6, Pt_2. [6] कृष्ण° K_5, K_6.

(पा.) जीरको जीरणो—कणा[1] । जीरकनामानि । 'जीलकर्र' । कृष्णे तु जीरके—कालोपकुञ्चिका । कृष्णजीरकनामानि । 'नल्लजीलकर्र' ॥ ३६ ॥

[1] कणे A_1.

आर्द्रकं शृङ्गबेरं स्यादथ छत्रा वितुन्नकम् ॥ ३७ ॥
कुस्तुम्बरु च धान्याकमथ शुण्ठी महौषधम् ।
स्त्रीनपुंसकयोर्विश्वं नागरं विश्वभेषजम् ॥ ३८ ॥

(वि.) आर्द्रकमिति—अर्दयति कफशूलादीनिति आर्द्रकम् । 'अर्द हिंसायाम्' । 'आर्द्रायां भवमिति वा । [1]शृङ्गोपेतं बेरं शरीरमस्येति [2]शृङ्गबेरम् । आर्द्रकनामनी ॥ छादयति पित्तादिदोषानभिभवतीति छत्रा । 'छद अपवारणे' । वितुदति[3] रोगान्नाशयति वितुन्नकम् । 'तुद व्यथने' । कुत्सितं दाहादिरोगं तुम्बयति कुस्तुम्बरु[4] । 'तुवि अर्दने' । धान्यं धान्यसादृश्यमकति प्राप्नोतीति धान्याकम् । 'अक अग कुटिलायां गतौ' । कुस्तुम्बरुनामानि ॥ आतपेन शुण्ठति शुष्यतीति शुण्ठी । 'शुठि शोषणे प्रतिघाते च' । महच्च तदौषधं च महौषधम् । [5]विश्वभेषजनामैकदेशत्वाद् विश्वम् । नगराख्यदेशे समीचीनं भवतीति नागरम् । बहुरोगभेषजत्वाद् [6]विश्वभेषजम् । शुण्ठीनामानि ॥ ३७–८ ॥

[1] K_6 adds क्षुद्रावयवं; क्षुद्रशृङ्गावयवोपेतं K_3, K_5, W_2. [2] शृङ्गिबेरं K_5, K_6. [3] विशेषेण पित्तादिरोगान् F_2, Pt_2. [4] कुस्तुम्बुरु K_6. [5] विश्वदोषजित्त्वात् Pt_2. [6] विश्वाख्यभेषजत्वात् Pt_2.

(पा.) आर्द्रकं शृङ्गवेरं स्यात्। [1]आर्द्रकनामनी। 'अल्लमु'। अथ छत्रा—धान्याकम्। 'छत्रा [2]कुस्तुम्वरी धान्या धन्या धाना धनीयिका' इति वैजयन्त्यां (पृ. १२७, श्लो. ४९) प्रकारान्तरेणापि पठितम्। कुस्तुम्वर्या नामानि। 'कोतिमिदि'॥ अथ शुण्ठी—विश्वभेषजम्। शुण्ठीनामानि। ऊषणं सिंहणं च स्यात्। एते द्वे च॥ ३५–८॥

[1] आर्द्रशुण्ठीनाम A_1.　　[2] कुस्तुम्बुरुः A_1.

आरनालकसौवीरकुल्माषाभिषुतानि च।
अवन्तिसोमधान्याम्लकुञ्जलानि च काञ्जिके॥ ३९॥

(वि.) आरनालकमिति—आरनालमन्नम्। [1]तन्निस्रावजत्वाद् आरनालकम्। सुवीराख्यदेशे प्रायेण भवतीति सौवीरम्। कुल्माषैरर्धस्विन्नैर्जीरकादिभिरभिषूयते परिवास्यत इति कुल्माषाभिषुतम्। 'षुञ् अभिषवे'। [2]अवन्त्याख्यदेशे सूयते प्रायेण संपद्यत[3] इति अवन्तिसोमम्। पूर्वोक्त एव धातुः। धान्यं तण्डुलक्षालनोदकं कालेनाम्लीभवति [4]धान्याम्लम्। कुत्सितं रसयुक्तजलमस्येति कुंजलम्। केन जलेन अञ्जिका अभिव्यक्तिरस्येति काञ्जिकम्। काञ्चिकमिति पाठे कञ्चयति दीपयति अग्निम्। 'कचि दीप्तिबन्धनयोः'। काञ्जिकनामानि॥ ३९॥

[1] तन्निसृत° Pt_2.　　[2] अवन्तिदेशे K_3.　　[3] जायते, 'षूङ् प्राणिप्रसवे' W_2, Pt_2.
[4] अम्लीभूतधान्यत्वात् F_2, Pt_2.

(पा.) आरनालकसौवीर—कुञ्जलानि च काञ्जिके। धान्याम्लनामानि। 'कलि'। गृहोदकं स्यात् संधानं रक्षोघ्नं शुक्तमित्यपि[1]। एतानि चत्वारि च॥ ३९॥

[1] शुक्लम् B_3.

सहस्रवेधि जतुकं बाह्लीकं हिङ्गु रामठम्।
तत्पत्री कारवी पृथ्वी बाष्पिका कबरी पृथुः॥ ४०॥

(वि.) सहस्रेति—सहस्रं बहुतरमपि शाकं स्वगन्धेन विध्यति [1]परिवासयतीति सहस्रवेधि। 'व्यध ताडने'। वृक्षविशेषे[2] जायत इति जतुकम्। बाह्लीकदेशे [3]भवत्वात् बाह्लीकम्। हिनोति गन्धेन गृहान्तरमपि गच्छतीति हिङ्गु। 'हि गतौ'। रामठदेशे वृक्षविशेषे भवं रामठम्। हिङ्गुनामानि॥ कारुवत् कर्मणि निपुणत्वात् कारवी।

[4]वहुकार्यकरत्वात् पृथ्वी। पृथुश्च। बाष्पं निर्यासं मुञ्चतीति बाष्पिका। कथंचित् कबरीसादृश्यात् कबरी। त्वक्पत्रिणो हिङ्गुवृक्षस्य नामानि ॥ ४० ॥

[1] परिहासयति K_6. [2] विशेषात् Pt_2; K_2, Pt_2 add 'जनी प्रादुर्भावे'.
[3] भवतीति K_5, K_6. [4] बृहत्करणयोगात् K_5, K_6.

(पा.) सहस्रवेधि—हिङ्गु रामठम्। हिङ्गुनामानि। तत्पत्री कारवी—कबरी पृथुः। कारव्यादयस्तत्पत्री हिङ्गुपत्रम्। अथवा त्वक्पत्रादयः[1] हिङ्गुपत्रम्।

'त्वक्पत्रं तु समाख्यातं त्वक्पत्रीति च कारवी'।

इति रुद्रः ॥ ४० ॥

[1] पत्रादीनि A_1.

निशाह्वा काञ्चनी पीता हरिद्रा वरवर्णिनी।
सामुद्रं यत्तु लवणमक्षीबं वशिरं च तत् ॥ ४१ ॥

(वि.) निशाह्वेति—निशाया नामान्यस्याः सन्तीति [1]निशाह्वा। काञ्चनवर्णयोगात् काञ्चनी। पीतवर्णयोगात् पीता। [2]हरितं पर्णवर्णसदृशं पीतवर्णं द्रातीति हरिद्रा। 'द्रा कुत्सायां गतौ'। श्रेष्ठवर्णत्वाद् [3]वरवर्णिनी। हरिद्रानामानि ॥ अक्ष्णोति व्याप्नोति बहुतरशाकमपि अक्षीबम्। 'अक्षू व्याप्तौ'। वष्टि कामयते रसाभिव्यञ्जकत्वादेतदिति वशिरम्। 'वश कान्तौ'। समुद्रे भवं सामुद्रम्[4]। समुद्रोद्भवलवणनामनी ॥ ४१ ॥

[1] निशाख्या K_5, K_6, Pt_2. [2] हरिद्वर्णं द्राति F_2, Pt_2. [3] वरः श्रेष्ठः वर्णोऽस्या अस्तीति K_3. [4] W_2 adds लुनाति जाड्यं लवणम्.

(पा.) [1]निशाख्या काञ्चनी—वरवर्णिनी। हरिद्रानामानि। 'पसपु'॥ सामुद्रं यत्तु—[2]वशिरं च तत्। समुद्रलवणम् अक्षीबं स्यात्। तदेव वशिरं स्यात्। तालव्यमध्यः। अक्षीबं च शिवं च तत्—इति पाठेऽपि तदेव शिवशब्दस्तालव्यादि ॥ ४१ ॥

[1] निशाह्वा B_3. [2] वसिरम् A_1.

सैन्धवोऽस्त्री शीतशिवं माणिबन्धं च सिन्धुजे।
रौमके बस्तकं पाक्यं विडं च कृतके द्वयम् ॥ ४२ ॥

(वि.) सैन्धव इति—सिन्ध्वाख्यदेशे भवं [1]सैन्धवम्। शीतं मन्दाग्निं शिनोति तनूकरोतीति [2]शीतशिवम्। 'शिञ् निशातने'। मणिबन्धाख्यगिरौ भवं माणिबन्धम्। माणिमन्थमिति वा पाठः। सिन्धुदेशजलवणनामानि ॥ रुमाख्याकरे भवं रौमकम्। बस्तोऽजः तस्य ईषद्गन्धयोगात् बस्तकम्। वसुकमिति वा पाठः। रुमाख्याकरोद्भवलवणनामनी ॥ पक्तव्यं पाक्यम्। विडति [3]विष्कम्भशूलादिं[4] नाशयतीति विडम्। 'विड भेदने'। पक्तव्यलवणनामनी ॥ ४२ ॥

---

[1] सिन्धुदेशे भवः F_2, Pt_2. [2] F_2, Pt_2 add उष्णवीर्यत्वात्. [3] विष॰ W_2. [4] आदिकं K_3, K_6.

(पा.) सैन्धवोऽस्त्री—सिन्धुजे। [1]सैन्धवलवणनामानि। रौमके वस्तकम्। रौमकलवणनामनी। 'दोनवुप्पु'॥ पाक्यं विडं—द्वयम्। विडलवणनामनी ॥ ४२ ॥

---

[1] सिन्धुदेशज॰ B_3.

सौवर्चलेऽक्षरुचके तिलकं तत्र मेचके।
मत्स्यन्दी फाणितं खण्डविकारे शर्करा सिता ॥ ४३ ॥

(वि.) सौवर्चल इति—सौवर्चलाकरोद्भवत्वात् सौवर्चलम्। अक्ष्णोति[1] बह्वौषधादिकमिति अक्षम्। 'अक्षू व्याप्तौ'। रोचतेऽन्नमनेनेति रुचकम्। 'रुच दीप्तौ अभिप्रीतौ च'। सुवर्चलाख्याकरोद्भवलवणनामानि ॥ [2]तिलति स्निह्यतीति तिलकम्। 'तिल स्नेहने'। [3]कृष्णवर्णरुचकनाम ॥ [4]मन्दं स्यन्दत इति मत्स्यन्दी। 'स्यन्दू प्रस्रवणे'। मत्स्यण्डीति वा पाठः। श्रेष्ठगुडचूर्णाभनिकृष्टशर्कराविकारनाम ॥ फाण्यते पक्वसमये [5]घाटान्तरे निक्षिप्यते फाणितम्। 'फण गतौ'। पङ्कवदपिण्डावस्थगुडविकारनाम ॥ विशेषनिष्पीडितपाकजखण्डविकारस्य नामानीति केचित् ॥ शीर्यत इति शर्करा। 'शॄ विशरणे'। [6]धवलवर्णत्वात् सिता। पञ्चसारानाम्नः[7] शर्कराया नाम ॥ ४३ ॥

---

[1] K_3 adds व्याप्नोति. [2] तिलवत् K_5, K_6. [3] लवण॰ K_5. [4] मन्दते K_6. [5] घटादौ W_2. [6] आद्यन्तश्वेतत्वात् K_6; अत्यन्त॰ K_5, W_2. [7] ॰धारा॰ K_6.

(पा.) सौवर्चलेऽक्षरुचके[1]। सौवर्चललवणनामानि। 'ना चक्रे शकटेऽप्यक्षः क्ली सौवर्चल इन्द्रिये' इत्यभिधानादक्षं षान्तम्। 'अक्ष्यं काङ्क्ष्यं रुचिष्यं च' इति पाठादक्ष्यं यान्तं च ॥ तिलकं तत्र मेचके। नीलसौवर्चललवणं तिलकं स्यात्।

अनुक्तम्—'पटु क्षेत्र्यं चोषरजे'। क्षेत्रजलवणनामानि ॥ मत्स्यण्डी फाणितं खण्डविकारे। खण्डशर्करानामानि ॥ शर्करा सिता। [2]शर्करानामनी ॥ ४३ ॥

[1] °रुचिके B_3. [2] पञ्चधारा° B_3.

कूर्चिका क्षीरविकृतिः स्याद्रसाला तु मार्जिता ।
स्यात्तेमनं तु निष्ठानं त्रिलिङ्गा वासितावधेः ॥ ४४ ॥

(वि.) कूर्चिकेति—कूर्चकः[1] क्षीरमस्तु, तदस्यास्तीति कूर्चिका। नवप्रसूतगोक्षीरविकारनाम[2] ॥ दध्यादिगतनानाविधरसयोगाद्[3] रसाला। रसान् आलातीति रसाला। 'ला दाने'। यत्सूदशास्त्रम्—

'अर्धाढकं सुदृढपर्युषितस्य दध्नः खण्डस्य षोडश पलानि शशिप्रभस्य ।
सर्पिष्पलं मधुपलं मरिचद्विकर्षं शुण्ठ्याः पलार्धमपि वार्धपलं चतुर्णाम् ॥
श्लक्ष्णे पटे ललनया मृदुपाणिघृष्टा कर्पूरधूलिसुरभीकृतभाण्डसंस्था ।
एषा वृकोदरकृता सुरसा रसाला या स्वादिता भगवता मधुसूदनेन ॥'

इति क्षीरस्वामी (पृ. २०९) ॥ पटे निधाय मृज्यते शोध्यते मार्जिता। 'मृजूष् शुद्धौ अलंकारे च'। शिखरिणीनाम्नो लेह्यस्य नामनी ॥ तिम्यति आर्द्रीभवतीति तेमनम्। 'तिम[4] आर्द्रीभावे'। नितिष्ठत्यन्तं गच्छत्यनेनान्नमिति निष्ठानम्। [5]चोष्यनामनी ॥ इत आरभ्य वासितशब्दपर्यन्तं त्रिलिङ्गाः ॥ ४४ ॥

[1] कूर्च Pt_2. [2] K_5, K_6 omit विकार. [3] संप्रयोगात् K_2. [4] तिम ष्टिम K_5, K_6, W_2. [5] व्यञ्जननामनी W_2.

(पा.) कूर्चिका क्षीरविकृतिः स्यात्। क्षीरविकारः कूर्चिका स्यात्। संस्कारभेदात् सा द्विविधा।

'दध्ना सह पयः पक्वं यत्स्यात् सा दधिकूर्चिका ।
तक्रेण पक्वं यत्क्षीरं सा भवेत् तक्रकूर्चिका ॥'

स्याद्रसाला तु मार्जिता[1]। शिखरिणीनामनी। 'शिखरि'॥

'अपक्वतक्रं सद्योषं चातुर्जातगुडार्द्रकम् ।
सजीरकं रसाला स्यात् मार्जिका शिखरिण्यपि ॥'

स्यात्तेमनं तु निष्ठानम्। तेमनं निष्ठानं स्यात्। 'पळिधें'। अनुक्तम्—सूदः पुंस्यस्त्रियां सूपम्। सूपनामनी। 'पप्पु'॥ उपदंशोऽपदंशकः। उपदंशनामनी॥ त्रिलिङ्गा वासितावधेः। वासितशब्दावधेस्त्रिलिङ्गाः। शूल्या पेशी। पैठरी भिस्सा॥ ४४॥

---

[1] मार्जिका A_1, B_3.

शूलाकृतं भटित्रं च शूल्यमुख्यं तु पैठरम्।
प्रणीतमुपसंपन्नं प्रशस्तं स्यात्सुसंस्कृतम्॥ ४५॥

(वि.) शूलाकृतमिति—शूलेनोद्भिद्य पच्यत[1] इति शूलाकृतम्। भटति बिभर्ति पुष्णातीति भटित्रम्। 'भट भृतौ'। शूलेन[2] संस्कृतं शूल्यम्। यद्वेण्वादिशलाकया उद्भिद्य जम्बीररसादिभावितमांसादिकम् अङ्गारेषु पच्यते तस्य नामानि॥ उखायां संस्कृतं उख्यम्। पिठरे संस्कृतं पैठरम्। स्थाल्यां संस्कृतस्य पिष्टादेर्नामनी॥ रसादिना [3]प्रकर्षं नीतं प्रणीतम्। उप समीपे रसेन संपन्नम् उपसंपन्नम्। पाकरसरूपातिशयान्वितस्यान्नादेर्नामनी॥ प्रशस्यत इति प्रशस्तम्। 'शंसु स्तुतौ'। प्रयस्तमिति पाठे [4]प्रयत्ननिष्पन्नम्। 'यसु प्रयत्ने'। कर्पूरादिसंस्कृतस्य लेह्यादेर्नामनी॥ ४५॥

---

[1] शूलेन कृतं W_2. [2] शूले W_2. [3] प्रकर्षेण W_2. [4] प्रकर्षेणातिशयितं K_5, K_6.

(पा.) शूलाकृतं—शूल्यम्। शूले पक्वस्य[1] नामानि। 'कर्कुट्लु'। उख्यं तु पैठरम्। पिठरे[2] पक्वस्य नामनी। प्रणीतमुपसंपन्नम्। [3]उदकपक्वस्य नामनी॥ प्रयस्तं स्यात् सुसंस्कृतम्। तैलघृतादिभिर्घृष्टस्य नामनी। 'यसु प्रयत्न इत्यतः क्तः' इति सुभूतिटीकावचनात् प्रयस्तमन्तस्थमध्यम्॥ ४५॥

---

[1] दग्धस्य A_1. [2] भाण्डे A_1. [3] उदकेन A_1.

स्यात् पिच्छिलं तु विजिलं संमृष्टं शोधितं समे।
चिक्कणं मसृणं स्निग्धं तुल्ये भावितवासिते॥ ४६॥

(वि.) स्यादिति—पिच्छा [1]अस्य संजाता पिच्छिलम्। विजते सद्रवत्वेन चलतीति विजिलम्। 'ओविजी भयचलनयोः'। मण्डान्वितादेर्नामनी॥ संमृज्यत इति संमृष्टम्। 'मृजूष् शुद्धौ'। शोध्यत इति शोधितम्। 'शुध शौचे'। वस्त्रादिना परिशोधितस्य तक्रादेर्नामनी॥ पेषणकाले चिमिति कणति चिक्कणम्[2]। 'कण शब्दे'। मस्यति द्रवत्वेन परिणमति मसृणम्। 'मसी परिणामे'। स्निह्यतीति स्निग्धम्। 'ष्णिह प्रीतौ'।

स्निग्धस्य जलयुक्तस्य गोधूमपिष्टादेर्नामानि ॥ भाव्यते वास्यते भावितम्। 'भुवोऽवकल्कने'। वास्यत इति वासितम्[3]। 'वस स्नेहमोहच्छेदापहरणेषु'। कृत्रिमगन्धान्तरवतः पानीयादेर्नामनी ॥ ४६ ॥

[1] अत्र अस्तीति K_5, K_6.
[2] चित्यत इति, 'चिती संज्ञाने' F_2, Pt_2.
[3] धूपितं सिवातं विदुरिति पाठे वासितमिति एकं नाम धूपितस्य K_5, K_6.

(पा.) स्यात् पिच्छिलं तु विजिलम्। [1]घनीभूतस्य दध्यादेर्नामनी। 'जिनुगज्जिदनदानि पेरु'॥ संमृष्टं शोधितं समे। [2]वस्त्रादिना [3]शोधितस्य [4]वस्तुनो नामनी। 'कोलगिन्नचातकोलचिनवि'॥ चिक्कणं—स्निग्धम्। सान्द्रवस्तुनामानि। 'सायं सूक्ष्मं मसृणं मसूरं सिन्दूरं संधानम्' इत्यूष्मभेदपाठात् मसृणं दन्त्यम्॥ तुल्ये भावितवासिते। कर्पूरादिभिः [5]सौगन्ध्यादिगुणापादितस्य नामनी ॥ ४६ ॥

[1] A_1 omits.
[2] कुन्नानादिना A_1.
[3] A_1 adds परि°.
[4] B_3 omits.
[5] आपादितसौगन्ध्यस्य B_3.

आपक्कं पौलिरभ्यूषो लाजाः पुंभूम्नि चाक्षताः ।
पृथुकः स्याच्चिपिटको धाना भृष्टयवे स्त्रियः ॥ ४७ ॥

(वि.) आपक्कमिति—ईषत्पक्कम् आपक्कम्। पुलति ईषत् [1]पृथु भवतीति पौलिः। 'पुल महत्वे'। अभ्यूषति रुजतीत्यभ्यूषः। 'ऊष रुजायाम्'। भृष्टचणकादेर्नामनी॥ लाज्यन्ते भृज्यन्त इति लाजाः। 'लाज[2] भर्जने भर्त्सने च'। भृष्टधान्यानां नाम। न विद्यते क्षतं येषां ते अक्षताः। अक्षतशब्दः लाजशब्दवत् पुंसि भूम्नि च वर्तते। न क्षण्यन्त इति वा अक्षताः। 'क्षणु हिंसायाम्'। हरिद्रादियुक्तशाल्यादिबीजनाम॥ भर्जनात् पृथु भवतीति पृथुकः। मुसलावघातेन चिपिटो भवतीति चिपिटकः। सार्द्रान् व्रीहीन् भृष्टान् कृत्वा उलूखले मुसलेन कुट्टयित्वा भक्ष्यत्वेन कल्पितानां[3] नामनी॥ [4]धीयन्ते धानाः। 'डुधाञ् धारणपोषणयोः'। भृष्टयवनाम॥ ४७ ॥

[1] महद्भवतीति F_2, Pt_2.
[2] 'लाज लाजि भर्जने' K_5, K_6.
[3] W_2 adds परि°.
[4] न धीयन्ते भ्राष्ट्रादन्यत्र K_5, K_6; धनन्ति पुष्णन्ति, 'धन धान्ये' Pt_2.

(पा.) आपक्कं—अभ्यूषः। आसमन्तात्पक्कनिष्पावादिनामानि। 'गुल्लिल्लु'। आपक्कं पुंनपुंसकम्। पौलिः पुंलिङ्गः॥ लाजाः—चाक्षताः। 'बहवस्तु सक्तवो लाजाः' इति वामनसूत्राल्ल् लाजशब्दो बहुवचनान्तः पुंलिङ्गः। लाजा इति पृथक्पदकरणात्

तत्पर्यायस्यापि पुंस्त्वं बहुवचनं च। 'लाजा अक्षता असवः प्राणाः' इति तद्वृत्त्या अक्षतशब्दश्च पुंलिङ्गो बहुवचनान्तः। 'अक्षतं तण्डुले क्लीबं न ना लाजेषु कथ्यते' इति केषांचिदपुंलिङ्गो बहुवचनान्तश्च॥ पृथुकः स्याच्चिपिटकः। पृथुकनामनी। 'अट्टुकुलु'॥ धाना—स्त्रियः। भृष्टयवतण्डुला धानाः स्युः। स्त्रिय इत्यनेन स्त्रीलिङ्गो बहुवचनान्तश्च। 'वेंचिनयवलु'। अनुक्तम्—शम्बूकास्तण्डुलकणाः। तण्डुलकणनाम। 'नूकलु'। समौ शदकतण्डुलौ। समीचीनतण्डुलनामनी। गोधूमचूर्णे कणिका। गोधूमचूर्णनाम। पललं तिलचूर्णके। तिलानां चूर्णं पललं स्यात्॥ ४७॥

पूपोऽपूपः पिष्टकः स्यात् करम्भो दधिसक्तवः।
भिस्सा स्त्री भक्तमन्धोऽन्नमोदनोऽस्त्री स दीदिविः॥ ४८॥

(वि.) पूप इति—पूयते पाकसमये लग्नं भस्म मृज्यतेऽस्येति पूपः। 'पूञ् पवने'। न पूय[य्य]ते न विशीर्यत इति अपूपः। 'पूयी विशरणे'। पिष्टविकारत्वात् पिष्टकः[2]। गोधूमादिपिष्टकृतस्य भक्ष्यस्य नामानि॥ कीर्यते दध्यत्रेति करम्भः। 'कॄ विक्षेपे'। दध्युपसिक्तसक्तुनाम॥ भस्यते मनुष्यैरिति भिस्सा। 'भस [3]भक्षणदीप्त्योः'। भज्यते सेव्यत इति भक्तम्। 'भज सेवायाम्'। अद्यत इत्यन्धः। 'अद भक्षणे'। सान्तोऽयम्। अद्यत इति अन्नम्[4]। आज्येन उद्यते सिच्यत इति ओदनम्। 'उन्दी क्लेदने'। अनेन दीव्यति प्रहृष्यतीति दीदिविः। 'दिवु क्रीडादौ'। पुमानयम्। अन्ननामानि॥ ४८॥

---

[1] पुनाति W_2, Pt_2.
[2] पिष्टस्य विकारः W_2.
[3] भर्त्सन° K_6.
[4] अनन्ति, 'अन प्राणने' Pt_2.
[5] उन्दति[उनत्ति]क्लिद्यति Pt_2.

(पा.) पूपोऽपूपः पिष्टकः स्यात्। भक्ष्यनामानि। पूपलिकापि।

'पूरिकया घारिकया पोलिकया ड्ढारिकया च वटकेन।
किमितरपूपलिकाभिः क्षीरसखो मन्दकः स यदि॥'

करम्भो दधिसक्तवः। दध्युपसिक्ताः सक्तवः करम्भः स्यात्। पवर्गचतुर्थान्तः। अनुक्तम्—'चक्षुष्या [1]बुम्बिका भूम्नि पुंलिङ्गेऽपि च सक्तवः'। सक्तुनामानि॥ भिस्सा स्त्री—स दीदिविः। अन्ननामानि। स दीदिविरिति दीदिविशब्दस्याप्यस्त्रीत्वमुक्तम्। 'अशनं कूरमाहारो वाजो वा दीदिविः स्त्रियाम्' इति केषांचित् स्त्रीपुंसलिङ्गः॥ ४८॥

---

[1] जन्दिका A_1.

भिस्सटा दग्धिका सर्वरसाग्रे मण्डमस्त्रियाम् ।
मासराचामनिस्रावा मण्डे भक्तसमुद्भवे ॥ ४९ ॥

(वि.) भिस्सटेति—कुत्सिता भिस्सा भिस्सटा। दग्धैव दग्धिका। स्थाल्यामधो दग्धान्ननाम ॥ मण्डयति रसमिति मण्डम्। 'मडि भूषायाम्'। इक्षुरसादेर्निर्मलस्योपरिभागस्य नाम ॥ मस्यति घनीभावेन परिणमति[1] मासरः। 'मसी परिणामे'। आचम्यते ओदनाभावेन आचामः। 'चमु अदने'। निस्राव्यते स्थाल्यामवस्राव्यते[2] [3]निस्रावः। 'स्रु स्रवणे'। 'स्रु गतौ' वा। भक्तसमुद्भवमण्डनामानि ॥ ४९ ॥

[1] परिणमते K_5, K_6. [2] अवसार्यते W_2. [3] निःस्रावः K_6.

(पा.) भिस्सटा दग्धिका। दग्धान्ननामनी। 'माड्ड'। 'दग्धान्नं [1]भिस्सटा झिल्ली' इति वैजयन्ती (पृ. १६५, श्लो. ७७) ॥ अनुक्तम्—मुद्गादिसिद्धं कृसरम्। मुद्गान्ननाम। 'पुलगम्' ॥ संयावो यन्त्रपातितः। यन्त्रपातितो मृणालतन्त्वाकृतिरोदनः संयावः स्यात्। 'सारे सत्तु' ॥ सर्वरसाग्रे मण्डमस्त्रियाम्। सर्वेषामन्नादीनामग्ररसो मण्डः स्यात् ॥ मासराचामनिस्रावाः—समुद्भवे। अन्नाग्ररसनामानि। द्वन्द्वान्तश्रूयमाणपुंस्त्वानि ॥ ४९ ॥

[1] भिस्सिटा इति मुद्रितग्रन्थे.

यवागूरुष्णिका श्राणा विलेपी तरला च सा ।
गव्यं त्रिषु गवां सर्वं गोविड् गोमयमस्त्रियाम् ॥ ५० ॥

(वि.) यवागूरिति—यूयते [1]तण्डुलादिनेति यवागूः। 'यु मिश्रणे'। उष्णत्वाद् [2]उष्णिका। श्रायत इति श्राणा। 'श्रा पाके'। विलिम्पति दर्वीमिति विलेपी। 'लिप उपदेहे'। बहुपेयांशत्वेन चञ्चलत्वात् तरला। अल्पान्नपुलाकाया बहुपेयांशाया[3] नामानि ॥ गोरिदं गव्यम्। गोसंबन्धिनः सर्वस्य शकृद्व्यतिरिक्तस्य साधारणनाम ॥ गोर्विट् पुरीषं गोविट्। गोः पुरीषं गोमयम्। गोपुरीषनामनी ॥ ५० ॥

[1] पाकात् प्राक् पिष्टेन K_5, K_6. [2] अल्पोष्णत्वात् K_6. [3] बहूदकायाः W_2.

(पा.) यवागूरुष्णिका—तरला च सा। यवागूनामानि। गव्यं त्रिषु गवां सर्वम्। गवां क्षीरादिकं सर्वं गव्यं स्यात् ॥ गोविड् गोमयमस्त्रियाम्। [1]गोपुरीषनामनी। 'पेण्ड' ॥ ५० ॥

[1] गोमय° B_3.

तत्तु शुष्कं करीषोऽस्त्री दुग्धं क्षीरं पयः समम्।
पयस्यमाज्यदध्यादि द्रप्सं दधि घनेतरत् ॥ ५१ ॥
घृतमाज्यं हविः सर्पिर्नवनीतं नवोद्धृतम्।

(वि.) तदिति—अग्निमिन्धं[1] करोतीति करीषम्[2]। कीर्यते इन्धनत्वेनेति वा। 'कॄ विक्षेपे'। शुष्कगोमयनाम ॥ दुह्यत इति दुग्धम्। 'दुह प्रपूरणे'। घस्यत इति क्षीरम्। 'घस्ऌ अदने'। पीयत इति पयः। 'पा पाने'। सान्तोऽयम्। क्षीरनामानि ॥ पयसो विकारः पयस्यम्। दध्याज्यनवनीतादेर्नाम ॥ दध्नो मूलं द्रवः। दधिमध्यं घनः। दध्यग्रं शरः। तत्र घनादितरत् दधिद्रवशरभूतं द्रप्समित्युच्यते। द्रवति सारांशत्वाद् उपरिस्थितत्वाच्चेति द्रप्सम्। 'द्रु गतौ'। जिघर्ति घृतम्। 'घृ क्षरणदीप्त्योः'। आ ईषदञ्जनीयम् ओदनादौ [4]सेचनीयमिति आज्यम्। 'अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु'। म्रक्षणं सेचनम्। हूयतेऽग्नाविति हविः। 'हु दानादनयोः'। सर्पति चलतीति सर्पिः। '[5]सृप्ऌ गतौ'। उभे सान्ते। घृतनामानि ॥ नवं तत्कालदध्नो मन्थनानन्तरं नीतं नवनीतम्। नवं तस्मिन् काल एव तक्रादुद्धृत नवोद्धृतम्। मथनानन्तरं दध्नो विनिर्गतस्य सर्पिषः प्रकृतिभूतस्य सारांशस्य नामनी ॥ ५१ ॥

[1] इन्धनं K_5, K_6. [2] K_3, K_6 add 'डुकृञ् करणे'. [3] 'पीङ् पाने' इति वा धातुः W_2. [4] सेवनीयं K_5, K_6. [5] K_3, K_6 add गम्ऌ.

(पा.) तत्तु शुष्कं करीषोऽस्त्री। शुष्कगोमयं करीषं स्यात्। 'पिडक'। केषांचित् 'दोह्लस्तु करीषा स्त्री' इति गोमयखण्डाः। 'येरुवु'। गोग्रन्थिः शुष्कगोमयः। करीषो गोग्रन्थिः स्यात् ॥ दुग्धं क्षीरं पयः समम्। क्षीरनामानि। दोहजं स्तन्यमूधन्यम्। एतानि च ॥ पयस्यमाज्यं दध्यादि। आज्यदध्यादि पयस्यं स्यात् ॥ द्रप्सं दधि घनेतरत्। सोदकं दधि द्रप्सं स्यात्। अनुक्तम्—निःसारं तद्दधिबुसम्। साररहितं दधि दधिबुसं स्यात्। 'मीगडतीचिनपेरुगु'। मङ्गल्यं श्रीघनं दधि। पयःपुत्रनामनी। 'मीगडपेरुगु'। घृतमाज्यं—सर्पिः। घृतनामानि ॥ नवनीतं नवोद्धृतम्। तस्मिन् दिने मथित्वोद्धृतं नवनीतं स्यात्। 'वेन्न' ॥ ५१ ॥

तत्तु हैयङ्गवीनं यद् ह्योगोदोहोद्भवं घृतम् ॥ ५२ ॥
दण्डाहतं कालशेयमरिष्टमपि गोरसः।
तक्रं ह्युदश्विन्मथितं पादाम्ब्वर्धाम्बु निर्जलम् ॥ ५३ ॥

(वि.) तदिति—ह्यः पूर्वेद्युर्गोदोहः ह्योगोदोहः। तस्य विकारः हैयङ्गवीनम्। पूर्वेद्युर्दुग्धगोक्षीरकृतघृत[1]नवनीतयोर्नाम ॥ [2]मथनदण्डेनाहतं दण्डाहतम्। कलश्यां मन्थनघटे भवं कालशेयम्। न रिष्यति हिंसयति इत्यरिष्टम्[3]। 'रिष हिंसायाम्'। गोः रसः गोरसः। वक्ष्यमाणतक्रोदश्विन्मथितानां प्रत्येकनामानि ॥ तच्यते उदश्विदपेक्षया संकुच्यत इति तक्रम्। 'तञ्चू संकोचने'। चतुर्थांशपरिमितजलेन सहालोडितस्य दण्डाहतस्य नाम ॥ [4]उदकेन श्वयति वर्धते उदश्वित्। 'टुओश्वि गतिवृद्धौ'। अर्धाम्बुना सह मथितस्य तस्यैव नाम ॥ मन्थनमात्रात् निष्पन्नं मथितम्। 'मथे विलोडने'। जलमदत्वैव लोडितस्य नाम ॥ ५२–३ ॥

[1] °कृतनवनीतघृतनाम K_2, K_3. [2] मथनादिना W_2. [3] F_2, Pt_2 add सर्वरोगजित्त्वात्. [4] Gap of nine pages in K_2.

(पा.) तत्तु हैयङ्गवीनं—घृतम्। ह्यो गतदिवसः। तस्मिन् गोदोहेन संपन्नं घृतं हैयङ्गवीनं स्यात् ॥ दण्डाहतं—गोरसः। गोरसनामानि। अर्शोघ्नं मोरटं घोलं स्याद्रसायनमित्यपि। एतानि च ॥ तक्रं—निर्जलम्। पादोदकार्धोदकनिरुदकानि कालशेयानि क्रमात् तक्रोदश्विन्मथितानि स्युः ॥ ५२–३ ॥

मण्डं दधिभवं मस्तु पीयूषोऽभिनवं पयः।
अशनाया बुभुक्षा क्षुद् ग्रासस्तु कबलः पुमान् ॥ ५४ ॥

(वि.) मण्डमिति—मस्यति ईषदम्लत्वेन परिणमति[1] मस्तु। 'मसी परिणामे'। दध्युत्पन्नमण्डनाम[2] ॥ पीयते वत्सेनैवेति पीयूषः। 'पीङ् पाने'। पेयूष इति वा पाठः। नवप्रसूतधेनुक्षीरनाम[3] ॥ अशने भक्षणे इच्छा अशनाया। भोक्तुमिच्छा बुभुक्षा। क्षुध्यत्यनया क्षुत्। 'क्षुध बुभुक्षायाम्'। दीपननामानि ॥ ग्रस्यत इति ग्रासः। 'ग्रसु ग्लसु अदने'। भक्षणसमये के तालुनि[4] वलते चलतीति कबलः। 'वल संचलने'। मयूराण्डसंमितस्य अन्नपिण्डस्य नामनी ॥ ५४ ॥

[1] °णमते W_2. [2] द्रवभाग° W_2. [3] क्षीरपक्वं तस्य नाम W_2. [4] मूर्ध्नि K_5, K_8.

(पा.) मण्डं दधिभवं मस्तु। दध्नो मण्डं मस्तु स्यात्। 'पेरुगुमीगड'। पीयूषोऽभिनवं पयः। आ सप्ताहात्तु पीयूषमिति शास्त्रात् सप्तदिनपयः पीयूषं स्यात्। 'जुन्नु'। अशनाया—क्षुत्। क्षुधानामानि ॥ ग्रासस्तु कबलः पुमान्। कबलनामनी। 'कडि' ॥ ५४ ॥

सपीतिः स्त्री तुल्यपानं सग्धिः स्त्री सहभोजनम् ।
उदन्या तु पिपासा तृट् तर्षो जग्धिस्तु भोजनम् ॥ ५५ ॥
जेमनं लेप आहारो निघसो न्याद इत्यपि ।

(वि.) सपीतिरिति—सह[1] पीतिः पानं सपीतिः। एकपङ्क्त्युपविष्टानाम् अविशेषेण पानस्य नाम ॥ सह अदनं सग्धिः[2] । एकपङ्क्तौ एकभाजने वा भुजिक्रियानाम ॥ उदके इच्छा उदन्या। पातुमिच्छा पिपासा[3] । तर्षणं तृट् । तर्षश्च । 'ञितृषा पिपासायाम्'। जलपानेच्छानामानि ॥ अदनं जग्धिः । 'अद भक्षणे'। भुज्यत इति भोजनम्। 'भुज पालनाभ्यवहारयोः'। जिम्यत इति जेमनम्। 'जिमु अदने'। लिप्यते उपचीयते देहोऽनेनेति लेपः। 'लिप उपदेहे'। आह्रियते[4] भुज्यते आहारः। 'हृञ् हरणे'। नितरामद्यते निघसः। न्यादश्च। 'अद भक्षणे'। भुजिक्रियानामानि ॥ ५५ ॥

[1] समाना F$_2$, Pt$_2$.　[2] समाना जग्धिः Pt$_2$.　[3] W$_2$ adds 'पा पाने'.
[4] आहरणं Pt$_2$.

(पा.) सपीतिः—तुल्यपानम्। सहपाननाम ॥ सग्धिः—सहभोजनम्। [1]सहभोजननामनी ॥ उदन्या—तर्षः। तृषानामानि ॥ जग्धिस्तु भोजनम्—न्याद इत्यपि। भोजननामानि । अनुक्तम्—'उपोषितस्य या भुक्तिः पारणा सा निगद्यते'। कृतोपवासस्य भोजनं पारणा स्यात् ॥ ५५ ॥

[1] पुत्रादिभिः सहान्नभक्षणनाम A$_1$.

सौहित्यं तर्पणं तृप्तिः फेला भुक्तसमुज्झितम् ॥ ५६ ॥
कामं प्रकामं पर्याप्तं निकामेष्टं यथेप्सितम् ।
गोपे गोपालगोसंख्यगोधुगाभीरवल्लवाः ॥ ५७ ॥

(वि.) सौहित्यमिति—सुह्यति तृप्यतीति सुहितः, तस्य भावः सौहित्यम्। 'सुह[1] चक्यर्थे'। चक्यर्थः तृप्त्यर्थः। तृप्यतेऽनेनेति तर्पणम्। तृप्तिश्च। 'तृप प्रीणने'। भुजिक्रियाफलस्य नामानि ॥ [2]फेल्यते भोजनादपास्यते फेला। 'फेलृ गतौ'। भुक्तेन समुज्झितान्ननाम ॥ काम्यते सर्वैरिति कामम्। प्रकामं च। निकामं च। 'कमु कान्तौ'। पर्याप्यते इच्छाया अन्तः सम्यगाप्यते अनेनेति पर्याप्तम्। 'आप्लृ व्याप्तौ'। इष्यत इति

इष्टम्। ‘इष इच्छायाम्’। आप्तुमिच्छा ईप्सा। अस्या अधिकं यथेप्सितम्[3]। यस्य कस्यापि वस्तुन इच्छाधिक्योपेतस्य नामानि ॥ इदानीं पाशुपाल्यमाह—गाः पातीति गोपः। ‘पा रक्षणे’। गाः पालयतीति गोपालः। ‘पाल रक्षणे’। गाः संचष्टे गोमिने तव गावः सुखेनागता इति गोसंख्यः। ‘चक्षिङ् व्यक्तायां वाचि’। गाः दोग्धीति गोधुक्। ‘दुह प्रपूरणे’। अभि अग्रे गा ईरयतीति आभीरः। ‘ईर प्रेरणे’। गाः वल्लयति कण्डूयनादिना प्रीणयतीति वल्लवः[4]। ‘वल्ल प्रीतौ’। गोपनामानि ॥ ५६–७॥

---

[1] घुह W$_2$.
[2] फेलते K$_5$, K$_6$; फेलति भोजनात् चलति, ‘फेल गतौ’ F$_2$, Pt$_2$.
[3] ईप्सितमनतिक्रान्तं Pt$_2$.
[4] गोमहिषादिकं वह्लमानाः संवृण्वन्तो वान्ति गच्छन्तीति वल्लवाः, ‘वह्ल संवरणे’ Pt$_2$.

(पा.) सौहित्यं तर्पणं तृप्तिः। तृप्तिनामानि। ‘[1]तनिवि’। सुहितस्य भावः सौहित्यमिति व्युत्पत्त्या सुहितस्तृप्तः॥ फेला भुक्तसमुज्झितम्[2]। भुक्त्वा परित्यक्तमुच्छिष्टान्नं फेला स्यात्। ‘फेला फेण्डोलिफेलयः’ इति रभसकोशः॥ कामं प्रकामं—यथेप्सितम्। यथेष्टनामानि। क्रियाविशेषणत्वान्नपुंसकानि। [3]काममभोजि। प्रकाममभोजि। अनुक्तम्—[4]ताम्बूलं स्याद्वीटिका स्त्री ताम्बूलं मुखभूषणम्। ताम्बूलनामानि ॥ गोपे गोपाल—आभीरवल्लवाः। गोपालकनामानि। ‘गोप’॥ ५६–७॥

---

[1] B$_3$ omits.
[2] समुज्झिते B$_3$.
[3] कामभोजि, प्रकामभोजि B$_3$.
[4] स्याद्वीटिका स्त्री क्रमुकं ताम्बूलम् A$_1$.

गोमहिष्यादिकं पादबन्धनं द्वौ गवीश्वरे।
गोमान् गोमी गोकुलं तु गोधनं स्याद्गवां व्रजे ॥ ५८ ॥

(वि.) गोमेति—पादे बन्धनमस्य पादबन्धनम्। यादवं धनमिति पाठे गोमहिष्यादिकं धनम्। यदूनामिदं यादवम्। गोमहिष्यादिनाम ॥ गवामीश्वरे स्वामिनि गवीश्वरे। गावः सन्त्यस्य गोमान्। गोमी च। गोस्वामिनामनी ॥ गवां कुलं [1]समूहो गोकुलम्। गोरूपधनानां समूहो गोधनम्। गोव्रजस्य गोनिवासस्य वा नामनी ॥ ५८ ॥

---

[1] संघातः F$_2$, W$_2$, Pt$_2$.

(पा.) गोमहिष्यादिकं पादबन्धनम्। गोमहिषीप्रमुखाः पादबन्धनं स्यात्। रभसकोशेऽपि तथैवोक्तम् ‘गोसंख्यायादवं क्लीबं गवादि पादबन्धनम्’ इति।

सुभूतिटीकायां तु यादवं धनमिति पठितम्। द्वौ गवेश्वरे—गोमी। गवाध्यक्षनामनी[1] ॥ गोकुलं तु—गवां व्रजे। गोव्रजनामानि। 'आवुलदोड्डि' ॥ ५८ ॥

[1] गोष्ठाध्यक्ष° A_1.

त्रिष्वाशितंगवीनं तद् गावो यत्राशिताः पुरा।
उक्षा भद्रो बलीवर्द ऋषभो वृषभो वृषः ॥ ५९ ॥
अनड्वान् सौरभेयो गौरुक्ष्णां संहतिरौक्षकम्।

(वि.) त्रिष्विति—पुरा यत्र गावः आशिताः उषिताः[1] तदेव आशितंगवीनम्। यत्र [2]शाड्वलादिस्थले[3] गावः पुरा उषिताः तस्य स्थलस्य नाम ॥ उक्षति रेतः सिञ्चति उक्षा। 'उक्ष सेचने'। भन्दते कल्याणाङ्गत्वाद् भद्रः। 'भदि कल्याणे'। बलीः कण्ठप्रदेशे वृणुते स्वीकृतवान्[4] बलीवर्दः। 'वृञ् वरणे'। ऋषति गां प्रति गच्छतीति ऋषभः। 'ऋषी गतौ'। वर्षति[5] रेत इति वृषभः। 'वृष सेचने'। वृषश्च[6]। अनः शकटं वहतीति अनड्वान्। 'वह प्रापणे'। सुरभेर्गोरपत्यं सौरभेयः। [7]रुचिरं गच्छतीति गौः। साण्डस्य पुंगवस्य नामानि ॥ उक्ष्णां समूह औक्षकम्। वृषसमूहनाम ॥ ५९ ॥

[1] भोजिताः W_2; आसिताः F_2. [2] शाद्वल° W_2. [3] स्थाने W_2. [4] स्वीकुरुते K_3; करोति F_2, Pt_2. [5] F_2, W_2 add सिञ्चति. [6] K_5, K_6 add स एव धातुः. [7] सुचिरं Pt_2.

(पा.) त्रिष्वाशितंगवीनं—पुरा। यत्र पूर्वं तृणं भक्षयित्वा गावो गतास्तत् तृणान्नारण्यम् आशितंगवीनं स्यात्। उक्षा नान्तोऽयम्। भद्रो बलीवर्दः—गौः। अनडुहां नामानि। शाक्करो बाडवेयः स्यात् ककुद्मानक्षधूर्तिलः। एतानि चत्वारि च ॥ उक्ष्णां संहतिरौक्षकम्। अनडुहां समूह औक्षकं स्यात् ॥ ५९ ॥

गव्या गोत्रा गवां वत्सधेन्वोर्वात्सकधैनुके ॥ ६० ॥
उक्षा महान् महोक्षः स्याद् वृद्धोक्षस्तु जरद्गवः।
उत्पन्न उक्षा जातोक्षः सद्यो जातस्तु तर्णकः ॥ ६१ ॥

(वि). गव्येति—गवां समूहो गव्या। गोत्रा च। गोसमूहनामनी। वत्सानां समूहो वात्सकम्। वत्ससमूहनाम ॥ धेनूनां समूहो धैनुकम्। धेनुसमूहनाम ॥

महांश्चासौ उक्षा च महोक्षः । महावृषभनाम ॥ वृद्धश्चासौ उक्षा च वृद्धोक्षः । जरंश्चासौ गौश्च जरद्गवः । वृद्धवृषभनामनी ॥ जातश्चासौ उक्षा च जातोक्षः । उत्पन्नस्य वृषभस्य[1] नाम ॥ तृणोति स्तन्यं पयः परप्रेरणया पिबतीति तर्णकः । 'तृणु भक्षणे' । सद्य एव जातस्य वत्सस्य नाम ॥ ६०–१ ॥

---

[1] वृषस्य W_2; उक्षण: K_5, K_6.

(पा.) गव्या गोत्रा गवाम् । गवां [1]समूहः गव्या गोत्रा च स्यात् ॥ वत्सधेन्वोर्वात्सकधैनुके । वत्सानां समूहो वात्सः स्यात् । धेनूनां[2] समूहो धैनुकं स्यात् । [3]उक्षो महान् महोक्षः स्यात् । महावृषनाम[4] । '[5]सरिगेद्दु' ॥ वृद्धोक्षस्तु जरद्गवः । वृद्धवृषभनामनी ॥ उत्पन्न उक्षा जातोक्षः । मर्दितवृषणो वृषभो जातोक्षः स्यात् । 'पिड्डुगोट्टिनयद्दु[5]' ॥ सद्योजातस्तु तर्णकः । सद्यः समुत्पन्नवत्सनाम । 'लेंगदूड' ॥६०–१॥

---

[1] यूथं A_1. [2] वत्समातृणां गवां A_1. [3] वृष: A_1. [4] °वृषभ° B_3.
[5] B_3 omits.

शकृत्करिस्तु वत्सः स्याद् दम्यवत्सतरौ समौ ।
आर्षभ्यः षण्डतायोग्यः षण्डो गोपतिरिट्चरः ॥ ६२ ॥

(वि.) शकृदिति—शकृत् विष्ठां करोतीति शकृत्करिः[1] । 'डुकृञ् करणे' । प्रथमे वयसि वसतीति वत्सः । 'वस निवासे' । दशदिनाभ्यन्तरवर्तिनो वत्सस्य नामनी ॥ दमनार्हः शिक्षार्हः दम्यः । 'दमु उपशमने'[2] । प्रथमवयसो निवृत्तो वत्सो वत्सतरः । यूनो वत्सतरस्य[3] नामनी ॥ ऋषभस्य आकृष्टाण्डस्य [4]प्रतिकृतिरिति आर्षभ्यः । अण्डाकर्षणयोग्यकालस्य वत्सतरस्य[5] नाम ॥ सन्यत उत्सृज्यत इति षण्डः । 'षणु दाने' । गोषु पतिवत् गर्भाधानकारित्वात् गोपतिः । इषा स्वेच्छया चरतीति इट्चरः[6] । उत्सृष्टवृषभस्य नामानि ॥ ६२ ॥

---

[1] शकृत्करी K_5, K_6. [2] 'दमु दान्तौ' Pt_2. [3] वत्सस्य W_2. [4] प्रकृतिः W_2.
[5] वत्सस्य W_2. [6] इत्वर इति वा पाठः K_5, K_6.

(पा.) शकृत्करिस्तु वत्सः स्यात् । वत्सनाम । 'दूड[1]' । अनुक्तम्—कयाहो महिषीशिशुः । महिष्याः शिशुः कयाहः स्यात् । दम्यवत्सतरौ समौ । दण्डयोग्यवत्सनामनी । 'दिद्नैनकाडे' । आर्षभ्यः षण्डतायोग्यः । [2]उत्सर्जनयोग्यस्य वत्सतरस्य नामनी ।

'त्राशिविडिचिपेट्ट्योग्यमैनकोडे'। षण्डो गोपतिरिट्चरः। षण्डो गोपतिरिट्चरः, षण्डो गोपतिरित्वरः, इति च पाठान्तरम्। [3]वृषभराजनामानि। 'गूळिबसुवंडु'। 'षण्डस्तु गोपतिः श्रीमान् डङ्क[4] इट्वर[5] [6]ईश्वरः' इति वैजयन्ती (प्र. ६९, श्लो. ५३)॥ ६२॥

[1] B_3 omits.　[2] लिखिःवोत्सर्जनीयवत्सतर आर्षभ्यः स्यात् A_1.　[3] उत्सृष्टवृषभनामनी B_3.　[4] धंक A_1.　[5] इत्वरः A_1.　[6] इट्चरः A_1.

स्कन्धप्रदेशस्तु वहः सास्ना तु गलकम्बलः।
स्यान्नस्तितस्तु नस्योतः प्रष्ठवाड् युगपार्श्वगः॥ ६३॥

(वि.) स्कन्धेति—वहति शकटादिकमनेनेति वहः। 'वह प्रापणे'। बलीवर्दादिस्कन्धप्रदेशनाम॥ सस्ति अप्रयोजकत्वात् स्वपितीव तिष्ठतीति सास्ना। 'षस स्वप्ने'। बलीवर्दकण्ठे मृदुकम्बलवत् स्थितस्यावयवस्य नाम॥ नस्तः नासिकायां सूच्यादिना विद्धो नस्तितः। 'णस कौटिल्ये'। नसि[1] नासिकायां रज्ज्वादिना प्रोतो नस्योतः। नासिकायां कृतच्छिद्रस्य बलीवर्दस्य नामनी॥ प्रष्ठम् अग्रगामिनं वहतीति प्रष्ठवाट्। 'वह प्रापणे'। पष्ठवाडिति पाठे पञ्चमं षष्ठं वा वर्षं वहति। युगपार्श्वे गच्छतीति युगपार्श्वगः। युगस्य दान्तपार्श्वे दमनाय योजितबलीवर्दस्य नामनी॥ ६३॥

[1] नस्ये नासिकारन्ध्रे ऊतः F_2, Pt_2.

(पा.) स्कन्धप्रदेशस्तु वहः। [1]वृषस्कन्धदेशो वहः स्यात्। 'अंसकूटस्तु [2]ककुदम्' इति [3]ककुत्पर्याये हलायुधः (अ. मा. २. १११)। '[4]मूपरमु'॥ सास्ना तु गलकम्बलः। गवां ग्रीवाकम्बलनाम। 'गंगडोलु'। स्यान्नस्तितस्तु नस्योतः। रज्ज्वा[5] प्रोतनासिको वृषभो नस्तितः स्यात्। 'मुकुदाडुपेट्टिनयद्दु'॥ प्रष्ठवाड् युगपार्श्वकः। शिक्षार्थं[6] युगादधोनिबद्धो वृषः प्रष्ठवाड् स्यात्। 'अणिकवेसिन कुट्टियद्दु'॥ ६३॥

[1] वृषभाणां स्कन्धः A_1.　[2] ककुदः A_1, B_3.　[3] A_1 adds पृष्ठगत°.　[4] B_5 omits.　[5] प्रोतनासिकस्य नाम B_3.　[6] B_3 omits.

युगादीनां तु वोढारो युग्यप्रासङ्ग्यशाकटाः।
खनति तेन तद्वोढास्येदं हालिकसैरिकौ॥ ६४॥

(वि.) युगादीनामिति—युगं वहतीति युग्यः। प्रासङ्गं वहतीति प्रासङ्ग्यः। शकटं रथं वहतीति शाकटः। युगप्रासङ्गशकटवाहकानां बलीवर्दानां क्रमेण नामानि ॥ हलेन खनतीति हालिकः। हलं वहतीति हालिकः। हलस्य [1]संबन्धी हालिकः। एवं सैरिकश्च[2]। हलेन खनतः हलं वहतः हलसंबन्धिनो वा बलीवर्दस्य नामानि ॥ ६४ ॥

[1] हलस्यायं F_2, Pt_2.
[2] सीरेण खनतीत्यादि W_2.

(पा.) युगादीनां तु—शाकटाः। युगप्रासङ्गशकटानां वाहकाः वृषाः क्रमाद् युग्यप्रासङ्ग्यशाकटाः स्युः। 'तद्वहति [1]रथयुगप्रासङ्गम्' इति यत्। खनति येन—हालिकसैरिकौ। तेन खनति, तस्येदम्, तस्य वोढा इत्यर्थेषु हालिकसैरिकशब्दौ स्याताम्। हलेन खनति, हलास्यायं, हलस्य वोढा वा [2]अनड्वान् हालिकः। सीरेण खनति, सीरस्यायं, सीरस्य वोढा वा सैरिकोऽनड्वान् ॥ ६४ ॥

[1] रथमित्यादिना A_1.
[2] हालिकोऽनड्वान् A_1.

धूर्वहे धुर्यधौरेयधुरीणाः सधुरंधराः।
उभावेकधुरीणैकधुरावेकधुरावहे ॥ ६५ ॥

(वि.) धूर्वह इति—धुरं वहतीति धूर्वहः। धुर्यः। धौरेयः। धुरीणश्च। धुरं धारयतीति धुरंधरः[1]। युगधुरां वोढुः बलीवर्दस्य नामानि ॥ एकां धुरं वहतीति एकधुरीणः[2]। एकधुरः। एकधुरावहश्च। शकटलाङ्गलतैलिक्ययन्त्रादिनानाविधधुरावहस्य बलीवर्दस्य[3] नामानि ॥ ६५ ॥

[1] K_3 adds 'धृञ् धारणे'.
[2] एका च सा धूश्च एकधुरा, तामेकधुरं W_2.
[3] तैलिकस्य अल्पयन्त्रस्य युगधुरां यो वहति तस्य बलीवर्दस्य K_5, W_2.

(पा.) धूर्वहे धुर्यधौरेय—धुरंधराः। भारक्षमवृषभनामानि ॥ उभावेक—धुरावहे। हलं विना शकटं न[1] वहति, शकटं विना हलं न वहति, इत्येतादृग्विधैकधुरावहो वृषः, तस्मिन् एकधुरीण-एकधुरशब्दौ स्याताम् ॥ ६५ ॥

[1] B_3 omits न वहति.

स तु सर्वधुरीणो यो भवेत् सर्वधुरावहः ।
माहेयी सौरभेयी गौरुस्रा माहा च शृङ्गिणी ॥ ६६ ॥
अर्जुन्यघ्न्या रोहिणी स्यादुत्तमा गोषु नैचिकी ।

(वि.) स इति—[1]सर्वधुरां वहतीति सर्वधुरीणः । सर्वधुरायाः वहः । सर्वधुरावहस्य नाम ॥ मह्यते देवैरिति महा सुरभिः । तस्या [2]अपत्यं स्त्री माहेयी । सुरभेरपत्यं[2] सौरभेयी । स्वस्थानं प्रति गच्छतीति गौः । 'गम्ॡ गतौ' । वसति क्षीरमस्यामिति उस्रा । 'वस निवासे' । मह्यते सर्वैरिति माहा[3] । 'मह पूजायाम्' । शृङ्गयोगात् शृङ्गिणी । प्रायेण धवलवर्णत्वात् अर्जुनी । अङ्घते वेगेन गच्छतीति अघ्न्या । 'अघि लघि गत्याक्षेपे' । न हन्यत इति वा[4] । रोहिणीनक्षत्रवद् [5]उदयहेतुत्वात् रोहिणी । गोजातीयस्त्रीनामानि ॥ नीचैर्भूतेन पालकध्वनिनापि[6] चरतीति नैचिकी । 'चर गतिभक्षणयोः' । बहुक्षीरादिगुणवत्या गोर्नाम ॥ ६६ ॥

[1] सर्वां धुरं W₂. [2] गोत्रापत्यं K₅, K₆. [3] मान्यते माता W₂. [4] F₂, Pt₂ add 'हन हिंसागत्योः'. [5] अभ्युदय° Pt₂; रोहितवर्णत्वात् K₃. [6] स्वरेण Pt₂.

(पा.) स तु सर्वधुरीणो—सर्वधुरावहः । हलशकटगोण्यादिसर्वधुरावहो वृषभः[1] सर्वधुरीणः स्यात् । अनुक्तम्—भग्नशृङ्गस्तु कूटः स्यात् । भग्नविषाणो [2]वृषः कूटः स्यात् । पण्डस्तु[3] भिन्नपुच्छकः । [4]छिन्नपुच्छो वृषः [3]पण्डः स्यात् । माहेयी सौरभेयी—अघ्न्या रोहिणी स्यात् । सुभूतिटीकायां अघ्न्यामाहाशब्दौ अंघा माता इति पठितौ । वृषभपत्नीनामानि । तम्बा निलिम्पिका तम्पा[5] चानड्वाह्यनडुह्यपि । एतानि पञ्च च ॥ उत्तमा गोषु नैचिकी । रूपशीलवयःक्षीराद्यशेषगुणसंपन्ना[6] गौर्नैचिकी स्यात् ॥ ६६ ॥

[1] भद्रः A₁. [2] भग्नविषाणस्य नाम B₃. [3] वण्डः A₁. [4] छिन्नपुच्छकस्य नाम B₃. [5] नम्बिनी A₁. [6] °गुणाधारा अनडुही A₁.

वर्णादिभेदात् संज्ञाः स्युः शबलीधवलादयः ॥ ६७ ॥
द्विहायनी द्विवर्षा गौरेकाब्दा त्वेकहायनी ।
चतुरब्दा चतुर्हायण्येवं त्र्यब्दा त्रिहायणी ॥ ६८ ॥

(वि.) वर्णेति—वर्णभेदात् आदिग्रहणात् द्विवर्षत्वादिधर्मभेदात् । शबली । धवला । पाटला । कृष्णा । रक्ता कपिला । द्विवर्षा । त्रिवर्षा इत्येवमादयः संज्ञा भवन्ति ।

[1]द्विहायनवयःपरिमाणमस्या इति द्विहायनी। द्विवर्षगोनाम॥ एकाब्दो वयःपरिमाणमस्या इति एकाब्दा। एकहायनो वयःपरिमाणमस्या इति एकहायनी। एकवत्सरगोनाम॥ एवं [2]चतुरब्दा। चतुर्हायणी[3]। त्र्यब्दा[4]। त्रिहायणी। पञ्चाब्दा। पञ्चहायनी इत्यादयः संज्ञा विज्ञेयाः॥ ६७–८॥

---

[1] द्वौ हायनौ वयः F_2, Pt_2. [2] चत्वारोऽब्दाः प्रमाणं यस्याः Pt_2. [3] चत्वारो हायनाः प्रमाणं यस्याः Pt_2. [4] त्रयोऽब्दाः प्रमाणं Pt_2.

(पा.) वर्णादिभेदात्—धवलादयः। वर्णादिभेदेन [1]गवां शबलीधवलादिसंज्ञाः स्युः। धवलीत्यपि। ‘चारौ श्रेष्ठे वृषे श्वेते धवलो धवली गवि’ इति प्रमाणात्[2]॥ द्विहायनी—गौः। द्विवर्षानड्वाही द्विहायनी स्यात्॥ एकाब्दा त्वेकहायनी। एकवर्षा गौरेकहायनी स्यात्। ‘हायनो वयसि स्मृतः’ इत्यनेन ‘वयसि प्रथमे’ (४. १. २०) इति ङीप्। अन्यत्र [3]टाबेव, द्विहायना चित्रगवी॥ चतुरब्दा चतुर्हायणी। चतुर्वर्षा[4] गौश्चतुर्हायणी स्यात्। एवं त्र्यब्दा त्रिहायणी। त्रिवर्षा[1] गौस्त्रिहायणी स्यात्। णत्वमपि वयस्येव स्मर्यत इत्यनेनान्यत्र णत्वं न भवति। चतुर्हायना लेख्यगवी॥ ६७–८॥

---

[1] अनडुहीनां A_1. [2] वैजयन्ती (पृ. २६०, श्लो. ४९). [3] टाबन्तावेव A_1. [4] °वत्सरा A_1.

वशा वन्ध्यावतोका तु स्रवद्गर्भाथ संधिनी।
आक्रान्ता वृषभेणाथ वेहद्गर्भोपघातिनी॥ ६९॥

वि.) वशेति—वष्टि कामयते [1]वन्ध्यात्वापगमहेतुभूतमौषधमिति वशा। ‘वश कान्तौ’। बध्नाति स्वगतदोषेण गर्भमिति वन्ध्या। ‘बन्ध बन्धने’। वृषयोगादपि गर्भविहीनगोर्नामनी॥ अवसृतम् [2]अवनष्टं तोकमपत्यं यस्याः सा अवतोका। स्रवन् नश्यन् गर्भो यस्याः सा स्रवद्गर्भा। अवसृतगर्भगोनामनी॥ संधा गर्भसंधानमस्या इति संधिनी[3]। वृषाक्रान्तगोनाम॥ विहन्ति गर्भं वेहत्। ‘हन हिंसागत्योः’। विहद्गर्भेति वा पाठः। गर्भम् उपहन्तीति गर्भोपघातिनी। गर्भहन्तृगोर्नामनी॥ ६९॥

---

[1] वत्सत्वावगम° W_2. [2] अवगतं Pt_2. [3] गर्भः संधीयतेऽस्यामिति F_2, Pt_2.

(पा.) वशा वन्ध्या। अनपत्या गौर्वशा स्यात्॥ अवतोका तु स्रवद्गर्भा। स्रवद्गर्भा गौरवतोका स्यात्॥ अथ संधिनी—वृषभेण। गोपतिनोपर्याक्रान्ता गौः संधिनी स्यात्॥ अथ वेहद्गर्भोपघातिनी। उपहतगर्भा गौर्वेहत् स्यात्। ‘कन्दुवेचिन्नदि’॥ ६९॥

काल्योपसर्या प्रजने प्रष्ठौही बालगर्भिणी ।
स्यादचण्डी तु सुकरा बहुसूतिः परेष्टुका ॥ ७० ॥

(वि.) काल्येति—वृषभेण उपसर्तुं[1] योग्या उपसर्या। 'सृ गतौ'। प्रजने प्रथमगर्भग्रहणे प्राप्तकालाया गोर्नाम। प्रष्ठं प्रथमगर्भं वहतीति प्रष्ठौही। 'वह प्रापणे'। पञ्चमं षष्ठं वा वर्षं वहतीति पष्ठौहीति वा पाठः। बालगर्भिणीगोर्नाम॥ न चण्डते न कुप्यतीति अचण्डी[2]। 'चडि [3]कोपे'। सु शोभनं करोतीति सुकरा। अकोपनागोर्नामनी। बह्वयः सूतयः प्रसवाः अस्याः सन्तीति बहुप्रसूतिः। [4]उत्पन्नापत्येभ्यः परमन्यदपत्यमिच्छतीति परेष्टुका। 'इषु इच्छायाम्'। बह्वपत्याया गोर्नामनी॥ ७०॥

[1] उपसरणीया K_5, K_6. [2] K_6, W_2 add अचण्डा वा. [3] कोपने K_5.
[4] उत्सन्न° K_5, K_6.

(पा.) काल्योपसर्या प्रजने। प्रजनं नाम [1]गर्भग्रहणम्। तत्र काल्येति प्राप्तकाला गौरुपसर्या स्यात्। '[2]कट्टुपड्डु'॥ प्रष्ठौही बालगर्भिणी। प्रथमगर्भा गौः प्रष्ठौही स्यात्। 'तोलिचूलिपड्डु'। 'पलिक्नी बालगर्भिणी' इति हलायुध (अ. मा. २. ११८) वैजयन्ती (पृ. ६८, श्लो. ४६) इत्युभयपाठात् पलिक्नी च स्यात्। अनुक्तम्—प्रस्तुता तु प्रसोष्यन्ती। प्राप्तप्रसवसमया गौः प्रस्तुता स्यात्॥ सूता दोग्ध्री पयस्विनी। जनिततोका गौः पयस्विनी दोग्ध्री च स्यात्। स्यादचण्डी तु सुकरा। साधुः गौः सुकरा स्यात्। अनुक्तम्—सुकता तद्विपर्यये। असाधुर्गौः सुकता स्यात्॥ बहुसूतिः परेष्टुका। बहुलसूतिमती गौः परेष्टुका स्यात्॥ ७०॥

[1] वृषभसङ्गः A_1. [2] B_3 omits.

चिरसूता बष्कयणी धेनुः स्यान्नवसूतिका ।
सुव्रता सुखसंदोह्या पीनोध्नी पीवरस्तनी ॥ ७१ ॥

(वि.) चिरसूतेति—चिरं सूता चिरसूता। 'षूङ् प्राणिप्रसवे'। [1]बष्कते यातीति बष्कयः। प्रसवादूर्ध्वभाविचिरकालः। 'बष्क गतौ'। सोऽस्या अस्तीति बष्कयणी। चिरप्रसूतगोर्नाम॥ वत्सो धयत्येनां धेनुः। 'धेट् पाने'। नवं सूता नवसूतिका। नवसूतिकायाः सवत्सायाः गोर्नामनी॥ सुशीलत्वादिगुणयोगात्[2] सुव्रता।

सुखेन संदुह्यते सुखसंदोह्या। सुशीलायाः गोर्नामनी ॥ पीनमूधो यस्याः पीनोध्नी। पीवरः स्तनोऽस्याः पीवरस्तनी। स्थूलस्तनाया गोर्नामनी ॥ ७१ ॥

[1] बष्कयति W_2; बष्कयस्त्वेकहायनो वत्स इति शाकटायनः। तद्योगात् Pt_2.

[2] शोभनं व्रतं शीलं Pt_2.

(पा.) चिरसूता बष्कयणी। बहुकालप्रसूता गौः बष्कयणी स्यात्। बष्कयेण नीता अनुगता बष्कयणीति शाकटायनव्युत्पत्त्या। बष्कयो नामैकवत्सरवत्सः। 'तलिपिदूड'॥ धेनुः स्यान्नवसूतिका। बालवत्सा गौर्धेनुः स्यात्॥ सुव्रता सुखसंदोह्या। अनायासेन[1] दोग्धुं योग्या गौः सुव्रता स्यात्॥ अनुक्तम्—'करटा तद्विपर्यये'। प्रयासेन संदोह्या गौः करटा स्यात्॥ पीनोध्नी पीवरस्तनी। पीवरस्तनी गौः पीनोध्नी स्यात्। 'बलमैनटोदुगुगलदि'। स्तनशब्द ऊधःपर्यायः॥ ७१ ॥

[1] सुखसंदोह्यायाः गोर्नामनी B_3.

द्रोणक्षीरा द्रोणदुघा धेनुष्या बन्धके स्थिता।
समांसमीना सा यैव प्रतिवर्षं प्रसूयते ॥ ७२ ॥

(वि.) द्रोणेति—द्रोणपरिमितं क्षीरं दोग्धीति द्रोणदुघा। 'दुह प्रपूरणे'। द्रोणपरिमितं क्षीरं यस्याः द्रोणक्षीरा। द्रोणपरिमितक्षीरदोग्ध्रीनामनी॥ धेनुरेव धेनुष्या। [1]भोगाधिकत्वेन धनिकगृहस्थापितधेनोर्नाम॥ समायां समायां[2] वत्सरे वत्सरे प्रसूते समांसमीना। प्रतिवर्षं प्रसूताया गोर्नाम॥ ७२ ॥

[1] भाग्य° W_2.

[2] विजायत इति F_2, Pt_2.

(पा.) द्रोणक्षीरा द्रोणदुघा। द्रोणपरिमितक्षीरदोग्ध्री[1] धेनुर्द्रोणदुघा स्यात्। 'अडिगिनपुड्डुपिंडे पांडि आवु'॥ धेनुष्या बन्धके स्थिता। बन्धके संस्थिता गौर्धेनुष्या स्यात्। 'कुदववुन्न आवु'॥ समांसमीना सा—प्रसूयते। या गौः प्रतिसंवत्सरं वत्सान् प्रसूते सा गौः समांसमीना स्यात्॥ अनुक्तम्—'सकृत्प्रसूतिर्गृष्टिः स्यात्'। एकवारं प्रसूता गौर्गृष्टिः स्यात्। 'निडिचूलि आवु'॥ ७२ ॥

[1] दुग्धदोग्धा(ह्या) B_3.

ऊधस्तु क्लीबमापीनं समौ शिवककीलकौ।
न पुंसि दाम संदानं पशुरज्जुस्तु दामनी ॥ ७३ ॥

(वि). ऊध इति—उनत्ति क्षीरबिन्दुभिः स्थालीमिति ऊधः। 'उन्दी क्लेदने'। सान्तः। दोहनादुपरि पुनराप्यायते[1] वर्धत इति आपीनम्। 'ओप्यायी वृद्धौ'। स्तन्यमूलबन्धनस्य नामनी॥ दौष्ट्यशमनेन शिवकरत्वात् शिवकः। कील्यते पश्वादिरत्रेति[2] कीलकः। 'कील बन्धने'। पशुबन्धनाय निखातदार्वादेर्नामनी॥ द्यति पशुदौष्ट्यमिति दाम। 'दोऽवखण्डने'। दीयते पलायनाद् रक्ष्यतेऽनेनेति वा। 'देङ् रक्षणे'। संदीयते बध्यतेऽनेनेति संदानम्। 'दाण्[3] दाने'। संपूर्वत्वात् बन्धनार्थः। वत्सादिबन्धनरज्जुनामनी॥ मध्ये तत्र तत्र बहुदामयोगात् दामनी। बहुपशुबन्धनाय निर्मितदीर्घैकरज्जुनाम॥ ७३॥

---

[1] K_5, K_6 add आपूर्यते.　　[2] आदिकं F_2, Pt_2.　　[3] 'दोऽवखण्डने' K_6.

(पा.) ऊधस्तु क्लीबमापीनम्। क्षीरजननस्थाननामनी। 'पोदुगु'॥ समौ शिवककीलकौ। [1]पशुबन्धनगुण्ठनामनी। 'गूंटालु'॥ न पुंसि दाम संदानम्। [2]दोहनसमये चरणबन्धनरज्जुनामनी॥ पशुरज्जुस्तु दामनी। पशुबन्धनदीर्घरज्जुः दामनी स्यात्। अनुक्तम्—नासारज्जुर्गवां नास्या। गोराजनासिकारज्जुर्नास्या स्यात्। 'यद्दुमुक्कुत्ताडु'॥ ७३॥

---

[1] °कीलक° B_3.　　[2] रज्जुसामान्यनामनी A_1.

वैशाखमन्थमन्थानमन्थानो मन्थदण्डके।
कुटरो दण्डविष्कम्भे मन्थनी गर्गरी समे॥ ७४॥

(वि.) वैशाखेति—विशाखा प्रयोजनमस्य वैशाखः[1]। विशाखस्य काष्ठविशेषस्यायमिति वा। मथ्यते दध्यनेनेति मन्थः। 'मन्थ विलोडने'। मन्थानश्च। मन्थाश्च। दधिमन्थनदण्डनामानि॥ कुटति कुटिलगतिमानिव भ्रमति [2]कुटरः। 'कुट कौटिल्ये'। दण्डं विष्कभ्नाति दण्डविष्कम्भः। 'स्कम्भु[3] रोधने'। मन्थनदण्डस्यान्ते निक्षिप्तनारिकेलफलसदृशदारुपिण्डनामानि॥ मथ्यते दध्यस्यामिति मन्थनी। 'मन्थ विलोडने'। गिरति अन्तर्गतं दधीति गर्गरी। 'गॄ निगरणे'। दधिमन्थनघटस्य नाम॥ ७४॥

---

[1] विशाखायां भवः Pt_2.　　[2] भ्रमत्यनेन मन्थनदण्डः F_2, Pt_2; कुठर इति वा पाठः K_5, W_2.　　[3] अयं धातुः सौत्रः W_2.

(पा.) वैशाखमन्थ—मन्थदण्डके। दधिमन्थनदण्डनामानि। 'कव्वमु'॥ [1]कुठरो दण्डविष्कम्भः। दण्डो मन्थदण्डः। तस्य विष्कम्भो विष्कम्भनस्तम्भः। स

[1]कुठरः स्यात्। मन्थदण्डबन्धस्तम्भः॥ मन्थनी गर्गरी समे। दधिमथन(?)नामनी। 'कलशिमुदधिगुर्वीं वल्लवा लोडयन्ति' इति माघप्रयोगात् (शिशु. ११. ८) [2]कलशिशब्दः कालकेय(?)व्युत्पत्तिसिद्धः॥ ७४॥

[1] कुटरः B_3. [2] कलशी A_1.

उष्ट्रे क्रमेलकमयमहाङ्गाः करभः शिशुः।
करभाः स्युः शृङ्खलका दारवैः पादबन्धनैः॥ ७५॥

(वि.) उष्ट्र इति—उष्यते सदा [1]आतपेनेति उष्ट्रः। 'उष दाहे'। [2]क्रमेण पादानिलयति दूरे क्षिपतीति क्रमेलकः। 'इल स्वप्नक्षेपणयोः'। मयते बहूनि योजनानि गच्छतीति [3]मयः। 'मय गतौ'। महान्ति ग्रीवाद्यङ्गानि यस्येति महाङ्गः। उष्ट्रनामानि॥ कं शिरो रभतेऽसकृदुन्नमयतीति करभः[4]। 'रभ राभस्ये'। उष्ट्रशिशुनाम॥ शृङ्खलं बन्धनमेषामस्तीति शृङ्खलकाः। दारुमयैः [5]पादबन्धनैरुपलक्षितानां करभाणां नाम॥ ७५॥

[1] आतपे दह्यते W_2. [2] क्रमान् K_5, K_6; क्रमैः एलतीति Pt_2. [3] मयुः K_6.
[4] किरति विक्षिपति धूलिमिति Pt_2. [5] °वन्धनयुक्तकरभनाम W_2.

(पा.) उष्ट्रे क्रमेलकमयमहाङ्गाः। उष्ट्रनामानि। 'लोटिपेट्ट'। 'दाशेरकश्च रवणः'। एते द्वे च॥ करभः शिशौ। उष्ट्रशिशुः करभः स्यात्॥ करभाः स्युः—पादबन्धनैः। दारुमयपादबन्धनविशिष्टाः करभा [1]इत्यर्थः॥ ७५॥

[1] B_3 adds शृङ्खलकाः..

अजा छागी स्तभच्छागबस्तच्छगलका अजे।
मेढ्रोरभ्रोरणोर्णायुमेंषवृष्णय एडके॥ ७६॥

(वि.) अजेति—अजतीत्यजा[1]। 'अज गतिक्षेपणयोः'। छ्यति रोगानिति छागी[2]। 'छो छेदने'। अजजातिस्त्रीनामनी॥ स्तभ्नाति युद्धार्थमुद्यते वेगं प्रतिबध्नातीति स्तभः। 'स्तम्भु रोधनस्तम्भनयोः'। तुभ इति पाठे तोभते हिनस्ति पर्णानीति तुभः। 'तुभ हिंसायाम्'। छ्यति भक्षणार्थं पत्राणीति छागः। [3]छगलकश्च। 'छो छेदने'। बस्यते हिंस्यत इति बस्तः। 'वस्त अर्दने'। अजति पर्णभक्षणाय

गच्छतीति अजः । 'अज गतिक्षेपणयोः' । अजनामानि ॥ मेहति रेतः सिञ्चतीति मेढ्रः । 'मिह सेचने' । मेण्ढ इति वा पाठः । उरःस्थलमितस्ततो भ्रमयतीति[4] उरभ्रः । 'भ्रमु चलने' । उच्चैः रणतीति उरणः । 'रण शब्दे' । ऊर्णा मेषरोम । [5]तदस्यास्तीति ऊर्णायुः । रेतो मिषति सिञ्चतीति मेषः । 'मिष सेचने' । मिषति स्पर्धत इति वा । रेतो वर्षतीति वृष्णिः । 'वृषु सेचने' । आ समन्तात् ईडन्ते मांसभक्षका एनमिति एडकः[6] । 'ईड स्तुतौ' । एडकनामानि ॥ ७६ ॥

[1] अजजातिस्त्री K_5, K_6. [2] छागजातिस्त्री K_5, K_6. [3] छागलकः K_5, W_2. [4] भ्रामयति K_5. [5] सा W_2. [6] इलति गच्छति Pt_2.

(पा.) अजा छागी । अजानामनी । 'मेक' ॥ स्तभच्छाग—[1]अजे । छागनामानि । 'मेकपोतु' । मेढ्रोरभ्रोरणो—एडके । मेषनामानि । 'तगरु' ॥ अनुक्तम्—'एडका कुररी मेषी' । मेषीनामानि । 'गोद्रे' ॥ एतानि त्रीणि च ॥ ७६ ॥

[1] अजाः A_1.

उष्ट्रोरभ्राजवृन्दे स्यादौष्ट्रकौरभ्रकाजकम् ।
चक्रीवन्तस्तु बालेया रासभा गर्दभाः खराः ॥ ७७ ॥

(वि.) उष्ट्रेति—उष्ट्राणां समूहः औष्ट्रकम् । उरभ्रकाणां समूहः औरभ्रकम् । अजानां समूहः आजकम् । उष्ट्रोरभ्राजानां क्रमेण समूहनामानि । चक्रं समूहः तद्वन्तः चक्रीवन्तः । प्रायेण बालेभ्यो वत्सेभ्य एव हिताः बालेयाः । रासन्ते वाश्यन्ते उच्चैरिति रासभाः । 'रासृ शब्दे' । गर्दन्ति उच्चैरिति गर्दभाः । 'गर्द शब्दे' । खं मुखान्तर्वर्ति महदाकाशमेषामिति[1] खराः । गर्दभनामानि ॥ ७७ ॥

[1] K_5, W_2, Pt_2 add अस्तीति.

(पा.) उष्ट्रोरभ्राजवृन्दे—आजकम् । उष्ट्राणां समूहः औष्ट्रकम् । उरभ्राणां समूहः औरभ्रकम् । अजानां समूहः आजकम् । उष्ट्रादीनां समूहे औष्ट्रकादिशब्दाः स्युरिति वा योजना । चक्रीवन्तस्तु—गर्दभाः खराः । गर्दभनामानि । 'गाडिडिपेरु' । [1]कोलिण्टाः करभाः शालाः[2] । एतानि त्रीणि च ॥ ७७ ॥

[1] कोलेण्ठः A_1. [2] बालाः B_3.

वैदेहकः सार्थवाहो नैगमो वाणिजो वणिक् ।
पण्याजीवो ह्यापणिकः क्रयविक्रयिकश्च सः ॥ ७८ ॥

(वि.) वैदेहक इति—विदेहे विविधोपचये भवः वर्तमानः वैदेहकः[1]। अर्थेन सह वर्तते सार्थः। तं नरं स्वपण्यं वाहयतीति [2]सार्थवाहः। 'वह प्रापणे'। निगमे धनागमे भवो वर्तमानः नैगमः। वणिगेव वाणिजः। पणते व्यवहरतीति वणिक्। 'पण [3]व्यवहारे'। धात्वादेः पकारस्य वकारादेशः। पण्यम् आजीवो यस्य [4]पण्याजीवः। आपणः प्रयोजनमस्य आपणिकः। क्रयविक्रयाभ्यां जीवतीति क्रयविक्रयिकः। वाणिज्यवृत्त्युपजीविनो नामानि ॥ ७८ ॥

---

[1] K_3, K_5 add 'दिह उपचये'. [2] सार्थं वहति W_2; प्रापयति K_3, K_5. [3] W_2 adds स्तुतौ च. [4] पण्येन आजीवति F_2, Pt_2.

(पा.) वैदेहकः सार्थवाहो—वणिक्। जान्तः। वणिजां नामानि। 'वरवारु'॥ पण्याजीवो—क्रयविक्रयिकश्च[1] सः। क्रयविक्रयोभयवतो नामानि ॥ ७८ ॥

---

[1] क्रयविक्रयकः A_1.

विक्रेता स्याद्विक्रयिकः क्रायकः क्रयिकः समौ ।
वाणिज्यं तु वणिज्या स्यान्मूल्यं वस्नोऽप्यवक्रयः ॥ ७९ ॥

(वि.) विक्रेतेति—विक्रीणाति पण्यमिति विक्रेता। 'डुक्रीञ् द्रव्यविनिमये'। विक्रयेण जीवतीति विक्रयिकः। यः पण्यस्य विक्रयेण जीवति तस्य नामनी ॥ उच्चनीचमूल्यकल्पनया पण्यं क्रीणाति गृह्णातीति क्रायकः[1]। क्रयेण जीवतीति क्रयिकः। पण्यकर्तृनामनी ॥ वणिजः कर्म वाणिज्यम्। वणिज्या च। वाणिज्यवृत्तिनामनी ॥ मूलेनानाम्यम्[2] अनभिभवनीयं मूल्यम्। वसत्यस्मिन् स्वधनव्ययेन कारितं पण्यादिकमिति वस्नः[3]। 'वस निवासे'। वसत्यनिर्वाहकक्रयः अनेन मूलद्रव्यरहितेनेति अवक्रयः[4]। मूल्यनामानि ॥ ७९ ॥

---

[1] क्रयकश्च Pt_2. [2] मूलभूतद्रव्येण अभिभूयते शेषत्वेन क्रियते K_5, K_6. [3] वसत्यनेन पण्यादिकं Pt_2. [4] अवक्रियतेऽनेन F_2, Pt_2.

(पा.) विक्रेता स्याद्विक्रयिकः। विक्रयमात्रिणो नामनी। [1]क्रायकः क्रयिकः समौ। मूल्येन पण्यानि गृह्णतो नामनी। 'कोनेडिवांड्लु'॥ वाणिज्यं तु [2]वणिज्यं

स्यात्। नपुंसके स्यादपि वणिज्यापि स्यात्। वणिक्कर्मनामनी ॥ मूल्यं वस्नोऽप्यवक्रयः। मूल्यनामानि। 'वेल'। योगविभागादवक्रयो भाटकः। 'भाटकोऽवक्रयः स्मृतः'। इति हलायुधः (अ॰ मा॰ २॰ ४१८)। 'बाडिगे'॥ ७९॥

[1] क्राथिकः A_1.　[2] वणिज्या B_3.

नीवी परिपणो मूलधनं लाभोऽधिकं फलम्।
परिदानं परीवर्तो नैमेयनिमयावपि ॥ ८० ॥

(वि.) नीवीति—नितरां वीयते संव्रियत इति नीवी। 'व्येञ् संवरणे'। स्त्रीनीवीस्थानवत् [1]परसंपत्प्राप्तिनिमित्तत्वात् वा। परिपण्यते लाभार्थं प्रयुज्यते परिपणः[2]। 'पण व्यवहारे स्तुतौ च'। लाभार्थं प्रयुज्यमानधनस्य नामानि ॥ मूलधनप्रयोगेण लभ्यत इति लाभः। 'डुलभष् प्राप्तौ'। मूलधनप्रयोगेण फलतीति फलम्। 'फल निष्पत्तौ'। [3]मूलधनप्रयोगेण यदधिकं[4] लभ्यते तस्य नामनी ॥ परिदीयत इति परिदानम्[5]। 'दा दाने'। परिवर्त्यते दीयत इति परिवर्तः[6]। 'वृतु वर्तने'। निमेये परिवर्तनीये भवो नैमेयः। 'मेङ् प्रणिदाने'। निमयते [7]विनियुज्यते निमयः। 'मय गतौ'। विनिमयनामानि ॥ ८० ॥

[1] रसवत्प्राप्ति° K_3.　[2] परिपणम् K_5, K_6.　[3] मूलं च तद्धनं च Pt_2.
[4] F_2, Pt_2 add अध्यारूढं.　[5] परिवृत्य दानं, 'डुदाञ् दाने' F_2, Pt_2.　[6] परिवर्तनं Pt_2.　[7] K_5 adds विनिमयते.

(पा.) नीवी परिपणो[1] मूलधनम्। मूलधननामानि ॥ लाभोऽधिकं धनम्[2]। मूलधनेनार्जितमधिकं धनं लाभः स्यात्। 'बंडवलमुकन्न आमीदगणिंचिन धनमु लाभमनिपिंचुकोनुनु'॥ परिदानं परीवर्तो—नियमावपि। घृतादेस्तैलादिप्रत्यर्पणनामनी। 'साटिपेरु'॥ ८०॥

[1] परिवणं A_1.　[2] फलम् B_3

पुमानुपनिधिर्न्यासः प्रतिदानं तदर्पणम्।
क्रये प्रसारितं क्रय्यं क्रेयं क्रेतव्यमात्रके ॥ ८१ ॥

(वि.) पुमानिति—आधारकहस्तस्य उप समीपे निधीयत[1] इति उपनिधिः। 'डुधाञ् धारणपोषणयोः'। ग्राहकजनसंनिधौ [2]न्यस्यत इति न्यासः। 'असु क्षेपणे'।

निक्षेपविशेषस्य नामनी ॥ प्रतिदीयत इति प्रतिदानम् । 'डुदाञ् दाने'। न्यासप्रत्यर्पणस्य नाम ॥ क्रयार्थं प्रसारितं क्रय्यम् । क्रेतुं योग्यं क्रेयम् । क्रेतव्यमात्रनाम ॥ ८१ ॥

[1] निधानं F_2, Pt_2. [2] न्यसनं Pt_2.

(पा.) पुमानुपनिधिर्न्यासः । [1]निक्षेपविशेषनामनी । 'वाडिके' ॥ प्रतिदानं तदर्पणम् । तस्योपनिधेः प्रत्यर्पणं प्रतिदानं स्यात् । '[2]वाडिकतिरुगतिरुगवोप्पिंचुट' ॥ क्रये प्रसारितं क्रय्यम् । क्रयार्थे प्रसारितं द्रव्यं क्रय्यं स्यात् ॥ क्रेयं क्रेतव्यमात्रके । [3]क्रयार्हं द्रव्यं क्रेयं स्यात् । परिक्रेतुं पृष्टं द्रव्यमित्यर्थः ॥ ८१ ॥

[1] द्रव्यत्यागनामनी A_1. [2] B_3 omits. [3] क्रय्यादन्यद् द्रव्यं A_1.

विक्रेयं पणितव्यं च पण्यं क्रय्यादयस्त्रिषु ।
क्लीबे सत्यापनं सत्यंकारः सत्याकृतिः स्त्रियाम् ॥ ८२ ॥

(वि.) विक्रेयमिति—[1]विक्रेतुं योग्यं विक्रेयम् । पणितुं व्यवहर्तुं योग्यं पणितव्यम् । पण्यत इति पण्यम् । 'पण व्यवहारे स्तुतौ च'। [2]पण्यमात्रनामानि ॥ क्रय्यादयः पण्यान्ताः त्रिषु लिङ्गेषु वर्तन्ते ॥ सत्यस्य करणं सत्यापनम् । सत्यंकारश्च । सत्याकृतिश्च । विक्रेत्रे क्रेत्रा इदं पण्यं मया गृहीतमित्युक्त्वा यत्किंचिदङ्गुलीयादिकं दीयते तस्य नामानि ॥ ८२ ॥

[1] विक्रेयस्य K_5, K_6. [2] विक्रयक्रियाकर्मणः W_2.

(पा.) विक्रेयं पणितव्यं च । [1]विक्रेतुमापृष्टद्रव्यनामनी । क्रय्यादयस्त्रिषु । क्रय्यादयः शब्दास्त्रिलिङ्गाः । क्रय्यः कर्पूरः । क्रय्या कस्तूरिका ॥ क्लीबे सत्यापनं—स्त्रियाम् । [2]क्रयनिश्चयार्थं दत्तवित्तस्य नामानि ॥ 'संचकरुवु' ॥ ८२ ॥

[1] विक्रेतुमिष्ट° B_3. [2] सत्यार्थं A_1.

विपणो विक्रयः संख्याः संख्येये ह्यादश त्रिषु ।
विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः ॥ ८३ ॥

(वि.) विपण इति—विपण्यते व्यवह्रियते विपणः । 'पण [1]व्यवहारे' । विक्रीयत इति विक्रयः । 'डुक्रीञ् द्रव्यविनिमये' । मूल्यं गृहीत्वा पण्यार्पणस्य नामनी ॥

एकाद्याः [2]अष्टादशशब्दपर्यन्ताः संख्याः संख्येये घटादौ संख्येयलिङ्गानुसारेण त्रिषु लिङ्गेषु वर्तन्ते। कदाचिदपि संख्यामात्रे न वर्तन्ते। अत्रोदहरणानि—एकः पुमान्। द्वौ पुमांसौ। त्रयो गुणाः। इत्यादि॥ अत्र विंशतिशब्देन एकोनविंशतिशब्दो विज्ञेयः। एकोनविंशत्याद्याः नवतिशब्दपर्यन्ताः सर्वाः संख्याः बहुषु संख्येयेषु घटादिषु संख्यायां च वर्तमाना अपि सदा एकत्वे एकवचने वर्तन्ते॥ ८३॥

[1] W$_2$ adds स्तुतौ च.　　　[2] आदश दशश्रुतिपर्यन्तम्। अष्टादशभ्य इति यावत्। एकादिसंख्याशब्दाः संख्येये वस्तुनि वर्तमानाः त्रिषु। एतेषां संख्यासंख्येययोः सामानाधिकरण्यं भवति Pt$_2$.

(पा.) विपणो विक्रयः। [1]पणमादाय द्रव्यदाननामनी। 'अम्मकमु[2]'। निरुपसर्गौ चेत् [3]क्रयवाचकौ। संख्याः सख्येयेष्वादश त्रिषु। अष्टादशशब्दावधिकाः संख्याशब्दाः संख्येयमात्रवृत्तयः। एको ब्राह्मण इति सामानाधिकरण्यं सुवचनम्। तथा ब्राह्मणानां दश द्वादश वेति वैयधिकरण्यं न सुवचनम्। एकं, द्वे, त्रीणि, चत्वारि, पञ्च, षट्, सप्त, अष्ट, नव, दश, एकादश, द्वादश, त्रयोदश, चतुर्दश, पञ्चदश, षोडश, सप्तदश, अष्टादश। त्रिष्वित्यनेन त्रिलिङ्गाः॥ विंशत्याद्याः—संख्येयसंख्ययोः। विंशत्यादिसंख्याशब्दाः सर्वे संख्येयसंख्यारूपयोरुभयोरप्यर्थयोः स्युः। विंशतिर्गावः। विंशतिर्गवाम्। सामानाधिकरण्यवैयधिकरण्ये उभये अपि सुवचने। विंशतिः, त्रिंशत्, चत्वारिंशत्, पञ्चाशत्, षष्टिः, सप्ततिः, अशीतिः, नवतिः, शतम्, सहस्रम्, अयुतम्, नियुतम्, कोटिः। सदैकत्वे इत्यनेन नित्यैकवचनता॥ ८३॥

[1] मूल्यं B$_3$.　　　[2] 'अम्मुट कोनुटि' B$_3$.　　　[3] मूल्यदानवाचकौ B$_3$.

संख्यार्थे द्विबहुत्वे स्तस्तासु चानवतेः स्त्रियः।
पङ्क्तेः शतसहस्रादि क्रमाद्दशगुणोत्तरम्॥ ८४॥

(वि.) संख्यार्थे इति—संख्यार्थे संख्यामात्रे वर्तमानानाम् एकोनविंशत्यादीनां द्विवचनबहुवचनेऽपि स्तः। तात्पर्यार्थस्तु एकोनविंशत्याद्याः शब्दाः संख्यायामेकवचनद्विवचनबहुवचनान्ता भवन्ति। संख्येये वर्तमानास्तु एकवचनान्ता एव भवन्तीत्यर्थः॥ तासु संख्येयसंख्यासु वर्तमाना एकोनविंशत्याद्याः सर्वे शब्दा आनवतेः नवतिशब्दपर्यन्तं स्त्रियः स्त्रीलिङ्गा भवन्ति। संख्येयानुसारेण तल्लिङ्गा न भवन्ति[1]। अत्रोदहरणानि—विंशत्या शरैर्विद्धः। विंशत्यै स्त्रीभ्यो देयानि फलानि। विंशतिः फलानि॥ संख्यायामुदाहरणानि—गवां द्वे विंशती। गवां तिस्रो विंशतयः॥ पङ्क्तिः[2] दश संख्या, तस्या आरभ्य दशगुणोत्तरं क्रमात् शतं सहस्रम्। दश दशगुणं शतम्। शतं दशगुणं सहस्रम्।

आदिग्रहणात् अयुतं प्रयुतमित्यादि। सहस्रं दशगुणम् अयुतम् इत्यादि। एवमादि परार्धशब्दपर्यन्ता भवन्ति ॥ ८४ ॥

[1] K_3, K_6 add किंतु नियतस्त्रीलीङ्गा एव भवन्ति; भिन्नलिङ्गेन समानाधिकरणा अपि स्त्रीलिङ्गाः F_2, Pt_2. [2] पङ्क्तिशब्देन दशसंख्योच्यते Pt_2.

(पा.) संख्यार्थे द्विबहुत्वे स्तः। [1]संख्यार्थे [2]विंशत्यादीनां द्वित्वबहुत्वेऽपि स्याताम्। अमत्राणां द्वे विंशती। अतिथीनां तिस्रो विंशतयः॥ तासु चानवतेः स्त्रियाम्। तासु नवतिशब्दान्ताः सर्वे शब्दाः स्त्रीलिङ्गाः। [3]विंशत्या पुरुषैर्भुक्तम्। 'कोट्याः शतादिसंख्यान्या वा लक्षा नियुतं च तत्' (३. ५. २४) इति वक्ष्यमाणत्वात् शतादीनि नपुंसकान्येव। 'परैः परिभवे प्राप्ते वयं पञ्चोत्तरं शतम्' (म. भा. ३. २३२. १२)॥ पङ्क्तेः शतसहस्रादि—दशगुणोत्तरम्। पङ्क्तिशब्दो दशपर्यायः। 'नृपतेः प्रतिषिद्धमेव तत् कृतवान् पङ्क्तिरथो विलङ्घ्य यत्'। (रघु. ९. ७४) इति दशरथे पङ्क्तिरथशब्दप्रयोगः। दशशब्दान्यत्वादस्य विंशतिशब्दवत् लिङ्गवचनव्यवस्था। पङ्क्तिशब्दादारभ्य शतसहस्रादीनि पदानि क्रमेण [4]दशगुणोत्तरसंख्यावाचकानि। पङ्क्तिर्दशगुणा चेच्छतम्। शतं दशगुणं चेत् सहस्रम्। सहस्रं दशगुणं[5] चेदयुतमित्यादि ॥ ८४ ॥

[1] संख्यानार्थे A_1. [2] एतेषां A_1. [3] नवसप्तत्या A_1. [4] दशगुणोत्तराणि A_1.
[5] दशगुणितं A_1.

पौतवं द्रुवयं पाय्यमिति मानार्थकं त्रयम्।
मानं तुलाङ्गुलिप्रस्थैर्गुञ्जाः पञ्चाद्यमाषकः ॥ ८५ ॥

(वि.) पौतवमिति—पुनाति धान्यादिमानं शोधयतीति पोतुः राजपुरुषः[1]। तस्येदं पौतवम्। यौतवमिति वा पाठः। द्रोः [2]द्रुमस्य विकारः द्रुवयम्। मकारस्य वकारादेशो भवति। मीयतेऽनेनेति पाय्यम्। 'माङ् माने'। धात्वादेर्मकारस्य पकारादेशः। धान्यादिमानार्थनामानि॥ मीयतेऽनेनेति मानम्। तच्च तुलाङ्गुलिप्रस्थैः त्रिप्रकारं भवति। यथा [3]हिरण्यादिमानं तुलादिरूपम्। क्षेत्रादिमानम् अङ्गुल्यादिकम्। धान्यादिमानं प्रस्थादिरूपम् इति। माषवत् स्थूलत्वात् माषकः[4]। आद्यश्चासौ माषकश्च आद्यमाषकः। रजतव्यतिरिक्तपञ्चगुञ्जापरिमितहिरण्यादेर्नाम ॥ ८५ ॥

[1] F_2, Pt_2 add 'पूञ् पवने'. [2] वृक्षस्य W_2, Pt_2. [3] हिङ्ग्वादि K_5, K_6.
[4] माषाकृतित्वात् Pt_2.

(पा.) पौतवं द्रुवयं—त्रयम्। पौतवादीनि त्रीण्यपि [1]मानसामान्यनामानि। पाय्यं हस्तादिभिर्मानं, द्रुवयं [2]कुडुबादिभिः। पौतवं तु लयेत्यन्या राद्धान्ता तुलाङ्गुलिप्रस्थैरिति व्यत्यस्तपाठेन प्रत्याख्यातः ॥ मानं तुलाङ्गुलिप्रस्थैः। मीयतेऽनेनेति मानम्। यत् पण्यद्रव्यादीयत्तापरिच्छेदकं[3] तन्मानम्। [4]तच्च तुलाङ्गुलिप्रस्थैस्त्रिविधं स्यात्। तत्र पलकर्षादीनि तुलामानानि। हस्तवितस्त्यादीनि अङ्गुलिमानानि। द्रोणाढकादीनि प्रस्थमानानि ॥ गुञ्जाः पञ्चाद्यमाषकः। गुञ्जाः पञ्च स्युश्चेद् आद्यमाषकः स्यात् ॥ ८५ ॥

[1] सामान्यार्थकानि A_1. [2] कुडपादिभिः B_3. [3] परिच्छेदरूपं A_1. [4] तन्मानं A_1.

ते षोडशाक्षः कर्षोऽस्त्री पलं कर्षचतुष्टयम्।
सुवर्णबिस्तौ हेम्नोऽक्षे कुरुबिस्तस्तु तत्पले ॥ ८६ ॥

(वि.) त इति—अक्ष्णोति [1]संघातरूपतामापद्यत इति अक्षः। 'अक्षू व्याप्तौ'। कर्षति स्वभारेण तुलाकोटिमिति कर्षः। 'कृष विलेखने'। षोडशाद्यमाषकपरिमितसुवर्णादिनामनी ॥ पलति तुलाकोटिं गच्छतीति पलम्। 'पल गतौ'। कर्षाणां चतुष्टयस्य नाम ॥ शोभनो वर्णो यस्य [2]सुवर्णः। बिस्यति तुलाकोटिं नीचैः प्रेरयतीति बिस्तः। 'बिस [3]क्षेपे'। अक्षपरिमितहेम्नो नामनी ॥ कुरुदेशे बिस्त इति प्रसिद्धत्वात् कुरुबिस्तः। पलपरिमितहेम्नो नाम ॥ ८६ ॥

[1] व्याप्नोतीति Pt_2. [2] सुवर्णमत्रास्तीति Pt_2. [3] प्रेरणे W_2.

(पा.) ते षोडशाक्षः—अस्त्री। आद्यमाषाः षोडश स्युश्चेद् अक्षः स्यात्। स एव [1]कर्षः ॥ पलं कर्षचतुष्टयम्। कर्षाश्चत्वारः स्युश्चेत् पलं स्यात् ॥ सुवर्णबिस्तौ हेम्नोऽक्षे। काञ्चनस्य कर्षे सुवर्णबिस्तशब्दौ स्याताम् ॥ कुरुबिस्तस्तु तत्पले। तस्यैव हेम्नः[2] पले कुरुबिस्तशब्दश्च स्यात्। अनुक्तम्—राजते पल इन्दुः स्यात्। रजतस्य पले इन्दुशब्दः स्यात ॥ ८६ ॥

[1] कर्षश्च B_3. [2] पलपरिमितहेम्नः B_3.

तुला स्त्रियां पलशतं भारः स्याद् विंशतिस्तुलाः।
आचितो दश भाराः स्युः शाकटो भार आचितः ॥ ८७ ॥

(वि.) तुलेति—तोल्यत[1] इति तुला। 'तुल उन्माने'। [2]पलानां शतस्य नाम॥ भ्रियत इति भारः। 'भृञ् भरणे'। द्विसहस्रपलपरिमितताम्रादिद्रव्यनाम॥ आचीयते राशीक्रियते आचितः। 'चिञ् चयने'। विंशतिसहस्रपलपरिमितताम्रादिद्रव्यराशिनाम॥ शकटेन उह्यते शाकटः। शकटेन वोढुं शक्यस्य भारस्य नाम॥ ८७॥

---

[1] तुल्यते K_6, Pt_2. [2] पलशतपरिमितसुवर्णादिनाम K_3, K_6.

(पा.) तुला स्त्रियां पलशतम्। पलानां शतं तुला स्यात्॥ भारः स्याद् विंशतिस्तुलाः। तुला विंशतिश्चेत् भारः स्यात्। आचितं दश भाराः स्युः। भारा दश चेदाचितं स्यात्। नपुंसकम्॥ शाकटो भार आचितः। शकटभार आचितः स्यात्। पुंलिङ्गः। लिङ्गविवेकद्वारा आनुषङ्गिकार्थाभिधानम्॥ ८७॥

कार्षापणः कार्षिकः स्यात् कार्षिके ताम्रिके पणः।
अस्त्रियामाढकद्रोणौ खारी वाहो निकुञ्चकः॥ ८८॥
कुडवः प्रस्थ इत्याद्याः परिमाणार्थकाः पृथक्।

(वि.) कार्षापण इति—कर्षरूपेण [1]ताम्रेण पण्यत इति कार्षापणः। कर्षप्रमाणमस्येति कार्षिकः। पण्यते व्यवह्रियतेऽनेनेति पणः। 'पण व्यवहारे'। ताम्रकृतकर्षप्रमाणकरूपकनामानि॥ [2]आ समन्तात् ढौकते गच्छतीति आढकः। 'ढौकृ गतौ'। प्रस्थचतुष्टयपरिमाणस्य नाम॥ [3]द्रुणति धान्यपरिमाणाय वर्तते सर्वतो गच्छतीति द्रोणः। 'द्रुण हिंसागतिकौटिल्येषु'। अष्टाढकप्रमाणस्य नाम॥ खं महदाकाशमस्या इति खारी। चतुर्विंशतिद्रोणपरिमाणनाम॥ वहति धान्यादिकमिति वाहः। 'वह प्रापणे'। अष्टद्रोणान्न्यूनाष्टखारिपरिमाणनाम॥ निकुञ्चति कुडवापेक्षया अल्पीभवतीति निकुञ्चकः। 'कुञ्च कौटिल्याल्पीभावयोः'। कुडवचतुर्थांशनाम॥ कुड्यते संस्त्यायते धान्यमिति कुडवः[4]। 'कुल संस्त्याने बन्धुषु च'। द्वादशप्रसृतिपरिमाणनाम॥ प्रतिष्ठते धान्यमत्रेति प्रस्थः। 'ष्ठा गतिनिवृत्तौ'। कुडवचतुष्टयपरिमाणनाम॥ ८८॥

---

[1] रूप्यकरूपेण W_2; रूप्येण Pt_2. [2] Gap of ten pages in K_2. [3] द्रवति, 'द्रु गतौ' F_2, Pt_2. [4] कुडुप इति वा पाठः K_3. यदाहुः—'पलं प्रकुञ्चकं मुष्टिः कुडवस्तच्चतुष्टयम्। चत्वारः कुडवाः प्रस्थश्चतुःप्रस्थमथाढकम्। अष्टाढको भवेद् द्रोणो द्विद्रोणः सूर्प उच्यते। सार्धसूर्पो भवेत् खारी द्विशूर्पा गोण्युदाहृता। तामेव भारं जानीयाद्वाहो भारचतुष्टयम्' इति स्वामी (पृ. २२०)॥

(पा.) कार्षापणः कार्षिकः स्यात्। हेमरजतादि कर्षादिमुद्रया हताक्षनामनी। 'हेमरजतादिकर्ष चेतवोष्ट्रिंचिन अच्चु'। कार्षिके ताम्रिके पणः। ताम्रेण कृतः कार्षापणः पणः स्यात्॥ अस्त्रियामाढकद्रोणौ—परिमाणार्थकाः पृथक्। आढकं प्रस्थचतुष्टयपरिमाणनाम। 'तूमेड्डु'। द्रोणं चत्वार्याढकानि। 'तलुतुमु'। खारी द्रोणार्धम्। 'यिड्डुमु'। वाह आढकार्धम्। 'यिरन'। 'कुम्भः शूर्पोऽस्त्रियां तौ द्वौ गोणिवाहस्तु तद्द्वयम्'। तौ द्वौ खारीति केचित्। केषांचित् खारिवाहौ। तन्मते वाहश्चतुःशूर्पाः,. खारिरष्टशूर्पाः। द्विवण्टकः प्रसृतिः। 'चारेड्डु'। निकुञ्चक इति पाठान्तरम्। निकुञ्चकश्च मानचतुर्थांशः। 'सौलेड्डु'। कुडुबो मानम्। 'पडेड्डु'। पलचतुष्टयं कुडुब इति तुलामानविषयः। प्रस्थ इति मानचतुष्टयम्। एवमूह्याः पृथक्परिमाणार्थकाः॥ ८८॥

पादस्तुरीयो भागः स्यादंशभागौ तु वण्टके॥ ८९॥
द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु।
हिरण्यं द्रविणं द्युम्नमर्थरैविभवा अपि॥ ९०॥

(वि.) पाद इति—पद्यत इति पादः। 'पद गतौ'। चतुर्थांशनाम॥ अंश्यते अंशः। 'अंश विभागे'। अम्यते सेव्यते क्रमेणेति वा। 'अम गत्यादिषु'। भज्यते क्रमेण भागः। 'भज सेवायाम्'। वण्ट्यते [1]सेव्यते वण्टकः। 'वटि विभाजने'। माषाद्येकदेशनामानि॥ द्रवणीयमिति द्रव्यम्[2]। 'द्रु गतौ'। द्रविणं च। विद्यते लभ्यत इति वित्तम्। 'विद्लृ लाभे'। स्वपतौ वित्तस्वामिनि साधु स्वापतेयम्। रिच्यते पुत्रादिना [3]निःसार्यत इति रिक्थम्। 'रिचिर् विरेचने'। ऋच्यते स्तूयत इति ऋक्थम्। 'ऋच स्तुतौ'। धिनोति स्वामिनमिति धनम्। 'धिवि प्रीणने'। धनतीति वा। 'धन धान्ये'। वसति नीतिमतां गृह इति वसु। 'वस निवासे'। हर्यति गच्छतीति[4] हिरण्यम्। 'हर्य गतिकान्त्योः'। [5]द्यूयतेऽभिगम्यते[6] द्युम्नम्। 'द्यु अभिगमने'। अर्थ्यते जनैरिति अर्थः। 'अर्थ उपयाच्ञायाम्'। [7]राति पुष्टिमिति राः। 'रा दाने'। विभवति कार्यसिद्धौ समर्थो भवति विभवः। धननामानि॥ ८९–९०॥

---

[1] वस्यते, 'वट' K_5, K_6. [2] यत्नात् अधिगन्तव्यत्वात् K_3, K_6; द्रवणीयत्वात् W_2. [3] विभज्यते, 'रिचिर् पृथग्भावे' F_2, Pt_2. [4] दीव्यति K_3, K_6. [5] Pt_2 adds द्रवति गच्छतीति द्रविणम्, 'द्रु गतौ'. [6] K_6 adds अर्थिभिः. [7] रान्त्येनमिति, 'रा आदाने' Pt_2.

(पा.) पादस्तुरीयो भागः स्यात्। चतुर्थभागः पादः स्यात्। प्रस्थपादः कुडुबः। पलपादः कर्ष इत्यादि ॥ अंशभागौ तु वण्टके। एकदेशनामनी ॥ द्रव्यं वित्तं—विभवा अपि। धननामानि ॥ ८९–९० ॥

स्यात् कोशश्च हिरण्यं च हेमरूप्ये कृताकृते।
ताभ्यां यदन्यत् तत्कुप्यं रूप्यं तद् द्वयमाहतम् ॥ ९१ ॥

(वि.) स्यादिति—कूयते स्तूयत इति कोशः[1]। 'कु शब्दे'। हर्यति दीव्यतीति हिरण्यम्। 'हर्य गतिकान्त्योः'। कृतावस्थस्य[2] अकृतावस्थस्य वा हेम्नो रूप्यस्य च नामनी ॥ गोप्यते अप्रमत्तैरिति कुप्यम्[3]। धात्वादेर्गकारस्य ककारादेशः। ताभ्यां कृताकृताभ्यां हेमरूप्याभ्याम् अन्यस्य कांस्यादिलोहस्य नाम ॥ रूपमस्यास्तीति रूप्यम्। आहतस्य राजमुद्राङ्कितस्य तद्द्वयस्य कुप्याकुप्यस्य[4] नाम ॥ ९१ ॥

[1] कोष इति वा पाठः W_2. [2] घटिताघटितस्य F_2. [3] W_2, Pt_2 add 'गुपू रक्षणे'. [4] हेमरूप्यस्य K_5, K_6.

(पा.) स्यात् कोशश्च—कृताकृते। अग्निना [1]द्रुतं पश्चाद्घनीभूतं[2] तत् हेम कोशहिरण्यशब्दवाच्यम्, तद्रूप्यं च कोशहिरण्यशब्दवाच्यम्। अंशरूपपरित्यागात् कृतं च, कटकादिरूपाप्राप्तेरकृतं च, इति कृताकृतं पिण्डीभूतमुच्यते। ताभ्यां यदन्यत् तत्कुप्यम्। ताभ्यां हेमरूप्याभ्यामन्यत्ताम्रादि द्रव्यं कुप्यं स्यात् ॥ रूप्यं तद्द्वयमाहतम्। व्यवहारार्थं आहते मुद्रिते कुप्याकुप्ये द्वे च रूप्यं स्यात्[3] ॥ ९१ ॥

[1] तप्तं A_1. [2] B_3 adds इति यावत्. [3] A_1 adds नाणकसामान्यम्.

गारुत्मतं मरकतमश्मगर्भो हरिन्मणिः।
शोणरत्नं लोहितकः पद्मरागोऽथ मौक्तिकम् ॥ ९२ ॥
मुक्ताथ विद्रुमः पुंसि प्रवालं पुंनपुंसकम्।

(वि.) गारुत्मतमिति—गरुत्मत इदं [1]गारुत्मतम्। मरणं तरत्यनेन मरकतम्[2]। गरुडोद्गारलिप्तः अश्मा गर्भे यस्य अश्मगर्भः। हरितवर्णो मणिः हरिन्मणिः। हरितवर्णस्य रत्नस्य नामानि ॥ शोणवर्णं रत्नं शोणरत्नम्। लोहितवर्णत्वात् लोहितकः। पद्मवद् रागो

यस्य पद्मरागः। रक्तवर्णरत्नस्य नामानि ।। मुक्तैव मौक्तिकम्। मुच्यते शुक्तिसंपुटगर्भान्मुक्ता। 'मुच्लृ मोक्षणे'। मुक्तानामनी ।। विशिष्टश्चासौ द्रुमश्च विद्रुमः। अप्सु प्रकृष्टं वलते प्रवालम्। 'वल संचलने'। विद्रुमनामनी ।। ९२ ।।

---

[1] गरुत्मतो जातं F_2, Pt_2. [2] मरं मरणं तकत्यनेन, 'तक हसने' Pt_2; मरकं तरति W_2.

(पा.) गारुत्मतं मरकतं—हरिन्मणिः। मरतकमिति क्वचित् पाठः। मरकतमणि[1]नामानि ।। शोणरत्नं—पद्मरागः। [2]शोणमणिनामानि। कुरुविन्दोऽपि। 'कुरुविन्दमणिश्रेणिकनत्कोटीरशोभिता' इति प्रयोगात् (ललिता. ४)।

'बहलानुरागकुरुविन्ददलप्रतिबद्धमध्यमिव दिग्वलयम्'।

इति माघश्च (शिशु. ९. ८)।। अथ मौक्तिकं मुक्ता। मुक्ताफलमपि स्यात्। 'मुक्ताफलं शौक्तिकेयं गङ्गेष्टिः कटशर्करा' इति वैजयन्ती (पृ. १५२, श्लो. ५७)। मुक्तामणिनामनी ।। अथ विद्रुमः—पुंनपुंसकम्। प्रवालनामनी। 'पगडमु'। अनुक्तम्—इन्द्रनीलं महानीलम्[3]। [4]नीलरत्ननामनी ।। सूर्यकान्तस्त्वग्निमणिः। रविरत्ननामनी। वैडूर्यं वालवायजम्। [5]वैडूर्यमणिनामनी ।। ९२ ।।

---

[1] हरितवर्णमणि° B_3. [2] माणिक्य° A_1. [3] महानीलः A_1. [4] मणि° B_3. [5] विडूररत्न° A_1.

रत्नं मणिर्द्वयोरश्मजातौ मुक्तादिकेऽपि च ।। ९३ ।।
स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम्।
तपनीयं शातकुम्भं गाङ्गेयं भर्म कर्बुरम् ।। ९४ ।।
चामीकरं जातरूपं महारजतकाञ्चने।
रुक्मं कार्तस्वरं जाम्बूनदमष्टापदोऽस्त्रियाम् ।। ९५ ।।

(वि.) रत्नमिति—रमन्तेऽस्मिन् जना इति रत्नम्। 'रमु क्रीडायाम्'। मण्यते [1]रत्नमिति मणिः। 'मण शब्दे'। गारुडाद्यश्मजातीयमुक्ताप्रवालादेर्नामनी ।। शोभनो वर्णो यस्य स्वर्णम्। सुवर्णं च। कनति [2]दीव्यतीति कनकम्। 'कन दीप्तिकान्तिगतिषु'। हर्यतीति हिरण्यम्। 'हर्य गतिकान्त्योः'। हिनोति ताम्राद्यवलेपनात् वर्धत इति हेम। 'हि [3]गतौ'। नान्तः। हटति [4]दीव्यतीति हाटकम्। 'हट दीप्तौ'। तप्यतेऽग्नाविति[5] तपनीयम्। 'तप संतापे'। शतकुम्भाख्ये आकरे गिरौ वा भवतीति शातकुम्भम्।

गङ्गाया अपत्यं गाङ्गेयम्[6]। भ्रियतेऽङ्गुल्यादिभिरिति भर्म। 'भृञ् भरणे'। नान्तः। कर्वति लोहमध्ये स्वश्रैष्ठ्यादिति कर्बुरम्। 'कर्व [7]दर्पे'। चामीकराख्याकरे गिरौ वा भवत्वात् चामीकरम्। महार्घतया जातं प्रशस्तं रूपमस्येति जातरूपम्। रज्यते ताम्रादिकमनेनेति रजतम्। महच्च तद्रजतं च महारजतम्। काञ्चते दीप्यत इति काञ्चनम्। 'काचि दीप्तिबन्धनयोः'। रोचत इति रुक्मम्। 'रुच दीप्तौ'। कृतस्वराख्याकरभवत्वात् कार्तस्वरम्। जम्बूफलरसोत्पन्ननदीभवत्वात् जाम्बूनदम्। अष्टसु लोहेषु पदं प्रतिष्ठास्येति अष्टापदम्। अष्टलोहानि यथा—

'सुवर्णं रजतं ताम्रं रीतिः कांस्यं तथा त्रपु।
सीसं च धीवरं चैव अष्टलोहानि चक्षते ॥'

इति। सुवर्णनामानि ॥ ९३–५ ॥

---

[1] F₂, Pt₂ add स्तूयते. [2] दीप्यते W₂, Pt₂. [3] K₃, K₆ add वृद्धौ च. [4] दीप्यत इति F₂, Pt₂. [5] W₂ adds अनेन; तापनमर्हतीति Pt₂. [6] गङ्गायामग्निना न्यस्तस्य माहेश्वरवीर्यस्य हिरण्यत्वेन भूतत्वात् Pt₂. [7] 'कर्व खर्व गर्व दर्पे' K₅, K₆.

(पा.) रत्नं मणिर्द्वयोः—मुक्तादिकेऽपि च। रत्नमणिशब्दौ द्वौ मरकताद्यश्मजातौ मौक्तिकाद्यनश्मजातावपि[1] स्याताम् ॥ स्वर्णं सुवर्णं कनकं हिरण्यं हेम। 'हेममष्टापदं स्वर्णम्' इति धनंजयपाठाद् अकारान्तोऽपि स्यात्। हाटकं—भर्म। 'भर्म रुक्मं हाटकं शातकुम्भम्' इति हलायुधपाठाद् (अ॰ मा॰ २॰ १८) अकारान्तोऽपि स्यात्। कर्बुरं—अष्टापदोऽस्त्रियाम्। कनकनामानि। कल्याणमग्निबीजं च देवार्हं [2]गौरमर्जुनम्। एतानि पञ्च च ॥ ९३–५ ॥

---

[1] अन्यजातौ A₁. [2] तारजीवनम् B₃.

अलंकारसुवर्णं यच्छृङ्गीकनकमित्यदः।
दुर्वर्णं रजतं रूप्यं खर्जूरं श्वेतमित्यपि ॥ ९६ ॥

(वि.) अलंकारेति—[1]शृङ्ग्यामलंकारे उपादेयं कनकं शृङ्गीकनकम्। अलंकारयोग्यसुवर्णनाम ॥ कनकापेक्षया निकृष्टवर्णत्वाद् दुर्वर्णम्[2]। रज्यते ताम्रादिकमनेनेति रजतम्। 'रञ्ज रागे'। प्रशस्तं रूपमस्येति रूप्यम्। खर्जति व्यथते घनस्याघातिकतया खर्जूरम्। 'खर्ज व्यथने'। [3]श्वेतवर्णत्वात् श्वेतम्। रजतनामानि ॥ ९६ ॥

---

[1] शृङ्गैरलंकाराय K₅, K₆. [2] दुष्टो वर्णोऽस्य W₂. [3] श्वेतते, 'श्विता वर्णे' K₅.

(पा.) अलंकारसुवर्णं—कनकमित्यदः । कटकाद्यलंकारसंबन्धि सुवर्णं श‍ृङ्गीकनकं स्यात्। श‍ृङ्गीकनकमित्यौर्वानलादिवत् प्रयोगः। 'स्त्री श‍ृङ्गी मण्डनसुवर्णम्' इति रत्नकोशे पृथङ्‌निर्देशः। केषांचित् श‍ृङ्गीकनकमिति संघातोऽपि[1] गृहीत एव। 'अलंकारसुवर्णं तु श‍ृङ्गीकनकमाशु च' इति वैजयन्ती (पृ. ४२, श्लो. २२)। दुर्वर्णं रजतं—श्वेतमित्यपि। रजतनामानि। अनुक्तम्—'तारं शुभ्रं चन्द्रहासम्'[2]। एतानि त्रीणि च ॥ ९६ ॥

[1] B_3 omits अपि.　　[2] चन्द्रवोजम् A_1.

रीतिः स्त्रियामारकूटो न स्त्रियामथ ताम्रकम्।
शुल्बं म्लेच्छमुखं द्व्यष्टवरिष्ठोदुम्बराणि च ॥ ९७ ॥

(वि.) रीतिरिति—[1]रीयतेऽग्निसंयोगात् रीतिः। 'रीङ् स्रवणे'। आरस्य सुवर्णस्य कूटो [2]मायारूपमिव भासत इति आरकूटः। पित्तलाख्यलोहनामनी ॥ ताम्यति व्यथतेऽग्निसंयोगादिति ताम्रम्। 'तमु ग्लानौ'। ताम्यति काङ्क्षते [3]स्वनैर्मल्यार्थमाम्लरसमिति वा। 'तमु काङ्क्षायाम्'। शलति द्रवावस्थायामाशुगच्छतीति शुल्वम्। 'शल [4]गतौ'। म्लेच्छदेशे मुख्यत्वात् म्लेच्छमुखम्[5]। द्वे हेमरूप्ये अश्नुते द्व्यष्टम्। 'अशू व्याप्तौ'। सुवर्णरजतेतरलोहेभ्यः श्रेष्ठत्वात् वरिष्ठम्। उदुम्बरं[6] सुवर्णम्। तत्सादृश्यात् उदुम्बरम्[7]। औदुम्बरमिति वा पाठः। ताम्रनामानि ॥ ९७ ॥

[1] F_2, Pt_2 add स्रवति.　　[2] मायामयं रूपमिव K_5, K_6.　　[3] सुवर्ण° W_2; स्वर्ण° K_5.　　[4] 'शल गल आशुगमने' K_3, K_6.　　[5] म्लेच्छस्य मुखमिव W_2.　　[6] औदुम्बरं K_5, K_6.　　[7] उदुम्बराभत्वात् Pt_2.

(पा.) रीतिः स्त्रियां—न स्त्रियाम्। रीतिनामनी। 'पित्तसि'। [1]पित्तलं कपिलोहं च। एते द्वे च॥ अथ ताम्रकं—उदुम्बराणि च। ताम्रनामानि। अनुक्तम्—कांस्यं प्रभासं सौराष्ट्रमसुराह्वयमप्यदः। कांस्यनामानि ॥ ९७ ॥

[1] पीतलं B_3.

लोहोऽस्त्री शस्त्रकं तीक्ष्णं पिण्डं कालायसायसी।
अश्मसारोऽथ मण्डूरं सिंहाणमपि तन्मले ॥ ९८ ॥

(वि.) लोह इति—लुनात्यङ्गमिति लोहः। 'लूञ् छेदने'। शस्यते हिंस्यतेऽनेनेति[1] शस्त्रकम्। 'शसु हिंसायाम्'। तिज्यते तनूक्रियते शातनायेति तीक्ष्णम्। 'तिज निशातने[2]'। पिण्ड्यते संहन्यतेऽनेनेति पिण्डम्। 'पिडि संघाते'। [3]कालवर्णं च तदयश्च कालायसम्। शल्यादिरूपेण भेद्यमेतीत्ययः। 'इण् गतौ'। अश्मनः सारोऽश्मसारः। अयसो नामानि ॥ मण्ड्यतेऽयःपिण्डात् विभज्यत इति मण्डूरम्। 'मडि विभाजने'। हिनस्ति [4]नाशयति पाण्डुरोगमिति सिंहाणम्। 'हिसि हिंसायाम्'। अयोमलस्य नामनी[5] ॥ ९८ ॥

[1] W₂ adds देहः. [2] निशाने W₂. [3] कालं K₃. [4] नश्यतीति K₅, K₆.
[5] W₂ ends here.

(पा.) लोहोऽस्त्री शस्त्रकं—अश्मसारः। अयसो नामानि। 'यनुमु'। शस्त्रशब्देन शस्त्रपर्यायस्यापि ग्रहणम्। 'शस्त्राख्यं विषमायुधम्' इति वैजयन्ती (पृ. ४३, श्लो. ३३) ॥ अथ मण्डूरं—तन्मले। शिङ्घाणमिति वा पाठः। [1]आयसमलनामनी। 'चिट्टमु' ॥ ९८ ॥

[1] अयोमल° A₁.

सर्वं स्यात्तैजसं लोहं विकारस्त्वयसः कुशी।
क्षारः काचोऽथ चपलो रसः सूतश्च पारदे ॥ ९९ ॥

(वि.) सर्वमिति—तेजसो विकारः तैजसम्। सर्वं तैजसं हेमादि लोहं भवति। सुवर्णं रजतमित्यादि अष्टौ लोहानि। कुत्सितं श्यति लोहादिकं तनूकरोतीति [1]कुशी। अयोविकारनाम ॥ क्षरति चलतीति[2] क्षारः। 'क्षर संचलने'। हारतया सूत्रेण कच्यते काचः। 'कचि [3]बन्धने'। काचनामानि ॥ अस्थिरत्वात् चपलः। रस्यते औषधत्वेनेति रसः। 'रस आस्वादने'। सूते हेमादिकमिति सूतः। 'षूङ् प्राणिप्रसवे'। रोगस्य पारं ददातीति पारदः। 'दा दाने'। पारत इति वा पाठः। पादरसनामानि ॥ ९९ ॥

[1] K₆, Pt₂ add 'शो तनूकरणे'. [2] द्रवावस्थायां चलति K₅, K₆. [3] 'कचि दीप्तिबन्धनयोः' K₃.

(पा.) सर्वं स्यात्तैजसं लोहम्। [1]सुवर्णरजतशुल्बादि तैजससामान्यं लोहं स्यात् ॥ विकारस्त्वयसः कुशी। अयोविकारः कुशी स्यात्। '[2]सरळुमुदलैनदि' ॥

क्षारः काचः। मृद्विकारनामनी। 'गाजुमुदलैनदि[3]'॥ अथ चपलो—पारदे। तान्तो दान्तोऽपि स्यात्। 'रसेन्द्रः[4] पारदः प्रोक्तः पारतोऽपि निगद्यते' इति तारपालः। पारदनामानि। 'पादरसमु'॥ ९९॥

[1] सवर्ण° A_1.　　[2] B_3 omits.　　[3] B_3 omits 'मुदलैनदि'.　　[4] रसे तु B_3; रेवे तु A_1.

गवलं माहिषं शृङ्गमभ्रकं गिरिजामले।
स्रोतोऽञ्जनं तु सौवीरं कापोताञ्जनयामुने॥ १००॥

(वि.) गवलमिति—[1]गामलति [2]निवारयतीति गवलम्। 'अल भूषणपर्याप्तिवारणेषु'। महिषशृङ्गनाम॥ शरदभ्ररेखासदृशत्वाद् अभ्रकम्। गिरौ [3]जायत इति गिरिजम्[4]। न विद्यते मलमत्रेति अमलम्। अभ्रकनामानि[5]॥ [6]अज्यते लोचनमनेनेति अञ्जनम्। 'अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु'। स्रोतसि यमुनास्रोतसि जातमञ्जनं स्रोतोऽञ्जनम्। [7]सुवीराख्यदेशे भवत्वात् सौवीरम्। कपोतवर्णसदृशम् अञ्जनं कपोताञ्जनम्। यमुनायां भवं यामुनम्। सुवीरदेशोद्भवाञ्जननामानि॥ १००॥

[1] गा: F_2, Pt_2.　　[2] वारयति K_3, Pt_2.　　[3] भवतीति K_5, K_6.　　[4] K_3, Pt_2 add 'जनी प्रादुर्भावे'.　　[5] K_3, K_6 add 'काकिबङ्गारुपेरु'.　　[6] अञ्जते K_5, K_6.　　[7] सौवोर° K_6.

(पा.) [1]गवलं माहिषं शृङ्गम्। महिषविषाणं [2]गवलं स्यात्। अभ्रकं गिरिजामले। पदद्वयमेतत्। अभ्रकनामानि। 'भिंगमु'। व्योममेघपर्यायाभिधेयत्वादभ्रकं व्योममेघाभिधानं च। गौरीबीजाख्यमभ्रकमिति तन्त्रान्तरम्॥ स्रोतोऽञ्जनं तु—यामुने। नीलाञ्जननामानि॥ १००॥

[1] लवङ्गं देवकुसुमम् A_1.　　[2] लवगं B_3; लवङ्गं A_1.

तुत्थाञ्जनं शिखिग्रीवं वितुन्नकमयूरके।
कर्परी दार्विका क्वाथोद्भवं तुत्थं रसाञ्जनम्॥ १०१॥
रसगर्भं तार्क्ष्यशैलं गन्धाश्मनि तु गन्धकः।
सौगन्धिकश्च चक्षुष्याकुलाल्यौ तु कुलत्थिका॥ १०२॥

(वि.) तुत्थाञ्जनमिति—तुदति नाशयत्यक्षिरोगमिति तुत्थम्। 'तुद व्यथने'। तुत्थं च तदञ्जनं च तुत्थाञ्जनम्। [1]शिखिग्रीवाभत्वात् शिखिग्रीवम्। विशेषेण तुदति रोगानिति वितुन्नकम्। मयूरसदृशत्वात् मयूरकम्। कल्पतेऽक्षिरोगं जेतुमिति कर्परी। 'कृपू सामर्थ्ये'। तुत्थाञ्जननामानि॥ दार्वी हरिद्रा। तस्याः क्वाथोद्भवमञ्जनं दार्विका। क्वाथोद्भवं च। तुत्थं व्युत्पन्नम्। दार्व्या रसोद्भवमञ्जनं [2]रसाञ्जनम्। दार्वीरसो गर्भ उत्पत्तिस्थानमस्येति रसगर्भम्। तार्क्ष्यस्य गरुडस्य शिलायां भवं तार्क्ष्यशैलम्। रसाञ्जननामानि॥ गन्धप्रधानोऽश्मा गन्धाश्मा। सालगन्धवत् गन्धोऽस्यास्तीति गन्धकः[3]। शोभनो गन्धो यस्य सुगन्धिः। सुगन्धिरेव सौगन्धिकः। गन्धाश्मनामानि॥ चक्षुषे हिता चक्षुष्या। कुलं [4]पाषाणकुलम् अलति भूषयतीति कुलाली। 'अल भूषणादौ'। कुलुत्थसदृशत्वात्[5] कुलुत्थिका। कुलुत्थसदृशाञ्जनस्य नामानि॥ १०१–२॥

[1] मयूर° K_3. [2] रसस्य दार्विकाक्वाथस्य K_5, K_6. [3] गन्धिकः, सौगन्धिकश्च K_5, K_6. [4] लोचनं K_6. [5] प्रकृतित्वात् K_5, K_6.

(पा.) तुत्थाञ्जनं—मयूरके। मयूरतुत्थनामानि॥ कर्परी दार्विका—तुत्थम्। कर्परीतुत्थनामानि॥ रसाञ्जनं—तार्क्ष्यशैलम्। रसाञ्जननामानि॥ [1]गन्धाश्मनि—सौगन्धिकं च। 'सौगन्धिकः पद्मरागे कल्हारे गन्धके च षण्' इति नपुंसकम्। गन्धकनामानि॥ चक्षुष्याकुलाल्यौ तु कुलत्थिका। कुलत्थाञ्जननामानि। '[2]कनुपालवित्तुलु'॥ १०१–२॥

[1] गन्धोऽश्मनि A_1. [2] B_3 omits.

रीतिपुष्पं पुष्पकेतु पौष्पकं कुसुमाञ्जनम्।
पिञ्जरं पीतनं तालमालं च हरितालके॥ १०३॥

(वि.) रीतिपुष्पमिति—रीतेः पित्तलस्य पुष्पसदृशं[1] मलं रीतिपुष्पम्। अक्षिगतपुष्पस्य केतुः परिपन्थीभूतं पुष्पकेतु। पुष्पसदृशत्वात् पौष्पकम्। कुसुमसदृशमञ्जनं कुसुमाञ्जनम्[2]। कुसुमाञ्जननामानि॥ पीतवर्णत्वात् पिञ्जरम्। पीतनं च। तलति प्रतितिष्ठति प्रीतिरत्रेति तालम्। 'तल प्रतिष्ठायाम्'। अलति भूषयति चित्रादिकमिति[3] आलम्। 'अल भूषणादौ'। हरितवर्णं [4]तालकं हरितालकम्। हरितालनामानि॥ १०३॥

[1] वर्णं K_5, K_6. [2] कुसुमाभं K_5; कुसुमं चाञ्जनं च K_6. [3] चित्रार्पितस्त्रीपुंसादिकं K_3, K_6. [4] आलं K_5.

(पा.) रीतिपुष्पं पुष्पकेतु[1]—कुसुमाञ्जनम्। पुष्पाञ्जननामानि। अनुक्तम्—विस्रगन्धि तु गोवन्तं[2] वैरं च नखमण्डनम्॥ पिञ्जरं पीतनं—हरितालके। हरितालनामानि। 'हरिदळ्मु'। 'वालमूलं[3] वंशपत्रम्' इति वैजयन्तीपाठात् (पृ. ४२, श्लो. १४) वालमूलम्। 'हरितालमलं तालं तालकं दलम्' इति माधवीयपाठाद् [4]दलमपि॥ १०३॥

---

[1] पौष्पकेतु A_1. [2] 'गोदन्तो नटसंज्ञकः' इति त्रिकाण्डशेषः. [3] तालमालमित्येव मुद्रितग्रन्थे. [4] A_1 omits अपि.

गैरेयमर्थ्यं गिरिजमश्मजं च शिलाजतु।
बोलगन्धरसप्राणपिण्डगोपरसाः समाः॥ १०४॥

(वि.) गैरेयमिति—गिरौ गिरिशिलायां भवं गैरेयम्। गिरिजं[1] च। अर्थ्यते [2]औषधादिभिरिति अर्थ्यम्। 'अर्थ उपयाच्ञायाम्'। अश्मनि जायत इत्यश्मजम्। 'जनी प्रादुर्भावे'। [3]शिलाविशेषे जायत इति शिलाजतु। गिरिशिलोत्थलाक्षानामानि॥ बोल्यते मषीकरणाय[4] कज्जलपुञ्जं निमज्ज्यते बोलः। 'बुल निमज्जने'। गन्धवाहो रसः गन्धरसः[5]। प्राणित्यनेन प्राणः। पिण्ड्यते पिण्डीक्रियते पिण्डः। 'पिडि संघाते'। औषधार्थं गोप्यते गोपः[6]। रस्यते आस्वाद्यते रसः। 'रस आस्वादने'। बोलनामानि॥ १०४॥

---

[1] गिरेर्जातं K_3. [2] रसायनादिभिः K_5, K_6. [3] शिलायां Pt_2; शिलायाः K_5. [4] औषधेषु F_2, Pt_2. [5] गन्धप्रधानो रसोऽस्य F_2, Pt_2. [6] K_3, Pt_2 add 'गुपू रक्षणे'.

(पा.) [1]गैरेयमर्थ्यं—शिलाजतु। शिलामदनामानि। '[2]कलुमदमु'। बोलगन्धरस—रसाः समाः। 'बोलो गोलः शशः पिण्डः' इति वैजयन्ती (पृ. ४२, श्लो. १५)। बोलनामानि॥ १०४॥

---

[1] गैलेयम् A_1. [2] B_3 omits.

डिण्डीरोऽब्धिकफः फेनः सिन्दूरं नागसंभवम्।
नागसीसकयोगेष्टवप्राणि त्रपु पिच्चटम्॥ १०५॥

रङ्गवङ्गे चाथ पिचुस्तूलोऽथ कमलोत्तरम् ।
स्यात्कुसुम्भं वह्निशिखं महारजनमित्यपि ॥ १०६ ॥

(वि.) डिण्डीर इति—डिण्डीत्येवमनुकारध्वनिम् ईरयतीति डिण्डीरः । 'ईर क्षेपे'। अब्धेः कफ इव प्रतिभात्यब्धिकफः। स्फायते वर्धत इति फेनः। 'स्फायी[1] वृद्धौ'। समुद्रफेननामानि ॥ स्यन्दते प्रस्रवति सूक्ष्मत्वादिति सिन्दूरम् । 'स्यन्दू प्रस्रवणे'। नागात् सीसात् [2]संभवोऽस्य नागसंभवम् । सिन्दूरनामनी ॥ न गच्छतीत्यगम्। तत्र भवतीति नागम्। 'गम्लृ गतौ'। सिनोति पारदं बध्नातीति सीसकम्। 'षिञ् बन्धने'। सुवर्णकरणयोगे इष्टं भवतीति योगेष्टम्। सुवर्णयोगे उप्यत इति वप्रम्। 'डुवप् बीजसंताने'। सीसकनामानि ॥ त्रपतेऽग्निसंनिधावाशु द्रवतीति त्रपु । 'त्रपूष् लज्जायाम्'। पिच्च्यते कुट्ट्यते घटेष्वनेनेति पिच्चटम्। 'पिच्च कुट्टने'। रज्यते चर्माद्यनेन रङ्गम्[3]। 'रञ्ज रागे'। वङ्गति द्रवतीति वङ्गम्। 'वगि गतौ'। त्रपुसंज्ञकलोहनामानि ॥ पञ्च्यते तन्तुरस्माद् व्यक्तीक्रियते पिचुः[4]। 'पचि व्यक्तीकरणे'। तोल्यते फलसकाशात् [5]निष्कृष्यते तूलः। 'तूल निष्कर्षे'। उपगतबीजस्य कार्पासस्य नामनी ॥ [6]कमलेभ्य उत्कृष्टवर्णं कमलोत्तरम्। कुस्यत्यङ्गुल्यादिकमिति कुसुम्भम् । 'कुस संश्लेषणे'। वह्निरिव पिङ्गला शिखास्येति वह्निशिखम्। [7]महच्च तद्रजनं च महारजनम्। 'रञ्ज रागे'। तैलहेतुबीजस्य कुसुम्भाख्यौषधिविशेषपुष्पस्य नामानि ॥ १०५–६ ॥

---

[1] K_5, K_6 add ओप्यायी. [2] संभवतीति K_3, K_5. [3] रङ्गति द्रवति, 'रगि गतौ' Pt_2. [4] पिच्यते मर्द्यत इति, 'पिचु मर्दने' Pt_2. [5] निष्कोष्यते F_2, Pt_2. [6] K_3 adds वर्णाधिक्यात्. [7] K_3, Pt_2 add रज्यते वस्त्रादिकमनेनेति रजनम् । 'रञ्ज रागे'.

(पा.) डिण्डीरोऽब्धिकफः फेनः। [1]समुद्रश्लेष्मनामानि। 'नुरुगु'। सिन्दूरं नागसंभवम् । सिन्दूरनामनी ॥ नागसीसक—वप्राणि । सीसकनामानि । यवनेष्टं चीनपिष्टम्। एते द्वे च॥ त्रपु पिच्चटं रङ्गवङ्गे च। त्रपुनामानि। 'तगरमु'। स्यात् कस्तीरं तमरकम्। एते द्वे च॥ अथ पिचुस्तूलः। कार्पासस्य नामनी। 'दूदि'। शाल्मलीतूलनामन्यपि स्याताम् ॥ अथ कमलोत्तरं—[2]महारजनमित्यपि। चन्द्रिकापुष्पनामानि। 'कुङ्कुमपुव्वु' ॥ १०५–६ ॥

---

[1] फेननामानि B_3. [2] महारजतं A_1.

मेषकम्बल ऊर्णायुः शशोर्णं शशलोमनि ।
मधु क्षौद्रं माक्षिकादि मधूच्छिष्टं तु सिक्थकम् ॥ १०७ ॥

(वि.) मेषेति—मेषलोमकृतः [1]कम्बलः मेषकम्बलः । ऊर्णा मेषलोम, तदस्यास्तीति ऊर्णायुः । मेषलोमकृतकम्बलनाम ॥ शशस्योर्णं शशोर्णम् । शशलोमनाम ॥ मन्यतेऽभिलष्यत इति मधु । 'मन ज्ञाने'। क्षुद्राभिर्मक्षिकाभिः कृतं क्षौद्रम् । मक्षिकाभिः कृतं माक्षिकम्[2] । माक्षिकपौत्तिकभ्रामरिकक्षौद्रचतुर्विधमधुनो नाम ॥ मधुना उच्छिष्यते त्यज्यत इति मधूच्छिष्टम्[3] । सिञ्चति अग्निसंयोगादिति सिक्थकम् । 'षिच क्षरणे' । मधूच्छिष्टनामनी ॥ १०७ ॥

[1] F$_2$, Pt$_2$ add काम्यते शीतार्तैरिति कम्बलः.

[2] Pt$_2$ adds

'माक्षिकं तैलवर्णं स्याद् घृतवर्णं तु पौत्तिकम् ।
विज्ञेयं भ्रामरं श्वेतं क्षौद्रं तु कपिलं मतम् ॥'

[3] K$_3$ adds 'शिष असर्वोपयोगे'.

(पा.) मेषकम्बल ऊर्णायुः । एडकरोमजः कम्बलः ऊर्णायुः स्यात् । [1] 'जानमु' ॥ शशोर्णं शशलोमनि । [2]शशलोमजं शशोर्णं स्यात् ॥ मधु क्षौद्रं माक्षिकादि । आदिशब्दो भ्रामरसारघादिसंग्रहार्थः[3] । [4]मधुमक्षिकासारनामानि । 'तेने' । अनुक्तम्—[5]बौद्धानलमशालाकम्(?) । 'कोलजु' । छात्रं सर्वौघमित्युभे । 'पेड्डजुन्नु' ॥ मधूच्छिष्टं तु सिक्थकम् । मधूच्छिष्टनामनी । 'मैनमु' ॥ १०७ ॥

[1] B$_3$ omits. [2] शशस्य A$_1$. [3] A$_1$ adds संज्ञा. [4] माक्षिकादि B$_3$.

[5] 'औद्दालकं तु शालाकम्' इति वैजयन्ती (पृ. १३४, श्लो. १३६).

मनःशिला मनोगुप्ता मनोह्वा नागजिह्विका ।
नैपाली कुनटी गोला यवक्षारो यवाग्रजः ॥ १०८ ॥
पाक्योऽथ सर्जिकाक्षारः कापोतः सुखवर्चकः ।
सौवर्चलं स्याद् रुचकं त्वक्क्षीरी वंशरोचना ॥ १०९ ॥

(वि.) मनःशिलेति—मनःशब्दवाच्या शिला मनःशिला । मनःशब्देन गोप्यत इति मनोगुप्ता[1] । मनःशब्देन हूयत इति मनोह्वा । 'ह्वेञ् स्पर्धायां शब्दे च' । नागजिह्वाप्रतिकृतित्वात् नागजिह्विका । मनःशिलानामानि ॥ नेपालदेशे भवा नैपाली । कौ

नेपालभूमौ[2] नटतीति कुनटी । 'नट नृत्तौ' । गां नेपालभूमिं [3]स्वजन्मभूमित्वेन लातीति गोला । 'ला आदाने' । नेपालदेशमनःशिलानामानि ॥ यवस्य क्षारो यवक्षारः । [4]यवाग्रैर्जन्यत इति यवाग्रजः । 'जनी प्रादुर्भावे' । [5]पाकेन सिद्धः पाक्यः । यवक्षारनामानि ॥ सर्जिकादिकृतः क्षारः [6]सर्जिकाक्षारः । कपोतवर्णत्वात् कापोतः । सुखेन दीपनाग्निं वर्चयतीति सुखवर्चकः । 'वर्च दीप्तौ' । क्षारनामानि ॥ सौवर्चलरुचकशब्दौ पूर्वमेव व्युत्पन्नौ (२. ९. ४३) । सुवर्चलाख्याकरोद्भवक्षारनामनी ॥ त्वचो वेणोः सकाशात् [7]स्रवत्क्षीरमस्या इति त्वक्क्षीरा । त्वक्क्षीरीति वा पाठः । वंशोत्था रोचना वंशरोचना । त्वक्क्षीरीनामनी ॥ १०८–९ ॥

---

[1] K_3, Pt_2 add 'गूपू रक्षणे'; गुप्यते K_5. [2] भुवि K_6. [3] स्वजन्मत्वेन K_5, K_6. [4] K_3, K_6 add यवशूकैः. [5] पचनीयः Pt_2; F_2 adds 'डुपचष् पाक'. [6] सर्जका K_5, K_6. [7] प्रभवति K_6; स्रवति K_2, K_3, K_5.

(पा.) मनःशिला—कुनटी गोला । मनःशिलानामानि । 'मणिशिल' । अनुक्तम्—'पाक्शुक्ला तु [1]कठिनी कक्खटी च समं त्रयम्' । [2]फलकलेखनीशिलानामानि । 'पलपुगनि[3]' ॥ यवक्षारः यवाग्रजः पाक्यः । यवक्षारनामानि । अथ [4]सर्जिकाक्षारः—सुखवर्चकः । [4]सर्जिकाक्षारनामानि ॥ सौवर्चलं स्याद्रुचकम् । सौवर्चलक्षार[5]नामनी । '[6]वोणारखारम्' ॥ अनुक्तम्—'टङ्कणो रसयोनिः स्यात्' । 'वेलिगारमु' ॥ [7]त्वक्क्षीरी वंशलोचना । तुगाक्षीरीनामानि । 'तदक्षिरमु' । तुकाक्षीरी तुगाक्षीरी च स्यात् । 'तुगाक्षीरी तुकाक्षीरी त्वक्क्षीरी पार्थिवी तुका' इति माधवः ॥ १०८–९ ॥

---

[1] घटिका A_1. [2] लेखिनी A_1. [3] 'बलपमु' B_3. [4] सज्जिका° A_1. [5] A_1 adds रस°. [6] B_1 omits. [7] त्वक्क्षीरा B_3.

शिग्रुजं श्वेतमरिचं मोरटं मूलमैक्षवम् ।
ग्रन्थिकं पिप्पलीमूलं चटकाशिर इत्यपि ॥ ११० ॥

(वि.) शिग्रुजमिति—शिनोति तनूकरोति रोगमिति शिग्रुः । तस्माज्जातं शिग्रुजम्[1] । 'शिञ् निशातने' । श्वेतं च तत् मरिचं च श्वेतमरिचम्[2] । [3]सौभाञ्जनबीजनामनी ॥ मुरति भुवं वेष्टयतीति मोरटम् । 'मुर वेष्टने' । इक्षोरिदम् ऐक्षवम् । इक्षुमूलनाम ॥ ग्रन्थिप्रतिकृतित्वात् ग्रन्थिकम् । पिप्पल्या मूलं पिप्पलीमूलम् । चटकाशिरोरूपत्वात् चटकाशिरः । पिप्पलीमूलनामानि ॥ ११० ॥

---

[1] K_3, Pt_2 add 'जनी प्रादुर्भावे'. [2] श्वेतमरिचगुणयोगात् F_2, Pt_2. [3] शोभाञ्जन° K_6.

(पा.) शिग्रुजं श्वेतमरिचम्। [1]शिग्रुजनामनी। 'मुनुगवित्तुलु'। मोरटं मूलमैक्षवम्। इक्षूणां मूलं मोरटं स्यात्। ग्रन्थिकं पिप्पलीमूलं [2]चटकाशिर इत्यपि। पिप्पलीमूलनामानि ॥ ११० ॥

---

[1] शिग्रुबीज° B_3. [2] चटिकाशिरः A_1.

गोलोमी भूतकेशो ना पत्राङ्गं रक्तचन्दनम्।
त्रिकटु त्र्यूषणं व्योषं त्रिफला तु फलत्रिकम् ॥ १११ ॥

इति वैश्यवर्गः

(वि.) गोलोमीति—गोरिव लोमान्यस्या गोलोमी। भूतस्य केशा इव केशाः यस्य भूतकेशः। औषधविशेषनामनी॥ पत्राण्यङ्गान्यस्य[1] पत्राङ्गम्। [2]रक्तचन्दननाम॥ त्रीणि कटूनि सन्त्यत्रेति [3]त्रिकटु। त्रीण्यूषणान्यत्र सन्तीति त्र्यूषणम्[4]। विशेषेण जिह्वामूषतीति व्यूषम्। 'ऊष रुजायाम्'। 'ऊष दाहे वा'। समाहृतस्य शुण्ठीमरीचपिप्पल्याख्यद्रव्यत्रयस्य नामानि॥ त्रयाणां फलानां समाहारः त्रिफला। हरीतकीविभीतक्यामलकीत्रयस्य नाम॥ १११॥

इति श्रीवङ्गलकामयभट्टोपाध्यायसूनुलिङ्गयसूरिविरचितायाममरकोशपदविवृतौ वैश्यवर्गः

---

[1] अङ्गे F_2, Pt_2. [2] Pt_2 adds रक्तचन्दनसदृशत्वात्. [3] त्रयाणां कटूनां समाहारः F_2, Pt_2. [4] F_2, Pt_2 add ऊष्यन्ते रोगा एभिरिति.

(पा.) गोलोमी भूतकेशो ना। कापिशेयजतुनामनी। 'मरुलुजड'॥ पत्राङ्गं रक्तचन्दनम्। रक्तचन्दननामनी। '[1]पतंगमु'॥ त्रिकटु त्र्यूषणं व्योषम्। त्रिकटुनामानि। 'अयस्तिलत्र्यूषणकोलभोगैः' इति योगशतकपाठाद् दीर्घादिः। 'त्र्युषणं त्रिकटु दोषं रुचकं सौवर्चलः पुंसि' इति रत्नकोशपाठाद् ह्रस्वादिरपि॥ त्रिफला तु फलत्रिका। स्त्रीलिङ्गावेतौ। 'त्रिफला तृफलापि च' इति त्रिकाण्डशेषः (२. ९. ४७५) 'भूतसारी फलत्रिका' इति वैजयन्ती (पृ. १२९, श्लो. ८२)। फलत्रयनाम॥

'हरीतकी चामलकी विभीतकमिति त्रयम्।
त्रिफला प्रथमा सैव फलत्रयमिति स्मृतम्॥

द्राक्षा काश्मर्यखर्जूरे[2] फलानि तु फलत्रयम् ।
सैव ज्ञेया द्वितीया तु त्रिफला शास्त्रकोविदैः ॥
जातीफलं पूगफलं लवङ्गफलमेव च ।
तृतीया त्रिफला प्रोक्ता सैव प्रोक्तं फलत्रयम् ॥ १११ ॥'

इति [3]श्रीवत्सनृसिंहसूरिसुतमल्लिनाथसुधीविरचितेऽमरपदपारिजाते वैश्यवर्गः

---

[1] B_3 omits. [2] °खर्जूरफलानीति A_1. [3] °नरसिंह° A_1.

१०. शूद्रवर्गः

शूद्राश्चावरवर्णाश्च वृषलाश्च जघन्यजाः ।
आचण्डालात्तु संकीर्णा अम्बष्ठकरणादयः ॥ १ ॥

(वि.) अथ क्रमप्राप्तां शूद्रवर्गविवृतिमुपक्रमते—शूद्रा इति । शुद्धानां शुदं शोधनं दानेन रान्तीति शूद्राः । 'रा दाने' । शुद्धान् स्वस्पर्शनेन उन्दन्ति सेचयन्तीति वा शूद्राः । 'उन्दी क्लेदने' । अवरोऽधमो वर्णो येषां ते अवरवर्णाः । वृषं धर्मं धनेन [1]लान्तीति वृषलाः । 'ला आदाने' । ब्रह्मणो [2]जघन्यात् पादात् जाताः जघन्यजाः । शूद्रनामानि ॥ संकीर्यन्ते परस्परं मिश्रीभवन्तीति [3]संकीर्णाः । 'कॄ विक्षेपे' । अम्बष्ठादिचण्डालान्तस्य संकरजातीयस्य नाम ॥ १ ॥

---

[1] लुनन्ति, 'लूञ् छेदने' F_2, Pt_2. [2] जघने जाता जघन्याः; तेभ्यो जाताः K_5, K_6. [3] विजातीयमातापितृकत्वात् उभयवर्णाभ्यां संकीर्यन्ते F_2, Pt_2.

(पा.) शूद्राश्चावरवर्णाश्च—जघन्यजाः । शूद्रनामानि । 'पादजा द्विजपोताश्च' । एते द्वे च ॥ आ चण्डालात्तु—करणादयः । भिन्नजातिमातापितृकत्वात् चण्डालावधिका अम्बष्ठकरणादयः संकीर्णजातयः । 'शूद्राः संकीर्णजा अपि' इति शास्त्रात् शूद्रा एव[1] संकीर्णजातयः[2] ॥ १ ॥

---

[1] A_1 adds संकीर्णजाः. [2] A_1 adds क्रियाद्वारेण कथिताः.

शूद्राविशोस्तु करणोऽम्बष्ठो वैश्याद्द्विजन्मनोः ।
शूद्राक्षत्रिययोरुग्रो मागधः क्षत्रियाविशोः ॥ २ ॥

(वि.) शूद्रेति—[1]विलेपनादि कर्म करोतीति करणः। 'डुकृञ् करणे'। वैश्यात् शूद्रायां जातस्य नाम॥ [2]अम्बासमीपे तिष्ठति चिकित्सार्थमिति अम्बष्ठः। 'ष्ठा गतिनिवृत्तौ'। वैश्यायां ब्राह्मणात् जातस्य नाम॥ उच्यति समवैति वर्णद्वयमिति उग्रः। 'उच समवाये'। शूद्रायां क्षत्रियाज्जातस्य नाम॥ मगध्यति[3] राजानं स्तौतीति मागधः। 'मगध [4]स्तुतौ'। क्षत्रियायां वैश्याज्जातस्य नाम॥ २॥

---

[1] लेखनकर्मेति F_2, Pt_2. [2] अम्ब F_2, Pt_2. [3] मगधदेशे प्रायेण भवन्ति तिष्ठन्तीति F_2, Pt_2. [4] परिवेष्टने K_5.

(पा.) शूद्राविशोस्तु करणः। शूद्रायां वैश्यादुत्पन्नः करणः स्यात्। स चायव्ययादिलेखनोपजीवी। स्त्रियां [1]टित्त्वाद् ङीपि[2] करणी॥ अम्बष्ठो वैश्याद्द्विजन्मनोः। वैश्यस्त्रीब्राह्मणपुरुषयोरुत्पन्नपुत्रोऽम्बष्ठः स्यात्। स च चिकित्सोपजीवी॥ शूद्राक्षत्रिययोरुग्रः। शूद्रायां क्षत्रियोत्पन्न उग्रः स्यात्। स च कोशदुर्गरक्षणोपजीवी॥ मागधः क्षत्रियाविशोः। क्षत्रियस्त्रीवैश्यपुरुषयोरुत्पन्नः पुत्रो मागधः स्यात्। स च वंशवीर्यादिस्तुत्युपजीवी। अनुक्तम्—शूद्राद्विजन्मनोः पारशवः। शूद्रायां ब्राह्मणोत्पन्नः पारशवः स्यात्। स च कालिकापूजनाद्युपजीवी॥ राज्ञीद्विजन्मनोर्मूर्धावसिक्तः। क्षत्रियायां ब्राह्मणादुत्पन्नः मूर्धावसिक्तः स्यात्। स धनुर्वेदोपजीवी॥ राज्ञीशूद्रयोः पारधेनुकः। क्षत्रियायां शूद्रादुत्पन्नः पारधेनुकः स्यात्। स च मृगपक्षिबन्धनोपजीवी॥ २॥

---

[1] ३. ३. ११७. [2] ४. १. १५.

माहिष्योऽर्याक्षत्रिययोः क्षत्तार्याशूद्रयोः सुतः ।
ब्राह्मण्यां क्षत्रियात् सूतस्तस्यां वैदेहको विशः ॥ ३ ॥

(वि.) माहिष्य इति—राजमहिषीरक्षणे [1]नियुक्तो माहिष्यः। क्षत्रियात् वैश्यायां जातस्य नाम॥ [2]क्षदतेऽश्वान् ताडयतीति क्षत्ता। 'क्षदि हिंसार्थे'। अर्यायां शूद्राज्जातस्य नाम॥ सुवति प्रेरयत्यश्वानिति सूतः। 'षू प्रेरणे'। ब्राह्मणयोषिति क्षत्रियाज्जातस्य नाम॥ विदेहे पण्यस्य विविधोपचयेन वर्तमानः वैदेहकः। तस्यामेव ब्राह्मण्यां वैश्याज्जातस्य नाम॥ ३॥

[1] साधुः F_2, Pt_2.
[2] क्षतति K_5, K_6; क्षदति द्वारस्थत्वात् जनान् पीडयति F_2, Pt_2.
[3] विदेहेन, 'दिह उपचये' K_3, K_6.

(पा.) माहिष्योऽर्याक्षत्रिययोः। वैश्यायां[1] क्षत्रियादुत्पन्नो माहिष्यः स्यात्। स च भरतशास्त्रोपजीवी ॥ क्षत्तार्याशूद्रयोः सुतः। वैश्यायां शूद्रादुत्पन्नः सुतः क्षत्ता स्यात्। ऋदन्तः। [2]दूत्यद्वारपाल्योपजीवी ॥ ब्राह्मण्यां क्षत्रियात् सूतः। ब्राह्मण्यां क्षत्रियादुत्पन्नः सुतः सूतः स्यात्। [3]सारथ्योपजीवी ॥ तस्यां वैदेहिको विशः। ब्राह्मण्यां वैश्यादुत्पन्नः वैदेहकः स्यात्। [4]स्तुत्युपजीवी। स एव बन्दी ॥ ३ ॥

[1] वैश्यस्त्रीक्षत्रियपुरुषयोरुत्पन्नः पुत्रः A_1.
[2] दौत्य° A_1.
[3] B_3 adds विष्णुपूजेतिहासकथोपजीवी च.
[4] A_1 adds अन्तःपुररक्षणोपजीवी.

रथकारस्तु माहिष्यात् करण्यां यस्य संभवः।
स्याच्चण्डालस्तु जनितो ब्राह्मण्यां वृषलेन यः ॥ ४ ॥

(वि.) रथकार इति—रथं करोतीति रथकारः[1]। करण्यां माहिष्याज्जातस्य नाम ॥ चण्डाय उग्रकर्मणेऽलति पर्याप्त[2] इति चण्डालः। 'अल भूषणपर्याप्तिशक्तिवारणेषु'। ब्राह्मण्यां शूद्राज्जातस्य नाम ॥ ४ ॥

[1] F_2, Pt_2 add 'डुकृञ् करणे'.
[2] पर्याप्नोति K_5; चण्डते कुप्यति क्रूरकर्मवत्त्वेनेति Pt_2.

(पा.) रथकारस्तु माहिष्यात्—संभवः। [1]शूद्रावैश्ययोर्जातायां वैश्याक्षत्रियजातादुत्पन्नो रथकारः स्यात्। रथवास्तुकर्मोपजीवी। स्याच्चण्डालस्तु—वृषलेन यः। [2]ब्राह्मणस्त्रीशूद्रपुरुषयोरुत्पन्नः पुत्रः चण्डालः स्यात्। स च वीथीमलोत्सारणोपजीवी ॥ ४ ॥

[1] करण्यां माहिष्याज्जातः B_3.
[2] ब्राह्मण्यां शूद्रादुत्पन्नः B_3.

कारुः शिल्पी संहतैस्तैर्द्वयोः श्रेणिः सजातिभिः।
कुलकः स्यात् कुलश्रेष्ठी मालाकारस्तु मालिकः ॥ ५ ॥

(वि.) कारुरिति—करोति शिल्पादिकर्म कारुः[1]। शिल्पिकर्मास्यास्तीति शिल्पी। तन्तुवायनापितरजकचर्मकारादिनामनी ॥ श्रियत इति श्रेणिः। 'श्रिञ् सेवायाम्'।

स्वजातीयशिल्पिसंघस्य नाम ॥ कुलं करोति श्रेष्ठत्वेनेति कुलकः । कुलिक इति वा पाठः । [2]कुलश्रेष्ठिनो नाम ॥ मालां करोतीति मालाकारः । माला[3] शिल्पमस्यास्तीति मालिकः । पुष्पजीविनो नामनी ॥ ५ ॥

[1] Pt$_2$ adds 'डुकृञ् करणे';
'तक्षा च तन्तुवायश्च नापितो रजकस्तथा ।
पञ्चमश्चर्मकारश्च कारवः शिल्पिनो मताः ॥' Pt$_2$.

[2] F$_2$, Pt$_2$ add कुले श्रेष्ठत्वमस्येति कुलश्रेष्ठी. [3] F$_2$ adds निर्माणं.

(पा.) कारुः शिल्पी । कारुनामनी । [1]तक्षकरजकनापितादीनां साधारणाभिधानम् ।

'तक्षा च तन्तुवायश्च नापितो रजकस्तथा ।
पञ्चमश्चर्मकारश्च कारवः शिल्पिनश्च ते ॥'

संहतैस्तैर्द्वयोः श्रेणिः सजातिभिः । कर्मणा सजातीयानां कारूणां संघातः श्रेणिः स्यात् ॥ कुलकः स्यात् कुलश्रेष्ठः । कुले[2] श्रेष्ठः कुलकः स्यात् । 'कुलकः स्यात् कुलश्रेष्ठे वल्मीके काकतिन्दुके' इति विश्वप्रकाशिका (प्र. ७, श्लो. ५९) । कुलश्रेष्ठीति रभसकोशानुसारिपाठात् कुलश्रेष्ठी च स्यात् ॥ मालकारस्तु मालिकः । पुष्पमालानिर्मातृनामनी । पुष्पलावो वनार्चकः । एते द्वे च ॥ ५ ॥

[1] तक्षकादीनां B$_3$. [2] कुलश्रेष्ठः B$_3$.

कुम्भकारः कुलालः स्यात् पलगण्डस्तु लेपकः ।
तन्तुवायः कुविन्दः स्यात् तुन्नवायस्तु सौचिकः ॥ ६ ॥

(त्रि.) कुम्भकार इति—कुम्भं करोतीति कुम्भकारः[1] । कुं भूमिं मृदर्थं लडति मृद्नातीति कुलालः । 'लड मर्दने' । कुलैः कुम्भकुलैर्गृहमलति भूषयतीति वा । 'अल भूषणादौ' । कुम्भकारनामनी ॥ पलेन मांसेनेव मृदादिना [2]गडति भित्त्यादिकमिति पलगण्डः । 'गड सेचने' । लिम्पति[3] सुधादिना प्रासादादिकमिति लेपकः । 'लिप उपदेहे' । सुधालेपोपजीविनो नामनी ॥ तन्तून् वयतीति तन्तुवायः । 'वेञ् तन्तुसंताने' । पटादिरचनार्थं कुं भुवं विन्दतीति कुविन्दः । 'विदिर् लाभे' । वस्त्रकारनामनी ॥ तुन्नं त्रुटितं वस्त्रादि[4] वयति सूच्यादिना तुन्नवायः[5] । [6]सूचीशिल्पमस्यास्तीति सौचिकः । सूचिक इति वा पाठः । कूर्पासादिकारिणो नामनी ॥ ६ ॥

[1] K$_3$, Pt$_2$ add 'डुकृञ् करणे'. [2] गण्डति Pt$_2$. [3] K$_3$ adds उपदेग्धि.
[4] आदिकं K$_3$. [5] F$_2$, Pt$_2$ add 'वेञ् तन्तुसंताने'. [6] सूचीकर्म Pt$_2$.

(पा.) कुम्भकारः कुलालः स्यात्। [1]घटादिनिर्मातृनामनी। 'कुम्मलि'। पलगण्डस्तु लेपकः। [2]भित्त्यादिलेपकनामनी। '[3]उप्पलि'। तन्तुवायः कुविन्दः स्यात्। पटकारनामनी। शालिकः पटकारश्च। एते द्वे च॥ तुन्नवायस्तु सौचिकः। कञ्चुकादि[4]कारनामनी। 'चिप्पिवाडु'॥ ६॥

---

[1] घटमणिकादि A_1. [2] भित्त्यनुलेपक° A_1. [3] B_3 omits. [4] °कारिण: B_3.

रङ्गाजीवश्चित्रकारः शस्त्रमार्जोऽसिधावकः।
पादूकृच्चर्मकारः स्याद् व्योकारो लोहकारकः॥ ७॥

(वि.) रङ्गाजीव इति—रङ्गेण[1] चित्रवर्णेन आजीवतीति रङ्गाजीवः। 'जीव प्राणधारणे'। चित्रं करोतीति चित्रकारः। चित्रकारनामनी॥ शस्त्रं मार्ष्टीति शस्त्रमार्जः। 'मृजूष् शुद्धौ'। असिं धावतीति असिधावकः। 'धावु गतिशुद्ध्योः'। आयुधशोधकनामनी॥ पादूं [2]पादुकां करोतीति पादूकृत्। 'डुकृञ् करणे'। चर्म करोतीति चर्मकारः। चर्मकारस्य नामनी॥ व्योऽयः करोतीति व्योकारः। विशेषेण लोहमियर्तीति[3] वा। लोहकारकनामनी॥ ७॥

---

[1] F_2, Pt_2 add रज्यते धवलं रक्ततामापद्यत इति रङ्गः हरितालादिः. [2] पादू उपानहौ K_5, K_6. [3] K_2, K_3 add 'ऋ गतौ'.

(पा.) रङ्गाजीवश्चित्रकरः[1]। आलेख्यकारनामनी। [2]'चित्तरुवुव्राशिवाडु'॥ शस्त्रमार्जोऽसिधावकः। शाणिकनामनी। 'सानपट्टिवाडु'॥ पादूकृच्चर्मकारः स्यात्। पादरक्षकारनामनी॥ व्योकारो लोहकारकः। [3]लोहकृन्नामनी। 'कमरि'। कर्मारश्चाप्ययस्कारः। एते द्वे च॥ ७॥

---

[1] चित्रकार: B_3. [2] B_3 omits. [3] लोहकार° B_3.

नाडिंधमः स्वर्णकारः कलादो रुक्मकारके।
स्याच्छाङ्खिकः काम्बविकः शौल्बिकस्ताम्रकुट्टकः॥ ८॥

(वि.) नाडिंधम इति—[1]नाडीं धमतीति नाडिंधमः। 'ध्मा [2]पूरणे'। स्वर्णं करोतीति स्वर्णकारः। [3]कलं स्वर्णादिकमाद्यतीति कलादः। 'दोऽवखण्डने'। रुक्मं करोतीति रुक्मकारकः। भूषणकारिणो नामानि॥ शङ्खस्य विकारः शाङ्खम्। तत्पण्य-

मस्येति शाङ्खिकः। कम्बोर्विकारः काम्बवम्। तत्पण्यमस्येति काम्बविकः। शङ्खध्मानशिल्पिनः शङ्खपण्याजीविनो वा नामनी॥ शुल्बं ताम्रं [4]तत्पण्यमस्येति शौल्बिकः। ताम्रं [5]कुट्टयतीति ताम्रकुट्टकः। 'कुट्ट छेदनभर्त्सनयोः'। ताम्रपण्याजीविनो नामनी॥ ८॥

---

[1] नाडिं अग्निसंदीपनार्थं K_5, Pt_2. [2] शब्दाग्निसंयोगयोः K_6, Pt_2. [3] कलां स्वर्णशिल्पमादत्ते Pt_2. [4] ताम्रनिर्माणं शिल्पमस्य F_2, Pt_2. [5] Pt_2 adds छेदयति.

(पा.) नाडिंधमः स्वर्णकारः—रुक्मकारकः। [1]सुवर्णकारनामानि॥ स्याच्छाङ्खिकः काम्बविकः। शङ्खकारनामनी। अनुक्तम्—मणिकारो वैकटिकः। रत्नकारनामनी॥ शौल्बिकस्ताम्रकुट्टकः। ताम्रपात्रकारनामनी। 'चेम्बुचेशे वाडु[2]'॥ ८॥

---

[1] कनककार° A_1. [2] B_3 omits.

तक्षा तु वर्धकिस्त्वष्टा रथकारश्च काष्ठतट्।
ग्रामाधीनो ग्रामतक्षः कौटतक्षोऽनधीनकः॥ ९॥

(वि.) तक्षेति—तक्ष्णोति काष्ठादिकमिति तक्षा[1]। नकारान्तोऽयम्। 'तक्षू तनूकरणे'। वर्धयति छिनत्ति[2] काष्ठादिकमिति वर्धकिः। 'वर्ध छेदने'। त्वक्ष्णोति तनूकरोति काष्ठानीति त्वष्टा। 'त्वक्षू तनूकरणे'। रथं करोतीति रथकारः[3]। काष्ठं [4]तक्ष्णोतीति काष्ठतट्। स्थपतिनामानि॥ ग्रामस्य तक्षा ग्रामतक्षः। ग्रामाधीनस्थपतिनाम॥ कुट्यां स्वगृहे वर्तमानः[5] कौटः। स चासौ तक्षा च कौटतक्षः। स्वगृह एवात्मकर्मोप[6]जीविस्थपतिनाम॥ ९॥

---

[1] त्वक्षा च K_5, K_6. [2] छेदयति Pt_2. [3] Pt_2 adds 'डुकृञ् करणे'. [4] तक्षति K_3. [5] भवः K_5. [6] जीवक° K_6.

(पा.) तक्षा। नान्तः। तु वर्धकिः—काष्ठतट्। वर्धकिनामानि। 'वड्लवाडु'। काष्ठतट् काष्ठतक्षौ काष्ठतक्षः। ग्रामाधीनो ग्रामतक्षः। [1]ग्रामाधीनो वर्धकिर्ग्रामतक्षः स्यात्। कौटतक्षोऽनधीनकः। स्वाधीनो वर्धकिः कौटतक्षः स्यात्। अनुक्तम्—स्यादश्मकुट्टकः कूटः। शिलाकुट्टकनामनी॥ तैलिकश्चाक्रिकः समौ। [2]तिलंतुदनामनी॥ ९॥

---

[1] ग्रामायत्तः A_1. [2] तिलघातक° A_1; °घातुक° B_3.

क्षुरी मुण्डी दिवाकीर्तिनापितान्तावसायिनः ।
निर्णेजकः स्याद् रजकः शौण्डिको मण्डहारकः ॥ १० ॥

(वि.) क्षुरीति—क्षुरशिल्पमस्यास्तीति क्षुरी । केशान् [1]मुण्डयति मुण्डी । ‘मुडि खण्डने’ । दिवैव[2] कीर्त्यते दिवाकीर्तिः । ‘कृत संशब्दने’ । श्रेष्ठकुले न पततीति नापितः । नाप्नोत्यस्पृश्यत्वादिति वा[3] । ग्रामस्यान्ते समीपे आवसत इति अन्तावसायी । [4]अन्तेऽवसातुं शीलमस्येति वा । ‘षोऽन्तकर्मणि’ । नापितनामानि ॥ निर्णेनेक्ति वस्त्रं [5]शोधयतीति निर्णेजकः । ‘णिजिर् शौचपोषणयोः’ । रञ्जयति वस्त्राणीति रजकः । ‘रञ्ज रागे’ । वस्त्रशोधकनामनी ॥ शुण्डा सुरा पण्यमस्यास्तीति शौण्डिकः । मण्डमच्छसुरां हरतीति मण्डहारकः । ‘हृञ् हरणे’ । सुरापण्यजीविनो नामनी ॥ १० ॥

[1] मुण्डति K_3. [2] F_2, Pt_2 add रात्रौ क्षुरकर्मनिषेधात् . [3] K_3, Pt_2 add ‘गम्लृ गतौ’ ‘आप्लृ व्याप्तौ’. [4] अन्तं K_6. [5] क्षालयति Pt_2.

(पा.) क्षुरी मुण्डी—अन्तावसायिनः । नापितनामानि ‘[1]मङ्गलि’ । चण्डिलः क्षुरमर्दी च । एते द्वे च ॥ निर्णेजकः स्याद्रजकः । वस्त्रधावकनामनी । शौण्डिको मण्डहारकः । सुरापण्यजीविनामनी । सुराजीवी सौरिकश्च । एते द्वे च । ‘[2]कल्पपालस्तु शौण्डिकः’ इति हलायुधः (अ. मा. २. ४३८) ॥ १० ॥

[1] B_3 omits. [2] कल्यपालः A_1.

जाबालः स्यादजाजीवो देवाजीवस्तु देवलः ।
स्यान्माया शाम्बरी मायाकारस्तु प्रातिहारिकः ॥ ११ ॥

(वि.) जाबाल इति—जबमलतीति जबालो छागः, तस्यायं जाबालः । अजाः पालयतीति वा । अजा एव आजीवो जीवनमस्येति अजाजीवः[1] । अजापालनामनी ॥ देवः आजीवोऽस्य देवाजीवः । देवान् अलति पूजयतीति देवलः । देवान् पूजार्थं लातीति वा । ‘ला आदाने’ । देवपूजाजीविनो नामनी ॥ मीनातीति माया[2] । ‘मीञ् हिंसायाम्’ । मयस्येयं वा । शम्बरासुरस्येयं माया शाम्बरी । कुहकस्य[3] नामनी ॥ मायां करोतीति मायाकारः । प्रतिहरति संहरति सर्वेषां दृङ्मनसी इति प्रतिहारः माया । स अस्यास्तीति प्रातिहारिकः[4] । इन्द्रजालिकनामनी ॥ ११ ॥

[1] अजैराजीवितुं शीलमस्य अजाजीवी K_6. [2] मात्यस्यां विश्वमिति Pt_2. [3] कुहककर्मणः K_3. [4] प्रतिहरति नयने Pt_2.

(पा.) जाबालः स्यादजाजीवः। [1]अजाजीविनो नामनी। 'कुरुब'॥ देवाजीवस्तु देवलः। 'तम्मलवांडु'। [2]शूद्रस्य ब्राह्मणस्य वा देवार्चनजीविनो नामनी। तथा च स्मृतिः—

'देवार्चनपरो विप्रः शूद्रो वा वत्सरत्रयम्।
जीवेद् देवलको नाम ह्यर्चकश्चैषु गण्यते॥'

इति॥ स्यान्माया शाम्बरी। इन्द्रजालनामनी॥ मायाकारस्तु प्रातिहारिकः[3]। [4]इन्द्रजालविद्याविशारदनामनी॥ ११॥

---

[1] कम्बलनायकनाम A_1. [2] देवतार्चकनाम A_1. [3] प्रतिहारकः A_1. [4] माया° B_3.

शैलालिनस्तु शैलूषा जायाजीवाः कृशाश्विनः।
भरता इत्यपि नटाश्चारणास्तु कुशीलवाः॥ १२॥

(वि.) शैलेति—शिलालिना कृशाश्वेन प्रोक्तं [1]सूत्रमधीयत इति शैलालिनः, कृशाश्विनश्च। 'इङ् अध्ययने'। शिलूषस्यापत्यानि शैलूषाः। जायया जीवन्तीति जायाजीवाः[2]। भरतस्य मुनेरपत्यानि शिष्या वा भरताः। नटन्तीति नटाः। 'नट नृत्तौ'। नटनामानि॥ दिक्षु कीर्तिं चारयन्तीति चारणाः। 'चर गतौ'। कुत्सितं शीलं कुशीलम्। तदेषामस्तीति कुशीलवाः[3]। बन्दिविशेषनामनी॥ १२॥

---

[1] नटसूत्रं K_3, Pt_2. [2] F_2, Pt_2 add 'जीव प्राणधारणे'. [3] कुत्सितं शीलं वान्तीति वा, 'वा गत्यादौ' K_3.

(पा.) शैलालिनस्तु शैलूषा—नटाः। बहुरूपधरनामानि[1]। भरता इत्यत्र उत्सादित्वादञ् (४. १. ८६)। भारतः, भारतौ। 'यञञोश्च' (२. ४. ६४) इति बहुत्वे लुकि भरताः। चारणास्तु कुशीलवाः। [2]नानादेशसंचारिनटगायकनामनी। 'पेरडिवांडु[3]'। अनुक्तम्—'ये यष्ट्यादिषु नृत्यन्ति केलकाः प्लवकाश्च ते'। यष्टिक्रीडकनामनी॥ 'कोलाटलवांडु'॥ १२॥

---

[1] धारक° A_1. [2] A_1 omits. [3] B_3 omits.

मार्दङ्गिका मौरजिकाः पाणिवादास्तु पाणिघाः ।
वेणुध्माः स्युर्वैणविका वीणावादास्तु वैणिकाः ॥ १३ ॥

(वि.) मार्दङ्गिका इति—मृदङ्गवादेन[1] जीवन्तीति मार्दङ्गिकाः । मुरजवादनं शिल्पमेषामिति मौरजिकाः । मृदङ्गवाद्यजीविनां नामनी ॥ पाणी वादयन्तीति पाणिवादाः । 'वद व्यक्तायां वाचि' । [2]पाणी घ्नन्तीति पाणिघाः । 'हन हिंसागत्योः' । पाणिभ्यां ये वादमुत्पादयन्ति तेषां नामनी ॥ वेणुं धमन्ति पूरयन्तीति वेणुध्माः । 'ध्मा [3]शब्दाग्निसंयोगयोः' । वेणोरिदं[4] ध्मानं वैणवम् । [5]तच्छीलमेषामस्तीति वैणविकाः । वांशिकनामनी ॥ वीणावादनमेषामस्तीति वीणावादाः[6] । वीणा शिल्पमेषामिति वैणिकाः । वीणाजीविनां नामनी ॥ १३ ॥

[1] वादनं शिल्पमेषां K_3, Pt_2.
[2] पाणिना K_5, K_6.
[3] पूरणे K_3.
[4] वेणोर्विकारः Pt_2.
[5] तच्छिल्पं K_3, Pt_2.
[6] वीणां वादयन्ति K_5, K_6.

(पा.) मार्दङ्गिका मौरजिकाः । [1]मर्दलवादकनामनी ॥ पाणिवादास्तु पाणिघाः । करतलवादकनामनी ॥ वेणुध्माः स्युर्वैणविकाः । वेणुवादकनामनी । 'पिल्लकोविवूदवांड्डु' ॥ 'वैणुको वांशिकस्तथा' । एते द्वे च ॥ वीणावादास्तु वैणिकाः वीणावादकनामनी । 'वीणेलवारु' ॥ १३ ॥

[1] मृदङ्ग° B_3.
[2] B_3 omits.

जीवान्तकः शाकुनिको द्वौ वागुरिकजालिकौ ।
वैतंसिकः कौटिकश्च मांसिकश्च समं त्रयम् ॥ १४ ॥

(वि.) जीवान्तक इति—जीवानां पक्षिणामन्तं नाशं करोतीति [1]जीवान्तकः । [2]शकुनान् पक्षिणो हन्तीति शाकुनिकः । जीवान्तकस्य नामनी ॥ वागुरया मृगबन्धिन्या चरतीति वागुरिकः । जालेन चरतीति जालिकः । येऽरण्यादौ मृगबन्धनाय जालेन चरन्ति तेषां नामनी ॥ मृगपक्ष्यादेर्बन्धनोपायो वितंसः । तेन चरतीति वैतंसिकः[3] । कूटेन[4] सामिषबन्धेन चरतीति कौटिकः । मांसं पण्यमस्य मांसिकः । मांसविक्रयजीविनो नामानि ॥ १४ ॥

[1] जीवानामन्तकः F_2, Pt_2.
[2] शकुनीन् K_6; शकुनिं K_3.
[3] सामिषं मृगबन्धोपकरणं, तेन चरति K_5, K_6.
[4] मृगपक्ष्यादिबन्धनयन्त्रं Pt_2.

(पा.) जीवान्तकः शाकुनिकः । पक्ष्याखेटकनामनी । 'गुव्वर्पेटिकांड्ड' । द्वौ वागुरिकजालिकौ । मृगाखेटकनामनी । 'मेकमरुद्वेंकांड्ड'॥ वैतंसिकः कौटिकश्च—समं त्रयम् । कौटिकनामानि । 'कटिकारवांड्ड'॥

'विज्ञातव्यौ पक्षिमृगप्रभृतेर्वर्धनाधने ।
शब्दौ वितंसवीतंसौ कूटोऽस्त्री तत्र सामिषः ॥'

इति माधवः । शेषकारश्च—

'मृगपक्ष्यादिकं हत्वा मांसविक्रयजीविनि ।
किरातशबरम्लेच्छप्रभृतौ कौटिकादिकम् ॥'

इति ॥ १४ ॥

भृतको भृतिभुक् कर्मकरो वैतनिकोऽपि सः ।
वार्तावहो वैवधिको भारवाहस्तु भारिकः ॥ १५ ॥

(वि.) भृतक इति—भ्रियत इति भृतकः । 'डुभृञ्[1] धारणपोषणयोः' । भृतिं वेतनं भुङ्क्ते भृतिभुक् । 'भुज पालनाभ्यवहारयोः' । नियुक्तं कर्म करोतीति कर्मकरः[2] । वेतनेन जीवतीति वैतनिकः । नियुक्तकर्मकारिणो नामानि ॥ [3]धान्यादिवार्तां वहतीति वार्तावहः । 'वह प्रापणे' । विवधः पर्याहारः सः पण्यं तेन वा जीवतीति वैवधिकः[4] । पर्याहारवतो नामनी ॥ भारं वहतीति भारवाहः । भारिकश्च । भारवाहकनामनी ॥ १५ ॥

[1] 'भृञ् भरणे' K_6.

[2] F_2, Pt_2 add 'डुकृञ् करणे'.

[3] F_2, Pt_2 add वार्तावाणिज्यादिजीविका, तादर्थ्यात् धान्यादिरपि.

[4] विवधेन हरतीति F_2, Pt_2.

(पा.) भृतको भृतिभुक्—वैतनिकश्च सः । भृत्युपजीविनामानि । 'कूलिकांड्ड'। 'भरटः स्याद्वैतनिकः'। एते द्वे च ॥ वार्तावहो वैवधिकः । वार्तावाहकनामनी । 'परिकतवांड्ड'॥ भारवाहस्तु भारिकः । भारवहनसमर्थकनामनी । 'बाडीरडिङ्गरप्रेङ्खपाल्लूकपरिकर्मिणः'। एतानि च ॥ १५ ॥

विवर्णः पामरो नीचः प्राकृतश्च पृथग्जनः ।
निहीनोऽपशदो जाल्मः क्षुल्लकश्चेतरश्च सः ॥ १६ ॥

(वि.) विवर्ण इति—विरुद्धो [1]वर्णोऽस्येति विवर्णः। पामानं शोफं रातीति[2] पामरः। 'रा आदाने'। [3]निकृष्टं चिनोतीति नीचः। 'चिञ् चयने'। प्रकृतौ भवो वर्तमानः प्राकृतः। जनेभ्यः पृथक् इतरः जनः पृथग्जनः। नियतं हिनोतीति निहीनः। नितरां हीयते जनैरिति वा। 'हि गतौ वृद्धौ च', 'ओहाक् त्यागे'। अपशीयते हीनो भवतीति अपशदः। 'शिञ् निशातने'। अपसद इति वा पाठः। जलति जडो [4]भवतीति जाल्मः। 'जल [5]घातने'। तुच्छत्वात् क्षुधं लातीति क्षुल्लकः। 'ला आदाने'। इतं तुच्छगमनं[6] रातीति इतरः। 'रा आदाने'। नीचजननामानि ॥ १६ ॥

[1] जातिर्यशो वा F_2, Pt_2. [2] K_5 adds स्वीकरोति. [3] निकर्षमञ्चति, 'अञ्चु गतौ याचने च' Pt_2. [4] जडीभवति K_5. [5] 'जल शून्ये' K_5, K_6, Pt_2. [6] क्षुद्रवृत्ति Pt_2.

(पा.) विवर्णः पामरो—क्षुल्लकश्चेतरश्च सः। विवर्णादयो दश पामरवाचकाः। 'नीचिड्' ॥ १६ ॥

भृत्ये दासेयदासेरदासगोप्यकचेटकाः।
नियोज्यकिंकरप्रैष्यभुजिष्यपरिचारकाः ॥ १७ ॥

(वि.) भृत्य इति—भ्रियत इति भृत्यः। भरणीयो वा। '[1]भृञ् भरणे'। दास्या अपत्यं दासेयः, दासेरश्च। दस्यति बहुतरकर्मणि उपक्षीयत इति दासः[2]। 'दसु उपक्षये'। दीयत इति वा। 'दीङ् क्षये'। गोपनीयो रक्षणीयः गोप्यकः। 'गुपू रक्षणे'। [3]चेटति परप्रेष्यं करोतीति चेटः। 'चिट परप्रेष्ये'। नियुज्यते कर्मसु नियोज्यः। 'युजिर् योगे'। किं करोमीति आज्ञां प्रतीक्षत इति किंकरः। 'डुकृञ् करणे'। प्रेषणीयः प्रैष्यः। 'इष गतौ'। प्रेष्य इति वा पाठः। वेतनं भुङ्क्ते भुजिष्यः। 'भुज पालनाभ्यवहारयोः'। परिचरति स्वामिनमिति परिचारकः। 'चर गतिभक्षणयोः'। भृत्यनामानि ॥ १७ ॥

[1] 'डुभृञ् धारणपोषणयोः' F_2, Pt_2. [2] दंसयति स्वामिकार्याणि सावधानेनेति, 'दसि दंशदर्शनयोः' Pt_2. [3] चिट्यते F_2, Pt_2.

(पा.) भृत्ये दासेयदासेर—भुजिष्यपरिचारकाः। भृत्यनामानि। [1]स्त्रियां तु दासी चेटी प्रेष्या परिचारिका। टाबपि किंकरा। किंकरीति प्रेष्यार्थे विधिः[2] ॥ १७ ॥

[1] A_1 adds एते एव स्त्रीलिङ्गाश्चेत् किंकरीनामानि. [2] पुंयोगे ङीष् इति सि. कौ. (पृ. ४७०. ३. २. २१).

पराचितपरिस्कन्दपरजातपरैधिताः ।
मन्दस्तुन्दपरिमृज आलस्यः शीतकोऽलसोऽनुष्णः ॥ १८॥

(वि.) पराचित इति—परैराचीयते[1] पोष्यत इति पराचितः। 'चिञ् चयने'। परैः स्कन्द्यते शोष्यते परस्कन्दः। 'स्कन्दिर् गतिशोषणयोः'। [2]परिस्कन्द इति वा पाठः। [3]परस्मात् जात इव पुष्टः परजातः। परैरेधितो वर्धितः परैधितः। 'एध वृद्धौ'। परपोषितनामानि ॥ आलस्येन मन्दते स्वपितीति मन्दः। 'मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु'। पुनः पुनः तुन्दं परिमार्ष्टीति तुन्दपरिमृजः। 'मृजष् शुद्धौ'। न लसति जाड्यादित्यलसः। अलस एव आलस्यः। 'लस श्लेषणक्रीडनयोः'। शीत इव जडत्वात् शीतकः[4]। न विद्यते [5]उष्णमस्य जडत्वात् अनुष्णः। अलसनामानि ॥ १८ ॥

[1] आचितः F_2, Pt_2. [2] परितः स्कन्दतीति K_3, Pt_2. [3] परैः K_5, K_6.
[4] शीतं मन्दं करोतीति F_2, Pt_2. [5] Pt_2 adds तेजः.

(पा.) पराचितपरिस्कन्द—परैधिताः। परपुष्टवत् परैः संवर्धितनामानि। 'परपुट्टु[1]'। अनुक्तम्—'बन्धके स्थित आयत्तः'। बन्धकार्थं स्थितनाम। 'कुट्टुवट्टगवाड्डु'। 'भक्तायावस्थितः कृतः'। अन्नस्य हेतोर्वसति यः स कृतः स्यात्। 'कूटिकवुन्नवाड्डु'॥ मन्दस्तुन्दपरिमृजः—अलसोऽनुष्णः। [2]अलसनामानि। 'सोमरिपोतु'॥ १८ ॥

[1] B_3 omits. [2] A_1 adds प्रयोजने आसन्ने सति देहवञ्चकपुरुषनामानि.

दक्षे तु चतुरपेशलपटवः सूत्थान उष्णश्च ।
चण्डालप्लवमातङ्गदिवाकीर्तिजनंगमाः ॥ १९ ॥
निषादश्वपचावन्तेवासिचाण्डालपुल्कसाः ।

(वि.) दक्ष इति—दक्षते कार्यं शीघ्रं करोतीति दक्षः। 'दक्ष वृद्धौ शीघ्रार्थे च'। चतते [1]कार्यमिति चतुरः। 'चते याचने'। पिंशति [2]कार्यार्थं यत्र तत्र वा गच्छतीति पेशलः। 'पिश [3]गतौ'। पाटयति प्रयोजनानीति पटुः। 'पट गतौ'। सुष्ठु उत्थानमुद्योगो यस्य सूत्थानः। ओषत्यकार्यमिति उष्णः। 'उष दाहे'। चतुरनामानि ॥ चण्डते कुप्यतीति चण्डालः। 'चडि कोपे'। प्लवते उग्रकर्मण[4] इति प्लवः। 'प्लुङ् गतौ'। मा तङ्गति न [5]गच्छति ग्राममध्यमिति मातङ्गः। 'तगि गतौ'। दिवैव कीर्त्यते दिवाकीर्तिः[6]। 'कॄत संशब्दने'। सामर्थ्यात् जनं गच्छतीति जनंगमः।

निषीदति पापमस्मिन्निति निषादः। 'षद्लृ विशरणगत्यवसादनेषु'। श्वानं पचतीति श्वपचः। 'डुपचष् पाके'। ग्रामान्ते वसतीति अन्तेवासी। 'वस निवासे'। चण्डाल एव चाण्डालः। पुलन्तीति पुलाः महान्तः। 'पुल महत्त्वे'। तान् स्पर्शनेन कसति क्लेशयतीति [7]पुल्कसः। 'कस गतिशातनयोः'। चण्डालनामानि ॥ १९ ॥

[1] काङ्क्षते प्रयोजनमिति F_2, Pt_2. [2] अवयवो भवति कार्येषु F_2, Pt_2. [3] 'पिश अवयवे' Pt_2. [4] कर्मणि K_3; कर्मणे K_6. [5] प्रविशति K_5, K_6. [6] दिवसस्य पुण्यकालत्वात् दिवा अकीर्तनमस्य Pt_2. [7] पुत् कुत्सितं कसतीति पुक्कसः K_3.

(पा.) दक्षे तु चतुर—सूत्थान उष्णश्च। [1]चतुरनामानि। 'पनिकि देहमु [2]वाड्डिटिवाडु'॥ चण्डालप्लवमातङ्ग—चाण्डालपुल्कसाः। [पुत्] पुण्यं कशतीति व्युत्पत्त्या पुल्कशस्तालव्यान्तः। दन्त्यान्त इति [3]टीकासर्वस्वकारः (पृ. २६४)। चण्डालनामानि। 'माल'॥ १९ ॥

[1] प्रयोजनाय देहसर्पकनामानि A_1. [2] B_3 omits. [3] 'बुत् कुत्सितं कसति बुत्कसः। बुक्कस इत्येके। अवान्तरभेदोऽत्र नादृतः' इति मुद्रितटीकासर्वस्वे.

भेदाः किरातशबरपुलिन्दा म्लेच्छजातयः ॥ २० ॥
व्याधो मृगवधाजीवो मृगयुर्लुब्धकोऽपि सः।

(वि.) भेदा इति—किरातशबरपुलिन्दा म्लेच्छजातयो निषादभेदा भवन्ति। [1]म्लेच्छतीति म्लेच्छः। 'म्लेच्छ अव्यक्ते [2]शब्दे'। कीति शब्दं रातीति किरातः। 'रा दाने'। शवति गच्छति वनमिति शबरः। 'शव गतौ'। पुलिन्ददेशे भवः पुलिन्दः[3]। विध्यति मृगानिति व्याधः। 'व्यध ताडने'। मृगवधेन आजीवतीति मृगवधाजीवः। 'जीव प्राणधारणे'। मृगान् [4]हन्तुं यातीति मृगयुः[5]। मृगान् मृगयते वा। 'मृग अन्वेषणे'। मृगेषु लुभ्यति गृध्यतीति लुब्धकः। 'लुभ गार्ध्ये'। व्याधनामानि ॥ २० ॥

[1] F_2, Pt_2 अव्यक्तं भाषते. [2] अव्यक्तायां वाचि K_5, K_6. [3] पोलति, 'पुल महत्त्वे' F_2, Pt_2. [4] वधार्थं K_3. [5] K_6 adds 'या प्रापणे'.

(पा.) भेदाः किरात—म्लेच्छजातयः। बहुवचनग्रहणमुपलक्षणार्थम्। [1]किरातशबरपुलिन्दनिष्ट्यावाहलभिल्लमालप्रभृतिम्लेच्छजातयश्चण्डालभेदा एव। व्याधो मृगवधाजीवो—लुब्धकश्च सः। व्याधनामानि। '[2]बोयवांडु'॥ २० ॥

[1] B_3 adds महारण्यवासिनः. [2] B_3 omits.

कौलेयकः सारमेयः कुक्कुरो मृगदंशकः ॥ २१ ॥
शुनको भषकः श्वा स्यादलर्कस्तु स योगितः ।
श्वा विश्वकद्रुर्मृगयाकुशलः सरमा शुनी ॥ २२ ॥

(वि). कौलेयक इति—कुले गृहे भवः कौलेयकः । सरमा शुनी तस्या अपत्यं सारमेयः । कोकतेऽस्थ्यादिकमादत्त इति कुक्कुरः । 'कुक[1] आदाने' । मृगान् दशतीति मृगदंशकः । 'दंश दशने' । इतस्ततः शुनति गच्छतीति शुनकः । 'शुन गतौ' । भषतीति[2] भषकः । 'भष [3]भर्त्सने' । भर्त्सनं श्वरवः । श्वयति इतस्ततो गच्छतीति श्वा । 'टुओश्वि गतिवृद्ध्योः' । शुनकनामानि ॥ अलति[4] वीथ्यां जनान् निवारयतीति अलर्कः । 'अल [5]पर्याप्तिभूषणवारणेषु' । विषादियोगतः उन्मत्तभूतशुनकनाम ॥ विश्वं[6] जनं कन्दयति रोदयतीति विश्वकद्रुः । 'कदि आह्वाने रोदने च' । मृगयाचतुरस्य शुनकस्य नाम ॥ सरति श्वानं प्रति सरमा । 'सृ गतौ' । श्वजातिस्त्री[7] शुनी । शुनकस्त्रीनामनी ॥ २१–२ ॥

[1] F$_2$, Pt$_2$ add वृक. [2] K$_5$ adds वाश्यते; वाशते K$_6$. [3] शब्दे K$_6$. [4] अल्यते वार्यते दंशभयात् F$_2$, Pt$_2$. [5] 'अल निवारणे' K$_5$, K$_6$. [6] विश्वान् मृगान् K$_3$, K$_5$. [7] शुनः स्त्री F$_2$, Pt$_2$.

(पा.) कौलेयकः सारमेयः—भषकः श्वा स्यात् । शुनकनामानि । श्वानो गृहमृगो यक्षः कृतज्ञो रात्रिजागरः । एतानि पञ्च च ॥ अलर्कस्तु स योगतः । योग औषधम् । तद्भक्षणादुन्मत्तः[1] श्वा अलर्कः स्यात् ।

'प्रभूयमानामभिनायकेन्दुं तारावलिं वीक्ष्य नवामुदीताम् ।
हृष्यत्सु सर्वेष्वसहिष्णुरुच्चैरुच्चावचं बुक्कति कोऽप्यलर्कः ॥'

इति नागभूपालीये ॥ श्वा विश्वकद्रुर्मृगयाकुशलः । आखेटपटुः श्वानः[2] विश्वकद्रुः स्यात् । 'वेंटकुक्क' ॥ सरमा शुनी । शुनकस्त्रीनामनी[3] ॥ २१–२ ॥

[1] उन्मत्तशुनकनाम A$_1$. [2] श्वालः B$_3$. [3] °भार्या° A$_1$.

विट्चरः सूकरो ग्राम्यो वर्करस्तरुणः पशुः ।
आच्छोदनं मृगव्यं स्यादाखेटो मृगया स्त्रियाम् ॥ २३ ॥

(वि.) विट्चर इति—विट् विष्ठा[1] तां चरति भक्षयतीति विट्चरः। 'चर गतिभक्षणयोः'। ग्राम्यवराहनाम॥ वर्कते आदत्ते तृणमिति वर्करः। 'वृक आदाने'। युवपशुनाम॥ [2]आ समन्तात् चोद्यन्ते मृगा अत्रेति आच्छोदनम्[3]। 'चुद प्रेरणे'। [4]मृगान् व्ययन्त्यत्रेति मृगव्यम्। 'व्येञ् संवरणे'। आखेट्यन्ते त्रास्यन्ते मृगा अत्रेति आखेटः। 'खिट त्रासे'। मृग्यन्ते मृगा अत्रेति मृगया[5]। 'मृग अन्वेषणे'। मृगयानामानि॥ २३॥

---

[1] विषं विष्ठां F_2, Pt_2. [2] आच्छोदयन्ति K_5, K_6. [3] संचोदने K_6.
[4] मृगा विध्यन्तेऽस्मिन्, 'व्यध ताडने' F_2, Pt_2. [5] मृगाणामन्वेषणं K_3, Pt_2.

(पा.) विट्चरः सूकरो ग्राम्यः। ग्रामसूकरनामानि। वर्करस्तरुणः पशुः। बाला पशुजातिर्बर्करः स्यात्॥ आच्छोदनं मृगव्यं—मृगया स्त्रियाम्। आखेटनामानि। 'वेंटपेरु'॥ पापर्द्धिश्च पराधिश्च। एते द्वे च। 'विराजपापर्द्धिविवादशीले'। इत्युदारराघवम्॥ २३॥

दक्षिणारुर्लुब्धयोगाद् दक्षिणेर्मा कुरङ्गकः।
चोरैकागरिकस्तेनदस्युतस्करमोषकाः॥ २४॥
प्रतिरोधिपरास्कन्दिपाटच्चरमलिम्लुचाः।

(वि.) दक्षिणेति—[1]दक्षिणे दक्षिणभागे ईर्मं व्रणोऽस्तीति दक्षिणेर्मा। नान्तः। दक्षिणभागे व्याधेन कृतव्रणस्य हरिणस्य नाम॥ चोरयतीति चोरः[2]। 'चुर स्तेये'। एकमसंबाधं गृहं प्रयोजनमस्येति [3]ऐकागरिकः। स्तेनयतीति स्तेनः। 'स्तेन चौर्ये'। दस्यति कदाचित् [4]उपक्षिणोतीति दस्युः। 'दसु उपक्षये'। तत्[5] चोरकर्म करोतीति तस्करः। 'डुकृञ् करणे'। मुष्णातीति मोषकः। 'मुष स्तेये'। परान् प्रतिरुणद्धि प्रतिरोधी। 'रुधिर् आवरणे'। परान् आस्कन्दयति शोषयतीति परास्कन्दी। 'स्कन्दिर् गतिशोषणयोः'। परान् पाटयन् विदलयन् चरतीति पाटच्चरः। 'चर गतौ'। पटच्चरं जीर्णवस्त्रमपि गृह्णातीति वा। मलिनमपि म्लोचयतीति मलिम्लुचः[6]। 'म्लुच स्तेये'। चोरनामानि॥ २४॥

---

[1] K_3 adds दक्षिणेऽरुः व्रणमस्य. [2] F_2, Pt_2 add चौर इति वा पाठः। तदा चुरा चौर्यं शीलमस्य. [3] एकस्मिन् असहाये अगारे भवः K_5, K_6. [4] उपक्षीयते K_6.
[5] तत्तत् K_5. [6] मलिनं यथा तथा म्लोचति गच्छति, 'म्लुच गत्यर्थे' Pt_2.

(पा.) दक्षिणारुर्लुब्धयोगात्—कुरङ्गकः। दक्षिणभागे व्याधेन कृतव्रणो मृगो दक्षिणेर्मा स्यात्। दक्षिणेर्माणं पश्य॥ अनुक्तम्—'यूथभ्रष्टः पक्षचरः'। स्वकीययूथं परित्यज्य संचरदेकाकी मृगः पक्षचरः स्यात्। 'कदुप्पलोनुंडतप्पिपोय्नि मृगमु'॥ चोरैकागरिकस्तेन—पाटच्चरमलिम्लुचाः। अत्र प्रतिरोधिपरास्कन्दिशब्दौ द्वौ नान्तौ। चोरनामानि॥ 'वणिग्भ्यः परि न सन्ति पश्यतोहराः' इति पश्यतोहरः। पश्यतां धनापहारी चोरः। 'कनुपापदोचे दोंग'।

'स खल्वर्द्धिपरिपन्थी यः परस्य दौस्थित्यम्।
जानन्नप्यभिलषत्यर्थम्॥'

इति परिपन्थी मार्गप्रहारी चोरः। 'त्रोवगोट्टेदोंग'॥ २४॥

चौरिका स्तैन्यचौर्ये च स्तेयं लोप्त्रं तु तद्धनम्॥ २५॥
वीतंसस्तूपकरणं बन्धने मृगपक्षिणाम्।
उन्माथः कूटयन्त्रं स्याद्वागुरा मृगबन्धनी॥ २६॥

(वि.) चौरिकेति—चोरस्य [1]कर्म चौरिका। चौर्यं च। स्तेनस्य [1]कर्म स्तैन्यं। स्तेयं च। चौरिकानामानि॥ लुप्यत इति लोप्त्रम्[2]। 'लुप्लृ छेदने'। [3]चोरितधनस्य नाम॥ वितंसयति व्याधानिति वितंसः। 'तसि [4]भूषायाम्'। मृगपक्षिबन्धनसाधनस्य नाम॥ ऊर्ध्वमाक्रम्य मथतीति उन्माथः। 'मथे विलोडने[5]'। कूटेन कपटेन [6]कृतं यन्त्रं कूटयन्त्रम्। 'यम उपरमे'। मृगपक्षिबन्धनाय दारुकृतसाधनस्य नामनी॥ मृगबन्धनेऽवागुरत इति वागुरा। 'गुरी उद्यमने'। मृगा अनया बध्यन्त इति मृगबन्धनी। 'बन्ध बन्धने'। जालविशेषनामनी॥ २५–६॥

---

[1] भावः K_5, K_6.　[2] लुप्यते विमुह्यतेऽनेन, 'लुभ विमोहने' K_5, K_6.　[3] चोरधनस्य K_6.　[4] अलंकारे K_6.　[5] हिंसायाम् K_3, K_6.　[6] यम्यते बध्यतेऽनेन K_6.

(पा.) चौरिका—स्थेयम्। चौर्यनामानि। 'दोंगुलट[1]'। चौरशब्दव्युत्पत्तिद्वारा चुराशब्दसिद्धिः। सुभूतिटीकायामपि तथैव व्युत्पादितं चुरा शीलमस्येति। 'छत्रादिभ्यो णः' (४. ४. ६२)। चौरः। लोप्त्रं तु तद्धनम्। चोरापहृतं धनं लोप्त्रं स्यात्। 'दोंगिविन सोम्मु'। वीतंसस्तूपकरणं—मृगपक्षिणाम्। [2]मृगपक्षिणां बन्धनोपकरणं वितंसः स्यात्। वीतंस इति दीर्घीभूतोपसर्गश्च॥ उन्माथः कूटयन्त्रं स्यात्। [3]कूटेन कपटेन कल्पितं यन्त्रमुन्माथः स्यात्। 'बोनु'॥ वागुरा मृगबन्धनी। मृगजालिका वागुरा

स्यात्। वागुरा मृगजालिका' इति हलायुधः (अ. मा. २. ४४२)। मृगजालनामनी। 'बल'॥ २६॥

---

[1] B$_3$ omits. [2] A$_1$ adds कण्ठपाशपादरज्जुप्रमुख°. [3] व्याघ्रादिग्रहणार्थं कृतफलकगृहनामनी A$_1$.

शुल्बं वटारकः स्त्री तु रज्जुस्त्रिषु वटी गुणः।
उद्घाटनं घटीयन्त्रं सलिलोद्वाहनं प्रहेः॥ २७॥

(वि.) शुल्बमिति—शुल्व्यते इति [1]शुल्बम्। 'शुल्ब माने'। वट्यते वेष्ट्यत इति वटारकः[2]। 'वट वेष्टने'। वराटक इति वा पाठः। सृज्यत इति रज्जुः। 'सृज विसर्गे'। वटति वेष्टयतीति वटी। 'वट वेष्टने'। वटशब्दः त्रिषु लिङ्गेषु वर्तते, वटः वटी वटमिति। गुण्यतेऽभ्यस्यते बन्धनायेति गुणः। 'गुण अभ्यासे'। रज्जुनामानि॥ उद्घाट्यन्ते प्रकाश्यन्ते आपोऽनेनेति उद्घाटनम्। 'घट चेष्टायाम्'। घटीभिः कृतं यन्त्रं घटीयन्त्रम्। प्रहेः कूपात्। सलिलम् उद्वाह्यतेऽनेनेति सलिलोद्वाहनम्। कूपात् सलिलोद्वहनस्य घटीयन्त्रस्य नामनी॥ २७॥

---

[1] शुम्भते शोभत इति शुम्भम्। 'शुभ शुम्भ शोभार्थे' K$_3$, K$_6$. [2] वटं वेष्टनं करोतीति वटकरः K$_3$, K$_6$.

(पा.) शुल्बं वराटकः—वटी गुणः। 'शुल्बं स्याद् रज्जुताम्रयोः' इति रुद्रः। रज्जुनामानि। 'त्राड्डु[1]'। अनुक्तम्—'पक्षिणो येन गृह्यन्ते पक्षिणैव स दीपकः'। [2]पक्षिग्राहकमृगयापक्षी दीपकः स्यात्। 'वेंटपिट्ट'। कूटगर्तस्तूपशयः। जालं वितत्य तत्समीपे देहगोपनार्थं [3]निखातगर्तनाम॥ 'माधुर्यं व्याधगीतिका'। पक्ष्याद्यागमनार्थं कृतव्याधगीतनाम। 'ईलवट्टुट'॥ उद्घाटनं घटीयन्त्रं—प्रहेः। [4]कूपस्थितोदकस्य बहिर्गमनाय कृतयन्त्रविशेषः उद्घाटनं घटीयन्त्रं च स्यात्। 'यान्तामु'॥ २७॥

---

[1] B$_3$ omits. [2] पक्षग्राहक° A$_1$. [3] स्वल्पगर्त° A$_1$. [4] कूपादुदकस्य B$_3$.

पुंसि वेमा वायदण्डः सूत्राणि नरि तन्तवः।
वाणिर्व्यूतिः स्त्रियौ तुल्ये पुस्तं लेप्यादिकर्मणि॥ २८॥

(वि.) पुंसीति—वयन्त्यनेनेति वेमा। नान्तः। 'वेञ् तन्तुसंताने'। वयनं वायः। वायस्य दण्डो वायदण्डः। वस्त्रवयनदण्डनामनी॥ सूयन्ते वस्त्राण्येभिरिति

सूत्राणि। सीव्यन्ते एभिरिति वा। 'षिवु तन्तुसंताने'। तन्यते वस्त्रमनेनेति[1] तन्तुः। 'तनु विस्तारे'। नरीति पुंसि वर्तते तन्तुशब्द इत्यर्थः। तन्तुनाम॥ [2]वणतीति वाणिः। 'वण शब्दे'। व्यूयते व्यूतिः। 'वेञ् तन्तुसंताने'। वयननामनी॥ [3]पुस्त्यते आद्रियत इति पुस्तम्। 'पुस्त आदरानादरयोः'। लेप्यादिकर्मनाम॥ २८॥

---

[1] एभिरिति तन्तवः F_2, Pt_2.　[2] वयनं वाणिः व्यूतिश्च, 'वेञ् तन्तुसंताने' F_2, Pt_2.
[3] पुंस्यते मृद्यतेऽनेन, 'पुंस अभिवर्धने' K_5, K_6.

(पा.) पुंसि वेमा वायदण्डः। शाटिकाघातफलकनामनी। 'तांकुडुफलक'॥ सूत्राणि नरि तन्तवः। सूत्रनामनी। 'नूलु'॥ वाणिर्व्यूतिः स्त्रियौ तुल्ये। [1]वयननामनी। 'नेतपेरु'। तुरी (स्यान्न तुली?) स्यान्नरि तन्तूनामन्तरालप्रसारिणी। [2]'कंटिक्रोवितुलि'। 'नाडे'॥ पुस्तं लेप्यादिकर्मणि। लेप्यादिकर्म पुस्तं स्यात्[3]।

'मृद्दारुचर्मवस्त्राद्यैः कृतं वर्णैर्विचित्रितम्।
सुवर्णरजताद्यैर्वा रचितं पुस्तमुच्यते॥'

इति ग्रन्थलेखनयोग्ये वर्णकलिप्ते पटखण्डादिसंचये लेख्यत्वेनोपकारात्। तालपत्रादिसंचये च पुस्तकशब्दप्रयोगः॥ अनुक्तम्—'या तु लेप्यमयी नारी सा स्यादञ्जलिकारिका'। लेप्यस्वरूपा नारी अञ्जलिकारिका स्यात्॥ २८॥

---

[1] व्यूति° A_1.　[2] B_3 omits.　[3] A_1 adds 'मणिगासनं मुदलैनदि'.

पाञ्चालिका पुत्रिका स्याद् वस्त्रदन्तादिभिः कृता।
पिटकः पेटकः पेटा मञ्जूषाथ विहंगिका॥ २९॥
भारयष्टिस्तदालम्बि शिक्यं काचोऽथ पादुका।
पादूरुपानत् स्त्री सैवानुपदीना पदायता॥ ३०॥

(वि.) पाञ्चालिकेति—पञ्चालदेशे भवा पाञ्चालिका। पाञ्चालैः शिल्पिभिः कृता वा। पुत्रीव कृत्रिमा पुत्रिका। यया बालाः खेलन्ति वस्त्रदन्तदार्वादिनिर्मितविहङ्गादिप्रकृत्या तस्या नामनी॥ पेटति महत्त्वं प्राप्नोतीति पिटकः। 'पिट[1] महत्त्वे'। पेटकश्च पेटा च। मञ्जु मनोज्ञं यथा भवति तथा [2]शत्राद्यैरत्रोष्यत इति मञ्जूषा। 'ऊष रुजायाम्'। मञ्जूषानामानि॥ विहङ्गप्रतिकृतित्वात् विहङ्गिका। भारवहनार्थं यष्टिः। भारयष्टिनाम॥ शक्यते भारं वोढुमिति शिक्यम्। 'शक्लृ शक्तौ'।

कच्यतेऽनेनेति काचः। 'कच बन्धने'। भारयष्टेरुभयतो लम्बमानयोर्नामनी ॥ पद्यतेऽनया पादूः। पादूरेव पादुका। 'पद गतौ'। उपनह्यतेऽनया[3] उपानत्। 'णह बन्धने'। पादत्राणस्य नामनी॥ अनुपदं पादायामेनेव बद्धा अनुपदीना। अनुपादयतायाः तस्या एव नाम ॥ २९–३० ॥

---

[1] 'पिट संघाते' K₃. [2] वस्त्राद्यैरत्र उष्यते K₅, K₆. [3] पादयोः F₂, Pt₂.

(पा.) पाञ्चालिका पुत्रिका—दन्तादिभिः कृता। वस्त्रदन्तकाष्ठादिभिः [1]कृतप्रतिमानामनी। 'सालभञ्जी पुत्तलिका'। एते द्वे च। जतुत्रपुविकारे तु जातुषं त्रापुषं त्रिषु। जतुविकारे जातुषं त्रपुविकारे त्रापुषं च स्यात्। तदुभयं त्रिलिङ्गम्॥ पिटकः पेटकः पेटो मञ्जूषा। पेटनामानि। 'पेट्टि'। अनुक्तम्—'वस्त्रकोशं करोटकम्'। वस्त्रपेटनामनी। 'बोक्कसमु'। अथ विहंगिका भारयष्टिः। स्कन्धचापविशेषनामनी। 'कंबिकावडि'॥ तदालम्बि शिक्यं काचः। भारयष्ट्यवलम्बियन्त्रनामनी। 'उट्टि[2]'। शिक्यं तालव्यादि। काचः चवर्गप्रथमान्तः॥ अथ पादुका पादूः। दारुमयपादरक्षानामनी। 'पादुकलु'। पादूपानत् स्त्री। [3]चर्ममयपादरक्षनामनी। 'उद्दालु'। 'पादुकोपानहोः पादूः' इति वैजयन्ती (पृ. २२२, श्लो. २४)॥ सैवानुपदीना पदायता। सैवोपानत् पादप्रमाणा चेद् अनुपदीना स्यात्। अनुक्तम्[4]—'पादकोशी पादरथी'। 'मुच्चपेरु'॥ २९–३० ॥

---

[1] दार्वादिभिः B₃. [2] A₁ adds 'बोनपुट्टकिलु'. [3] पादरक्षा B₃.
[4] शेषे B₃.

नध्री वर्ध्री वरत्रा स्यादश्वादेस्ताडनी कशा।
चाण्डालिका तु कण्डोलवीणा चण्डालवल्लकी ॥ ३१ ॥

(वि.) नध्रीति—नह्यतेऽश्वमध्यमनया नध्री। 'णह बन्धने'। वर्धते दीर्घीभवतीति वर्ध्री। 'वृधु वृद्धौ'। व्रियते आव्रियतेऽनयेति वरत्रा। 'वृञ् वरणे'। पल्ययनबन्धनाय कृतचर्मरज्जुनामानि॥ [1]कशति ताडयति अनयेति कशा। 'कश गतिशासनयोः'। अश्वादिताडनीनाम[2]॥ चण्डालस्येयं चाण्डालिका। कण्ड्यतेऽभिरक्ष्यते[3] चण्डालेनेति कण्डोला। 'कडि भेदाभिरक्षणयोः'। सा च वीणा च कण्डोलवीणा। चण्डालवीणानामानि ॥ ३१ ॥

---

[1] कश्यते, 'कश मदे' K₃. [2] 'चबुकु पेरु' K₆. [3] तन्त्रीभिराव्रियते K₅.

(पा.) नध्री वर्ध्री वरत्रा स्यात्। वरत्रानामानि। 'वार्लु'। अश्वादेस्ताडनी कशा। अश्वादिताडनोपकरणं कशा स्यात्। 'गुर्रुवुचाटि'। 'सज्जवोमु'। 'कशा-कशिशशाककुशेशक' (?) इति कर्पिणाभ्युदयद्व्यक्षरप्रयोगत् तालव्यान्तः। चाण्डालिका तु—चण्डालवल्लकी। चण्डालवीणानामानि। 'किन्नेर'॥ ३१॥

---

[1] अश्वादेः A_1.

नाराची स्यादेषणिका शाणस्तु निकषः कषः।
व्रश्चनः पत्रपरशुरीषिका तूलिका समे॥ ३२॥

(वि.) नाराचीति—नाराणि नरसमूहान् अञ्चति[1] नाराट् स्वर्णकारः। तस्येयं नाराची। 'अञ्चु गतिपूजनयोः'। इष्यते [2]व्यवहारिजनैरिति एषणिका। 'इषु [3]इच्छायाम्'। स्वर्णकारस्य [4]स्वर्णच्छेदनसाधनस्य नामनी॥ श्यति सुवर्णं तनूकरोतीति शाणः। 'शो तनूकरणे'। निकष्यते स्वर्णमत्रेति निकषः। कषश्च। 'कष हिंसायाम्'। शाणोपलनामानि॥ [5]वृश्च्यते सुवर्णादिकमनेनेति व्रश्चनः। 'ओव्रश्चू छेदने'। पत्रमिव परशुः पत्रपरशुः। स्वर्णादिभेदनिकायाः पत्रशिलाया नामनी॥ [6]ईष्यते चित्रसौष्ठवमनयेति ईषिका। 'ईष उञ्छे'। [7]तूल्यते कृष्यत इति तूलिका। 'तूल निष्कर्षे'। चित्रकाराद्युपकरणनामनी॥ ३२॥

---

[1] चायति K_6.　[2] इष्यते स्वर्णमनया K_6.　[3] 'इष गतौ' K_5, K_6.　[4] तुला K_3.　[5] वृश्चतीति K_5, K_6.　[6] एषतीत्येषिका K_3.　[7] तूलयते वर्णादिकं पूरयतीति, 'तूल पूरणे' Pt_2.

(पा.) नाराची स्यादेषणिका। स्वर्णच्छेदनसाधननामनी। 'शानमु'। स्वर्णकाराणां नाराचाकृतौ लोहतुलायामिदं द्वयमिति केचित्। 'त्रासु'॥ शाणस्तु निकषः कषः। [1]सुवर्णपरीक्षणोपलनामानि। 'वोरगल्लु'। शाणो नाम नृपोऽपि स्यात्।

'शाणे दधानेव कटाक्षबाणम्।'
'गलत्परागं भ्रमिभङ्गिभिः पतत्प्रसक्तभृङ्गावलिनागकेसरम्।
स मारनाराचनिघर्षणस्खलज्ज्वलत्कणं शाणमिदं(व?)व्यलोकत॥'

इत्यादिप्रयोगात् (नैष. १. ९२)॥ व्रश्चनः पत्रपरशुः। आयसभेदकनामनी। 'आकुराय[2]'॥ इषीका। दीर्घमध्यः। तूलिका समे। [3]चित्रलेखनसाधनशलाकानामनी॥ ३२॥

---

[1] स्वर्ण° B_3.　[2] 'बाणनमु' A_1.　[3] काकललेखिनीशलाकानाम। 'मिदुपुखड्डि'। 'काकितं व्राशेदि'। 'इषीका तूलेन विधाय मार्दवम्'। चित्रकरवर्णशलाकानामापि स्यात् A_1.

तैजसावर्तनी मूषा भस्त्रा चर्मप्रसेविका ।
आस्फोटनी वेधनिका कृपाणी कर्तरी समे ॥ ३३ ॥

(वि.) तैजसेति—तैजसं हेमादिकम् आवर्त्यते [1]द्रवीक्रियतेऽस्यामिति तैजसावर्तनी। 'वृतु वर्तने'। मूयते बध्यते स्वर्णादिकमत्रेति मूषा। 'मूङ् बन्धने'। मूष्यते स्वर्णादिकमस्यामिति वा। 'मूष स्तेये'। मूषानामानि ॥ भस्यते दीप्यतेऽनया अग्निरिति भस्त्रा। 'भस भर्त्सनदीप्त्योः'। प्रसेवतेऽग्निमिति प्रसेविका। चर्मनिर्मिता प्रसेविका चर्मप्रसेविका। 'षेवृ सेवने'। चर्मप्रसेविकानाम ॥ आस्फोट्यते विध्यतेऽनया आस्फोटनी। 'स्फुटिर् विशरणे'। विध्यतेऽनयेति वेधनिका। मणिशङ्खादिवेधोपकरणनामनी ॥ कल्पते छेत्तुं [2]समर्थो भवतीति कृपाणी। 'कृपू सामर्थ्ये'। [3]कृत्यते छिद्यतेऽनयेति कर्तरी। 'कृती छेदने'। केशादिकर्तनसाधनस्य नामनी ॥ ३३ ॥

[1] द्रवीभवति K_3, K_6. [2] छेदनाय F_2, Pt_2. [3] कृन्तति K_3.

(पा.) तैजसावर्तनी मूषा। सुवर्णादिद्रवीकरणपात्रनामनी[1]। भस्त्रा चर्मप्रसेविका। चर्ममयवायुपूरकबिलकानामनी। 'कोलिमितित्ति'। अनुक्तम्—'संदंशः स्यात् काकमुखः'। [2]गृध्रचञ्चूपुटाकारमुखतप्तायसादिग्राहकायोनाम। 'पट्टजारु[3]'। संदंशीति समदलम् ॥ आस्फोटनी वेधनिका। [4]वज्रसूचीनामनी ॥ कृपाणी कर्तरी समे। केशवस्त्रादिकृन्तनीनामनी। 'कत्तेर'। कौटिककरवालनामन्यपि भवतः। 'सूनातटिर्वधस्थानं कृपाणीली च कर्तरी' इति वैजयन्ती (पृ. १३९, श्लो. ३७) ॥ ३३ ॥

[1] °करणसाधन° A_1. [2] तप्तलोहग्राहकनामनी B_3. [3] 'पट्टुगाट' B_3.
[4] सूचिका B_3.

वृक्षादनी वृक्षभेदी टङ्कः पाषाणदारणः ।
क्रकचोऽस्त्री करपत्रमारा चर्मप्रभेदिका ॥ ३४ ॥

(वि.) वृक्षादनीति—वृक्षोऽद्यते भिद्यतेऽनयेति [1]वृक्षादनी। 'अद भक्षणे'। वृक्षं भिनत्तीति वृक्षभेदी। 'भिदिर् विदारणे'। वृक्षभेदिनः परशोर्नामनी ॥ टेत्यनुकरणशब्दं करोतीति [2]टङ्कः। पाषाणं दारयतीति पाषाणदारणः। 'दॄ विदारणे'। पाषाणभेदकस्यायोविकारस्य नामनी ॥ क्र इति शब्दं कचतीति क्रकचः। 'कच बन्धने'। करकरेति शब्दोच्चारणेन पततीति करपत्रम्। 'पत्लृ गतौ'। दारुच्छिद्रकरणसाधनस्य

नामनी ॥ आ इयर्ति चर्मेति आरा[3]। ‘ऋ गतौ प्रापणे च’। चर्म प्रभिनत्तीति चर्मप्रभेदिका। चर्मभेदिकाया नामनी ॥ ३४ ॥

[1] वृक्षादनः K₅, K₆.
[2] कायति, ‘कै शब्दे’ K₃; टङ्क्यते, ‘टकि बन्धने’ K₅.
[3] आरति चर्म पीडयति, ‘अर भेदने’ K₂.

(पा.) वृक्षादनी वृक्षभेदी। [1]वृक्षरन्ध्रकरायसनामनी। ‘उलि’॥ टङ्कः पाषाणदारकः। [2]पाषाणभेदकनामनी। ‘काशवुलि’। क्रकचः करपत्रं स्यात्। करपत्रनामनी। ‘करकसरंवमु’॥ अनुक्तम्—‘[3]वाशी स्याद् दारुतक्षणी’। वाश्या नाम। ‘बाडसि[4]’॥ आरा चर्मप्रभेदिका। [5]चर्मभेदिका आरा स्यात्। ‘[6]आरि’॥ ३४॥

[1] °रन्ध्रादिकरणनामनी B₃.
[2] शिलाभक्षकनाम A₁; वासी B₃.
[3] वास्या: B₃.
[4] ‘बाडिते’ B₃.
[5] A₁ adds चर्मकार°.
[6] आरे B₃.

सूर्मी स्थूणायःप्रतिमा शिल्पं कर्म कलादिकम्।
प्रतिमानं प्रतिबिम्बं प्रतिमा प्रतियातना प्रतिच्छाया॥३५॥
प्रतिकृतिरर्चा पुंसि प्रतिनिधिरुपमोपमानं स्यात्।

(वि.) सूर्मीति—सुष्ठु शोभनमूर्वति अमङ्गलत्वादिति सूर्मी। ‘उर्वी हिंसायाम्’। चिरकालं तिष्ठतीति स्थूणा। ‘ष्ठा गतिनिवृत्तौ’। अयःप्रतिमानामनी ॥ शिल्यन्ते [1]उच्चीयन्ते सर्वाः कला अत्रेति शिल्पम्। ‘शिल उञ्छे’। गीतादिचतुःषष्टिकलादिकर्मनाम ॥ प्रतिमीयतेऽनेनेति प्रतिमानम्। ‘माङ् माने’। प्रतिबिम्ब्यते प्रतिमीयतेऽनेनेति प्रतिबिम्बम्[2]। ‘बिम्ब दीप्तौ’। प्रतिमीयतेऽनयेति प्रतिमा। प्रतियात्यतेऽनया प्रतियातना। ‘यती [3]प्रयत्ने’। प्रतिरूपा छाया प्रतिच्छाया। प्रतिरूपं क्रियत इति प्रतिकृतिः[4]। अर्च्यत इत्यर्चा। ‘अर्च पूजायाम्’। प्रतिनिधीयत इति प्रतिनिधिः। ‘डुधाञ् धारणपोषणयोः’। मूर्तिसदृशशिलादिप्रतिरूपस्य नामानि ॥ उपमीयते [5]इत्युपमा। उपमानं च। ‘माङ् माने’। अन्यस्य वस्तुनो गुणान् अन्यस्मिन् वस्तुनि आरोपस्य नामनी ॥ ३४ ॥

[1] अभ्यस्यत इति F₂, Pt₂.
[2] प्रतिनिधिरूपं बिम्बं F₂, Pt₂.
[3] ‘यत निकारोपस्कारयोः’ K₃.
[4] K₃ adds ‘डुकृञ् करणे’.
[5] उपमीयतेऽनेन, उपमितिर्वा Pt₂.

(पा.) सूर्मी स्थूणायःप्रतिमा। लोहप्रतिमानामनी। [1]शूर्मिस्तालव्यादिरिति श्रीधरः। अयःशब्दस्ताम्रादिलोहवचनः। ‘हरिणी हेमप्रतिमा [2]सूर्मिः स्थूणान्यलोहजा’।

इति वैजयन्ती (पृ. १३७, श्लो. २२)॥ शिल्पं कर्म कलादिकम्। अत्र कलाशब्देन गीतवाद्यादिका बाह्याः कलाश्चतुःषष्टिक्रिया, आलिङ्गनचुम्बनाद्याश्चाभ्यन्तराश्चतुःषष्टिः परिगृहीताः। आदिशब्देन विश्वकर्माद्युक्तकारुकर्म संगृहीतम्। तत् सर्वं शिल्पं स्यात्॥ प्रतिमानं प्रतिविम्बं—पुंसि प्रतिनिधिः। [3]शिलादिनिर्मितविनायकादिमूर्तिनामानि[4]॥ उपमोपमानं स्यात्॥ ३५॥

---

[1] शूर्मी B_3. [2] शूर्मिः A_1. [3] A_1 adds लोह. [4] निर्मितविष्णु° A_1.

वाच्यलिङ्गाः समस्तुल्यः सदृक्षः सदृशः सदृक्॥ ३६॥
साधारणः समानश्च स्युरुत्तरपदे त्वमी।
निभसंकाशनीकाशप्रतीकाशोपमादयः॥ ३७॥

(वि.) वाच्येति—समति समीभवतीति समः[1]। 'षम ष्टम अवैकल्ये'। तुलया संमित इव तुल्यः। समान इव दृश्यते सदृक्षः। सदृशः। सदृक् च। 'दृशिर् प्रेक्षणे'। समानमाधारणं मानमस्येति साधारणः। समानं मानमस्येति समानः। नितरां भातीति निभः। 'भा दीप्तौ'। संकाशते इति संकाशः। 'काशृ दीप्तौ'। नितरां काशते नीकाशः। प्रति काशते प्रतीकाशः। उपमीयत इत्युपमा। आदिग्रहणात् भूतरूपकल्पादयो[2] गृह्यन्ते। उत्तरपदीभूता निभादयः समादयश्च तुल्यनामानि वाच्यलिङ्गाश्च भवन्ति। उत्तरपदीभूता यथा—चन्द्रनिभः, सूर्यप्रतीकाशः, विष्णुरूपः, कामसदृशः, नारायणसाधारण इत्यादि॥ ३६–७॥

---

[1] सम्यते स्तूयते Pt_2. [2] K_5 omits कल्प°.

(पा.) वाच्यलिङ्गाः समस्तुल्यः—प्रतीकाशोपमादयः। समाननामानि। 'सरि'। अत्रोपमोपमानशब्दावाविष्टलिङ्गौ।

'रात्रावेव मधावेव राकायामेव सुन्दरम्।
मुखचन्द्रस्य ते चन्द्रं कथयेदुपमां कथम्॥
न मञ्जुभाषणं पद्मं न मन्दहसितः शशी।
अतोऽन्यदपि पश्यामि नोपमानं मुखस्य ते॥'

समादिशब्दा वाच्यालिङ्गाः। 'शशिना सदृशं वक्त्रं वक्त्रस्य सदृशः शशी' इत्यादि। निभादिशब्दा वाच्यलिङ्गा अपि उत्तरपदीभूता समासचरमावयवा एव। 'सागरः सागरोपमः' (रामा॰ ६. ११०. २४) 'व्याजहार हरसूनुसंनिभः' (रघु. ११. ८३)॥ ३६–७॥

कर्मण्या तु विधाभृत्याभृतयो भर्म वेतनम् ।
भरण्यं भरणं मूल्यं निर्वेशः पण इत्यपि ॥ ३८ ॥

(वि.) कर्मण्येति—कर्मणि साध्वी कर्मण्या[1] । विधीयते कर्मानया विधा । ‘डुधाञ् धारणपोषणयोः’ । भ्रियते पोष्यतेऽनयेति भृत्या । भृतिश्च । भर्म च । भरण्यं च । भरणं च । ‘डुभृञ् धारणपोषणयोः’ । वीयते भ्रियतेऽनेनेति वेतनम् । ‘वी [2]गत्यादिषु’ । मूलेन साम्यं मूल्यम्[3] । निर्विश्यते भुज्यत इति निर्वेशः । ‘विश प्रवेशने’ । पण्यते व्यवह्रियतेऽनेनेति पणः । ‘पण व्यवहारे. स्तुतौ च’ । वेतननामानि ॥ ३८ ॥

[1] कर्मणा संपद्यते F_2, Pt_2.　　[2] ‘वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु’ Pt_2.
[3] मूलेनानाम्यं F_2, Pt_2.

(पा.) कर्मण्या तु विधा—भर्म वेतनम् । वेतनमन्तस्थादि । भरण्यं भरणं—पण इत्यपि । [1]वेतननामानि । ‘[2]कूलि’ ॥ ३८ ॥

[1] मूल्यनामानि A_1.　　[2] ‘जीतमु’ B_3.

सुरा हलिप्रिया हाला परिस्रुद् वरुणात्मजा ।
गन्धोत्तमा प्रसन्नेराकादम्बर्यः परिस्रुता ॥ ३९ ॥
मदिरा कश्यमद्ये चाप्यवदंशस्तु भक्षणम् ।

(वि.) सुरेति—सूयतेऽभिषूयत इति [1]सुरा । ‘षुञ् अभिषवे’ । हलिनो बलभद्रस्य प्रिया हलिप्रिया । हलति लज्जां नाशयतीति हाला[2] । ‘हल विलेखने’ । परिस्रवतीति परिस्रुत् । परिस्रुता[3] च । ‘स्रु स्रवणे’ । वरुणास्यात्मजा वरुणात्मजा । गन्धेनोत्तमा गन्धोत्तमा । प्रसीदतीति प्रसन्ना । ‘षद्लृ विशरणादौ’ । मदमेत्यनयेति इरा[4] । ‘इण् गतौ’ । [5]कदम्बकोटरे जाता कादम्बरी । कत् कुत्सितं नीलमम्बरं यस्य कदम्बरः हली । तस्येयं प्रिया कादम्बरी । मदयतीति मदिरा[6] । ‘मदी हर्षे’ । कश्यते मदमुपैत्यनेनेति कश्यम् । ‘कश गतिसाधनयोः’ । मदे साधु मद्यम् । ‘मदि हर्षग्लपनयोः’ । माद्यन्त्यनेनेति वा । सुरानामानि ॥ अवदश्यते पानसमये अवदंशः । उपदंश इति वा पाठः । ‘दंश दशने’ । सुरापानसमये कृतभक्षणस्य नाम ॥ ३९ ॥

[1] सुष्ठु रान्त्येनां F_2, Pt_2.　　[2] हीयते लज्जानया K_3, Pt_2.　　[3] परिसृतेति वा पाठः K_6.　　[4] यन्ति भ्राम्यन्त्यनया Pt_2.　　[5] Pt_2 adds गोमन्तपर्वते.　　[6] माद्यन्त्यनया K_3, Pt_2.

(पा.) सुरा हलिप्रिया—कश्यमद्ये चापि । सुरानामानि । शुण्डा स्वादुरसा कल्या मधूलिः कापिशायनम् । एतानि पञ्च च ॥ अवदंशस्तु भक्षणम् । पलाण्ड्वादिपानसाधननाम ॥ ३९ ॥

शुण्डापानं मदस्थानं मधुवारा मधुक्रमाः ॥ ४० ॥
मध्वासवो माधवको मधु माद्वीकमद्वयोः ।
मैरेयमासवः शीधुर्मेदको जगलः समौ ॥ ४१ ॥

(वि.) शुण्डेति—शुण्डा सुरा पीयतेऽत्रेति शुण्डापानम् । 'पा पाने'। शुण्डा पानमिति पदद्वयं वा। मदस्य स्थानं मदस्थानम् । सुरागृहनामनी ॥ मधुनो मद्यपानस्य वाराः मधुवाराः । मधुनो मद्यस्य क्रमाः परिपाट्यः मधुक्रमाः । मदेनासक्तत् मधुपानावसरनामनी । मधुना मधुकपुष्पेण कृतः आसवः मध्वासवः[1] । मधुनो द्राक्षायाः विकारः माधवकः । मधु प्रकृतिकत्वात् मधु । मृद्वीका द्राक्षा तस्या विकारो माद्वीकम् । द्राक्षाकृतमद्यनामानि ॥ एते चत्वारो माक्षिककृतमद्यस्यैव पर्याया इति केचित् ॥ इरां सामान्यसुरां स्वरुच्या मेति प्रतिषेधयतीति मेरा । सैव मैरेयम्[2] । धातकीपुष्पमिश्रगुडसहितधान्याम्बुकृतमद्यनाम ॥ आसूयते अभिषूयत इति आसवः[3] । अपक्वेक्षुरसकृतमद्यनाम ॥ मत्ता शेरतेऽनेनेति शीधुः । 'शीङ् स्वप्ने'। पक्वेक्षुरसकृतमद्यनाम ॥ मेद्यति स्निह्यत्यत्र सुरेति मेदकः । 'ञिमिदा स्नेहने'। भृशं सुरां गलति आदत्त इति जगलः । 'गल अदने'। सुरासंधानकरकल्कनामनी ॥ ४०–१ ॥

---

[1] माक्षिककृतमद्यनाम K_5, K_6. [2] मिरायां देशे भवं Pt_2. [3] K_5, K_6 add 'षुञ् अभिषवे'; Pt_2 adds इक्षुभ्यः .

(पा.) शुण्डापानं मदस्थानम् । पानगृहनामनी ॥ मधुवारा मधुक्रमाः । [1]सुरापानक्रमनामनी । '[2]मारचुकोनित्रागुण'। मध्वासवो माधवको मधु । माधवशब्दसाहचर्यं केचिदिच्छन्ति ।

'मकरन्दस्य मद्यस्य माक्षिकस्य च वाचकः ।
अर्धर्चादिगणे पाठात् पुंनपुंसकयोर्मधुः ॥'

इति दुर्गसिंहः । माध्वीकमद्वयोः । अद्वयोरिति विशेषविधिर्मधुमाध्वीकशब्दयोरनित्यताज्ञापनार्थः । मधूकपुष्पजनितसुरानामानि ॥ मैरेयमासवः शीधुः[3] । [4]इक्षुरसजनितसुरानामानि ॥ मेदको जगलः समौ । पैष्टिकसुरानामनी ॥ ४०–१ ॥

---

[1] A_1 adds क्रमेण. [2] B_3 omits. [3] सीधुः B_3. [4] मद्य° B_3.

संधानं स्यादभिषवः किण्वं पुंसि तु नग्नहूः।
कारोत्तमः सुरामण्ड आपानं पानगोष्ठिका ॥ ४२ ॥

(वि.) संधानमिति—मद्यस्य संधा [1]संधानम्। 'डुधाञ् धारणपोषणयोः'। अभिषूयत इत्यभिषवः। 'षुञ् अभिषवे'। फलादिसंधानस्य नामनी ॥ किणन्ति मत्ता अनेनेति किण्वम्। 'किण शब्दे'। नग्ना हूयन्तेऽनेनेति नग्नहूः[2]। 'ह्वेञ् स्पर्धायां शब्दे च'। अयं शब्दः पुंसि वर्तते। नानाद्रव्यकृतसुरासाधनस्य नामनी ॥ कारेण क्रियया उत्तमः कारोत्तमः। सुराया मण्डः। सुराग्रभागनामनी ॥ आपिबन्ति संभूय सुरामत्रेति आपानम्। 'पा पाने'। गावो बद्धवाचः अत्र तिष्ठन्तीति गोष्ठी[3]। पानस्य पानाय वा गोष्ठी पानगोष्ठिका ॥ सुरापानगोष्ठीनामनी ॥ ४२ ॥

[1] संदीयते संदानम्। सुरापानमध्ये सर्षपमिश्रभक्ष्यविशेषनामनी K_5, K_6. [2] नग्नैर्हीयते गम्यत इति, 'ओहाङ्गतौ' K_5, K_6. [3] K_3 adds 'ष्ठा गतिनिवृत्तौ'.

(पा.) संधानं स्यादभिषवः। निर्मलत्वनामनी। 'तेंट'। 'आसूतिर्मद्यसंधानमासवोऽभिषवोऽपि च' इति वैजयन्ती (पृ. १४०, श्लो. ५१) ॥ किण्वं पुंसि तु नग्नहूः। सुराबीजनामनी। 'मुलक'। 'नानाद्रव्ये सुराबीजे किण्वादिद्वयम्' इति [1]सर्वधरः ॥ कारोत्तमः सुरामण्डः। सुरादिपिच्छानाम ॥ आपानं पानगोष्ठिका। पानगोष्ठीनामनी ॥ ४२ ॥

[1] 'नानाद्रव्यकृते सुराबीजे किण्वद्वयम्' इति टीकासर्वस्वे (पृ. २८३, श्लो. ४१).

चषकोऽस्त्री पानपात्रं सरकोऽप्यनुतर्षणम्।
धूर्तोऽक्षदेवी कितवोऽक्षधूर्तो द्यूतकृत्समाः ॥ ४३ ॥

(वि.) चषक इति—चषन्ति पिबन्ति सुरामत्रेति चषकः। 'चष भक्षणे'। पानस्य पात्रं पानपात्रम्। सुरापानपात्रस्य नामनी ॥ सरति सुरात्र सरकः। 'सृ गतौ'। अनुतृष्यन्त्यनेनेति अनुतर्षणम्। 'ञितृषा पिपासायाम्'। सुरापरिवेषणनामनी[1] ॥ धूर्वति[2] हिनस्तीति धूर्तः। 'धूर्व हिंसायाम्'। अक्षैर्दीव्यतीति[3] अक्षदेवी। 'दिवु क्रीडादौ'। किं तवास्तीति वदतीति कितवः। अक्षेषु धूर्तः अक्षधूर्तः। द्यूतं करोतीति द्यूतकृत्। द्यूतक्रीडाकरस्य नामानि ॥ ४३ ॥

[1] K_5, K_6 add चत्वार्यपि नामानि चषकस्यैवेति केचित्. [2] Pt_2 adds कुटुम्बादिकमिति. [3] K_5, K_6 add क्रीडति.

(पा.) चषकोऽस्त्री पानपात्रं—अनुतर्षणम्। सुरापानपात्रनामानि। अपिशब्देनास्त्रीति पदं सरकेणापि संबध्यते। अत एव '[1]अर्धर्चाः पुंसि च' इत्यत्र महाभाष्ये सरकः सरकमित्युभयमुदाहृतम्। 'चषकश्चानुतर्षश्च सरकश्च' इति भागुरिः। नपुंसकमध्यप्रयोगात् सरकः पुंनपुंसकश्च। पानपात्रमात्रनामानीति सर्वधरः। केचित्तु चषकादिद्वयं सुरापानपात्रे, सरकादिद्वयं सुरापरिवेषणे वर्तत इत्याहुः। शेषकारेण तु पक्षद्वयमप्युक्तम् 'सरकोऽप्यनुतर्षश्च चषके परिवेषणे' इति। 'सरकं चषकं चास्त्री गल्वर्तोऽप्यनुकर्षणम्' इति वैजयन्ती (पृ. १४०, श्लो. ५३)। 'शीधौ च शीधुनः पाने चषके सरकोऽस्त्रियाम्' इति रुद्रः॥ धूर्तोऽक्षदेवी—द्यूतकृत्समाः। द्यूतकारनामानि। 'जूजंगांडु'। 'शारिको[2] जगलश्च स्यात् साक्षिकः कृष्णकोहलः'। एतानि चत्वारि च॥ ४३॥

[1] २. ४. ३१. [2] चौरिकः A_1.

स्युर्लग्नकाः प्रतिभुवः सभिका द्यूतकारकाः।
द्यूतोऽस्त्रियामक्षवती कैतवं पण इत्यपि॥ ४४॥

(वि.) स्युरिति—लगन्ति द्यूते प्रसज्यन्ते लग्नकाः। 'लग सङ्गे'। अधमर्णस्य प्रतिनिधयो भवतीति प्रतिभुवः। 'भू सत्तायाम्'। द्यूतप्रतिभूनामनी॥ सभास्यास्तीति सभिकः। द्यूतं कारयन्तीति द्यूतकारकाः[1]। यः स्वगृहे द्यूतं कारयति तस्य नामनी॥ दीव्यते स्मानेन द्यूतः[2]। 'दिवु क्रीडादौ'। अक्षा अस्यां सन्तीति अक्षवती। कितवस्य कर्म कैतवम्। पण्यते व्यवह्रियतेऽनेन पणः[3]। द्यूतक्रीडनस्य नामानि॥ ४४॥

[1] Pt_2 adds 'डुकृञ् करणे'. [2] देवनं F_2, Pt_2. [3] F_2, K_3 add 'पण व्यवहारे स्तुतौ च'.

(पा.) स्युर्लग्नकाः प्रतिभुवः। मदर्थमयं दास्यतीत्यन्येन नियुक्तनामनी। '[1]जामीनु'॥ सभिका द्यूतकारकाः।

'द्यूतशालामधिष्ठाय द्यूतोपकरणान्वितः।
यः प्रवर्तयति द्यूतं सभिकः स उदाहृतः॥'

द्यूतप्रवर्तकनामनी। लग्नकादिचतुष्टयमेकार्थमिति स्वामी[2]। 'अच्चेटिवांडु'॥ द्यूतो स्त्रियामक्षवती। स्त्रीलिङ्गः। 'नियुज्य कुन्तीसुतमक्षवत्याम्'। कैतवं पण इत्यपि।

द्यूतनामानि। 'जूजमु'। कलिखल इति क्रीडाद्यूतम्। 'क्रीडाद्यूते [3]कलिखल इति वैजयन्ती (पृ. ३०१, श्लो. १४०)। क्रीडाद्यूतनाम ॥ ४४ ॥

[1] 'पूंटकापु' A_1.   [2] द्वौ द्वौ भिन्नार्थौ, आद्ययोः सर्वसामान्यात् इति मुद्रितग्रन्थे (पृ. २३५).   [3] 'समाह्वयः' इति मुद्रितग्रन्थे.

पणोऽक्षेषु ग्लहोऽक्षास्तु देवनाः पाशकाश्च ते।
परिणायस्तु शारीणां समन्तान्नयनेऽस्त्रियाम् ॥ ४५ ॥

(वि.) पण इति—गृह्यते इति ग्लहः। 'ग्रह [1]उपादाने'। अक्षविषयपणनाम ॥ अक्षन्ति[2] पाणिभिरिति अक्षाः। 'अक्षू [3]व्याप्तौ'। दीव्यन्ति एभिरिति देवनाः। 'दिवु क्रीडादौ'। पाश्यन्ते बध्यन्त एभिरिति पाशकाः। 'पश बन्धने'। प्रासक इति पाठे 'असु क्षेपणे' इति धातुः। अक्षनामानि ॥ परितः शारीणां नयनं परिणायः। शारीणां समन्तान्नयनस्य क्षेपणस्य नाम ॥ ४५ ॥

[1] ग्रहणे K_6.   [2] अक्ष्णुवन्ति F_2, Pt_2.   [3] क्रीडायाम् K_5, K_6.

(पा.) पणोऽक्षेषु ग्लहः। पराजये देयद्रव्यनाम। 'पिड्ढमि'॥ अक्षास्तु—पाशकाश्च ते। पाशकनामानि। शेषे—'प्रासकाः पाशकाः पाशाः'। एतानि च। परिणायस्तु शारीणां—अस्त्रियाम्। 'ना पर्याणे विहङ्गे स्त्री शारिर्द्यूते गुडे न षण्' इति वैजयन्ती (पृ. २३७, श्लो. ८८)। शारीणां सव्यापसव्यप्रसारणं परिणायः [1]स्यात् ॥ ४५ ॥

[1] B_3 adds शेषे—'चेलन्यः शारयः स्त्रियः' इति.

अष्टापदं शारिफलं प्राणिद्यूतं समाह्वयः।
उक्ता भूरिप्रयोगत्वादेकस्मिन् येऽत्र यौगिकाः ॥ ४६ ॥
ताद्धर्म्यादन्यतो वृत्तावूह्या लिङ्गान्तरेऽपि ते।
इत्यमरसिंहकृतौ नामलिङ्गानुशासने।
द्वितीयः काण्डो भूम्यादिः साङ्ग एव समर्थितः ॥ ४७ ॥

इति श्रीमदमरसिंहकृते नामलिङ्गानुशासने शूद्रवर्गः

(वि.) अष्टापदमिति—[1]अष्टौ पदान्यस्य अष्टापदम्। शारिफलकनाम ॥ प्राणिनां द्यूतं प्राणिद्यूतम्। [2]स्पर्धया समाहूयन्ते जना अत्रेति समाह्वयः। 'ह्वेञ्

स्पर्धायां शब्दे च'। [3]कुक्कुटमहिषादिभिः क्रियमाणस्य द्यूतस्य नाम ॥ अत्र वर्गे ये यौगिकाः शब्दाः मायाकारादयो भूरिप्रयोगत्वात् प्रयोगाधिक्यात् एकस्मिन्नेव लिङ्गे पुंलिङ्गे उक्ताः ते शब्दाः ताद्धर्म्यात् मायाकारादिधर्मयोगाद् अन्यतो वृत्तौ स्त्र्यादिवृत्तौ सत्यां लिङ्गान्तरेऽपि स्त्रीलिङ्गे नपुंसकलिङ्गे च। एवमूह्याः ऊहनीयाः। तद्यथा मायाकारी स्त्री। मायाकारि कुलमित्यादि ॥ ४६–७ ॥

इति वङ्गलकामयभट्टोपाध्यायसूनुलिङ्गयसूरिविरचितायाममरकोशपदविवृतौ शूद्रवर्गः

---

[1] F$_2$, Pt$_2$ add प्रतिपङ्क्ति. [2] K$_5$, K$_6$ add संघर्षेण. [3] K$_2$, K$_3$ add प्राणिभिः.

(पा.) अष्टापदं शारिफलम्। शारिफलकनामनी। 'पगडसालपिंट' 'अदिपाशापट्ट'॥ प्राणिद्यूतं समाह्वयः। मेषकुक्कुटादिद्यूतनाम।

'अप्राणिभिर्यत् क्रियते तल्लोके द्यूतमुच्यते।
प्राणिभिः क्रियमाणं तु स विज्ञेयः समाह्वयः'॥

अनुक्तम्—'चतुरङ्गं बिन्दुतन्त्रः'। 'चतुरङ्गमु'॥ उक्ता भूरिप्रयोगत्वात्—लिङ्गान्तरेऽपि ते। अत्रास्मिन् वर्गे ये केचिद्यौगिका मायाकारमार्दङ्गिकादिशब्दा भूरिप्रयोगत्वात् प्रचुरप्रयोगदर्शनाद् एकस्मिन् पुंलिङ्गमात्रे उक्ताः कथिताः, ते शब्दास्ताद्धर्म्यात् तद्धर्मयोगाद् अन्यतो वृत्तौ स्त्र्यादिवृत्तौ सत्यां लिङ्गान्तरेऽपि स्त्र्यादिलिङ्गेऽपि ऊह्याः ऊहनीयाः।

'मायाकारो मार्दङ्गिको वैणवो वैणिको लोकः।
मायाकारी मार्दङ्गिकी वैणवी वैणिकी सभा।
मायाकारं मार्दङ्गिकं वैणवं वैणिकं वृन्दम् ॥'

सौचिककुम्भकारादिशब्दा जातिवचनत्वादसर्वलिङ्गा एव। 'आकृतिग्रहणा जातिर्लिङ्गानां च न सर्वभाक्' इति जातिलक्षणम्। सौचिकः, सौचिकी। कुम्भकारः, कुम्भकारी। इत्यादि ॥ ४६–७ ॥

इति श्रीवत्स[1]नृसिंहसूरिसुतमल्लिनाथसुधीविरचितेऽमरपदपारिजाते शूद्रवर्गः

श्रीवत्सान्वयमान्येन मल्लिनाथेन निर्मिते।
व्याख्यानेऽमरसिंहस्य द्वितीयः काण्ड उम्भितः ॥

---

[1] °नरसिंह° A$_1$.